॥ श्रीः ॥

श्री करवीर निवासिनी महालक्ष्मी

॥ श्रीः ॥

श्री चण्डिकोपास्तिदीपिकाग्रन्थः

(श्रीसप्तशतीटीकासहितः)

श्री चण्डिकोपास्तिदीपिकाग्रन्थः

ब्रह्मीभूत श्रीमज्जगद्गुरु शं
श्री विद्यानृसिंहभारती स्वामी
(आत्मारामशास्त्री पित्रे)

कव्हर छपाई : नवरंग ऑफसेट, कोल्हापूर.



2873
ST-48

॥ श्रीः ॥

श्रीचण्डिकोपास्तिदीपिकाग्रन्थः

(श्रीसप्तशतीटीकासहितः)

॥ श्रीः ॥

श्रीचण्डिकोपास्तिदीपिकाग्रन्थः

(श्रीसप्तशतीटीकासहितः)

ब्रह्मीभूत श्रीमज्जगद्गुरु शंकराचार्य
श्रीविद्यानृसिंहभारती स्वामी
पीठ करवीर
(आत्मारामशास्त्री पित्रे) प्रणीतः

प्रथमावृत्तिः १९४६
द्वितीयावृत्तिः १९९८

मूल्यम्
एकतः अशीति-रुप्यक पर्यंतम् ।

श्रीमज्जगद्गुरु शंकराचार्य
श्री विद्याशंकर भारतीस्वामी पीठ करवीर
(नरहरशास्त्री मारुलकर)
इत्येतैः प्रकाशितः

(अस्य सर्वेऽधिकाराः राजशासनानुसारेण स्वायत्तीकृताः)

प्रथमावृत्ती :
अयं ग्रन्थ : **बाळकृष्ण नारायण ठकार** इत्याख्यैः करवीरपुरे स्वीय-
श्रीसिद्धेश्वरमुद्रणालये मुद्रितः

द्वितीयावृत्ती :
अयं ग्रन्थ : **श्रीपाद सीताराम गोसावी** इत्याख्यैः करवीरपुरे स्वीय-
राजहंस प्रिंटिंग प्रेस मुद्रितः

प्रस्तावना

श्री 'चंडिकोपास्ति दीपिका' हा अद्वितीय ग्रंथ, महामहीम ब्रम्हीभूत श्री विद्या नृसिंह भारतीस्वामी श्रीमद्‌जगद्‌गुरु शंकराचार्य करवीर पीठ कोल्हापूर (पूर्वाश्रमीचे श्री पित्रे शास्त्री) यांनी संस्कृत भाषेत लिहिला. सदर ग्रंथाचे प्रथम प्रकाशन 'श्रीं' चे शिष्य-वर्य प. पू. ब्रम्हीभूत श्री विद्याशंकर भारती स्वामी शंकराचार्य करवीर पीठ, कोल्हापूर (पूर्वाश्रमीचे श्री मारुलकर शास्त्री) यांनी केले. तो दिवस दि. ६-२-१९४६ होता. सर्व भारतभर सर्व भाषिक पंडितानी सदर ग्रंथाचे अपूर्व स्वागत केले. भारतातील निरनिराळ्या भागात 'सप्तशती' या ग्रंथाचे निरनिराळे पाठ, निरनिराळ्या अनुष्ठान पद्धती, हवनासंबंधी मतभेद, आग्रह, दुराग्रह यांचा सुकाळ होता, हे लक्षी घेऊन स्वत: श्री स्वामीनी- ते स्वत: शक्तिपासक असलेमुळे भगवतीचे प्रेरणेने सर्व समन्वयात्मक पद्धतीने त्यातील त्रुटी साधार भरुन काढून सदर ग्रंथाची योजना केल्यामुळे समाजाच्या सर्व थरात तो लोकप्रिय झाला. हल्ली त्या ग्रंथाच्या प्रती दुर्मिळ असून अनेकानी ग्रंथाच्या झेरॉक्स प्रती केल्या. हे जाणून विद्यमान स्वामी जगद्‌गुरु शंकराचार्य विद्याशंकर भारती यानी स्वत: व विश्वस्त मंडळ यानी पुनर्मुद्रणाची योजना आखली आणि गेल्या कांही दिवसात ती अंमलातही आणली. दि. ६-५-९८ ते ११-५-९८ या काळात श्री आद्य शंकराचार्यांचे प्रतिवार्षिक जयंती उत्सवात त्या ग्रंथाचे उद्‌घाटन करणेचे ठरले आहे. सर्व होताना आम्हाला अत्यानंद होत आहे. हल्लीचे महर्गतेच्या कालात ग्रंथाची रास्त किंमत वाढवावी लागत आहे. सदर ग्रंथ जनता जनार्दन चरणी समर्पण करीत आहोत. ॐ तत्सत्

विद्याशंकर भारती स्वामी

द्वारा - श्रीमद् जगद्‌गुरु शंकराचार्य करवीर पीठ,
कोल्हापूर ४१६ ००२

आभार प्रदर्शन

(प्रथमावृत्ती)

अखिल देवी हिंदुभक्तास मार्गदर्शक होणारा ''श्रीचण्डिकोपास्तिदीपिका'' हा ग्रंथ ब्रह्मीभूत **श्रीविद्यानृसिंहभारती स्वामी** (आत्मारामशास्त्री पित्रे) जगद्गुरु शंकराचार्य पीठ करवीर यांनीं लिहिला असून तो त्यांचे शिष्य **श्रीविद्याशंकर भारती स्वामी** (नरहरशास्त्री मारुलकर) **जगद्गुरु पीठ करवीर** यांचेकडून प्रसिद्ध करण्यात येत आहे. सदर ग्रंथाचीं मुद्रितें तपासण्याचें कामीं ब्रह्मीभूत पित्रे शास्त्री यांचे शिष्य वे. शा. सं. **बाळाचार्य माधवाचार्य खुपेरकरशास्त्री** व वे. शा. सं. **दत्तात्रय केशव लेलेशास्त्री** यांनीं आपला अमूल्य वेळ खर्च करुन जें अतिशय सहाय्य केलें तें एकप्रकारें त्यांनी गुरुसेवाच केली असून त्याबद्दल त्यांचे व सदर ग्रंथ चांगलेप्रकारें छापून दिलेबद्दल श्रीसिद्धेश्वर प्रिंटिंग प्रेसचे मालक **श्री. बाळकृष्ण नारायण ठकार** यांचे आम्ही आभारी आहो.

कोल्हापूर
दि. ६-२-१९४६

गोपाळ विठ्ठल कुलकर्णी,
माजनाळकर B.A. LL.B.
कारभारी नि॥ श्रीस्वामी
श्रीजगद्गुरु शंकराचार्य पीठ करवीर

ऋणनिर्देश

(द्वितीयावृत्ती)

'चंडिकोपास्तिदीपिका' या ग्रंथाची १९४६ मध्ये प्रकाशित झालेली आवृत्ती संपून गेली. अभ्यासकांकडून मागणी येत होती. पण आतापर्यंत नवीन आवृत्ती प्रकाशित करण्याचा योग आला नव्हता. करवीर पीठाधिपती शंकराचार्यांनी व्यवस्थापक मंडळ, श्रीजगद्गुरु शंकराचार्य पीठ करवीर यांच्याकडे या दुर्मिळ ग्रंथाच्या नवीन आवृत्ती बाबत विचारणा केली. सर्व विश्वस्तांनी या ग्रंथाच्या प्रकाशनास अनुमती दिली. राजहंस प्रिंटिंग प्रेसचे श्री. गोसावी व त्यांच्या अन्य सहकाऱ्यांनी उत्कृष्ट सहकार्य देऊन निश्चित वेळात ग्रंथ सिद्ध करून दिला. प. पूज्य विद्याशंकर भारती, शंकराचार्य करवीर पीठ यांची प्रस्तावना लाभली. रसिक व विद्वान सर्वांच्याकडून मिळालेल्या सहयोगाबद्दल ऋणनिर्देश करणे जरुरीचे आहे. करवीर पीठाच्यावतीने सर्वांचे आभार

कोल्हापूर
दि. १०-५-१९९८

प्रफुल्लचंद्र रावजी मुंडरगी
अध्यक्ष, व्यवस्थापक मंडळ
श्रीजगद्गुरु शंकराचार्य पीठ करवीर

।। श्री ।।

अथ चण्डिकोपास्तिदीपिका प्रारभ्यते

तत्रादौ तस्या उपोद्घातप्रकाशः ।

॥ श्रीः ॥

अथ श्रीचण्डिकोपास्तिदीपिकाया विषयानुक्रमः प्रारभ्यते.

तत्र—

		पृष्ठाङ्कः
१	उपोद्धातप्रकाशः	१–१०
२	दीक्षाप्रकाशः	३–२२
३	आह्निकप्रकाशः	२५–३३
४	नित्यार्चाप्रकाशः	३७–१४०
५	नैमित्तिकार्चाप्रकाशः	१५१–१८०
६	जपप्रकाशः	१८३–२४९
७	यागप्रकाशः	२५३–२७३
८	मन्त्रविभागप्रकाशः	२७७–२९३
९	चण्डीस्तवार्थप्रकाशः	२९७–७२४
१०	उत्तराङ्गं ग्रन्थसमाप्तिश्च	

॥ श्री ॥

उपोद्घातप्रकाशः ।

श्रीगणेशाय नमः ॥ अथ चण्डिकोपास्तिदीपिका प्रारभ्यते ॥ आदौ तस्या उपोद्घातप्रकाशः ॥ नत्वा विघ्नाद्रिदलनरदनं द्विरदाननं ॥ पित्रोर्निशासुधावर्णसंयोगादरुणच्छविं ॥ १ ॥ मूकः कविः कविर्मूको यत्कृपामर्षलेशतः ॥ भवेत्तां शारदाब्जास्यां शारदामभिवाद्य च ॥ २ ॥ प्रणम्य प्रणतप्राणत्राणादृतरणाङ्गणां ॥ चण्डिकां चण्डमुण्डादिदेवद्विड्दण्डपण्डितां ॥ ३ ॥ प्रत्ययाद्रूपभेदेऽपि न भिन्ना प्रकृतिर्ययोः ॥ तौ श्रीहरिहरौ नत्वा रमोमावल्लभावुभौ ॥ ४ ॥ अद्वैतबोधामृतवर्षणेन संसारदावानलतापतप्तान् ॥ जनान् समस्तान् व्यदधुः प्रशान्तांस्तान् शंकराचार्यगुरून् प्रणम्य ॥ ५ ॥ स्मृत्वा गुरूंश्च श्रीकृष्णोपाध्यायाख्यान् भिषग्वरान् ॥ वाचैव यैर्ममानल्पो मोहरोगो निराकृतः ॥ ६ ॥ अस्मत्कुलं समुद्धर्तुमवतीर्णाविव स्वयं ॥ रमाहरीतिनामानौ संस्मृत्य पितरौ हृदा ॥ ७ ॥ चण्ड्युपास्तिं विधित्सूनां तमसाज्ञातवर्त्मनां ॥ साधकानां कृते कुर्वे चण्डिकोपास्तिदीपिकां ॥ ८ ॥ बहून् प्रकाशान् कृत्वास्या वर्ण्यसंसूचकाह्वयान् ॥ विषयांश्चण्डिकोपास्तेर्दर्शयामि यथाक्रमं ॥ ९ ॥ सर्वत्रादावुपन्यस्य प्रमाणवचनोच्चयं ॥ वक्ष्ये तदनुरोधेन तत्प्रयोगांस्ततः परं ॥ १० ॥ उपोद्घातप्रकाशेऽग्र्ये चण्डिकाया उपासना ॥ प्रस्तूयते समासेन सप्रयोजनलक्षणा ॥ ११ ॥ उपदेशविधिः प्रोक्तो दीक्षाख्ये तु प्रकाशके ॥ चण्डीनवार्णमन्त्रस्य नातिसङ्क्षिप्तविस्तृतः ॥ १२ ॥ आह्निकाख्ये प्रकाशेऽस्मिन् स्फुटं तु समुदीर्यते ॥ स्नानसन्ध्यातर्पणादि चण्ड्यास्तान्त्रिकमाह्निकम् ॥ १३ ॥ नित्यार्चाख्ये प्रकाशे च चण्ड्या नित्यार्चनाविधिः । श्रुतिस्मृतिपुराणोक्तो विस्तरेणाभिधीयते ॥ १४ ॥ अथ नैमित्तिकार्चाख्ये नवरात्रद्वयं तथा ॥ पवित्रदमनार्चादि नैमित्तिकमुदीर्यते ॥ १५ ॥ तथा जपप्रकाशे च नवार्णस्तवराजयोः ॥ नानाजप-

विधानानि कथ्यन्ते विस्तरेण हि ॥ १६ ॥ यागप्रकाशे होमादि पूर्वोक्तजपकर्मणाम् ॥ तन्त्रोक्तविधिना सर्वं कथ्यते च समासतः ॥ १७ ॥ अथ मन्त्रविभागाख्ये प्रकाशेऽस्मिन् स्तवस्य तु ॥ विभागः सप्तशतधा तन्त्रोक्तः समुदीर्यते ॥१८॥ चण्डीस्तवार्थाभिधाने प्रकाशे विस्तरेण च ॥ कवचादित्रयं ध्यानश्लोकयुक्तो नवाक्षरः ॥ १९ ॥ चण्डीस्तवो, रहस्यानि, व्याख्यायन्ते क्रमेण हि ॥ सह पाठान्तरैर्न्यूनाधिकपद्यादिदर्शनैः ॥ २० ॥ सूक्तद्वयं सायणीयभाष्येणैव परिष्कृतम् ॥ निवेश्यते यथास्थानं रात्रिदेवीपदादिमम् ॥ २१ ॥ अङ्गषट्कसुमानन्दनाथशोधितमादृतम् ॥ कृतो यत्र विविच्यार्षमात्रपद्यादिसङ्ग्रहः ॥ २२ ॥ अन्तर्मन्त्रविभागस्तु प्रायो गुप्तवतीमतः ॥ स्वीकृतोऽथापि भेदोऽपि क्वचित्क्वचिदुरीकृतः ॥ २३ ॥ जपकर्मोपयोगार्थमृष्यादिस्मरणादिकम् ॥ सङ्कल्पासनविध्यादि सङ्क्षेपात्समुदीर्यते ॥ २४ ॥ मन्त्रसङ्ख्याविबोधाय मूले व्याख्यानके तथा ॥ विहितान्यङ्कचिह्नानि समानान्युभयोरपि ॥२५॥ सन्ति यद्यपि भूयांसो निबन्धाश्चण्ड्युपासने ॥ तथा सप्तशतीव्याख्या भूयस्यः पण्डितैः कृताः ॥ २६ ॥ तत्र सर्वाङ्गपूर्णत्वं न ततोऽयं समुद्यमः ॥ अत्र त्वावश्यकं सर्वमुच्यते नातिविस्तरात् ॥ २७ ॥ सप्तशत्यास्तु सकलं तत्त्वं वेद्म्यहमेव हि ॥ पादोनं श्रीहरिर्वेत्ति वेत्त्यर्धन्तु प्रजापतिः ॥ २८ ॥ व्यासस्तुर्यांशमित्याह मेरुतन्त्रे सदाशिवः ॥ मां तस्या विवृतौ बद्धतृष्णं नोपहसेत्तु कः ॥२९॥ तथापि ये सुकृतिनो गुणमात्रैकदृष्टयः ॥ ते चापलं क्षमिष्यन्ते ममासूयापराङ्मुखाः ॥३०॥

इह खलु सकलपुरुषार्थावाप्तिकामैः पुम्भिरखिलजगदुत्पत्तिस्थिति——लयकारणं परब्रह्मरूपा महालक्ष्म्यपरनामधेया भगवत्यादिशक्तिश्चण्डिकैवोपास्या ॥ तदुक्तं सूतसंहितायाम् । ब्रह्मा विष्णुश्च रुद्रश्च वासवो वरुणो यमः ॥ वायुरग्निः कुबेरश्च त्वष्टा पूषाश्विनौ भगः ॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ ऋषयोऽप्सरसो नागा गन्धर्वाः किन्नराः खगाः ॥

यक्षा रक्षांसि दैतेयाः सिद्धा विद्याधराः सुराः॥ ये चान्ये ज्ञानिनस्ते च शक्तिमेव भजन्ति हि॥ अतः सर्वार्थलाभाय चण्डिकां ब्रह्मरूपिणीम्॥ आराधयेत् परां शक्तिं सर्गस्थित्यन्तकारिणीम् ॥ इति ॥ **देवीभागवते च**। कामयानाः सदा कामं ब्रह्मविष्णुमहेश्वराः ॥ ते वै देवीं परां शक्तिं ब्रह्माख्यां परमात्मिकाम् ॥ ध्यायन्ति मनसा नित्यं नित्यां ज्ञात्वा सनातनीम्॥ तस्माच्छक्तिः सदा सेव्या विद्वद्भिः कृतनिश्चयैः ॥ धर्मार्थकाममोक्षाणां स्वामिनी सा महोदया ॥ ब्रह्मरूपा महादेवी चण्डिका परमेश्वरी ॥ यया सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ॥ इति ॥ **चण्डिकार्चनरहस्ये**। नित्यं यः कुरुते भूप चण्डिकायाः समर्हणम्॥ महदैश्वर्यमखिलं त्रैलोक्ये तस्य जायते॥ रिपवो विलयं यान्ति सर्वे नश्यन्त्युपद्रवाः ॥ व्याधयश्चैव नश्यन्ति विघ्नानां जायते क्षयः॥ त्रिषु लोकेषु यत्किञ्चित् सुरासुरसुदुर्लभम् ॥ तत्सर्वं हि समायाति चण्डिकायाः प्रसादतः ॥ इति ॥ **पाद्मे**। न तत्र देशे दुर्भिक्षं न च दुःखं प्रवर्तते ॥ नाकाले म्रियते कश्चित्पूज्यते यत्र चण्डिका ॥ इति ॥ **ब्रह्माण्डपुराणे**। ये भजन्ति परां शक्तिं विधिनाविधिनापि वा ॥ चण्डिकां त्रिजगद्धात्रीं मुच्यन्ते सर्वकिल्बिषैः ॥ इति ॥ अथानुपासकस्य निन्दोक्ता, **स्कान्दे**। सर्वेष्ववयवेष्वत्र दृढेष्वपि च यो नरः ॥ नोपासीत परां शक्तिं क्रोलो वा गर्धभोऽपि सः ॥ इति ॥ **मन्त्रमहोदधौ** ॥ मनुष्यदेहं सम्प्राप्य समुपास्य च चण्डिकाम् ॥ यो न मुच्येत संसारान्महापापयुतो हि सः ॥ इति ॥ **कालोत्तरे** ॥ धिक् धिक् धिक्तस्य तज्जन्म सेवते यो न चण्डिकाम्॥ जननीं सर्वलोकस्य करुणारसपूरिताम्॥ इति ॥ अस्या अनुपासने प्रत्यवायोऽप्युक्तो **देवीभागवते**। नाराधिता चण्डिका यैस्ते वै निरयगामिनः ॥ इह लोकेऽतिदुःखार्ता नानारोगैश्च पीडिताः॥ भवन्ति मानवा राजन् शत्रुभिश्च पराजिताः ॥ निष्कलत्रा ह्यपुत्राश्च तृष्णार्ताः स्तब्धबुद्धयः॥ इति ॥ **वैकृतरहस्ये**। यो न पूजयते नित्यं चण्डिकां भक्त-

वत्सलाम् ॥ भस्मीकृत्यास्य पुण्यानि निर्दहेत् परमेश्वरी ॥ इति ॥ एवं च चण्डिकोपास्तेर्महाफलोक्तेस्तदभावे महाप्रत्यवायोक्तेश्च तस्याः काम्यत्वं नित्यत्वं च बोध्यते ॥ **अथ चण्डिकापदस्यार्थो, भुवनेश्वरीसंहितायाम्** ॥ यद्भयाद्भाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ इन्द्राग्निमृत्यवस्तद्वत्तेन सा चण्डिका स्मृता ॥ इति ॥ उक्तभयजनकत्वे कोपस्यैव कारणत्वात्, चण्डते वाय्वादीनां स्वकर्मणश्च्यवने भयजननार्थं तेभ्यः कुप्यतीति **चण्डिका** । आदिशक्त्याख्या परब्रह्मरूपा देवता ॥ वाय्वादीनां भयजनकत्वस्य परब्रह्मण एव श्रुतत्वात् । तथा च श्रुतिः । भीषास्माद्वातः पवते भीषोदेति सूर्यः ॥ भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥ इति ॥ एतदुपरि **भगवत्पूज्यपादानां** भाष्यं, यथा ॥ यथा भयेन जनो राजादिशासने वर्तते एवं वायुसूर्यादिकं जगदस्माद्ब्रह्मणो बिभ्यन्नियमेन स्वस्वव्यापारे वर्तते ॥ इति ॥ स्त्रीलिङ्गत्वेन निर्देशस्तु सविशेषदशायां स्त्र्याकारोपाधिमत्वात् ॥ इयमेव महालक्ष्मीनाम्ना प्रसिद्धा । **प्राधानिकरहस्ये** । भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः ॥ एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥ इति चण्डिकावताराणां दशभुजाष्टादशभुजाष्टभुजानां चरितानि श्रुत्वा तत्प्रकृतेरर्थाच्चण्डिकायाः स्वरूपादिकं पृष्टवते राज्ञे ऋषिणा, सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥ इत्यादिना महालक्ष्म्याः स्वरूपादिकस्योक्तत्वात् ॥ **चण्डिकार्चनरहस्ये** च । कृत्वा सन्ध्यादिकं सर्वमुदकान्ते समाहितः ॥ तर्पणाय महालक्ष्म्याः षडङ्गं न्यासमाचरेत् ॥ ह्रीं चण्डिकायै मन्त्रेण व्यस्तेन च समस्ततः ॥ ततश्च त्रिजगद्धात्रीं चण्डिकामृषिवन्दिताम् ॥ ध्यात्वा नवकबीजान्ते चण्डिका तृप्यतामिति ॥ जलाञ्जलीनष्टशतं प्रदद्यात् कुसुमान्वितान् इति महालक्ष्मीतर्पणं प्रकृत्य तदङ्गत्वेन चण्डिकामन्त्रन्यासस्य चण्डिकाध्यानस्य चण्डिकानाम्ना तर्पणस्य चोक्तत्वात् ॥ **अथ महालक्ष्मीपदार्थोऽपि लक्ष्मीतन्त्रे** । अन्तरास्थाय सर्वस्य लक्षयत्यखिलां क्रियाम् ॥ अपरिच्छिन्न-

शक्तिः सा महालक्ष्मीरिति स्मृता ॥ इति ॥ लक्षधातोर्दर्शनार्थत्वात् अखिलजनक्रियाद्रष्टृत्वं लक्ष्मीपदार्थः। अपरिच्छिन्नशक्तित्वान्महत्त्वं च । तथा च सर्वान्तर्यामित्वसर्वद्रष्टृत्वापरिच्छिन्नशक्तित्वरूपगुणत्रयविशिष्टत्वं महालक्ष्मीपदार्थः । उक्तधर्माणां ब्रह्मैकनिष्ठत्वान्महालक्ष्मीशब्दोऽपि परब्रह्मरूपादिशक्तिपर एव । एवं च चण्डिकामहालक्ष्म्युभयनामधेया सर्वशक्तिप्रकृतिभूता ब्रह्मरूपा एकैव देवतेति ज्ञेयम् ॥ अपर्णा पार्वती दुर्गा मृडानी चाण्डिकाम्बिकेति, तथा, लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया इति कोशोक्ते शिवाविष्णुपत्न्यौ चण्डिकालक्ष्म्यौ तु विकृतिभूते ॥ एतच्च रहस्ये स्पष्टीभविष्यति ॥ वस्तुतः सर्वा अपि शक्तयः काश्चित्साक्षात् काश्चित्परम्परया महालक्ष्म्या विकृतय एव । उक्तं च **ब्रह्माण्डपुराणे** । नानारूपैर्जगद्व्याप्य स्थिताया द्विजसत्तम ॥ मूर्तयो विविधाकारास्तासां सङ्ख्या न विद्यते ॥ इति ॥ सुप्रभेदेऽपि ॥ यतीनां मन्त्रिणां चैव योगिनां ज्ञानिनामपि ॥ नानाकामार्थिनां देवी स्वोपास्तिं कर्तुमिच्छताम् ॥ ध्यानपूजाकृते नानामूर्तीर्गृह्णाति मायया ॥ इत्युक्तम् ॥ तथापि कार्यकारणयोरभेदात् प्रकृतिविकृतीनां, तदभिन्नस्य तदभिन्नाभिन्नत्वाच्च विकृतीनां सर्वासां, परस्परमभेद एव ॥ अत एव पुराणादिषु स्वेष्टविकृतिदेवतास्तवनप्रसङ्गेऽपि तस्या आदिशक्तिस्वरूपेण विकृत्यन्तरस्वरूपेण च वर्णनं दृश्यते ॥ अथ प्रकृतिभूताया आदिशक्तेर्महालक्ष्म्याः स्वरूपद्वयमुक्तं **प्राधानिकरहस्ये** । सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥ इति ॥ तत्र लक्ष्यालक्ष्यरूपयोरुपासनायां व्यवस्थोक्ता **देवीभागवते** ॥ सगुणा निर्गुणा चेति द्विधा प्रोक्ता मनीषिभिः ॥ सगुणा रागिभिः सेव्या निर्गुणा तु विरागिभिः ॥ इति ॥ तत्र निर्गुणरूपस्योपासनं नाम ‘ श्रोतव्यो मन्तव्यो निदिध्यासितव्य ’ इति श्रुतेः सदा अद्वैतब्रह्मस्वरूपेण श्रवणं मननं निदिध्यासनं च ॥ तदपि कञ्चित् कालं सगुणरूपत्वेनोपासनां कृत्वा

चित्तस्थैर्ये सञ्जाते कार्यम् ॥ उक्तं च **कौर्मे** देव्या हिमवन्तं प्रति ॥ अशक्तोऽसि, यदा ज्ञातुं निर्गुणं रूपमव्ययम् ॥ तदा ते यद्धि मे रूपं मनसो गोचरो भवेत् ॥ तन्निष्ठस्तत्परो भूत्वा तदर्चनपरो भव ॥ ततो मे निर्गुणे रूपे भविष्यसि नितान्तदृक् ॥ इति ॥ अन्यत्र च ॥ निर्विशेषं पुनर्ब्रह्म साक्षात्कर्तुमनीश्वराः ॥ ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥ वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ॥ तदैवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ॥ इति ॥ तत्र सगुणरूपाया महालक्ष्म्याः स्वरूपं, **प्राधानिकरहस्ये** । मातुलिङ्गं गदां खेटं पानपात्रं च बिभ्रती ॥ नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि ॥ तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा ॥ शून्यं तदखिलं स्वेन पूरयामासतेजसा ॥ इत्युक्तम् ॥ इयं **करवीरपीठस्था** । करवीरे महालक्ष्मीरिति **देवीभागवतात्** ॥ इमां विष्णुशक्तिरिति केचिदाहुः । शिवशक्तिरित्यन्ये । युक्तंचैतत् । सदाशिवाङ्कमारूढा शक्तिरिच्छाह्वया शिवा ॥ महालक्ष्मीरिति ख्याता देवी सर्वगुणान्विता ॥ इति **शिवपुराणे** वचनात् ॥ **आचार्यभगवत्पादैरपि देवीवेदपादस्तोत्रे** तत्र कामेशवामाङ्के खेलन्तीमलिकुन्तलाम् ॥ सच्चिदानन्दलहरीं महालक्ष्मीमुपास्महे ॥ इत्युक्तत्वाच्च ॥ वस्तुतस्तु सर्वस्य प्रकृतिविकृतिसमूहस्याभेद एवेत्युक्तमेव प्राक् । **प्राधानिकोक्त**चतुर्भुजमहाकालीमहासरस्वत्योरुपासनेच्छायां तयोः स्वरूपे **प्राधानिकरहस्यादेव** ज्ञातव्ये । आसां विकृतीनामष्टादशभुजादशभुजाष्टभुजानां स्वरूपाणि तु **वैकृतरहस्यात्** । नन्दादिसप्तकस्य स्वरूपाणि **मूर्तिरहस्यात्** ज्ञातव्यानि । ब्राह्म्यादिसप्तमातॄणां शिवदूत्याश्च देवीमाहात्म्यस्याष्टमाध्यायात् ॥ चामुण्डायाः स्वरूपं सप्तमाध्यायात् ज्ञातव्यं । शैलपुत्र्यादिनवदुर्गाणां स्वरूपाणि **देवीकवचव्याख्यायां** वक्ष्यन्ते ॥ अन्यविकृतीनां हेमाद्रिदानखण्डतोऽवगन्तव्यानि ॥ स्वेष्टलक्षणप्रतिमाभावे सर्वासां प्रकृतिविकृतीनां पूर्वोक्तप्रकारेणाभेदाद्यथालब्धलक्षणायां प्रतिमायां पूगफलादौ वा स्वेष्टलक्षणदेवतानाम्ना पूजादिकं कार्यम् । सर्व-

शक्तीनां भेदाभावेऽपि फलविशेषलाभार्थं नामभेदस्यावश्यकत्वात् ॥ तदुक्तं विष्णुधर्मोत्तरे । एकस्यैवाद्वितीयस्य ब्रह्मणो द्विजसत्तम ॥ नाम्नां बहुत्वं लोकानामुपकाराय हि स्थितम् ॥ निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात् ॥ विभिन्नान्येव साध्यन्ते फलानि विविधानि च ॥ इति ॥ **इत्युपास्यदेवताविचारः । अथोपासनापदार्थः ।** तत्र निर्गुणस्वरूपोपासनलक्षणं प्रागुक्तं । अथ सगुणोपासनायास्तदुच्यते । उपासनानामाह्निकपूजामन्त्रजपहोमनृत्यगीतनामसङ्कीर्तनवेदपारायणपुराणवाचनमन्दिरोपलेपनसम्मार्जनरङ्गवल्लीरचनादि ÷ नानाप्रकारैर्देवतायाः परिचर्या ॥ उप देवतासमीपे आसनां तत्सेवार्थमवस्थानं इत्युपासनापदव्युत्पत्तेः । उपपूर्वादास्तेर्ण्यासश्रन्थेति युच् । वरिवस्या तु शुश्रूषा परिचर्याप्युपासना ॥ **इत्यमरः** । एतदुपासनायां सर्वेषामधिकारः । तदुक्तं **भविष्ये** । ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः ॥ एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिः ॥ एतदनुरोधेन सात्विकीराजसीतामसीभेदात्पूजापि त्रिविधोक्ता तत्रैव । तथाहि चण्डिकापूजा त्रिविधा परिगीयते ॥ सात्विकी राजसी चैव तामसी चेति ताः शृणु ॥ सात्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ॥ राजसी बलिदानेन नैवेद्यैः सामिषैस्तथा ॥ (बलिदानं चात्र मांसादिना) सुरामांसाद्युपाहारैर्जपयज्ञैर्विना तु या ॥ विना मन्त्रैस्तामसी स्यात् किरातानां च सम्मता ॥ इति ॥ अत्र ब्राह्मणादिभेदेन व्यवस्था. यथा । तत्र ब्राह्मणानां सात्त्विक्यामेवाधिकारः । क्षत्रियवैश्ययोर्निष्कामत्वे सात्त्विक्यामेव । सकामत्वे राजस्यामपि । निष्कामशूद्रस्य राजस्यामेव । तत्र जपहोमादिकं पूजामन्त्रपाठश्च ब्राह्मणद्वारैव । सोपि पौराणमन्त्राणामेव । म्लेच्छादीनां तामस्यामेवाधिकारः । स चापि न साक्षात्पूजायां । किन्तु देवीमुद्दिश्य तत्तदुपचारद्रव्याणां तन्मूल्यस्य वा मनसोत्सर्गमात्रं । एतद्विषये विस्तरः कौस्तुभे नवरात्रप्रकरणे द्रष्टव्यः ॥ अथागस्त्योक्ता त्रिविधोपासना यथा । उपास्तिस्त्रिविधा राम गुणत्रयविभेदतः ॥ श्रद्धया विधिना भक्त्या निष्कामेन

क्रियेत या ॥ केवलं देवताप्रीत्यै सोपास्तिः सात्विकी मता ॥ सैव चेत्फलकामेन क्रियते राजसी तु सा ॥ विधिहीना भक्तिहीना श्रद्धाहीना च या भवेत् ॥ दम्भेन केवलं या च सोपास्तिस्तामसी स्मृता ॥इति॥ श्रीभगवतापि सात्विकादिभेदेन त्रिविधं कर्मोक्तं, तद्यथा ॥ नियतं सङ्गरहितमरागद्वेषतः कृतं ॥ अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥ यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ॥ क्रियते बहुलायासं तद्राजसमुदाहृतं ॥ अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषं ॥ मोहादारभ्यते कर्म तत्तामसमुदाहृतं ॥इति॥ एवं ग्रन्थभेदेन किञ्चित् किञ्चिद्भेदयुतायामुक्तत्रिविधोपासनायां सात्विक्या एव सर्वश्रेष्ठत्वं । तदुक्तं मन्त्रमहोदधौ । काम्यकर्मप्रसक्तानां तावन्मात्रं फलं भवेत् ॥ निष्कामं भजतां पुंसामखिलाभीष्टसम्पदः ॥ कथिताः सर्वमन्त्राणां ये प्रयोगाः सुखाय वै ॥ तदासक्तिं विहायैव निष्कामो देवतां भजेत् ॥ वेदोदितं कर्म कुर्वन् उपासीत च देवताः ॥ शुद्धान्तःकरणस्तेन लभते ज्ञानमुत्तमं ॥ लब्धज्ञानः कृतार्थः स्यात् परत्रेह च मानवः ॥ इति ॥ तस्मात्सिद्धं चण्डिकोपासनयैव सर्वाः सिद्धय इति ॥ चण्डिकोपास्तिदीपिकायामुपोद्घातप्रकाशः ॥

इति चण्डिकोपास्तिदीपिकायामुपोद्घातप्रकाशः ।

॥ श्री ॥

अथ चण्डिकोपास्तिदीपिकायां दीक्षाप्रकाशः ॥

॥ श्री ॥

दीक्षाप्रकाशः।

अथ चण्डिकोपास्तिदीपिकायां दीक्षाप्रकाशः ॥ पूर्वप्रकाशे उक्ता चण्डिकोपासना फलार्थिना साधकेनाधिकारं लब्ध्वैवानुष्ठेया ॥ तदुक्तं भगवत्पूज्यपादाचार्यैः। " अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः ॥ उपाया देशकालाद्याः सन्त्यस्मिन् सहकारिणः " ॥ इति ॥ स चाधिकारो नवार्णमन्त्रदीक्षया लभ्यते ॥ उक्तं च डामरे नवार्णमन्त्रमुक्त्वा। " एतन्मन्त्रं गुरोर्लब्ध्वा तस्मै दत्वा च दक्षिणाम् ॥ आशिषं च परां लब्ध्वा मन्त्रसिद्धिमवाप्नुयात् " ॥ इति ॥ एवं सर्वत्रापि तत्तद्देवतामन्त्रदीक्षयैव तत्तद्देवतोपासनेऽधिकारः ॥ यस्य कस्यापि मुखात् श्रुत्वा पुस्तके दृष्ट्वा वा मन्त्रस्य जपे फलाभावः प्रत्यवायश्च। उक्तं च शक्तिसङ्गमतन्त्रे " गुरुं विना वृथा मन्त्रः श्रवजाप्यस्तु शून्यकः " ॥ इति ॥ (श्रवजाप्यः गुरूपदेशं विना यस्य कस्यापि मुखाच्छ्रुत्वा जप्यमानः। शून्यकः फलशून्यः) साङ्ख्यायनतन्त्रे। " पुस्तके लिखितान् मन्त्रान् प्रविलोक्य जपेत्तु यः ॥ स जीवन्नेव चाण्डालो मृतः श्वा चाभिजायते ॥ तस्माद्दीक्षाविधानेन मन्त्रा ग्राह्या गुरोर्मुखात् " ॥ इति ॥ **दीक्षापदनिरुक्तिस्तन्त्रराजे।** " दिव्यं ज्ञानं यतो दत्ते कुर्यात् पापस्य च क्षयम् ॥ तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः ॥इति॥ **मन्त्रपदनिरुक्तिः प्रपञ्चसारे।** "मननात्तत्वमर्थस्य त्राणाच्च सकलाद्भयात् ॥ मन्त्र इत्युच्यते प्राज्ञैर्मन्त्रज्ञैर्ऋषिपुङ्गवैः " ॥ इति ॥ **गुरुनिरुक्तिः शक्तिसङ्गमतन्त्रे।** " गुकारस्त्वन्धकारः स्याद्रुकारस्तन्निवर्तकः ॥ तस्माद्गुरुरिति प्रोक्तोऽन्धकारस्यापनोदनात् " ॥ इति ॥ शक्तिरहस्ये तु। " गुकारः सदिति प्रोक्तो रुकारो ज्ञानवाचकः ॥ ब्रह्मज्ञानैकरूपत्वाद्गुरुरित्यभिधीयते " ॥ इत्युक्तम् ॥ गुरुश्च ब्राह्मण एव कार्यः ॥ " वर्णानां ब्राह्मणो गुरुः " इत्युक्तेः।

ब्राह्मणः सर्वधर्मज्ञः कुर्याद्वर्णेष्वनुग्रहम् ॥ कलास्वधर्मविद्यासु यःकश्चिज्जायते गुरुः" ॥ इति कात्यायनस्मरणाच्च । "ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ तेषां वाक्योदकेनैव शुध्यन्ति मलिना जनाः" इति पराशरस्मृतेश्च ॥ अथ गुरुत्वे निषिद्धास्तन्त्रसारे । पत्नीं न दीक्षयेद्भर्ता न पिता दीक्षयेत्सुतम् ॥ सुतां चापि, तथा भ्राता भ्रातरं नैव दीक्षयेत् ॥ इति ॥ ज्ञानोदये । निर्वीर्यस्तु पितुर्मन्त्रस्तथा मातामहस्य च ॥ सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥ इति ॥ कनिष्ठस्य यस्य कस्यापि स्वन्यूनवयस्कस्येत्यर्थः । नैतत्सोदरविशेषणम् ॥ "भ्राता भ्रातरं नैव दीक्षयेदिति" सर्वस्यैव सोदरस्य निषिद्धत्वात् ॥ अथ **गुरुलक्षणं तन्त्रराजे**, सुन्दरः सुमुखः स्वच्छः शुचिश्च बहुतन्त्रवित् ॥ असंशयः संशयच्छिन्निरपेक्षो गुरुर्मतः" ॥ (सुन्दरोऽनवद्यः । सुमुखः प्रसन्नवदनः । स्वच्छः अकपटवृत्तिः । शुचिः शुद्धबाह्यान्तरङ्गः । असंशयो निश्चितशास्त्रतत्त्वः । संशयच्छित् शिष्यसंशयच्छेत्ता । निरपेक्षो निर्लोभः) । अथ **शिष्यलक्षणान्यपि** तत्रैव । "चतुर्भिराद्यैः संयुक्तः श्रद्धावान् सुस्थिराशयः ॥ आस्तिको दृढभक्तिश्च गुरौ मन्त्रे च दैवते ॥ एवंविधो भवेच्छिष्य इतरो व्याधिकृद्गुरोः" ॥ इति ॥ (आद्यैश्चतुर्भिः सुन्दरत्वसुमुखत्वस्वच्छत्वशुचित्वैः संयुक्तः । श्रद्धावान् फलावश्यम्भावग्रहवान् । सुस्थिराशयः अचञ्चलचित्तः । आस्तिको मन्त्रादिषु प्रामाण्यबुद्ध्युपेतः । इतरः पूर्वोक्तविपरीतगुणः । गुरोर्व्याधिकृत् दुःखदः) श्रुतिश्चात्र भवति, "विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि ॥ असूयकायानृजवे शठाय न मां ब्रूया वीर्यवती यथा स्याम्" ॥ इति ॥ स्मृतिश्च । "इदं ते नातपस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति" ॥ इति ॥ अथ **शिष्यस्य परीक्षाकालावधिरपि तत्रैव** । "एकद्वित्रिचतुष्पञ्चवर्षाण्यालोच्य योग्यताम् ॥ भक्तिं तस्य गुणांश्चापि क्रमाद्वर्णे ससङ्करे ॥ तस्मै मन्त्रं वदेद्विद्वान् सच्छिष्यायाथ दैशिकः" ॥ इति ॥

(वर्णचतुष्टये क्रमेणैकद्विचतुर्वर्षाणि, सङ्करजातौ पञ्चवर्षाणि शिष्यं परीक्ष्य पूर्वोक्तगुणैरहीनश्चेत्तस्मै मन्त्रं वदेदित्यर्थः) ॥ अथ मन्त्राणामानुकूल्यप्रातिकूल्यावेदकं **सिद्धादिचक्रं मन्त्रमहोदधौ** । "साधकानां शीघ्रसिद्ध्यै मन्त्रशुद्धिमथ ब्रुवे ॥ साधकस्य तु नामादिवर्णमारभ्य शोधयेत् ॥ मन्त्राद्याक्षरपर्यन्तं चक्रे सिद्धादिके क्रमात् ॥ जन्मर्क्षोत्थं प्रसिद्धं वा नामग्राह्यं विशोधने ॥ ऊर्ध्वगाः पञ्चरेखाः स्युः पञ्च तिर्यग्गताः पुनः ॥ कोष्ठानि तत्र
१ ३ ११ ९ २ ४ १२ १० ६ ८
जायन्ते षोडशात्र तु संलिखेत् ॥ भूरामशिवनन्दाक्षिवेदार्कदिग्रसाष्टभिः ॥
१६ १४ ५ ७ १५ १३
कलामनुशरैरद्रितिथिविश्वैर्मितेषु च ॥ कोष्ठेषु मातृकावर्णाल्लिखेन्नामादितः क्रमात् ॥ सिद्धः साध्यः सुसिद्धोऽरिर्ज्ञेयो मन्त्राक्षरावधिः ॥ यस्मिंश्चतुष्के नामार्णस्तत् स्यात्सिद्धचतुष्टयम् ॥ प्रादक्षिण्याद्द्वितीयं स्यात्साध्याख्यं तत् तृतीयकम् ॥ सुसिद्धाख्यं चतुर्थन्तु सपत्नाख्यं स्मृतं बुधैः ॥ एककोष्ठे द्वयोर्वर्णः सिद्धसिद्धः प्रकीर्तितः ॥ (एककोष्ठे द्वयोः साधकमन्त्रयोः । वर्णः प्रथमवर्णः सिद्धसिद्धः) तद्द्वितीये मन्त्रवर्णः सिद्धसाद्ध्य उदाहृतः ॥ तृतीये सिद्धसुसिद्धः सिद्धारिः स्याच्चतुर्थके ॥ नामादियुक् चतुःकोष्ठान्मन्त्रार्णश्चेद्द्वितीयके ॥ चतुष्के तत्र पूर्वं तु यत्र नामाक्षरं स्थितम् ॥ तत्र तत्कोष्ठमारभ्य गणयेत् पूर्ववत् क्रमात् ॥ साध्यसिद्धः साध्यसाध्यस्तत्सुसिद्धश्च तद्रिपुः ॥ (तत्सुसिद्धः साध्यसुसिद्धः । तद्रिपुः साध्यारिः) एवं ज्ञेयं तृतीये चेच्चतुष्के मन्त्रवर्णकः ॥ तदा पूर्वोक्तया रीत्या क्रमाज्ज्ञेया विचक्षणैः ॥ सुसिद्धासिद्धस्तत्साद्ध्यस्तत्सुसिद्धश्च तद्रिपुः (तत्साध्यः सुसिद्धसाध्यः । तत्सुसिद्धः सुसिद्धसुसिद्धः । तद्रिपुः सुसिद्धारिपुः) चतुर्थे तु चतुष्के स्यादरिसिद्धोऽरिसाध्यकः तत्सुसिद्धोऽर्थरिः पश्चादेवं मन्त्रं विचारयेत् ॥ (चतुर्थे तु चतुष्के स्यात् । मन्त्रवर्ण इति शेषः । तत्सुसिद्धः अरिसुसिद्धः) सिद्धसिद्धो यथोक्तेन द्विगुणात्सिद्धसाध्यकः ॥ सिद्धसुसिद्धोऽर्धजपात् सिद्धारिर्हन्ति बान्धवान् ॥ साध्यसिद्धो

द्विगुणतः साध्यसाध्यो निरर्थकः ॥ द्विगुणोज्जपात्तत्सुसिद्धः साध्यारिर्हन्ति गोत्रजान् ॥ (तत्सुसिद्धःसाध्यसुसिद्धः) सुसिद्धसिध्दोऽर्धजपात्तत्साध्यो द्विगुणाज्जपात् ॥ तत्सुसिद्धो ग्रहादेव सुसिद्धारिः कुटुम्बहा ॥ (तत्साध्यः सुसिद्धसाध्यः । तत्सुसिद्धः सुसिद्धसुसिद्धः । ग्रहादेव ग्रहणमात्रेणैव) अरिसिद्धः सुतं हन्यादरिसाध्यस्तु कन्यकाम् ॥ तत्सुसिद्धस्तु पत्नीघ्नस्तदरिः साधकापहः ॥ (तत्सुसिद्धःअरिसुसिद्धः । तदरिः अर्यरिः । साधकापहः मन्त्रजप्तुर्नाशकः ।) एवं संशोधितो मन्त्रो भवेच्छिष्येष्टसिद्धये " ॥ इति ॥ अज्ञानादरिमन्त्रो गृहीतश्चेत्तत्त्यागः कर्तव्यः । **तदुक्तम्** । " विद्यां मन्त्रं स्तवं सूक्तमरिभूतं न वै जपेत् ॥ तस्य त्यागः प्रकर्तव्यो मन्त्रिणा कुशलेच्छुना " ॥ इति ॥ स्त्रीदैवता विद्या, पुंदैवता मन्त्रा इति विद्यामन्त्रयोर्भेदः । त्यागविधिर्मन्त्रमहोदधौ द्रष्टव्यः ॥ ऋणधनशोधनादिकं स्वकुलपरकुलशोधनादिकं च सति कार्ये तत्रैव द्रष्टव्यम् । छिन्नत्वादिपञ्चाशन्मन्त्रदोषास्तत्परिहारार्थां जननादयो दशमन्त्रसंस्काराश्च **शारदातिलके** द्रष्टव्याः । सिद्धमन्त्रेषु सिद्धादिशोधनस्य न प्रसङ्गः ॥ सिद्धमन्त्रा उक्ता **मन्त्रामृते** । " सिद्धमन्त्रान् प्रवक्ष्यामि साधकानां हिताय वै ॥ येषां सदा सिद्धिदत्वान्नास्ति सिद्धादिशोधनम् ॥ एकत्रिपञ्चषट्सप्तेभाङ्करुद्ररदाक्षराः ॥ सिद्धमन्त्रास्तु गदितास्तथान्यानपि च ब्रुवे ॥ (इभा अष्टौ । अङ्का नव । रुद्रा एकादश । रदा द्वात्रिंशत् तथा चैकत्रिपञ्चषट्सप्ताष्टनवैकादशद्वात्रिंशदक्षरा मन्त्राः सिद्धमन्त्रा इत्यर्थः ।) सिद्धकाली चण्डिका च श्यामला कालिका तथा ॥ पद्मावती मधुमती दत्तात्रेयश्च पार्वती ॥ श्रीविद्या सिद्धविद्या च मातङ्गी भुवनेश्वरी ॥ आसुरी सुमुखी चैव रेणुका च सरस्वती ॥ गोपालो राममन्त्राश्च मातृका मनवस्तथा ॥ नृसिंहार्कवराहाश्च मन्त्रास्त्रैपुरकाश्च ये ॥ मृत्युञ्जयश्च प्रासादो वैष्णवा वैदिकाश्च ये ॥ प्रणवो बीजमन्त्राश्च माला मन्त्रास्तथैव च । कुलक्रमागताः स्वाप्नाः सिद्धमन्त्राः प्रकीर्तिताः " ॥ इति ॥ अत्र चण्डिकापदेन

नवार्णस्य ग्रहणम् ॥ “ विंशत्यधिकवर्णा ये मालमन्त्रास्तु ते स्मृता ॥ इति
मालामन्त्रलक्षणम् ॥ **अथ विशेषतः कलौ सिद्धिप्रदा मन्त्रा उच्यन्ते** ॥
सिद्धिप्रदाः कलियुगे ये मन्त्रास्तान् ब्रवीम्यतः ॥ एकार्णस्त्र्यक्षरोऽनुष्टुबिति
त्रेधा नृकेसरी ॥ एकाक्षरोऽर्जुनोऽनुष्टुब् द्विविधस्तुरगाननः ॥ चिन्तामणिः
क्षेत्रपालो भैरवो यक्षनायकः ॥ गोपालो गजवक्त्रश्च चण्डिका यक्षिणी तथा ॥
मातङ्गी सुन्दरी श्यामा तारा कर्णपिशाचिनी ॥ शबर्येकजटा रामः काली
नीलसरस्वती ॥ त्रिपुरा कालरात्रिश्च कलौ सिद्धिप्रदा इमे ” ॥ इति ॥ अत्रापि
चण्डिकापदेन नवार्णस्यैव ग्रहणम् ॥ डामरे च अस्मिन्नवाक्षरे मन्त्रे महालक्ष्मी-
र्व्यवस्थिता ॥ तस्मात्सुसिद्धः सर्वेषां सर्वेष्टस्य च साधकः ॥ इत्युक्तम् ॥ एवं
च प्रकृतनवार्णमन्त्रस्य सिद्धमन्त्रत्वात्सिद्धसाध्यादिशोधनं नास्तीति सिद्धम् ।
अथ स्त्रीशूद्राणां निषिद्धा मन्त्राः । “ चण्डिका दक्षिणामूर्तिरुमा माहेश्वरो
मनुः ॥ हयग्रीवो वराहश्च लक्ष्मीनारायणस्तथा ॥ प्रणवाद्याश्च ये मन्त्रा
वह्निमन्त्रास्तथा रवेः ॥ हरिद्रागणनाथश्चाघोरो रामषडक्षरः ॥ मन्त्रराजो नार-
सिंहः प्रणवो वैदिकस्तथा ॥ वर्णत्रयाय दातव्या न शूद्राय कदाचन ॥
शूद्रायेति पदं स्त्रीणामप्युपलक्षकं तेन नवार्णमन्त्रजपे स्त्रीशूद्रयोर्नाधिकारः ॥
इति दीक्षाविषये सामान्यविचारः ॥ **अथ दीक्षायां कालः** । तत्रमासाः
“ चैत्रो राधः श्रावणिक आश्विनः कार्तिकस्तथा ॥ मार्गशीर्षश्च माघश्च
फाल्गुनश्च शुभावहाः ” ॥ इति ॥ **अथ पक्षः** । “शुक्लपक्षः शुभः प्रोक्तः कृष्ण-
श्चान्त्यत्रिकं विना ॥ इति ॥ अन्त्यत्रिकं त्रेधा विभक्तस्य पक्षस्य तृतीयं भागम्।
एकादश्याद्यमान्तान् पञ्चदिवसानित्यर्थः । केचिदन्त्यत्रिकशब्देन त्रयोदश्याद्य-
मान्तं दिनत्रयमाहुः । **अथ तिथयः** । प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ॥
सप्तमी दशमी रुद्रा द्वादशी पूर्णिमापि च ” इति ॥ (रुद्र एकादशी) प्रतिपदत्र
कृष्णा । शुक्लायाः कृष्णानङ्गचतुर्दिनान्तर्गतत्वेनैव निषिद्धत्वात् । एकादशीद्वा-
दश्यौ शुक्ले, कृष्णयोरन्त्यत्रिकान्तर्गतत्वेनैव निषिद्धत्वात् । अन्त्यत्रिकपदस्यान्त्य

तिथित्रयार्थकत्वपक्षे तु तयोरपि ग्रहणम्॥ नवार्णमन्त्रदीक्षायां देवीप्रियतिथित्वादष्टमी नवमी चतुर्दश्योऽपि ग्राह्याः ॥ उक्तं च । "यस्य देवस्य यो वारस्तिथिर्नक्षत्रमेव च ॥ नैव तत्र प्रकर्तव्या शुभाशुभविचारणा" ॥ इति ॥ **अथ वाराः ।** "रविः सोमो बुधो जीवः शुक्रोऽपि च शुभावहाः" ॥ इति ॥ देवीवारत्वाद्भौमवारोऽपि ग्राह्यः । क्वचिद्रविवारो निषिद्धः । **अथ नक्षत्राणि ।** "अश्विब्रह्मेन्दुभपुनर्वसुपुष्यमघास्तथा ॥ तिस्रः पूर्वोत्तराहस्तपञ्चकं पाशिपौष्णभे" ॥ इति ॥ ब्रह्मा रोहिणी । इन्दुभं मृगः । पाशी वरुणस्तस्य नक्षत्रं शततारा । पौष्णभं रेवती । **अथ योगाः ।** "योगास्तु प्रीतिरायुष्मान् सौभाग्यः शौभनस्तथा ॥ सुकर्मसिद्धिध्रुवका हर्षणः सिद्धिदः शिवः ॥ सिद्धः साध्यः शुभः शुक्लो ब्रह्मेन्द्रश्च शुभा इमे" ॥ इति ॥ **अथ करणानि ।** "ववादीनि तु चत्वारि शुभानि वणिजं तथा" ॥ इति ॥ **अथ लग्नानि** "मेषः कर्कस्तुला कन्या लग्नानि मकरो घटः" ॥ इति ॥ **अथ ग्रहाः ।** त्रिषडायगताः पापाः सौम्याः केन्द्रत्रिकोणगाः ॥ दीक्षायां शुभदाः सर्वे रन्ध्रस्थाः सर्वनाशकाः" ॥ इति ॥ अस्यार्थः । आय एकादशं स्थानम् । केन्द्रं प्रथमचतुर्थसप्तमदशमस्थानानि । त्रिकोणं पञ्चमनवमे । रन्ध्रं अष्टमस्थानम् । ततश्च पापाः पापग्रहाः रविभौमशनिराहुकेतवः त्रिषडायगताः लग्नात् तृतीयषष्ठैकादशस्थानस्थाश्चेत् । तथा सौम्याः शुभाश्चन्द्रबुधगुरुशुक्राः केन्द्रत्रिकोणगाः प्रथमचतुर्थपञ्चमसप्तमनवमदशमस्थाश्चेद्दीक्षायां शुभदाः ॥ सर्वे ग्रहाः शुभाः पापाश्च अष्टमस्थानगताश्चेन्न शुभदाः ॥ तेनाष्टमस्थाने कोऽपि ग्रहो नापेक्षित इत्यर्थः ॥ **इति ग्राह्यः कालः ॥ अथ सर्वसाधारणो निषिद्धकालः ।** "मले च सिंहगे जीवे तथास्ते गुरुशुक्रयोः ॥ बाल्यवार्धकयोश्चैव व्यतीपाते च वैधृतौ ॥ अमासङ्क्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत्" ॥ इति ॥ अथास्यापवादः । **तन्त्रराजे** ॥ "विषुवेऽप्ययनद्वन्द्वे पवित्रदमनोत्सवे ॥ दीक्षा कार्यात्वकालेऽपि पवित्रे गुरुपर्वणि" विषुवे, मेष-

तुलासङ्क्रान्तिदिनयोः । अयनद्वन्द्वे कर्कमकरसङ्क्रान्तिदिनयोः पवित्रदमनोत्सवे पवित्रार्पणदमनार्पणोत्सवदिनयोः । पवित्रे पवित्रदिने एकादश्यादौ ॥ गुरुपर्वणि कपिलाषष्ठ्यर्धोदयादिमहापर्वदिने । केचिद्गुरुपर्वशब्देन गुरुजन्मदिनमाहुः । सत्तीर्थार्कविधुग्रासे पुण्यक्षेत्रवनेषु च ॥ मन्त्रादीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् ॥ सत्तीर्थे गङ्गासागरादितीरे । अर्कविधुग्रासे सूर्यचन्द्रोपरागे । पुण्यक्षेत्रे वाराणस्यादौ । पुण्यवने नैमिषारण्यादौ सर्वे ग्रहाश्च वाराश्च नक्षत्राणि च राशयः ॥ यस्मिन्नहनि सन्तुष्टो गुरुस्तस्मिन् शुभावहाः ॥इति॥ गुरुसन्तोषदिने शुभाशुभकालो न विचारणीय इत्यर्थः। इति कालविचारः।

अथोपदेशविधानम् । तन्त्रसारे । महादीक्षा ततो दीक्षा उपदेशस्ततः परम् ॥ युगे युगे तु कर्तव्या उपदेशः कलौ युगे ॥ इति कलावुपदेशमात्रस्यैवोक्तत्वात् । सूर्यचन्द्रग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ॥ मन्त्रमात्रप्रकथनमुपदेशः स उच्यते इति तल्लक्षणाच्च सङ्क्षेपत उपदेशविधानमुच्यते ॥ साधको मङ्गलस्नातः कौशेयवसनः शुचिः ॥ धृतकुङ्कुमपुण्ड्रश्च स्वस्तिवाचनपूर्वकम् ॥ श्रीगुरुं शरणं गत्वा वृणुयादैशिकत्वतः ॥ पूजयित्वा च विभवैः साष्टाङ्गं प्रणमेत्ततः॥ गुरुश्च सर्वतोभद्रमण्डले तीर्थवारिणा ॥ पूर्णं कुम्भं च संस्थाप्य विधिना वैदिकेन तु ॥ तान्त्रिकेणाथवा सामान्यार्घ्योक्तविधिना शुभम् ॥ तत्रौषधीः पल्लवांश्च क्षिपेद्रत्नादिकं ततः ॥ संवेष्ट्य वस्त्रयुग्मेन तत्रावाह्यार्चयेच्छिवाम् ॥ कलशस्थजले मूलमष्टोत्तरशतं जपेत् ॥ ततस्तदुदकेनोदङ्मुखं शिष्यमवस्थितम् ॥ प्राङ्मुखो देशिकः प्रोक्षेन्मूलमष्टशतं जपन् ॥ धृतान्यवाससश्चोपविष्टस्य प्राङ्मुखस्य वै ॥ उदङ्मुखो गुरुस्तस्य न्यस्य के दक्षिणं करम् ॥ (के मस्तके) नदत्सु नानावाद्येषु ब्रह्मघोषे भवत्यपि ॥ त्रिवारं दक्षिणे कर्णे मूलमन्त्रं समुच्चरेत् ॥ सपर्याद्युपयुक्तांश्च सर्वान्मन्त्रानुपादिशेत् ॥ परम्परागतांस्तस्मै सम्प्रदायान्वदेदपि ॥ सममस्त्वावयोरेवं दद्याच्चैवाशिषं गुरुः ॥ ततः शिष्यो गुरोरग्रे मन्त्रमष्टोत्तरं शतम् ॥ जपेच्च परया

भक्त्या तदन्ते प्रणमेद्गुरुम् ॥ ब्राह्मणान् सधवा नारीः कुमारीश्च कुमारकान् ॥ भोजयेच्च गुरौ मन्त्रे देवतायां च भक्तिमान् ॥ इति तन्त्रान्तरोक्त उपदेशविधिः ॥ **अथैतत्प्रयोगः** ॥ साधक उक्तदिने कृतमङ्गलस्नानः शुचिः परिहितकौशेयवसनो धृततिलकः सन्ध्यादिनित्यकृत्यं निर्वर्त्य आचम्य प्राणानायम्य सुमुखश्चेत्यादि मङ्गलानि पठित्वा देशकालसङ्कीर्तनान्ते मम श्रीचण्डिकोपासनासिद्ध्यर्थं चण्डीनिर्वाणमन्त्रग्रहणं करिष्ये इति सङ्कल्प्य स्वस्तिवाचनादि विधाय गुरुं शरणं व्रजेत् ॥ तद्यथा । वाद्यध्वनिपुरःसरं श्रीगुरुगृहं गत्वा " भगवन् सर्वधर्मज्ञ दीनानुग्रहकारक ॥ संसाराब्धिं समुत्तर्तुं त्वामहं शरणं गतः ॥ मामुद्धर कृपासिन्धो मज्जन्तं वृजिनार्णवे ॥ चण्डीमन्त्रोपदेशेन पोतेन प्रेमयुग्दृशा " ॥ इति श्रीगुरुं सविनयं प्रार्थ्य, वाद्यध्वनिपुरःसरं तं स्वगृहमानीय तदसम्भवे तस्यैव गृहे तमासने उपवेश्य ॥ " ब्रह्मानन्दं परमसुखदं केवलज्ञानरूपं द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ॥ एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं भावातीतं त्रिगुणरहितं सद्गुरुं तन्नमामि " ॥ इति ध्यात्वा पुरुषसूक्तेन यथाविभवं षोडशोपचारैः सम्पूज्य स्तुत्वा " आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधपूर्णम् ॥ योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥ " इति साष्टाङ्गं प्रणम्य कृताञ्जलिस्तिष्ठेत् ॥ अथ गुरुराचम्य प्राणानायम्य सर्वतोभद्रमण्डले तीर्थसलिलपूर्णं सौवर्णादिकुम्भं पूजाप्रकरणे वक्ष्यमाणसामान्यार्घ्यविधिना वैदिकविधिना वा संस्थाप्य तत्र सर्वौषधीः पञ्चपल्लवान् गन्धपुष्पफलहिरण्यरत्नादिकं च निक्षिप्य गन्धपुष्पादिना कलशं सम्पूज्य वस्त्रयुग्मेनावेष्ट्य कुम्भे महालक्ष्मीमावाह्य वक्ष्यमाणनित्यार्चनक्रमेण, अशक्तौ यथाशक्ति सम्पूज्य। कलशजलमष्टोत्तरशतवारावृत्तेन मूलमन्त्रेणाभिमन्त्र्य उत्तराभिमुखोपविष्टं शिष्यं शिरसि स्वयं पूर्वाभिमुखोपविष्टो गुरुः कलशजलेनाष्टोत्तरशतवारं दर्भाग्रैः सम्प्रोक्ष्य । ततः परिहितान्यवाससः

प्राङ्मुखोपविष्टस्य तस्य दक्षिणपार्श्वउदङ्मुखोपविष्टो गुरुः शिरसि दक्षिणकरं दत्वा तस्य दक्षिणकर्णे त्रिर्निर्वाणमुपदिशेत्तेन तथैव वाचयित्वा तस्मै वक्ष्यमाणं मन्त्रार्थमाख्याय सपर्याद्युपयुक्तान् मन्त्रान् परम्परागतसम्प्रदायांश्चोक्त्वा सममस्त्वावयोरित्याशिषं दद्यात्। अथ शिष्य ऋष्यादिस्मरणन्यासध्यानादिपूर्वकं मूलमष्टोत्तरशतं जपित्वा " अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः " ॥ इति साष्टाङ्गं प्रणम्य गुरवे भूयसीं दक्षिणां दत्वा वस्त्रालङ्कारादिभिः परितोष्य श्रीगुरुं साङ्गतासिद्ध्यर्थं ब्राह्मणसुवासिनीः कुमारिकाश्च भोजयित्वा दक्षिणादिभिः प्रतोषयेत् ॥ एतावदशक्तौ साधको गुरुं सम्पूज्य नत्वा भगवन् सर्वधर्मज्ञेति पूर्वोक्तश्लोकेन प्रार्थयेत् ॥ तत उदङ्मुखोपविष्टो गुरुः शिष्यं प्राङ्मुखमुपवेश्य तस्य दक्षिणकर्णे त्रिवारं मन्त्रमुपदिशेत् ॥ शिष्यश्च तथैव त्रिरुच्चार्य गुरुं प्रणम्य तस्मै भूयसीं दक्षिणां दद्यादित्युपदेश**प्रयोगः** ॥ अथ गुर्वभावे मन्त्रग्रहणप्रकारस्तन्त्रान्तरे । गुरोरभावे मन्त्राणां ग्रहणक्रम उच्यते ॥ चन्द्रसूर्योपरागे च स्नात्वा गत्वा शिवालयम् ॥ सौवर्णे राजते पत्रे तालपत्रेऽथवा पुनः ॥ लिखित्वा भूर्जपत्रे वा मन्त्रं कुङ्कुमचन्दनैः ॥ तत्पत्रं स्थण्डिले स्थाप्य पूजयित्वा महेश्वरम् ॥ पायसान्नस्य नैवेद्यं दत्वा तं प्रणिपत्य च ॥ नमस्ते धूर्जटे मह्यं मन्त्रमेनमुपादिश ॥ येन स्यां कृतकृत्योऽहं त्वत्प्रसादान्महेश्वर ॥ इति सम्प्रार्थ्य देवेशं तद्गुरः समुपास्यां कृतकृत्योऽहं त्वत्प्रसादान्महेश्वर ॥ इति सम्प्रार्थ्य देवेशं तद्गुरः समुपा-

विशेत् ॥ तेनोपदिष्टमात्मानं मत्वा तत्पत्रगं मनुम् ॥ तत्सन्निधावष्टशतं जपेद्देवं विशेत् ॥ गुर्वभावेतु मन्त्राणामेवं ग्रहणमिष्यते गुरुं स्मरन् ॥ अष्टशतमष्टोत्तरशतम् ॥ ॥ इति ॥ इति **गुर्वभावे मन्त्रग्रहणविधिः** ॥ अथैतत्प्रयोगः ॥ चन्द्रोपरागे सूर्योपरागे वा स्नात्वा परिहितशुचिवसनः शिवालयं गत्वा तत्र मृदा स्थण्डिलं कृत्वा सौवर्णे राजते पत्रे ताडपत्रे भूर्जपत्रे वा कुङ्कुमचन्दनादिना इष्टमन्त्रं

विलिख्य स्थण्डिले स्थापयित्वा शिवं षोडशोपचारैः सम्पूज्य प्रभूतं पायसनैवेद्यमर्पयित्वा साष्टाङ्गं प्रणम्य देवतां गुरुं भावयन् पत्रस्थं मन्त्रं त्रिरुच्चार्य गुरूपदिष्टं भावयित्वा पूर्ववद्देवगुरतोऽष्टोत्तरशतवारं जपेत् ॥ ब्राह्मणभोजनादिकं पूर्ववत् ॥ इति चण्डिकोपास्तिदीपिकायां दीक्षाप्रकाशः समाप्तः ॥

इति चण्डिकोपास्तिदीपिकायां दीक्षाप्रकाशः ।

॥ श्री ॥

अथ चण्डिकोपास्तिदीपिकायां आह्निकप्रकाशः ॥

॥ श्री ॥

आह्निकप्रकाशः ।

श्रीगणेशाय नमः ॥ अथ चण्डिकोपास्तिदीपिकायामाह्निकप्रकाशः प्रारभ्यते। तत्रादौ प्रातःकृत्यम् । मन्त्रमहोदधौ । ब्राह्मे मुहूर्ते उत्थाय प्रक्षाल्यङ्घ्रिकराननम् ॥ परिधायाम्बरं शुद्धमन्तःस्नानं विधाय च ॥ अन्तःस्नानं चेत्थम् ॥ कोटिसूर्यप्रतीकाशं निजभूषायुधैर्युतम् ॥ शिरःस्थं संस्मरेद्देवं तत्पादोदकधारया ॥ विशन्त्या ब्रह्मरन्ध्रेण निजदेहं विशुद्धया ॥ प्रक्षाल्यन्तर्गतं पापं विरजा जायते नरः ॥ इति ॥ (शिरस्थं ब्रह्मरन्ध्रगतसहस्रदलाब्जस्थितं) अथाचम्यासने शुद्ध उपविश्य गुरुं स्मरेत् ॥ शिवस्वरूपं पद्मस्थं प्रसन्नं द्विभुजाक्षिकम् ॥ प्राणानायम्य ऋष्यादि न्यस्य ध्यात्वा च देवताम् ॥ मन्त्रं जप्त्वा यथाशक्ति, मलोत्सर्गादिकं चरेत् ॥ मन्त्रस्नानं ततः कुर्यात् स्नात्वा वेदोक्तमार्गतः ॥ (मन्त्रस्नानं तान्त्रिकस्नानं) प्राणानायम्य मूलेन कृत्वा न्यासं षडङ्गकम् ॥ आदित्यमण्डलात्तीर्थान्याह्वयेत्सृणिमुद्रया ॥ (सृणिमुद्रया अङ्कुशमुद्रया) तल्लक्षणं यथा ॥ ऋज्वीं च मध्यमां कृत्वा तर्जनीं मध्यपर्वणि ॥ सङ्कोच्याकुञ्चयेत् किञ्चिन्मुद्रैषाङ्कुशसंज्ञिता ॥ इति ॥—मुद्रापदनिरुक्तिर्मुद्रानिघण्टौ । याभिर्विरचिताभिस्तु मोदन्ते सर्वदेवताः ॥ तस्मान्मुद्रापदेनोक्ताः सर्वकर्मफलप्रदाः ॥ इति ॥ देवेभ्यो मुदं राति ददातीति मुद्रा इति तद्व्युत्पत्तिः ॥ तन्त्रसारोक्ता निरुक्तिर्यथा । मोदिनी सर्वदेवानां द्राविणी पापसंहतेः ॥ तस्मान्मुद्रेति विख्याता सर्वकामार्थसाधिका ॥ इति ॥ मन्त्रत्रयेणाम्बुमध्ये उच्यते तन्मनुत्रयम् ॥ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ नर्मदे सिन्धुकावेरि जलेऽस्मिन् गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ संन्निधिं कुरु ॥ (सिन्धुकावेरीत्येकं पदं सिन्धुसहिता कावेरीति विग्रहः)

आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि ॥ एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ ततो वमितिमन्त्रेण योजयेत्तानि तज्जले ॥ (तानि तीर्थानि) अग्न्यर्केन्दुमण्डलानि तत्र सञ्चिन्तयेज्जले ॥ मन्त्रयेत्तेन वीजेन रविवारं ततो जलम् ॥ (तेन वीजेन वंवीजेन । रविवारं द्वादशवारम्) कवचेनावगुण्ठ्याथ रक्षेदस्त्रेण तत्पुनः ॥ (कवचेन हुमितिमन्त्रेण । अवगुण्ठ्य अवगुण्ठनमुद्रां प्रदर्श्य । अवगुण्ठनमुद्रा यथा। सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी ॥ अवगुण्ठनमुद्रेयं परितो भ्रामिता दिशः ॥ इति ॥ **तृचभास्करे** तु। मुष्टिद्वयस्य तर्जन्यौ प्रसार्याधोमुखे कृते ॥ अनुलोमविलोमाभ्यां भ्रामिते देवताभितः ॥ दुष्टदृष्टिनिरासाय सैषा मुद्रावगुण्ठनी ॥ इत्युक्त्वा ॥ अस्त्रेणफडितिमन्त्रेण) अत्र चक्रमुद्रादर्शनं शिष्टसम्प्रदायः, तत्र चक्रमुद्रा यथा । हस्तौ तु सम्मुखौ कृत्वा संलग्नौ सुप्रसारितौ ॥ कनिष्ठाङ्गुष्ठकौ लग्नौ चक्रमुद्रेयमीहिता ॥ इति ॥ मूलमन्त्रेणेशवारमभिमन्त्र्य नमेज्जलम्॥ (ईशवारमेकादशवारम्) मन्त्रेण वक्ष्यमाणेन देवतां मनसि स्मरन् ॥ आधारः सर्वभूतानां विष्णोरतुलतेजस ॥ तद्रूपाश्च ततश्चापस्तस्मात्ताः प्रणमाम्यहम् ॥ मज्जेज्जले स्मरंस्तत्र मूलं च देवताकृति ॥ ततश्च सिञ्चेत्कं सप्तकृत्वः कलशमुद्रया ॥ (कं शिरः)। कलशमुद्रा यथा। दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु ॥ सावकाशात्मिकां मुष्टिं कुर्यात्कलशमुद्रिका ॥ इति ॥ मूलेनाथ चतुर्मन्त्रैरभिषिञ्चेन्निजां तनुम् ॥ उच्यन्ते ते च चत्वारो मन्त्राः शङ्करभाषिताः ॥ सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापतेः ॥ मातरः सर्वदेवानामापो देव्यः पुनन्तु माम् ॥ अलक्ष्मीर्मलरूपा या सर्वभूतेषु संस्थिता ॥ (तामिति शेषः) क्षालयन्ति निजस्पर्शादापो देव्यः पुनन्तु माम् ॥ यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नत वो नमः ॥ आयुरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम् ॥ सन्तोषः क्षान्तिरास्तिक्यं विद्या भवतु वो नमः ॥ ततो देवान्मनुष्यांश्च सङ्क्षेपात्तर्पयेत्पितॄन् ॥ इदं

स्नानाङ्गतर्पणम् ॥ पितॄनिति देवर्ष्योरप्युपलक्षणम् ॥ तर्पणं स्वस्वतीर्थे-
न कार्यम् । तानि तीर्थानि " अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम् ॥
मूलेऽङ्गुष्ठाङ्गुल्योः पित्र्यम् " इति (कायं प्राजापत्यं, तेन ऋषितर्पणम् ।)
तीर्थाभावे स्वसदने स्नायादुष्णेन वारिणा ॥ अल्पा एव प्रयोक्तव्यास्तत्र
मन्त्रा यथोचितम् ॥ भस्मना गोरजोभिर्वा स्नायान्मन्त्रेण वाक्षमः ॥
(अक्षमः जलस्नानासमर्थः ।) इति **मन्त्रस्नानम्** ॥ **अथ मन्त्रसन्ध्या** ॥
तत आचम्य पीठस्थस्तिलकं रचयेत् सुधीः ॥ (तिलकं भस्मादिपुण्ड्रान्)
कृत्वा सन्ध्यां स्वशाखोक्तां मन्त्रसन्ध्यामथाचरेत् ॥ सन्ध्यायां प्राची उदीची
वा दिक् प्रशस्ता ॥ सन्ध्या होमजपादीनि प्राङ्मुखोदङ्मुखश्चरेत् " ॥ इति
हारीतोक्तेः । तत्र प्राची, " यत्रैव भानुस्तु वियत्युदेति प्राचीं तु तां वेद-
विदो वदन्ति " ॥ इत्युक्तलक्षणा ग्राह्या । तदनुरोधेनोदीच्यपि । पूजायां
तु विशेषो वक्ष्यते । **अथाचमनम्** ॥ तच्च मूलमन्त्रेण कार्यम् । मूलेनाच-
मनप्राणायामौ तान्त्रिककर्मसु । इति **तन्त्रराजोक्तेः** । **मन्त्रसहोदधौ** तु ।
आत्मविद्याशिवैस्तत्त्वायस्वधान्तैः पिबेज्जलम् ॥ हां ह्रीं हूमादिभिः शैवैः
शाक्तैर्वाग्भवपूर्वकैः ॥ ॐ ऐं आत्मतत्त्वाय स्वधा । ॐ ऐं विद्यातत्त्वाय
स्वधा । ॐ ऐं शिवतत्त्वाय स्वधा । इति शाक्तैराचमनं कार्यमित्यर्थः ॥
देवीमहोत्सवे तु **क्रमेण** ऐं ह्रीं क्लीं बीजपूर्वकेण नमोन्तेन तत्त्वत्रयेणोक्तम् ।
दुर्गामहोत्सवे **चामुण्डायै** विच्चे सर्वतत्त्वाय नम इति चतुर्थं चोक्तम् । आच-
मनं **ब्राह्मतीर्थेन कार्यम्** । उक्तं च **याज्ञवल्क्येन** । " ब्राह्मेण तीर्थेन द्विजो
नित्यमुपस्पृशेत् ॥ " इति ॥ ब्राह्मतीर्थं चाङ्गुष्ठमूले । " मूले त्वङ्गुष्ठस्य
ब्राह्मम् ॥ " **इत्यमरसिंहः** ॥ " क्षालनादिकमङ्गुल्या स्पर्शोऽपि स्याद-
मन्त्रकः ॥ **स्पर्शमुद्राश्च** । आस्ये नसोः प्रदेशिन्यानामया नेत्रकर्णयोः ॥
कनिष्ठया नाभिदेशेऽङ्गुष्ठः सर्वत्र संयुतः ॥ तलेन हृदये चैव सर्वाभिर्म-
स्तकेंऽसयोः " ॥ इति ॥ तत्र क्षालनं क्रमेण दक्षवामकरयोः, ऊर्ध्वाधरो-

छयोः, पुनर्दक्षकरस्य, दक्षवामपादयोश्च । आदिपदेन मूर्ध्नः प्रोक्षणम् ॥ एतावद्विस्तृताचमनाशक्तौ “ त्रिः पीत्वापो हस्तं प्रक्षाल्य दक्षिणकर्णं स्पृशेदिति ” **स्मृत्यर्थसारोक्तं** सङ्क्षिप्तमाचमनं कार्यम् । सन्ध्यारम्भे द्विराचमनम् ॥ “ स्नानसन्ध्याजपाद्येषु द्विराचमनं” इति **गोभिलस्मृतेः** ॥ **अथ प्राणायामः** ॥ प्राणायामस्त्रिधा प्रोक्तः पूरकः कुम्भकस्तथा ॥ रेचकश्चेति वायोस्तु पूरणात्पूरकः स्मृतः ॥ कुम्भकः स्तम्भनाद्वायो रेचनाद्रेचकः स्मृतः ॥ पूरयेद्वामया वायुं रेचयेद्दक्षनासया ॥ मन्त्रस्यावृत्तयः कार्या द्वात्रिंशत्पूरके तथा ॥ षोडशद्वादशाष्टौ वा चतस्रो वा तदर्धकम् ॥ कुम्भके द्विगुणा ज्ञेया रेचके पूरकार्धतः ” ॥ इति ॥ क्वचित्पूरकरेचकयोरुक्तावृत्तिविपर्यासः क्वचिन्नासापुटविपर्ययश्चोक्तः ॥ एतावदशक्तौ केवलकुम्भकेनैव प्राणायामः कार्यः ॥ तदुक्तं वसिष्ठेन । “ पूरकरेचकाशक्तौ केवलं कुम्भयेदिति” ॥ सन्ध्यारम्भे प्राणायामत्रयं कुर्यात् तदुक्तं **कर्मप्रदीपे** । “ सन्ध्यार्चने जपे होमे प्राणायामास्त्रयस्त्रयः ” ॥ **प्राणायामे मुद्राः** पञ्चाङ्गुलीभिर्नासाग्रं प्रयतः पीडयेन्नरः ॥ मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः ॥ कनिष्ठानामिकाङ्गुष्ठैर्यतेश्च ब्रह्मचारिणः ॥ इति ॥ **इति प्राणायामः** ॥ जलमादाय वामे तु दक्षेण सप्तधा तनुम् ॥ सम्मार्ज्य मूलमन्त्रेणावशिष्टं तत्पुनर्जलम् ॥ दक्षहस्ते समादाय नासिकान्तिकमानयेत् ॥ इडयान्तः समाकृष्य तद्धौतैः पापसञ्चयैः । (इडया वामनासानाड्या) कृष्णवर्णं पिङ्गलया रेचितं प्रविचिन्त्य तत् (पिङ्गलया दक्षिणनासानाड्या । तज्जलं कृष्णवर्णं प्रविचिन्त्येन्वयः) क्षिपेदस्त्रेण पुरतः कल्पिते भिदुरोपले ॥ (अस्त्रेण फडितिमन्त्रेण । भिदुरोपले वज्रसदृशे पाषाणे । कुलिशं भिदुरं पविरित्य**मरः**) अयं जलक्षेपः क्वचिद्वामभागेऽप्युक्तः । अघमर्षणमेतद्धि सकलाघनिबर्हणम् ॥ पुनरञ्जलिनादाय जलमर्घ्यं दिशेत्ततः ॥ त्रिवारं मूलमन्त्रान्ते षोडशार्णं मनुं जपन् ॥ रविमण्डलसंस्थाय देवायार्घ्यपदं वदेत् ॥ कल्पयामीति मन्त्रोऽयं षोडशार्ण उदाहृतः । (षोडशार्ण इत्युप-

लक्षणम् । देवायेति पदस्थाने इष्टदेवतानाम्नो योजनीयत्वेनाक्षरसङ्ख्याया
न्यूनाधिकत्वसम्भवात् ॥) सूर्यमण्डलगं देवं ध्यायन्निष्टमनन्यधीः ॥ प्रजपे-
न्मूलगायत्रीं मूलं वाष्टोत्तरं शतम् ॥ नवार्णगायत्र्युक्ता **कालिकापुराणे**
"नारायण्यै च विद्महे चण्डिकायै च धीमहि ॥ तन्नश्चण्डी प्रचोदयात्" ॥
इति ॥ जातवेदस इत्येकऋचोपस्थाय देवताम् ॥ दिग्देवताः प्रणम्याथ
द्विराचम्य विसर्जयेत् ॥ **इति प्रातःसन्ध्या** ॥ एवमेव मध्याह्नसन्ध्या सायं-
सन्ध्या च ॥ विशेषस्तु प्रयोगे वक्ष्यते ॥ **अथ तर्पणं,** चण्डिकारहस्ये ।
कृत्वा माध्याह्निकं सर्वमुदकान्ते समाहितः ॥ तर्पणाय महालक्ष्म्याः षडङ्ग
न्यासमाचरेत ॥ ह्रीं चण्डिकायै मन्त्रेण व्यस्तेन च समस्ततः ॥ ततश्च
त्रिजगद्धात्रीमृषिभिर्वन्दितां पराम् ॥ ध्यात्वा नवकबीजान्ते चण्डिका तृप्य-
तामिति ॥ जलाञ्जलीनष्टशतं प्रदद्यात्कुसुमान्वितान् ॥ सेचयेच्च तदर्धेन तद-
र्धेनाथवा पुनः ॥ महालक्ष्मीं तर्पयित्वा कर्ता कामानवाप्नुयात् ॥ दत्वार्घ्यं
दिननाथाय तीर्थं संहारमुद्रया ॥ विसृज्यार्कं लोकपालान्नत्वा देवस्तुतिं पटेत्
॥ इति सूर्यार्घ्यदानमन्त्रः प्रयोगे वक्ष्यते ॥ अधोमुखं वामहस्तं तदूर्ध्वं दक्षहस्तकं
॥ क्षिप्त्वाङ्गुलीभिः संयोज्य हस्तौ तु परिवर्तयेत ॥ एषा संहारमुद्रा स्याद्वि-
सर्जनविधौ मता॥इति॥ **इति तान्त्रिकसन्ध्यादिविधानम्** ॥**अथैतत्प्रयोगः**।
श्रीमान् साधको ब्राह्मे मुहूर्ते उत्थाय भगवतीं चण्डिकां स्मरेत् ॥ तद्यथा।
प्रातःस्मरामि शरदिन्दुकलावतंसां सद्रत्नवन्मकरकुण्डलहारभूषाम् ॥ दिव्या-
युधोर्जितसुनीलसहस्रहस्तां रक्तोत्पलाभचरणां त्रिगुणां परेशाम् ॥ प्रातर्नमामि
महिषासुरचण्डमुण्डशुम्भासुरप्रमुखदैत्यविनाशदक्षाम् ॥ ब्रह्मेन्द्ररुद्रमुनिमोहन-
लोलशीलां चण्डीं समस्तसुरमूर्तिमनेकरूपाम् ॥ प्रातर्भजामि भजतामभिलाष-
दात्रीं धात्रीं समस्तजगतां दुरितापहन्त्रीम् ॥ संसारबन्धनविमोचनहेतुभूतां
मायां परां भगवतीं परमेश्वरस्य ॥ श्लोकत्रयमिदं देव्याश्चण्डिकायाः पठेन्नरः ॥
सर्वान्कामानवाप्नोति चण्डीलोकं च गच्छति ॥ इति स्मृत्वा हस्तौ पादौ प्रक्षाल्य

शुद्धे वाससी परिधाय आसने उपविश्य शिरसि सहस्रदलकमलमध्यगतां कोटिसूर्यप्रकाशां निजायुधालङ्कारयुतां चतुर्भुजामष्टादशभुजां वा महालक्ष्मीं ध्यात्वा तत्पादोदकधारया ब्रह्मरन्ध्रमार्गेण स्वहृदयं प्राप्तया क्षालितसमस्तान्तर्बाह्यशरीरमलमात्मानं भावयेदित्येवं रूपमान्तरस्नानं विधायाङ्गेषु भस्म विलिप्य । परमरमणीयस्वरूपं द्विभुजं द्विनेत्रं पद्मस्थं प्रसन्नमुखाम्भोजं श्रीगुरुं ध्यात्वा । तस्य मानसीं पूजां विधाय । गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ इति नमस्कृत्य गुरुदेवतात्मनामैक्यं विभाव्य वक्ष्यमाणप्रकारेणाचम्य प्राणानायम्य जपप्रकाशे नवार्णप्रकरणे वक्ष्यमाणेन प्रकारेण ऋष्यादिस्मरणन्यासध्यानमानसपूजनपूर्वकं यथाशक्ति मूलमन्त्रं जपित्वा जपं निवेद्य ॥ त्रैलोक्यचैतन्यमयस्वरूपे श्रीचण्डिके त्वच्चरणाज्ञयैव॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥ संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीजगदीश्वरीशे ॥ स्पर्धातिरस्कारकलिप्रमादभयानि मां माभिभवन्तु मातः ॥ इति देव्याज्ञां गृहीत्वा । “ समुद्रवसने देवि पर्वतस्तनमण्डले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ” ॥ इति पृथ्वीं प्रार्थ्य स्मृत्युक्तमार्गेण मलोत्सर्गादि विधाय ॐ क्लीं पक्षसेनाधिपतये मणिभद्राय किलिकिलिस्वाहा ॥ इति यथोक्तवृक्षकाष्ठिकां गृहीत्वा तया क्लीं कामदेवाय सर्वजनप्रियाय स्वाहा ॥ इति दन्तान् विशोध्य । मूलमन्त्रेण मुखं प्रक्षाल्याचामेत् ॥ अथ नद्यादौ गत्वा स्वशाखोक्तविधिना स्नात्वा तान्त्रिकस्नानं कुर्यात् ॥ तद्यथा । आचम्य प्राणानायम्य महालक्ष्मीप्रीत्यर्थं मन्त्रस्नानं करिष्ये इति सङ्कल्प्य मूलमन्त्रस्य ऋष्यादिन्यासं षडङ्गन्यासं च कृत्वा नाभिमात्रे जलेऽवतीर्य जले स्वपुरतो हस्तमात्रं चतुरस्रमण्डलं चिन्तयित्वा । “ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ” ॥ इति सूर्यं प्रार्थ्य तन्मण्डलात् ‘ क्रों ’ इत्यङ्कुशमुद्रया तीर्थान्याकृष्य “ आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि ॥ एहि गङ्गे नम-

स्तुभ्यं सर्वतीर्थसमन्विते ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ” ॥ इति गङ्गादिनदीरावाह्य पुरश्चिन्तितचतुरस्रजलमण्डलं ‘ वं ’ इत्यमृतबीजेन द्वादशवारमभिमन्त्र्य ‘ हुं ’ इति कवचमन्त्रेणावगुण्ठनमुद्रयावगुण्ठ्य ‘ फट् ’ इत्यस्त्रमन्त्रेण चक्रमुद्रया संरक्ष्य मूलमन्त्रेणैकादशवारमभिमन्त्र्य “ आधारः सर्वभूतानां विष्णोरतुलतेजसः ॥ तद्रूपाश्च ततश्चापः तस्मात्ताः प्रणमाम्यहम् ” ॥ इति जलं नमस्कृत्य पूर्वकल्पिते चतुरस्रजलमण्डले षट्कोणचक्रं तन्मध्ये मूलमन्त्रं च विचिन्त्य तस्मिन्महालक्ष्मीं ध्यात्वा मूलमन्त्रदेवतात्मनामैक्यं विभाव्य ‘ ॐ हंसः सोऽहम् ’ इति मन्त्रेण त्रिर्निमज्योन्मज्य मूलेन कुम्भमुद्रया सप्तकृत्वः शिरस्यभिषिच्य “ सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापतेः ॥ मातरः सर्वभूतानामापो देव्यः पुनन्तु माम् ॥ अलक्ष्मीर्मलरूपा या सर्वभूतेषु संस्थिता ॥ तां क्षालयन्ति संस्पर्शादापो देव्यः पुनन्तु माम् ॥ यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्त वो नमः ” ॥ इति मन्त्रैरात्मानमभिषिच्य स्नानाङ्गतर्पणं कुर्यात् । ब्रह्मादयो देवास्तृप्यन्तु । सनकादयो मुनयस्तृप्यन्तु । कव्यवाहनादयः पितरस्तृप्यन्तु ॥ इति ॥ **इति तीर्थादौ शीतजलस्नानप्रयोगः अथ गृहे उष्णोदकस्नानप्रसङ्गे।** उष्णोदके “ आवाहयामि त्वां देवि ” इति मन्त्रद्वयेन तीर्थान्यावाह्य “ सिसृक्षोर्निखिलं विश्वं ” इत्यादिमन्त्रचतुष्टयं पठन् स्नायात् ॥ नात्र तर्पणादिकम् । जलस्नानाशक्तौ भस्मनो गोपादरजसो वाङ्गेषु लेपनम्, पूर्वोक्तमन्त्रचतुष्टयेन जलेन मार्जनं वा कुर्यादिति **गौणस्नानम्** ॥ ततो धौते वाससी धृत्वा आसने उपविश्य भस्मादितिलकं कृत्वा शास्त्रोक्तसन्ध्यान्ते मन्त्रसन्ध्यां कुर्यात् । सा चेत्थम् । प्रसिद्धपूर्वोत्तरान्यतरदिङ्मुखः साधकः मूलमन्त्रेण ब्रह्मतीर्थेन त्रिर्जलं पीत्वा ततः क्रमेण दक्षवामकरौ, ऊर्ध्वाधरोष्ठौ, पुनर्दक्षहस्तं, दक्षवामचरणौ च प्रक्षाल्य । मूर्धानं प्रोक्ष्य । ततः साङ्गुष्ठया

तर्जन्या मुखं, दक्षवामनासे च साङ्गुष्ठयानामिकया नेत्रे, कर्णौ च, हस्ततलेन हृदयं, सर्वाङ्गुलीभिर्मस्तकमंसौ च, स्पृशेत् ॥ एतावदशक्तौ त्रिः पीत्वापो हस्तं प्रक्षाल्य दक्षिणकर्णं स्पृशेत् ॥ **इत्येकमाचमनम्** ॥ एवं द्विराचम्य प्राणानायच्छेत् । तद्यथा गृहस्थादिः स्वस्वमुद्रया नासां धृत्वा चण्डीनवार्णमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभश्छन्दांसि ॥ महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः प्राणायामे विनियोगः । इत्युक्त्वा द्वात्रिंशत्षोडशद्वादशाष्टचतुर्ष्वन्यतमसङ्ख्यया मूलमावर्तयन् वामनासया वायुमापूर्य पूरकद्विगुणसङ्ख्यया मूलमावर्तयन् वायुं निरुध्य पूरकार्धसङ्ख्यया मूलमावर्तयन् दक्षिणनासया वायुं रेचयेत् ॥ **इत्येकः प्राणायामः** । नासाविपर्ययेण उक्तसङ्ख्यमूलावृत्तिभिरेव पूरकरेचकयोर्विधानं, **द्वितीयः** । **प्रथमवत्तृतीयः** । इति त्रिः प्राणानायम्य कलशजलं 'वं' इति धेनुमुद्रया अमृतीकृत्य मूलेनाष्टवारमभिमन्त्र्य, "ब्रह्माण्डोदरतीर्थानि" इति पूर्वोक्तश्लोकमन्त्रेण सूर्यं प्रार्थ्य 'क्रों' इत्यङ्कुशमुद्रया सूर्यमण्डलात्तीर्थान्याकृष्य 'वं' इति कलशजले संयोज्य । महालक्ष्मीप्रीत्यर्थं मन्त्रसन्ध्यां करिष्ये । इति सङ्कल्प्य वामहस्ते जलं गृहीत्वा द्वादशवारं सप्तवारं वा मूलेन दर्भाङ्कुरैरङ्गुलीभिर्वा मार्जनं कृत्वावशिष्टजलं दक्षिणहस्ते गृहीत्वा नासिकासमीपमानीय वामनासयान्तःसमाकृष्य तेन सर्वमान्तरं पापसञ्चयं क्षालितं भावयित्वा तज्जलं दक्षिणनासया दक्षिणकरे विसृज्य 'अस्त्राय फट्' इति पुरतो वामभागे वा दृढपाषाणे क्षिपेदित्यघमर्षणं कृत्वा । अञ्जलौ जलमादाय मूलमन्त्रान्ते रविमण्डलस्थायै महालक्ष्म्यै इदमर्घ्यं समर्पयामि । इति त्रिरर्घ्यदानं कृत्वा कालातिक्रमे एकमधिकं दद्यात् ॥ ततः पूर्ववद्द्विराचम्य त्रिः प्राणानायम्य मूलमन्त्रस्य ऋष्यादि स्मृत्वा न्यासध्यानमानसपूजादिकं कृत्वा मूलमष्टोत्तरशतं जपेत् । ऋष्यादिस्मरणन्यासध्यानादिकं **जपप्रकाशे नवार्णविधाने** वक्ष्यते । जपान्ते पुनर्हृदयादि षडङ्गं कृत्वा गुह्यातिगुह्यगोप्त्री त्वमिति जपं निवेद्य जातवेदसे

सुनवामामित्येकया ऋचोपस्थायेन्द्रादीन् दिक्पालान्नत्वा द्विराचामेदिति प्रातःसन्ध्या ॥ मध्याह्नसन्ध्यायां प्रातःपदस्थाने मध्याह्नपदं सायंसन्ध्यायां सायमिति पदं च योज्यमिति विशेषः । ततो निजशाखीयमध्याह्नसन्ध्यानन्तरं तान्त्रिकमध्याह्नसन्ध्यां कृत्वा । ब्रह्मयज्ञान्ते स्वशाखीयतर्पणानन्तरं महालक्ष्मीतर्पणं कुर्यात् । तद्यथा द्विराचम्य त्रिः प्राणानायम्य महालक्ष्मीप्रीत्यर्थं तर्पणं करिष्ये इति सङ्कल्प्य । ह्रीं चण्डिकायै इति पञ्चाक्षरेण व्यस्तसमस्तेन हृदयादिषडङ्गं कृत्वा सर्वस्याद्येति रहस्योक्तप्रकारेण ध्यात्वा मानसोपचारैः सम्पूज्य मूलमन्त्रान्ते, चण्डिका तृप्यतामिति गन्धपुष्पाक्षतसहितान् अष्टोत्तरशतं, तदर्धं, तदर्धं वा, जलाञ्जलीन् दत्वा इन्द्राय नमोऽग्नये नम इत्यादिना दिक्पालान्नत्वा द्विराचामेदिति महालक्ष्मीतर्पणं कृत्वा । ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः । हंसः सोऽहम् । सग्रहराशिनक्षत्रयोगकरणपरिवृतासनसंस्थितश्रीसूर्य एष तेऽर्घ्यः ॥ इति चण्डीसपर्याक्रमकल्पवल्ल्युक्तेन मन्त्रेण सूर्यायार्घ्यत्रयं दत्वा । तीर्थानि संहारमुद्रया सूर्यमण्डले विसृज्य द्विराचामेत् ॥ इति चण्डिकोपास्तिदीपिकायां आह्निकप्रकाशः समाप्तः ॥

इति चण्डिकोपास्तिदीपिकायां आह्निकप्रकाशः।

॥ श्री ॥

अथ चण्डिकोपास्तिदीपिकायां नित्यार्चाप्रकाशः ॥

॥ श्री ॥

नित्यार्चाप्रकाशः ।

अथ चण्डिकोपास्तिदीपिकायां नित्यार्चाप्रकाश आरभ्यते ॥ तत्र चण्डिकाया नित्यार्चाविधिश्च**ण्डिकार्चनरहस्ये** । प्रविश्य देवतागारं वितानपरिशोभितम् ॥ बहुदीपप्रकाशाढ्यं बहुधूपैः सुधूपितम् ॥ तत्रोक्तविधिना राजन् पूजयित्वा हरीश्वरौ ॥ गुरूपदेशविधिना चण्डिकार्चनमारभेत् ॥ अत्र पूजयित्वा हरीश्वरावित्युक्त्या देवतान्तरोपासकानामपि तत्तद्देवतोपासनाधिकारार्थं हरीश्वरयोः पूजनमावश्यकमिति ज्ञापितम् ॥ अथ पूजायां दिगुक्ता **वैशाम्पायनेन** ॥ यत्र दिङ्नियमो नास्ति तत्र प्राची स्मृता नृप ॥ तदभावे मतोदीची विशेषोक्तौ पराः स्मृताः ॥ इति ॥ तत्र, यत्रैव भानुस्तु वियत्युदेति प्राचीं तु तां वेदविदो वदन्ति ॥ इत्युक्तलक्षणा प्राची सर्वकर्मसु प्रशस्ता ॥ तान्त्रिकास्तु, सूर्योदयस्था सा प्राची स्नानसन्ध्यादिकर्मसु ॥ पूज्यपूज्यकयोर्मध्यः प्राची प्रोक्ता सुरार्चने ॥ इत्याहुः ॥ वैदिकपूजायां लोकप्रासिद्धा प्राची, तान्त्रिकपूजायां पूज्यपूजकयोर्मध्यः प्राचीत्यन्ये ॥ चलप्रतिमासु प्रथमा, स्थिरासु द्वितीयेत्यपरे ॥ आवरणेषु लोकपालपूजायां तदायुधपूजायां च लोकप्रसिद्धैव प्राची ॥ प्राच्यनुरोधेनान्या दिशो ज्ञेयाः ॥ **इति दिग्विचारः** ॥ आचमनप्राणायामौ **प्रागाह्निकप्रकाशे** उक्तौ ॥ **अर्चनचिन्तामणौ** आदौ कृताञ्जलिर्दक्षे गणेशं वामतो गुरून् पुरः स्वां देवतां नत्वा ततोऽन्या देवता नमेत् ॥इत्युक्तम् ॥(अन्या देवता वाणीपरमेष्ठिलक्ष्मीनारायणोमामहेश्वरशचीपुरन्दराद्याः ॥) **अथ सङ्कल्पस्यावश्यकत्वमाह मार्कण्डेयः** । सङ्कल्पं च सदा कुर्यात्स्नानदानार्चनादिषु ॥ अन्यथा तानि कर्माणि विफलानि भवन्ति हि इति ॥ सङ्कल्पलक्षणमुक्तं **ऋषिभट्टीये** । सङ्कल्पः स्यान्मनसि मननं प्रोक्तरीत्याथ वाचा व्याहर्तव्यं तदनु च करेणाम्बुसेकस्त्रिधेति ॥ वाङ्मात्रेण

त्वरितकरणे केचिदिच्छन्ति चाम्बुक्षेपस्थानेऽञ्जलिमुपदिशन्त्यन्य एष्विष्ट आद्यः ॥ इति ॥ सङ्कल्पारम्भे देवतास्मरणं देशकालस्मरणं च कर्तव्यम् ॥ **तदुक्तं व्रतराजे बृहद्व्यासेन** ॥ देवतास्मरणं देशकालादिस्मरणं तथा ॥ सङ्कल्पे विधिवत्कुर्यान्नित्यं धर्मस्य हेतवे ॥ इति ॥ (देवतास्मरणं सुमुखश्चैकदन्तश्चेत्यादि) **अथ देशो यथा** । द्वीपं वर्षं महाशैलपार्श्वं जनपदस्तथा ॥ महानद्यास्तटं ग्राम इत्यादिर्देश उच्यते ॥ इति ॥ **अथ कालः सिंहस्थपद्धतौ** । अब्दायनर्तुमासाश्च पक्षतिथ्यृक्षवारकम् ॥ योगश्च करणं चेति सङ्कल्पे काल इष्यते ॥ इति ॥ (वारात्पूर्वं नक्षत्रोक्तिश्छन्दोऽनुरोधात् । तेन स्मरणे आदौ वारस्ततो नक्षत्रमिति क्रमः) देशकालयोर्विस्तरेणोक्तिर्हेमाद्रौ दानकाण्डे द्रष्टव्या ॥ **अथासनानि मन्त्रमहोदधौ** । कुशासनं च वैयाघ्रं मृगाजिनमथापि वा ॥ चित्रकम्बलकं वापि सर्वाभावे तु दारुजम् ॥ इति **व्यासः** ॥ कुशासने ब्रह्मलोको मोक्षो वैयाघ्रचर्मणि ॥ कृष्णाजिने भवेत् ज्ञानं सर्वेष्टं चित्रकम्बले ॥ इति ॥ चैलाजिनकुशोत्तरमिति **भगवद्गीतासूक्तम्** ॥ तत्र सर्वाधः कुशाः । तदुपर्यजिनम् । तदूर्ध्वं चैलमिति तद्भाष्ये क्रमो दर्शितः । चैलमत्रौर्णम् । **अथ निषिद्धान्यासनानि** ॥ काष्ठपल्लववंशाश्मगोशकृत्तृणमृण्मयम् ॥ विषयं कठिनं चैव त्यजेदाधिदमासनम् ॥ इति ॥ कठिनत्वादेव सर्वाभावे तु दारुजमितिपूर्वमुक्तम् । **अथोपवेशनविधिस्तत्रैव** ॥ आधारादीन्नमस्कृत्यासनं तत्र प्रसारयेत् ॥ (आधारादयः आधारः कूर्मशेषौ च चतुर्थी पृथिवी नृप ॥ इति **चण्डिकार्चनरहस्योक्ताः** ॥) अनन्तं विमलं पद्मं ङेऽन्तासननमोन्वितम् ॥ जपन्निदध्यात्त्रीन् दर्भान् कुशचर्माम्बरासने ॥ (अनन्तासनाय नमः । विमलासनाय नमः । पद्मासनाय नमः ॥ इति तत्प्रयोगः ।) पृथ्वि त्वयेति मन्त्रेण चासने समुपाविशेत् ॥ कुर्यात्स्वास्तिकपाथोजवीरादिष्वेकमासनम् ॥ (अत्रासनशब्द आसनोपवेशनप्रकारपरः) स्वस्तिकाद्युपवेशनप्रकाराणां लक्षणानि **शारदातिलके** । जानूर्वोरन्तरे कृत्वा

सम्यक् पादतले उभे ॥ ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते ॥ (विशेदुपविशेत्) ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ॥ पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम् ॥ एकं पादमधःकृत्वा विन्यस्योरौ तथेतरम् ॥ ऋजुकायो विशेद्योगी वीरासनमिदं स्मृतम् ॥ इति ॥ **अथ चण्डिकार्चनरहस्ये,** सिद्धासनमुक्तं तत्प्रकारस्तत्रैव । गुदमेण्ढ्रान्तरं वामपादमूलेन पीडितम् ॥ वामपादोपरि स्थाप्यं दक्षिणं चरणं ध्रुवम् ॥ एतत्सिद्धासनं नाम जरामरणवर्जितम् ॥ इति ॥ अन्येऽपि बहव उपवेशनप्रकारा ग्रन्थान्तरे उक्तास्ते तत्रैव द्रष्टव्याः ॥ पृथ्वीति मन्त्रस्य ऋष्यादयः, **प्रयोगपारिजाते** । पृथिव्या मेरुपृष्ठं तु ऋषिरित्यभिधीयते ॥ सुतलं छन्द इत्युक्तं कूर्मो वै देवता स्मृता ॥ इति ॥ अन्ये मेरुपृष्ठस्याचेतनत्वेन, कूर्मस्य मन्त्राप्रतिपाद्यत्वेन, सुतलस्य छन्दोविशेषत्वाभावेन तेषामृषिदेवताच्छन्दस्त्वेन कल्पनाया अयुक्तत्वात्, अनुक्तस्थले प्रजापतिर्ऋषिरिति तान्त्रिकसमयात्स ऋषिः प्रतिपाद्यत्वात्पृथिवी देवता । मन्त्रस्यानुष्टुब्वृत्तघटितत्वात्सा छन्द इत्याहुः ॥ **अथ भूतोत्सारणं, मन्त्रमहोदधौ** । अपसर्पन्त्वपक्रामन्त्विति मन्त्रद्वयं पठन् ॥ आत्मानं शङ्करं ध्यात्वा दिव्यानुग्रहशोत्सजेत् ॥ तालत्रयेणान्तरिक्षान् पार्ष्णिघातैर्धरागतान् ॥ इति ॥ अस्य मन्त्रद्वयस्य वामदेव ऋषिः । शिवो देवता । क्वचिद्वराहऋषिः भूता देवता इत्युक्तम् ॥ अनुष्टुप्छन्दः । भूतोत्सारणे विनियोगः ॥ अङ्गुष्ठयुक्ततर्जन्या परितः शब्दमाचरन् ॥ दिग्बन्धनं चरेद्धीमान् सुदर्शनमनुं जपन् ॥ प्रणवो हृदयं ङेऽन्तं सुदर्शनपदं पुनः ॥ अस्त्राय फडिति प्रोक्तो मन्त्रो द्वादशवर्णवान् ॥ (हृदयं नमः शब्दः । ङेऽन्तं सुदर्शनपदं चतुर्थ्यन्तं सुदर्शनायेति पदम् ॥ अन्यत्सुगमम् । तथा च ॐ नमः सुदर्शनायास्त्रायफडिति द्वादशाक्षरः सुदर्शनमन्त्रः) शैवे पाशुपतस्य वैष्णवे सुदर्शनस्य तदितरेषु ब्रह्मास्त्रस्य योजनेति **प्रपञ्चसारे** विशेष उक्तः । तत्पक्षेऽत्र ॐ तपः

सत्यात्मने नमः इति ब्रह्मास्त्रमन्त्रेण दिग्बन्धः कार्यः ॥ **इति भूतोत्सारणम्** एतावद्भिस्तराशक्तौ पृथ्वीति मन्त्रेणासने उपविश्य अपसर्पन्त्विति मन्त्रद्वयेन भूतान्युत्सारयेत् ॥ **अथ दीपस्थानं मन्त्रमहोदधौ** । तैलदीपस्तु वामे स्याद् घृतदीपस्तु दक्षिणे ॥ तैले तु रक्तवर्तिः स्यात्सितवर्तिर्घृते मता ॥ **अथ दीपवर्तिचालनार्थं शलाकोक्ता ज्ञानार्णवे** ॥ षोडशाङ्गुलमाना स्यात्सौवर्णी वा शलाकिका ॥ राजत्यौदुम्बरी वापि पैत्तली वा न लौहिका दीपपात्रप्रकृतिका सुश्लक्ष्णा बुध्नकाङ्किता ॥ तीक्ष्णाग्रा सरला मध्ये त्रिशूलाङ्कित मध्यमा ॥ इति (औदुम्बरी ताम्रमयी) ॥ लोहमयशलाकाया निषेधाच्छलाकादीपपात्रयोः समानप्रकृतिकत्वोक्तेश्च लोहमयदीपपात्रस्यापि निषेधो बोध्यते ॥ **अथ दीपस्य गुणदोषास्तच्छान्तिश्च, कर्मप्रदीपे** । दीपज्वाला समा चेत्स्यात्सर्वकार्यार्थसाधिका ॥ वधूनाशस्तु वक्रायां मरणं खरतेजसि ॥ कृष्णायां कार्यनाशः स्यात्तथा चटचटारवे ॥ (वधूनाशः वध्वाः पतिं सन्त्यज्य यत्रकुत्रापि गमनम् । मरणमपि तस्या एव) दीपवान्तौ चौरभीतिः स्रावे पशुविनाशनम् ॥ पात्रभङ्गे भ्रातृहानिर्दीपनाशे स्वनाशनम् ॥ विनाशे ज्वालयेदन्यं नष्टं दीपं तु न कचित् । नष्टदीपज्वालने च चक्षूरोगः प्रजायते ॥ उक्तदोषेषु शान्तिश्च सिताज्यतिलतण्डुलैः ॥ प्रतिद्रव्यं व्याहृतिभिः समस्ताभिर्हुतं चरेत् ॥ अष्टोत्तरशतं तत्र देवता तु प्रजापतिः ॥ इति ॥ एतत्प्रयोगः शान्तिग्रन्थतो ज्ञेयः ॥ दीपस्थापनविधिः पूजाप्रयोगे वक्ष्यते ॥ **अथ भूतशुद्धिर्मन्त्रमहोदधौ** । देवार्चायोग्यताप्राप्त्यै भूतशुद्धिं समाचरेत् ॥ मूलाधारस्थितां देवीं कुण्डलीं परदेवताम् ॥ बिसतन्तुनिभां विद्युत्प्रभां ध्यायेत्समाहितः ॥ मूलाधारात्समुत्थाप्य सङ्गतां हृदयाम्बुजे ॥ सुषुम्नामार्गमाश्रित्यादाय जीवं हृदम्बुजात् ॥ प्रदीपकलिकाकारं ब्रह्मरन्ध्रगतं स्मरेत् ॥ जीवं ब्रह्माणि संयोज्य हंसमन्त्रेण साधकः ॥ पादादिब्रह्मरन्ध्रान्तं स्थितं भूतगणं स्मरेत् ॥ स्ववर्ण-

बीजाकृतिभिर्युक्तं तद्विधिरुच्यते ॥ पादादिजानुपर्यन्तं चतुष्कोणं सवज्रकम् ॥ भूबीजाढ्यं स्वर्णवर्णं स्मरेदवनिमण्डलम् ॥ जान्वाद्यानाभि चन्द्रार्धनिभं पद्मद्वयाङ्कितम् ॥ वं बीजयुक्तं श्वेताभमम्भसो मण्डलं स्मरेत् ॥ नाभेर्हृदयपर्यन्तं त्रिकोणं स्वस्तिकान्वितम् ॥ रंबीजसंयुतं रक्तं स्मरेत्पावकमण्डलम् ॥ हृदो भ्रूमध्यपर्यन्तं वृत्तं षड्बिन्दुलाञ्छितम् ॥ यंबीजयुक्तं धूम्राभं मरुतो मण्डलं स्मरेत् ॥ आब्रह्मरन्ध्रं भ्रूमध्याद्वृत्तं स्वच्छं मनोहरम् ॥ हंबीजयुक्तं नभसो मण्डलं प्रविचिन्तयेत् ॥ पद्धस्तपायूपस्था वाक् क्रमाद्ध्येया धरादिगाः ॥ स्वकीयविषयैर्युक्ता गमनग्रहणादिभिः ॥ (गमनादानविसर्गानन्दवचनानि क्रमात्पादहस्तपायूपस्थवाचां विषयाः) घ्राणं च रसना चक्षुः स्पर्शनं श्रोत्रमिन्द्रियम् ॥ क्रमाद्ध्येयं धरादिस्थं गन्धादिगुणसंयुतम् ॥ (गन्धरसरूपस्पर्शशब्दाः क्रमात् घ्राणरसनाचक्षुस्त्वक्श्रोत्राणां गुणाः) ब्रह्मविष्णुशिवेशानाः सदाशिव इतीरिताः ॥ धरादिभूतानामीशा ध्येयास्तन्मण्डलेषु ते ॥ निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्चतुर्थिका ॥ शान्त्यतीतेति पञ्चैताः कला ध्येया धरादिगाः (शान्त्यतीतेत्येकं नाम) ॥ समानोदानव्यानाश्च प्राणापानौ च वायवः ॥ धरादिमण्डलगताः पञ्च ध्येयाः क्रमादिमे ॥ एवं भूतानि सञ्चिन्त्य प्रत्येकं प्रविलापयेत् ॥ भुवं जले जलं वह्नौ वह्निं वायौ नभस्यमुम् ॥ विलाप्य खमहङ्कारे महत्तत्त्वेऽप्यहङ्कृतिम् ॥ महान्तं प्रकृतौ मायामात्मनि प्रविलापयेत् ॥ शुद्धसच्चिन्मयो भूत्वा चिन्तयेत्पापपूरुषम् ॥ वामकुक्षिस्थितं कृष्णमङ्गुष्ठपरिमाणकम् ॥ ब्रह्महत्याशिरोयुक्तं कनकस्तेयबाहुकम् ॥ मदिरापानहृदयं गुरुतल्पकटीयुतम् ॥ पापियोगपदद्वन्द्वमुपपातकरोमकम् ॥ (गुरुतल्पो गुरुभार्यागमनम् । तल्पं शय्याट्टदारेष्वित्यमरः । पापियोगो महापापिसंसर्गः । तत्संसर्गी च पञ्चमः इतिस्मृतेः ॥) खड्गचर्मधरं दुष्टमधोवक्त्रं सुदुःसहम् ॥ वायुबीजं स्मरन् वायुं सम्पूर्यैनं विशोषयेत् ॥ स्वशरीरयुतं तं च वह्निबीजेन निर्दहेत् ॥ कुम्भके

परिजप्तेन, ततः पापनरोद्भवम् ॥ बहिर्भस्म समुच्चार्य वायुर्वीजं विरेचयेत् ॥ (वायुर्वीजेन पूरकं कृत्वा पापपुरुषं शोषयेत् । ततः अग्निर्वीजेन कुम्भकं कुर्वन् स्वदेहेन सह तं दहेत् । ततो वायुर्वीजेन रेचकं कुर्वन् पापपुरुषभस्मबहिर्विरेचयेदिति श्लोकद्वयार्थः ॥) सुधार्वीजेन देहोत्थं भस्म संप्लावयेत्सुधीः ॥ भूर्वीजेन घनीकृत्य तद्भस्म कनकाण्डवत् ॥ विशुद्धमुकुराकारं जपन् वीजं विहायसः ॥ मूर्धादिपादपर्यन्तान्यङ्गानि रचयेत्सुधीः ॥ आकाशादीनि भूतानि पुनरुत्पादयेच्चितः ॥ सोऽहं मन्त्रेण चात्मानमानयेद् हृदयाम्बुजे ॥ कुण्डलीं जीवमादाय परसङ्गात्स्वधामनि ॥ संस्थाप्य हृदयाम्भोजे मूलाधारगतां स्मरेत् ॥ भूतशुद्धिं विधायेत्थं प्राणस्थापनमाचरेत् ॥ इति ॥ सर्वोऽयं प्रकारः प्रयोगतोऽग्रे स्फुटीभविष्यति ॥ एतावदशक्तौ 'वं लं रं यं हं' इति पञ्चभूतवीजानि पूरके चतुःषष्टिवारं जपन् भूतानि प्रविलाप्य 'यं रं' इति वाय्वग्निर्वीजे कुम्भके द्वात्रिंशद्वारं जपन् पापदेहं संशोषणपूर्वं दग्ध्वा । पुनर्हं यं रं लं वं इति विलोमवीजानि रेचके षोडशवारं जपन् शुद्धदेहमुत्पन्नं विभावयेत् ॥ **इति साम्प्रदायिकाः ॥ इति भूतशुद्धिः ॥ अथ प्राणप्रतिष्ठा** ॥ तत्रैव प्राणप्रतिष्ठामन्त्रस्य मुनयोऽजहरीश्वराः (अजहरीश्वरा ब्रह्मविष्णुरुद्राः) छन्दांस्यृग्यजुषे साम, प्राणशक्तिस्तु देवता ॥ (ऋग्यजुषे इत्यच्प्रत्ययान्तमचतुरादिसूत्रेण निपातितम् ॥) पाशो बीजं त्रपा शक्तिर्विनियोगोऽसुसंस्थितौ ॥ (पाशः आं त्रपा ह्रीं असुसंस्थितौ प्राणप्रतिष्ठायाम्) अन्यत्र क्रोमिति कीलकं चोक्तम् ! एवमर्थवच्छन्दोप्यधिकं कचित् ॥ ऋषीन् शिरसि वक्त्रे तु छन्दांसि हृदि देवताम् ॥ बीजं गुह्ये पदोःशक्तिं न्यस्य कुर्यात् षडङ्गकम् ॥ (कीलकपक्षे तन्नाभौ न्यसेत्) । कवर्गनभआद्यैर्हृत्, चुशब्दाद्यैः शिरः स्मृतम् ॥ टुश्रोत्राद्यैः शिखा प्रोक्ता तुवागाद्यैस्तनुच्छदम् ॥ पुवक्तव्यादिभिर्नेत्रं अस्त्रं येनान्तरिन्द्रियैः ॥ (कुचुटुतुपु इति कादिवर्गपञ्चकस्य क्रमात्संज्ञाः ॥ येन यादिक्षान्तदशवर्णा-

रसकवर्गेण ॥) नभोवाय्वग्निवार्भूम्यो नभ आदय ईरिताः ॥ शब्दस्पर्शरूपरसगन्धाः शब्दादयो मताः ॥ वाक्पाणी चरणौ पायूपस्थौ वागादयो मताः ॥ वक्तव्यादानगमनविसर्गानन्दसंज्ञिताः ॥ वक्तव्याद्या बुद्धिमनोऽहङ्काराश्चित्तसंयुताः ॥ अन्तरिन्द्रियसंज्ञाः स्युरेवमुक्तं षडङ्गकम् ॥ अथ ध्यायेत्प्राणशक्तिमीश्वरीं परदेवताम् ॥ पाशं चापासृक्कपाले सृणीषून् शूलं हस्तैर्बिभ्रतीं रक्तवर्णाम् ॥ रक्तोदन्वत्पोतरक्ताम्बुजस्थां देवीं ध्यायेत् प्राणशक्तिं परेशाम् ॥ इति ॥ अथ लोकप्रसिद्धध्यानश्लोको यथा। रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदण्डमिक्षूद्भवमथगुणमप्यङ्कुशं पञ्च बाणान्॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ इति ॥ पूर्वश्लोके आयुधेषु शूलमुक्तमत्र गुण उक्तः इति भेदः ॥ षडायुधत्वात् षड्भुजेयम् । केचित्प्रतिष्ठानन्तरं ध्यानश्लोकं पठन्ति स प्रमादः ॥ मन्त्रमहोदधौ, प्राणशक्तेः पीठावरणपूजाद्यप्युक्तं तद्विस्तृतत्वान्नेहोच्यते ॥ वक्ष्येऽधुना मनोस्तस्योद्धारं ध्यातृसुखावहम् ॥ पाशं मायां सृणिं प्रोच्य यादीन् सप्तेन्दुसंयुतान् ॥ तारान्वितं नभः सप्तवर्णमन्त्रं ततोऽजपाम् ॥ पाशः आंबीजम् । माया ह्रीं बीजम् । सृणिरङ्कुशस्तेन क्रोंबीजम् । यकारादयः सप्तवर्णाः इन्दुसंयुताः सानुस्वाराः । तारान्वितं नभः प्रणवयुक्तो हकारः । तेन होमित्यक्षरम् ॥ ततः सप्तवर्णो मन्त्रः । सचोक्तस्तत्रैव । सबिन्दवो मेरुहंसा काशाः सर्गी भृगुः पुनः ॥ मायेति ताररुद्धोऽयं मन्त्रः सप्ताक्षरो मतः ॥ इति ॥ अस्यार्थः । मेरुः क्षः । हंसः सः । आकाशो हः । एते सबिन्दवः सानुस्वाराः । सर्गी भृगुः । सविसर्गः सकारः । माया ह्रीं । अयं पञ्चाक्षरसङ्घस्ताररुद्धः प्रणवसम्पुटितः । एवं सप्ताक्षरो मन्त्रः । ततः अजपा (हंस) इत्यक्षरद्वयम् । एवं विंशत्यक्षराणि । मम प्राणा इह प्राणा मम जीव इह स्थितः । मम सर्वेन्द्रियाण्युक्त्वा मम वाङ्मन ईरयेत् ॥ चक्षुःश्रोत्रघ्राणपदात्प्राणा इह समीर्य च ॥ आगत्य सुखमुच्चार्य चिरं तिष्ठ-

न्त्विदं वदेत् वह्निजायां च सप्तार्णमन्त्रमन्ते पुनर्वदेत् ॥ प्राणप्रतिष्ठामन्त्रोऽयं स्मृतः प्राणनिधापने ॥ ममेत्यस्य पदस्यादौ पाशादीनि समुच्चरेत् ॥ यन्त्रेषु प्रतिमादौ वा प्राणस्थापनमाचरन् ॥ ममस्थाने तस्य तस्य षष्ठ्यन्तामभिधां वदेत् ॥ इति ॥ मम प्राणा इत्यादिसप्तार्णमन्त्रान्तं ममपदपूर्वाणि चत्वारि वाक्यानि ॥ तत्राद्ये द्वे अष्टाष्टाक्षरे । तृतीयं सप्ताक्षरम् । चतुर्थं मम वाङ्मन इत्यादि सप्तार्णमन्त्रान्तं त्रयस्त्रिंशदक्षरात्मकम् । प्रत्येकमादौ पूर्वोक्तविंशत्यक्षरयोजने प्रथमद्वितीये द्वे अष्टाविंशत्यष्टाविंशत्यक्षरात्मके खण्डे । तृतीयं सप्तविंशत्यक्षरात्मकम् । चतुर्थं त्रिपञ्चाशदक्षरात्मकम् । एवं सर्वः प्राणप्रतिष्ठामन्त्रः षट्त्रिंशदधिकशतवर्णात्मको भवति । वह्निजाया स्वाहा । सप्तार्णः प्रागुक्तः । यन्त्रस्य देवताप्रतिमादेश्च प्राणप्रतिष्ठायां ममेतिपदस्थाने तत्तन्नामोच्चार्यम् ॥ यथा चण्डिकाया महालक्ष्म्याः शिवस्य विष्णोर्गणेशस्येत्यादि ॥ एतत्सर्वमग्रे प्रयोगतः स्फुटीभविष्यति ॥ अयं मन्त्रस्तन्त्रभेदाल्लौकिकपाठभेदाच्च बहु भिद्यते । अत्राशक्तौ **ज्ञानार्णवे** । मुखवृत्तं समुच्चार्य हंसस्तु विपरीतकः ॥ प्राणप्रतिष्ठामन्त्रोऽयं प्राणानां स्थापने मतः ॥ इति **त्र्यक्षरः प्राणप्रतिष्ठामन्त्र** उक्तः । मुखवृत्तं आं । विपरीतो हंसः सोऽहमित्यक्षरद्वयम् ॥ तथा च आं सोऽहमिति त्र्यक्षरः । तन्त्रान्तरे अनन्तमायासृणयस्त्र्यक्षरी प्राणयोजने इति त्र्यक्षर उक्तः । (अनन्तः आं । माया ह्रीं । सृणिः क्रों । इति त्र्यक्षरी) **इति प्राणप्रतिष्ठामन्त्रः** ॥ प्राणप्रतिष्ठानन्तरं पञ्चदशसंस्कारार्थं पञ्चदशप्रणवावृत्तयः कार्याः ॥ **अथ मातृकान्यासः** ॥ स चान्तर्मातृकाबहिर्मातृकान्यासभेदेन द्विविधः ॥ तत्रान्तर्मातृकान्यास**स्तन्त्रान्तरे** । कण्ठे विशुद्धचक्रे तु षोडशारे स्वरान् न्यसेत् ॥ पूर्वादिक्रममारभ्य प्रादक्षिण्येन षोडश । हृदयेनाहते कादिठान्तान् द्वादश विन्यसेत् ॥ नाभौ दशदले डादिफान्तान्वै मणिपूरके ॥ लिङ्गस्य परितः स्वाधिष्ठाने षड् वादिलान्तिमान् ॥ गुदादूर्ध्वं द्व्यङ्गुलस्थमूलाधारे चतुर्दले ॥ वादिसान्तान्भ्रुवोर्मध्ये हक्षावाज्ञाभिधे न्यसेत् ॥

इति । (द्विदले आज्ञाचक्रे दक्षदले हकारं वामदले क्षकारमित्यर्थः) अन्यत्र पूर्वादिक्रमात्प्रादक्षिण्येन दलेषु उक्तवर्णानां न्यासः ॥ सर्वत्र न्यासे मातृकाः प्रणवादिनमोन्ताः सानुस्वाराश्च योज्याः ॥ अन्तःपद्मेषु न्यासश्च तत्तत्पद्मस्य तत्तद्दलेषु तत्तद्वर्णानां स्थापनाविभावनम् । एषां वर्णानां स्वरूपाण्युक्तानि **सनत्कुमारसंहितायाम्** ॥ अकाराद्याः स्वरा धूम्राः सिन्दूराभास्तु कादयः ॥ डादिफान्ता गौरवर्णा आरुणावादयश्च षट् ॥ वादिसान्ताः काञ्चनाभा हक्षौ विद्युन्निभौ मतौ ॥ इति ॥ अन्तर्मातृकान्यासे ऋषिच्छन्दो देवतादिकं षडङ्गन्यासध्यानादिकं च वक्ष्यमाणवहिर्मातृकान्यासान्तर्गतसृष्टिन्यासवत् ॥ **इत्यन्तर्मातृकान्यासः** ॥ **अथ वहिर्मातृकान्यासः** ॥ स च सृष्टिस्थितिसंहारभेदात्त्रिविधः ॥ तत्र सृष्टिन्यासो **मन्त्रमहोदधौ** । प्रजापतिर्ऋषिस्त्वस्य गायत्रीच्छन्द ईरितम् ॥ सरस्वती देवतोक्ता विनियोगोऽखिलाप्तये ॥ हलो वीजानि चोक्तानि स्वराः शक्तय ईरिताः ॥ मूर्ध्नि वक्रे हृदि न्यसेदृष्यादीन् साधकोत्तमः ॥ (अत्र वीजशक्तीनां विनियोगोत्तरमुक्तावपि तासां मन्त्रशास्त्रसमयानुरोधेन विनियोगात् प्राक्स्मरणं कार्यम् ॥ पञ्चवर्गैर्यादिभिश्च षडङ्गानि समाचरेत् ॥ क्लीबहीनशशाङ्काढ्यह्रस्वदीर्घान्तरस्थितैः ॥ सानुस्वारैर्जातियुक्तैस्ततो ध्यायेत्सरस्वतीम् ॥ (क्लीबा ऋकारद्वयं लृकारद्वयं चेति चत्वारः) । तद्रहितेतरह्रस्वदीर्घस्वरद्वन्द्वमध्यगतैः सानुस्वारैः कचटतपवर्गैः यादिदशकात्मकेन षष्ठेन चेति षड्भिः नमः स्वाहा वषडित्यादिजातियुक्तैः षडङ्गं कुर्यादित्यर्थः । यथा अं कं खं गं घं ङं आं हृदयाय नमः । इं चं छं जं झं ञं ईं शिरसे स्वाहेत्यादि । अत्रैकादशत्रयोदशपञ्चदशस्वराणां ह्रस्वत्वं पारिभाषिकं न तु शास्त्रीयम् । तेषां शास्त्रमते द्विमात्रत्वेन दीर्घत्वात्) ॥ **अथ ध्यानम्** ॥ पञ्चाशदर्णैरचिताङ्गभागां धृतेन्दुखण्डां कुमदावदाताम् ॥ वराभये पुस्तकमक्षसूत्रं भजे गिरं सन्दधतीं त्रिनेत्राम् ॥ इति ॥ वर्णानामेकपञ्चाशत्सङ्ख्यत्वेऽपि पञ्चाशदर्णैरित्युक्तिरल्पान्तरस्याभेदविवक्षया । यथा लोके शतादिसङ्ख्याया

एकद्वित्र्याद्यल्पसङ्ख्यया न्यूनत्वेऽधिकत्वेऽपि शतादिपदेन व्यवहारः ॥ अत्रापि **मन्त्रमहोदधौ** सरस्वत्याः पीठावरणदेवतापूजाद्युक्तं तत्सति कामे तत्रैव द्रष्टव्यम् । **अथ मातृकाणां न्यासस्थानानि** ॥ ललाटे मुखवृत्तेऽक्षिश्रवोनासाक्षिगण्डयोः ॥ ओष्ठयोर्दन्तपङ्क्त्योश्च मूर्ध्नि वक्त्रे स्वरान् न्यसेत् ॥ (अक्ष्यादिषु दक्षिणादिः क्रमः । ओष्ठादिषु तूर्ध्वादिः) बाह्वोः सन्धिषु साग्रेषु कचवर्गौ न्यसेत्सुधीः ॥ टतवर्गौ पदोस्तद्वत् (दक्षबाहुमूलकूर्परमणिबन्धाङ्गुलिमूलाङ्गुल्यग्रेषु कवर्गस्य पञ्च वर्णान्, वामबाहोर्मूलादिषु चवर्गस्य पञ्चवर्णान् न्यसेत् ॥ एवं दक्षपादस्य सक्थिमूलजानुगुल्फाङ्गुलिमूलाङ्गुल्यग्रेषु टवर्गस्य पञ्चवर्णान्, वामपादस्य सक्थिमूलादिषु तवर्गस्य पञ्चवर्णान् न्यसेदित्यर्थः ।) पार्श्वयो पृष्ठदेशतः ॥ नाभौ कुक्षौ पवर्गं च (दक्षपार्श्वे पकारं वामे फकारं पृष्ठे बकारं नाभौ भकारं उदरे मकारं न्यसेत् ॥ हृदंसककुदंसतः ॥ न्यसेद्यादींश्चतुर्वर्णान् (हृदये यकारं दक्षांसे रेफं ककुदि लकारं वामांसे वकारं न्यसेत् ।) शादि षट्कं ततो न्यसेत् ॥ हृदादिकरयोरङ्घ्र्योर्जठरे वदने तथा ॥ (हृदादिदक्षकराग्रान्तं शकारं, हृदादि वामकराग्रान्तं षकारं, हृदादिदक्षपादाग्रान्तं सकारं, हृदादिवामपादाग्रान्तं हकारं, हृदादि जठरान्तं ळकारं, हृदादिवदनान्तं क्षकारं च व्यापकत्वेन न्यसेत् ।) **तन्त्रान्तरे** एषां वर्णानां वर्णा उक्तास्ते यथा ॥ स्फटिकाभाः स्वराः प्रोक्ताः स्पर्शा विद्रुमसन्निभाः ॥ यादयो नवपीताः स्युः क्षकारस्त्वरुणो मतः ॥ इति ॥ अथैषां वर्णानां न्यासे मुद्रास्तन्त्रान्तरे । अकारेऽनामिकामध्ये, दीर्घे मध्या सतर्जनी ॥ इकारद्वितये तर्जन्यनामिकमुकारयोः ॥ कनिष्ठाग्रं कनिष्ठाढ्योऽङ्गुष्ठो मुद्राऋकारयोः ॥ ऌकारयोर्मध्यमा स्यादेकारादिचतुष्टये ॥ अनामिकाथ मध्या तु स्वरे पञ्चदशे स्मृता ॥ अन्त्येङ्गुष्ठः, ककारादिबकारान्तासु मातृषु ॥ त्रयोविंशतिसङ्ख्यासु कनिष्ठादित्रयं भवेत् ॥ भकारे तर्जनीवर्जं सर्वा अङ्गुलयो मताः।

सर्वाङ्गुल्यो मकारेस्युर्यकारादिषु पञ्चसु ॥ वामहस्ततलं षादिपञ्चके दक्षिणस्य च ॥ इति ॥ सृष्टिन्यासं विधायैवं स्थितिन्यासं समाचरेत् ॥ ऋषिश्छन्दश्च पूर्वोक्ते देवता विश्वपालिनी ॥ ऋष्यादिन्यासषडङ्गादिकं प्राग्वत् ॥ अथ ध्यानम् ॥ मृगवालं वरं विद्यां दधतोऽक्षस्रजं करैः ॥ निविष्टां वल्लभस्याङ्के शम्भोरमिततेजसः ॥ मालाविद्यालसद्धस्तां वार्णीं ध्यायेदनन्यधीः ॥ एवं ध्यात्वा डकाराद्यान् वर्णानङ्गेषु विन्यसेत् ॥ गुल्फादिजानुपर्यन्तं स्थितिन्यासोऽयमीरितः ॥ (स्थितिन्यासे आदौ डकारादिक्षकारान्तानष्टाविंशतिवर्णान् दक्षिणपादगुल्फमारभ्य तदङ्गुलिमूलादि क्रमेण हृदादिवदनान्तेषु पूर्वोक्तस्थानेषु न्यस्य पश्चादकारादिठकारान्तांस्त्रयोविंशतिवर्णान् ललाटादिदक्षजानुपर्यन्तं पूर्वोक्तस्वस्वस्थानेषु विन्यसेत ॥ इति ॥ **अथ संहारन्यासः** ॥ न्यासे संहारसंज्ञे तु ऋषिश्छन्दश्च पूर्ववत् ॥ संहारिणी सपत्नानां शारदा देवता मता ॥ ऋष्यादिन्यासषडङ्गादिकं पूर्ववत् ॥ **अथ ध्यानम्** ॥ अक्षस्रक्टङ्कसारङ्गविद्याहस्तां त्रिलोचनाम् ॥ चन्द्रमौलिं कुचानम्रां रक्ताब्जस्थां गिरं भजे ॥ ध्यात्वैवं विन्यसेद्वर्णान् क्षाद्यानान्तान् विलोमतः ॥ हृदादिमुखमारभ्य ललाटान्तेषु संहृतौ ॥ (संहृतिन्यासे क्षकारमारभ्य अकारपर्यन्तान् वर्णान् विलोमक्रमेण हृदादिमुखमारभ्य ललाटान्तस्थानेषु न्यसेत् ॥) त्रिष्वपि मातृकान्यासेषु वर्णानां स्थानानि समानान्येव ॥ क्रममात्र भेदः ॥ उक्तन्यासत्रयेऽन्योऽपि विशेषस्तत्रैव ॥ सृष्टिन्यासे तु सर्गान्ताः सर्गबिन्द्वन्तिमाः स्थितौ ॥ बिन्द्वन्ताः संहृतौ वर्णा नमोन्तास्तारपूर्वकाः ॥ इति ॥ (सृष्टौ सर्गान्ता विसर्गान्ताः स्थितौ विसर्गबिन्दूभयान्ताः । संहारे बिन्द्वन्ताः ॥ तेन सृष्टौ षोडशस्वरे विसर्गद्वयं, संहारे पञ्चदशेऽनुस्वारद्वयं च वेदितव्यम् ॥ स्थितिन्यासे वर्णानां विसर्गानुस्वारोभयान्तत्वमुक्तं तत्र विसर्गबिन्दुसाहित्ये प्रथमं बिन्दुमुच्चरेदिति वचनादादौ बिन्दोरुच्चारस्ततो विसर्गस्येति ज्ञेयम् ॥ साहित्यं च युगपत्प्राप्तिः । तेन संहारन्यासे षोडशस्वरे विसर्गानुस्वारयोः प्राप्तावपि विसर्गस्य

स्वराङ्गत्वेन प्रथमं प्राप्तत्वादनुस्वारस्य च न्यासाङ्गत्वेन पश्चात्प्राप्तत्वाद्युगपत्प्राप्त्यभावेन यथाक्रममादौ विसर्गस्य पश्चादनुस्वारस्योच्चारः ॥ स्थितिन्यासे षोडशस्वरे प्रथमं स्वराङ्गत्वेन विसर्गस्य ततो न्यासाङ्गत्वेनादौ बिन्दोस्ततो विसर्गस्योच्चारः । अथोक्तन्यासत्रये आश्रमभेदेन क्रमभेदस्तन्त्रान्तरे ॥ सृष्टिः स्थितिश्च संहारः क्रमो यतिवनस्थयोः ॥ संहारश्च स्थितिः सृष्टिः क्रमोऽयं ब्रह्मचारिणः ॥ सृष्टिः स्थितिश्च संहारः पुनः सृष्टिः स्थितिस्तथा ॥ एवं हि पञ्चधा न्यासो गृहस्थस्य प्रकीर्तितः ॥ इति ॥ एवं विस्तृतन्यासाशक्तौ अञ्जलिं कृत्वा तत्तत्क्रमधर्मानुसारेण वर्णानुच्चार्य तानञ्जलिगतान्विभाव्य तैर्मूर्धादिपादान्तं व्यापकं कुर्यात् ॥ इति **बहिर्मातृकान्यासः** ॥ **अथ कलामातृकान्यासः** ॥ कलायुङ्मातृकायास्तु प्रजापतिऋषिः स्मृतः ॥ छन्द उक्तं तु गायत्री देवता शारदाभिधा ॥ तारैः षडङ्गं कुर्वीत ह्रस्वदीर्घान्तरस्थितैः ॥ (क्लीबहीनह्रस्वदीर्घस्वरमध्यगतैः षड्भिः प्रणवैः षडङ्गं कुर्यादित्यर्थः । यथा अं ॐ आं हृदयाय नमः ॥ इं ॐ ईं शिरसे स्वाहा इत्यादि) **अथ ध्यानम्** ॥ शङ्खचक्राब्जपरशुकपालैणाक्षमालिकाः ॥ पुस्तकामृतकुम्भौ च त्रिशूलं दधतीं करैः ॥ सितपीतासितश्वेतरक्तवर्णैस्त्रिलोचनैः ॥ पञ्चास्यैः संयुतां चन्द्रशेखरां शारदां भजे ॥ ध्यात्वैवं तारपूर्वांस्तान् न्यसेन्ङेऽन्तकलान्वितान् ॥ (प्रणवपूर्वान् नमोन्तचतुर्थ्यन्तकलानामान्तान् वर्णान् सृष्टिन्यासोक्तक्रमेण न्यसेदित्यर्थः । यथा । ॐ अं निवृत्यै नमः । ललाटे ॥ ॐ आं प्रतिष्ठायै नमः मुखवृत्ते इत्यादि) **अथ कलानां नामानि** ॥ निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथेन्धिका ॥ दीपिकाऽरेचिका चापि मोचिका च पराभिधा ॥ सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायनी ततः ॥ व्यापिनी तापिनी व्योमरूपा सृष्टिः सऋद्धिका ॥ (सृष्टिर्ऋद्धिश्चेतिद्वयमित्यर्थः) स्मृतिर्मेधा ततः कान्तिर्लक्ष्मीर्द्युतिः स्थिरा स्थितिः ॥ सिद्धिर्जरा पालिनी च क्षान्तिरीश्वरिका रतिः ॥ कामिका वरदा

चाप्याह्लादिनी प्रीतिसंयुता ॥ (आह्लादिनी, प्रीतिरिति द्वयमित्यर्थः दीर्घा
तीक्ष्णा तथा रौद्री भद्रा नित्या च तन्द्रिका ॥ क्षुधा स्यात्क्रोधिनी पश्चात्
क्रियोत्कारी समृत्युका ॥ (क्रिया उत्कारी मृत्युरिति त्रयमित्यर्थः) । पीता
श्वेतारुणा पश्चादसितानन्तयान्विता ॥ (असिता अनन्ता चेति द्वयमित्यर्थः) ।
इति ॥ **देवीमहोत्सवे**ऽन्येऽपि बहवो मातृकान्यासा उक्तास्ते सति कामे
तत्रैव द्रष्टव्याः ॥ अथ **पुरुषसूक्तन्यासो बृहत्पराशरसंहितायाम्** ॥ आनुष्टु-
भस्य सूक्तस्य त्रिष्टुबन्तस्य देवता ॥ पुरुषो यो जगद्बीजं ऋषिर्नारायणः
स्मृतः ॥ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ॥ तृतीयां वामपादे च
चतुर्थीं दक्षिणे न्यसेत् ॥ पञ्चमीं वामजानौ तु षष्ठीं दक्षिणके न्यसेत् ॥
सप्तमीं वामकट्यां च दक्षिणस्यां तथाष्टमीम् ॥ नवमीं नाभिदेशे तु दशमीं
हृदये तथा ॥ एकादशीं वामकुक्षौ द्वादशीं, दक्षिणे न्यसेत् ॥ (साम्प्रतं
शिष्टैरेकादशीद्वादश्योर्वामदाक्षिणबाह्वोर्न्यासः क्रियते ॥) कण्ठे त्रयोदशीं
न्यस्येत्तथा वक्त्रे चतुर्दशीम् ॥ अक्ष्णोः पञ्चदशीं चैव षोडशीं मूर्ध्नि विन्यसेत् ॥
पुनरन्त्याश्च पञ्चर्चो हृदयाद्यङ्गपञ्चके ॥ इति ॥ (न्यसेदिति शेषः) । पञ्चाङ्गं
नेत्रसन्त्याग इति वचनात् हृदयं च शिरः शिखा कवचं चास्त्रमेव चेति ॥
पंचस्थानानि ॥ साम्प्रतं बहवोऽन्त्याभिः षड्भिरङ्गुष्ठादिषडङ्गं हृदयादि षडङ्गं
च कुर्वन्ति ॥ **इति पुरुषसूक्तन्यासः** ॥ **अथ श्रीसूक्तन्यासः** ॥ हिरण्य-
वर्णामित्येतत्सूक्तं पञ्चदशर्चकम् ॥ तस्यानन्दः कर्दमश्च चिक्लीतश्चेन्दिरासुताः ॥
ऋषयो देवता श्रीश्च छन्दोऽनुष्टुप् तथोदितम् ॥ त्रिष्टुभौ पञ्चमीषष्ठ्यौ
चतुर्थी च तथान्तिमा ॥ प्रस्तारपङ्क्तिं विज्ञेये ह्रीं बीजं श्रीं च शक्तिका ॥ क्लीं
कीलकमिति प्रोक्तं योजना न्यासकर्मणि ॥ शिरो नेत्रद्वयं कर्णद्वयं नासाद्वयं
तथा ॥ मुखं कण्ठश्च बाहू च हृन्नाभिर्गुह्यमेव च ॥ गुदमूरू जानुनी च
जङ्घे पादाविति क्रमात् ॥ श्रीसूक्तस्य ऋचां न्यासे स्थानानि दश पञ्च च ॥
इति ॥ अत्र नेत्रद्वयकर्णद्वयनासाद्वयबाहुद्वयोरुद्वयजानुद्वयजङ्घाद्वयपादद्वयेषु
नेत्रयोः कर्णयोरित्यादि द्विवचनान्तप्रयोगेण एकैकैव ऋक न्यस्तव्या न तु

पुरुषसूक्तवद्वामदक्षिणभेदेन भिन्नभिन्ना ॥ षोडश्याः परिशिष्टत्वान्न न्यासः ॥ **इति श्रीसूक्तन्यासः ॥ अथनवार्णकल्पोक्ता एकादशन्यासाः** ॥ तत एकादशन्यासान् कुर्वीतेष्टफलप्रदान् ॥ प्रथमो मातृकान्यासः कार्यः पूर्वोक्तमार्गतः ॥ कृतेन येन देवस्य स्वरूपं याति मानवः ॥ (पूर्वोक्तमार्गतः सृष्टिन्यासक्रमेण) **देवीमहोत्सवेऽयं** मायाबीजपूर्वक उक्तः ॥ **इति प्रथमः** ॥ अथ द्वितीयं कुर्वीत न्यासं सारस्वताभिधम् ॥ बीजत्रयं तु मन्त्राद्यं तारादिहृदयान्तकम् ॥ क्रमादङ्गुलिषु न्यस्येत्कनिष्ठादिषु पञ्चसु ॥ करयोर्मध्यतः पृष्ठे मणिबन्धे च कूर्परे ॥ हृदयादिषडङ्गेषु विन्यसेज्जातिसंयुतम् ॥ अस्मिन् सारस्वते न्यासे कृते जाड्यं विनश्यति ॥ (मन्त्राद्यं बीजत्रयं ऐंह्रींक्लीमिति त्रयम् । तारादिहृदयान्तकं प्रणवादिनमोन्तम् । करयोर्मध्यतः करतलभागे इत्यर्थः । जातिः नमः स्वाहा इत्यादिः)। **इति द्वितीयः** ॥ ततस्तृतीयं कुर्वीत न्यासं मातृगणान्वितम् ॥ मायाबीजादिका ब्राह्मी पूर्वतः पातु मां सदा ॥ माहेश्वरी तथाग्नेयां कौमारी दक्षिणेऽवतु ॥ वैष्णवी यातुकाष्ठायां वाराही पश्चिमेऽवतु ॥ इन्द्राणी वायवे कोणे चामुण्डा चोत्तरेऽवतु ॥ ऐशान्यां तु महालक्ष्मीरूर्ध्वे व्योमेश्वरी तथा ॥ सप्तद्वीपेश्वरी भूमौ रक्षेत्कामेश्वरी तले ॥ तृतीयेऽस्मिन् कृते न्यासे त्रैलोक्यविजयी भवेत् ॥ इति ॥ (ह्रीं ब्राह्मी मां पूर्वतः पातु । ह्रीं माहेश्वरी मामाग्नेय्यां पात्विति तत्प्रयोगः' । इन्द्राणी ऐन्द्री यातुकाष्ठायां नैर्ऋतदिशि) । **इति तृतीयः** ॥ न्यासं चतुर्थं कुर्वीत नन्दजादिसमन्वितम् ॥ नन्दजा पातु पूर्वाङ्गं कमलाङ्कुशमण्डिता ॥ खड्गपालकरा पातु दक्षिणं रक्तदन्तिका ॥ पृष्ठं शाकम्भरी पातु पुष्पपल्लवशोभिता ॥ धनुर्बाणकरा दुर्गा वामं पातु सदैव मे ॥ शिरःपालकरा भीमा मस्तकाच्चरणावधि ॥ पादादि मस्तकं यावद्भ्रामरी चित्रकान्तिभृत् ॥ तुर्यन्यासं नरः कुर्याज्जरां मृत्युं व्यपोहति ॥ **इति चतुर्थः** ॥ अथ कुर्वीत ब्रह्मादिन्यासं पञ्चममुत्तमम् ॥ पादादिनाभिपर्यन्तं ब्रह्मा पातु सनातनः ॥ नाभेर्विशुद्धि-

पर्यन्तं पातु नित्यं जनार्दनः ॥ (विशुद्धिचक्रं कण्ठे वर्तते तेन नाभितः
कण्ठपर्यन्तमित्यर्थः ।) विशुद्धेर्ब्रह्मरन्ध्रान्तं पातु रुद्रस्त्रिलोचनः ॥ हंसः पातु
पदद्वन्द्वं वैनतेयः करद्वयम् ॥ चक्षुषी वृषभः पातु सर्वाङ्गानि गजाननः ॥
परापरौ देहभागौ पात्वानन्दमयो हरिः ॥ (परापरौ देहभागौ देहस्य पुरो-
भागपृष्ठभागौ) । कृतेस्मिन् पञ्चमे न्यासे कर्ता कामानवाप्नुयात् ॥ **इति
पञ्चमः** ॥ षष्ठन्यासं ततः कुर्यान्महालक्ष्म्यादिसंयुतम् ॥ मध्यं पातु महा-
लक्ष्मीरष्टादशभुजान्विता ॥ ऊर्ध्वं सरस्वती पातु भुजैरष्टभिरूर्जिता ॥ अधः
पातु महाकाली दशबाहुसमन्विता ॥ सिंहो हस्तद्वयं पातु परहंसोऽक्षियुग्मकम् ॥
महिषं दिव्यमारूढो यमः पातु पदद्वयम् ॥ महेशश्चण्डिकायुक्तः सर्वाङ्गानि
ममावतु ॥ षष्ठेऽस्मिन् विहिते न्यासे सद्गतिं प्राप्नुयान्नरः ॥ **इति षष्ठः** ॥
अथ मूलाक्षरैरङ्गे न्यासं कुर्वीत सप्तमम् ॥ ब्रह्मरन्ध्रे नेत्रयुग्मे श्रुत्योर्नासिकयो-
र्मुखे ॥ पायौ मूलमनोर्वर्णान् ताराद्यान्नमसा न्यसेत् ॥ (ताराद्यान् प्रण-
वाद्यान् । नमसा नमःशब्देन सहेत्यर्थः । अत्र नेत्रादियुग्मेषु दक्षिणवामयोः
पृथक्पृथगेकैकवर्णन्यासः ।) एतस्मिन् सप्तमे न्यासे कृते रोगक्षयो भवेत् ॥
इति सप्तमः ॥ पायुतो ब्रह्मरन्ध्रान्तं पुनस्तानेव विन्यसेत् ॥ कृतेऽस्मिन्नष्टमे
न्यासे सर्वं दुःखं विनश्यति ॥ (अस्मिन् न्यासे पूर्वोक्तस्थानान्येव व्युत्क्र-
मेण ज्ञेयानि ।) **इत्यष्टमः** ॥ कुर्वीत नवमं न्यासं मन्त्रव्याप्तिस्वरूपिणम् ॥
मस्तकाच्चरणं यावच्चरणान्मस्तकावधि ॥ पुरो दक्षे पृष्ठदेशे वामभागेऽष्टशो
न्यसेत् ॥ मूलमन्त्रकृतो न्यासो नवमो देवतासिकृत् ॥ (समस्तं मूलं पुरोभा-
गादिषु चतुर्षु मूर्धादिपादान्तं पादादिमूर्धान्तं चेत्यष्टवारं व्यापकत्वेन विन्यसे-
दित्यर्थः ।) **इति नवमः** ॥ ततः कुर्वीत दशमं षडङ्गन्यासमुत्तमम् ॥ मूल-
मन्त्रं जातियुक्तं हृदयादिषु विन्यसेत् ॥ (समस्तमन्त्रेणैव हृदयादि षडङ्ग
न्या कुर्यादित्यर्थः ।) कृतेऽस्मिन् दशमे न्यासे त्रैलोक्यं वशगं भवेत् ॥
इति दशमः ॥ दशन्यासोक्तफलदं कुर्यादेकादशं ततः ॥ खड्गिनी शूलिनी-

त्यादि पठित्वा श्लोकपञ्चकम् ॥ आद्यं बीजं कृष्णतरं ध्यात्वा सर्वाङ्गके न्यसेत् ॥ शूलेन पाहि नो देवीत्यादिश्लोकचतुष्टयम् ॥ उक्त्वा बालार्कसदृशं द्वितीयं सर्वतो न्यसेत् ॥ सर्वस्वरूपे सर्वेशे इत्यादिश्लोकपञ्चकम् ॥ उच्चार्य स्फटिकाभासं तृतीयं स्वतनौ न्यसेत् ॥ अयमेकादशो न्यासो दशन्याससमो भवेत् ॥ (खड्गिन्यादिश्लोकपञ्चकं ऐं बीजं च कृष्णवर्णं ध्यायन् पठित्वा सर्वाङ्गे व्यापकत्वेन विन्यसेत् ॥ एवं शूलेन पाहीत्यादिश्लोकचतुष्टयं ह्रीं बीजं च बालार्कवर्णं ध्यायन् पठित्वा पूर्ववन्न्यसेत् ॥ ततः सर्वस्वरूपे इत्यादिश्लोकपञ्चकं क्लीं बीजं च स्फटिकाभासं ध्यायन् । पठित्वा व्यापकत्वेन सर्वाङ्गे न्यसेत् ।) **इत्येकादशो न्यासः** ॥ उक्तैकादशसङ्ख्याकन्यासाशक्तौ केवलमेकादशमेकमेव कुर्यात् ॥ **इति नवार्णकल्पोक्ता एकादशन्यासाः** ॥ **अथ स्वदेहे पीठन्यासः** ॥ पीठन्यासं तु देवस्य कुर्यादात्मकलेवरे ॥ आधारशक्तिमाधारे स्वाधिष्ठाने तु कच्छपम् ॥ नाभावनन्तं हृदये वसुधां च सुधोदधिम् ॥ श्वेतद्वीपं कल्पवनं हेमप्रासादमञ्चकौ ॥ (वसुधादिमञ्चकान्तषट्कमुत्तरोत्तरमुपर्युपरि हृदये एव ।) दक्षवामांसवामोरुदक्षोरुषु यथाक्रमम् ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं पीठपादकान् ॥ वदने वामपार्श्वे च नाभौ दक्षिणपार्श्वके ॥ पीठगात्राणि चाधर्ममज्ञानमविरागिताम् ॥ अनैश्वर्यं च चत्वारि हृत्पीठे तत्त्वपङ्कजम् ॥ मुत्कन्दं सविदं नालं प्रकृत्याख्यदलानि च ॥ विकारमयकिञ्जल्कान् पञ्चाशद्वर्णकार्णिकाम् ॥ पद्मे वह्न्यर्कसोमानां मण्डलानि गुणत्रयम् ॥ सत्त्वं रजस्तमश्चैव तथैवात्मचतुष्टयम् ॥ आत्मानमन्तरात्मानं परमात्मानमेव च ॥ ज्ञानात्मानं चतुर्थं च ततस्तत्त्वचतुष्टयम् ॥ मायातत्त्वं कलातत्त्वं विद्यातत्त्वं परं तथा ॥ (परं परतत्त्वम् ।) पीठन्यासे उक्तदेवतानां प्रणवादिचतुर्थीनमोन्तत्वं ज्ञेयम् ॥ अयं न्यासस्तन्त्रभेदादिह भिद्यते ॥ **इति पीठन्यासः** ॥ **चण्डिकार्चनरहस्ये** । एवं न्यासविधिं कृत्वा सृष्टिमुद्रां विलोकयेत् ॥ यस्या विलोकनात्सद्यः कृतन्यासः

शिरो भवेत् ॥ इत्युक्तम् ॥ (सृष्टिमुद्रा योनिमुद्रा) तल्लक्षणं यथा । कनिष्ठिके मिथो बध्वा तर्जनीभ्यामनामिके ॥ अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ॥ अङ्गुष्ठाग्रद्वयं न्यस्येद्योनिमुद्रेयमीरिता ॥ इति ॥ **अथान्तर्यागो ज्ञानार्णवे** ॥ अथ स्वहृदये पीठे ध्यात्वा स्वाभीष्टदेवताम् ॥ मानसं यजनं कुर्याद्वक्ष्यमाणप्रकारतः ॥ पाद्यार्घ्याचमनीयानि कल्पयेत् कुण्डलीजलैः ॥ असत्वेनाप्लवं वस्त्रं दिशो गन्धं महीगुणम् ॥ अमायामनहङ्कारमरागममदं तथा ॥ अमोहदम्भावद्वेषमक्षोभामत्सरौ तथा ॥ अलोभं दशपुष्पाणि वाय्वग्नी धूपदीपकौ ॥ परामृतं च नैवेद्यं द्वैतं ताम्बूलमेव च ॥ दाक्षिण्यं दक्षिणां तद्वत्फलं सत्कर्मणः फलम् ॥ सूर्यं नीराजनं चैव चन्द्रं कर्पूरदीपकम् ॥ अहिंसनेन्द्रियजयदयाः क्षान्त्यवबोधने ॥ पुष्पाञ्जलीन् नभश्छत्रं प्राणांश्चामरमेव च ॥ गीतं चानाहतध्वानं नर्तकीं चञ्चलांमतिम् ॥ मनोश्वं वारणं चाहङ्कारमित्यादि कल्पयेत् ॥ (इत्यादिपदेनोपासकस्य स्वबुद्ध्यैवंविधान्योपचारकल्पनमप्यनुज्ञातम्) मूलाधारमयं कुण्डं वह्निं कुण्डलिनीं मनः ॥ स्रुवं, स्रुचं सुषुम्नां च, कामक्रोधादिकं हविः ॥ विचिन्त्य कामं क्रोधं च लोभं मोहं मदं तथा ॥ मत्सरं च जुहोमीति स्वाहान्तान् जुहुयाद्रिपून् ॥ अविद्योपात्तसकलधर्माधर्मपदात्परम् ॥ तत्कार्यरूपं निखिलं प्रपञ्चमिति वै वदेत् ॥ ततो जुहोमि स्वाहेति मनुं पूर्णाहुतौ पठेत् ॥ मूलाधारात् कुण्डलिनीमुत्थाप्य स्वशिरो नयेत् ॥ तदुत्थामृतधाराभिर्हृत्स्थं देवं च तर्पयेत् ॥ द्वितीयान्ताभिधामुक्त्वा तर्पयामीति वै वदन् ॥ इति सङ्क्षेपतः प्रोक्तमान्तरं यजनं शुभम् ॥ इत्यन्तर्यागः ॥ **मन्त्रमहोदधौ** ॥ अन्तर्यागबहिर्यागौ गृहस्थः सर्वदा चरेत् ॥ आद्यमेव ब्रह्मचारी वानप्रस्थो यतिस्तथा ॥ ततो मूलमनुं विद्वान् जपेदष्टोत्तरं शतम् ॥ जपं निवेद्य देवाय बाह्यपूजनमारभेत् ॥ कलशं शङ्खघण्टे च पाद्यार्घ्याचमनीयकम् ॥ सम्पूज्य प्रोक्ष्य चात्मानं ततो यजनमारभेदिति ॥ अन्यत्र

च ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ॥ मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणः स्थितः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ अत्र गायत्री सावित्री शान्तिपुष्टिकरी तथा ॥ अन्याश्च देवपूजार्थं दुरितक्षयकारिकाः ॥ इत्युक्तम् ॥ कलशपूजास्तुत्यर्थोऽयमर्थवादः ॥ तस्माच्च पूजयेदित्यर्थः ॥ अथ तत्पूजनं **मन्त्रमहोदधौ** ॥ वामे त्रिकोणषट्कोणवृत्तभूपुरमण्डलम् ॥ कृत्वार्चेत्कलशाधारमण्डलाय नमः पठन् ॥ अस्त्रक्षालितमाधारं स्थापयित्वा तमर्चयेत् ॥ (अस्त्रेणफडितिमन्त्रेण क्षालितम्) मं वह्निमण्डलायेति ततो दशकलात्मने ॥ ङेऽन्तश्च कलशाधारो हृन्मनुस्तस्य पूजने ॥ (ङेऽन्तः कलशाधारः कलशाधारायेति चतुर्थ्यन्तं । हृत् नमः शब्दः । ततश्च मं वह्निमण्डलाय दशकलात्मने कलशाधाराय नमः इति कलशाधारपूजने मन्त्रः) आधारे प्राग्दिगाद्यर्चेत्पावकस्य कला दश ॥ धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी ॥ सुश्रीः सुरूपा कपिला हव्यकव्यवहे उभे ॥ (हव्यवहा कव्यवहा चेत्यर्थः) सबिन्दुयादिक्षान्तेषु वर्णेष्वेकैकपूर्विकाः ॥ यं धूम्रार्चिषे नमः रं ऊष्मायै नमः । इत्यादिस्तत्प्रयोगः । अत्र प्राची तान्त्रिकी ।) तत्रास्त्रक्षालितं कुम्भमव्रणं स्थापयेदथ ॥ (तत्राधारे) अं सूर्यमण्डलायान्ते द्वादशान्ते कलात्मने ॥ कलशाय नमोन्तेन मन्त्रेण च तमर्चयेत् ॥ (अं सूर्यमण्डलाय द्वादशकलात्मने कलशाय नमः इति कलशपूजने मन्त्रः) कला द्वादशसूर्यस्य कलशोपरि पूजयेत् ॥ अनुलोमैः कादिवर्णैर्विलोमैर्भादिभिर्युताः ॥ तपिनीं तापिनीं धूम्रां मरीचिं ज्वलिनीं रुचिम् ॥ सुषुम्नां भोगदां विश्वां बोधिकां धारिणीं क्षमाम् ॥ (कं भं तपिन्यै नमः । खं बं तापिन्यै नमः । गं फं धूम्रायै नमः । इत्यादिस्तत्प्रयोगः ।) विलोमा मातृका, मूलं विलोमं च पठञ्जलैः ॥ आपूर्य चाह्वयेत्तत्र तीर्थानि रविमण्डलात् ॥ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि

ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ क्रों बीजेन समाकृष्य तीर्थानि सृणिमुद्रया ॥ सृणिमुद्रा स्नानप्रकरणे उक्ता ॥ गोमुद्रयामृतीकृत्य वमित्यमृतबीजतः गोमुद्रा धेनुमुद्रा। सा यथा । वामाङ्गुलीनां मध्येषु निवेश्य दक्षिणाङ्गुलीः ॥ नियोज्य तर्जनीं दक्षां वाममध्यमया ततः ॥ दक्षमध्यमया वामां तर्जनीं च नियोजयेत् ॥ वामयानामया दक्षां कनिष्ठां च नियोजयेत् ॥ विहिताऽधोमुखी चैषा धेनुमुद्रा प्रकीर्तिता ॥ अमृतीकरणे चैनां सर्वत्र विनियोजयेत् ॥ इति ॥ ॐ सोममण्डलायान्ते षोडशान्ते कलात्मने ॥ कलशान्तेऽमृतायान्ते हृन्मनुर्जलपूजने ॥ ॐ सोममण्डलाय षोडशकलात्मने कलशामृताय नमः **इति कलशजलपूजने मन्त्रः** ततोऽर्चेत्तत्र सोमस्य कलाः प्रागादि षोडश ॥ (तत्र जले । प्रागादितान्त्रिकपूर्वादितः ।) अमृता मानदा पूषा तुष्टिः पुष्टीरतिर्धृतिः ॥ शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥ पूर्णापूर्णामृताचेति .एकैकस्वरपूर्विकाः ॥ (पुष्टिः रतिरितिच्छेदः ॥ अं अमृतायै नमः । आं मानदायै नमः । इत्यादिः प्रयोगः ।) मूलं जपेदष्टवारं छादयेन्मत्स्यमुद्रया ॥ संरक्षेदस्त्रमन्त्रेण जलं चक्रस्य मुद्रया ॥ मत्स्यमुद्रा यथा वामोपरिष्टात्संस्थाप्य दक्षहस्तं प्रसारयेत् ॥ अङ्गुष्ठौ च तयोः पार्श्वे मत्स्यमुद्रेयमीरिता ॥ इति ॥ चक्रमुद्रा प्रागुक्ता स्नानप्रकरणे ॥ देवदानवसङ्ग्रामे मथ्यमाने महोदधौ ॥ उत्पन्नोऽसि तदा कुम्भ विष्णुना विधृतः स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ त्वयि सर्वाणि भूतानि यतः कामप्रदो भवान् ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ साहाय्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ इति प्रार्थ्य कलशमुद्रां प्रदर्शयेत् ॥ कलशमुद्रा स्नानप्रकरणे उक्ता ॥ एतावदशक्तौ भूमौ जलेन त्रिकोणमण्डलं कृत्वा तत्र साधारं कलशं संस्थाप्य विलोममातृका विलोममूलं च पठन्

जलेनापूर्य ब्रह्माण्डोदरतीर्थानीत्यादिना तत्र तीर्थान्यावाह्य गन्धादिभिः पूजयेत् ॥ **इति कलशार्चनम्॥ अथशङ्खार्चनमुक्तं पुराणान्तरे।** शङ्खोर्घ्यदेशे चन्द्रस्तु कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिस्तिष्ठत्यग्रे गङ्गा सरस्वती ॥ त्रैलोक्यस्थानि तीर्थानि वासुदेवस्य चाज्ञया ॥ शङ्खे तिष्ठन्ति सर्वाणि तस्माच्छङ्खं प्रपूजयेत् ॥ इति ॥ अथ तदर्चनविधिर्**मन्त्रमहोदधौ** ॥ त्रिकोणमण्डलं कृत्वा दक्षिणे भुवि वारिणा ॥ गन्धपुष्पैस्तदभ्यर्च्य तत्रास्त्रक्षालितं शुभम् ॥ ताम्राधारमवस्थाप्य पूजयेन्मनुनामुना ॥ मं वह्निमण्डलायान्ते ततो दशकलात्मने ॥ अमुकार्घ्येत्यतः पात्रासनाय नम इत्यपि ॥ (अमुकेतिपदस्थाने तत्तद्देवतानामप्रयोगः कर्तव्यः ॥ यथा मं वह्निमण्डलाय दशकलात्मने चण्डिकार्घ्यपात्रासनाय नम इति ।) ॐ क्लीं महाजलचराय हुं फट् पावकप्रिया ॥ पाञ्चजन्याय नम इत्यनेन मनुना दरम् ॥ प्रक्षाल्य स्थापयेत्तत्र यजेन्मन्त्रेण चामुना ॥ (पावकप्रिया स्वाहा । दरं शङ्खम् । ॐ क्लीं महाजलचराय हुं फट् स्वाहा पाञ्चजन्याय नमः इति शङ्खक्षालने मन्त्रः ।) अं सूर्यमण्डलायान्ते द्वादशान्ते कलात्मने ॥ ततोऽमुकार्घ्यपात्राय हृन्मनुः शङ्खपूजने ॥ (अं सूर्यमण्डलाय द्वादशकलात्मने चण्डिकार्घ्यपात्राय नमः इति शङ्खपूजने मन्त्रः ।) मूलेन कलशाद्भिस्तं पूजयित्वार्चयेज्जलम ॥ ऊं सोममण्डलायान्ते षोडशान्ते कलात्मने ॥ अमुकार्घ्यामृतायान्ते नमस्तत्पूजने मनुः ॥ (ऊं सोममण्डलाय षोडशकलात्मने चण्डिकार्घ्यामृताय नमः इत्यर्घ्यजलपूजने मन्त्रः ।) अष्टवारं मूलमन्त्रं जपेदर्घ्यजले ततः ॥ जपेच्च शङ्खगायत्रीं पाञ्चजन्याय विद्महे ॥ पावमानाय धीमहि तन्नः शङ्खः प्रचोदयात् ॥ प्रजप्यैनामथ नमेच्छङ्खं मन्त्रेण चामुना ॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ नतोऽसि सर्व देवैश्च पाञ्चजन्य नमोऽस्तु ते ॥ इति प्रार्थ्य महाशङ्खं शङ्खमुद्रां प्रदर्शयेत् ॥ शङ्खमुद्रा यथा । वामाङ्गुष्ठं तु सङ्गृह्य दक्षिणेन तु मुष्टिना ॥ कृत्वोत्तानं तथा

मुष्टिमङ्गुष्ठौ तु प्रसारयेत् ॥ वामाङ्गुल्यस्तथा श्लिष्टाः संयुक्तास्तु प्रसारिताः ॥ दक्षिणाङ्गुष्ठसंस्पृष्टाः शङ्खमुद्रेयमीरिता ॥ इति ॥ क्षिपेत् कुम्भे जलं किञ्चित्सामान्यार्घ्यविधिः स्मृतः ॥ शङ्खेन तु जलं दद्यादुपचारसमर्पणे ॥ विहाय शङ्करं सूर्यमर्घ्ये शङ्खः प्रशस्यते ॥ तन्त्रान्तरे कलशपूजनवत् शङ्खाधारशङ्खशङ्खजलेषु वह्निसूर्यसोमकलानामपि पूजनमुक्तं तत्सति सम्भवे कार्यम ॥ एतावदशक्तौ **पूजासागरे** । शङ्खमाद्भिः पूरयित्वा प्रणवेन च दक्षिणे ॥ सम्पूज्य त्वं पुरेत्यादि मन्त्रेण प्रार्थयेत्ततः ॥ इत्युक्तम् ॥ **इति शङ्खार्चनम्** ॥ **अथ घण्टापूजनं मन्त्रमहोदधौ** ॥ तर्जन्यङ्गुष्ठयोगेन घण्टामर्चेत्स्वमन्त्रतः ॥ जयध्वने मन्त्रमातः स्वाहान्तः स दशाक्षरः ॥ मन्त्रेणानेन सम्पूज्य घण्टामुद्रां प्रदर्शयेत् ॥ इति ॥ घण्टामुद्रा यथा । दक्षमुष्ट्यग्रविवरे वामाङ्गुष्ठं निवेशयेत्॥ प्रसारयेदधोन्याश्च मुद्रेयं घण्टिकाह्वया ॥ इति ॥ **पाद्मे** आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ॥ कुर्यात् घण्टारवं तत्र देवताह्वानलक्षणम् ॥ इत्युक्तेर्घण्टावादनं कुर्यात् ॥ **इति घण्टापूजा** ॥ पाद्यार्घ्याचमनीयानां मधुपर्कस्य चैव हि ॥ पात्राणि स्थापयित्वाचदर्घ्यपात्रस्य चोत्तरे ॥ ताम्रपात्राणि पाद्यादेर्मधुपर्कस्य कांस्यकम् ॥ अथ पाद्यादिपात्रेषु तत्तद्द्रव्याणि निक्षिपेत् ॥ अलाभे संसरंस्तानि तदर्थे चाक्षतान् क्षिपेत् ॥ पाद्यादिद्रव्याण्यग्रे वक्ष्यन्ते ॥ पाद्यादिपात्राभावे तु तानि शङ्खेन चार्पयेत् ॥ प्रोक्षेच्च पूजासामग्रीं मूलेनात्मानमेव च ॥ **इति पाद्यादिपात्रस्थापनम्** ॥ भावयन् देवतारूपमात्मानं सम्यगर्चयेत् ॥ गन्धपुष्पैर्मूर्धवक्षपत्सु पुष्पाञ्जलीन् क्षिपेत् ॥ इत्यात्मपूजा॥ एतावदुक्तविस्तृतपूर्वाङ्गसाधनाशक्तौ सङ्क्षेपत आचमनप्राणायामदेशकालसङ्कीर्तनसङ्कल्पासनविधिभूतोत्सारणपुरुषसूक्तश्रीसूक्तखड्गिन्यादिश्लोकन्यासकलशशङ्खघण्टार्चनानि कुर्यात् ॥ **इति पूजापूर्वाङ्गविचारः** ॥ **अथ मुख्यदेवतापूजाविधानम्** ॥ तत्र उपचारसङ्ख्याभेदात् पूजाया दशप्रकारा भवन्ति ॥ उपचारा नाम पूजायामिष्टदेवताप्रीत्यर्थमुपयुज्यमाना द्रव्यविशेषाः, क्रियाविशेषा, भावना-

विशेषाश्च ॥ ते च यथाक्रमं गन्धपुष्पादयः प्रदक्षिणानमस्कारादयो ध्यानावाहनादयश्च ॥ ते च पुनः साक्षान्मुख्यदेवतार्पणेन तत्प्रीतिजनना, अङ्गदेवतार्पणेन तत्प्रीतिजननाश्चेति द्विविधाः ॥ प्राधान्येनोपयुज्यमाना मुख्योपचारास्ते च यागमण्डपदेवतापूजापीठदेवतापूजाध्यानावाहनासनादयः सामान्यतोऽशीतिसङ्ख्याः । मुख्योपचाराङ्गत्वेनोपयुज्यमाना अङ्गोपचारास्ते चावाहनाङ्गत्वेनोपयुज्यमानाः स्थापनसन्निधापनादयः, स्नानाङ्गत्वेनोपयुज्यमानाः स्नानमण्डपप्रवेशपीठोपवेशनादयो, नैवेद्याङ्गत्वेनोपयुज्यमानाः पात्रपरिषेकापोशनादय इत्येवं रूपाः सामान्यतोऽष्टचत्वारिंशत् एवं सर्वेऽष्टाविंशत्यधिकं शतम् ॥ तत्र मुख्योपचाराणां सङ्ख्याभेदेन पूजाया दशभेदा भवन्ति ॥ अङ्गोपचाराणां मुख्योपचारानुगामित्वान्न तेषां स्वातन्त्र्येण पूजाभेदप्रयोजकत्वम् ॥ **अथ पूजाया दशभेदा यथा** ॥ पूजैकेनोपचारेण द्वित्रिपञ्चभिरेव च ॥ उपचारैश्च दशभिस्तथा षोडशभिश्च तैः ॥ द्वात्रिंशदुपचारैश्चाष्टाचत्वारिंशता च तैः ॥ चतुःषष्ट्या तथाशीत्योपचारैर्दशधा मता ॥ अथोद्देशक्रमेणासां प्रोच्यन्ते लक्षणानि च ॥ स्वीकार्योपासकैस्तत्रान्यतमा निजशक्तितः ॥ स्नानं पत्रं पुष्पधूपदीपनैवेद्यदक्षिणाः ॥ फलताम्बूलकर्पूरदीपप्रणमनानि च ॥ एष्वेकैकार्पणादेकोपचारा कुङ्कुमेन च ॥ (कुङ्कुमेन देव्या एवैकोपचारा पूजा) स्नानगन्धौ स्नानपत्रे स्नानपुष्पे, सचन्दनम् ॥ पत्रं च, गन्धपुष्पे च भोज्यताम्बूलके तथा ॥ सभोज्या दक्षिणा, भोज्यफले, ताम्बूलदक्षिणे ॥ फलताम्बूलके दक्षिणाफले, सप्रदक्षिणा ॥ नतिश्चैतेषु युग्मेष्वेकैकेन द्व्युपचारिका ॥ स्त्रीदैवते निशाचूर्णकुङ्कुमाभ्यां च सा भवेत् ॥ स्नानचन्दनपत्रं च स्नानचन्दनपुष्पकम् ॥ धूपदीपोपहारं च भोज्यताम्बूलदक्षिणम् ॥ नैवेद्यफलताम्बूलं नैवेद्यफलदक्षिणम् ॥ दक्षिणाफलताम्बूलमेष्वेकैकत्रिकेण च ॥ अर्चना त्र्युपचारा स्यादथ पञ्चोपचारिका ॥ गन्धपुष्पधूपदीपनैवेद्यैः पञ्चभिर्भवेत् ॥ पुष्पस्थाने देवभेदात्तत्तत्पत्रार्पणेऽपि सा ॥ जाबालिस्तु । ध्यानमावाहनं

चैव भक्त्या नैवेद्यमेव च ॥ नीराजनं प्रणामश्च पूजापञ्चोपचारिकेत्याह ॥ पाद्यार्घ्याचमनस्नानैर्वस्त्रचन्दनपुष्पकैः ॥ धूपदीपकनैवेद्यैः पूजादिगुपचारिका ॥ (दिगुपचारिका दशोपचारा) । **प्रपञ्चसारे** तु अर्घ्यपाद्याचमनकमधुपर्काचमा अपि ॥ गन्धादिनैवेद्यान्ताश्च उपचारा दश स्मृताः ॥ **इति दशोपचारा उक्ताः** ॥ आह्वानासनपाद्यार्घ्याचामाभिषववस्त्रकैः ॥ उपवीतगन्धपुष्पधूपदीपकभोजनैः ॥ प्रदक्षिणा नतोद्वासैः पूजा द्व्यष्टोपचारिका (द्व्यष्टोपचारिका षोडशोपचारा) । **ज्ञानमालायां** । षोडशोपचारा उक्तास्ते यथा ॥ आसनं स्वागतं पाद्यमर्घ्यमाचमनं तथा ॥ मधुपर्कार्पणं स्नानं वसनाभरणे तथा ॥ सुगन्धः सुमनो धूपदीपा नैवेद्यमेव च ॥ नमस्कारो विसर्गश्च उपचारास्तु षोडश ॥ इति ॥ **प्रपञ्चसारे** । एते एव मधुपर्कानन्तरमाचमनेनाधिकेन सहिता विसर्गेण च रहिताः षोडशोक्ताः ॥ आवाहनात्प्राग्ध्यानेन चन्दनान्ते हरिद्रया ॥ कुङ्कुमाञ्जनसिन्दूराक्षतपत्रैर्भुजेः परम् ॥ ताम्बूलदाक्षिण्यफलार्तिक्यकर्पूरदीपकैः ॥ मन्त्रपुष्पेण च, विसर्गात्पुरा क्षान्तियाञ्चया ॥ पूजापूर्तित्विष्टवस्तुयाचनाभ्यां च संयुता ॥ द्वात्रिंशदुपचारा स्यादेषैवावाहनात्परम् ॥ स्वागतेनाचमान्ते तु मधुपर्कार्पणेन च ॥ तथाभ्यङ्गोष्णोदपञ्चामृतगन्धोदकाप्लुतैः ॥ वस्त्रान्ते पादुकाभ्यां चोपवीतान्ते विभूषणैः ॥ दर्पणेन फलान्ते चामोदेन व्यजनेन च ॥ नत्यन्ते चोत्तरार्घ्येणाष्टाचत्वारिंशदात्मिका ॥ एषैव व्यजनस्यान्ते गीतवादित्रनर्तनैः ॥ तथा राजोपचारैश्च छत्रचामरबार्हणैः ॥ सुवर्णरूप्यदण्डाभ्यां हयद्विपरथैरपि ॥ नरयानातपत्राभ्यामथ पुष्पाञ्जलेः परम् ॥ वेदशास्त्रपुराणैश्च चतुःषष्ट्युपचारिका ॥ ध्यानात्पूर्वं द्वारदेवपूजया पीठपूजया ॥ गन्धस्नानात्परं गन्धाद्युपचारैश्च पूजया ॥ अक्षतान्तेऽङ्गार्चनया मातृकावर्णपूजया ॥ पत्रान्ते तद्विशेषैश्च पुष्पान्ते तद्विशेषकैः ॥ शतादिनामार्चनया तथैवावरणार्चया ॥ नैवेद्यान्ते च होमेन तथा बल्यर्पणेन च ॥ वेदपाठात्पुरा स्तुत्या पुराणान्ते मनोर्जपात् ॥ सप्तशत्याश्च जाप्येनोत्तरार्घ्यात्प्राक् च

पूजया ॥ स्वल्पयोत्तरयाथार्घ्यात्परं ब्रह्मार्पणेन च ॥ उपचारैः षोडशभिर्युक्ताशीत्युपचारिका ॥ अङ्गोपचाराश्च तथाष्टाचत्वारिंशदीरिताः ॥ आवाहनात्परं चाष्टौ स्थापनं सन्निधापनम् ॥ सन्निरोधः सम्मुखतावगुण्ठः सङ्कलीकृतिः ॥ अमृतीपरमीकारा वासनान्ते च मुद्रिकाः ॥ मधुपर्कान्त आचामः स्नानगेहप्रवेशनम् ॥ तत्र पीठोपवेशश्च भूषाणामवरोपणम् ॥ चूडाविस्रंसनाभ्यङ्गात्स्नानपीठोपवेशनम् ॥ उद्वर्तनं पञ्चसुधाप्लवेभ्यः सलिलाप्लवाः ॥ गन्धोदस्नपनान्ते च शुद्धाम्बुस्नपनं तथा ॥ अभिषेकात्परं प्रोञ्छनान्यपीठोपवेशनम् ॥ केशशोषो धूपनं च चूडाबन्धनमाचमः ॥ वस्त्रान्ताचमनं चैव यागगेहप्रवेशनम् ॥ यागपीठोपवेशश्चोपवीतान्ते तथाचमः ॥ नैवेद्यात्प्राग्भुक्तिगेहावेशः पीठोपवेशनम् ॥ मध्ये पात्रपरीषेकापोशनाहुति भोजनम् ॥ जलपानापोशने च अन्ते हस्तास्यशोधने ॥ करोद्वर्तनमाचामो बलिदानोत्तरं तथा ॥ सभागृहप्रवेशश्च सभापीठोपवेशनम् ॥ आतपत्रात्परं यागगेहावेशोपवेशने ॥ एते सर्वे चाष्टचत्वारिंशदङ्गोपचारकाः ॥ सर्वे मुख्याङ्गोपचारा अष्टाविंशतिकोत्तरम् ॥ शतमन्त्यार्चनाभेदे तदनुक्रम उच्यते ॥ मण्डपार्चा पीठपूजा ध्यानमावाहनं तथा ॥ स्थापनं सन्निधीकारो निरोधः सम्मुखीकृतिः ॥ अवगुण्ठः सङ्कलीनममृतीकरणं तथा ॥ परमीकरणं स्वागतासने चास्त्रमुद्रिकाः ॥ पाद्यमर्घ्यं चाचमनं मधुपर्काचमौ तथा ॥ स्नानगेहागतिः पीठावेशो भूषानिराकृतिः ॥ चूडामोकस्तथाभ्यङ्गः स्नानपीठोपवेशनम् ॥ उद्वर्तोष्णोदकस्नाने तथा क्षीरामृताप्लवः ॥ शुद्धस्नानं दधिस्नानमथ शुद्धोदकाप्लवः ॥ घृतशुद्धोदकस्नाने मधुस्नानजलाप्लवौ ॥ सिताशुद्धाप्लवौ गन्धोदकशुद्धजलाप्लवौ ॥ पञ्चोपचारपूजा चाभिषेकः प्रोञ्छनं तनोः ॥ अन्यपीठोपवेशश्च केशशोषश्च धूपनम् ॥ चूडाबन्धनमाचामो वस्त्रधारणमाचमः ॥ पादुकाङ्गीकृतिर्यागमण्डपे च प्रवेशनम् ॥ यागपीठोपवेशश्चोपवीतमथ चाचमः ॥ भूषणं दर्पणं गन्धा हरिद्राकुङ्कुमाञ्जने ॥ सिन्दूरमक्षताश्चैव तथावयवपूज-

नम् ॥ मातृकावर्णपूजा च पत्रं पत्रविशेषकाः ॥ पुष्पं पुष्पविशेषाश्च शतनामादिपूजनम् ॥ तथावरणपूजा च धूपदीपार्पण ततः ॥ भुक्तिगेहप्रवेशश्च भुक्तिपीठोपवेशनम् ॥ नैवेद्यस्यार्पणं पात्रसेचनापोशनाहुति ॥ भोजनं चाम्भसः पानमुत्तरापोशनं ततः ॥ हस्तशुद्धिर्वक्त्रशुद्धिः करोद्वर्ताचमौ तथा ॥ होमश्च बलिदानं च सभागेहप्रवेशनम् ॥ सभापीठोपवेशश्च ताम्बूलं दक्षिणाफलम् ॥ सौगन्ध्यं व्यजनं गीतं वाद्यं नर्तनमेव च ॥ छत्रं चामरयुग्मं च मयूराञ्चलयुग्मकम् ॥ सुवर्णरूप्यदण्डौ च तुरगो वारणो रथः ॥ शिबिका चातपत्रं च पुनर्यागगृहागमः ॥ यागपीठोपवेशश्चार्तिक्यं कर्पूरदीपकः ॥ मन्त्रपुष्पं स्तुतिर्वेदः शास्त्रं पौराणिकी प्रवाक् ॥ मूलमन्त्रजपश्चैव तथा सप्तशतीजपः ॥ प्रदक्षिणानमस्कारौ स्वल्पमुत्तरपूजनम् ॥ उत्तरार्घ्यमथ ब्रह्मार्पणं चैव क्षमापनम् ॥ अच्छिद्रतायाचनं च वरयाञ्चा विसर्जनम् ॥ एवमन्त्यार्चनाभेदोपचारक्रम ईरितः ॥ अथान्येषु प्रभेदेषु योजनीयः स्वया धिया ॥ पूर्वोक्तपूजाभेदानां, तत्तदङ्गोपचारकैः ॥ सहितत्वे तु, तेषूपचारसङ्ख्याधिका भवेत् ॥ यथा पञ्चोपचारायां मुख्याः पञ्च तथाङ्गिकाः ॥ द्वादशैवंगणनया सर्वे सप्तदश स्मृताः ॥ दशोपचारपूजायां दशमुख्यास्तथाङ्गिकाः ॥ चतुर्विंशतिरेवं ते चतुस्त्रिंशदुदीरिताः ॥ षोडशात्मकपूजायां मुख्याः षोडश वै मता ॥ आङ्गिकाश्च चतुस्त्रिंशत्सर्वे पञ्चाशदीरिताः ॥ नान्तोऽस्ति ह्युपचाराणां सर्वस्यार्प्यतया विभोः ॥ यत्करोषि यदश्नासीति कृष्णस्यानुशासनात् ॥ तस्मादितोऽप्यभ्यधिका देयाः शक्तौ निजेच्छया ॥ देया अशक्तौ न्यूनाश्च वित्तशाठ्यमकुर्वता ॥ इति ॥ **अथ सामान्यतः पूजापरिभाषा** ॥ **मन्त्रमहोदधौ** ॥ आह्वानाद्युपचारेषु प्रत्येकं पुष्पपाथसी ॥ दत्वा प्रक्षाल्य च करमुपचारान्तरं चरेत् ॥ इति ॥ **मन्त्रतन्त्रप्रकाशे** । द्रव्याभावे प्रदातव्याः क्षालितास्तण्डुलाः शुभाः ॥ तत्तद्द्रव्यं तु सङ्कल्प्य पुष्पं वा वारि वार्पयेत् ॥ इति ॥ **नृसिंहपुराणे** । उपचारैर्बहुविधैर्मन्त्रैर्वेदोदितैरपि ॥ तथा पौरा-

णिकैर्मन्त्रैः पूजयेच्च यथाविधि ॥ इति ॥ **रामार्चनचन्द्रिकायाम्** ॥ आदौ वेदोदितो मन्त्र आगमोक्तस्ततः परम् ॥ मूलमन्त्रस्तथा नाममन्त्रो योज्यः क्रमेण तु ॥ इति ॥ तत्र वैदिकः कल्पोक्तो लैङ्गिक आचारप्राप्तश्चेति त्रिविधः॥ कल्पोक्त आवाहनाद्युपचारेषु पुरुषसूक्तश्रीसूक्त ऋगादिः ॥ लैङ्गिको दधिस्नानादिषु दधिक्राव्ण इत्यादिः ॥ आचारप्राप्तः पुष्पाञ्जल्यादिषु नमो महद्भ्य इत्यादिः । आगमोक्तो द्विविधः । उपचारसमर्पणार्थकश्लोकरूपः केवलस्तुत्याद्यर्थकश्लोकरूपश्च ॥ प्रथमो ग्रन्थभेदेनानेकविधः ॥ द्वितीयश्चण्डिकार्चनरहस्ये । नमो देव्यै महादेव्यै इत्युक्तः । **देवीपुराणे** । जयन्ती मङ्गला कालीत्युक्तः ॥ मूलमन्त्रस्तत्तद्देवताप्रियत्वेन तन्त्रेषु प्रसिद्धः । तदभावे प्रणवादि चतुर्थ्यन्तं नमोन्तं चैव सत्तम ॥ देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्तितः ॥ इति **गारुडोक्तो** लाक्षणिकः ॥ चण्डिकापूजायां प्रतिपदोक्तो मूलमन्त्रश्चण्डिकार्चनरहस्ये ऐं ह्रीं क्लीं चामुण्डायै विच्चे इति नवाक्षर उक्तः ॥ **देवीपुराणे** दुर्गे रक्षिणि स्वाहेति सप्ताक्षर उक्तः ॥ **वाराहीतन्त्रे** षडक्षरेण मन्त्रेण पाद्यादीनथ भैरव ॥ वितरेदुपचारांश्च पूर्वोक्तान् किल षोडश ॥ इति **षडक्षरउक्तः** ॥ स च ह्रीं दुर्गायै नम इति **व्रतराजः** ॥ एषु **चण्डिकार्चनरहस्योक्तो** नवाक्षर एव बहुसम्मतः ॥ नाममन्त्रस्तत्तद्देवतानामधेयात्मकश्चतुर्थीनमोन्तश्चण्डिकायै नम इत्यादिः । अत्राशीतिसङ्ख्या मुख्योपचारान्तर्गतषोडशोपचारेषु पुरुषसूक्तस्य श्रीसूक्तस्य चैकैका ऋगिति वैदिकमन्त्रद्वयम् ॥ आगमोक्तोऽगस्त्यदुर्वासःशङ्कराचार्यादिमहापुरुषरचित उपचारसमर्पणार्थः श्लोकरूपः ॥ मूलमन्त्रश्चण्डिकार्चनरहस्योक्तो नवार्णः । नाममन्त्रश्चण्डिकामहालक्ष्म्यन्तरनामधेयात्मकश्चतुर्थीनमोऽन्तः । **इति मन्त्रपञ्चकं** प्रयुक्तम् ॥ तदितरेषु मुख्योपचारेष्वागमोक्तो मूलमन्त्रो नाममन्त्रश्चेति मन्त्रत्रयमुपयुक्तम् ॥ अङ्गोपचारेषु मूलमन्त्रो नाममन्त्रश्चेतिद्वयम् ॥ द्वारदेवतापीठदेवतावरणदेवतापूजासु स्वबीजसहितस्तत्तन्नाममन्त्रः प्रयुक्तः । प्रतिपदो-

क्तस्वबीजालाभे ॐकारो बिन्दुयुक्तं च नामधेयाद्यमक्षरम् ॥ देवतायाः
स्वकं बीजं पूजायामृद्धिसिद्धिदम् ॥ **इतिचण्डिकारहस्योक्तं लाक्षणिकं**
गृहीतम् ॥ अङ्गपूजायां पत्रपुष्पविशेषपूजयोश्च केवलं पूज्यदेवतायाश्चतुर्थी-
नमोन्ता नाममन्त्राः प्रयुक्ताः ॥ **इति सामान्यतः पूजापरिभाषा ॥ अथ**
पूजाक्रमः ॥ तत्रादौ यागमण्डपद्वारपूजा ॥ तदर्थं द्वारार्घ्यं **मन्त्रमहोदधौ ॥**
तारं खं वह्निसर्गाढ्यं द्वारार्घ्यं साधयामि च ॥ उक्त्वास्त्रमनुना पात्रं क्षालयेत्.
पूरयेत् हृदा ॥ तीर्थाण्यावाह्य गन्धादीन्निक्षिपेन्निगदादिना ॥ धेनुमुद्रां दर्श-
यित्वा मूलेनाप्यभिमन्त्रयेत् ॥ द्वारार्घ्यस्य विधिः प्रोक्तस्तेनार्चेत् द्वारदेवताः
॥ इति ॥ (तारः प्रणवः । खं हकारः । वह्निना रेफेण सर्गेण विसर्गेण
चाढ्यो युक्तः । तेन ह्रः इति संयुक्तो वर्णः । द्वारार्घ्यमित्यादिस्वरूपम् ॥
अस्त्रमनुना फडितिमन्त्रेण हृदा नमः शब्देन । तीर्थानि गङ्गे च यमुनेचेत्या-
दीनि निगदादिना प्रणवेन) प्रोक्ष्य चार्घ्याम्बुना यागमण्डपं पूजयेच्च तम् ॥
द्वारस्य तूर्ध्वदेहल्यां गणेशं मध्यतो यजेत् ॥ अधःक्रमेण द्वारस्य शाखयो-
देवता यजेत् ॥ चिच्छक्तिं दक्षशाखायां मायाशक्तिं तु वामतः ॥ एवं
विघ्नेश्वरक्षेत्रपालौ गङ्गाकलिन्दजे ॥ (कलिन्दजा यमुना) तथा धातृविधा-
तारौ शङ्खपद्मनिधी यजेत् ॥ अधो देहलिकायां तु पूजयेद्वास्तुदेवताम् ॥
द्वारस्योभयतो भमौ पूजयेद्द्वारपालिकाः ॥ ब्राह्म्याद्या मातृका अष्टौ तत्र
ब्राह्मी तु दक्षिणे ॥ वामे माहेश्वरी दक्षे कौमार्यन्यत्र वैष्णवी ॥ (अन्यत्र
वामभागे) वाराही दक्षभागे तु नारसिंही च वामतः ॥ ऐन्द्री पूज्या
दक्षभागे चामुण्डा वामभागतः ॥ इति ॥ पूजने क्रमस्तु यथासम्भवं
पूर्वसंस्थ उदक्संस्थो वा ॥ पूजने स्वबीजसहितो देवतानाममन्त्रो योज्यः ॥
पूजामण्डपस्यानेकद्वारत्वे मुख्यद्वारमारभ्य प्रादक्षिण्येन द्वाराणां पूजा ॥
ग्रन्थान्तरे आसनोपवेशनात्प्राक् द्वारदेवतापूजोक्ता सा शतचण्ड्या-
दिप्रयुक्तबहिर्मण्डपद्वाराभिप्रायेणेति ज्ञेयम् ॥ इयं ग्रन्थभेदाद्भिन्नभिन्नतया

दृश्यते ॥ **इति यागमण्डपपूजा** ॥ अथ **पीठपूजा** ॥ यागमण्डपमध्ये तु यजेदूर्ध्वक्रमेण च ॥ आधारशक्तिं कूर्मं च शेषं पृथ्वीं सुधोदधिम् ॥ श्वेतद्वीपं कल्पवनं स्वर्णप्रासादमेव च ॥ तदूर्ध्वं स्थापयेत्पीठं चतुर्गात्रं चतुष्पदम् ॥ चतुरस्रं समं मध्यफलकेन समन्वितम् ॥ असम्भवे चिन्तयेद्वा तदर्चेन्नाममन्त्रतः ॥ ततः सम्पूजयत्तत्र नामभिः पीठदेवताः ॥ पीठपादेषु च चतुर्ष्वाग्निकोणादितः सुधीः ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं चैव पूजयेत् ॥ पीठगात्रचतुष्के चाधर्ममज्ञानमेव च ॥ अवैराग्यमनैश्वर्यं क्रमात्पूर्वादितो यजेत् ॥ पीठस्य मध्यफलक प्राच्यादिदिक्चतुष्टये ॥ गणेशं क्षेत्रपालं च बटुकं योगिनीस्तथा ॥ अग्न्यादिकोणचातुष्के वक्ष्यमाणं चतुष्टयम् ॥ जयां च विजयां चैव जयन्तीं चापराजिताम् ॥ तदन्तरष्टा पीठानि पूर्वाद्यष्टसु पूजयेत् ॥ पीठशपीठाम्बा पीठपादुकासहितानि च ॥ ओडयाणं मातृकापीठं पीठं जालन्धरं तथा ॥ कोह्लारगिरिपीठं च पूर्णाख्यगिरिपीठकम् ॥ संहारागिरिपीठं च ओणकं कामपीठकम् ॥ तदन्तश्च चतुर्दिक्षु षट्षट्शक्तीर्यजेद्बुधः ॥ विष्णुमायां चेतनां च दक्षिणे बुद्धिं निद्रां क्षुधां तथा ॥ छायामिति तु षट् प्राच्युदक्संस्थाः प्रपूजयेत् ॥ शक्तिं तृष्णां क्षान्तिजाती लज्जां शान्तिं च दक्षिणे ॥ प्राक्संस्थाः पूजयेत् षट्चोदक्संस्थाः पश्चिमेऽग्रिमाः ॥ श्रद्धां कान्तिं च लक्ष्मीं च धृतिं वृत्तिं स्मृतिं यजेत् ॥ नीतिं दयां तुष्टिपुष्टी मातृभ्रान्ती च देवताः ॥ उदीच्यां पूजयेत्पूर्वसंस्थाः षट्शक्तिका इमाः ॥ एता देवीमहोत्सवानुरोधेनोक्ताः ॥ **देवीभागवते** कान्तिस्थाने कीर्तिरुक्ता । **मन्त्रमहोदधौ** नीतिमनुक्त्वा वृत्त्यनन्तरं श्रुतिरुक्ता ॥ **चण्डिकाचनरहस्य** नीतिरहितास्त्रयोविंशतिसङ्ख्याका उक्तास्तत्र उदीच्यां पञ्चानामेव पूजोक्ता ॥ एतेन देवीमाहात्म्यस्य पञ्चमाध्याये चतुर्विंशतेस्त्रयोविंशतवा पाठ इति न भ्रमितव्यम् ॥ **कात्यायनीतन्त्रे** विष्णुमायादिभ्रान्त्यन्ताया एकविंशतेश्चितिरूपायाश्चैकस्या इति द्वाविंशतेरेव तत्र परिगणितत्वात् ॥ तदन्तश्चैव पूर्वस्यामुदक्संस्थानि पूजयत्

पावकादित्यसोमानां मण्डलान्यथ पश्चिमे ॥ सत्त्वं रजस्तमश्चेति यजेत्प्राग्वत्
गुणत्रयम् ॥ (प्राग्वत् उदक्संस्थम्) आत्मानमन्तरात्मानं परमात्मानमेव च ॥
ज्ञानात्मानं परापूर्वं प्राक्संस्थांश्चतुरो यजेत् ॥ (परापूर्वं ह्रींबीजपूर्वम्) उदीच्यां
च यजेत्प्राग्वद्दिशि तत्त्वचतुष्टयम् ॥ मायातत्त्वं कलातत्त्वं विद्यातत्त्वं परं तथा ॥
(प्राग्वत् प्राक्संस्थम् । परं परतत्त्वम् ।) मध्ये च ह्रीं सर्वशक्तिकमलासनमर्चयेत् ॥
इति ॥ अत्र पूजकस्य पुरोभागः प्राची ॥ तदनुरोधेनैवान्या दिशः ॥ तदुक्तं
तन्त्रराजे पीठावरणपूजासु स्वाग्रे प्राचीं प्रकल्पयेत् ॥ अनुरुध्य च तामन्या
दिशो ज्ञेयाः प्रदक्षिणम् ॥ इति ॥ **इति पीठपूजा** ॥ **अथ चण्डीयन्त्रम्** ॥
कमलासनमध्ये तु यन्त्रं संस्थापयेदथ ॥ कुङ्कुमेनाथ कस्तूर्यागुरुणा चन्द-
नेन वा ॥ रक्तकौशेयवस्त्रादौ रक्तचूर्णेन वा कृतम् ॥ बिन्दुत्रिकोणषट्कोण-
वृत्ताष्टदलरूपकम् ॥ भूगृहेण समायुक्तं चण्डिकास्थापनाय हि ॥ इति ॥
तत्र बिन्दुस्त्रिकोणमध्यभागसूचनार्थः । त्रिकोणं प्रधानदेवतास्थापनार्थं ।
त्रिकोणाद्बहिः प्रथमावरणदेवतास्थापनार्थं किञ्चिदन्तरं त्यक्त्वा द्वितीय-
तृतीयावरणदेवतास्थापनार्थं षट्कोणं ॥ षट्कोणाद्बहिरष्टदलकमलमूलावधि-
ज्ञानार्थं षट्कोणसंलग्नं वृत्तम् ॥ अष्टदलं चतुर्थपञ्चमषष्ठावरणदेवतास्थापनार्थम् ।
ततो बहिः सप्तमावरणदेवतास्थापनार्थं किञ्चिदन्तरं त्यक्त्वाष्टमनवमावरण-
देवतास्थापनार्थं चतुर्द्वारं सान्तररेखात्रयकल्पितकोष्ठद्वयात्मकं भूगृहं ॥ इदं
देवतास्थापनार्थं यन्त्रम् । देवतात्मकं यन्त्रं त्वग्रे वक्ष्यते ॥ **देवीभाग-**
वते । यन्त्रमेवं विचिन्तयेदित्युक्तम् तेन यन्त्ररचनाशक्तौ भावनापक्षोऽपि
सूचितः ॥ अथ यन्त्रे त्रिकोणे बिन्दुस्थाने यथोक्तलक्षणां प्रतिमां स्थापयेत् ॥
तत्र **प्रतिमाद्रव्याण्युक्तानि विष्णुभागवते** ॥ शैली दारुमयी लौही लेप्या
लेख्या च सैकती ॥ मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥ इति ॥
(प्रतिमाशब्दो यन्त्रशिवलिङ्गादेरप्युपलक्षकः ॥ तत्र शैली शिलामयी लौही
स्वर्णादिधातुघटिता ॥ लोहशब्दो धातुसामान्यवाची तथाप्यायसी निषिद्धा ॥

लेप्या मृण्मयी ॥ लेख्या हरिद्राकुङ्कुमकस्तूरीचन्दनकज्जलादिमिश्रजललिखिता ॥ सैकती वज्रलेपादिचिक्कणकल्कमिश्रसिकताघटिता ॥) **स्मृत्यन्तरे** । सौवर्णी राजती ताम्री मृण्मयी प्रतिमा भवेत् ॥ पाषाणरत्नमुक्तानां कांस्यपित्तलयोरपि ॥ इत्युक्तम् ॥ **अथ प्रतिमामानं मात्स्ये** । अङ्गुष्ठपर्वमानात्सा वितस्तिं यावदेव तु ॥ गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥ इति ॥ (अङ्गुष्ठपर्वमानादङ्गुष्ठपर्वमानमारभ्येत्यर्थः) प्रतिमादेरामणीयकत्वमप्यावश्यकम् ॥ तदुक्तम् ॥ अर्चकस्य तपोयोगादर्चनस्यातिशायनात् ॥ आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छतीति ॥ (बिम्बानां प्रतिमानाम् । आभिरूप्यात् सौन्दर्यात् । भङ्गादिदोषयुक्ता प्रतिमा न पूजार्हा । तदुक्तं **महोदधौ** । पूज्या न भग्ना नो दग्धा नोर्ध्वाधोदृङ् न वक्रिका । (प्रतिमेति शेषः) **पदार्थादर्शे**, **ब्राह्मे** । खण्डिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते ॥ यागहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥ अन्यमन्त्रार्चिते बिम्बे पतितस्पर्शदूषिते ॥ दशस्वेतेषु नो कुर्युः सन्निधानं दिवौकसः ॥ इत्युक्तम् ॥ (खण्डिते त्रुटितावयवे । स्फुटिते भग्ने । भ्रष्टे स्थानच्युते । दुष्टभूमिष्वपवित्रस्थानेषु पतिते । अन्यमन्त्रार्चिते श्रुतिस्मृतितन्त्रपुराणेतरमन्त्रपूजिते । अन्यत् सुगमम् ।) इदमनादिसिद्धप्रतिष्ठापितेतरप्रतिमाविषयमिति **प्रतिष्ठामयूखे** उक्तम् ॥ **अथ प्रकृतपूज्यदेवताया महालक्ष्म्याः स्वरूपम्** ॥ तच्च द्विविधम् ॥ चतुर्भुजमष्टादशभुजं च ॥ आद्यं प्रकृतिभूतं द्वितीयं विकृतिभूतम् ॥ तत्र प्रथमं **प्राधानिकरहस्ये** ॥ मातुलिङ्गं गदां खेटं पानपात्रं च बिभ्रती ॥ नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि ॥ तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा ॥ इति ॥ द्वितीयं **वैकृतरहस्ये** ॥ सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा ॥ त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥ श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ॥ रक्तमध्या रक्तपादा रक्तजङ्घोरुरुन्मदा ॥ सुचित्रजघना चित्रमाल्याम्बरविभूषणा ॥ चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ॥ अष्टा-

दशभुजा पूज्या सा सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् ॥ अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥ चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ॥ शक्तिर्दण्डश्चर्म चाप पानपात्रं कमण्डलुः । अलङ्कृतभुजामेभिरायुधैः कमलासनाम् ॥ सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥ पूजयन् सर्वलोकानां स देवानां प्रभुर्भवेत् ॥ इति ॥ अष्टादशभुजायां विशेषो **मात्स्ये** । जटाजूटसमायुक्तामर्धेन्दुकृतशेखराम् ॥ नानारत्नविचित्रेण मुकुटेन विराजिताम् ॥ लोचनत्रयसंयुक्तां पद्मेन्दुसदृशाननाम् ॥ नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ॥ त्रिभङ्गाकृतिसंस्थानां पीनोन्नतपयोधराम् ॥ तद्वामपादस्याधस्तान्महिषं छिन्नमस्तकम् ॥ रुधिराप्लुतसर्वाङ्गं रक्ताक्षमथ तस्य च ॥ निःसृतार्धतनुं कण्ठनालाच्चर्मासिधारिणम् ॥ हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ॥ सपाशवामहस्तेन धृतकेशं च दुर्गया ॥ दैत्यं करालदंष्ट्रास्यं हर्यक्षेणाभिविद्रुतम् ॥ वमद्रुधिरवक्त्रेण धुन्वता च रुषा सटाः ॥ ऊर्ध्वलाङ्गूलदण्डेन देव्यधिष्ठानहेतुना ॥ इति ॥ उक्तद्विविधमूर्त्यभावे यथालब्धलक्षणां देवीप्रतिमां प्रकृतिविकृत्योरभेदादुक्तलक्षणान्यतरलक्षणां ध्यात्वा पूजयेत् ॥ तस्या अप्यभावे वक्ष्यमाणलक्षणं यन्त्रं विलिख्य पूजयेत् ॥ यन्त्रं यथा **चण्डिकार्चनरहस्ये** । चतुरस्रे समे शुद्धे पीठे दोषविवर्जिते ॥ लिखेदष्टदलं पद्मं कुङ्कुमागुरुचन्दनैः ॥ पद्ममध्ये लिखेच्चक्रं षट्कोणं चण्डिकामयम् ॥ षट्कोणचक्रमध्ये तु आद्यं बीजत्रयं लिखेत् ॥ पूर्वादिकोणषट्के तु बीजान्यन्यानि विन्यसेत् ॥ (विन्यसेल्लिखेत् । अन्यानि बीजानीत्युक्त्यान्येषामपि षड्वर्णानां बिन्दुयोगेनैव लेखः स तु प्रादक्षिण्येन) दुर्गोत्सवे त्विदं त्रिकोणषट्कोणवृत्ताष्टदलभूपुराण्यालिख्य त्रिकोणे नवार्णस्याद्यं बीजत्रयम्, षट्कोणे सानुस्वारानन्यान् षड्वर्णान्, अष्टदले प्रागादिक्रमेण द्वन्द्वशोऽकारादिस्वरान्, भूपुरे प्रागादिचतुर्दिक्षु श्रीं बीजम्, आग्नेय्यादिविदिक्षु च ह्रीं बीजं लिखेदित्याकारकमुक्तम् ॥ यन्त्रस्य पूर्वोक्तप्रकारेण प्राणप्रतिष्ठा कार्या ॥

तत्र मम प्राणा इहप्राणा इत्यादिवाक्येषु ममेति पदस्थाने चण्डिकाया इति महालक्ष्म्या इति वा ऊहः कार्यः । पूर्वप्रतिष्ठितस्फटिकादियन्त्रसत्वे न प्राणप्रतिष्ठाप्रसङ्गः ॥ **इति प्रतिमादिविचारः** ॥ **अथ ध्यानम्** ॥ ध्यानं नाम देवतास्वरूपस्य हृदि चिन्तनम् ॥ तदाह **याज्ञवल्क्यः** । समाहितेन मनसा चैतन्यान्तरवर्तिना ॥ आत्मनोभीष्टदेवस्य चिन्ता ध्यानमिहोच्यते ॥ इति ॥ साम्प्रतं प्रायशो लोकानां योगशास्त्रानभिज्ञत्वाद्योगसाध्यस्य ध्यानस्य कर्तुमशक्यत्वेन देवतास्वरूपवर्णनात्मकश्लोकपाठस्यैव ध्यानोपचारत्वेन स्वीक्रियमाणत्वादुपचारसंज्ञायाश्च स्वकर्तृकदेवतासम्प्रदानकद्रव्यत्यागे, स्वकर्तृकदेवताकर्मकक्रियाविशेषे भावनाविशेषे वा रूढत्वात्, अमुकदेवतां ध्यायामि चिन्तयामीत्यादिस्वकर्तृकदेवताकर्मकपदघटितवाक्यात्मकश्लोकानामेव पाठो युक्तः ॥ न तु ध्यायेत् ध्येय इत्यादिविधिबोधकपदघटितश्लोकानाम् ॥ अत्र प्रकृतिविकृत्यात्मकमहालक्ष्मीध्यानश्लोकौ प्रयोगे वक्ष्येते ॥ **इति ध्यानविचारः** ॥ **अथावाहनम्** ॥ **मन्त्रमहोदधौ** । मूलमन्त्रं समुच्चार्य सुषुम्नावर्त्मना सह ॥ द्वारेण ब्रह्मरन्ध्रस्य नासारन्ध्रेण निर्गतम् ॥ पुष्पाञ्जलौ मातृकाब्जे योजयित्वा विनिक्षिपेत् ॥ मूर्तौ पुष्पाञ्जलिं चैतदावाहनमुदीरितम् ॥ इति ॥ एतदशक्तौ **शिवार्चनचन्द्रिकायाम्** ॥ आगच्छेति प्रयोगेण मूलमन्त्रेण चाक्षतैः ॥ आवाहनं प्रकर्तव्यमिति ॥ आवाहनानन्तरं स्थापनसन्निधापनसन्निरोधनसम्मुखीकरणान्तानुपचारान् कल्पयित्वा मूलमन्त्रस्य षडङ्गन्यासेन सकलीकृत्यावगुण्ठनमुद्रयावगुण्ठनं धेनुमुद्रयामृतीकरणं महामुद्रया परमीकरणं च कल्पयेत् ॥ अथैतन्मुद्रा यथा । हस्ताभ्यामञ्जलिं कृत्वानामिकामूलपर्वणोः अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता ॥ अधोमुखी त्वियं चेत्स्यात्स्थापनी मुद्रिका मता ॥ उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात्सन्निधापनी ॥ अन्तःप्रवेशिताङ्गुष्ठा सैव संरोधिनी मता ॥ उत्तानमुष्टियुगला सम्मुखीकरणी मता ॥ **तृचभास्करे** त्वियं ' मुष्टिद्वयस्थिताङ्गुष्ठौ सम्मुखौ तु परस्परम् ॥

संश्लिष्टावुच्छ्रितौ कुर्यात्सेयं सम्मुखमुद्रिका ॥ इत्युक्ता ॥ देवतानां षडङ्गेषु
न्यासः स्यात्सङ्कलीकृतिः ॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी ॥ अवगुण्ठ-
नमुद्रेयं परितो भ्रमिता दिशः ॥ **तृचभास्करे** तु । मुष्टिद्वयस्य तर्जन्यौ
प्रसार्याधोमुखे कृते ॥ अनुलोमविलोमाभ्यां भ्रामिते देवताभितः ॥ दुष्टदृष्टि-
निरासाय सैषा मुद्रावगुण्ठनी ॥ इत्युक्ता ॥ धेनुमुद्रा प्रागुक्ता ॥ अन्योन्य-
ग्रथिताङ्गुष्ठा प्रसारितकराङ्गुलिः ॥ महामुद्रेयमुदिता परमीकरणे बुधैः ॥
इति ॥ एवमष्टावावाहनोपयुक्ता मुद्राः ॥ विसर्जनपर्यन्तं निष्क्रमणोपरोधः
सन्निरोधः । शक्त्युत्पादनं सङ्कलीकरणं ॥ तेजसा समाच्छादनमवगुण्ठनम् ॥
सुखितासम्पादनममृतीकरणम् ॥ प्रसादनं परमीकरणम् ॥ अन्यत्सुगमम् ॥
तत्तन्मुद्रादर्शनानन्तरं सम्बोधनान्तं देवतापदमुच्चार्य । स्थिता भव । सन्नि-
हिता भव । सन्निरुद्धा भव । सम्मुखी भव । सङ्कलीकृता भव । अवगुण्ठिता
भव । अमृतीकृता भव । परमीकृता भव । इति वक्तव्यम् । स्थिरप्रतिमायां
नावाहनविसर्जने ॥ तदुक्तं **विष्णुभागवते** । उद्वासावाहने न स्तः स्थिरा-
यामुद्धवार्चने ॥ अस्थिरायां विकल्पः स्यात्स्थण्डिले तु भवेत् द्वयम् ॥ इति ॥
वाचस्पतौ ॥ कुर्यादावाहनं मूर्तौ मृन्मय्यां सर्वदैव हि ॥ प्रतिमायां जले
वह्नौ नावाहनविसर्जने ॥ इत्युक्तम् ॥ आवाहनादिनिषेधे तत्स्थाने पुष्पा-
ञ्जलिर्देयः ॥ यत्रावाहनाभावस्तत्र तदङ्गोपचारा अपि न देयाः ॥ इत्या-
वाहनम् ॥ ततः स्वागतमाचरेदिति **मन्त्रमहोदध्युक्तेः** स्वागतं कार्यम् ॥
अथासनम् ॥ **शिवार्चनचन्द्रिकायाम्** ॥ आसनं सुखदं दद्यात् पौष्पं
दारुजमेव वा ॥ वास्त्रं वा चार्मणं कौशं शिलाजं वाथ तैजसम् ॥ इति ॥
(कौशं कुशमयम् । तैजसं धातुमयम् ।) तत्रैव दारवे चान्दनं श्रेष्ठं तैजसे
तु हिरणमयम् ॥ शैले रत्नभवं श्रेष्ठं वास्त्रे कौशयसम्भवम् ॥ इति ॥ (दारवे
काष्ठमये । शैले शिलामये) **इत्यासनम्** ॥ मुद्रा भुजायुधाकाराश्चण्डिकायै
प्रदर्शयेदिति **चण्डिकार्चनरहस्योक्तेः** प्रकृतिभूतप्राधानिकोक्तचतुर्भुजमहा-

लक्ष्मीपूजायां मातुलिङ्गगदाखेटपानपात्राख्याश्चतस्रो मुद्राः प्रदर्शयेत् । वैकृतरहस्योक्तविकृतिभूताष्टादशभुजमहालक्ष्मीपूजायां अक्षमालादिकमण्डलवन्ता अष्टादश मुद्रा दर्शयेत् ।। अथ क्रमेण तासां लक्षणानि ।। द्वौ मुष्टी सम्मुखीकृत्य संश्लिष्टावितरेतरम् ।। बीजपूराह्वया मुद्रा महालक्ष्म्याः प्रतुष्टिदा ।। अन्योन्याभिमुखौ कृत्वा हस्तौ तु ग्रथितावुभौ ।। अङ्गुष्ठौ मध्यमे र द्धसंयुक्ते सुप्रसारिते ।। गदामुद्रेयमुदिता दर्शिता विघ्नहारिणी ।। वामहस्तं तथा तिर्यक्कृत्वा चैव प्रसारयेत् ।। आकुञ्चिताङ्गुलिं कुर्याच्चर्ममुद्रेयमीरिता ।। पात्राकारं तु हस्ताग्रं पानपात्रस्य मुद्रिका ।। इति चतुर्भुजमहालक्ष्म्याश्चतस्र आयुधमुद्राः ।। अथाष्टादशभुजमहालक्ष्म्या अष्टादशायुधमुद्राः ।। प्रदेशिन्यग्रयोर्योगस्तथाङ्गुष्ठाग्रयोरपि ।। अक्षमालाह्वया मुद्रा मता वागीश्वरीप्रिया ।। करौ च सम्मुखौ कृत्वा संहताभ्युन्नतौ पुनः ।। अङ्गुलीः प्रसृता मध्येऽङ्गुष्ठौ पद्मस्य मुद्रिका । दक्षमुष्टिस्तु तर्जन्या मुक्तया बाणमुद्रिका ।। उर्ध्वस्य वामहस्तस्य तर्जन्याद्यङ्गुलित्रयं ।। प्रसार्य योजयेदन्ये मिथोऽङ्गुष्ठकनिष्ठिके ।। खड्गमुद्रेयमुदिता सर्वशत्रुनिकृन्तनी ।। कनिष्ठाङ्गुष्ठयोर्योगादन्यासां च प्रसारणात् ।। त्रिकोणा त्वशनेर्मुद्रा पुरुहूतप्रियङ्करी ।। गदामुद्रा चक्रमुद्रे पूर्वमुक्ते ।। अङ्गुष्ठेन कनिष्ठां तु बध्वा शेषाङ्गुलित्रयं ।। प्रसारयेत्त्रिशूलाख्या मुद्रैषा परिकीर्तिता ।। तले तलं तु करयोस्तिर्यक् संयोज्य चाङ्गुलीः ।। संहतप्रसृताः कुर्यात् मुद्रा परशुसंज्ञिता ।। शङ्खघण्टामुद्रे प्रागुक्ते ।। वाममुष्टिस्थतर्जन्या दक्षमुष्टिस्थतर्जनीं ।। संयोज्याङ्गुष्ठकाग्राभ्यां तर्जन्यग्रे च पीडयेत् ।। एषा पाशाह्वया मुद्रा गणनाथप्रिया मता ।। मुष्टीकृत्य करौ द्वौ च वामस्योपरि दक्षिणम् ।। कृत्वा शिरसि युञ्जीत शक्तिमुद्रेयमीरिता ।। ऊर्ध्वोन्नतस्य हस्तस्य मुष्टिर्दण्डाह्वया मता ।। चर्ममुद्रा पूर्वमुक्ता ।। वामस्य मध्यमाग्रं तु तर्जन्यग्रेण योजयेत् ।। अनामिकां कनिष्ठां च तस्याङ्गुष्ठेन पीडयेत् ।। दर्शयेद्वामके स्कन्धे धनुर्मुद्रेयमीरिता ।। पानपात्रकमण्डलुमुद्रे प्रागुक्ते ।।

(कमण्डलुमुद्रा कलशमुद्रा ॥) इति ॥ अथ **पाद्यम्** ॥ तद्द्रव्याणि **शारदातिलके** ॥ दूर्वा च विष्णुक्रान्तं च श्यामाकः पद्ममेव च ॥ पाद्याङ्गानि च चत्वारि कथितानि समासतः ॥ **चण्डिकार्चनरहस्ये** तु श्यामाकविष्णुक्रान्ताब्जयुक्तं पाद्यं समर्पयेदिति दूर्वारहितं पाद्यमुक्तम् ॥ **तृचभास्करे** । उपचारसमर्पणे विशेषो दर्शितः, स यथा ॥ प्रतिमादिषु यद्योग्यं गात्रे दातुं च तत्तनौ ॥ दद्यादयोग्यं पुरतो नैवेद्यमुदकादिकम् ॥ इति ॥ तेन पाद्यं पादार्थं वारिणीति पाद्यपदव्युत्पत्तेः पाद्यं पादाम्बुजेऽर्पयेदिति **मन्त्रमहोदध्युक्तेश्च** पाद्यं पादयोर्देयम् ॥ इति **पाद्यम्** ॥ **अथार्घ्यम्** ॥ **चण्डिकार्चनरहस्ये** । वारिगन्धाक्षतोपेतं चन्दनेन प्रमोदितम् ॥ अर्घ्यं दत्त्वा महालक्ष्म्यै धेनुमुद्रां प्रदर्शयेत् ॥ अष्टाङ्गार्घ्यं समापूर्य देव्या मूर्ध्नि निवेदयेत् ॥ दशवर्षसहस्राणि दुर्गालोके महीयते ॥ इत्युक्तम् ॥ अर्घ्यस्याष्टाङ्गानि **शारदातिलके** । सिद्धार्थमक्षताश्चैव दूर्वा च तिलमेव च । यवगन्धफलं पुष्पमष्टाङ्गं चार्घ्यमुच्यते ॥ इति ॥ **मन्त्रमहोदधौ** फलस्थाने कुशाग्रमुक्तम् ॥ **देवीपुराणे** द्वादशाङ्गार्घ्यमुक्तं तद्यथा ॥ आपः क्षीरं कुशाग्राणि अक्षतादधितण्डुलाः ॥ तिलाः सिद्धार्थका दूर्वा कुङ्कुमं रोचना मधु ॥ अर्घोऽयं नृपशार्दूल द्वादशाङ्गः प्रकीर्तितः ॥ द्वादशाङ्गेन योऽर्घ्येण चण्डिकां पूजयेन्नरः ॥ दशवर्षसहस्राणि दिव्यानि दिवि मोदते ॥ इति ॥ पात्रविशेषैरर्घ्यदाने फलविशेषस्तत्रैवोक्तः ॥ स्वर्णपात्रेण दत्त्वार्घ्यं स्वर्गलोकं प्रयात्यसौ ॥ रूप्यपात्रेण दत्त्वा च विष्णुयागफलं लभेत् ॥ ताम्रपात्रेण दत्त्वा च पौण्डरीकफलं लभेत् ॥ मृत्पात्रेण च तद्दत्त्वा वाजपेयफलं लभेत् ॥ इति ॥ अर्घ्यं मूर्ध्नि दद्यादिति **देवीपुराणे** ॥ तदर्घ्यं मूर्ध्नि चार्पयेदिति **मन्त्रमहोदधौ** च ॥ क्वचिद्धस्तेऽर्घ्यदानमुक्तम् ॥ दृश्यते च तथाचारोऽपि । **अथाचमनम्** ॥ **मन्त्रमहोदधौ** । जातीलवङ्गकङ्कोलैः शस्तमाचमनीयकम् ॥ इत्युक्तम् ॥ कर्पूरमगुरुं पुष्पं दद्यादाचमनोदके ॥ इति **शारदातिलके** ॥

दुर्गामुद्दिश्य प्रानीयं केतकीशशिवासितम् ॥ ददात्याचमने यस्तु स गणाधिपतिर्भवेत् ॥ इति **दुर्गाभक्तितरङ्गिण्याम्** ॥ (शशी कर्पूरः । गणाधिपतिः देवीगणश्रेष्ठः) दद्यादाचमनं वक्त्रे मूलमन्त्रसुधाक्षरैः ॥ मूलं मूलमन्त्रः । मन्त्रो वैदिक आगमोक्तो वा । सुधाक्षरे सुधेत्यक्षरद्वयम् तैः) **इत्याचमनम्** ॥ **अथ मधुपर्कः** ॥ स च **तृचभास्करे** यथा ॥ दधि सर्पिर्जलं क्षौद्रं शर्करा चेति पञ्चाभिः ॥ मधुपर्को भवेत्तत्र जलं स्वल्पं सिता दधि ॥ घृतं चेति त्रयं तुल्यं क्षौद्रं सर्वाधिकं मतम् ॥ इति ॥ **मन्त्रमहोदधौ** तु पात्रे तु मधुपर्कस्य दध्याज्ये मधु च क्षिपेत् । मूलमन्त्रसुधावर्णैर्दद्यात्तं वदने विभोः ॥ इति पदार्थत्रयेणोक्तः ॥ दद्यात्तं वदने विभोरित्युक्तत्वान्मधुपर्को मुखे देयः ॥ **इति मधुपर्कः** ॥ मधुपर्कानन्तरमाचमनं देयम् ॥ तदुक्तं **पूजापङ्कजभास्करे** ॥ मधुपर्के तथा स्नाने वस्त्रे यज्ञोपवीतके ॥ नैवेद्यान्ते च देयानि पञ्चस्वाचमनानि वै ॥ इति ॥ ततः स्नानाङ्गतया स्नानमण्डपप्रवेशं पीठोपवेशं च कारयित्वा भूषणावरोपं चूडाविस्रंसनं च कुर्यात् ॥ **अथाभ्यङ्गो दुर्गाभक्तितरङ्गिण्याम्** ॥ तैलैर्नानाविधैः शुद्धैः सुगन्धिकुसुमोद्भवैः ॥ शिरःप्रभृतिपादान्तं कुर्यादभ्यङ्गमुत्तमम् ॥ इति ॥ **भविष्ये** । वर्षैः पद्मसहस्रेण यत्पापं समुपार्जितम् ॥ तत्सर्वं विलयं याति कृताभ्यङ्गे ममार्पिते ॥ इति देवीवचनम् ॥ (पद्मशब्दोऽत्र सङ्ख्याविशेषवाची) अभ्यङ्गानन्तरं मूर्तिं स्नानार्थं स्नानपीठे उपवेशयेत् ॥ अथ अभ्यङ्गाङ्गतया स्निग्धतापनयनार्थमुद्वर्तनमुक्तं **दुर्गाभक्तितरङ्गिण्याम्** ॥ चूर्णैश्चन्दनकर्पूरमुस्ताकुङ्कुमसम्भवैः ॥ उद्वर्तयेत्सहाम्भोभिर्देवीं स्नेहापनुत्तये ॥ इति ॥ अन्यत्र तु । रजनी सहदेवी च शिरीषं लक्ष्मणापि च ॥ सहभद्रा कुशाग्राणि उद्वर्तनमिदं स्मृतम् ॥ इत्युक्तम् ॥ **अथोष्णोदकस्नानम्** ॥ तच्चोक्तं **स्कान्दे** । वादित्रनिनदै रम्यैर्गीतमङ्गलसंस्तवैः ॥ सह नीराजनाभिश्च स्नपयेदुष्णवारिणा ॥ **इति** ॥ केचिदभ्यङ्गोद्वर्तनोष्णोदक-

स्नानानि महाभिषेकानन्तरमाचरन्ति तन्न युक्तम् ॥ **मन्त्रमहोदधौ** श्रीमच्छङ्कराचार्यकृतदेवीमानसपूजादौ च पञ्चामृतस्नानात्पूर्वमेव तेषामुक्तत्वात् ॥ अथ **पञ्चामृतस्नानानि** भविष्ये । पयोदधिघृतक्षौद्रसिताः पञ्चामृतानि च ॥ एभिस्तु स्नपनं पञ्चामृतस्नानमितीर्यते ॥ इति ॥ **शिवरहस्ये** । ये मेरुमूर्धगतयोगिकृताभिषेकां पञ्चामृतैर्गिरिसुतामभिषेचयन्ति ॥ ते दिव्यकल्पमनुभूय सुवेषरूपं राज्याभिषेकमतुलं पुनराप्नुवन्ति ॥ इति ॥ **देवीपुराणे** । घृतेन पयसा दध्ना स्नपयेच्चण्डिकां नृप ॥ निम्बपत्रैश्च गन्धाढ्यैर्घर्षयेदासमंततः ॥ प्रसन्ना चण्डिका तस्मै दद्याद्दिव्यपदं ध्रुवम् ॥ इतिगव्यत्रयेणैव स्नानमुक्तम् ॥ **दुर्गाभक्तितरङ्गिण्यां** क्षीरादिस्नानानां पृथक्पृथक्फलमुक्तम् ॥ तद्यथा क्षीरेण स्नपयेद्यस्तु श्रद्धाभक्तिसमन्वितः ॥ चण्डिकां विधिवद्वीर शक्रलोके महीयते ॥ स्नपयेद्विधिना यस्तु दध्ना दुर्गां महीपते ॥ राजतेन विमानेन शिवलोकं स गच्छति ॥ घृतेन स्नपयेद्यस्तु तस्य पुण्यफलं शृणु ॥ दशपूर्वान्दशपरानात्मानं च विशेषतः ॥ भवार्णवात्समुद्धृत्य विष्णुलोकं स गच्छति ॥ स्नपयेच्चण्डिकां यस्तु मधुना सितयाथवा ॥ भवन्ति पितरस्तस्य तृप्ता वर्षशतद्वयम् ॥ इति ॥ दध्याद्यलाभे केवलक्षीरेणैकेन स्नपनेऽपि पञ्चामृतस्नपनफलमुक्तं सङ्ग्रहे ॥ मधुदध्नोरलाभेऽपि शर्कराया घृतस्य च ॥ क्षीरस्नानेन चैकेन सर्वं सम्पूर्णतां व्रजेत् ॥ इति ॥ पञ्चामृतस्नानेषु प्रत्यमृतं जलेन स्नपयेत् ॥ वारिणा चान्तरान्तरा इति स्नान**प्रतिष्ठाविधानोक्तेः** स्नानीयगव्यस्य ताम्रपात्रस्थितत्वेऽपि न दोषः ॥ स्नानतर्पणदानेषु ताम्रे गव्यं न दुष्यति ॥ इति त्रिंशन्मते वचनात् ॥ इति **पञ्चामृतस्नानानि** ॥ अथ गन्धोदकस्नानं दुर्गाभक्तितरङ्गिण्याम् ॥ चन्द्रांशुनिर्मलः श्रीमांश्चन्द्रलोके स्नपयित्वा नदीतोयैर्मिश्रैश्चन्दनवारिणा ॥ महीयते ॥ अन्यैरपि सुगन्धिजलैः स्नानान्युक्तानि तत्रैव ॥ सुगन्धिपुष्पतोयेन स्नपयित्वा नरः शिवाम् ॥ नागलोकं समासाद्य क्रीडते नागपत्निभिः ॥

स्नपयेद्यस्तु वै देवीं नरः कर्पूरवारिणा ॥ इन्द्रलोकं समासाद्य क्रीडते त्रिदशैः सह ॥ चण्डिकां स्नपयेद्यस्तु पुरुषोऽगुरुवारिणा ॥ स गच्छति परं स्थानं यत्र सा चण्डिका नृप ॥ इति ॥ **पाद्मे** ॥ चन्दनोशीरकर्पूरकुङ्कुमागुरुवासितैः ॥ अभिषिञ्चति यो दुर्गां जीवन्मुक्तो भवेद्धि सः ॥ इति ॥ अन्यान्यपि स्नानानि तत्रैव ॥ पञ्चगव्येन यो दुर्गां तथैव कुशवारिणा ॥ स्नपयेद्विधिवन्मन्त्रैः स गच्छेद्वैष्णवं पदम् ॥ कपिलापञ्चगव्येन कुशोदकयुतेन च ॥ स्नानं शतगुणं प्रोक्तमितरेभ्यो नराधिप ॥ चाण्डिकां स्नपयेद्यस्तु नर इक्षुरसेन वै ॥ गारुडेन विमानेन विष्णुलोकं स गच्छति ॥ **इति पञ्चामृतादिस्नानानि** ॥ अथाचारादापोहिष्ठेति तिसृभिः शुद्धोदकस्नानं दत्वा गन्धादिपञ्चोपचारैः पूजा कार्या ॥ **अथ महाभिषेकः** ॥ स्कान्दे । वैदिकैस्तान्त्रिकैर्मन्त्रैरभिषिञ्चेच्च देवताः ॥ अक्षतान् गन्धपुष्पे च स्नानतोये त्रयं क्षिपेत् ॥ इत्युक्तम् ॥ तत्राभिषेके पठनीयानि सर्वदेवतासाधारणानि सूक्तानि ॥ **आचारादर्शे** ॥ स्वर्णघर्मानुवाकेन पावमानीभिरेव च ॥ पौरुषेण च सूक्तेन रुद्राध्यायेन चासकृत् ॥ अभिषिञ्चेत्सुरान् सर्वान् स्तुवीयाद्वाघशान्तये ॥ इति ॥ अथ विशेषतो देवीविषये ॥ **श्रीसूक्तकल्पे** ॥ दशवारावर्तितेन सूक्तेनानेन यो नरः ॥ अभिषिञ्चेन्महालक्ष्मीं तस्य श्रीरचला भवेत् ॥ इति ॥ ग्रन्थान्तरे देव्यथर्वशीर्षमुक्तम् ॥ **शान्तिसारे** अहंरुद्रेभिरित्यष्टर्चं देवीसूक्तं च ॥ स्नानकाले घण्टां वादयेत् ॥ तदुक्तं **विष्णुधर्मोत्तरे** । स्नाने धूपे च दीपे च तथा नीराजनेऽपि च ॥ देवाग्रे वादयेद्घण्टां श्रोत्ररुक्प्रविशान्तये ॥ इति ॥ **स्कान्दे** । प्रबोधे मज्जने धूपे दीपनैवेद्ययोस्तथा ॥ नीराजने च कुर्वीत घण्टावादनमादरात् ॥ इति ॥ **गौतमीये** । उत्तोल्य दृष्टिपर्यन्तं घण्टां वामदिशि स्थिताम् ॥ वादयेद्वामहस्तेन दक्षहस्तेन चार्चयेदित्युक्तम् । प्रतिमायन्त्रयोर्नित्यं स्नपनं न कुर्यात् ॥ तदुक्तम् ॥ प्रतिमापट्टयन्त्राणां नित्यं स्नानं न कारयेत् ॥ कारयेत् पर्वदिवसे यदा च

मलधारणम् ॥ इति ॥ (पट्टं कौशेयवस्त्रम्) ॥ अत्र विशेषो **ब्रह्मयामले** । षडङ्गुलाधिके यन्त्रप्रतिमे धातुनिर्मिते ॥ नित्यं न स्नपयेत्प्राज्ञो न तु दोषः शिलामये ॥ इति ॥ तेन षडङ्गुलन्यूनप्रमाणयोर्धातुनिर्मितयोः यथेष्टप्रमाणयोः शिलानिर्मितयोर्यन्त्रप्रतिमयोर्नित्यं स्नपनं कुर्यादिति सिद्धम् ॥ स्नानेन विनाश्यानां लप्यालेख्यादीनां यन्त्रप्रतिमानां जलप्रोक्षणेन स्नपनं कुर्यान्न तु धारापातितजलेन ॥ पार्थिवलिङ्गादौ वस्त्रादिव्यवधानेनाभिषेकः ॥ **इति महाभिषेकः** ॥ अभिषेकानन्तरं धौतशुभ्रवस्त्रेण प्रतिमादेर्जलापनयनं कृत्वा, पीठान्तरे उपवेश्य केशान् संशोष्य धूपयित्वा चूडां बध्वा आचमनं दद्यात् ॥ **अथ वस्त्रम्** ॥ **मन्त्रमहोदधौ** । श्रेष्ठानि देववासांसि पट्टवस्त्राणि सर्वदा ॥ तेषामभावे कार्पासवस्त्राणि प्रयतानि च ॥ इति ॥ (पट्टवस्त्राणि कौशेयवस्त्राणि । प्रयतानि पूतानि, क्षालितशुष्काणीत्यर्थः) पट्टवस्त्राणां नित्यं क्षालननिषेधात् तान्यक्षालितान्येव प्रोक्ष्य दद्यात् ॥ प्रयतानीत्यत्र अप्रहतानीति पाठे अहतानीति तदर्थः । अहतवस्त्रलक्षणमाह **याज्ञवल्क्यः** । ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् ॥ अहतं तत्तु विज्ञेयं सर्वकर्मसु पावनम् ॥ इति ॥ इदं अहतं सन्ध्यादेवपूजादि धर्मकार्योपयोगि ॥ अथ विवाहादिमङ्गलकार्योपयोगि अहतं यथा ॥ अहतं यन्त्रनिर्मुक्तं वासः प्रोक्तं स्वयम्भुवा ॥ शस्तं तन्माङ्गलिक्येषु तावत्कालं न सर्वदा ॥ इति ॥ यन्त्रनिर्मुक्तमित्यनेन प्रथमधारणात् प्रागवस्था लक्ष्यते ॥ अतो विवाहादिषु तादृशवस्त्रपरिधानेन विवाहहोमादिकं क्रियते ॥ अस्य अपर्युषितत्वं **स्मृतिसारावल्याम्** ॥ जलजानां हि सर्वेषां वसनस्याहतस्य च ॥ न पर्युषितदोषोऽस्ति तथा तीर्थजलेषु च ॥ इति ॥ अहतवस्त्रस्यापर्युषितत्वं नाम प्रथमक्षालनात् पूर्वं पुनः पुनर्धारणेऽप्यशुचित्वाभावः ॥ अतएव लोके वाससः प्रथमक्षालनात्पूर्वं शूद्रादिस्पर्शेऽप्यशुचित्वाभावसम्भावना दृश्यते ॥ **भविष्ये** । वस्त्राणि तु विचित्राणि सूक्ष्माणि सुमृदूनि च ॥ यः प्रयच्छति दुर्गायै स गच्छति

शिवालयम् ॥ यावन्तस्तन्तवो वीर तेषु वस्त्रेषु संस्थिताः ॥ तावद्वर्षसहस्राणि शिवेन सह मोदते ॥ इति ॥ रक्तकौशेयकं देव्यै इति **तृचभास्करे** ॥ अथ वर्ज्य**वस्त्राणि यन्त्रमहोदधौ** । सच्छिद्रं मलिनं जीर्णं त्यजेत्तैलादिदूषितम् ॥ इति ॥ अन्यत्र च ॥ दग्धं च ग्रथितं स्यूतं विदीर्णं जीर्णमेव च ॥ नील्याभिरञ्जितं चार्द्रं निर्दशं मलिनं त्यजेत् ॥ इति ॥ **इति वस्त्रम्** ॥ वस्त्रानन्तरमाचमनं दत्वा पादुके दद्यात् ॥ उक्तं च **देवीपुराणे** ॥ पादुकायुग्मदानेन भगवत्यै कृतेन च ॥ वाजपेयफलं प्राप्य स्वर्गलोके महीयते ॥ इति ॥ ततो यागभवनं प्रवेश्य यागपीठे उपवेशयेत् ॥ **अथोपवीतदानमुक्तं स्कान्दे** । सुवर्णरूप्यकौशेयकार्पासादिविनिर्मितम् ॥ त्रिवृतं चोपवीतं तु देवताभ्यो निवेदयेत् ॥ इति ॥ तल्लक्षणमाह **भृगुः** ॥ त्रिवृदूर्ध्ववृतं कुर्यात्तन्तुत्रयमधोवृतम् ॥ त्रिवृतं तूपवीतं स्यात्तत्रैको ग्रन्थिरिष्यते ॥ इति ॥ एतदेव **पारिजाते** विस्तरेणोक्तं देवलेन । शुचौ देशे शुचिः सूत्रं संहताङ्गुलिमूलके ॥ आवर्त्य षण्णवत्या तत् त्रिगुणीकृत्य यत्नतः ॥ अब्लिङ्गैश्च त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं त्रिवृत् ॥ (अब्लिङ्गैस्त्रिभिरापोहिष्ठेति ऋक्त्रयेण) अप्रदक्षिणमावर्त्य सावित्र्या त्रिगुणीकृतम् ॥ ततः प्रदक्षिणं वृत्तं समं स्यान्नवसूत्रकम् ॥ त्रिरावेष्ट्य दृढं बध्वा ब्रह्मविष्ण्वीश्वरान्नमेत् ॥ इति ॥ अस्य ब्रह्मसूत्रं यज्ञसूत्रं यज्ञोपवीतं चेति संज्ञात्रयम् ॥ तत्र ब्रह्मसूत्रयज्ञसूत्रशब्दयोर्निरुक्तिः **स्मृतिप्रकाशे** ॥ सिसृक्षुरेकएवाग्रे समासीनो हरिःस्वयम् ॥ दृष्ट्वा गुणमयीं मायां सूत्ररूपामिवाकरोत् ॥ ज्ञानात्मकेन हरिणा ब्रह्मात्मनि शिवेऽव्यये ॥ तत्सूत्रस्योपवीतत्वात् ब्रह्मसूत्रं विदुर्बुधाः ॥ यज्ञेन चोपवीतत्वाद्यज्ञसूत्रमिति स्मृतम् ॥ अथ यज्ञोपवीतपदव्युत्पत्तिः **स्मृतिसारे** । यज्ञात्मा परमात्मायमुच्यते चैव होतृभिः ॥ उपवीतं यतोऽस्येदं तस्माद्यज्ञोपवीतकम् ॥ इति ॥ अथास्य धारणे गुणा उक्ताः **स्मृतिप्रकाशे** । पवित्रं परमं शुद्धमायुष्यं च शुभावहम ॥ ओजस्यं ब्रह्मवर्चस्यं ब्रह्मसूत्रं धृतं यदि ॥ इति ॥ इदं स्त्रीदैवते न देयमिति

केचित् ।। तदुपेक्ष्यम् ।। पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते ।। अध्यापनं च वेदानां सावित्रीवचनं यथा ।। इति **भगवता यमेन** यदि पूर्वकल्पे सर्वद्विजस्त्रीणां मौञ्जीबन्धनवेदाध्ययनाधिकार उक्तस्तदा का वा विचारणानन्तकल्पपुराणस्य शक्तिरूपब्रह्मणो यज्ञोपवीतधारणे तदनुरोधेन तस्मै तत्समर्पणे च ।। इति **यज्ञोपवीतम्** ।। उपवीतदानानन्तरं तदङ्गत्वेनाचमनं दद्यात् ।। **अथ भूषणानि** ।। **कालिकापुराणे** । किरीट च शिरोरत्नं कुण्डलं च ललन्तिकाम् ।। हारकेयूरवलयमेखलानूपुरादिकम् ।। यथार्हन्तु प्रदातव्यं देवताभ्यो विभूषणम् ।। देयं तत्रोर्ध्वकाये तु सर्वं सौवर्णमेव च ।। अधः काये तु दातव्यं सौवर्णं राजतं तथा ।। रत्नमुक्तादिघटितान् सर्वाङ्गेष्वपि चार्पयेत् ।। इति ।। **दुर्गाभक्तितरङ्गिण्याम्** । नानालङ्कारदाने नानाफलान्युक्त्वान्ते, सुवर्णतिलकं यस्तु भगवत्यै प्रयच्छति ।। स याति परमं स्थानं यत्र सा परमा कला ।। सौवर्णे राजते वापि चक्षुषी यः प्रयच्छति ।। गोसहस्रफलं प्राप्य सूर्यलोके महीयते ।। इत्युक्तम् ।। (गोसहस्रफलं गोसहस्रदानफलम् ।) इति **भूषणानि** ।। **अथादर्शदानं देवीपुराणे** ।। यो नगे रत्नमुकुरं महादेव्यै प्रयच्छति ।। स कुबेरपुरस्त्रीणां शमयेन्मान्मथं मदम् ।। **इत्यादर्शः** ।। **अथ गन्धाः** ।। **पाद्मे** ।। गन्धा नानाविधा देया देवेभ्यो भूतिमिच्छता ।। गन्धेषु चन्दनं श्रेष्ठं कुङ्कुमं तु ततो वरम् ।। कुङ्कुमादपि च श्रेष्ठा कस्तूरी देववल्लभा । इति।। **दुर्गाभक्तितरङ्गिण्याम्** ।। सुगन्धिना चन्दनेन दुर्गां यस्तु समालभेत् । कुङ्कुमेनाथवा मर्त्यो गोसहस्रफल लभेत् ।। (समालभेल्लिम्पेत् ।) विलिप्य कृष्णागुरुणा वाजपेयफलं लभेत् ।। कस्तूरीलेपनं कृत्वा ज्योतिष्टोमफलं लभेत् ।। इति **देवीपुराणे** ।। चन्दनागुरुकस्तूरीकर्पूरैर्यो विलेपयेत् ।। संवत्सरशतं दिव्यं देव्यासन्ने वसेत् ध्रुवम् ।। चन्दनागुरुकर्पूरैः श्लक्ष्णपिष्टैः सकुङ्कुमैः ।। दुर्गामालिप्य विधिवत् कल्पकोटिं वसेद्दिवि ।। मदकर्पूरकाश्मीररोचनाख्यचतुष्टयम् ।। एतेन लेपयेद्देवीं तथा गन्धाष्टकेन च ।। इति ।। शक्तेर्गन्धाष्टकमुक्तं

शारदातिलके ॥ चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः ॥ जटामांसी मुरं चैव शक्तेर्गन्धाष्टकं मतम् ॥ इति तत्रैव ॥ यक्षकर्दमकल्केन यस्तु दुर्गां विलेपयेत् ॥ नाशयेत् सर्वपापानि कोटिजन्मार्जितान्यपि ॥ इति ॥ कर्पूरागुरुकस्तूरीकङ्कोलैर्यक्षकर्दमः ॥ इति **यक्षकर्दमलक्षणम्** ॥ **व्याडिस्तु** एषु कुङ्कुममधिकं चाह ॥ ताम्रे गव्यं चन्दनं च निहितं दूषितं भवेत् इत्युक्तेश्चन्दनं ताम्रपात्रे न स्थापयेत् ॥ अथ गन्धार्पणविधि**र्मन्त्रमहोदधौ** ॥ कनिष्ठया पात्रसंस्थं देवेभ्यो गन्धमर्पयेत् ॥ ततः कनिष्ठाङ्गुष्ठाभ्यां गन्धमुद्रां प्रदर्शयेत् ॥ इति ॥ **गन्धमुद्रा** यथा। अङ्गुष्ठाग्रे तु संश्लिष्टे कनिष्ठामूलयोर्यदि ॥ गन्धमुद्रा तु विज्ञेयेति ॥ ग्रन्थान्तरे अनामिका तु देवानां पितृणां तर्जनी मता ॥ गन्धदाने विशेषेण मनुष्याणां तु मध्यमा ॥ इत्युक्तम् ॥ **इति गन्धाः** ॥ अथ **हरिद्राकुङ्कुमादिदानं देवीपुराणे** ॥ हरिद्रां कुङ्कुमं चैव कज्जलं नागसम्भवम् ॥ समर्पयेन्महादेव्यै सद्भार्यासुखमिच्छता ॥ प्रदद्यात् कुङ्कुमं भाले हरिद्रां गण्डयोर्युगे ॥ कज्जलं नेत्रयोर्देयं सीमन्ते नागसम्भवम् ॥ इति **हरिद्राकुङ्कुमादि** ॥ **अथाक्षताः** ॥ स्कान्दे । अक्षतैरर्चयेद्देवान् शालग्रामशिलां विना ॥ अक्षतं जायते तेन सर्वदा देवतार्चनम् ॥ इति ॥ **पदार्थादर्शे** ॥ अक्षतास्तु यवाः प्रोक्ता अक्षतास्तन्दुलास्तथा ॥ यवाः पित्र्ये समुद्दिष्टास्तदन्यत्र तु तण्डुलाः ॥ इति ॥ **शिवार्चनचन्द्रिकायाम्** ॥ अखण्डास्तण्डुला धौता अक्षताः परिकीर्तिताः ॥ श्वेताः शम्भौ तदन्यत्र कुङ्कुमाक्ताः स्मृता बुधैः ॥ इति ॥ विभवे रत्नमुक्ताद्यैरक्षतैरर्चयेत् सुरान् ॥ इति पाद्मे ॥ **इत्यक्षताः** ॥ अथ **व्रतग्रन्थेष्वङ्गविशेषपूजा** चोक्ता। तेऽङ्गविशेषा यथा ॥ पादौ जङ्घे च जानूरु कटी मध्यम एव च ॥ वलित्रयं नाभिदेश उदरं हृदयं तथा ॥ (जानूरु इति समाहारद्वन्द्वः। जानुनी उरू चेत्यर्थः ।) स्तनौ भुजौ करौ ग्रीवा कण्ठो वदनमेव च ॥ ओष्ठौ दशनपङ्क्ती च कपोलौ नासिके तथा ॥ नेत्रे कर्णौ ललाटं च शिरः सर्वाङ्गमेव च ॥ इति ॥ अत्र सम्प्रदायाच्चतुर्थी

नमोऽन्तदेवीनामान्ते द्वितीयान्तमवयवनामोच्चार्य पूजयामीति वदेत् ॥ यथा ॥ अमुकस्यै नमः अमुकं पूजयामीति ॥ एतत्पूजायां देवीनामानि प्रयोगे वक्ष्यन्ते ॥ **इत्यङ्गपूजा** ॥ **अथ लोकमोहनाख्यपूजा प्रपञ्चसारे** ॥ वर्णैर्मनुप्रपुटितैः क्रमशः शतार्धैर्न्यासक्रमादभियजेदथ देवतानाम् ॥ अङ्गानि गन्धकुसुमाक्षतसञ्चयेन त्रैलोक्यमोहनकरः प्रथितः प्रयोगः ॥ इति ॥ शतार्धैरिति स्थूलमानेनोक्तम् ॥ वस्तुतस्त्वेकपञ्चाशद्वर्णैः । ' न्यासक्रमात्सृष्टिन्यासक्रमेणेत्यर्थः ।) अत्रेत्थमाकारकः प्रयोगः ॥ आदौ मूलमन्त्रः ॥ तत एकैकं मातृकाक्षरम् '। पुनर्मूलमन्त्रः । ततः षष्ठ्यन्तं देवतानाम । ततो द्वितीयान्तमङ्गनाम । अन्ते पूजयामि इति ॥ **तन्त्रान्तरे** आदावनुलोमं मूलम् । अन्ते विलोममितिविशेष उक्तः ॥ **मन्त्रमहोदधौ** तु मूलमन्त्रेण पुटितमेकैकं मातृकाक्षरम् ॥ विन्यसेद्देवताङ्गेषु योगोऽयं लोकमोहनः ॥ इति देवताङ्गेषु मूलसम्पुटितमातृकान्यास एवोक्तः ॥ केचिदिदं पूजाद्वयं पुष्पविशेषपूजानन्तरं कुर्वन्ति ॥ **इति लोकमोहनाख्यमातृकापूजा** ॥ **अथ पत्रपूजा** ॥ तत्र पत्राणि **महोदधौ** । तुलसी बकुलं चैव पङ्कजं भृङ्गराजकम् ॥ बिल्वापामार्गदमनास्तथा कुरबकः कुशः ॥ दूर्वाहिवल्ल्यपामार्गविष्णुक्रान्ता मुनिद्रुमाः ॥ धात्रीयुतानामेतेषां पत्रैः कुर्यात्सुरार्चनम् ॥ इति ॥ **स्कान्दे** ॥ पत्रे श्रेष्ठस्त्वपामार्गो भृङ्गराजस्ततोऽधिकः ॥ धात्रीपत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम् ॥ तस्माद्दूर्वादलं श्रेष्ठं शमीपत्रं ततोऽधिकम् ॥ तस्माद्दमनकं श्रेष्ठं ततो बिल्वदलं शुभम् । ततोऽपि तुलसी श्रेष्ठा न तुलस्यास्तु किञ्चन ॥ इति विशेषउक्तः ॥ अथ बिल्वविषये **देवीपुराणे** । बिल्वपत्रैरखण्डैर्यः सकृद्देवीं प्रपूजयेत् ॥ सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात् ॥ सुवर्णस्य सुवर्णानां शते दत्ते तु यत्फलम् ॥ माल्येन बिल्वपत्राणां देव्यै दत्तेन तत्फलम् ॥ इति ॥ (प्रथमं सुवर्णपदं हेमवाचकम् ॥ द्वितीयं कर्षवाचकम् ॥) **आचारेन्दौ ज्ञानमालायाम्** ॥ अर्पितान्यपि बिल्वानि

प्रक्षाल्य च पुनः पुनः ॥ देवताभ्योऽर्पणीयानि नवानि यदि न क्वचित् ॥ इति ॥ **स्कान्दे** ॥ खण्डितान्यपि शीर्णानि शुष्काण्यपि च पार्थिव ॥ पक्वान्यपि च देयानि लभ्यन्ते यादृशान्यपि ॥ इति ॥ बिल्वपत्राभावे तत्प्रतिनिधिर्भविष्ये । तुलसी चैव निर्गुण्डी जम्बीरामलके तथा ॥ बिल्वपत्रसमानि स्युर्यदि बिल्वं न लभ्यते ॥ इति ॥ तुलसीविषये विशेषो **हेमाद्रौ** । तुलस्या मञ्जरी श्रेष्ठा तदभावे तु पल्लवाः ॥ तदभावे तु पत्राणि पक्वान्यपि न वर्जयेत् ॥ इति ॥ अथ **तुलसीग्रहणे निषिद्धकालः स्मृतिसारे** ॥ वैधृतौ च व्यतीपाते भौमभार्गवभानुषु ॥ पर्वद्वये च सङ्क्रान्तौ द्वादश्यां सूतकद्वये ॥ तुलसीं ये विचिन्वन्ति ते छिन्दन्ति हरेः शिरः ॥ इति ॥ **विष्णुधर्मोत्तरे** । रविवारं विना दूर्वां तुलसीं द्वादशीं विना ॥ जीवितस्याविनाशाय प्रविचिन्वीत धर्मवित् ॥ इति ॥ तत्रैव । सङ्क्रातावर्कपक्षान्ते द्वादश्यां निशिसन्ध्ययोः ॥ यैश्छिन्नं तुलसीपत्रं तैश्छिन्नं हि हरेः शिरः ॥ इति ॥ **पाद्मे** । द्वादश्यां तुलसीपत्रं धात्रीपत्रं च कार्तिके ॥ लुनाति स नरो गच्छेन्निरयानतिगर्हितान् ॥ इति ॥ तुलसीग्रहणमन्त्रश्च तत्रैव । तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये ॥ केशवार्थं विचिन्वामि वरदा भव शोभने ॥ इति ॥ (विचिन्वामीत्यार्षःप्रयोगः)। अथ **पुष्पाणि** ॥ तत्रादौ सर्वदेवानां विहितानि पुष्पाणि ॥ **भविष्ये** । शमी जाती कुशाः कुन्दं मल्लिका करवीरकम् ॥ नागपुन्नागकाशोकरक्तनीलोत्पलानि च ॥ चम्पकं बकुलं चैव पद्मं बिल्वदलं तथा ॥ अगस्तिपारिजातानि किंशुकस्य सुमानि च ॥ एतानि सर्वदेवानां पुष्पाणि विहितानि च ॥ इति ॥ **अथ विशेषतो देव्या विहितानि** बकुलं यूथिका जाती केतकी च तिमुक्तकम् ॥ तगरं सिन्दुवारं च कुन्दपुन्नागमल्लिकाः ॥ मालती सहकारश्च कुसुम्भं नागकेसरम् ॥ करवीरं जपा द्रोणं पद्मं देव्याः प्रियाणि च ॥ इति ॥ **अथ विहितप्रतिषिद्धत्वात् देव्या विकल्पितानि** ॥ जयः काशः श्वेतपद्मं श्वेतमन्दारकं तथा ॥ अगस्त्यं

तिलकं बाणं पाटलं दूर्वया सह ॥ इति ॥ **अथ सामान्यतः सर्वदेवानां निषिद्धानि पत्रपुष्पाणि** ॥ उग्रगन्धमगन्धं वा कृमिकेशादिदूषितम् ॥ निर्माल्येन च संसृष्टं नखच्छिन्नं च वर्जयेत् ॥ मलिनं तनुसंसृष्टमाघ्रातं च विकासितम् ॥ वस्त्रबद्धं शीर्षधृतं दुष्टानीतं च वर्जयेत् ॥ (विकासितं बलाद्विकासं नीतम्) देवोपरि धृतं यच्च वामहस्ते धृतं च यत् ॥ अधोवस्त्रगतं यच्च जलान्तःक्षालितं च यत् ॥ एरण्डपत्रेणानीतं पत्रं पुष्पं च वर्जयेत् ॥ स्वयंपतितपुष्पं च शीर्णं पर्युषितं च यत् ॥ शूद्रानीतं क्रयक्रीतं पत्रं पुष्पं च वर्जयेत् ॥ चम्पकं कमलं त्यक्त्वा कलिकां वर्जयेद्बुधः ॥ मालाकारानीतानि लक्षपूजाद्यर्थं क्रयक्रीतानि च पत्रपुष्पाणि न वर्ज्यानीति केचिदिति धर्माब्धिसारे ॥ **इति वर्ज्यपत्रपुष्पाणि ॥ अथ पत्रपुष्पादीनामपर्युषितत्वदिनसङ्ख्या** ॥ तत्र **बोपदेवः** ॥ बिल्वापामार्गजाती तुलसिशमिशताकेतकीभृङ्गदूर्वा । मन्दाम्भोजाहिदर्भा मुनितिलतगरब्रह्मकल्हारमल्ल्यः ॥ चम्पाश्वारातिकुम्भीदमनमरुबकाबिल्वतोऽहानि शस्तास्त्रिंशत् ऽयेकार्यरीशोदधिनिधिवसुभूभूयमाभूय एवम् ॥ इति ॥ अत्र चतुर्विंशतिपत्रपुष्पाणां अपर्युषितत्वदिनसङ्ख्योक्ता ॥ तत्र प्रथमं बिल्वाद्यहिपर्यन्तानां द्वादशानां क्रमेण त्रिंशदादियमान्ता दिनसङ्ख्योक्ता ॥ पुनः भूय एवामित्यनेन सैव क्रमेण दर्भादिमरुबकान्तानां द्वादशानां चोक्ता ॥ तुलसिशमिपदे छन्दोऽनुरोधात् ह्रस्वान्ते । शताभृङ्गमन्दशब्दाः शतावरीभृङ्गराजमन्दराणां नामैकदेशाः ॥ अहिर्नागकेसरः । मुनिरगस्त्यः । ब्रह्मा पलाशः । अश्वारातिः करवीरः ॥ अरयः षट् । ईशा एकादश । उदधयश्चत्वारः ॥ निधयो नव । वसवोऽष्टौ । भूरेकः । यमौ द्वौ । अर्यरीशा इत्यत्र अरि, अरि, ईशा इति च्छेदः ॥ (अपर्यु-
शेषं सुगमम् ॥ **भविष्ये** । प्रहरं तिष्ठते जातीकरवीरमहर्निशम् ॥
षितत्वेनेति शेषः ।) **स्कान्दे** ॥ पञ्चाहं बिल्वपत्रं तु दशाहं तुलसीदलम् ॥ न स्यात् पर्युषितं राजंस्ततः पर्युषितं भवेत् ॥ इत्युक्तम् ॥ तुलसी तु सदा

शुद्धा बिल्वं तु त्रिदिनावधि ॥ इति **पाद्मे** ॥ षण्मासं बिल्वपत्रं तु न स्यात्पर्युषितं द्विज ॥ इति **भविष्ये** ॥ **तिथितत्त्वे मात्स्ये** । बिल्वपत्रं च माध्यं च तमालामलकीदले ॥ कह्लारं तुलसी चैव पद्मं च मुनिपुष्पकम् ॥ एतत्पर्युषितं न स्यात् कुशाश्च कलिकास्तथा ॥ इति ॥ **कौर्मे** । तुलस्यां बिल्वपत्रे च सर्वेषु जलजेषु च ॥ न पर्युषितदोषोऽस्ति तथा भागीरथीजले ॥ इति ॥ **शिवरहस्ये** । सुवर्णं बिल्वपत्रं च रत्नं च रजतं तथा ॥ नहि पर्युषितं यस्माच्छुद्धमेव ततः सदा ॥ इति ॥ **स्मृतिसारावल्याम्** ॥ जलजानां च सर्वेषां वसनस्याहतस्य च ॥ न पर्युषितदोषोऽस्ति तथा तीर्थजलेषु च ॥ इति ॥ **इति पत्रपुष्पादीनामपर्युषितत्वकालविचारः** ॥

अथैतदर्पणप्रकारः **फेत्कारिणीतन्त्रे** । पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम् ॥ दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पयेत् ॥ इति ॥ **पाद्मे** ॥ पत्रं पुष्पं फलं चैव न च दद्यादधोमुखम् ॥ यथोत्पन्नं तथा दद्यान्न दोषः कुसुमाञ्जलौ ॥ इति ॥ पत्रं त्वधोमुखं नेष्टं तुलसीबिल्ववर्जितम् ॥ इति **वाराहोक्तेः**स्तुलसीबिल्वपत्रयोरधोमुखत्वेनार्पणमनुज्ञातं भवति ॥ दूर्वा स्वाभिमुखाग्राः स्युर्बिल्वपत्त्रमधोमुखमिति **तृचभास्करे** ॥ **शिवरहस्ये** । वामपत्रे स्थितो ब्रह्मा पद्मनाभस्तु दक्षिणे ॥ मध्यपत्रे स्थितः साक्षात् साम्बः सर्वार्थसाधकः ॥ इन्द्रादयो लोकपाला वृन्ताग्रे समुपस्थिताः ॥ पृष्ठभागे स्थिता यक्षा अभक्तानां निषेधकाः ॥ पूर्वभागेऽमृतं न्यस्तं देवैर्ब्रह्मादिभिः पुरा ॥ तस्माद्वै पूर्वभागेन पूजयेद्गिरिजेश्वरौ ॥ इति ॥ पुनस्तत्रैव । बिल्वपत्त्रमनुत्तानमुदगग्रं जलान्वितम् ॥ दण्डाधो मणिना हीनं प्रदद्याच्छुभदं हितम् ॥ इत्युक्तम् ॥ बिल्वं स्वाभिमुखाग्रं न्युब्जमर्पयेदिति **धर्माब्धिसारे** ॥ **अथार्पणविधिः** । **कौर्मे** । ध्यात्वा प्रणवपूर्वं तु देवतां सुसमाहितः ॥ नमस्कारेण पुष्पाणि विन्यसेद्वै पृथक् पृथक् ॥ (देवतां ध्यात्वा प्रणवपूर्वं नमस्कारेण सहैकैकं पुष्पाद्यर्पयेदित्यर्थः ।) **फेत्कारिणीतन्त्रे** । लक्षपुष्पादिपूजासु

पुष्पमेकैकमर्पयेत् ॥ समुदायेनार्पणे तु लक्षपुष्पार्चनं न तत् ॥ इत्युक्तम् ॥ **भविष्ये** । मध्यमानामिकाङ्गुष्ठैः पुष्पं सङ्गृह्य पूजयेत् ॥ अङ्गुष्ठतर्जन्यग्राभ्यां निर्माल्यमपनोदयेत् ॥ इति ॥ अत्र वचनत्रये पुष्पपदं पत्राणामप्युपलक्षकम् ॥ पुष्पसमर्पणान्ते, तर्जन्यङ्गुष्ठाग्रयोगेन पुष्पमुद्रां प्रदर्शयेत् ॥ पुष्पमुद्रा यथा । पुष्पमुद्रा तु सा यदि ॥ अङ्गुष्ठमूलयोस्तर्जन्यग्रयोर्योजनं भवेत् ॥ इति ॥ **इति सामान्येन पत्रपुष्पपूजा** ॥ अथ **व्रतग्रन्थेषु** सामान्यपत्रपूजान्ते पत्रविशेषैः, पुष्पपूजान्ते च पुष्पविशेषैश्च पूजोक्ता ॥ ते पत्रविशेषा यथा । शम्यपामार्गतुलसीभृङ्गराड्दमनाः कुशः ॥ धात्री मरुबकं बिल्वं देव्याः पत्रगणः प्रियः ॥ इति ॥ एतेषामर्पणे पृथङ्नवनामानि प्रयोगे वक्ष्यन्ते ॥ **इति पत्रविशेषैः पूजा** ॥ अथ पुष्पपूजानन्तरं पुष्पविशेषैः पूजापि तत्रैवोक्ता ते पुष्पविशेषा यथा ॥ केतकी यूथिका कुन्दं चम्पकं बकुलं तथा ॥ मल्लिका मालती द्रोणं पद्मं देव्याः प्रियाणि च ॥ इति ॥ अत्रापि देव्या नवनामानि प्रयोगे वक्ष्यन्ते ॥ इति पुष्पविशेषपूजा ॥ **अथ शतसहस्रादिनामपूजा** ॥ सा च शतनामभिर्वा सहस्रनामभिर्वा बिल्वतुलसीपुष्परक्ताक्षतान्यतमद्रव्यसमर्पणरूपा ॥ तत्र शतनामानि प्रयोगे वक्ष्यन्ते । सहस्रनामपक्षे दुर्गा चण्डिका भवानी ललिता महालक्ष्म्यन्यतमदेवतासहस्रनामभिः कार्या ॥ इति शतसहस्रादिनामपूजा ॥ **अथावरणदेवतापूजा** ॥ तत्रावरणानि नव ॥ आद्यं यन्त्रस्य त्रिकोणाद्बहिरन्तराले । द्वितीयतृतीये षट्कोणचक्रस्य कोणानां मूलाग्रभागयोः । चतुर्थपञ्चमषष्ठानि अष्टदलकमलस्य दलानां मूलमध्याग्रेषु सप्तमं अष्टदलकमलाद्बहिरन्तराले अष्टमं भूपुरस्य प्रथमद्वितीयरेषयोरन्तराले । नवमं तस्यैव द्वितीयतृतीयरेषयोरन्तराले ॥ पूज्यदेवताया महालक्ष्म्याः प्रकृतिविकृतिभेदेन द्वैविध्यात्तत्प्रयुक्तः प्रथमावरणमात्रे किञ्चिद्भेदः ॥ द्वितीयाद्यावरणान्युभयसाधारणानि ॥ तत्र प्रकृतिभूतचतुर्भुजमहालक्ष्म्याः प्रथमावरणं **वैकृतरहस्ये** ॥ महालक्ष्मीर्यदा

पूज्या महाकाली सरस्वती ॥ दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ॥ विरिञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ॥ वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम् ॥ अष्टादशभुजा मध्ये वामे चास्या दशानना ॥ दक्षिणेऽष्टभुजा ॥ इति ॥ अत्र प्रथमश्लोके दक्षिणोत्तरयोरित्यनेन विशेषानुक्तेः कर्तुः पूजकस्य दक्षिणवामभागौ ग्राह्यौ तेन पूजकस्य सम्मुखं त्रिकोणे स्थितायाः महालक्ष्म्या वामभागे चतुर्भुजा महाकाली दक्षिणभागे च चतुर्भुजा महासरस्वती पूज्येत्युक्तं भवति ॥ द्वितीयश्लोके मिथुनत्रयपूजायामपि दक्षिणवामभागौ विशेषानुक्तेः कर्तुः पूजकस्यैव ग्राह्यौ ॥ तत्र मध्ये अर्थान्महालक्ष्म्याः पृष्ठे तत्पुत्रस्नुषयोर्विरिञ्चिस्वरयोर्मिथुनम् ॥ पूजकस्य दक्षिणे अर्थान्महाकाल्याः पृष्ठे तत्पुत्रस्नुषयोरुद्रगौर्योर्मिथुनम् ॥ पूजकस्य वामे अर्थान्महासरस्वत्याः पृष्ठे तत्पुत्रस्नुषयोर्विष्णुलक्ष्म्योर्मिथुनम् ॥ तत्रापि विरिञ्चेर्वामभागे स्वरा ॥ रुद्रस्य गौरी ॥ विष्णोर्वामे लक्ष्मीरिति ज्ञेयम् । तृतीयश्लोके महालक्ष्म्याः पुरतोऽष्टादशभुजादिविकृतीनां पूजोक्ता । तत्र मध्ये अर्थान्महालक्ष्म्याः पुरोऽष्टादशभुजा ॥ अष्टादशभुजाया वामभागेऽर्थान्महाकाल्याः पुरो दशानना । दक्षभागेऽर्थान्महासरस्वत्याः पुरतोऽष्टभुजेति तत्तद्विकृतयः पूज्याः ॥ एवं च तत्तत्प्रकृतीनां पृष्ठे तत्पुत्रमिथुनानां, पुरतस्तद्विकृतीनां चेत्येकैकस्यामूर्ध्वाधोधारायां स्वस्वसम्बन्धिवर्गस्य स्थितिर्भवति ॥ केचिन्महालक्ष्मीर्यदा पूज्येतिश्लोके दक्षिणोत्तरयोरित्येतन्महालक्ष्मीदक्षवामभागपरत्वेन, तथा विरिञ्चिः स्वरया मध्ये इति श्लोके दक्षिणे वामे इति पदे विरिञ्चिमिथुनस्य दक्षिणवामभागपरत्वेन गृहीत्वा महालक्ष्मीदक्षभागे महाकाल्या, वामभागे च महासरस्वत्याः, तथा विरिञ्चिमिथुनस्य दक्षिणे रुद्रमिथुनस्य वामभागे च विष्णुमिथुनस्य पूजामिच्छन्ति । तन्न युक्तम् ॥ महाकालीमहासरस्वत्योः प्रकृत्योः सम्बन्धिवर्गस्य स्वप्रकृतिभिन्नधारावस्थानप्रसङ्गात् ॥ एवमेकादशदेवताकमिदमावरणम् ॥ **अथ विकृत्यात्मका-**

ष्टादशभुजमहालक्ष्म्याः प्रथमावरणमपि तत्रैव ॥ अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥ दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ इति ॥ अत्रापि दक्षिणोत्तरयोरित्येतत्प्रागग्रपूजकस्य दक्षवामभागपरं तेन तत्सम्मुखावस्थिताया अष्टादशभुजाया वामे दशानना दक्षिणेऽष्टभुजेत्यर्थात्सिद्धम् ॥ अत्रापि दक्षिणोत्तरयोरित्येतदष्टादशभुजादक्षवामभागपरत्वेनेच्छन्ति केचित् । तत् अष्टादशभुजामध्ये वामे चास्या दशाननेति पूर्वोक्तवचनविरोधादुपेक्ष्यम् ॥ अत्रापि प्रकृतिविकृतीनामभेददृष्ट्या अष्टादशभुजादीनां पश्चाद्भागे प्रग्रन्मिथुनत्रयपूजामिच्छन्ति बहवः ॥ तेनाष्टादशभुजायाः पृष्ठे स्वराविरिञ्च्योर्मिथुनम् ॥ दशाननायाः पृष्ठे गौरीरुद्रयोः । अष्टभुजायाः पृष्ठे लक्ष्मीहृषीकेशयोर्मिथुनं पूज्यम् ॥ अष्टादशभुजायाः पुरतो वामे महिषासुरं दक्षिणे सिंहं च पूजयेत् ॥ तदप्युक्तं तत्र ॥ । वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥ पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥ दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥ वाहनं पूजयेद्देव्या धृतं येन चराचरम् ॥ इति ॥ एवं दशदेवताकमिदमावरणम् ॥ केचित् प्रत्यावरणं । दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ॥ भक्त्या समर्पये तुभ्यमिदमावरणार्चनम् ॥ इति श्लोकमिदं पदस्थाने तत्तदावरणसङ्ख्याबोधकप्रथमद्वितीयादिपदोहं कृत्वा पठन्ति ॥ केचित्प्रथमार्धस्थाने अभीष्टसिद्धिं मे देहि शरणागतवत्सले इत्यर्धं पठन्ति ॥ **इति प्रथमावरणम्** ॥ द्वितीयाद्यावरणानि प्रकृतिविकृत्युभयसाधारणानि ॥ तत्र षट्कोणचक्रस्य कोणमूलेषु द्वितीयं षडङ्गावरणम् ॥ षट्कोणकोणमूलेषु षडङ्गावरणं मतम् ॥ हृदयाय नमश्चेति स्वाहान्तं शिरसे पदम् ॥ वषडन्तं शिखायै च कवचाय हुमित्यपि ॥ नेत्रत्रयाय वौषट् स्यादस्त्राय फडितीरितम् ॥ अग्निराक्षसवायव्यकोणेषु हृदयं शिरः ॥ शिखां कवचमाराध्य प्राच्यां नेत्रं प्रपूजवेत् ॥ अस्त्रं प्रतीच्यां देव्यस्ता ध्यातव्या वामलोचनाः ॥ इति ॥ (वामलोचनाः स्त्रीरूपाः) । **कल्पवल्ल्यां** अग्नि-

कोणे हृदयम् ॥ ईशानकोणे शिरः । नैर्ऋतकोणे शिखा । वायुकोणे कवचम् । पुरतो नेत्रम् । चतुर्दिक्ष्वस्त्रमित्युक्तम् ॥ ऐं हृदयाय नमः हृदयदेव्यै नमः । ह्रीं शिरसे स्वाहा शिरोदेव्यै नमः । क्लीं शिखायै वषट् शिखादेव्यै नमः ॥ इत्यादिस्तत्प्रयोगः ॥ अन्ये ऐं हृदयदेव्यै नमः । ह्रीं शिरोदेव्यै नमः । एवं रूपं, इतरे ऐं हृदयाय नमः । ह्रीं शिरसे स्वाहा एवं रूपमेव तत्प्रयोगमाहुः ॥ क्वचित् ऐंह्रींक्लीं हृदयाय नमः । ऐंह्रीं क्लीं शिरसे स्वाहेति बीजत्रयपूर्वकः क्वचित्समस्तमन्त्रपूर्वकोऽपि तत्प्रयोगो दृश्यते ॥ यद्यपि **प्रपञ्चसारे,** आदावङ्गावरणं सकलविधानेषु पूजनीयं स्यात् ॥ अन्ते च लोकपालावृतिरथकुलिशादिशस्त्ररूपा वा ॥ इति षडङ्गावरणस्य सर्वादित्वमुक्तम् । तथाप्यत्र महालक्ष्मी यदा पूज्येत्यादिवचनेषु दक्षिणोत्तरयोः, पृष्ठतः पुरतः वामे दक्षिणे इत्याद्यासन्नस्थानबोधकप्रयोगेण महाकाल्यादिदेवतानां सर्वापेक्षया प्रधानदैवताऽव्यवहितसान्निध्यस्य विवक्षितत्वदर्शनात् सर्वग्रन्थेषु महाकाल्याद्यावरणस्यैव प्राथम्येनोक्तत्वाच्चात्र षडङ्गावरणं द्वितीयत्वेन स्वीकृतम् ॥ **इति द्वितीयावरणम्** ॥ एतदारभ्यावरणषट्के स्वपुरोभागं प्राचीं प्रकल्प्य तदनुरोधेन प्रदक्षिणमन्या दिशः कल्पनीयाः ॥ दिक्पालतदस्त्रावरणयोस्तु प्रसिद्धा एव प्राच्यादयः ॥ तदुक्तं **तन्त्रराजे** । पीठावरणपूजासु स्वाग्रं प्राचीं प्रकल्पयेत् ॥ अनुरुध्य च तामन्या दिशो ज्ञेयाः प्रदक्षिणम् ॥ दिक्पालेषु तदस्त्रेषु लोकसिद्धा दिशो मता ॥ इति ॥ **अथ षट्कोणचक्रकोणाग्रेषु तृतीयं नन्दजाद्यावरणम्** ॥ कोणाग्रेषु तृतीया च नन्दजाद्यावृतिर्मता ॥ नन्दजा रक्तदन्ती च तथा शाकम्भरी स्मृता ॥ दुर्गा भीमा भ्रामरी च षट्कं प्रागादिषु क्रमात् ॥ **इति तृतीयावरणम्** ॥ **अथाष्टदलकमलदलमूलेषु चतुर्थं ब्राह्म्यादि मातृकावरणम्** ॥ अष्टाब्जदलमूलेषु चतुर्थावरणम् मतम् ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही नारसिंह्यैन्द्री चामुण्डा शिवदूतिका ॥ दलेषु सप्तस्वेकैकामष्टमेऽन्त्याद्वयं यजेत् ॥

एवं पञ्चमषष्ठावरणयोरपि ज्ञेयम् ॥ **इति चतुर्थावरणम्** ॥ **अथाष्टदलकमलदलमध्येषु कुमार्याद्यावरणम्** ॥ अब्जाष्टदलमध्येषु पञ्चमावरणं मतम् ॥ कुमारी च त्रिमूर्तिश्च कल्याणी रोहिणी तथा ॥ काली चण्डी शाम्भवी च दुर्गा भद्रा नव स्मृताः ॥ **इति पञ्चमावरणम्** ॥ **अथ दलाग्रेषु षष्ठं नवदुर्गावरणम्** ॥ अब्जस्याष्टदलाग्रेषु षष्ठी पूर्ववदावृतिः ॥ नवदुर्गात्मिका शैलपुत्री च ब्रह्मचारिणी ॥ चन्द्रघण्टा च कूष्माण्डा स्कन्दमाता ततः परम् ॥ कात्यायनी कालरात्रिर्महागौरी च सिद्धिदा ॥ **इति षष्ठावरणम्** ॥ **अथाष्टदलाद्बहिरन्तराले सप्तमावरणं मतम्** ॥ असिताङ्गो रुरुश्चण्डः क्रोधी चोन्मत्त एव च ॥ कपाली भीषणश्चैव संहारीत्यष्टभैरवाः ॥ **इति सप्तमावरणम् ॥ अथ भूपुरस्य प्रथमकोष्ठेऽष्टमं दिक्पालावरणम्** आद्यद्वितीययोर्मध्ये रेषयोर्भूपुरस्य तु ॥ प्रागादिषु प्रसिद्धासु दिक्पालावृतिरष्टमी ॥ इन्द्रो वह्निर्यमश्चैव निर्ऋतिर्वरुणो मरुत् ॥ श्रीदो महेश्वरश्चेति दिक्पाला अष्ट वै स्मृताः ॥ इति दशदिक्पालपक्षे ईशानेन्द्रयोर्मध्ये ब्रह्मा, नैर्ऋतवरुणयोर्मध्येऽनन्तश्च पूजनीयौ ॥ **इत्यष्टमावरणम् ॥ अथ भूपुरस्य द्वितीयकोष्ठे नवमं दिक्पालास्त्रावरणम्** ॥ नवमी भूपुरस्याथ स्याद्द्वितीयतृतीययोः ॥ रेषयोरन्तराले तु कुलिशाद्यायुधावृतिः ॥ वज्रं शक्तिश्च दण्डश्च खड्गः पाशोऽङ्कुशस्तथा ॥ गदा त्रिशूलमित्यष्टौ दिक्पालास्त्राणि पूर्ववत् ॥ (पूर्ववत्प्रसिद्धास्वेव प्राच्यादिषु पूज्यानीत्यर्थः ।) दशदिक्पालपक्षे तदस्त्राण्यपि दशैव ॥ तत्र त्रिशूलवज्रयोर्मध्ये ब्रह्मणः पृष्ठदेशे पद्मं, खड्गपाशयोर्मध्येऽनन्तस्य पृष्ठे चक्रं च पूजनीये ॥ **इति नवमावरणम्** ॥ **इति संक्षेपावनवावरणानि** ॥ अन्ये कुमार्याद्यावरणं नवदुर्गावरणं च परित्यज्य सप्तैवावरणान्याहुः ॥ अपरे गुर्वादित्रयं गणेशहरिहररूपदेवतात्रयं चेति देवताषट्कावरणेन सहैतान्येवाष्टावाहुः । केचिदेतान्येव चतु षष्टियोगिन्यावरणेन सह नवाहुः ॥ आवरणदेवतानां स्वबीजसहितनाममन्त्रैः पूजा कार्या ॥

तासां प्रतिपदोक्तस्वबीजानि, बीजरहस्यतो ज्ञेयानि ॥ तदभावे चण्डिकार्चनरहस्योक्तानि लाक्षणिकानि ग्राह्याणि ॥ तेषां लक्षणं पूर्वमुक्तम् इत्यावरणपूजा ॥ **अथ धूपः** ॥ **स्कान्दे** । सर्वेषामेव धूपानां दुर्गाया गुग्गुलुः प्रियः ॥ तद्दानेन महादेवी प्रीता सर्वं ददाति च ॥ इति ॥ धूपविशेषेण फलविशेषो **दुर्गाभक्तितरङ्गिण्याम्** ॥ कृष्णागुरुं नरो देव्यै दत्वा तल्लोकमाप्नुयात् ॥ महिषाक्षं घृताभ्यक्तं देव्यै दत्वा सचैत्वकम् ॥ वाजपेयफलं प्राप्य सूर्यलोके महीयते ॥ (महिषाक्षो गुग्गुलुः) सकृष्णागुरुधूपेन महिषाक्षे । चण्डिका ॥ शोधयेत्पापकलिलं महाग्निरिव काञ्चनम् ॥ कृष्णागुरुं सकर्पूरं चन्दनं सिह्लकं तथा ॥ चतुष्टयमिदं दत्वा चन्द्रलोके महीयते ॥ (सिह्लको लोहबन्दी ऊद इति लोके प्रसिद्धः) कृष्णागुरुं गुग्गुलुं च कर्पूरं सिह्लकं तथा ॥ भगवत्यै नरो धूपं दत्वा कामानवाप्नुयात् ॥ अष्टाङ्गं वा दशाङ्गं वा षोडशाङ्गमथापि वा ॥ धूपं देव्यै नरो दद्यात्स गच्छेद्वैष्णवं पदम् ॥ इति ॥ अथाष्टाङ्गधूप उक्तो **हेमाद्रौ देवीपुराणे** । वृषणं सिह्लकं विप्र श्रीखण्डमगुरुस्तथा ॥ कर्पूरश्च तथा मुस्ता शर्करा च सह त्वचा ॥ अष्टाङ्गो विजयो धूपः स्वयं देवैर्विनिर्मितः ॥ इति ॥ (वृषणं गन्धमार्जाराण्डकोशस्वेदः ।) अथ दशाङ्गधूप **आयुर्वेदे** । घृतगुग्गुलुपाटीरागुरुह्रीबेरचन्दनम् ॥ घनं द्राक्षा कुष्ठनखं दशाङ्गो धूप उच्यते ॥ इति ॥ (पाटीरः श्वेतचन्दनम् । चन्दनं रक्तचन्दनम् । घनं मुस्ता । नखं नखला इति प्रसिद्धम्) अथ **षोडशाङ्गधूपः शारदातिलके** । गुग्गुलुः सरलो दारुपत्रं मलयसम्भवम् ॥ ह्रीबेरमगुरुः कुष्ठं गुडः सर्जरसो घनः ॥ हरीतकी नखं लाक्षा जटामांसी च शैलजम् ॥ (सरलः श्वेतदेवदारु । दारु पीतदेवदारु पत्रं जातीपत्रम् । शैलजं शिलाजतु ।) **अथ धूपदानविधिर्मन्त्रमहोदधौ** । धूपपात्रस्थिताङ्गारे क्षिप्त्वा अगुरुपुरादिकम् ॥ पात्रमस्त्रेण सम्प्रोक्ष्य हृदा पुष्पं समर्पयेत् ॥ (पुरः गुग्गुलुः । हृदा नमःशब्देन) संस्पृशन्

वामतर्जन्या मूलमन्त्रं च सम्पठन् ।। साङ्गायै सपरीत्यन्ते वारायै ङेऽन्तदेवता ।। धूपं समर्पयामीति नमोऽन्तं मन्त्रमुच्चरन् ।। शङ्खाम्बुप्रक्षिपेद्भूमौ धूपमूद्रां प्रदर्शयेत् ।। तर्जनीमूलयोरङ्गुष्ठाग्रयोगे तु सा भवेत् ।। (मूलमन्त्रान्ते साङ्गायै सपरिवारायै अमुकदेवतायै धूपं समर्पयामि इति प्रयोगः ।।:(इतआरभ्यासमाप्तेः छत्राद्यातपत्रान्तदशराजोपचारवर्जमन्येषूपचारेषु देवतायाः साङ्गायै सपरिवारायै इति विशेषणद्वयं देयम् ।। धूपमुद्रा पूर्वमुक्ता ।। धूपयेद्दक्षहस्तेन देवतानाभिदेशतः ।। जलं पुष्पाञ्जलिं दद्याद्दीपदानमपीदृशम् ।। इति ।। केचित्पाददेशे धूपदानमाहुः ।। वामतस्त्वर्पयेद्धूपमग्रे वा न तु दक्षिणे ।। इति **कालिकापुराणे** ।। धूपदीपयोः समर्पणकाले घण्टां वादयेत् ।। तत्प्रकारो **गौतमीये** । उत्तोल्य दृष्टिपर्यन्तं घण्टां वामादिशि स्थिताम् ।। वादयेद्वामहस्तेन दक्षहस्तेन चार्चयेत् ।। इति ।। (अर्चयेदूपचारं समर्पयेत्) **इति धूपदानम्** ।। **अथ दीपः** ।। **मन्त्रमहोदधौ** । घृतेन वाथ तैलेन दीपं प्रज्वालयेन्नरः ।। घृतदीपो दक्षिणे स्यात्तैलदीपस्तु वामतः ।। इति ।। अथ दीपस्नेहविशेषप्रयुक्तः फलविशेषो **दुर्गाभक्तितरङ्गिण्याम्** ।। घृतदीपप्रदानेन चण्डिकां यः प्रपूजयेत् ।। सोऽश्वमेधफलं प्राप्य दुर्गायास्तु गणो भवेत् ।। तैलदीपप्रदानेन पूजयित्वा च चण्डिकाम् ।। वाजपेयफलं प्राप्य मोदते चण्डिकान्तिके ।। यावन्तं दीपसङ्घातं तैलेनापूर्य दीपयेत् ।। तावत्कल्पसहस्राणि दुर्गालोके महीयते ।। इति ।। **शिवरहस्ये** । गोसर्पिषा च सहितं नयनाभिरामं प्रज्वाल्य दीपममलं भवने भवान्याः ।। देदीप्यते सकनकोज्वलपद्मरागरत्नप्रभाभरणहेममये विताने ।। इति ।। अथ **दीपे निषिद्धस्नेहाः पाद्मे** । दुर्गान्धिघृततैलानि देवदीपे न योजयेत् ।। मिश्राणि घृततैलानि तथा स्नेहा वसादयः।। इति ।। भूमौ दीपदाननिषेधः **स्कान्दे** । वृक्षेषु दीपा दातव्या न तु भूमौ कदाचन ।। इति ।। पाषाणकाष्ठधातुमृदादिनिर्मिता दीपस्तम्भा दीपवृक्षाः । लोके समयी ठाणवयी इत्यादिशब्दैः प्रसिद्धाः।)

दीपस्य दक्षिणपश्चिमादिगभिमुखत्वनिषेधमाह । **शाकलः** । दक्षिणाभिमुखं दीपं स्थापयेन्न कदाचन ॥ न प्रत्यङ्मुखमेवापि दोषोऽयं त्वेकदीपके ॥ इति ॥ तेनानेकदीपदाने नायं नियम इत्युक्तं भवति ॥ दीपस्याभिमुखो दीपः सुखायुः श्रीविवर्धनः ॥ इति **नारदीये** । दीपेन दीपं प्रज्वाल्य दरिद्रो व्याधितो भवेत् ॥ इत्युक्तेर्दीपेन दीपं न प्रज्वालयेत् ॥ **अथ दीपदानविधिर्मन्त्रमहोदधौ** । वाममध्यमया स्पर्शो मूलमन्त्रादिकीर्तनम् ॥ धूपस्थाने दीपपदं मध्यमाङ्गुष्ठयोगतः ॥ दीपमुद्रादर्शनं च तद्दानं नेत्रदेशतः ॥ अन्यत्सर्वं धूपवत्स्यात् ॥ मध्यमामूलयोर्दीपमुद्राङ्गुष्ठाग्रयोजने ॥ **इति दीपमुद्रा** । **इति दीपः** ॥ **अथ नैवेद्यः** ॥ दीपदानानन्तरं देवतां भुक्तिमण्डपं प्रवेश्य भुक्तिपीठे उपवेश्य नैवेद्यमर्पयेत् ॥ तत्र[1] नैवेद्यपदार्थाः । **पाद्मे** । संस्कृतं चान्नमाज्याद्यैः संयावं पायसं तथा ॥ फलमूलव्यञ्जनानि दधिक्षीरमधूनि च ॥ शर्कराघृतसूपादिदेवताभ्यो निवेदयेत् ॥ इति ॥ **चण्डिकार्चनरहस्ये** । यथावर्णक्रमोपेतैर्नैवेद्यैः पायसादिभिः ॥ अनेकरसपक्वान्नैर्महालक्ष्मीं प्रतोषयेत् ॥ इति ॥ (यथावर्णक्रमोपेतैः स्वस्ववर्णोचितैः) **देवीपुराणे** । परमान्नं पिष्टकांश्च कृसरं यावकं तथा ॥ मोदकान् पृथुकांश्चैव फलानि विविधानि च ॥ निवेदयेन्महादेव्यै सर्वाणि व्यञ्जनानि च ॥ क्षीरादीन्यपि गव्यानि माहिषाण्यपि सर्वशः ॥ इति ॥ (पिष्टका अपूपाः ॥ कृसरास्तिलादिमिश्र ओदनः । यावकाः कुल्माषाः । मोदका लड्डुकाः) **कालिकापुराणे** । भक्ष्यं भोज्यं तथा लेह्यं चोष्यं पेयं च पञ्चमम् ॥ अन्नं पञ्चविधं देव्यै भक्तियुक्तो निवेदयेत् ॥ इति ॥ (भक्ष्यं कठिनं मोदकादि । भोज्यं मृदुलमोदनादि । लेह्यं जिह्वया ग्राह्यं रसालादि । चूष्यं यस्य रसं स्वीकृत्य नीरसभागस्त्यज्यते तदाम्रफलेक्षुकाण्डादि । पेयं क्षीरपानकादि ।) **अथ नैवेद्य पदार्थविशेषदानानुसारेण फलविशेषा** उक्ता **दुर्गाभक्तितरङ्गिण्याम्** ॥ गोधूमचूर्णसंयावं घृताक्तं शर्करायुतम् ॥ यः प्रयच्छति दुर्गायै

सगच्छेच्छङ्करालयम् ॥ शाल्योदनं रसालां च पानकं बादरं तथा ॥ दुर्गायै यः प्रदद्याच्च स गच्छेत् ब्रह्मणः पदम् ॥ (रसाला श्रीखण्डमिति लोके । तल्लक्षणं सूपशास्त्रे । ईषदम्लदधिशर्करापयःसाधिता समरिचा च गालिता ॥ पित्तवृद्धिमरुचिं निहन्ति सा मोदनं च कुरुते रसालिका ॥ इति ॥ (मोदनं प्रमोदम्) **भावप्रकाशे** । एलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तां साधयेदिति तत्र एलालवङ्गकर्पूरा अधिका उक्ताः ॥ साम्प्रतं लोके काश्मीरमप्युपयुज्यते ॥ **कालिकापुराणे** । आमिक्षां परमान्नं च दधि चापि सशर्करम् ॥ महादेव्यै निवेद्यैव वाजपेयफलं लभेत् ॥ इति ॥ (आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ॥ इति ॥ परमान्नं तु पायसमिति च अमरः) **अथ नैवेद्यार्पणविधिः**। तत्र देवस्य पुरतश्चतुरस्रमण्डलं कृत्वा तदुपरि त्रिपदीं निधाय तत्र नैवेद्यपात्रं स्थापयेदिति **प्रयोगपारिजाते** । नैवेद्यं दक्षिणे वामे पुरतो वा न पृष्ठतः ॥ इति **तन्त्रसारे** उक्तम् ॥ **मन्त्रमहोदधौ** ॥ स्वर्णादिभाजने साज्यपायसं शर्करान्वितम् ॥ नानाविधं भक्ष्यभोज्यमन्नं व्यञ्जनसंयुतम् ॥ परिविष्य यथाशक्ति प्रोक्षेत् कैरस्त्रमन्त्रितैः ॥ (कैर्जलैः,। चक्रमुद्रां प्रदर्श्याथ प्रोक्षेत्तन्मन्त्रितैर्जलैः ॥ वायुबीजेनार्कवारं ततस्तज्जातमारुतैः ॥ नैवेद्यदोषं संशोष्य चिन्तयेद्दक्षिणे करे ॥ अग्निबीजं तस्य पृष्ठे वामं करतलं न्यसेत् ॥ (चक्रमुद्रां प्रदर्श्य वायुबीजेन द्वादशवारं मन्त्रितैर्जलरन्नं प्रोक्षेत् ॥ ततस्तज्जातमारुतैः नैवेद्यदोषं संशोष्य दक्षिणकरे अग्निबीजं चिन्तयित्वा तस्य पृष्ठे वामं करतल न्यसेदिति श्लोकद्वयान्वयः ।) तद्दर्शयित्वा नैवेद्य तदुत्थेनाग्निनाखिलम् ॥ नैवेद्यदोषं सन्दह्य ध्यायेद्वामकरेऽमृतम् ॥ तत्पृष्ठे दक्षिणं हस्तं कृत्वा तच्च प्रदर्शयेत् ॥ (तत् हस्तयुगुलम्) आप्लावितं स्मरेद्भोज्यं बीजात्थामृतधारया ॥ (बीजं वंबीजं, तदुत्पन्नामृतधारयेत्यर्थः) प्रोक्ष्य मूलेन तत्स्पृष्ट्वाष्टशो मूलमनुं जपेत् ॥ (तदन्नं स्पृष्ट्वाष्टवारं मूलमनुं जपेदित्यन्वयः) धेनुमुद्रां दर्शयित्वा गन्धपुष्पैस्तदर्च-

येत् ॥ देवे पुष्पाञ्जलिं दत्वा तेजोदेवमुखोत्थितम् ॥ विचिन्त्य वामाङ्गुष्ठेन स्पृशेन्नैवेद्यभाजनम् ॥ नैवेद्यमुद्राङ्गुष्ठानामिकाभ्यां प्रदर्शयेत् ॥ अनाममूलयोरङ्गुष्ठाग्रयोगे तु सा भवेत् ॥ इति ॥ अत्राशक्तौ **ब्रह्मसंहितायाम्** ॥ तुलसीगन्धपुष्पैश्च सम्पूज्यान्नं सभाजनम् ॥ सम्प्रोक्ष्यार्घ्यजलेनैव संरक्ष्यास्त्रेण सर्वतः ॥ धेनुमुद्रां प्रदर्श्याथ देवाय विनिवेदयेत् ॥ इति ॥ **मन्त्रमहोदधौ** ॥ परिषिच्यान्नपात्रं प्राक् दद्यादापोशनं ततः । पञ्चप्राणाहुतीर्दद्यात्तन्मुद्राः प्रदर्शयन् ॥ ता मुद्राः यथा । कनिष्ठानामिकाङ्गुष्ठैः प्राणमुद्रा प्रकीर्तिता ॥ तर्जनीमध्यमाङ्गुष्ठैरपानस्य च मुद्रिका ॥ तर्जन्यादित्रयाङ्गुष्ठैर्भवेद्व्यानस्य मुद्रिका ॥ अनामामध्यमाङ्गुष्ठैरुदानस्य च मुद्रिका ॥ सर्वाङ्गुलीभिः सम्प्रोक्ता समानस्य च मुद्रिका ॥ इति ॥ ततो जवनिकां कृत्वा जपन् मूलं च सप्तधा ॥ वामहस्तेन पद्माभां ग्रासमुद्रां प्रदर्शयेत् ॥ सा च वामहस्तेन पद्माभां ग्रासमुद्रां प्रदर्शयेदित्युक्तलक्षणा ॥ भुञ्जानं भावयेद्देवं तृप्तं गत्वा च सानुगम् ॥ प्रतिसीरामपाकृत्य दद्यान्मूलं जपन् जलम् ॥ इति ॥ (जलं पानार्थम् ॥ उक्तं च **कालिकापुराणे** । दुर्गामुद्दिश्य पानीयं केतकीशशिवासितम् ॥ यः प्रयच्छति नैवेद्ये स गणाधिपतिर्भवेत् ॥ इति ॥ शशी कर्पूरः) उत्तरापोशनं दत्वा हस्तास्यक्षालनं चरेत् ॥ करोद्वर्तनकं दत्वा दद्यादाचमनं ततः ॥ **अथ निवेदितान्नव्यवस्था पाद्मे** । एको भागः प्रदातव्योऽन्नस्य तूच्छिष्टभोजिने ॥ स च शूद्राय गोभ्यो वा देयोंऽशान्तितयं च यत् ॥ स्वयं वान्यो निजाप्तो वा भुञ्जीत भाक्तिभावतः ॥ इति ॥ देव्या उच्छिष्टभोजिनी उच्छिष्टचाण्डाली नाम क्षुद्रदेवता ॥ तदुक्तं **मन्त्रमहोदधौ** । शक्तेरुच्छिष्टचाण्डाली मता तूच्छिष्टभोजिनीति ॥ **इति नैवेद्यसमर्पणविधिः** ॥ **अथ पूजाङ्गहोमो मन्त्रमहोदधौ** ॥ स्थण्डिलेऽग्निमुपाधाय वैश्वदेवक्रियां चरेत् ॥ मूलेन वीक्ष्य चास्त्रेण कृत्वा प्रोक्षणताडने ॥ (स्थण्डिले इत्येतत् कुण्डस्याप्युपलक्षणम् ।) कुशैस्तद्धर्मणाभ्युक्ष्य तत्र

संस्थापयेच्छुचिम् ॥ तन्मन्त्रेण समभ्यर्च्याह्वयेत्तत्रेष्टदेवताम् ॥ (कुशैरिति पूर्वान्वयि । शुचिमग्निम् । तन्मन्त्रेण अग्निमन्त्रेण । स च वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकार्याणि साधयेत्येवं रूपः). पूजयेद्गन्धपुष्पैस्तां महाव्याहृतिभिस्ततः ॥ हुत्वा समस्तव्यस्ताभिर्घृताहुतिचतुष्टयम् ॥ (तां इष्टदेवताम्). महाव्याहृतयः **प्रपञ्चसारे** । भूर्भुवःस्वर्भूर्भुवः स्वः पूर्वस्वाहान्तमेव च ॥ अग्नये च पृथिव्यै च महते च समन्वितम् ॥ वायवे चान्तरिक्षाय महते च समन्वितम् ॥ आदित्याय च दिवे च महते च समन्वितम् ॥ चन्द्रमसे च दिग्भ्यश्च महते च समन्वितम् ॥ महाव्याहृतयस्त्वेताः सर्वशो देवतामयाः ॥ इति ॥ (एताः प्रयोगे विशदीभविष्यन्ति ।). अन्नं मूलेन जुहुयात्पञ्चविंशतिसङ्ख्यया ॥ पुनर्व्याहृतिभिर्हुत्वा मूर्तौ देवं नियोजयेत् ॥ पुनर्व्याहृतिभिर्हुत्वेत्यत्राज्यमिति शेषः । मूर्तौ देवप्रतिमायाम् ।) वह्निं सम्पूज्य विसृजेत् भो भो वह्ने मनुं जपन् ॥ (भो भो वह्ने इति विसर्जनमन्त्रः प्रयोगे वक्ष्यते ॥). इति **पूजाङ्गहोमः** ॥ अथ पायसबलिदानम् ॥ तच्च क्वचित् बटुकयोगिनीक्षेत्रपालगणेशेभ्यस्तथा सर्वभूतेभ्यश्चेति पृथक् पृथक् पञ्चधोक्तम् ॥ क्वचित् सर्वभूतेभ्य इत्येकत्रैव सर्वेभ्य उक्तम् ॥ तच्च प्रयोगे विस्तरेण प्रदर्शयिष्यते ॥ महाबलिदानं तु नवरात्रप्रकरणे वक्ष्यते ॥ **अथ गणेशादिबलिदाने मुद्रा यथा** । किञ्चिद्वक्रीकृता मध्या गणेशबलिमुद्रिका ॥ साङ्गुष्ठतर्जनीमुद्रा बटुकस्य बलौ मता ॥ अङ्गुष्ठानामिके वामे क्षेत्रपालबलौ मते ॥ अनामामध्यमाङ्गुष्ठा योगिनीनां बलौ मताः ॥ **इति बलिदानम्** ॥ ततो देवतां सभामण्डपं प्रवेश्य सभापीठे उपवेशयेत् ॥ **अथ ताम्बूलम्** ॥ **दुर्गाभक्तितरङ्गिण्याम्** ॥ सकर्पूरं च ताम्बूलं दद्याद्वदनवासकम् ॥ ताम्बूलदानाद्दुर्गायै गन्धर्वैः सह मोदते ॥ इति ॥ ताम्बूलपदार्थास्तत्रैवोक्ताः ॥ नागावल्लीदलं सारः खादिरः क्रमुकंतथा ॥ एलालवङ्गकर्पूरैस्ताम्बूलं मुखवासनम् ॥ (मुखवासनं मुखसौगन्ध्य-

संस्कारापादकम् ॥) **सौभाग्यकल्पद्रुमे** ताम्बूलस्य त्रयोदशपदार्था उक्तास्ते यथा । सम्पक्कं नागवल्लीविशिरदलकुलं पूगखण्डं सुधेषत्सारोऽल्पः खादिरोऽथाग्निशिखमृगमदस्वर्णवातामकानि ॥ कङ्कोलं जातिपत्रं फलसहितमथैलाफलं सलवङ्गं ताम्बूले सम्प्रयोज्या इति मदनमितास्तत्प्रवृद्ध्यै पदार्था ॥ इति ॥ (अस्यार्थः । सम्पक्कं सम्यक् पक्कम् ॥ नागवल्याः विशिरं शिरारहितम् दलकुलं पर्णसमूहः ॥ पूगखण्डं क्रमुकशकलानि । ईषत् सुधा अल्पं शुक्त्यादिचूर्णम् । अग्निशिखं काश्मीरजम् । मृगमदः कस्तूरी । स्वर्णं सुवर्णवर्खं इति प्रसिद्धम् ॥ वातामकं बदाम इति प्रसिद्धम् ॥ जातीपत्रं फलसहितं जातीपत्रं जातीफलं च । सलवङ्गं रुचिरलवङ्गम् ॥ मदनमितास्त्रयोदशसङ्ख्याकाः । तत्प्रवृद्ध्यै मदनवृद्धये । अन्यत् सुगमम् ॥) **वैखानससंहितायाम्** । ताम्बूलमुखवासनयोर्भेद उक्तः । महापिप्पलपत्राणि क्रमुकस्य फल तथा ॥ शुक्तिक्षारेण संयुक्तं ताम्बूलमिति संज्ञितम् ॥ (महापिप्पलो नागवल्ली) श्वेतपर्णं च चूर्णं च क्रमुकस्य फलं तथा ॥ नारिकेलफलाल्पांशमातुलिङ्गांशसंयुतम् ॥ एलालवङ्गकर्पूरयुक्तं स्यान्मुखवासनम् ॥ (श्वेतपर्णं नागवल्याः पक्कं पत्रम्) **धर्माब्धिसारे** मुखवासने मातुलिङ्गलवङ्गे अनुक्त्वा कङ्कोलमुक्तम् ॥ **रतिविलासे** कर्पूरवीटिकोक्ता सा यथा । एलालवङ्गकर्पूरकस्तूरीकेशरैस्तथा ॥ जातिपत्रफलैः पूगैर्लाङ्गल्यूषणनागरैः ॥ चूर्णैः खदिरसारैश्च युक्ता कर्पूरवीटिका ॥ इति ॥ (केशरं काश्मीरजम् । लाङ्गली जलपिप्पली । ऊषणं मरिचम्) ताम्बूलमुद्रा विज्ञेया हस्तः सङ्कुचिताङ्गुलिरिति ताम्बूलमुद्रा ॥ **इति ताम्बूलम्॥अथ दक्षिणा ॥** सा चोक्ता **अत्रिणा** । पूजासाद्गुण्यसिद्ध्यर्थं दक्षिणां प्रतिपादयेत् ॥ रत्नमुक्ताप्रवालादिसुवर्णरजतादिकम् ॥ विविधानि च धान्यानि येन तुष्यन्ति देवताः ॥ इति ॥ **इति दक्षिणा ॥ अथ फलानि, मन्त्रमहोदधौ** । फलानि दत्वा देवेभ्यः सकलां विन्दते श्रियम् ॥ जम्बूदाडिमजम्बीरं श्रीफलं बीजपूरकम् ॥ रम्भा धात्री च बदरी रसालः

पनसोऽपि च ॥ एभिः फलैर्यजेद्देवमितैर्मधुरैरपि ॥ (श्रीफलं नारिकेलं न तु बिल्वम् । तस्यारुच्यत्वात् ।) **दुर्गाभक्तितरङ्गिण्याम्** । आम्रं वा नारिकेलं वा खर्जूरं बीजपूरकम् ॥ देव्यै दद्यान्नरो यस्तु स गच्छेद्वैष्णवं पदम् ॥ इति ॥ पत्रं पुष्पं फलं चैव यथोत्पन्नं तथार्पयेदिति प्रागुक्तम् ॥ **इति फलानि ॥ अथ सुगन्धिद्रव्याणि, भविष्ये** । सुगन्धीनि च चूर्णानि तैलानि सुरभीणि च । देवताभ्यः प्रदेयानि तथा देयं चतुःसमम् ॥ इति ॥ तत्र चतुःसममुक्तं **गारुडे** । कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ॥ कुङ्कुमस्य त्रयस्तद्वच्छशिनश्च चतुःसमम् ॥ (कुङ्कुमं काश्मीरजन्म शशी कर्पूरः । तद्वत् कुङ्कुमवत् । त्रय इत्यर्थः सर्वे भागा द्वादश भवन्ति ।) इति **सुगन्धिद्रव्याणि** ॥ **अथ व्यजनम्** ॥ **कालिकापुराणे** । तालपत्रं महाबाहो चित्रकर्मोपशोभितम् ॥ भगवत्यै नरो दत्वा विष्णुयागफलं लभेत् ॥ मयूरपिच्छव्यजनमथवोशीरनिर्मितम् ॥ यः प्रयच्छति दुर्गायै स गच्छेद्वैष्णवं पदम् ॥ वंशवीरणजं पर्णतृणादिजमथापि वा ॥ पट्टोर्णादिमयं वापि शक्त्या व्यजनमर्पयेत् ॥ **इति व्यजनम्** ॥ **अथ गीतादिकं, देवीपुराणे** । गीतं वाद्यं च नृत्यं च ममाग्रे यः समाचरेत् ॥ तस्मै सदा प्रसन्नाहं ददामि सकलाः कलाः ॥ **इति गीतवाद्यनृत्यानि** ॥ **अथ दशराजोपचाराः** ॥ **दुर्गाभक्तितरङ्गिण्याम्** ॥ छत्रं चामरयुग्मं च तथा मायूरयुग्मकम् ॥ सुवर्णरूप्यदण्डौ च तुरगं वारणं रथम् ॥ शिबिकामथ मायूरमातपत्रं सुशोभनम् ॥ एतान् राजोपचारान् यो देव्यै यच्छति मानवः ॥ स सर्वपृथिवीराज्यं लभेताकण्टकं चिरम् ॥ इति ॥ **इति दशराजोपचाराः** ॥ अथ देवतां पुनर्यागगेहं प्रवेश्य यागपीठे उपवेशयेत् ॥ **अथ महानीराजनम्** ॥ **मन्त्रमहोदधौ** । ततो लवणमुत्तार्य कुर्यादारार्तिकं सुधीः ॥ सर्वं सम्पूर्णतां याति कृते नीराजने शुभे ॥ इति ॥ (लवणोत्तारणं दुष्टजनदृष्टिदोषनिवारणार्थम्) **भक्तिरहस्ये** । बहुवर्तिकदम्बेन ज्वलितं

परितो वपुः ॥ कुर्यादारार्तिकं यस्तु कल्पकोटिं वसेद्दिवि ॥ (वपुः परितः बहुवर्तिकदम्बेन ज्वलितं आरार्तिकं कुर्यादित्यन्वयः । देवस्येतिशेषः ।) उच्चैरादाय हस्ताभ्यां आपादतलमस्तकम् ॥ त्रिः परिभ्राम्य देवेशे बहिरेव ततः क्षिपेत् ॥ इति ॥ देवाभिमुख्येनार्तिक्यं नवकृत्वो भ्रमयेदिति **तृचभास्करे** ॥ एकस्मिन् पात्रे डमरुसदृशाकारपीतवर्णपिष्टमयदीपायतनान्नवदीपान् संस्थाप्य तैर्नीराजयेदिति **कल्पवल्ल्याम्** ॥ **स्कान्दे** । नीराजनप्रभा येषां गात्राणि परितः स्पृशेत् । यज्ञावभृथलक्षाणां लभन्ते स्नानजं फलम् ॥ इति ॥ **पाद्मे** । धूपं चारार्तिकं देवि कराभ्यां योऽभिवन्दते ॥ कुलकोटिं समुद्धृत्य याति विष्णोः परं पदम् ॥ इति ॥ इति **महानीराजनम्** ॥ **अथ कर्पूरार्तिक्यं भविष्ये** । कर्पूरेणारार्तिकं यस्तु कुर्याद्देवस्य दीप्यता ॥ अश्वमेधफलं प्राप्य दशापूर्वान् दशापरान् ॥ पितृन् समुद्धरत्येष स्वयं याति शिवालयम् ॥ इति **कर्पूरार्तिक्यम्** ॥ **अथ पुष्पाञ्जलिः, पाद्मे** ॥ मन्त्रैर्वेदोदितैश्चैव पुराणागमसम्भवैः ॥ देवे पुष्पाञ्जलिं दद्यात्स गच्छेत्परमां गतिम् ॥ पत्रं पुष्पं फलं चैव न च दद्यादधोमुखम् ॥ पुष्पाञ्जलौ न तद्दोष इति प्रागुक्तम् ॥ अत्राचारप्राप्ता नमो महद्भ्यः राजाधिराजाय इत्यादयो मन्त्राः सति सम्भवे पठनीयाः ॥ इति **पुष्पाञ्जलिः** ॥ **अथ स्तुतिः** । सा च चण्डीस्तवस्य त्वं स्वाहा त्वं स्वधेति प्रथमाध्यायगतस्तवेन, देव्या यया ततमिति चतुर्थाध्यायगतस्तवेन, देविप्रपन्नार्तिहरे इत्येकादशाध्यायगतस्तवेन, नमो देव्यै महादेव्यै इतिपञ्चमाध्यायगतस्तवेन चेति चतुर्भिः स्तवैः कार्या ॥ अशक्तावेकेन पञ्चमाध्यायगतेन नमो देव्यै महादेव्यै इतिस्तवेन तदुक्तं **रहस्ये** । ततः कृताञ्जलिपुटः स्तुवीत चरितैरिमैः ॥ स्तोत्रमन्त्रैस्तुवीतेमां यदि वा जगदम्बिकाम् ॥ इति ॥ इति **स्तुतिः** ॥ **अथ वेदशास्त्रपुराणपाठो देवीपुराणे** । वेदशास्त्रपुराणानि श्रावयेन्मम यो नरः ॥ सन्तुष्टाहं प्रयच्छामि तस्मै विद्याश्चतुर्दश ॥ इति ॥ इति **वेदशास्त्रपुराणानि** ॥

अथ मूलमन्त्रजपः सप्तशतीजपश्च चण्डिकार्चनरहस्ये । प्राणानायम्य पूर्वोक्तान् न्यासान् कृत्वा समाहितः ॥ जपेन्नवाक्षरं मन्त्रमष्टोत्तरशतादिकम् ॥ चरितानि जपेत्त्रीणि सरहस्यान्यतन्द्रितः ॥ मध्यमं चरितं वापि जपेद्वै चण्डिकामयम् ॥ अयं मध्यमचरित्रपाठश्चारित्रत्रयपाठाशक्तौ ज्ञेयः ॥ **केरलास्तु** चरित्रत्रयपाठाशक्तौ त्रिभिर्दिनैस्त्रीणि चरितानि पठेदित्याहुस्तदयुक्तम् ॥ एकेन वा मध्यमेन नैकेनेतरयोरिहेति **रहस्ये** निषेधात् ॥ नवार्णमन्त्रचण्डीस्तवयोर्जपविधिरग्रे जपप्रकाशे द्रष्टव्यः ॥ **इति मूलमन्त्रजपो देवीमहात्म्यजपश्च** । **अथ प्रदक्षिणा** ॥ **तृचभास्करे** । प्रसार्य दक्षिणं हस्तं स्वयं नम्रशिराः स्थितः ॥ दर्शयन् दक्षिणं पार्श्वं मनसापि च दक्षिणः ॥ प्रदक्षिणं भ्रमेच्चैव नापसव्यं कदाचन ॥ **इति** ॥ **बृहन्नारदीये** चतुरङ्गप्रदक्षिणोक्ता सा यथा ॥ पदं पदान्तरे न्यस्य करौ चलनवर्जितौ ॥ स्तुतिर्वाचि हृदि ध्यानं चतुरङ्गप्रदक्षिणा ॥ **इति** ॥ **शिवार्चनचन्द्रिकायां** देवताविशेषेण प्रदक्षिणासङ्ख्या उक्ता ॥ एका चण्ड्यां रवौ सप्त तिस्रः कार्या विनायके ॥ हरौ चतस्रः कर्तव्याः शिवे चार्धप्रदक्षिणा ॥ सव्यं व्रजेत्ततोऽसव्यं प्रणालीं नैव लङ्घयेत् ॥ इति ॥ एतेन **चण्डिकार्चनरहस्ये,** शूलेन पाहि नो देवीत्येतैः श्लोकैः प्रदक्षिणाम् ॥ विदध्यात्सुस्थिरो भूत्वा चण्डिकाध्यानतत्परः ॥ इत्यत्र प्रदक्षिणामित्येकवचनस्थाने प्रदक्षिणाः इति बहुवचनं पठित्वा चतुर्भिः श्लोकैश्चतस्रः प्रदक्षिणाः कार्या इति केषाञ्चिदुक्तिश्चिन्त्या ॥ शतसहस्रादिप्रदक्षिणाः काम्याः ॥ **इति प्रदक्षिणा** ॥ **अथ नमस्कारः** ॥ **त्रिस्थलीसेतौ** । प्रणामाः सर्वदेवेभ्यः सप्तपञ्चत्रयोऽपि वा ॥ एकोवाप्यथवा कार्याः साधकेन निजेच्छया ॥ इति ॥ **चण्डिकार्चनरहस्ये** । नमो देव्या इति श्लोकान् पठन् पञ्चैकचित्ततः ॥ कुर्यात्पञ्च नमस्कारान् महालक्ष्मीपरायणः ॥ इत्युक्तम् ॥ **अथ पञ्चाङ्गनमस्कारस्त्रिस्थलीसेतौ** । पद्भ्याम् कराभ्यां शिरसा पञ्चाङ्गा प्रणतिः स्मृता ॥ इत्युक्तः ॥ **प्रपञ्चसारे**

तु । बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया ॥ पञ्चाङ्गस्तु प्रणामः स्यादित्युक्तः । पूर्ववचनेऽवयवव्यक्त्यभिप्रायेण पादौ द्वौ, करौ द्वौ शिरश्चैकमिति पञ्चाङ्गानि । अत्र तु जात्यभिप्रायेण जानुद्वयमेकं, बाहुद्वयमेकं, शिरो वचो धियश्च त्रीणि इति पञ्चाङ्गानीति विशेषः । **अथाष्टाङ्गनमस्कारः** ॥ उरसा शिरसा दृष्ट्या मनसा वचसा तथा ॥ पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥ इति ॥ **नारसिंहे** तु । दोर्भ्यां पद्भ्याम् च जानुभ्यामुरसा शिरसा तथा ॥ मनसा वचसा भक्त्या प्रणामोऽष्टाङ्ग ईरितः ॥ इत्युक्तम् ॥ पूर्ववचने दृष्टिरुक्ता अत्र तु भक्तिरिति विशेषः ॥ एतान्यष्टावङ्गानि प्रणामस्य न तु प्रणन्तुः ॥ तेन मनोवचोभक्तीनामङ्गत्वोक्तिर्न विरुद्धा ॥ अत्र वचो नमःशब्दोच्चारः ॥ **भविष्ये** । अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ॥ जपहोमनमस्कारान्न कुर्याद्देवमन्दिरे ॥ इत्युक्तम् ॥ **वाराहे** । वस्त्रप्रावृतदेहस्तु यो नमेद्देवतां नरः ॥ स तु सञ्जायते मूर्खः सप्तजन्मसु दुःखभाक् ॥ नतिमुद्रा तु संश्लेषः साङ्गुल्योस्तलहस्तयोरिति नमस्कारमुद्रा ॥ **इति नमस्कारः** ॥ **अथोत्तरपूजनमुत्तरार्घ्यं च** ॥ उक्तं च **पूजापङ्कजभास्करे** ॥ पूजान्ते सर्वदेवानां पूजासम्पूर्णताप्तये ॥ उत्तरार्घ्यं प्रदातव्यमल्पपूजनपूर्वकम् ॥ इति ॥ अल्पपूजनं गन्धादि पञ्चोपचारात्मकम् ॥ तच्चागमोक्तमूलमन्त्रनाममन्त्रैः कार्यम् ॥ अर्घ्ये पूर्वोक्ताः पदार्थाः ॥ इत्युत्तरपूजनमुत्तरार्घ्यं च ॥ **अथ ब्रह्मार्पणम्** ॥ तच्च **मन्त्रमहोदधावुक्तम्** ॥ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः ॥ जाग्रत्स्वप्नसुषुप्त्यन्तेऽवस्थासु मनसा वदेत् ॥ वाचेति हस्ताभ्यां पद्भ्यामुदरेणेति चोच्चरेत् ॥ शिश्ना यत्स्मृतमित्युक्त्वा यदुक्तं यत्कृतं वदेत् ॥ तत्सर्वमिति चोच्चार्य ततो ब्रह्मार्पणं वदेत् ॥ भवत्विति समुच्चार्य ततः स्वाहापदं वदेत् ॥ मां मदीयं च सकलममुकस्मै समर्पये ॥ प्रणवस्तत्सदित्युक्तो ब्रह्मार्पणमनुर्बुधैः ॥ इति ॥ (एषु श्लोकेषु) अन्ते, वदेत्, इति, इति चोच्चरेत्, इत्युक्त्वा, इति चोच्चार्य

समुच्चार्य, ततः, एते शब्दाः पादपूरणार्थाः। तेषां मन्त्रे न समावेशः ॥ अमुकस्मै इत्यत्र चतुर्थ्यन्तं तत्तद्देवतानामोच्चार्यम् ततश्च सम्पूर्णमन्त्रो यथा ॥ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ मां मदीयं च सकलं अमुकस्मै समर्पये ॥ ॐ तत्सत् ॥ इति ॥ **प्रपञ्चसारे** तु वाचेत्यस्यानन्तरं कर्मणेति वर्णत्रयमधिकमस्ति ॥ म मित्यादि–ॐतत्सदित्यन्तभागो नास्तीति विशेषः ॥ **इति ब्रह्मार्पणम्** । **अथापराधक्षमापनमुक्तं वैकृतरहस्ये** । प्रदक्षिणा नमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः ॥ क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः ॥ इति ॥ अत्र प्रदक्षिणानमस्कारान् कृत्वा क्षमापयेदितिवाक्ये, कृत्वेति क्त्वाप्रत्ययस्य प्रदक्षिणानमस्काराणां क्षमापनप्राक्कालिकत्वमात्रबोधकत्वात् भुक्त्वा व्रजतीत्युक्ते भोजनव्रजनयोर्मध्ये ताम्बूलभक्षणादेरिवात्र नमस्कारक्षमापनयोर्मध्ये उत्तरपूजनादिव्यवधानस्य न बाधकत्वम् ॥ मूर्ध्न्यञ्जलेः स्थापने तु स्यात् क्षमापनमुद्रिका ॥ इति **क्षमापनमुद्रा** ॥ **इति क्षमापनम्** ॥ **अथ पूजनस्य पूर्णतायाचनं, गारुडे** । पूजान्ते च प्रकर्तव्यं पूजापूर्णत्वयाचनम् ॥ कृतेन येन सच्छिद्रमप्यच्छिद्रं भवेत् कृतम् ॥ इति ॥ **इति पूजापूर्णतायाचनम्** ॥ **अथ वरयाचना, चण्डिकार्चनरहस्ये** । सर्वस्वरूप–इत्यादिश्लोकैः षड्भिः कृताञ्जलिः ॥ प्रार्थयेज्जगतां धात्रीं प्रणतात्मेप्सितान् वरान् ॥ इति ॥ प्रसृताङ्गुलिकौ हस्तौ मिथः श्लिष्टौ च सम्मुखौ ॥ कुर्यात् स्वहृदये चैषा मुद्रा प्रार्थनसंज्ञिका ॥ इति **प्रार्थनामुद्रा** ॥ **इति वरप्रार्थना** ॥ **अथ विसर्जनं, सिद्धतन्त्रे** । देवे पुष्पाञ्जलिं दत्वा गृहीत्वैकं प्रसूनकम् ॥ तस्मिन् समागतं देवं मत्वा जिघ्रेच्च नासया ॥ सुषुम्ना वर्त्मना देवं विभाव्य हृदयं गतम् ॥ कुसुमं तत् क्षिपेत् भूमौ विसर्जनमिदं स्मृतम् ॥ इति ॥ **चण्डिकार्चनरहस्ये** । स्वशरीरे समारोप्य दद्यादस्यै विसर्जनमिति स्वश-

रीरे समारोपानन्तरं पृथग्विसर्जनस्योक्तत्वात् उत्तिष्ठ देव देवेश स्वस्थानं गच्छ पूजितः ॥ पुनरागमनायेतिमन्त्रैः कुर्याद्विसर्जनम् ॥ इति **हारीतोक्तप्रकारेण** विसर्जनं कार्यम् ॥ अक्षतान् पुष्पाणि च विकिरन् विसर्जनं कुर्यादिति **महेशभट्टीये,** इति **व्रतराजः** ॥ विसर्जनं स्थिरप्रतिमायां निषिद्धम् ॥ चलायां कृताकृतम् । लेप्यालेख्यादिष्वावश्यकमित्यादि**निर्णय** आवाहनप्रकरणे उक्तः ॥ इति विसर्जनम् ॥ **अथ देवपादोदकपानादिकमुक्तं, स्कान्दे** । देवपादाम्भसः पानं तथा शिरसि धारणम् ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥ सर्वपापप्रशमनं पुत्रपौत्रप्रवर्धनम् ॥ इति ॥ तत्र पानात्पूर्वं शिरसि न धारयेत् ॥ देवपादोदकं तीर्थमपीत्वा यस्तु मस्तके ॥ प्रक्षेपणं प्रकुरुते ब्रह्महा स निगद्यते ॥ इति **तत्रैवोक्तेः** ॥ **गारुडे** । नैवेद्यं भक्षयेन्नित्यं तथा पादोदकं पिबेत् ॥ सप्तजन्मकृतं पापं विलयं याति तत्क्षणात् ॥ पात्रान्तरेण तत्पेयं न करेण कदाचन ॥ पीतं करेण यदि तत्सुरापानसमं भवेत् ॥ इति ॥ **अथ निर्माल्यधारणं, पाद्मे** । देवाङ्गसंस्थितं पुष्पं शिरसा धारयेत्तु यः ॥ स पर्युषितपापस्तु भवेत्सप्तसु जन्मसु ॥ इति ॥ (पर्युषितपापः नष्टपापः) शिवप्रसादतीर्थनिर्माल्यादिग्रहणाग्रहणविचारोऽन्यत्र ज्ञेयः ॥ **अथ शङ्खतोयधारणं,** पुराणान्तरे ॥ शङ्खमध्यस्थितं तोयं भ्रामितं देवतोपरि ॥ अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥ इति ॥ शिवसूर्यपूजायां अर्घ्ये शङ्खस्य निषेधात् तत्र शङ्खतोयधारणस्य नावकाशः ॥ **कमलाकराह्निके** देवार्चनं प्रकर्तव्यं त्रिकालं श्रद्धयान्वितैः ॥ अशक्तौ विस्तरात् प्रातर्मध्याह्ने चन्दनादितः ॥ सायं नीराजनं कुर्यात् त्रिकाले तुलसीदलम् ॥ यथा सन्ध्या तथा पूजा त्रिकाले मोक्षदा स्मृता ॥ इत्युक्तम् ॥ **मन्त्रमहोदधौ** ॥ स्वयं सम्पाद्य सर्वाणि श्रद्धया साधनानि यः ॥ पूजयेत्तत्परो देवं स लभेताखिलं फलम् ॥ पूजनेन फलार्धं स्यादन्यदत्तैस्तु साधनैः ॥ त्रिकालपूजनाशक्तैः कार्यं द्विःसकृ

दप्यथ ॥ दशभिः पञ्चभिर्वापि पूजयेदुपचारकैः ॥ अशक्तः कारयेत्पूजां दद्याद्वार्चनसाधनम् ॥ तदशक्तः समर्चन्तं पश्येत्तद्गतमानसः इत्यशक्तविषये प्रत्याम्नायाः ॥ **अथ चण्डिकापूजायाः फलमुक्तं भविष्ये** । यथाशास्त्रविधानेन चण्डिकां यः प्रपूजयेत् ॥ विमानवरमारुह्य ब्रह्मलोकं स गच्छति ॥ नाकाले म्रियते कश्चित् पूज्यते यत्र चण्डिका ॥ न तत्र गेहे दुर्भिक्षं न च दुःखं प्रवर्तते ॥ इति ॥ **चण्डिकार्चनरहस्ये** । एवं यः कुरुते भूप चण्डिकायाः प्रपूजनम् ॥ महदैश्वर्यमखिलं त्रैलोक्ये तस्य जायते ॥ रिपवो विलयं यान्ति सर्वे नश्यन्त्युपद्रवाः ॥ व्याधयश्चैव नश्यन्ति विघ्नानां जायते क्षयः ॥ त्रिषु लोकेषु यत्किञ्चित् सुरासुरसुदुर्लभम् ॥ तत्सर्वं हि समायाति चण्डिकायाः प्रसादतः ॥ इति ॥ **अथ सामान्यतो** देवपूजाया **अकरणे प्रत्यवाय** उक्तो ग्रन्थान्तरे ॥ देवपूजाविहीनो यः स नरो रौरवं व्रजेत् ॥ तस्मात्कथञ्चिद्देवार्चा न त्यक्तव्या हितार्थिभिः ॥ इति ॥ **कौर्मे** । यो मोहादथवालस्यादकृत्वा देवतार्चनम् ॥ भुङ्क्ते स याति नरकं सूकरो जायते ततः ॥ इति ॥ **देवीभागवते** । नाराधिता चण्डिका यैस्ते वै निरयगामिनः ॥ इहलोकेऽतिदुःखार्ता नानारोगैश्च पीडिताः ॥ भवन्ति मानवा राजन् शत्रुभिश्च पराजिताः ॥ निष्कलत्रा ह्यपुत्राश्च तृष्णार्तास्स्तब्धबुद्धयः ॥ इति ॥ **वैकृतरहस्ये** । यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् ॥ भस्मीकृत्यास्य पुण्यानि निर्दहेत् परमेश्वरी ॥ इति ॥ एवं सर्वदेवानां विशेषतश्चण्डिकायाः पूजनस्याकरणे प्रत्यवायोक्तेः करणे च फलोक्तेर्नित्यकाम्यत्वं ज्ञेयम् ॥

इति चण्डिकोपास्तिदीपिकायां
नित्यार्चाप्रकाशे चण्डिकानित्यार्चाविधानम् ।

॥ श्री ॥

नित्यार्चाप्रकाशे चण्डिकानित्यार्चनप्रयोगः ।

अथ पूर्वोक्तविधानानुसारेण चण्डिकायानित्यार्चनप्रयोगः ॥ साधकः कृतस्नानः शुचिः परिहितधौतवासा धृतभस्मादितिलकः सन्ध्यादिनित्यकर्म कृत्वा हरिहरादिदेवतार्चनं विधाय चण्डिकागारमागत्य पूर्वाभिमुखो देवताभिमुखो वा पीठे उपविश्य मूलमन्त्रमुच्चरन् मुक्ताङ्गुष्ठकनिष्ठेन दक्षिणहस्तेन ब्रह्मतीर्थेन त्रिर्जलं पीत्वा ॥ ततः क्रमेण दक्षवामकरौ, ऊर्ध्वाधरोष्ठौ, पुनर्दक्षहस्तं, दक्षवामचरणौ च दक्षारया मूर्धानं प्रोक्ष्य। ततः साङ्गुष्ठतर्जन्या मुखं दक्षवामनासे च, अङ्गुष्ठानामिकाभ्यां नेत्रे कर्णौ च, हस्ततलेन हृदयम्, सर्वाङ्गुलीभिर्मस्तकमंसौ च स्पृशेत् ॥ **इत्येकमाचमनम्** ॥ एवं द्विराचम्य ॥ गृहस्थो वानप्रस्थो वा चेत् पञ्चाङ्गुलीभिर्ब्रह्मचारी यतिर्वा चेत् कनिष्ठानामिकाङ्गुष्ठैर्नासां धृत्वा मूलमन्त्रं द्वात्रिंशत् षोडशाष्टचतुर्द्वयन्यतमसङ्ख्यया आवर्तयन् वामनासापुटेन वायुमापूर्य, पूरकद्विगुणसङ्ख्यया मूलमन्त्रमावर्तयन् वायुं सन्निरुध्य, पुनः पूरकार्धसङ्ख्यया मूलमावर्तयन् दक्षनासया वायुं रेचयेत् ॥ **इत्येकः प्राणायामः** ॥ दक्षनासया वायुमापूर्य कुम्भके निरुध्य वामनासया विसृजेदिति द्वितीयः॥ अत्रापि पूरकादिषु मूलावृत्तिसङ्ख्या पूर्ववत् ॥ **प्रथमवत तृतीयः** ॥ इति प्राणायामत्रयं कृत्वा ॥ दक्षभागे गणपतये नमः ॥ वामभागे गुरुभ्यो नमः ॥ पुरतश्चण्डिकायै नमः ॥ इति नत्वा । ततो यथाचारं वाणीविरिञ्चिभ्यां नमः ॥ लक्ष्मीनारायणाभ्यां नमः ॥ उमामहेश्वराभ्यां नमः ॥ शचीपुरन्दराभ्यां नमः॥ इत्याद्या देवता नत्वा । सुमुखश्चैकदन्तश्चेत्यादीनाचारप्राप्तान् मङ्गलश्लोकांश्च पठित्वा । ततः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया ब्रह्मणा सृष्टे भूर्लोके जम्बूद्वीपे भारतवर्षे अमुकमहापर्वतस्यामुकपार्श्वे अमुकमहानद्या अमुकतीरे अमुकग्रामे इत्यादिदेशं, परार्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे

श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे युगचतुष्टयस्याष्टाविंशे पर्याये कलियुगे प्रथमचरणे अमुकशाके अमुकनाम्नि संवत्सरे अयने ऋतौ मासे पक्षे तिथौ वासरे नक्षत्रे योगे करणे इति क्रमेण कालं च तन्नाम्ना सङ्कीर्त्य । श्रीचाण्डिकाप्रीत्यर्थं यथालब्धोपचारैस्तत्पूजनं करिष्ये ॥ तदङ्गत्वेनासनादिविधिं करिष्ये ॥ इति सङ्कल्प्य ॥ आसनस्थानं जलेन समस्तव्याहृतिभिः प्रोक्ष्य ॥ तत्र आधारशक्तये नमः । कूर्माय नमः ॥ अनन्ताय नमः ॥ पृथिव्यै नमः इति देवता नत्वा ॥ तदुपरि यथोक्तमासनमास्तीर्य । ॐ अं अनन्तासनाय नमः ॥ ॐ विं विमलासनाय नमः । ॐ पं पद्मासनाय नमः । इत्यासने त्रीन् दर्भान्निधाय । पृथ्वीतिमन्त्रस्य मेरुपृष्ठमृषिः । कूर्मो देवता । सुतलं छन्दः । अथवा प्रजापतिर्ऋषिः । पृथ्वी देवता । अनुष्टुप्छन्दः ॥ इति ऋष्यादि स्मृत्वा आसनोपवेशने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ इति मन्त्रेण पद्माद्यन्यतमप्रकारेणासने उपविश्य ॥ अपसर्पन्त्विति मन्त्रद्वयस्य वराहऋषिः । श्रीशिवो देवता । अनुष्टुप्छन्दः ॥ भूतोत्सारणे विनियोगः ॥ ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ॥ सर्वेषामविरोधेन पूजाकर्म समारभे ॥ इति मन्त्रद्वयं पठित्वा आत्मानं शङ्करं ध्यायन् क्रूरया दृष्ट्या दिव्यान् । उपर्युपरि तालत्रयकरणेनान्तरिक्षान् । भूमौ वामपादपार्ष्णिप्रहारेण भौमांश्च भूतानुत्सार्य । ॐ तपः सत्यात्मने नमः इति ब्रह्मास्त्रमन्त्रेण वा ॐनमः सुदर्शनायास्त्राय फट् इति सुदर्शनमन्त्रेण वात्मनः समन्ताच्छोटिकाशब्दैर्दिग्बन्धनं चरेत् ॥ इत्या**सनादिविधिः** ॥ **अथ दीपस्थापनं** करिष्ये इति सङ्कल्प्य । तैलदीपश्चेद्वामे घृतदीपश्चेद्दक्षिणे जलेन त्रिकोणमण्डलं कृत्वा । दीपाधारमण्डलाय नमः इति गन्धाक्षतपुष्पैस्तत्सम्पूज्य । तत्र प्राङ्मुखमुदङ्मुखं वा द्वित्र्यादिवर्तियुतं

सस्नेहमधःकल्पितोन्नतस्तम्भं दीपायतनं संस्थाप्य । उद्दीप्यस्व जातवेद इतिवैदिकमन्त्रेण दीपं प्रज्वाल्य ॐ दीं दीपनाथाय नमः इति दीपं सम्पूज्य । भो दीप देवतारूप कर्मसाक्षिन्नविघ्नकृत् ॥ यावत् कर्म करिष्यामि तावत् त्वं सुस्थिरो भव ॥ इति प्रार्थयेत् **इति दीपस्थापनम् ॥ अथ भूतशुद्धिः ॥** ॐ ह्रीं हंसः सोहं, इति मन्त्रेण मूलाधारस्थितां कुण्डलिनीं हृदयमानीय तया सह हृदयस्थितां जीवकलां सुषुम्नामार्गेण ब्रह्मरन्ध्रं नीत्वा तत्र सहस्रदलपद्मस्थे परमात्मनि तां संयोज्य । ॐ वं फट् पादादिजान्वन्तं पृथ्वीमण्डलं जलमण्डले प्रविलापयामि । ॐ लं फट् जान्वादिनाभ्यन्तं जलमण्डलं तेजोमण्डले प्रविलापयामि ॥ ॐ रं फट् नाभ्यादिहृदयान्तं तेजोमण्डलं वायुमण्डले प्रविलापयामि ॥ ॐ यं फट् हृदयादि भ्रूमध्यान्तं वायुमण्डलं नभोमण्डले प्रविलापयामि ॥ ॐ हं फट् भ्रूमध्यादिब्रह्मरन्ध्रान्तं नभोमण्डलं अहङ्कारे प्रविलापयामि ॥ अहङ्कारं महत्तत्त्वे प्रविलापयामि ॥ महत्तत्वं प्रकृतौ प्रविलापयामि ॥ प्रकृतिं परब्रह्मणि प्रविलापयामि ॥ इति भूतादि प्रविलाप्य । वामकुक्षौ वासनामयं कृष्णवर्णं भीषणस्वरूपं रक्तनेत्रश्मश्रुं खङ्गचर्मधरं अधोमुखं अङ्गुष्ठपारिमाणं पापपुरुषं विचिन्त्य तेन सह निजदेहं षोडशवारमावृत्तेन यंबीजेन वामनासया वायुमापूरयन् विशोष्य, चतुःषष्टिवारमावृत्तेन रंबीजेन कुम्भकं कुर्वन् दग्ध्वा पुनर्यंबीजं द्वात्रिंशद्वारमावर्तयन् पापपुरुषभस्मना सह दक्षिणनासया वायुमुत्सृजेत् ॥ अवशिष्टं स्वदेहभस्म वमिति सुधाबीजेन क्लेदयित्वा । लमिति पृथ्वीबीजेन कनकगोलवद्घनीकृत्य । हमित्याकाशबीजेन सावयवं कृत्वा ततः परब्रह्मणः सकाशात् प्रकृतिं, प्रकृतेर्महत्तत्त्वम्, महतोऽहङ्कारम्, अहङ्कारादाकाशम्, आकाशाद्वायुम्, वायोरग्निम्, अग्नेरपः, अभ्यः पृथिवीम्, पृथिव्या ओषधीः, ओषधिभ्योऽन्नम्, अन्नाद्रेतः, रेतसः शुद्धपुरुषदेहं चोत्पाद्य, ॐ ह्रीं हंसः सोहं इति जीवसहितां कुण्डलिनीं परमात्मनः पृथक्कृत्य, सुषुम्नामार्गेण हृदयमानीय, तत्र जीवं

संस्थाप्य, कुण्डलिनीं मूलाधारं नयेत् ॥ योगसाध्योऽयं विधिः ॥ तदसम्भवे विभावनमात्रम् ॥ एतावदशक्तौ लं वं रं यं हं इति पृथिव्यप्तेजोवाय्वाकाशबीजैः पूर्वोक्तसङ्ख्यया पूरकं कुर्वन् पृथिव्यादिभूतान्युत्तरोत्तरस्मिन् प्रविलीनानि विचिन्त्य, यं रं इति वाय्वग्निबीजाभ्यां तथैव कुम्भकं कुर्वन् पापदेहं पापपुरुषेण सह शुष्कं दग्धं च मत्वा पुनः हं यं रं वं लं इति विलोमपठितैः पूर्वोक्तपञ्चभूतबीजैरुक्तसंङ्ख्यया रेचकं कुर्वन् शुद्धदेहोत्पत्तिं विभाव्य ॐ हंसः सोऽहमितिमन्त्रेण कुम्भकं कृत्वा तत्र जीवं प्रविष्टं भावयेत् ॥ इति**भूतशुद्धिः** ॥ **अथ प्राणप्रतिष्ठा** ॥ प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः। ऋग्यजुःसामानि च्छन्दांसि । चैतन्यमयी प्राणशक्तिर्देवता । आं बीजम् ह्रीं शक्तिः । क्रों कीलकम् मम प्राणप्रतिष्ठापने विनियोगः ॥ ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो नमः इति शिरसि ॥ ऋग्यजुःसामभ्यश्छन्दोभ्यो नमः इति मुखे । चैतन्यमयप्राणशक्तये नमः इति हृदये । आं बीजाय नमः इति गुह्ये । ह्रीं शक्तये नमः इति पादयोः । क्रों कीलकाय नमः इति नाभौ । मम प्राणप्रतिष्ठापने विनियोगाय नमः इति हृदये कराञ्जलिं कुर्यात् ॥ इति ऋष्यादिन्यासः ॥ अथ हृदयादिषडङ्गः ॥ ॐ अं कं खं गं घं ङं । आं । आकाशवायुतेजोजलपृथिव्यात्मने नमः हृदयाय नमः ॥ ॐ इं । चं छं जं झं ञं । ईं । शब्दस्पर्शरूपरसगन्धात्मने नमः शिरसे स्वाहा ॥ ॐ उं । टं ठं डं ढं णं । ऊं । श्रोत्रत्वक्चक्षुजिह्वाघ्राणात्मने नमः शिखायै वषट् ॥ ॐ एं । तं थं दं धं नं । ऐं । वाक्पाणिपादपायूपस्थात्मने नमः कवचाय हुम् ॥ ॐ ओं । पं फं बं भं मं । औं । वचनादानगमनविसर्गानन्दात्मने नमः नेत्रत्रयाय वौषट् ॥ ॐ अं । यं रं लं वं शं षं सं हं ळं क्षं । अः । मनोबुध्यहङ्कारचित्तात्मने नमः अस्त्राय फट् ॥ **अथ ध्यानम्** ॥ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः । पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्चबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसितापीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राण-

शक्तिः परा नः ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य ॥ हृदि हस्तं दत्वा । ॐ आं ह्रीं क्रों । ॐ यं रं लं वं शं षं सं हों । ॐ क्षं सं हं सः ह्रीं ॐ हंसः मम प्राणा इह प्राणाः ॥ पुनः । ॐ आं ह्रीं क्रोमित्यादि हंस इत्यन्तं प्राग्वदुच्चार्य । मम जीव इह स्थितः ॥ पुनः ॐ आं ह्रीं क्रोमित्यादिपूर्ववत् पठित्वा । मम सर्वेन्द्रियाणि ॥ पुनः ॐ आं ह्रीं कोमित्यादिप्राग्वदुक्त्वा । मम वाङ्मनश्चक्षुश्श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । ॐ क्षं सं हं सः ह्रीं ॐ ॥ इति प्राणान् प्रतिष्ठाप्य । गर्भाधानादिपञ्चदशसंस्कारसिध्यर्थं पञ्चदशप्रणवावृत्तीः करिष्ये इति सङ्कल्प्य तथा कुर्यात् ! एतावद्भिस्तृतप्राणप्रतिष्ठाप्रयोगाशक्तौ, हृदि हस्तं दत्वा ॐ आं सोऽहम् । इति त्र्यक्षरेण वा । ॐ आं ह्रीं क्रों, इति त्र्यक्षरेण वा मन्त्रेण त्रिरुच्चरितेन प्राणप्रतिष्ठां कुर्यात् । इति प्राणप्रतिष्ठा ॥ **अथान्तर्मातृकान्यासः** ॥ अन्तर्मातृकान्यासस्य ब्रह्मा ऋषिः । गायत्री च्छन्दः । मातृका सरस्वती देवता । हलो बीजानि अचः शक्तयः । बिन्दवः कीलकानि । महालक्ष्मीयजनाङ्गत्वेन अन्तरङ्गेषु न्यासे विनियोगः । ब्रह्मणे ऋषये नमः शिरसि । गायत्री च्छन्दसे नमो मुखे । मातृकासरस्वत्यै देवतायै नमो हृदये । हल्भ्यो बीजेभ्यो नमो गुह्ये । अज्भ्यः शक्तिभ्यो नमः पादयोः । बिन्दुभ्यः कीलकेभ्यो नमो नाभौ । महालक्ष्मीयजनाङ्गत्वेनान्तरङ्गेषु न्यासे विनियोगाय नमः करात्र्जलौ ॥ अथ हृदयादिषडङ्गः । ॐ अं । कं खं गं घं ङं । आं । हृदयाय नमः ॥ ॐ इं । चं छं जं झं ञं । ईं । शिरसे स्वाहा । ॐ उं । टं ठं डं ढं णं । ऊं । शिखायै वषट् । ॐ एं । तं थं दं धं नं । ऐं कवचाय हुम् ॥ ॐ ओं । पं फं बं भं मं । औं नेत्रत्रयाय वौषट् । ॐ अं । यं रं लं वं शं षं सं हं ळं क्षं । अः अस्त्रायफट् ॥ **अथ ध्यानम्** ॥ अङ्कोन्मुक्तशशाङ्ककोटिसदृशीमापीनतुङ्गस्तनीं चन्द्रार्धाञ्चितशेखरां मधुमदेनालोलनेत्रद्वयाम् ॥ बिभ्राणामनिशं वरं जपवटीं शूलं कपालं करैराद्यां यौवनगर्वितां लिपितनुं वागीश्वरीमाश्रये ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य कण्ठास्थित-

विशुद्धाख्यषोडशदलकमलस्य पूर्वादिषोडशदलेषु ॐ अं नमः । ॐ आं नमः ॥ इतिषोडशस्वरान् न्यसेत् ॥ हृदयस्थितानाहताख्यद्वादशदलकमलस्यपूर्वादिद्वादशदलेषु ॐ कं नमः । ॐ खं नमः । इति ठपर्यन्तं द्वादशवर्णान् न्यसेत् ॥ नाभिस्थमणिपूराख्यदशदलस्य । दशसु दलेषु पूर्वादि ॐ डं नमः ॐ ढं नमः । इति फकारपर्यन्तं दशवर्णान् न्यसेत् ॥ लिङ्गस्य परितः स्वाधिष्ठानाख्यषड्दलस्य षट्सु दलेषु पूर्वादि ॐ वं नमः ॐ भं नमः । इति लकारपर्यन्तं षड्वर्णान् न्यसेत् ॥ गुदालिङ्गमध्यस्थाधाराख्यचतुर्दलकमलस्य चतुर्षु दलेषु ॐ वं नमः । ॐ शं नमः । ॐ षं नमः । ॐ सं नमः इति चतुरो वर्णान् न्यसेत् ॥ ततो भ्रूमध्यस्थाज्ञाख्याद्विदलपद्मस्य वामदक्षदलद्वये ॐ हं नमः । ॐ क्षं नमः इति वर्णद्वयं न्यसेत् । अत्र पद्मानामन्तस्थितत्वेन स्पर्शासम्भवात्बहिः कण्डादिषु तत्तत्स्थानस्पर्शं कृत्वान्तर्न्यासं विभावयेत् ॥ इत्यन्तर्मातृकान्यासः ॥ अथ बहिर्मातृकान्यासः ॥ तत्रादौ सृष्टिन्यासः । अस्य ऋष्यादिकं षडङ्गन्यासश्च प्राग्वत् ॥ अथ ध्यानम् पञ्चाशदर्णैरचिताङ्गभागां धृतेन्दुखण्डां कुमुदावदाताम् ॥ वराभये पुस्तकमक्षसूत्रं भजे गिरं सन्दधतीं त्रिनेत्राम् ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य । कनिष्ठाङ्गुष्ठाभ्यां अकारादिक्षकारान्तान् ॐकारपूर्वकान् नमोऽन्तान् एकपञ्चाशन्मातृकावर्णान् वक्ष्यमाणस्थानेषु न्यसेत् । ॐ अं नमः ललाटे । ॐ आं नमः मुखवृत्ते । इं दक्षिणनेत्रे । ईं वामनेत्रे । उं दक्षकर्णे । ऊं वामकर्णे । ऋं दक्षनासापुटे । ॠं वामनासापुटे । ऌं दक्षिणकपोले । ॡं वामकपोले । एं ऊर्ध्वोष्ठे । ऐं अधरोष्ठे । ओं ऊर्ध्वदन्तपङ्क्तौ । औं अधोदन्तपङ्क्तौ । अं मूर्ध्नि । अः वक्त्रे । कं दक्षबाहुमूले । खं दक्षकूर्परे । गं दक्षमणिबन्धे । घं दक्षिणकराङ्गुलिमूले । ङं दक्षिणकराङ्गुल्यग्रे । चं वामबाहुमूले । छं वामकूर्परे । जं वाममणिबन्धे । झं वामकराङ्गुलिमूले । ञं वामकराङ्गुल्यग्रे । टं दक्षिणपादसक्थिमूले । ठं दक्षपादजानुनि । डं दक्षपादगुल्फे । ढं दक्ष-

पादाङ्गुलिमूले । णं दक्षपादाङ्गुल्यग्रे । तं वामपादसक्थिमूले । थं वामपादजानुनि । दं वामपादगुल्फे । धं वामपादाङ्गुलिमूले । नं वामपादाङ्गुल्यग्रे । पं दक्षपार्श्वे । फं वामपार्श्वे । बं पृष्ठे । भं नाभौ । मं जठरे । यं हृदये । रं दक्षांसे । लं ककुदि । वं वामांसे । शं हृदादिदक्षकराग्रान्तम् । षं हृदादिवामकराग्रान्तम् । ळं हृदादिजठरान्तम् । क्षं हृदादिवदनान्तम् । **इति सृष्टिन्यासः** **अथ स्थितिन्यासः** ॥ ऋष्यादिकं प्राग्वत् देवताविश्वपालिनी शारदा ॥ ऋष्यादिषडङ्गन्यासौ प्राग्वत् ॥ अथ ध्यानम् । मृगबालं वरं विद्यां दधतोऽक्षस्रजं करैः॥ निविष्टां वल्लभस्याङ्के शम्भोरमिततेजसः ॥ मालाविद्यालसद्धस्तां वन्दे ऽहं विश्वपालिनीम् ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य उकारादिक्षकारान्तांस्त्रयोविंशतिवर्णान् दक्षपादगुल्फमारभ्य तदग्रिमेषु आसमाप्तेः पूर्वोक्तेषु त्रयोविंशातिस्थानेषु क्रमेण न्यस्य पुनःअकारादिठकारान्तानष्टाविंशतिवर्णान् ललाटादिदक्षजान्वन्तेषु पूर्वोक्तेष्वष्टाविंशतिस्थानेषु क्रमेण न्यसेत् ॥ **इति स्थितिन्यासः** ॥ **अथ संहारन्यासः** ॥ ऋष्यादिकं प्राग्वत् ॥ शत्रुसंहारिणी शारदा देवता ऋष्यादिन्यासषडङ्गन्यासौ पूर्ववत् ॥ **अथ ध्यानम्** ॥ अक्षस्रक्टङ्कसारङ्गविद्याहस्तां त्रिलोचनाम् ॥ चन्द्रमौलिं कुचानम्रां रक्ताब्जस्थां गिरं भजे ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य क्षकारमारभ्य अकारान्तान् विलोमवर्णान् सृष्टिन्यासविलोमस्थानेषु क्रमेण न्यसेत् ॥ **इति संहारन्यासः** ॥ अत्र न्यासत्रये वर्णस्थानानि समानान्येव । वर्णक्रममात्रे भेदः अत्र वानप्रस्थयत्योः सृष्टिः स्थितिः संहार इति सरलः क्रमः ॥ ब्रह्मचारिणः संहारः स्थितिः सृष्टिरिति विलोमक्रमः ॥ गृहस्थस्य आदौ सरलक्रमेण त्रयं पुनः स्थितिः संहार इति द्वयमिति पञ्चकम् ॥ एतावदशक्तौ अञ्जलिं कृत्वा तत्तदुक्तक्रमेण मातृकावर्णानुक्त्वा तानञ्जल्यन्तर्गतान्मत्वा मूर्धादिपादान्तं व्यापकत्वेन विन्यसेत् ॥ **इति त्रिविधो बहिर्मातृकान्यासः** ॥ **अथ कलामातृकान्यासः** । ऋष्यादिकं प्राग्वत् ॥ कलामातृका देवता ॥

ऋष्यादिन्यासः प्राग्वत् ॥ अथ हृदयादिषडङ्गः ॥ अं ॐ आं । हृदयाय नमः ॥ इं ॐ ईं । शिरसे स्वाहा । उं ॐ ऊं । शिखायै वषट् ॥ एं ॐ ऐं । कवचाय हुम् । ओं ॐ औं । नेत्रत्रयाय वौषट् ॥ अं ॐ अः । अस्त्राय फट् ॥ **अथ ध्यानम्** ॥ हस्तैः पद्मं रथाङ्गं गुणमथ हरिणं पुस्तकं वर्णमालां ॥ टङ्कं शुभ्रं कपालं दरममृतलसद्धेमकुम्भं वहन्तीम् ॥ मुक्ताविद्युत्पयोदस्फटिकनवजपाबन्धुभिः पञ्चवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां भारतीं तां नमामि ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य । सृष्टिक्रमेण कलासहितमातृकान्यासं कुर्यात्स यथा । प्रणवः सर्वत्र । ॐ अं निवृत्यै नमः ललाटे । आं प्रतिष्ठायै नमः मुखवृत्ते । इं विद्यायै नमः दक्षनेत्रे । ईं शान्त्यै नमः वामनेत्रे । उं इन्धिकायै नमः दक्षकर्णे । ऊं दीपिकायै नमः वामकर्णे । ऋं रेचिकायै नमः दक्षनासायाम् । ॠं मोचिकायै नमः वामनासायाम् । ऌं परायै नमः दक्षकपोले । ॡं सूक्ष्मायै नमः वामकपोले । एं सूक्ष्मामृतायै नमः ऊर्ध्वोष्ठे । ऐं ज्ञानामृतायै नमः अधरोष्ठे । ओं आप्यायिन्यै नमः ऊर्ध्वदन्तपङ्क्तौ । औं व्यापिन्यै नमः अधोदन्तपङ्क्तौ । अं तापिन्यै नमः शिरसि । अः व्योमरूपायै नमः वक्त्रे । कं सृष्ट्यै नमः दक्षबाहुमूले । खं ऋद्ध्यै नमः दक्षकूर्परे । गं स्मृत्यै नमः दक्षमणिबन्धे । घं मेधायै नमः दक्षकराङ्गुलिमूले । ङं कान्त्यै नमः दक्षकराङ्गुल्यग्रे । चं लक्ष्म्यै नमः वामबाहुमूले । छं द्युत्यै नमः वामकूर्परे । जं स्थिरायै नमः वाममणिबन्धे । झं स्थित्यै नमः वामकराङ्गुलिमूले । ञं सिद्ध्यै नमः वामकराङ्गुल्यग्रे । टं जरायै नमः दक्षपादसक्थिमूले । ठं पालिने नमः दक्षपादजानुनि । डं क्षान्त्यै नमः दक्षपादगुल्फे । ढं ईश्वर्यै नमः दक्षपादाङ्गुलिमूले । णं रत्यै नमः दक्षपादाङ्गुल्यग्रे । तं कामिकायै नमः वामपादसक्थिमूले । थं वरदायै नमः वामपादजानुनि । दं ह्लादिन्यै नमः वामपादगुल्फे । धं प्रीत्यै नमः वामपादाङ्गुलिमूले । नं दीर्घायै नमः वामपादाङ्गुल्यग्रे । पं

तीक्ष्णायै नमः दक्षपार्श्वे । फं रौद्र्यै नमः वामपार्श्वे । बं भद्रायै नमः पृष्ठे । भं निद्रायै नमः नाभौ । मं तन्द्र्यै नमः जठरे । यं क्षुधायै नमः हृदये । रं क्रोधिन्यै नमः दक्षांसे । लं क्रियायै नमः ककुदि । वं उल्कायै नमः वामांसे । शं मृत्यै नमः हृदादिदक्षकराग्रान्तम् । षं पीतायै हृदादिवामकराग्रान्तम् । सं श्वेतायै नमः हृदादि दक्षपादाग्रान्तम् । हं अरुणायै नमः हृदादिवामपादाग्रान्तम् । ळं असितायै नमः हृदादिजठरान्तम् । क्षं अनन्तायै नमः हृदादिवदनान्तम् । इति **कलामातृकान्यासः** ॥ **अथ पुरुषसूक्तन्यासः** ॥ सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायण ऋषिः । परमपुरुषो देवता । अनुष्टुप् छन्दः । अन्त्या त्रिष्टुप् । न्यासे पूजने च विनियोगः ॥ ॐ सहस्रशीर्षा० वामकराय नमः ॥ ॐ पुरुषएवेदंसर्वंयद्० दक्षिणकराय नमः ॥ ॐ एतावानस्य० वामपादाय नमः ॥ ॐ त्रिपादूर्ध्व० दक्षिणपादाय नमः ॥ ॐ तस्माद्विराळ० वामजानुने नमः ॥ ॐ यत्पुरुषेण० दक्षिणजानुने नमः ॥ ॐ तं यज्ञं बर्हि० वामकट्यै नमः ॥ ॐ तस्मा-सर्वहुतःसं० दक्षिणकट्यै नमः ॥ ॐ तस्माद्यज्ञासर्वहुतऋच नाभ्यै नमः ॥ ॐ तस्मादश्वा० हृदयाय नमः ॥ ॐ यत्पुरुषं० कण्ठाय नमः ॥ ॐ ब्राह्मणोऽस्य० वामभुजाय नमः अथवा वामकुक्ष्यै नमः ॥ ॐ चन्द्रमा म० दक्षिणभुजाय नमः अथवा दक्षिणकुक्ष्यै नमः ॥ ॐ नाभ्याआसी० मुखाय नमः ॥ ॐ सप्तास्यासन्० नेत्राभ्यां नमः ॥ ॐ यज्ञेन यज्ञ० शिरसे नमः ॥ **अथ हृदयादि पञ्चाङ्गन्यासः** ॐ ब्राह्मणोऽस्य० हृदयाय नमः ॥ ॐ चन्द्रमा मन० शिरसे स्वाहा ॥ ॐ नाभ्या आसी० शिखायै वषट् ॥ ॐ सप्तास्या० कवचाय हुम् । ॐ यज्ञेन यज्ञं० अस्त्राय फट् ॥ इति **पुरुषसूक्तन्यासः** ॥ **अथ श्रीसूक्तन्यासः** ॥ हिरण्यवर्णामिति पञ्चदशर्चस्य सूक्तस्य आनन्दकर्दमचिक्लीता इन्दिरासुता ऋषयः ॥ श्रीर्देवता ॥ अनुष्टुपछन्दः । पञ्चमीषष्ठ्यौ त्रिष्टुभौ । चतुर्दशी-

पञ्चदश्यौ प्रस्तारपङ्क्ती । ह्रीं बीजम् । श्रीं शक्तिः । क्लीं कीलकम् । न्यासे पूजने च विनियोगः ॥ ॐ हिरण्यवर्णां शिरसि० । ॐ तांमआवह दक्षवामनेत्रयोः ॥ ॐ अश्वपूर्वां० कर्णयोः ॥ ॐ कां सोऽस्मितां० नासिकयोः ॥ ॐ चन्द्रां प्रभा० मुखे ॥ ॐ आदित्यवर्णे० कण्ठे ॥ ॐ उपैतु मां० बाह्वोः ॥ ॐ क्षुत्पिपासा० हृदये ॥ ॐ गन्धद्वारां० नाभौ ॥ ॐ मनसःकाम० गुह्ये ॥ ॐ कर्दमेन० गुदे । ॐ आपःस्रजं० ऊर्वोः ॥ ॐ आर्द्रांयष्करि० जान्वोः ॥ ॐ आर्द्रांपुष्करि० जङ्घयोः । ॐ तां मआवह० पादयोः इति **श्रीसूक्तन्यासः** ॥ **अथ नवार्णकल्पोक्ता एकादशन्यासाः** ॥ तत्र मायाबीजपूर्विकाणामेकपञ्चाशन्मातृकाणां सृष्टिन्यासोक्तस्थानेषु न्यासो देवतासारूप्यापादकः **प्रथमः** ॥ **अथ द्वितीयः** ॥ ॐ ऐं ह्रीं क्लीं कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं अनामिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं मध्यमाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं तर्जनीभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं अङ्गुष्ठाभ्यां नमः ॐ ऐं ह्रीं क्लीं करतलाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं करपृष्ठाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं मणिबन्धाभ्यां नमः ॥ **इति न्यस्य** पुनर्बीजत्रयेणैव हृदयादिषडङ्गं कुर्यादिति **जाड्यविनाशको द्वितीयः सारस्वतन्यासः** ॥ ॐ ह्रीं ब्राह्मी मां पूर्वतः पातु । ॐ ह्रीं माहेश्वरी ममाग्नेय्यां पातु । ॐ ह्रीं कौमारी मां दक्षिणस्यां पातु । ॐ ह्रीं वैष्णवी मां नैर्ऋत्यां पातु । ॐ ह्रीं वाराही मां प्रतीच्यां पातु । ॐ ह्रीं ऐन्द्री मां वायव्यां पातु । ॐ ह्रीं चामुण्डा मामुदीच्यां पातु । ॐ ह्रीं महालक्ष्मीर्मामीशान्यां पातु । ॐ ह्रीं व्योमेश्वरी मामूर्ध्वे पातु । ॐ ह्रीं सप्तद्वीपेश्वरी मां भूमौ पातु । ॐ ह्रीं नागेश्वरी मां पाताले पातु ॥ **इति त्रैलोक्यजयापादकस्तृतीयो मातृगणन्यासः** ॥ ॐ ह्रीं कमलाङ्कुशमण्डितानन्दजा मे पूर्वाङ्गं पातु । ॐ ह्रीं खड्गपात्रकरा रक्तदन्तिका मे दक्षिणाङ्गं पातु । ॐ ह्रीं पुष्पपल्लवादिशाकहस्ता शाकम्भरी मे पश्चिमाङ्गं पातु । ॐ धनुर्बाणहस्ता दुर्गा मे वामाङ्गं पातु । ॐ ह्रीं शिरःपात्रकरा

भीमा मे मस्तकादिपादान्तमङ्गं पातु । ॐ ह्रीं चित्रकान्तिभृङ्ग्रामरी मे पादादिमस्तकान्तमङ्गं पातु ॥ **इति जरामृत्युहरश्चतुर्थः षड्देवीन्यासः** ॥ ॐ ह्रीं ब्रह्मा मे पादादिनाभ्यन्तमङ्गं पातु । ॐ ह्रीं विष्णुर्मे नाभ्यादिहृदयान्तमङ्गं पातु । ॐ ह्रीं रुद्रो मे हृदयादिशिखान्तमङ्गं पातु । ॐ ह्रीं हंसो मे पादौ पातु । ॐ ह्रीं वैनतेयो मे करौ पातु । ॐ ह्रीं वृषभो मे नेत्रे पातु । ॐ ह्रीं गजाननो मे सर्वाङ्गं पातु । ॐ ह्रीं आनन्दमयो हरिर्मे परापरौ देहभागौ पातु ॥ **इति सर्वार्थसाधकः पञ्चमो ब्रह्मादिन्यासः** ॥ ॐ ह्रीं अष्टादशभुजा महाललक्ष्मीर्मे मध्यदेहं पातु । ॐ ह्रीं अष्टभुजा महासरस्वती मे ऊर्ध्वदेहं पातु । ॐ ह्रीं दशभुजा महाकाली मे अधोदेहं पातु । ॐ ह्रीं सिंहो मे हस्तौ पातु । ॐ ह्रीं परहंसो मे नेत्रे पातु । ॐ ह्रीं प्रेतासनो महिषो मे पादौ पातु । ॐ ह्रीं चण्डिकायुक्तो महेशो मे सर्वाङ्गं पातु ॥ **इति सद्गतिदः षष्ठो महालक्ष्म्यादिन्यासः** ॥ ॐ ऐं नमः ब्रह्मरन्ध्रे । ॐ ह्रीं नमः दक्षनेत्रे । ॐ क्लीं नमः वामनेत्रे । ॐ चां नमः दक्षिणकर्णे । ॐ मुं नमः वामकर्णे । ॐ डां नमः दक्षिणनासापुटे । ॐ यैं नमः वामनासापुटे ॥ ॐ विं नमः मुखे । ॐ चैं नमः गुदे । **इति रोगविनाशकः सप्तमो मूलवर्णन्यासः** ॥ ॐ ऐं नमः गुदे । ॐ ह्रीं नमः मुखे । ॐ क्लीं नमः वामनासापुटे । ॐ चां नमः दक्षिणनासापुटे । ॐ मुं नमः वामकर्णे । ॐ डां नमः दक्षिणकर्णे । ॐ यैं नमः वामनेत्रे । ॐ विं नमः दक्षिणनेत्रे । ॐ च्चें नम ब्रह्मरन्ध्रे । **इति सर्वदुःखहरोऽष्टमो मूलमन्त्रन्यासः** ॥ मूलम् । मूर्धादिपादान्तं व्यापकत्वेन पूर्ववत् तत्रैव न्यसेत् । मूलं मूर्धादिपादान्तं दक्षिणाङ्गे न्यसेत ॥ पुनर्मूलं पादादिमूर्धान्तदक्षिणाङ्गे न्यसेत् ॥ मूलं पश्चिमाङ्गे मूर्धादिपादान्तं व्यापकत्वेन विन्यसेत् । पुनर्मूलम् । पादादिमूर्धान्तं तत्रैव न्यसेत् । मूलं वामाङ्गे मूर्धादिपादान्तं व्यापकत्वेन विन्यसेत् ॥ पुनर्मूलम् । पादादिमूर्धान्तं तत्रैव

न्यसेत् ॥ **इति देवत्वप्रापको नवमो मूलमन्त्रव्यापकन्यासः** ॥ समस्तमूलमन्त्रेण हृदयादिषडङ्गो दशमस्त्रैलोक्यवशीकरणन्यासः ॥ ऐं बीजमुच्चार्य सप्तशतीप्रथमाध्यायस्थं खङ्गिनीशूलिनीत्यादिश्लोकपञ्चकं पाठित्वोभयमपि कृष्णवर्णं ध्यात्वा मूर्धादिपादान्तं व्यापकत्वेन न्यसेत् ॥ एवं ह्रीं बीजमुच्चार्य चतुर्थाध्यायस्थं शूलेन पाहि नो देवीत्यादिश्लोकचतुष्टयं पाठित्वोभयमपि बालार्कवर्णं ध्यात्वा पूर्ववत् सर्वाङ्गे न्यसेत् ॥ ततः क्लीं बीजमुच्चार्य एकादशाध्यायस्थं सर्वस्वरूपे सर्वेशे इत्यादिश्लोकपञ्चकं पाठित्वोभयमपि श्वेतवर्णं ध्यात्वा पूर्ववत्सर्वाङ्गे न्यसेत् ॥ **इति पूर्वोक्तदशन्यासफलप्रदएकादशो न्यासः** ॥ **इति नवार्णकल्पोक्ता एकादशन्यासाः** ॥ **अथ स्वदेहे देवतापीठन्यासः** ॥ प्रणवः सर्वत्र ॥ मूलाधारे ॐ आं आधारशक्तये नमः ॥ स्वाधिष्ठाने ॐ कूं कूर्माय नमः ॥ नाभौ । ॐ अं अनन्ताय नमः ॥ हृदये । ॐ पृं पृथिव्यै नमः । ॐ सुं सुधासिन्धवे नमः । ॐ श्वें श्वेतद्वीपाय नमः । ॐ कं कल्पवृक्षोद्यानाय नमः । ॐ हें हेमप्रासादाय नमः ॥ ॐ हें हेमसिंहासनाय नमः ॥ दक्षांसे । ॐ धं धर्माय पीठपादाय नमः । वामांसे । ॐ ज्ञां ज्ञानाय पीठपादाय नमः । वामोरौ । ॐ वैं वैराग्याय पीठपादाय नमः । दक्षिणोरौ । ॐ ऐं ऐश्वर्याय पीठपादाय नमः । वदने । ॐ अं अधर्माय पीठगात्राय नमः । वामपार्श्वे । ॐ अं अज्ञानाय पीठगात्राय नमः । नाभौ । ॐ अं अवैराग्याय पीठगात्राय नमः । दक्षिणपार्श्वे । ॐ अं अनैश्वर्याय पीटगात्राय नमः । पुनर्हृदये । ॐ आं आनन्दकन्दाय नमः । ॐ सं संविन्नालाय नमः । ॐ तं तत्वपद्माय नमः । ॐ प्रं प्रकृत्यात्मकपत्रेभ्यो नमः । ॐ विं विकृत्यात्मककिञ्जल्केभ्यो नमः । ॐ पं पञ्चाशद्वर्णकर्णिकायै नमः । ॐ वं वह्निमण्डलाय नमः । ॐ सूं सूर्यमण्डलाय नमः । ॐ चं चन्द्रमण्डलाय नमः । ॐ सं सत्त्वाय नमः । ॐ रं रजसेनमः । ॐ तं तमसे नमः । ॐ आं आत्मने नमः । ॐ अं अन्तरात्मने नमः । ॐ पं परमात्मने नमः । ॐ ह्रीं ज्ञानात्मने नमः

ॐ मां मायातत्त्वाय नमः । ॐ कं कलातत्त्वाय नमः । ॐ विं विद्यातत्त्वाय नमः ॐ पं परतत्त्वाय नमः । इति न्यस्य योनिमुद्रां प्रदर्शयेत् ॥ ततः स्वहृदयकमले पीठोपरि चिन्मयीं तेजोरूपां महालक्ष्मीं ध्यात्वान्तर्यागं कुर्यात् ॥ ॐ नमश्चण्डिकायै कुण्डलिनीजलेन पाद्यार्घ्याचमनीयानि कल्पयामि प्रणवस्सर्वत्र योजनीयः ॥ नमश्चण्डिकायै अप्तत्त्वेन स्नानं कल्पयामि ॥ नमश्चण्डिकायै दिशोवासांसि कल्पयामि ॥ नमश्चण्डिकायै महीगुणं गन्धान् कल्पयामि ॥ नमश्चण्डिकायै अमायानहङ्कारारागामदामोहादम्भाद्वेषाक्षोभामत्सरालोभान् दश पुष्पाणि कल्पयामि ॥ नमश्चण्डिकायै वायुतत्त्वं धूपं कल्पयामि ॥ नमश्चण्डिकायै वह्नितत्त्वं दीपं कल्पयामि ॥ नमश्चण्डिकायै परामृतं नैवेद्यं कल्पयामि ॥ नमश्चण्डिकायै द्वैतं ताम्बूलं कल्पयामि ॥ नमश्चण्डिकायै दाक्षिण्यं दक्षिणां कल्पयामि ॥ नमश्चण्डिकायै सत्कर्मणः फलं फलं कल्पयामि ॥ मनश्चण्डिकायै सूर्यं नीराजनं कल्पयामि ॥ नमश्चण्डिकायै चन्द्रं कर्पूरदीपं कल्पयामि ॥ नमश्चण्डिकायै अहिंसेद्रियजयदयाक्षमाज्ञानानि पञ्च पुष्पाञ्जलीन् कल्पयामि ॥ नमश्चण्डिकायै नभश्छत्रं कल्पयामि ॥ नमश्चण्डिकायै प्राणांश्चामराणि कल्पयामि ॥ नमश्चण्डिकायै अनाहतध्वनिं गीतं कल्पयामि ॥ नमश्चण्डिकायै चञ्चलां मतिं नर्तकीं कल्पयामि ॥ नमश्चण्डिकायै मनोऽश्वं कल्पयामि ॥ नमश्चण्डिकायै अहङ्कारं गजं कल्पयामि ॥ इति ॥ मनः कल्पितैरुपचारैः सम्पूज्यान्तर्होमं कुर्यात् ॥ तत्र मूलाधारं कुण्डं, कुण्डलिनीं प्रदीप्तमग्निं, मनःस्रुवं, सुपुम्नां स्रुचं, कामक्रोधादीन् हविर्द्रव्यं च विचिन्त्य, कामं जुहोमि स्वाहा । क्रोधं जुहोमि स्वाहा । लोभं जुहोमि स्वाहा । मोहं जुहोमि स्वाहा । मदं जुहोमि स्वाहा । इति हुत्वा । अविद्योपात्तसकलधर्माधर्मतत्कार्यरूपं निखिलं प्रपञ्चं जुहोमि स्वाहा । इति पूर्णाहुतिं जुहुयादित्यन्तर्होमं कृत्वा । ततो मूलाधारात्कुण्डलिनीमुत्थाप्य ब्रह्मरन्ध्रं नीत्वा तदुत्थामृतधाराभिर्हृदयस्थां देवतां, चण्डिकां

तर्पयामीति त्रिः सन्तर्प्य ॥ यथाशक्तिमूलं जपित्वा जपनिवेदनादिकं कृत्वा सर्वं ब्रह्ममयं भावयेत् ॥ अथ बहिर्यागः ॥ तत्रादौ कलशस्थापनम् ॥ स्ववामभागे जलेन त्रिकोणषट्कोणवृत्तभूपुरात्मकं मण्डलं कृत्वा ॐ कलशाधारमण्डलाय नमः इति गन्धाक्षतपुष्पैस्तदभ्यर्च्य तत्रास्त्रक्षालितमाधारं निधाय ॐ मं वह्निमण्डलाय दशकलात्मने कलशाधाराय नमः इति तं सम्पूज्य । तदुपरि तान्त्विकंप्रागादिक्रमेण वह्नेर्दशकलाः पूजयेत् ॥ ॐ मं धूम्रार्चिषे नमः । ॐ यं ऊष्मायै नमः । ॐ रं ज्वलिन्यै नमः ॥ ॐ लं ज्वालिन्यै नमः ॥ ॐ वं विस्फुलिङ्गिन्यै नमः ॥ ॐ शं सुश्रियै नभः ॥ ॐ षं सुरूपायै नमः ॥ ॐ सं कपिलायै नमः ॥ ॐ हं हव्यवहायै नमः ॥ ॐ क्षं कव्यवहायै नमः ॥ इति वह्नेर्दशकलाः सम्पूज्य ॥ तत्रास्त्रमन्त्रक्षालितं कलशं संस्थाप्य । ॐ अं सूर्यमण्डलाय द्वादशकलात्मने कलशाय नमः इति तं सम्पूज्य कलशमुद्रां प्रदर्श्य । तदुपरि पूर्ववत् ॐ कं भं तपिन्यै नमः । ॐ खं बं तापिन्यै नमः। ॐ गं फं धूम्रायैनमः । ॐ घं पं मरीच्यै नमः । ॐ ङं नं ज्वालिन्यै नगः । ॐ चं धं रुच्यैनमः । ॐ छं दं सुषुम्नायै नमः । ॐ जं थं भोगदायै नमः । ॐ झं तं विश्वायै नम । ॐ ञं णं बोधिन्यै नम । ॐ टं ढं धारिण्यै नमः । ॐ ठं डं क्षमायै नमः ॥ इति । सूर्यस्य द्वादश कलाः सम्पूज्य ॥ ततो विलोममातृकाविलोममूलं च पठन् शुद्धजलेन कलशमापूर्य ॥ ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ इति सूर्यं प्रार्थ्य ॥ ॐ आवाहयामि देवि त्वां पूजार्थमिह सुन्दरि ॥ एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ इति गङ्गादिनदीरावाह्य । ॐ क्रों इत्यङ्कुशमुद्रया सूर्यमण्डलात्तीर्थान्याकृष्य कलशजले संयोज्य वमित्यमृतबीजं सप्तवारं जपन् तज्जलं धेनुमुद्रयामृतीकृत्य ॥ ॐ ऊं सोममण्डलाय षोडशकलात्मने कलशामृताय नमः इति मन्त्रेण जलं सम्पूज्य ।

तत्र प्राग्वत् चन्द्रस्य षोडशकलाः तान्त्रिकप्रागादिप्रदक्षिणं पूजयेत् ॥ ॐ अं अमृतायै नमः । ॐ आं मानदायै नमः । ॐ इं पूषायै नमः । ॐ ईं तुष्ट्यै नमः । ॐ उं पुष्ट्यै नमः । ॐ ऊं रत्यै नमः । ॐ ऋं धृत्यै नमः । ॐ ॠं शशिन्यै नमः । ॐ लृं चन्द्रिकायै नमः । ॐ ॡं कान्त्यै नमः । ॐ एं ज्योत्स्नायै नमः । ॐ ऐं श्रियैनमः । ॐ ओं प्रीत्यै नमः । ॐ औं अङ्गदायै नमः । ॐ अं पूर्णायै नमः । ॐ अः पूर्णामृतायै नमः ॥ इति सम्पूज्य ततो जले अष्टवारं मूलं जपित्वा मत्स्यमुद्रया आच्छाद्यास्त्रमन्त्रेण चक्रमुद्रया वा संरक्षेत् ॥ ततः देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोऽसि तदा कुम्भ विष्णुना विधृतः स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ त्वयि सर्वाणि भूतानि यतः कामप्रदो भवान् ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ इति प्रार्थयेत् ॥ एतावदशक्तौ भूमौ जलेन त्रिकोणमण्डलं कृत्वा तत्र साधारं कलशं संस्थाप्य प्राग्वत् जलमापूर्य ब्रह्माण्डोदरतीर्थानीत्यादिश्लोकैस्तीर्थान्यावाह्य गन्धादिभिः कलशं सम्पूज्य कलशमुद्रां दर्शयेदिति **कलशस्थापनम्** ॥ **अथ शङ्खस्थापनपूजने** ॥ स्वदक्षिणे पुरतः जलेन त्रिकोणमण्डलं कृत्वा गन्धपुष्पाक्षतैरभ्यर्च्य तत्र प्रक्षालितमाधारं संस्थाप्य ॐ मं वह्निमण्डलाय दशकलात्मने चण्डिकार्घ्यपात्रासनाय नमः इति मन्त्रेण तं सम्पूज्य तदुपरि ॐ क्लीं महाजलचराय हुं फट् स्वाहा पाञ्चजन्याय नमः इति मन्त्रेण क्षालितं शङ्खं संस्थाप्य । ॐ अं सूर्यमण्डलाय द्वादशकलात्मने चण्डिकार्घ्यपात्राय नमः इति मन्त्रेण तं सम्पूज्य । शङ्खमुद्रां प्रदर्श्य मूलेन कलशाद्भिस्तमापूर्य । ॐ ऊं सोममण्डलाय षोडशकलात्मने चण्डिकार्घ्यामृताय नम इति जलं सम्पूज्य अष्टवारं मूलेनाभिमन्त्र्य । ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि ॥ तन्नः शङ्खः प्रचोदयात् ॥ इति शङ्खगायत्रीं पठित्वा त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः स्वयम् ॥ नतोऽसि र[illegible]वैश्च पाञ्चजन्य

नमोऽस्तु ते इति नत्वा । तज्जलं किञ्चित्कलशजले क्षिपेत् ॥ एतावदशक्तौ प्रणवेन कलशाद्भिः शङ्खमापूर्य पाञ्चजन्याय नमः इति शङ्खं सम्पूज्य शङ्खगायत्रीं जपित्वा त्वं पुरा सागरोत्पन्न इति नमस्कुर्यात् ॥ **इति शङ्खस्थापनपूजने** ॥ शङ्खजलं उपचारसमर्पणे किञ्चित् किञ्चिदुपयुञ्जीत ॥ शङ्खस्थजलसमाप्तौ पुनः कलशजलेन तमापूरयेत् ॥ **अथ घण्टापूजनम्** ॥ स्ववामभागे देवतापुरोभागे जलेन त्रिकोणं विरच्य गन्धादिभिः सम्पूज्य । तत्रास्त्रक्षालितां घण्टां संस्थाप्य । ॐ जयध्वने मन्त्रमातः स्वाहा घण्टायै नमः इति सम्पूज्य ॥ घण्टामुद्रां प्रदर्श्य । आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् । कुरु घण्टे रवं त्वत्र देवताह्वानलक्षणम् ॥ इति घण्टां प्रार्थ्य । ॐ येभ्यो माता० ॥ ऋक् ॥ ॐ एवापित्रे० ॥ ऋक् ॥ इति वैदिकमन्त्राभ्यां घण्टां वादयेत् ॥ **इति घण्टापूजा** ॥ अथ सम्भवे पाद्यादिपात्रस्थापनपूजनम् ॥ शङ्खघण्टयोर्मध्ये उत्तरसंस्थानि जलेन चत्वारि त्रिकोणमण्डलानि कृत्वा । तेष्वाधारचतुष्टयं निधाय तेष्वस्त्रक्षालितानि हेमरूप्यताम्राद्यन्यतमधातुमयानि पाद्यार्घ्याचमनीयार्थं त्रीणि, चतुर्थं मधुपर्कार्थं कांस्यपात्रं चेति चत्वार्युदक्संस्थानि पात्राणि निधाय पात्रत्रयं जलेनापूर्य । पाद्यपात्रे श्यामाकदूर्वाविष्णुक्रान्ताः, अर्घ्यपात्रे गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपान्, आचमनपात्रे लवङ्गजातीफलकङ्कोलानि, तत्तद्द्रव्याभावे अक्षतान् मधुपर्कपात्रे च दध्याज्यमधूनि क्षिप्त्वा सर्वाणि गन्धपुष्पादिभिः पूजयेदितिपाद्यादिपात्रस्थापनम् ॥ ततः शङ्खजलं किञ्चित्पात्रान्तरे गृहीत्वा मूलमन्त्रं जपन् पूजासामग्रीं आत्मानं च प्रोक्ष्य । गन्धादिनात्मानमलङ्कृत्य ॐ आत्मने नमः इति मूर्धहृत्पादेषु पुष्पाञ्जलीन् क्षिपेदित्यात्मपूजां विधाय सर्वं ब्रह्ममयं भावयेत् **इति पूजापूर्वाङ्गम्** ॥ **अथ देवतापूजा** ॥ तत्रादौ पूजामण्डपद्वारपूजार्थं द्वारार्घ्यं यथा ॥ ॐ ह्रः द्वारार्घ्यं साधयामि स्वाहा इत्युक्त्वा अस्त्रमन्त्रेणार्घ्यपात्रं प्रक्षाल्य । नमः इति कलशजलेनापूर्य तत्र

प्रणवेन गन्धपुष्पे निक्षिप्य धेनुमुद्रां प्रदर्श्य मूलेनाभिमन्त्रयेदिति द्वारार्घ्यं सम्पाद्य ॥ सुवर्णरत्नभूषितैर्विचित्रवेषधारिभिर्गृहीतहेमयष्टिभिर्निरुद्धसर्वदेवतैः॥ असङ्ख्यसुन्दरीजनैः पुरस्थितैरधिष्ठितं तवार्चयामि मङ्गलं भवानि रत्नमण्डपम्॥ इति श्लोकमन्त्रं पठित्वा चन्डिकामण्डपाय नमः इति गन्धाक्षतपुष्पैः पूजयेत् ॥ **अथ द्वारदेवतापूजा** ॥ ऊर्ध्वदेहल्यां ॐ गं गणपतये नमः ॥ इति गणेशं सम्पूज्य । ततो द्वारस्य क्रमेण दक्षवामशाखयोः अधोधः वक्ष्यमाणामेकैकां देवतां पूजयेत् ॥ तद्यथा दक्षशाखायां ॐ चिं चिच्छक्त्यै नमः ॥ वामशाखायां ॐ मां मायाशक्त्यै नमः ॥ दक्षशाखायां ॐ विं विघ्नराजाय नमः॥ वामशाखायां ॐ क्षें क्षेत्रपालाय नमः ॥ दक्षशाखायां ॐ गं गङ्गायै नमः ॥ वामशाखायां ॐ यं यमुनायै नमः ॥ दक्षशाखायां ॐ धां धात्रे नमः ॥ वामशाखायां ॐ विं विधात्रे नमः ॥ दक्षशाखायां ॐ शं शङ्खनिधये नमः ॥ वामशाखायां ॐ पं पद्मनिधये नमः ॥ अधोदेहल्यां ॐ वां वास्तुपुरुषाय नमः ॥ इति सम्पूज्य द्वारदक्षवामपार्श्वयोः पुरतो भूमौ पङ्क्तिशो द्वारपालिकाः पूजयेत् ॥ दक्षिणपार्श्वे ॐ ऐं ब्राम्ह्यैः नमः ॥ वामपार्श्वे ॐ ह्रीं माहेश्वर्यै नमः ॥ दक्षिणपार्श्वे ॐ क्लीं कौमार्यै नमः ॥ वामपार्श्वे ॐ श्रीं वैष्णव्यै नमः दक्षिणपार्श्वे ॐ ह्रूं वाराह्यै नमः ॥ वामपार्श्वे ॐ क्ष्म्रौं नारसिंह्यै नमः ॥ दक्षिणपार्श्वे ॐ लौं ऐन्द्र्यै नमः ॥ वामपार्श्वे ॐ ह्स्फ्रें चामुण्डायै नमः ॥ इति सम्पूज्य ॥ मण्डपस्य चतुर्द्वारत्वे मुख्यद्वारमारभ्य प्रादक्षिण्येन प्रतिद्वारमेता एव देवताः पूजयेत् ॥ मूलम् । श्रीचण्डिकायै नमः यागमण्डपद्वारदेवतादिपूजां समर्पयामि ॥ **इति पूजामण्डपद्वारदेवतापूजा ॥१॥ अथ पीठपूजा** ॥ यागमण्डपे सुवर्णादि शुद्धधातुकल्पितं तदभावे चन्दनादिकाष्ठकल्पितं चतुष्पादं चतुर्गात्रं मध्ये रम्यफलकाञ्चितं पर्यङ्कं संस्थाप्य असम्भवे उक्तरूपं पीठं विचिन्त्य स्वस्थानस्थितदेवतागणवृते मध्ये मुदा स्थापितं नानारत्नविराजिहेमविलसत्कान्तिच्छटादुर्दिनम् ॥ चञ्च-

ःकौसुमतूलिकासनयुतं पीठाङ्गदेवाश्रितं नित्यानन्दनिदानमम्बसततं वन्दे च सिंहासनम् ॥ इति श्लोकमन्त्रं पठित्वा ॐ हें हेमपर्यङ्काय नमः इति पीठं सम्पूज्य ततस्तस्याध ऊर्ध्वे च वक्ष्यमाणदेवताः पूजयेत् ॥ पर्यङ्कस्याधो भागे ऊर्ध्वक्रमेण ॐ आं आधारशक्तये नमः ॥ ॐ कूं कूर्माय नमः ॥ ॐ शें शेषाय नमः । ॐ पृं पृथिव्यै नमः । ॐ सुं सुधासिन्धवेनमः ॥ ॐ श्वें श्वेतद्वीपाय नमः ॥ ॐ कं कल्पवृक्षोद्यानाय नमः ॥ ॐ हें हेमप्रासादाय नमः ॥ इति देवताः सम्पूज्य । पर्यङ्कस्य तान्त्रिकाग्न्यादिकोणक्रमेण चतुर्षु पादेषु ॐ धं धर्माय नमः ॥ ॐ ज्ञां ज्ञानाय नमः ॥ ॐ वैं वैराग्याय नमः ॥ ॐ ऐं ऐश्वर्याय नमः ॥ तान्त्रिकप्रागादिचतुर्षु गात्रेषु ॐ अं अधर्माय नमः ॥ ॐ अं अज्ञानाय नमः ॥ ॐ अं अवैराग्याय नमः ॥ ॐ अं अनैश्वर्याय नमः ॥ अथान्तःफलके तान्त्रिकपूर्वादिचतुर्दिक्षु पूर्ववत् । ॐ जं जयायै नमः । ॐ विं विजयायै नमः । ॐ जं जयन्त्यै नमः । ॐ अं अपराजितायै नमः ॥ अग्न्यादिकोणेषु पूर्ववत् । ॐ गं गणेशाय नमः । ॐ क्षें क्षेत्रपालाय नमः । ॐ बं बटुकाय नमः । ॐ यों योगिनीभ्यो नमः॥ तदन्तस्तान्त्रिकपूर्वाद्यष्टदिक्षु प्रादक्षिण्येन । ॐ ओं ओड्याणपीठाय पीठेशपीठाम्बापीठपादुकासहिताय नमः ॥ ॐ मां मातृकापीठाय पीठेशपीठाम्बापीठपादुकासहिताय नमः॥ ॐ जां जालन्धरपीठाय पीठेशपीठाम्बापीठपादुकासहिताय नमः । ॐ कों कोल्हारगिरिपीठाय पीठेशपीठाम्बापीठपादुकासहिताय नमः । ॐ पूं पूर्णगिरिपीठाय पीठेशपीठाम्बापीठपादुकासहिताय नमः । ॐ सं संहारागिरीपीठाय पीठेशपीठाम्बापीठपादुकासहिताय नमः ॥ ॐ ओं ओणकपीठाय पीठेशपीठाम्बापीठपादुकासहिताय नमः । ॐ कां कामरूपपीठाय पीठेशपीठाम्बापीठपादुकासहिताय नमः ॥ तदन्तस्तान्त्रिकपूर्वस्यामुदक्संस्थाः । ॐ विं विष्णुमायायै नमः । ॐ चें चेतनायै नमः । ॐ बुं बुद्ध्यै नमः । ॐ निं निद्रायै नमः । ॐ क्षुं क्षुधायै नमः । ॐ छां

छायायै नमः । दक्षिणस्यां पूर्वसंस्थाः । ॐ शं शक्त्यै नमः । ॐ तृं तृष्णायै नमः । ॐ क्षां क्षान्त्यै नमः । ॐ जां जात्यै नमः । ॐ लं लज्जायै नमः । ॐ शां शान्त्यै नमः ॥ प्रतीच्यामुत्तरसंस्थाः । ॐ श्रं श्रद्धायै नमः । ॐ कां कान्त्यै नमः । ॐ लं लक्ष्म्यैनमः । ॐ धृं धृत्यै नमः । ॐ वृं वृत्त्यै नमः । ॐ स्मृं स्मृत्यै नमः । उदीच्यां पूर्वसंस्थाः । ॐ दं दयायै नमः । ॐ नीं नीत्यै नमः । ॐ पुं पुष्ट्यै नमः । ॐ तुं तुष्ट्यै नमः । ॐ मां मात्रे नमः । ॐ भ्रां भ्रान्त्यै नमः ॥ इति चतुर्विंशति देवताः सम्पूज्य ॥ तदन्तः पूर्वस्यामुत्तरसंस्थानि । ॐ मं वह्निमण्डलाय नमः । ॐ अं सूर्यमण्डलाय नमः । ॐ ऊं सोममण्डलाय नमः ॥ पश्चिमायां तथैव । ॐ सं सत्वाय नमः । ॐ रं रजसे नमः । ॐ तं तमसे नमः । दक्षिणस्यां प्राक्संस्थान् । ॐ आं आत्मने नमः । ॐ अं अन्तरात्मने नमः । ॐ पं परमात्मने नमः । ॐ ह्रीं ज्ञानात्मने नमः ॥ उत्तरस्यां तथैव । ॐ मां मायातत्त्वाय नमः । ॐ कं कलातत्त्वाय नमः । ॐ विं विद्यातत्त्वाय नमः । ॐ पं परतत्त्वाय नमः ॥ इति सम्पूज्य मध्ये ॐ ह्रीं सर्वशक्तिकमलासनाय नमः । इति पूजयेत् ॥ मूलम् । श्रीचण्डिकायै नमः पीठदेवतापूजां समर्पयामि ॥ **इति पीठदेवतापूजा** ॥ २ ॥

एवं पूजिते पीठे देवतास्थापनार्थे रक्तकौशेयवस्त्रे चन्दनागुरुकुङ्कुमकस्तूर्यादिद्रव्यैर्मध्ये बिन्दुं, तद्बाह्ये मुख्यदेवतास्थापनार्थं त्रिकोणं, तद्बहिः प्रथमावरणदेवतास्थापनार्थं किञ्चिदवकाशं त्यक्त्वाद्वितीयतृतीयावरणदेवतास्थापनार्थं षट्कोणं, तद्बाह्ये वृत्तं तद्बहिश्चतुर्थपञ्चमषष्ठावरणदेवतास्थापनार्थमष्टदलं, तद्बहिः सप्तमावरणदेवतास्थापनार्थं किञ्चिदन्तरं त्यक्त्वाष्टमनवमावरणदेवतास्थापनार्थं सावकाशरेखात्रयरूपं कोष्ठद्वयात्मकं चतुर्द्वारं भूगृहं चैवं रूपं चण्डिकायन्त्रं विलिख्य पूजापीठे संस्थाप्य । बिन्दुस्थाने प्राधानिकरहस्योक्तां चतुर्भुजां प्रकृत्यात्मिकामथवा वैकृतरहस्योक्तामष्टादशभुजां

विकृत्यात्मिकां महालक्ष्मीमूर्तिं, तदभावे चन्दनादिफलके पूर्वोक्तद्रव्यैः षट्कोणं तद्बहिरष्टदलमित्येवं रूपं यन्त्रं विलिख्य षट्कोणमध्यभागे दक्षिणाद्वामान्तं नवार्णस्य बीजत्रयं, पूर्वादिषट्सु कोणेषु प्रादक्षिण्येन नवार्णस्यान्यान् षड्वर्णान् सानुस्वारान् विलिख्य पूर्वोक्तप्राणप्रतिष्ठामन्त्रेण ममेतिपदस्थाने कृतषष्ठ्यन्तचण्डिकापदोहेन असम्भवे ' ॐ आं सोऽहं, इति त्र्यक्षरेण अथवा ॐ आं ह्रीं क्रों इति त्र्यक्षरेण प्राणप्रतिष्ठामन्त्रेण कृतप्रतिष्ठं चण्डिकायन्त्रम् । तत्राप्यसम्भवे सर्वशक्तीनामभेदाद्यथालब्धलक्षणां यां कांचन देवीमूर्तिं स्वेष्टदेवतारूपां भावयित्वा स्थापयेत् ॥ **अथ ध्यानम्** ॥ तत्र प्रकृत्यात्मकचतुर्भुजमहालक्ष्मीपूजायां तद्ध्यानं यथा । तप्तस्वर्णविभूषणां भगवतीं बालार्करक्तद्युतिं बीजापूरगदे च खेटकसुरापात्रे करैर्बिभ्रतीम् ॥ योनिं लिङ्गमहिं च मूर्ध्नि दधतीं भास्वत्किरीटोज्वलां सर्वाद्यां त्रिगुणात्मिकामिह महालक्ष्मीं हृदा चिन्तये ॥ इति ॥ विकृत्यात्मकाष्टादशभुजमहालक्ष्मीपूजायां ध्यानं यथा ॥ अक्षस्रक्कमले शरासिकुलिशं कौमोदकीं चक्रकं शूलं चापपरश्वधौ नवभुजैरूर्ध्वक्रमाद्दक्षिणैः ॥ बिभ्राणामधरक्रमात्तदितरैः शङ्खं च घण्टामथो पाशं शक्तिसुदण्डखेटकधनुःपात्राणि कुण्डीं तथा ॥ श्वेतास्यस्तनमण्डलामसितदोर्जङ्घोरुणा शोभितां चित्राकल्पविलेपमाल्यवसनां बालार्कतुल्यप्रभाम् ॥ पादापीडितसैरिभासुरगलच्छेत्रीं सुरौजोभवां ध्यायामि त्रिगुणां दशाष्टसुभुजां लक्ष्मीं महापूर्विकाम् ॥ इति ॥ पठित्वा । मूलम् ॥ श्रीचण्डिकायै नमः ध्यानं कल्पयामि ॥ इति ध्यानम् ॥ ३ ॥ **अथावाहनम्** ॥ ॐसहस्रशीर्षा० ॥ ऋक् ॥ ॐ हिरण्यवर्णां०॥ ऋक् ॥ आगत्यहृत्कमलतो मम शैलकन्ये पूजां ग्रहीतुमाखिलामिह सन्निधेहि ॥ यावद्विसर्जनमहं करवाणि तावदत्र स्थिरा भव महेशविलासिनि त्वम् ॥ इति पठित्वा अञ्जलौ पुष्पाणि गृहीत्वा तेषु निश्वस्य हृदयकमलस्थं चण्डिकारूपं चिन्मयं तेजः सुषुम्नामार्गेण ब्रह्मरन्ध्रान्नासापुटद्वारेण

पुष्पाञ्जलावागतं विभाव्यैकपञ्चाशन्मातृका उच्चरन् पुष्पाञ्जलिं मूर्तौ क्षिपेत् ॥ **मूलम्** ॥ श्रीचण्डिकायै नमः आवाहनं कल्पयामि ॥ इत्यावाहनमुद्रां प्रदर्श्य शङ्खोदकमुत्सृजेत् ॥ एवं प्रत्युपचारं शङ्खजलोत्सर्गः कर्तव्यः ॥ **इत्यावाहनम्** ॥ ४ ॥ अथावाहनाङ्गोपचाराः ॥ मूलम् चण्डिकेसन्निहिता भव ॥ श्रीचण्डिकायै नमः सन्निधानं कल्पयामि ॥ इति सान्निधापनमुद्रां प्रदर्शयेत् ॥ ५ ॥ मूलम् । चण्डिके स्थिता भव । श्रीचण्डिकायैः नमः स्थापनं कल्पयामि ॥ इति स्थापनमुद्रां प्रदर्शयेत् ॥ ६ ॥ मूलम् चण्डिके सन्निरुद्धा भव ॥ चण्डिकायै नमः सान्निरोधं कलपयमि ॥ इति सान्निरोधिनीं मुद्रां प्रदर्शयेत् ॥ ७ ॥ मूलम् । चण्डिके सम्मुखी भव । श्रीचण्डिकायैनमः सम्मुखीकरणं कल्पयामि ॥ इति सम्मुखीकरणीं मुद्रां दर्शयेत् ॥ ८ ॥ मूलम् । चण्डिकेऽवगुण्ठिता भव ॥ श्रीचण्डिकायै नमः अवगुण्ठनं कल्पयामि । इत्यवगुण्ठनमुद्रां दर्शयेत् ॥ ९ ॥ ततः प्रतिमायां मूलेन हृदयादिषडङ्गं न्यस्य मूलं चण्डिके सङ्कलिता भव । श्रीचण्डिकायै नमः । सङ्कलीकरणं कल्पयामि ॥१०॥ मूलम् । चण्डिके अमृतीकृता भव ॥ श्रीचण्डिकायै नमः अमृतीकरणं कल्पयामि ॥ इति धेनुमुद्रां प्रदर्शयेत् ॥ ११ ॥ मूलम् । श्रीचण्डिके परमीकृता भव । श्रीचण्डिकायै नमः परमीकरणं कल्पयामि ॥ इति महामुद्रां दर्शयेत् ॥ १२ ॥ मुद्राः प्रागुक्ताः ॥ स्थिरमूर्तिष्वावाहननिषेधात्सन्निधापनादयस्तदङ्गोपचारा अपि न कार्याः ॥ **अथ स्वागतम्** ॥ आगताह्यसि मदर्थनयात्रार्चां ग्रहीतुमवनीधरकन्ये ॥ स्वागतं भवतु ते कुरु मातर्मां कृतार्थमनुकम्पनदृष्ट्या ॥ मूलम् । श्रीचण्डिकायै नमः स्वागतं कल्पयामि ॥ १३ ॥ **अथासनम्** ॥ ॐपुरुषएवेदं० ॥ ऋक् ॥ ॐ तां मआवह० ॥ ऋक् ॥ कनकमयवितर्दिस्थापिते तूलिकाढ्ये विविधकुसुमकीर्णे कोटिबालार्कवर्णे ॥ भगवतिरमणीये रत्नसिंहासनेऽस्मिन्नुपविश पदयुग्मं हेमपीठे निधाय ॥ मूलम् ॥ श्रीचण्डिकायै नमः आसनं समर्पयामि ॥

उपचारोपयुक्तद्रव्यालाभे तत्तत्स्मृत्वा पुष्पाक्षतान्यतरत्समर्प्य शङ्खजलोत्सर्गः कार्यः ॥ १४ ॥ आसनानन्तरं, चतुर्भुजा प्राधानिकोक्ता प्रकृतिः पूज्या चेत् मातुलिङ्गाद्याश्चतस्रोऽस्त्रमुद्रा दर्शयितव्याः ॥ वैकृतोक्ताष्टादशभुजा विकृतिः पूज्या चेदक्षमालाद्या अष्टादश दर्शयितव्याः ॥ मूलम् । श्रीचंण्डिकायै नमः अस्त्रमुद्रादर्शनं कल्पयामि ॥ मुद्राः प्रागुक्ताः ॥ १५ ॥ **अथ पाद्यम्** ॥ ॐएतावानस्य० ॥ ऋक् ॥ ॐ अश्वपूर्वां० ॥ ऋक् ॥ दूर्वया सरसिजान्वितविष्णुक्रान्तया च सहितं कुसुमाढ्यम् ॥ पद्मयुगसदृशे पदयुगे पाद्यमेतदुररीकुरु मातः ॥ मूलम् ॥ श्रीचण्डिकायै नमः पाद्यं समर्पयामि ॥ इति पदायोरर्पयेत् ॥ १६ ॥ **अथार्घ्यम्** ॥ ॐ त्रिपादूर्ध्व० ॥ ऋक् ॥ ॐ कांसोऽस्मितां० ॥ ऋक् ॥ गन्धपुष्पयवसर्षपदूर्वासंयुतं तिलकुशाक्षतमिश्रम् ॥ हेमपात्रनिहितं सहरत्नैरर्घ्यमेतदुररीकुरु मातः ॥ मूलम् । श्रीचण्डिकायै नमः अर्घ्यं समर्पयामि ॥ इति मूर्ध्नि विकिरेत् ॥ १७ ॥ **अथाचमनीयम्** ॥ ॐ तस्माद्विराळ० ॥ ऋक् ॥ ॐ चन्द्रां प्रभासां० ॥ ऋक् ॥ जलजद्युतिना करेण जातीफलकङ्कोललवङ्गगन्धयुक्तैः ॥ अमृतैरमृतैरिवातिशीतैर्भगवत्याचमनं विधीयताम् ॥ मूलम् ॥ श्रीचण्डिकायै नमः आचमनीयं सुधा ॥ इति मुखेदद्यात् ॥ १८ ॥ **अथ मधुपर्कः** ॥ ॐ दधिक्राव्णो० ॥ ऋक् ॥ ॐ मधुवाता० ॥ ऋक्त्रयम् ॥ ॐ घृतंमिमिक्षे० ॥ ऋक् ॥ निहितं कनकस्य सम्पुटे पिहितं रत्नपिधानकेन च ॥ तदिदं जगदम्ब तेऽर्पितं मधुपर्कं गिरिजे प्रगृह्यताम् ॥ मूलम् ॥ श्रीचण्डिकायै नमः मधुपर्कं सुधा ॥ इति दधिमधुघृतानि मुखेऽर्पयेत् ॥ १९ ॥ मूलम् श्रीचण्डिकायै नमः मधुपर्काङ्गमाचमनीयं सुधा ॥ इति मुखे दद्यात् ॥ २० ॥ **अथाभ्यङ्गपूर्वोपचाराः** ॥ देवतां स्नानमण्डपं प्रवेश्य । मूलम् । श्रीचण्डिकायै नमः स्नानमण्डपप्रवेशं कल्पयामि ॥ २१ ॥ तत्र पीठे उपवेश्य । मूलम् । श्रीचण्डिकायै नमः पीठोपवेशनं कल्पयामि ॥ २२ ॥ भूषणान्यवरोप्य । मूलम् । श्रीचण्डिकायै नमः

भूषणावरोपं कल्पयामि ॥ २३ ॥ चूडां विस्रस्य ॥ मूलम् । श्रीचण्डिकायै नमः चूडाविस्रंसनं कल्पयामि ॥२४॥ अथाभ्यङ्गः ॐ कनिक्रदत्०॥ इति ऋक्त्रयम्॥ एतच्चम्पकतैलमम्ब विविधैःपुष्पैर्मुहुर्वासितं न्यस्तं रत्नचिते सुवर्णचषके भृङ्गैर्भ्रमद्भिर्वृतम् ॥ सानन्दं सुरसुन्दरीभिरभितो हस्तैर्धृतं ते मया केशेषु भ्रमरभ्रमेषु सकलेष्वङ्गेषु चालिप्यते ॥ मूलम् ॥ श्रीचण्डिकायै नमः सुगन्धितैलाभ्यङ्गं कल्पयामि ॥२५॥ **अथाभ्यङ्गोत्तराङ्गोपचारौ** ॥ मूलम् । श्रीचण्डिकायै नमः स्नानपीठोपवेशनं कल्पयामि ॥ इति स्नानपीठे उपवेशयेत् ॥ २६ ॥ **मूलम्** ॥ श्रीचण्डिकायै नमः ॥ उद्वर्तनं कल्पयामि ॥ इति स्नेहापनोदकचूर्णेन सजलेन देवताङ्गमुद्वर्तयेत् ॥ २७ ॥ **अथोष्णोदकस्नानम्** ॥ मातर्मङ्गलवाद्यकोमलरवैर्नारीजनैश्चान्वितं स्नानं ते नवरत्नकुम्भनिहितैः संवासितोष्णोदकैः ॥ केशानामलकैर्विशोध्य विशदान् कस्तूरिकोदञ्चितैर्भक्त्याहं कलयामि हेमरजसा सम्मिश्रितैर्निर्मलैः ॥ मूलम् ॥ श्रीचण्डिकायै नमः उष्णोदकस्नानं कल्पयामि ॥ २८ ॥ **अथ पञ्चामृतस्नानानि** ॥ ॐ आप्यायस्व०॥ ऋक् ॥ क्षीरसागरसुतेशसगर्भ्येशम्भुपत्नि कमलामलदृष्टे ॥ त्वं शुभान्याभिषवाय पयांसि निष्पयासि विमलानि गृहाण ॥ मूलम् ॥ श्रीचण्डिकायै नमः पयस्नानं कल्पयामि ॥ २९ ॥ मूलम् ॥ श्रीचण्डिकायै नमः शुद्धोदकस्नानं कल्पयामि ॥ ३० ॥ ॐ दधिक्राव्णो० ॥ ऋक् ॥ पिच्छिलान्यभिनवानि दधीनि शुद्धचन्द्रिररुचा सदृशानि ॥ हेमपात्रनिहितानि भवत्या अर्पयामि सवनाय मृडानि ॥ मूलम् ॥ श्रीचण्डिकायै नमः दधिस्नानं कल्पयामि ॥ ३१ ॥ मूलम् । श्रीचण्डिकायै नमः शुद्धोदकस्नानं कल्पयामि ॥ ३२ ॥ ॐ घृतंमिमिक्षे० ॥ ऋक् ॥ सकललोकमनोहरमुल्लसत्परिमलं विमलं बहुलं घृतम् ॥ अभिषवाय गृहाण जगत्त्रयस्वजनलालनपालनलालसे ॥ मूलम् ॥ श्रीचण्डिकायै नमः घृतस्नानं कल्पयामि ॥ ३३ ॥ मूलम् । श्रीचण्डिकायै नमः शुद्धोदकस्नानं कल्पयामि ॥ ३४ ॥ ॐ मधु-

वाता० ॥ ऋक्त्रयम् ॥ मातः समस्तजगतां दयिते हरस्य कन्ये धराधरपतेः सहजेऽच्युतस्य ॥ अङ्गीकुरुष्व करुणाकलिते कलाढ्ये स्नानाय माक्षिकमिदं मदमन्थराक्षि ॥ मूलम् ॥ श्रीचण्डिकायै नमः मधुस्नानं कल्पयामि ॥३५॥ मूलम् । श्रीचण्डिकायै नमः शुद्धोदकस्नानं कल्पयामि ॥३६॥ ॐ स्वादुः-पवस्व० ॥ ऋक् ॥ सितयासितया मनोज्ञया जगदानन्दकरेक्षुजातया ॥ सवनं क्रियतां सुरासुरप्रणुते त्वं यदपि ध्रुवं शुचिः ॥ मूलम् ॥ श्रीचण्डिकायै नमः शर्करास्नानं कल्पयापि ॥ ३७ ॥ मूलम् ॥ श्रीचण्डिकायै नमः शुद्धोदकस्नानं कल्पयामि ॥ ३८ ॥ **अथ गन्धोदकस्नानम्** ॥ ॐ गन्धद्वारां० ॥ ऋक् ॥ उद्गन्धैरगुरुद्रवैः सुरभिणा कस्तूरिकावारिणा स्फूर्जत्सौरभयक्षकर्दमरसैः कर्पूरपाथोभरैः ॥ पुष्पाम्भोभिरशेषतीर्थकलितैः काश्मीरनीरैरपि स्नानं ते परिकल्पयामि गिरिजे प्रेम्णा त्वमङ्गीकुरु ॥ मूलम् ॥ श्रीचण्डिकायै नमः सुगन्ध्युदकस्नानं कल्पयामि ॥३९॥ ॐ आपोहिष्ठा० ॥ ऋक्त्रयम् ॥ मूलम् । श्रीचण्डिकायै नमः शुद्धोदकस्नानं कल्पयामि ॥ ४० ॥ **अथ स्नानमध्ये आचारप्राप्तमल्पाराधनम्** ॥ स्नानेऽत्र चन्दनमुमेऽक्षतसञ्चयं च सौभाग्यवस्तुकुसुमागुरुधूपदीपौ ॥ भक्ष्यं पयोदधिघृताद्यथ दक्षिणादि पुष्पाञ्जलिं नतिमुरीकुरु पङ्कजाक्षि ॥ इति श्लोकं पाठित्वा श्रीचण्डिकायै नमः इति नाममन्त्रेण यथा सम्भवं गन्धाद्युपचारैः सम्पूज्य । मूलम् । श्रीचण्डिकायै नमः स्नानमध्याराधनं समर्पयामि ॥ ४१ ॥ **अथ महाभिषेकः** ॥ ॐ यत्पुरुषेण० ॥ ऋक् ॥ ॐ आदित्यवर्णे० ॥ ऋक् ॥ कर्पूरागुरुकुङ्कुमैर्मृगमदाद्यैः सर्वदा संस्कृतैरेलोशीरसुवासितैः सकुसुमैर्गङ्गादितीर्थोदकैः ॥ मन्त्रान् वैदिकतान्त्रिकान् परिपठन् वाद्यैः समं ते महास्नानं सम्परिकल्पयागि गिरिजे प्रीत्यात्वमङ्गीकुरु ॥ इति पठित्वा ॥ सर्वे वै देवीमुपतस्थुरिति देव्यथर्वशीर्षेण, हिरण्यवर्णां हरिणीमिति श्रीसूक्तेन, अहंरुद्रेभिर्वसुभिरितिदेवीसूक्तेन, सहस्रशीर्षापुरुषइतिपुरुषसूक्तेन, देवस्यत्वा सवितुरितिनिगदेन च गन्धपुष्पाक्षत-

युतगङ्गादितीर्थसलिलैर्वाद्यध्वनिपुरःसरमभिषिच्य ॥ मूलम् । श्रीचण्डिकायै नमः महाभिषेकस्नानं कल्पयामि ॥४२॥ मूलम् । श्रीचण्डिकायै नमः अङ्गप्रोञ्छनं कल्पयामि ॥४३॥ देवतामन्यपीठे उपवेश्य ॥ मूलम् ॥ श्रीचाण्डिकायै नमः । अन्यपीठोपवेशनं कल्पयामि ॥४४॥ मूलम् ॥ श्रीचण्डिकायै नमः केशशोषणं कल्पयामि ॥ ४५ ॥ मूलम् ॥ श्रीचण्डिकायै नमः केशधूपनं कल्पयामि ॥ ४६ ॥ मूलम् ॥ श्रीचण्डिकायै नमः चूडाबन्धं कल्पयामि ॥४७॥ मूलम् ॥ श्रीचण्डिकायै नमः आचमनं कल्पयामि ॥४८॥ ॐ तं यज्ञं बर्हिषि०॥ ऋक् ॥ ॐ उपैतु मां० ॥ ऋक् ॥ बालार्कद्युतिदाडिमीयकुसुमप्रस्पर्धि सर्वोत्तमं मातस्त्वं परिधेहि दिव्यवसनं भक्त्या मया तेऽर्पितम् ॥ मुक्ताभिर्ग्रथितं च कञ्चुकमिदं स्वीकृत्य पीतप्रभं तप्तस्वर्णसमानवर्णममलं प्रावारमङ्गीकुरु ॥ मूलम् ॥ श्रीचण्डिकायै नमः वस्त्राणि समर्पयामि ॥ ४९ ॥ मूलम् ॥ श्रीचण्डिकायै नमः आचमनीयं । सुधेति भावयित्वा मुखे दद्यात् ॥५०॥ अथ पादुके ॥ नवरत्नमयं मयार्पितं कमनीयं तव पादुकाद्वयम् ॥ सविलासमिदं पदद्वयं कृपया तत्र शिवे निधीयताम् ॥ मूलम् श्रीचण्डिकायै नमः पादुके समर्पयामि ।.५१॥ देवतां यागमण्डपं प्रवेश्य ॥ मूलम् ॥ श्रीचण्डिकायै नमः यागमण्डपप्रवेशं कल्पयामि ॥ ५२ ॥ यागपीठे उपवेश्य ॥ मूलम् ॥ श्रीचण्डिकायै नमः यागपीठोपवेशनं कल्पयामि ॥ ५३ ॥ ॐ तस्माद्यज्ञा० ॥ ऋक् ॥ ॐ क्षुत्पिपासा० ॥ ऋक् ॥ ससुरासुरकिन्नरार्चिते चतुरे कुङ्कुमपङ्कचर्चिते ॥ उपवीतमिदं प्रगृह्यतां कनकाद्युत्तमतन्तुनिर्मितम् ॥ मूलम् ॥ श्रीचण्डिकायै नमः यज्ञोपवीतं समर्पयामि ॥ ५४ ॥ मूलम् ॥ श्रीचण्डिकायै नमः यज्ञोपवीताङ्गमाचमनीयं । सुधेति भावयित्वा मुखेऽर्पयेत् ॥ अथ भूषणानि ॥ हंसैरप्यतिलोभनीयगमने हारावलीमुज्वलां हिन्दोलद्युतिहीरपूरिततरे हेमाङ्गदे कङ्कणे ॥ मञ्जीरौ मणिकुण्डले मुकुटमप्यर्धेन्दुचूडामणिं नासामौक्तिकमङ्गुलीयकटकौ काञ्चीमपि स्वीकुरु ॥ मूलम् ॥ श्रीचण्डिकायै

नमः भूषणानि समर्पयामि ॥ ५६ ॥ **अथ दर्पणम्** ॥ मार्तण्डमण्डलनिभो जगदम्ब तुभ्यं भक्त्या मयामणिमयो मुकुरोऽर्प्यते यम् ॥ नेपथ्यभूषणविनिर्मितदेहशोभामस्मिन् विलोकय विलोलविलोचने त्वम् ॥ मूलम् ॥ श्रीचण्डिकायै नमः दर्पणं समर्पयामि ॥५७॥ **अथ गन्धाः** ॥ ॐतस्माद्यज्ञा० ॥ ऋक् ॥ ॐ गन्धद्वारां० ॥ ऋक् ॥ मातः फालतले तवातिविमले काश्मीरकस्तूरिकालेपं चागुरुचन्द्रमोमलयजैः कुर्वेऽङ्गरागं ततः ॥ वक्षोजादिषु यक्षकर्दमरसं सिक्त्वा सपुष्पद्रवं पादौ यावकलेपनादिभिरलं कुर्वे तवाहं क्रमात् ॥ मूलम् ॥ श्रीचण्डिकायै नमः चन्दनाद्यनुलेपं कल्पयामि ॥ इत्युक्त्वा गन्धमुद्रां दर्शयेत् ॥५८॥ **अथ हरिद्राकुङ्कुमादि** ॥ निशां निशानाथसमानभाले जितारिजाले परिपीतहाले ॥ उद्वर्तनायाङ्घ्रिकराननस्य गृहाण तैलेन जलेन युक्ताम् ॥ मूलम् ॥ श्रीचण्डिकायै नमः हारिद्रालेपनं कल्पयामि ॥ ५९ ॥ शोभाकरं सुतिलकं किल कुङ्कुमस्य बन्धूकपुष्पसदृशं त्वलिके भवानि ॥ वेदान्तवेद्यविभवे विभवे भवत्यै प्रत्यर्पयामि भवभीतिभिदे मगाद्य ॥ मूलम् ॥ श्रीचण्डिकायै नमः कुङ्कुमं समर्पयामि ॥ ६० ॥ चन्द्रचारुवदने सदये त्वं स्वैरपीतमदिरामदमत्ते ॥ कज्जलं ललिततैलसमेतं मत्समार्पितामिदं क्षिपचाक्ष्णोः ॥ मूलम् । श्रीचण्डिकायै नमः कज्जलं समर्पयामि ॥ ६१ ॥ सिन्दूरमिन्दुवदने दयिते हरस्य नारायणस्य भगिनि प्रणतार्तिहन्त्रि ॥ सीमन्तदेशनिहितं रुचिरं भवानि त्वं स्वीकुरु त्रिपुरसुन्दरि देववन्द्ये ॥ मूलम् ॥ श्रीचण्डिकायै नमः सिन्दूरं समर्पयामि ॥ ६२ ॥ **अथाक्षताः** ॥ रत्नाक्षतैस्त्वां परिपूजयामि मुक्ताफलैश्चातिसितैरविद्धैः ॥ अखण्डितैर्देवि यवादिभिश्च काश्मीरपङ्काङ्किततण्डुलैश्च ॥ मूलम् ॥ श्रीचण्डिकायै नमः अक्षतान् समर्पयामि ॥ ६३ ॥ **अथाङ्गपूजा** ॥ अङ्गनितेऽतिविमलानि सरोरुहाक्षि नेत्रामृतानि सुकुमारतराणि गौरि ॥ प्रत्येकमम्ब कुसुमाक्षतचन्दनाद्यैः सम्पूजयामि गिरिराजसुते प्रसीद ॥ इति पठित्वा ॥ वक्ष्यमाणनामभिः

क्रमेण वक्ष्यमाणानि देव्यङ्गानि गन्धाक्षतपुष्पैः पूजयेत् ॥ प्रणवः सर्वत्र ॥ सिज्जानमणिमज्जीरमण्डितश्रीपदाम्बुजायै नमः पादौ पूजयामि ॥ १ ॥ इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिकायै नमः जङ्घे पूजयामि ॥ २ ॥ माणिक्यमुकुटाकारजानुद्वयविराजितायै नमः जानुनी पूजयामि ॥ ३ ॥ कामेशजातसौभाग्यमार्दवोरुद्वयान्वितायै नमः ऊरू पूजयामि ॥ ४ ॥ अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतट्यै नमः कटी पूजयामि ॥ ५ ॥ लक्ष्यकोमलताधारतासमुन्नेयमध्यमायै नमः मध्यं पूजयामि ॥ ६ ॥ स्तनभारदलन्मध्यपट्टबन्धवलित्रयायै नमः वलित्रयं पूजयामि ॥ ७ ॥ नाभ्यालवालरोमालिलताफलकुचद्वयायै नमः नाभीं पूजयामि ॥ ८ ॥ उदरान्तर्गतानेककोटिब्रह्माण्डमण्डलायै नमः उदरं पूजयामि ॥ ९ ॥ हृदयस्थितसर्वार्तिलोकानुग्रहमङ्गलायै नमः हृदयं पूजयामि ॥ १० ॥ कामेश्वरप्रेमरत्नमणिप्रतिपणस्तन्यै नमः स्तनौ पूजयामि ॥ ११ ॥ कनकाङ्गदकेयूरकमनीयभुजान्वितायै नमः भुजौ पूजयामि ॥ १२ ॥ सौवर्णरत्नवलयाङ्कितचारुकरद्वयायै नमः करौ पूजयामि ॥१३॥ कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरायै नमः ग्रीवां पूजयामि ॥१४॥ सुवर्णरत्नग्रैवेयमुक्ताफललसद्गलायै नमः कण्ठं पूजयामि ॥ १५ ॥ मुखवासाद्भुतामोदसमाकृष्टादिसङ्कुलायै नमः मुखं पूजयामि ॥ १६ ॥ नवविद्रुमबिम्बश्रीन्यक्कारिदशनच्छदायै नमः ओष्ठौ पूजयामि ॥१७॥ शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वलायै नमः दन्तपङ्क्ती पूजयामि ॥ १८ ॥ पद्मरागशिलादर्शपरिभाविकपोलभुवे नमः कपोलौ पूजयामि ॥ १९ ॥ नवचम्पकपुष्पाभनासादण्डविराजितायै नमः नासिकां पूजयामि ॥ २० ॥ वस्त्रलक्ष्मीपरिवाहचलन्मीनाभलोचनायै नमः नेत्रे पूजयामि ॥ २१ ॥ कदम्बमञ्जरीक्लृप्तकर्णपूरमनोहरायै नमः कर्णौ पूजयामि ॥ २२ ॥ अष्टमीचन्द्रविभ्राजदलिकस्थलशोभितायै नमः ललाटं पूजयामि ॥ २३ ॥ शिरोभूषातडिद्द्योतलसत्केशाभ्रमण्डलायै नमः शिरः पूजयामि ॥ २४ ॥ निजारुणप्रभापूर-

मज्जद्ब्रह्माण्डमण्डलायै नमः सर्वाङ्गं पूजयामि ॥२५॥ इति सम्पूज्य ॥ मूलम् ॥ श्रीचण्डिकायै नमः अङ्गपूजां कल्पयामि ॥ ६४ ॥ **अथ लोकमोहनाख्यपूजा** ॥ वर्णैर्मनुप्रपुटितैरथ मातृकाख्यैः पञ्चाशतैकयुतयावयवान् भवत्याः ॥ सम्पूजयामि जनलोचनमोहनार्थं शर्वाणि गन्धकुसुमाक्षतसञ्चयेन ॥ इति पठित्वा प्रणवः सर्वत्र ॥ मूलम् । अं । मूलम् । चाण्डिकाया ललाटं पूजयामि ॥ १ ॥ मूलम् । आं । मूलम् । चण्डिकाया मुखवृत्तं पूजयामि ॥ २ ॥ मूलम् । इं । मूलम् । चण्डिकाया दक्षिणनेत्रं पूजयामि ॥ ३ ॥ मूलम् । ईं । मूलम् ॥ चण्डिकाया वामनेत्रं पूजयामि ॥ ४ ॥ मूलम् । उं । मूलम् । चण्डिकाया दक्षिणकर्णं पूजयामि ॥ ५ ॥ मूलम् । ऊं । मूलम् । चण्डिकाया वामकर्णं पूजयामि ॥६॥ मूलम् । ऋं । मूलम् । चण्डिकाया दक्षिणनासापुटं पजयामि ॥ ७ ॥ मूलम् । ॠं । मूलम् । चण्डिकाया वामनासापुटं पूजयामि ॥ ८ ॥ मूलम् । ऌं । मूलम् । चण्डिकाया दक्षिणकपोलं पूजयामि ॥ ९ ॥ मूलम् । ॡं । मूलम् । चण्डिकाया वामकपोलं पूजयामि ॥ १० ॥ मूलम् । एं । मूलम् । चण्डिकाया ऊर्ध्वोष्ठं पूजयामि ॥ ११ ॥ मूलम् । ऐं । मूलम् । चण्डिकाया अधरोष्ठं पूजयामि ॥१२॥ मूलम् । ओं । मूलम् । चण्डिकाया ऊर्ध्वदन्तपङ्क्तिं पूजयामि ॥१३॥ मूलम् । औं । मूलम् । चण्डिकाया अधोदन्तपङ्क्तिं पूजयामि ॥ १४ ॥ मूलम् । अं । मूलम् । चण्डिकाया मूर्धानं पूजयामि ॥ १५ ॥ मूलम् । अः । मूलम् । चण्डिकाया वक्त्रं पूजयामि ॥ १६ ॥ मूलम् । कं । मूलम् । चण्डिकाया दक्षबाहुमूलं पूजयामि ॥ १७ ॥ मूलम् । खं । मूलम् । चण्डिकाया दक्षकूर्परं पूजयामि ॥१८॥ मूलम् । गं । मूलम् । चण्डिकाया दक्षिणमणिबन्धं पूजयामि ॥ १९ ॥ मूलम् । घं मूलम् । चण्डिकाया दक्षकराङ्गुलिमूलानि पूजयामि ॥ २० ॥ मूलम् । ङं । मूलम् । चण्डिकाया दक्षकराङ्गुल्यग्राणि पूजयामि ॥ २१ ॥ मूलम् । चं । मूलम् । चण्डिकाया वामबाहुमूलं पूजयामि ॥ २२ ॥ मूलम् । छं । मूलम् । चण्डि-

काया वामकूर्परं पूजयामि ॥ २३ ॥ मूलम् । जं । मूलम् । चण्डिकाया दक्षिणमणिबन्धं पूजयामि ॥२४॥ मूलम् । झं । मूलम् चण्डिकाया वामकराङ्गुलिमूलानि पूजयामि ॥ २५ ॥ मूलम् । ञं । मूलम् । चण्डिकाया वामकराङ्गुल्यग्राणि पूजयामि ॥ २६ ॥ मूलम् । टं । मूलम् । चण्डिकाया दक्षिणपादसक्थिमूलं पूजयामि ॥२७॥ मूलम् । ठं । मूलम् । चण्डिकाया दक्षिणपादजानु पूजयामि ॥ २८ ॥ मूलम् । डं । मूलम् । चण्डिकाया दक्षिणपादगुल्फं पूजयामि ॥ २९ ॥ मूलम् । ढं । मूलम् । चण्डिकाया दक्षपादाङ्गुलिमूलानि पूजयामि ॥३०॥ मूलम् । णं । मूलम् । चण्डिकाया दक्षपादाङ्गुल्यग्राणि पूजयामि ॥ ३१ ॥ मूलम् । तं । मूलम् । चण्डिकाया वामसक्थिमूलं पूजयामि ॥ ३२ ॥ मूलम् । थं । मूलम् । चण्डिकाया वामपादजानु पूजयामि ॥ ३३ ॥ मूलम् । दं । मूलम् । चण्डिकाया वामपादगुल्फं पूजयामि ॥ ३४ ॥ मूलम् । धं । मूलम् । चण्डिकाया वामपादाङ्गुलिमूलानि पूजयामि ॥ ३५ ॥ मूलम् । नं । मूलम् । चण्डिकाया वामपादाङ्गुल्यग्राणि पूजयामि ॥३६॥ मूलम् । पं । मूलम् । चण्डिकाया दक्षिणपार्श्वं पूजयामि ॥ ३७ ॥ मूलम् । फं । मूलम् । चण्डिकाया वामपार्श्वं पूजयामि ॥३८॥ मूलम् । बं । मूलम् । चण्डिकाया पृष्ठं पूजयामि ॥३९॥ मूलम् । भं । मूलम् । चण्डिकाया नाभिं पूजयामि ॥ ४० ॥ मूलम् । मं । मूलम् । चण्डिकाया जठरं पूजयामि ॥४१॥ मूलम् । यं । मूलम् । चण्डिकाया हृदयं पूजयामि ॥ ४२ ॥ मूलम् । रं । मूलम् । चण्डिकाया दक्षांसं पूजयामि ॥ ४३ ॥ मूलम् । लं । मूलम् । चण्डिकाया ककुदं पूजयामि ॥ ४४ ॥ मूलम् । वं । मूलम् । चण्डिकाया वामांसं पूजयामि ॥ ४५ ॥ मूलम् । शं । मूलम् । चण्डिकाया हृदादिदक्षकराग्रान्तं पूजयामि ॥ ४६ ॥ मूलम् । षं । मूलम् । चण्डिकाया हृदादिवामकराग्रान्तं पूजयामि ॥ ४७ ॥ मूलम् । सं । मूलम् । चण्डिकाया हृदादिदक्षपादाग्रान्तं

पूजयामि ॥ ४८ ॥ मूलम् । हं । मूलम् । चण्डिकाया हृदादिवामपादाग्रान्तं पूजयामि ॥ ४९ ॥ मूलम् । ळं । मूलम् । चण्डिकाया हृदादिजठरान्तं पूजयामि ॥ ५० ॥ मूलम् । क्षं । मूलम् । चण्डिकाया हृदादिवदनान्तं पूजयामि ॥ ५१ ॥ इति सम्पूज्य ॥ मूलम् । श्रीचण्डिकायै नमः त्रैलोक्यमोहनपूजां समर्पयामि ॥ ६५ ॥ **अथ पत्राणि** ॥ अये विलासस्थलवाल्लिफुल्लमालालसत्कुन्तलवल्लि तुभ्यम् ॥ सुकोमलान् पाटलवर्णरम्यान् नवप्रवालानथ तेऽर्पयामि ॥ मूलम् ॥ श्रीचण्डिकायै नमः पत्राणि समर्पयामि ॥६६॥ **अथ पत्रविशेषाः** ॥ सदाशिवप्रेयसि विश्ववन्द्ये विशेषपत्राणि सुकोमलानि ॥ प्रियाणि ते नामभिरर्पयामि श्रुतिप्रगीतैर्विविधैः सदर्थैः ॥ इति पठित्वा ॥ प्रणवः सर्वत्र ॥ भक्तहार्दतमोभेदभानुमद्भानुसन्ततये नमः शमीपत्रं समर्पयामि ॥ १ ॥ नखदीधितिसंच्छिन्ननमज्जनतमोगुणायै नमः अपामार्गपत्रं समर्पयामि ॥ २ ॥ तापत्रयाग्निसन्तप्तसमाह्लादनचन्द्रिकायै नमः तुलसीपत्रं समर्पयामि ॥ ३ ॥ जन्ममृत्युजराभीतजनविश्रान्तिदायिन्यै नमः भृङ्गराजपत्रं समर्पयामि ॥ ४ ॥ महाकामेशवदनकुमुदाह्लादकौमुद्यै नमः दमनपत्रं समर्पयामि ॥ ५ ॥ हरनेत्राग्निसन्दग्धकामसञ्जीवनौषधये नमः कुशपत्रं समर्पयामि ॥ ६ ॥ इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिण्यै नमः धात्रीपत्रं समर्पयापि ॥ ७ ॥ उन्मेषनिमिषोत्पन्नविपन्नभुवनावल्यै नमः मरुवकपत्रं समर्पयामि ॥ ८ ॥ स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततये नमः बिल्वपत्रं समर्पयामि ॥ ९ ॥ इति सम्पूज्य ॥ मूलम् ॥ श्रीचण्डिकायै नमः पत्रविशेषान् समर्पयामि ॥ ६७ ॥ **अथ पुष्पाणि** ॥ ॐ तस्मादश्वा० ऋक् ॥ ॐ मनसःकाममा० ऋक् ॥ गन्धैरमन्दैरुपसम्भृतानि वर्णैर्मनोज्ञैः सुपरिष्कृतानि ॥ नवानि सत्केशरशोभितानि पुष्पाणि तुभ्यं गिरिजेऽर्पयामि ॥ मूलम् ॥ श्रीचण्डिकायै नमः पुष्पाणि समर्पयामि ॥ ६८ ॥ **अथ पुष्पविशेषाः** ॥ शिवे प्रियांस्ते सुमनोविशेषान् सुगन्धसम्प्रीणितभृङ्गवर्गान् ॥ नानाविधैर्ना-

मभिरर्पयामि त्वच्चक्षुषोरोचनकान् सुरम्यान् ॥ इति पठित्वा ॥ प्रणवः सर्वत्र ॥ चम्पकाशोकपुन्नागसौगन्धिकलसत्कचायै नमः चम्पकपुष्पं समर्पयामि ॥१॥ कुरुविन्दमणिश्रेणिकनत्कोटीरमण्डितायै नमः यूथिकापुष्पं समर्पयामि ॥२॥ मुखचन्द्रकलङ्काभमृगनाभिविशेषकायै नमः कुन्दपुष्पं समर्पयामि ॥ ३ ॥ वदनस्मरमाङ्गल्यगृहतोरणचिल्लिकायै नमः केतकीपुष्पं समर्पयामि ॥ ४ ॥ ताराकान्तितिरस्कारिनासाभरणमौक्तिकायै नमः बकुलपुष्पं समर्पयामि ॥ ५ ॥ ताटङ्कयुगलीभूततपनोडुपमण्डलायै नमः मल्लिकापुष्पं समर्पयामि ॥ ६ ॥ मन्दस्मितप्रभापूरमज्जत्कामेशमानसायै नम मालतीपुष्पं समर्पयामि ॥ ७ ॥ रत्नकिङ्किणिकादामरशनारत्नभूषितायै नमः द्रोणपुष्पं समर्पयामि ॥ ८ ॥ पदद्वयप्रभाजालपराकृतसरोरुहायै नमः पद्मपुष्पं समर्पयामि ॥ ९ ॥ इति सम्पूज्य ॥ मूलम् ॥ श्रीचण्डिकायै नमः पुष्पविशेषान् समर्पयामि ॥ ६९ ॥ **अथ शतनामपूजा** ॥ अष्टाधिकेन नाम्नां शतेन गिरिजे त्वदङ्घ्रिकमलयुगम् ॥ सम्पूजयामि भक्त्या प्रसीद करुणाभरार्द्रहृदयेऽम्ब ॥ इति पठित्वा पूजयेत् ॥ प्रणवः सर्वत्र ॥ रजताचलशृङ्गाग्रगृहस्थायै नमो नमः ॥ १ ॥ हिमाचलमहावंशपावनायै नमो नमः ॥ २ ॥ शङ्करार्धाङ्गसल्लीनशरीरायै नमो नमः ॥ ३ ॥ लसन्माणिक्यसदृशविग्रहायै नमो नमः ॥ ४ ॥ सर्वातिशायिसौन्दर्यसम्पन्नायै नमो नमः ॥ ५ ॥ शशाङ्कशेखरप्राणवल्लभायै नमो नमः ॥ ६ ॥ सदापञ्चदशाब्दैकवयस्कायै नमो नमः ॥ ७ ॥ वज्रमाणिक्यकनककिरीटायै नमो नमः ॥ ८ ॥ कस्तूरीतिलकोपेतनिटिलायै नमो नमः ॥ ९ ॥ भस्मरेखाङ्कितलसल्ललाटायै नमो नमः ॥ १० ॥ विकचाम्भोरुहदललोचनायै नमो नमः ॥ ११ ॥ शरच्चाम्पेयपुष्पाभनासिकायै नमो नमः ॥ १२ ॥ लसत्काञ्चनताटङ्कयुगुलायै नमो नमः ॥ १३ ॥ मणिदर्पणसङ्काशकपोलायै नमो नमः ॥ १४ ॥ ताम्बूलपूरितस्मेरवदनायै नमो नमः ॥ १५ ॥ सुपक्वदाडिमीबीजरदनायै नमो नमः ॥ १६ ॥ कम्बूत्तमसम-

च्छायकन्धरायै नमो नमः ॥ १७ ॥ स्थूलमुक्ताफलोदारसुहारायै नमो नमः ॥ १८ ॥ गिरीशबद्धमाङ्गल्यसूत्रिकायै नमो नमः ॥ १९ ॥ पद्मपाशाङ्कुशलसत्कराब्जायै नमो नमः ॥ २० ॥ पद्मकैरवमन्दारसुमाल्यायै नमो नमः ॥ २१ ॥ सुवर्णकुम्भयुग्माभसत्कुचायै नमो नमः ॥ २२ ॥ रमणीयचतुर्बाहुशोभितायै नमो नमः ॥ २३ ॥ कनकाङ्गदकेयूरभूषितायै नमो नमः ॥ २४ ॥ चारुसौवर्णवर्णाढ्यवसनायै नमो नमः ॥ २५ ॥ बृहन्नितम्बजघनमण्डितायै नमो नमः ॥२६॥ सौभाग्यान्वितशृङ्गारसंयुक्तायै नमो नमः ॥ २७ ॥ दिव्यभूषणसन्दोहराजितायै नमो नमः ॥ २८ ॥ पारिजाताधिकगुणपदाब्जायै नमो नमः ॥ २९ ॥ सुपद्मरागसङ्काशचरणायै नमो नमः ॥ ३० ॥ कामकोटिमहापीठपद्मस्थायै नमो नमः ॥ ३१ ॥ श्रीकण्ठनेत्रकुमुदचन्द्रिकायै नमो नमः ॥ ३२ ॥ सचामररमावाणीवीजितायै नमो नमः ॥ ३३ ॥ भक्तरक्षणदाक्षिण्यकटाक्षायै नमो नमः ॥ ३४ ॥ भूतेशालिङ्गनोद्भूतपुलकायै नमो नमः ॥ ३५ ॥ अनङ्गजनकापङ्गवीक्षणायै नमो नमः ॥ ३६ ॥ ब्रह्मोपेन्द्रशिरोरत्नरञ्जिताङ्घ्र्यै नमो नमः ॥ ३७ ॥ शचीमुखामरवधूसेवितायै नमो नमः ॥ ३८ ॥ लीलाकल्पितविध्यण्डमण्डलायै नमो नमः ॥३९॥ सङ्ख्यातीतमहाशक्तिसंवृतायै नमो नमः ॥४०॥ एकातपत्रसाम्राज्यप्रदायिन्यै नमो नमः ॥४१॥ सनकादिसमाराध्यपादुकायै नमो नमः ॥४२॥ देवर्षिस्तूयमानश्रीवैभवायै नमो नमः ॥ ४३ ॥ कलशोद्भवदुर्वासःपूजितायै नमो नमः ॥४४॥ मत्तेभवक्त्रषड्वक्त्रवत्सलायै नमो नमः ॥४५॥ चक्रराजमहायन्त्रमध्यगायै नमो नमः ॥४६॥ चिदग्निकुण्डसम्भूतशरीरायै नमो नमः ॥४७॥ शशाङ्कखण्डसंयुक्तमुकुटायै नमो नमः ॥४८॥ मत्तहंसवधूमन्दगमनायै नमो नमः ॥ ४९ ॥ वन्दारुजनसन्दोहवन्दितायै नमो नमः ॥ ५० ॥ अन्तर्मुखजनानन्दफलदायै नमो नमः ॥ ५१ ॥ पतिव्रताङ्गनाभीष्टफलदायै नमो नमः ॥ ५२ ॥ अव्याजकरुणापूरपूरितायै नमो नमः

॥ ५३ ॥ नितान्तसच्चिदानन्दविग्रहायै नमो नमः ॥ ५४ ॥ सहस्रसूर्यसङ्काशप्रकाशायै नमो नमः ।५५॥ रत्नचिन्तामणिगृहमध्यस्थायै नमो नमः ॥५६। हानिवृद्धिगुणावस्थारहितायै नमो नमः ॥५७॥ महापद्माटवीमध्यगेहस्थायै नमो नमः ॥५८॥ जाग्रत्स्वप्नसुषुप्त्याख्यावस्थाद्रष्ट्र्यै नमो नमः ॥५९॥ महापापोपपापौघविनाशिन्यै नमो नमः ॥६०॥ दुष्टभूतमहाभीतिभञ्जनायै नमो नमः ॥६१॥ समस्तदैत्यदनुजविनाशिन्यै नमो नमः ॥६२॥ सर्वलोकहृदम्भोजनिलयायै नमो नमः ॥६३॥ अनाहतमहापद्ममन्दिरायै नमो नमः ॥६४॥ सहस्रारसरोजातनिवासिन्यै नमो नमः ॥६५॥ पुनरावृत्तिरहितपुरस्थायै नमो नमः ॥६६॥ वाणीसावित्रिकागायत्रीनुतायै नमो नमः ॥६७॥ रामभूमिसुताराध्यपदाब्जायै नमो नमः ॥ ६८ ॥ लोपामुद्रार्चितश्रीमच्चरणायै नमो नमः ॥६९॥ सहस्ररतिलावण्यसम्पन्नायै नमो नमः ॥७०॥ भावनामात्रसन्तुष्टहृदयायै नमो नमः ॥ ७१ ॥ सत्यसम्पूर्णविज्ञानसिद्धिदायै नमो नमः ॥७२॥ त्रिलोचनार्चनोल्लासफलदायै नमो नमः ॥७३॥ श्रीसुधाब्धिमणिद्वीपमध्यपायै नमो नमः ॥७४॥ दक्षाध्वरपरिध्वंसकारणायै नमो नमः ॥७५॥ श्रीनाथसोदरीभावशोभितायै नमो नमः ॥७६॥ चन्द्रशेखरभक्तार्तिभञ्जनायै नमो नमः ॥७७॥ सर्वोपाधिविनिर्मुक्तस्वरूपायै नमो नमः ॥७८॥ नामपारायणासक्तफलदायै नमो नमः ॥७९॥ सृष्टिस्थितितिरोधानकारणायै नमो नमः ॥ ८० ॥ मायाबीजमहामन्त्रस्वरूपायै नमो नमः ॥ ८१ ॥ अनाद्यन्तस्वयम्भूतदिव्यमूर्त्यै नमो नमः ॥८२॥ भक्तमुख्यपरित्राणनियोगायै नमो नमः ॥८३॥ मातृमण्डलविद्वेषिदनुजघ्न्यै नमो नमः ॥८४॥ चण्डदैत्यमहासत्त्वनाशनायै नमो नमः ॥८५॥ क्रूरमुण्डशिरच्छेदनिपुणायै नमो नमः ॥८६॥ धात्रच्युतसुराधीशवरदायै नमो नमः ॥ ८७ ॥ निशुम्भशुम्भदैतेयखण्डनायै नमो नमः ॥८८॥ रक्तबीजमहादैत्यशिक्षणायै नमो नमः ॥८९॥ माहिषासुरदोर्वीर्यनिग्रहायै नमो नमः ॥९०॥ मधुकैटभसंहारकारणायै नमो नमः॥९१॥

धूम्रलोचननिःपातविधायिन्यै नमो नमः ॥९२॥ व्योमकेशमहोत्साहकारणायै नमो नमः ॥९३॥ महेशयुक्तनटनतत्परायै नमो नमः ॥९४॥ निजभर्तृमुखाम्भोजवीक्षणायै नमो नमः ॥९५॥ जन्ममृत्युजरारोगभञ्जनायै नमो नमः॥९६॥ विदेहमुक्तिविज्ञानसिद्धिदायै नमो नमः ॥९७॥ कामक्रोधादिषड्वर्गनाशनायै नमो नमः ॥९८॥ राजराजार्चितपदसरोजायै नमो नमः ॥९९॥ सर्ववेदान्तसिद्धान्ततत्त्वज्ञायै नमो नमः ॥ १०० ॥ कलेवरात्मविश्रान्तिविनाशिन्यै नमो नमः ॥१०१॥ अशेषदुष्टदनुजसूदनायै नमो नमः ॥१०२॥ अज्ञानतिमिरग्रासदीपिकायै नमो नमः ॥१०३॥ दक्षप्रजापतिसुताविग्रहायै नमो नमः ॥१०४॥ सुमबाणेक्षुकोदण्डमण्डितायै नमो नमः ॥ १०५ ॥ मातुलिङ्गगदाखेटपानपात्रभृते नमो नमः ॥१०६॥ चतुर्विंशतितत्त्वैकस्वरूपायै नमो नमः ॥१०७॥ नित्ययौवनमाङ्गल्यसम्पन्नायै नमो नमः ॥ १०८ ॥ मूलम् । श्रीचण्डिकायै नमः शतनामपूजां समर्पयामि ॥ ७० ॥ **अथावरणपूजा** ॥ संविन्मये महालक्ष्मि परामृतरुचिप्रिये ॥ अनुज्ञां चण्डिके देहि परिवारार्चनाय मे ॥ इति श्लोकमन्त्रं पठित्वा ॥ गन्धाक्षतपुष्पैरावरणदेवताः स्वबीजनाममन्त्राभ्यां पूजयेत् ॥ अत्रावरणानि नव ॥ तत्र प्राधानिकरहस्योक्तप्रकृतिभूतचतुर्भुजदेवतोद्देश्यकपूजायां वैकृतरहस्योक्तविकृतिभूताष्टादशभुजदेवतोद्देश्यकपूजायां च प्रथमावरणमात्रे किञ्चिद्भेदः ॥ इतरावरणानि उभयसाधारणानि ॥ तत्रादौ प्रकृतिभूतचतुर्भुजदेवतोद्देश्यकपूजायां प्रथमावरणं यथा ॥ त्रिकोणे बिन्दुस्थाने ॐ ह्रीं चण्डिकायै नमः ॥ इति सम्पूज्य ॥ त्रिकोणषट्कोणयोर्मध्यप्रदेशे प्रथमावरणदेवताः पूजयेत् ॥ तत्र मुख्यदेवताया वामभागे ॐ ऐं महाकाल्यै नमः इति चतुर्भुजमहाकालीं पूजयेत् ॥ मुख्यदेवताया दक्षभागे ॐ क्लीं महासरस्वत्यै नमः ॥ इति चतुर्भुजमहासरस्वतीं पूजयेत् ॥ मुख्यदेवतायाः पृष्ठतः ॐ ऐं वाण्यै नमः ॥ तस्या दक्षिणे ॐ ऐं ब्रह्मणे नमः ॥ महाकाल्याः पृष्ठे ॐ ह्रीं गौर्यै नमः । तस्या दक्षिणे ॐ

ह्रीं रुद्राय नमः ॥ महासरस्वत्याः पृष्ठे ॐ श्रीं लक्ष्म्यै नमः । तस्या दक्षिणे ॐ श्रीं विष्णवे नमः ॥ इति षड्देवताः पूजयेत् ॥ अथ मुख्यदेवतायाः पुरतः ॐ ह्रीं अष्टादशभुजायै नमः ॥ महाकाल्याः पुरतः ॐ ऐं दशभुजायै नमः ॥ महासरस्वत्याः पुरतः ॐ क्लीं अष्टभुजायै नमः ॥ इति पूजयेत् ॥ एकादशदेवताकमिदमावरणम् ॥ **अथ विकृतिभूताष्टादशभुजोद्देश्यकपूजायां प्रथमावरणं** यथा ॥ बिन्दुस्थाने ॐ ह्रीं अष्टादशभुजमहालक्ष्म्यै नम इति सम्पूज्य तस्या वामे ॐ ऐं दशभुजमहाकाल्यै नमः ॥ दक्षभागे ॐ क्लीं अष्टभुजमहासरस्वत्यै नमः ॥ इतिदेवताद्वयं पूजयेत् ॥ प्रकृतिविकृत्योरभेदाद्विकृतिपूजायामपि आसां पृष्ठतः पूर्ववत् वाणीब्रह्मादिकाः षड्देवताः पूजयेत् ॥ मुख्यदेवतायाः पुरतो वामे ॐ ह्रूं महिषाय नमः ॥ दक्षभागे ॐ क्ष्म्रौं सिंहाय नमः ॥ इति दशदेवताकमिदमावरणम् ॥ **इति प्रथमावरणम्** ॥ **अथोभयसाधारणान्यावरणानि** ॥ तत्र षट्कोणचक्रस्य कोणमूलेषु द्वितीयं षडङ्गावरणम् ॥ तान्त्रिकाग्नेयकोणमूले ॐ ऐं हृदयाय नमः हृदयदेव्यै नमः ॥ नैर्ऋतकोणमूले ॐ ह्रीं शिरसे स्वाहा शिरोदेव्यै नमः ॥ वायुकोणमूले ॐ क्लीं शिखायै वषट् शिखादेव्यै नमः ॥ ईशानकोणमूले ॐ चामुण्डायै कवचाय हुम् कवचदेव्यै नमः ॥ तान्त्रिकप्राचीकोणमूले ॐ विच्चे नेत्रत्रयाय वौषट् नेत्रदेव्यै नमः ॥ प्रतीचीकोणमूले ऐं ह्रीं क्लीं चामुण्डायै अस्त्रायफट् अस्त्रदेव्यै नमः ॥ **इति द्वितीयावरणम्** ॥ अथ षट्कोणस्य तान्त्रिकप्राच्यादिकोणाग्रेषु नन्दाद्यावरणं ॥ ॐ नं नन्दायै नमः । ॐ रं रक्तदन्त्यै नमः । ॐ शां शाकम्भर्यै नमः । ॐ दुं दुर्गायै नमः । ॐ भीं भीमायै नमः । ॐ भ्रां भ्रामर्यै नमः । **इति तृतीयावरणम्** ॥ **अथाष्टदलस्य दलमूलेषु तान्त्रिकप्राच्यादिक्रमेण मातृकावरणम्** ॥ ॐ ब्रां ब्राह्म्यै नमः । ॐ मां माहेश्वर्यै नमः । ॐ कौं कौमार्यै नमः । ॐ वैं वैष्णव्यै नमः । ॐ वां वाराह्यै नमः । ॐ नां नारसिंह्यै नमः । इति सप्तसु सप्त सम्पूज्य अष्टमे

ॐ चां चामुण्डायै नमः । ॐ शिं शिवदूत्यै नमः । इति द्वयं पूजयेत् ॥ **इति चतुर्थावरणम् ॥ अथाष्टदलस्य दलमध्येषु पूर्ववन्नवदुर्गावरणम् ॥** ॐ शैं शैलपुत्र्यै नमः । ॐ ब्रं ब्रह्मचारिण्यै नमः । ॐ चं चन्द्रघण्टायै नमः ! ॐ कूं कूष्माण्डायै नमः ॥ ॐ स्कं स्कन्दमात्रे नमः । ॐ कां कात्यायन्यै नमः । ॐ कां कालरात्र्यैः नमः । ॐ मं महागौर्यै नमः । ॐ सिं सिद्धिदायै नमः । **इति पञ्चमावरणम् ॥ अथाष्टदलस्य दलाग्रेषु प्राग्वत् नवकुमार्यावरणम् ॥** ॐ कुं कुमार्यै नमः । ॐ त्रिं त्रिमूर्तये नमः । ॐ कं कल्याण्यै नमः । ॐ रों रोहिण्यै नमः । ॐ कां काल्यै नमः । ॐ चं चण्ड्यै नमः । ॐ शां शाम्भव्यै नमः । ॐ दुं दुर्गायै नमः । ॐ भं भद्रायै नमः ॥ **इति षष्ठावरणम् ॥ ६ ॥ अथाष्टदलकमलाद्बहिरन्तराले अष्टभैरवावरणम्** तान्त्रिकप्राच्यादि ॥ ॐ अं असिताङ्गभैरवाय नमः ॥ ॐ रुं रुरुभैरवाय नमः । ॐ चं चण्डभैरवाय नमः । ॐ क्रों क्रोधभैरवाय नमः । ॐ उं उन्मत्तभैरवाय नमः । ॐ कं कपालिभैरवाय नमः । ॐ भीं भीषणभैरवाय नमः । ॐ सं संहारभैरवाय नमः ॥ **इति सप्तमावरणम् ॥ ७ ॥ अथ भूपुरस्यप्रथमद्वितीयतृतीयरेखान्तर्गतप्रथमकोष्ठे प्रसिद्धप्राच्यादि दिक्पालावरणम् ॥** ॐ इं इन्द्राय नमः । ॐ अं अग्नये नमः । ॐ यं यमाय नमः । ॐ नैं नैर्ऋताय नमः । ॐ वं वरुणाय नमः । ॐ वां वायवे नमः । ॐ सों सोमाय नमः । ॐ ईं ईशानाय नमः ॥ इत्यष्टदिक्षु सम्पूज्य । ईशानेन्द्रयोर्मध्ये ॐ ब्रं ब्रह्मणे नमः । नैर्ऋतवरुणयोर्मध्ये ॐ अं अनन्ताय नमः ॥ **इत्यष्टमावरणम् ॥ अथ भूपुरस्य द्वितीयरेखान्तर्गत द्वितीयकोष्ठे दिक्पालायुधावरणं प्राग्वत् ।** ॐ वज्राय नमः । ॐ शं शक्तये नमः । ॐ दं दण्डाय नमः । खं खड्गाय नमः ! ॐ पां पाशाय नमः । ॐ अं अङ्कुशाय नमः । ॐ गं गदायै नमः । ॐ त्रिं त्रिशूलाय नमः । त्रिशूलवज्रयोर्मध्ये ॐ पं पद्माय नमः । खड्गपाशयोर्मध्ये ॐ चं चक्राय

नमः । इति नवमावरणम् ॥ मूलम् । श्रीचण्डिकायै नमः आवरणदेवतापूजां समर्पयामि ॥ ७१ ॥ अथ धूपः ॥ ॐ यत्पुरुष०॥ ऋक् ॐ कर्दमेन प्र० ऋक् ॥ हन्तारं मदनस्य नन्दयसि यैरङ्गैरनङ्गोज्वलैर्यैर्भृङ्गावलिनीलकुन्तलभरैर्बध्नासि तस्याशयम् ॥तानीमानि तवाम्ब कोमलतराण्यामोदलीलागृहाण्यामोदाय दशाङ्गगुग्गुलुघृतैर्धूपैरहं धूपये ॥ इतिमन्त्रान् पठित्वा । वामभागे अङ्गारपूर्णे धूपपात्रे धूपं निक्षिप्य अस्त्रमन्त्रेण प्रोक्ष्य हृन्मन्त्रेण पुष्पं समर्प्य वामतर्जन्या संस्पृश्य ततो वामहस्तेन घण्टां वादयन् दक्षिणहस्तेन देवतानाभिदेशपर्यन्तं धूपपात्रमुधृत्य पुनर्भूमौ स्थापयेत् ॥ मूलम् ॥ साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः धूपं समर्पयामि इति शङ्खोदकमुत्सृज्य धूपमुद्रां दर्शयेत् ॥ इत आरभ्य राजोपचारान्विना सर्वत्रोपचारेषु साङ्गायै सपरिवारायै चण्डिकायै इति सविशेषणदेवतानामप्रयोगः कर्तव्यः ॥ इति धूपः ॥ ७२ ॥ अथ दीपः ॥ॐ ब्राह्मणोस्य० ऋक् ॥ ॐ आपः सृजन्तु० ऋक् ॥ रत्नालङ्कृतहेमपात्रनिहितैर्गोसर्पिषालोडितैर्दीपैर्दीर्घतरान्धकारभिदुरैर्बालार्ककोटिप्रभैः ॥ आताम्रज्वलदुज्वलप्रविलसद्रत्नप्रदीपैस्तथा मातस्त्वामहमादरादिहमुहुर्नीराजयाम्युच्चकैः ॥ इति मन्त्रान् पठित्वा वामहस्तेन घण्टां वादयन् दक्षिणहस्तेनापादाद्देवतानेत्रपर्यन्तं दीपेन पुनःपुनर्नीराज्य । मूलम् ॥ साङ्गायै सपरिवारायै चण्डिकायै नमः दीपं समर्पयामीति दीपं समर्प्य दीपमुद्रां दर्शयेत् ॥ इति दीपः ॥ ७३ ॥ ततः सपरिवारां देवतां भुक्तिमण्डपं प्रवेश्य ॥ मूलम् ॥ साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः भुक्तिमण्डपप्रवेशं कल्पयामि ॥७४॥ मूलम् ॥ साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः भुक्तिपीठेप्रवेशनं कल्पयामीत्युक्त्वा तथा कुर्यात् ॥ ७५ ॥ अथ नैवेद्यः॥ देव्याः पुरतः जलेन चतुरस्रं मण्डलं कृत्वा तत्राधारं संस्थाप्य तदुपरि क्षीरदधिघृतसूपशाकव्यञ्जनादिसहितषड्रसभक्ष्यभोज्यादिपञ्चविधान्नपूर्णं स्वर्णादिपात्रं निधाय ॥ ॐ चन्द्रमा मन० ऋक् ॥ आर्द्रां यष्करिणीं० ऋक् ॥ मातस्त्वां दधिदुग्धपायस-

महाशाल्यन्नसन्तानिकामूपापूपसिताघृतैः सुवटकैः सक्षौद्ररम्भाफलैः ॥ एलाजीरकहिङ्गुनागरनिशाकुस्तुम्बरीसंस्कृतैः शाकैः साकमहं सुधाधिकरसैः सन्तर्पयाम्यर्चयन् ॥ इति मन्त्रान् पठित्वा । मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः नैवेद्यं सगर्पयामि ॥ इति नैवेद्यं समर्प्य ॥ ७६ ॥ ॐ सत्यं त्वर्तेन परिषिञ्चामि । मूलम् ॥ साङ्गायै सपरिवारायै चण्डिकायै नमः पात्रपरिषेचनं कल्पयामि ॥ ७७ ॥ ॐ अमृतोपस्तरणमसि ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः पूर्वापोशनं कल्पयामि ॥७८॥ ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा । इति तत्तन्मुद्राभिः पञ्चप्राणाहुतीर्दत्वा ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः प्राणाहुतीः कल्पयामि ॥७९॥ ततो देवीं भुञ्जानां भावयन् वामहस्तेन ग्रासमुद्रां दर्शयन् सप्तवारं मूलं जपेत्॥ मूलम् ॥ साङ्गायै सपरिवारायै चण्डिकायै नमः । भुक्तिं परिकल्पयामि ॥८०॥ ॐ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः पानीयं सधा ॥ इति पानार्थे जलं दद्यात् ॥८१॥ ॐ अमृतापिधानमसि ॥ मूलम्॥ साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः उत्तरापोशनं समर्पयामि ॥ ८२ ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः हस्तप्रक्षालनं कल्पयामि ॥८३॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः । मुखप्रक्षालनं कल्पयामि ॥ ८४ ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः । करोद्वर्तनार्थे चन्दनं समर्पयामि ॥ ८५ ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः । आचमनीयं सुधेत्याचमनीयार्थे जलं दद्यात् ॥८६॥ अथ नैवेद्यस्य चतुर्थांशं उच्छिष्टचाण्डाल्यै स्वाहेत्युच्छिष्टचाण्डालीनाम्न्यै देव्युच्छिष्टभोजिन्यै दत्वा तं शूद्राय गवे वा समर्प्य शेषं नैवेद्यं भोजनसमये स्वयं भुञ्जीत बान्धवादिभ्यो वा दद्यात् ॥ **इति नैवेद्यः ॥ अथ पूजाङ्गहोमः ॥** हस्तैः सप्तभिरन्विते त्रिनयने पादैस्त्रिभिः शोभिते मेषाधीश्वरवाहनेऽरुणजटे

शृङ्गैश्चतुर्भिर्युते ॥ रक्ताभेऽरुणलोचने हुतभुजि त्वाद्विग्रहे चण्डिके हव्यं भुङ्क्ष्व मया वषट्कृतमिदं स्वीयैर्गणैरान्विता ॥ इति श्लोकमन्त्रं पठित्वा ॥ कुण्डं स्थण्डिलं वा मूलेन वीक्ष्यास्त्रमन्त्रेण प्रोक्ष्य तेनैव कुशैः सन्ताड्य कवचेनाभ्युक्ष्य । ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वाणि कार्याणि साधय स्वाहा ॥ इत्याग्निमावाह्य । ॐ ह्रूं वह्निचैतन्याय नमः । इत्याग्निं प्रतिष्ठाप्य । आज्यमानीय वमित्यमृतीकृत्य मूलेनं त्रिवारमभिमन्त्र्य । अग्निं परिसमुह्य पर्युक्ष्य । मूलान्ते भगवति चण्डिके इहागच्छेह प्रतिष्ठेह सन्निहिता भवेति देवीमग्नावावाह्य । मूलेन नाममन्त्रेण च पञ्चोपचारैः सम्पूज्य । अग्निदेवतयोरैक्यं विभाव्य । ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा । अग्नये पृथिव्यै महत इदं न मम ॥ ॐ भुवो वायवे चान्तरिक्षाय च महते च स्वाहा । वायवे चान्तरिक्षाय महत इदं न मम । ॐ सुवरादित्याय च दिवे च महते च स्वाहा । आदित्याय दिवे महत इदं न मम । ॐ भूर्भुवः सुवश्चन्द्रमसे नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा । चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यो महत इदं न मम । इति व्यस्तसमस्तव्याहृतिभिराज्यं हुत्वा । ततः स्वाहान्तेन मूलेन चण्डिकायै इदं न ममेत्युद्देशत्यागसहितेन पञ्चविंशत्यन्नाहुतीर्हुत्वा पुनः पूर्ववन्महाव्याहृतिभिराज्यहोमं कृत्वा । अग्नावावाहितां देवतां सपुष्पेण मूलेन पीठस्थदेवतायां संयोज्य । पूर्ववदाग्निं परिसमुह्य पर्युक्ष्य । ॐ अग्नये नमः इत्याग्निं सम्पूज्य । ॐ गच्छ वह्ने महाशक्ते सर्वकामप्रसाधक ॥ कर्मान्तरे तु सम्प्राप्ते सान्निध्यं कुरु सादरम् ॥ इत्यक्षतैर्वह्निं विसृज्य । मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः होमं समर्पयामि इत्यर्घ्योदकमुत्सृजेत् ॥ **इति पूजाङ्गहोमः** ॥ ८७ ॥ **अथ बलिदानम्** ॥ शिवे त्वदीयान् बटुकं गणाधिपं क्षेत्रेश्वरं भैरवयोगिनीगणान् ॥ सर्वोपचारैः परिपूज्य भक्तितो निवेदयेऽमुं बलिमार्तिशान्त्यै ॥ इति पठित्वा ॥ मण्डलं कृत्वा तदुपरि पायसादिनानाविधान्नपूर्णं पात्रं निधाय बटुकादिभ्यो नमः

इति गन्धपुष्पाक्षतधूपदीपान् समर्प्य बलिं समर्पयेत् । तत्र मन्त्राः ॥ भूता ये विविधाकारा दिग्विदिक्षु समाश्रिताः ॥ पातालभूमिव्योमस्था ये च लोकान्तरस्थिताः ॥ विघ्नेशबटुकक्षेत्रपाला योगिन्य एव च ॥ दिक्पाला लोकपालाश्च वैताला भैरवास्तथा ॥ अन्ये च विघ्नकर्तारस्तेभ्यो यच्छाम्यमुं बलिम् ॥ सर्वे सन्तुष्टमनसः सुखदाश्च भवन्तु मे ॥ ॐ ह्रीं विघ्नकृद्भ्यः सर्वभूतेभ्योऽसौ बलिर्दत्तो न ममेत्यर्घ्योदकमुत्सृज्य ॥ मूलम् ॥ साङ्गायै सपरिवारायै चण्डिकायै बलिं समर्पयामि ॥ ८८ ॥ **इति बलिदानम्** ॥

ततो देवतां सभामण्डपं प्रवेशयेत् ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः सभामण्डपप्रवेशं कल्पयामि ॥ ८९ ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः सभापीठोपवेशनं कल्पयामि ॥ ९० ॥

अथ ताम्बूलादिदानम् ॥ कर्पूरादियुतैर्लवङ्गसहितैः कङ्कोलचूर्णान्वितैः सुस्वादुक्रमुकैः सगौरखदिरैः सुस्निग्धजातीफलैः ॥ मातः केतकपत्रपाण्डुरुचिभिस्ताम्बूलवल्लीदलैः सङ्कल्पितं मुखमण्डनार्थमतुलं ताम्बूलमङ्गीकुरु ॥ मूलम् ॥ साङ्गायै सपरिवारायै चण्डिकायै नमः ताम्बूलं समर्पयामि ॥९१॥ अथ बहुमणिमिश्रैर्मौक्तिकैस्त्वां प्रकीर्य त्रिभुवनकमनीयैः पूजयित्वा च वस्त्रैः ॥ मिलितविविधमुक्तां दिव्यमाणिक्ययुक्तां जननि कनकसृष्टां दक्षिणां तेऽर्पयामि ॥ मूलम् ॥ साङ्गायै सपरिवारायै चण्डिकायै नमः दक्षिणां समर्पयामि ॥ ९२ ॥ नारिङ्गरम्भाफलनारिकेलद्राक्षाम्रजम्बूफलदाडिमानि ॥ सद्बीजपूरामलकादिकानि फलानि ते देवि समर्पयामि ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः फलानि समर्पयामि ॥ ९३ ॥ **अथ सुगन्धिद्रव्यम्** ॥ जननि चम्पकतैलमिदं मुदा मृगमदोपयुतं पटवासकम् ॥ सुरभिगन्धजलं च चतुःसमं सपदि सर्वमिदं प्रतिगृह्यताम् ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः सुगन्धिद्रव्याणि समर्पयामि ॥ ९४ ॥ **अथ व्यजनम्** ॥ शिखिपिच्छियुतैः स्वभावशीतैरतिसौरभ्ययुतैरुदीच्यक्लृप्तैः ॥

भ्रमरीमुखरीकृतैः सुशोभैर्व्यजनैस्त्वां जगदम्ब वीजयामि ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः व्यजनं समर्पयामि ॥ ९५ ॥ **अथ गीतादि** ॥ विपञ्चीषु सप्तस्वरान् वादयन्तस्तवाग्रे प्रगायन्ति सङ्गीतवन्तः ॥ महागायकास्तत्समाकर्णय त्वं क्षणं सावधानेन चित्तेन मातः ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः गीतं समर्पयामि ॥ ९६ ॥ डमरुडिण्डिमझर्झरझल्लरीमृदुरवद्रगडन्मुरजादयः ॥ झटिति झङ्कृतिझाङ्कृतिझाङ्कृतैर्बहुदयं हृदयं सुखयन्तु ते । मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः वाद्यानि समर्पयामि ॥ ९७ ॥ भ्रमरलुलितलोलकुन्तलालीविगलितमाल्यविकीर्णरङ्गभूम्यः ॥ युवजनसुखकारिचारुलीला भगवति ते पुरतो नटन्ति नट्यः ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः नृत्यं समर्पयामि ॥ ९८ ॥ **अथ छत्रादयो राजोपचाराः** ॥ प्रान्तस्फुरद्विमलमौक्तिकगुच्छजालं चञ्चन्महामणिविचित्रितहेमदण्डम् ॥ उद्यत्सहस्रकरमण्डलचारुहेमच्छत्रं महेशमहिले विनिवेदयामि ॥ मूलम् । साङ्गायै सपरिवारायै इति सर्वत्रान्वय श्रीचण्डिकायै नमः छत्रं समर्पयामि ॥ ९९ ॥ शरदिन्दुमरीचिगौरवर्णैर्मणिमुक्ताविलसत्सुवर्णदण्डैः ॥ जगदम्बविचित्रचामरैस्त्वामहमानन्दभरेण वीजयामि ॥ मूलम् । श्रीचण्डिकायै नमः चामराणि समर्पयामि ॥ १०० ॥ मयूरपिच्छारचितैः सुदीर्घैर्मयूरचेलाभिधया प्रसिद्धैः ॥ सुमुष्टियुक्तैस्तव वीजयामि मुखं शिवे स्वेदलवोपशान्त्यै ॥ मूलम् । श्रीचण्डिकायै नमः मायूरप्रकीर्णकानि समर्पयामि ॥ १०१ ॥ सद्रत्नैः खचितं सुवर्णरचितं पत्रावलीराजितं हस्ते कञ्चुकिना धृतं महेशवनिते चिह्नं नृपाणामिदम् ॥ दण्डं ते विनिवेदयामि गिरिजे स्वीकृत्य चात्यादराद्दण्डाद्रक्ष कृतान्तपाणिविधृतान्मामम्ब कारुण्यतः ॥ मूलम् । श्रीचण्डिकायै नमः सुवर्णदण्डं समर्पयामि ॥ १०२ ॥ दण्डं द्वितीयमपि वैत्रवतीकरस्थं पत्रावलीविरचनाभिरलङ्कृताङ्गम् ॥ शर्वाणि रूप्यमयमिन्दुकलावदातं सङ्गृह्य सन्तनु कृतार्थमिमं स्वभृत्यम् ॥ मूलम् । श्रीचण्डिकायै नमः ॥ रूप्यदण्डं समर्प-

यामि॥१०६॥ भगवति कलितोऽयं वाहनार्थे मया ते तुरगशतसमेतो वायुवेगस्तुरङ्गः ॥ सुखगतिरथ तुङ्गो रत्नपल्याणयुक्तः कनकमयविभूषः स्निग्धगम्भीरघोषः ॥ मूलम् ॥ श्रीचण्डिकायै नमः अश्वं समर्पयामि ॥ १०४ ॥ मधुकरवृतकुम्भन्यस्तसिन्दूररेणुः कनकघटितघण्टाकिङ्किणीशोभिकण्ठः ॥ श्रवणयुगुलचञ्चच्चामरो मेघतुल्यो जननि तव मुदे स्यान्मत्तमातङ्ग एषः ॥ मूलम् । चण्डिकायै नमः गजं समर्पयामि ॥१०५॥ द्रुततरतुरगैर्विराजमानं मणिमयचक्रचतुष्टयेन युक्तम् ॥ कनकमयममुं वितानवन्तं भगवति ते रथमर्पयामि मातः ॥ मूलम् । श्रीचण्डिकायै नमः रथं समर्पयामि ॥ १०६ ॥ तपनीयमयी सुतूलिका कमनीया मृदुलोत्तरच्छदा ॥ नवरत्नविभूषिता मया ते शिबिकेऽयं जगदम्बिकेऽर्पिता ॥ मूलम् । श्रीचण्डिकायै नमः शिबिकां समर्पयामि ॥१०७॥ **अथ मायूरपिच्छातपत्रम्** ॥ विनिर्मितं बर्हिविचित्रपिच्छैर्वृत्तं विशालं मणिदीर्घदण्डम् ॥ उमेऽऽद्गिर्याह्वयमातपत्रं मूर्ध्न्यादधे ते शिबिकास्थितायाः ॥ मूलम् । श्रीचण्डिकायै नमः मायूरातपत्रं समर्पयामि ॥ १०८ ॥ अथ पुनर्यागमण्डपप्रवेशं कारयित्वा यागपीठे उपवेशयेत् ॥ मूलम् । साङ्गायै सपरिवारायै चण्डिकायै नमः यागमण्डपप्रवेशं कारयामि ॥ १०९ ॥ मूलम् । साङ्गायैसपरिवारायै चण्डिकायै नमः यागपीठे उपवेशयामि ॥ ११० ॥ **अथार्तिक्यम्** ॥ नानारङ्गवल्लीविराजिते एकस्मिन् पात्रे डमरुसदृशाकारपीतपिष्ठमयायतनान् नवघृतदीपान् संस्थाप्य ॥ ॐ श्रियेजातः० इत्यादिवैदिकमन्त्रान् पठित्वा॥ महति कनकपात्रे रङ्गवल्यादिचित्रे डमरुसदृशरूपाबद्धगोधूमपिष्ठान् ॥ घृतयुतबहुवर्तीन् न्यस्य दीपान् विशालान् भुवनजननि कुर्वे शुद्धमारार्तिकं ते ॥ इति श्लोकमन्त्रं पठित्वा। वाद्यपुरःसरं संस्कृतलौकिकभाषानिबद्धानि मङ्गलपद्यानि पठन् मूर्धादिपादान्तं पादादिमूर्धान्तं च नवकृत्वो नीराज्य ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचडिण्कायै नमः॥

मङ्गलार्तिक्यं समर्पयामि ॥ १११॥ **अथ कर्पूरदीपः** । ॐ अग्ने गोराज्ञा० ऋक् ॥ दीप्तेन कर्पूररसेन देवि सुधांशुशुभ्रेण सुगन्धिना च ॥ दुष्कीटकत्रासनिरासकेन नीराजयाम्युज्ज्वलमाननं ते ॥ मूलम् । साङ्गायै । सपरिवारायै । चण्डिकायै नमः कर्पूरदीपं समर्पयामि ॥११२॥ **अथ पुष्पाञ्जलिः** ॥ चरणनलिनयुग्मं पङ्कजैरर्चयित्वा कनककमलमालां कण्ठदेशेऽर्पयित्वा ॥ शिरसि विनिदधेऽमुं रत्नपुष्पाञ्जलिं ते हृदयकमलमध्ये देवि हर्षं तनोतु ॥ इति पठित्वा । ॐ नमोमहद्भ्यो० ॐ राजाधिराजायेत्यादिनाचारप्राप्तान् वैदिकमन्त्रान् पठित्वा ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः पुष्पाञ्जलिं समर्पयामि ॥ १०३ ॥ ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवे ॥ स्तवीमि त्वां यथाशक्ति महर्षिकृतसत्स्तवैः ॥ इति श्लोकमन्त्रं पठित्वा । चण्डीस्तवस्य प्रथमाध्यायगतब्रह्मकृतस्तुतिश्लोकैः चतुर्थाध्यायगतशक्रादिकृतस्तुतिश्लोकैः पञ्चमाध्यायगतदेवकृतस्तुतिश्लोकैः एकादशाध्यायगतदेवकृतस्तुतिश्लोकैश्च स्तुत्वा । अशक्तौ केवलपञ्चमाध्यायगतस्तुतिश्लोकैः स्तुत्वा मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः स्तुतिं कल्पयामि ॥११४॥ **अथ वेदपाठः** ॥ श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिके ॥ त्रयीसूक्तान्यघघ्नानि शुभान्याकर्णयाम्बिके ॥ यथाशक्ति वेदसूक्तानि पठित्वा ॥ मलम । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः वेदपारायणं समर्पयामि ॥ ११५ ॥ **अथ शास्त्रचर्चा** ॥ सकलागमसन्दोहशुक्तिसम्पुटमुक्तिके ॥ सर्वशास्त्रोक्तसिद्धान्तान् गिरिजे श्रावयामि ते ॥ इति पठित्वा शास्त्रचर्चां कृत्वा मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै शास्त्रचर्चां समर्पयामि ॥ ११६॥ **अथ पुराणप्रवचनम्** ॥ चिराय धीराःपरिशीलयन्ति यत्सर्वदा व्याससुखाः सुखाय ॥ तत्त्वं मयाकर्णय वर्ण्यमानं कर्णामृतं देवि महापुराणम् ॥ इति श्लोकं पठित्वा पुराणप्रवचनं कृत्वा । मूलम् । साङ्गायै सपरिवारायै श्रीचाण्डिकायै नमः पुराणप्रवचनं समर्पयामि ॥११७॥ **अथ मूलमन्त्रजपः** ॥

सप्तकोटिमहामन्त्रप्रतिपाद्येऽम्ब चण्डिके ॥ करोमि ते प्रसादार्थं त्वन्नवार्णमनोर्जपम् ॥ इति पठित्वा जपप्रकाशोक्तप्रकारेण नवार्णमन्त्रजपं कृत्वा । मूलम् । श्रीचण्डिकायै नमः मूलमन्त्रजपं समर्पयामि ॥११८॥ **अथ सप्तशतीपाठः** ॥ मधुकैटभनाशं च महिषासुरघातनम् ॥ कीर्तयिष्यामि ते प्रीत्यै वधं शुम्भनिशुम्भयोः ॥ इति श्लोकं पठित्वा । जपप्रकाशोक्तरीत्या सप्तशतीपाठं कृत्वा अशक्तौ मध्यमचरित्रमात्रं पठित्वा ॥ मूलम् । श्रीचण्डिकायै नमः देवीमाहात्म्यपाठं समर्पयामि ॥ ११९ ॥ **अथ प्रदक्षिणा** ॥ ॐ नाभ्याआसी० ऋक् ॥ ॐ आर्द्रीं पुष्करिणीं० ऋक् ॥ पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति ॥ तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परिकल्पयामि ॥ इति पठित्वा ॥ ॐ शूलेन पाहि नो देवीतिश्लोकचतुष्टयेनैकां प्रदक्षिणां कृत्वा । मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः प्रदक्षिणां कल्पयामि ॥ १२० ॥ **अथ नमस्काराः** ॥ ॐ सप्तास्यासन्० ऋक् ॥ ॐ तां म आवह० ऋक् ॥ उरसा शिरसोरुपर्वपत्करयुग्मैर्वचसा हृदा दृशा ॥ जगदम्ब नमांसि पञ्च ते रचयाम्यात्मविशुद्धये शिवे ॥ इति पठित्वा नमो देव्यै महादेव्यै इति पञ्चश्लोकैः पञ्च नमस्कारान् कृत्वा । मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः नमस्कारान् कल्पयामि ॥ १२१ ॥ **अथोत्तरपूजनम्** ॥ अर्चाविधौ ज्ञानलवोऽपि दूरे दूरे तदापादकवस्तुजातम् ॥ तथापि भूयो यजनावसाने पञ्चोपचारार्चनमर्पयामि ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमो मन्त्रेण च गन्धादिपञ्चोपचारैः पूजयेत् ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः उत्तरपूजनं समर्पयामि ॥ १२२ ॥ **अथोत्तरार्घ्यम्** ॥ विरिञ्चिमुख्यामरवृन्दवन्दिते सरोजमत्स्याङ्कितपादपल्लवे ॥ ददामि ते पार्वति पादपङ्कजे मञ्जीरभूषे पुनरर्घ्यमीश्वरि ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः उत्तरार्घ्यं समर्पयामि ॥ १२३ ॥ **अथ ब्रह्मार्पणम्** ॥ जपो जल्पः शिल्पं

सकलमपि मुद्राविरचनं गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ॥ प्रणामः संवेशः सुखमखिलमात्मार्पणधिया सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥ इति पठित्वा ॥ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत् कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ मां मदीयं च सकलं चण्डिकायै समर्पये स्वाहा ॥ ॐ तत्सत् ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः ब्रह्मार्पणं समर्पयामि ॥ १२४ ॥ निस्सीमोत्सवधात्रि धातृवरदे जानामि नावाहनं नो जानामि विसर्जनं गिरिसुते जानामि नो पूजनम् ॥ नो जानामि तवोपचारनिचयं सर्वापराधानिमान् क्रोधोद्रेकभरप्रदानपि कृपावापि क्षमस्वाम्बिके ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः क्षमापनं कल्पयामि ॥ १२५ ॥ एषा भक्त्या तव विरचिता या मया देवि पूजा स्वीकुर्वेनां सपदि यदभवच्चात्र मद्बालभावात् ॥ न्यूनं यत्तत्तव करुणया पूर्णतामेतु सद्यः सानन्दं मे हृदयकमले तेऽस्तु नित्यं निवासः ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः अच्छिद्रतायाचनं कल्पयामि ॥ १२६ ॥ विद्यां देहि मुखे मनोहरतरां वाणीं तनौ नैरुजं पुत्रं चातिगुणोत्तरं च विभवं वित्तान्यनन्तानि च ॥ कीर्तिं देहि सुधाम चारुललनां वाजीभराजीरथं सौभाग्यं सकलं त्वदीयचरणे भक्तिं सदा निश्चलाम् ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः वरयाचनां कल्पयामि ॥ १२७ ॥ **अथ विसर्जनम्** ॥ ॐ यज्ञे नयज्ञ० ऋक् ॥ ॐ यः शुचिः प्र० ऋक् ॥ महेश्वरि त्वं सकलाङ्गदैवतैर्गृहीतपूजा पुनरागमाय ॥ प्रसादतो मामनुकम्प्य दुर्गे व्रजात्मनः स्थानमनल्पसौख्यम् ॥ इति पठित्वा पीठावरणादिदेवतास्वक्षतान् क्षिप्त्वा ॥ पीठे चावरणे चैव पूजिता यांश्च देवताः ॥ महादेव्यङ्गलीनास्ता भवन्तु च सुखावहाः ॥ इति श्लोकं पठन् चण्डिकाङ्गलीना विभाव्य ॥ ॐ उत्तिष्ठ ब्रह्मणस्पते० ऋक् ॥ ॐ अभ्यारमिद०

ऋक् ॥ यान्तु देवगणाः० इति मन्त्रैः साक्षतपुष्पाञ्जलिं दत्त्वा ततो देवताङ्गस्थमेकं पुष्पं गृहीत्वा तस्मिन् साङ्गां सपरिवारां मुख्यदेवतामागतां विभाव्य तत्पुष्पमाघ्राय नासारन्ध्रेण सुषुम्नावर्त्मना साङ्गां सपरिवारां देवतां हृदयगतां मत्वा पुष्पमन्यत्र क्षिपेत् ॥ मूलम् । साङ्गायै सपरिवारायै श्रीचण्डिकायै नमः विसर्जनं कल्पयामि ॥ इत्यर्घ्योदकमुत्सृजेत् ॥ विसर्जनमुद्रां च दर्शयेत् ॥ स्थिरप्रतिमाशालग्रामादिषु आवाहनविसर्जने न कुर्यात् किन्तु तत्स्थाने पुष्पाञ्जलिं दद्यादिति प्रागुक्तम् ॥ **इति विसर्जनम्** ॥ १२८ ॥ अनया पूजया आदिशक्तिः श्रीचण्डिका प्रीयतामित्यर्घ्योदकमुत्सृजेत् ॥ इत्य**ष्टाविंशत्यधिकशतोपचारपूजा** ॥ **अथ तीर्थपानादि** ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥ चण्डीपादोदकं तीर्थं जठरे धारयाम्यहम् ॥ इति **तीर्थपानमन्त्रः** ॥ सर्वपापप्रशमनं सर्वव्याधिविनाशनम् ॥ चण्डीपादोदकं तीर्थं शिरसा धारयाम्यहम् ॥ इति शिरसि तीर्थप्रोक्षणमन्त्रः ॥ सर्वदुःखप्रशमनं सर्वपापप्रणाशनम् ॥ चण्डिकाङ्गस्थितं पुष्पं शिरसा धारयाम्यहम् ॥ इति **निर्माल्यधारणमन्त्रः** ॥ शङ्खमध्यस्थितं तोयं भ्रामितं देवतोपरि ॥ अङ्गलग्नमिदानीं मे सर्वपापं व्यपोहतु ॥ इति मन्त्रेण शङ्खस्थजलेनात्मानं प्रोक्षेत् ॥ ततः । गच्छ गच्छ महादीप स्वस्थानं प्रतिपूजितः ॥ कर्मान्तरे तु सम्प्राप्ते पुनरागमनाय च ॥ इति पूजारम्भे स्थापितं दीपं पुष्पाक्षतैर्विसृज्य पूर्ववद्द्विराचम्य त्रिः प्राणानायम्य कर्मेश्वरार्पणं कुर्यात् ॥ तत आसनादुत्थायासनदेवता नमस्कृत्यासनमुद्धृत्य तत्स्थाने शान्तिरस्त्विति जलमासिच्य क्षमायै नम इति पृथिवीं प्रणम्य यथेष्टं व्यवहरेत् ॥ **इति चण्डिकोपास्तिदीपिकायां नित्यार्चाप्रकाशः समाप्तः** ॥

इति चण्डिकोपास्तिदीपिकायां नित्यार्चाप्रकाशः ।

॥ श्री ॥

अथ चण्डिकोपास्तिदीपिकायां नैमित्तिकार्चाप्रकाशः ।

॥ श्री ॥

नैमित्तिकार्चाप्रकाशः ।

अथ नैमित्तिकार्चाप्रकाशः प्रारभ्यते ॥ तत्रादौ देवीनवरात्रमहोत्सवः ॥ स च चैत्रशुक्लपक्षे आश्विनशुक्लपक्षे च प्रतिपदादिनवम्यन्तं विहितः तदाह **धौम्यः** । आश्विने शुक्लपक्ष तु कर्तव्यं नवरात्रकम् ॥ प्रतिपद्दिनमारभ्य यावच्च नवमी भवेत् ॥ इति ॥ अत्राश्विनपदं चैत्रस्याप्युपलक्षकम् । तत्रापि नवरात्रमहोत्सवविधानात् ॥ तथा च **मार्कण्डेयपुराणे** । शरत्काले महापूजा या प्रोक्ता प्रतिवार्षिकी ॥ वसन्तकालेऽपि च सा कार्या सर्वसुखार्थिभिः ॥ इति रहस्यतन्त्रे च प्रतिसंवत्सरं कुर्याच्छारदं वार्षिकं तथा ॥ तेन सर्वमवाप्नोति सुरासुरसुदुर्लभम् ॥ इति ॥ (वर्षे भवं वार्षिकम् । कालाट्ठञ् । अत्र वर्षपदं लक्षणया वर्षारम्भमासपरम् । तेन चैत्रस्य ग्रहणम् । नवरात्रशब्दः कर्मनामधेयम् ॥ तेन तिथिक्षयवृद्धिवशेन दिनन्यूनाधिकत्वेऽपि नवरात्रपदप्रयोगो न विरुध्यते । एवं चम्पाषष्ठ्यादिनवदिनन्यूनव्रतेष्वपि ज्ञेयम् ॥ अत्र सर्वत्र प्रतिपदादितिथिनिर्णयो धर्मशास्त्रग्रन्थतो ज्ञेयः ॥ इदं नवरात्रव्रतं नित्यं काम्यं च । यो मोहादथवालस्याद्दुर्गां देवीं महोत्सवे ॥ न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव ॥ क्रुद्धा भगवती तस्य सर्वान् कामान्निहन्ति वै ॥ तस्मात्सर्वैरपि नरैः कार्यं देव्याः प्रपूजनम् ॥ विभूतिमतुलां लब्धुं चतुर्वर्गफलप्रदम् ॥ इति **कालिकापुराणे** । अकरणे महाप्रत्यवायोक्तेः करणे च विभूतिलाभादिमहाफलोक्तेः ॥ अशक्तौ सप्तरात्राद्यनुकल्पा आश्रयणीया न तु सर्वथा लोपः कर्तव्यः ॥ अनुकल्पाश्चोक्ता **धौम्येन** । अशक्तौ तु प्रकर्तव्यं सप्तपञ्चत्र्यहादिवेति ॥ तत्र सप्तरात्रं तृतीयादिनवम्यन्तम् ॥ पञ्चरात्रकं पञ्चम्यादि नवम्यन्तम् ॥ त्रिरात्रं सप्तम्यादिनवम्यन्तम् । आदिपदेन द्व्यहैकाहपक्षावपि सूचितौ ॥

तत्र द्विरात्रपक्षो **हेमाद्रौ भविष्ये** ॥ अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम् ॥ पूजयित्वा प्रयत्नेन विशोको जायते नरः ॥ इति ॥ एकरात्रपक्षः **कालिकापुराणे** ॥ यद्वैकस्यामथाष्टम्यां नवम्यां वापि साधकः ॥ पूजयेद्वरदां देवीं यथाविभवविस्तरम् ॥ इति ॥ अशौचप्राप्तावप्येष्वेकतमः पक्षो यथासम्भवमाश्रणीयः ॥ सर्वथा लोपप्रसक्तौ तु शारीरानियमान् स्वयं कुर्यात् पूजादिकमाचार्यादिना कारयेत् ॥ ब्राह्मणसुवासिनीभोजनादिकमाशौचान्ते कुर्यात् ॥ आरम्भोत्तरमाशौचप्राप्तावप्येवमेव ॥ पूर्वसङ्कल्पितं यत्तु व्रतं सुनियतव्रतैः ॥ तदाशौचेऽपि कर्तव्यं दानार्चनविवर्जितम् ॥ इति **विष्णुस्मृतेः** ॥ आरब्धव्रतमध्ये स्त्रीणां रजोदोषेप्येवमेव। पारणाहे आशौचादिप्राप्तौ पारणायाः शारीरनियमत्वादनिषेधः ॥ अस्मिन् व्रते सर्वेषामधिकारः। तदुक्तं **भविष्योत्तरे** ॥ पूजनीया जनैर्देवी त्वाश्विने नवरात्रके ॥ गृहे गृहे भक्तिपरैर्ग्रामे ग्रामे वने वने ॥ स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ॥ वैश्यैः शूद्रैर्भक्तियुतैर्म्लेच्छैरन्यैश्च मानवैः ॥ स्त्रीभिश्च कुरुशार्दूलेति ॥ **देवीपुराणे च** ॥ क्रत्वर्थं ब्राह्मणैः कार्यं क्षत्रियैर्भूमिपालने ॥ गोधनार्थं तथा वैश्यैः शूद्रैः पुत्रसुखार्थिभिः ॥ सौभाग्यार्थं च नारीभिरन्यैश्च धनकामिभिः ॥ एवं नानाम्लेच्छगणैः कर्तव्यं सर्वदस्युभिः ॥ महाव्रतमिदं राजन् शङ्कराद्यैरनुष्ठितम् ॥ इति ॥ तच्च ब्राह्मणादिभिः स्वस्वजात्युचितधर्मेणानुष्ठेयम् ॥ तथाहि **भविष्ये**। शारदी चण्डिकापूजा त्रिविधा परिगीयते ॥ सात्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः॥ राजसी बलिदानेन नैवेद्यैः सामिषैस्तथा ॥ जपयज्ञादिसहितेति शेषः ॥ सुरामांसाद्युपाहारैर्जपयज्ञविनाकृता ॥ विना मन्त्रैस्तामसी स्यादिति ॥ तत्र ब्राह्मणैः सात्विकी कार्या । क्षत्रियादित्रयेण राजस्यपि। किरातादिभिस्तामस्येव ॥ स्त्रीशूद्राणां क्वचित् पौराणमन्त्रपाठे स्वतोऽप्यधिकार उक्तः। तथापि जपहोमादिकं ब्राह्मणद्वारैव । म्लेच्छादीनां ब्राह्मणद्वारापि नाधिकारः। किन्तु तैस्तत्तदुपचाराणां देवीमुद्दिश्य मनसैवो-

त्सर्गमात्रं कर्तव्यम् इति **कौस्तुभे** विशेषः। **इति नवरात्रे सामान्यनिर्णयः** ॥ **अथ नवरात्रे साधारणकृत्यम्** ॥ **चण्डिकार्चनरहस्ये** ॥ नवरात्रे तु सम्प्राप्ते मण्डपं सुदृढं नवम् ॥ वस्त्रैः परिवृतं कुर्यान्नानावर्णैः सुशोभनैः ॥ पूगैश्च नारिकेलैश्च रम्भाभिः परिवेष्टितम् ॥ पल्लवैर्विविधैः पुष्पैः शोभितं फलसञ्चयैः ॥ चण्डिकां पूजयेन्नित्यं त्रिकालं भक्तिसंयुतः ॥ रात्रौ जागरणं कुर्याद्गीतवादित्रनिस्वनैः ॥ इति ॥ **कालिकापुराणे** ॥ त्रिकालं वा द्विकालं वा पूजयेद्वैककालकम् नानोपचारैर्बिल्वैश्च द्रोणपुष्पैर्विशेषतः ॥ इति ॥ **नारदीये** । अखण्डदीपकं देव्याः प्रीतये नवरात्रकम् ॥ प्रज्वालयेदहोरात्रमेकचित्तो धृतव्रतः ॥ इति ॥ **पाद्मे** ॥ ग्रथिता विविधैः पुष्पैर्देवतायाश्च मण्डपे ॥ बध्नीयात्प्रत्यहं माला वंशवृद्ध्यै मनोरमाः ॥ इति ॥ **भविष्ये** ॥ माहात्म्यं भगवत्यास्तु **मार्कण्डेयेन** भाषितम् ॥ नवार्णमन्त्रं च जपेत्सर्वकामसमृद्धये ॥ इति ॥ एतद्विधिर्**जपप्रकाशात्** ज्ञातव्यः ॥ अयं नवरात्रप्रयुक्तः सप्तशतीनवार्णमन्त्रजपः पूजाङ्गजपात्पृथक् कार्यः ॥ **मार्कण्डेयपुराणे** । शरत्काले महापूजा क्रियते या च वार्षिकी ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ॥ मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ इति ॥ देवीमाहात्म्यश्रवणमपि विहितम् ॥ एतच्छ्रवणविधिर्**देवीपुराणे** ॥ वाचकं पूजयित्वादौ यथाविभवमादरात् ॥ शृणुयात्तन्मुखाद्राजन् देवीमाहात्म्यमादितः ॥ आद्येऽह्नि सर्गे एकःस्याद्द्वितीयेऽह्नि तथैककः ॥ तृतीये द्वितयं तुर्ये एकः स्यात्पञ्चमे द्वयम् ॥ षष्ठे चैकः सप्तमे तु द्वितयं चैककोऽष्टमे ॥ नवमे द्वितयं चेति सर्गभाग उदाहृतः ॥ इति ॥ भोजनात् प्राक् श्रवणासम्भवे भोजनानन्तरमपराह्णे वा, सायं पूजानन्तरं वा श्रवणं कार्यम् ॥ **कालिकापुराणे** । कुमारीः पूजयेद्भक्त्या प्रत्यहं भोजयेच्च ताः ॥ विप्रान् सुवासिनीश्चापि बटुकांश्चापि भोजयेत् ॥ इति ॥ तत्र पूज्यकुमारीणां लक्षणानि

स्कान्दे ॥ एकवर्षा तु या कन्या पूजायां तां विवर्जयेत् ॥ गन्धपुष्पफलादीनां तस्याः प्रीतिर्यतो न हि ॥ द्विवर्षकन्यामारभ्य दशवर्षावधिक्रमात् पूजयेत् सर्वकार्येषु नानाविध्युक्तमार्गतः ॥ द्विवर्षा सा कुमार्युक्ता त्रिमूर्तिश्च त्रिहायणी ॥ चतुरब्दा तु कल्याणी पञ्चवर्षा तु रोहिणी ॥ षडब्दा कालिका प्रोक्ता चण्डिका सप्तहायनी ॥ सुभद्रा दशवर्षोक्ता तत्तन्नाम्ना प्रपूजयेत् अत्र नवरात्रतिथीनां कुमारीणां च समसङ्ख्यत्वात् प्रतिपदादितिथिक्रमेणैताः पूजनीयत्वेनोक्ता इति न मन्तव्यम् । यदा यद्वर्षवयस्का कुमार्युपलभ्येत तदा तत्प्रयुक्तोपर्युक्तनाम्नैव सा पूज्येत्येतावन्मात्रे वचनस्य तात्पर्यात् ॥ केचित् प्रतिपदादिक्रमेण शैलपुत्री ब्रह्मचारिणीत्यादिकवचनोक्तनवदुर्गानामभिः कुमारीः पूजयन्ति तत्र मूलं चिन्त्यम् ॥ धौम्योक्ता एकवर्षादिषोडशवर्षान्ताः कुमार्यः **कौस्तुभे** द्रष्टव्याः ॥ अथ अपूज्याः कुमार्यो **मन्त्रमहोदधौ** । नाधिकाङ्गीं न हीनाङ्गीं कुष्ठिनीं च व्रणाङ्किताम् ॥ अन्धां काणां केकरां च कुरूपां बहुरोमशाम् ॥ दासीजातां रोगयुक्तां कन्यकां न च पूजयेत् ॥ इति ॥ (काणा एकाक्षी । केकरा ऊर्ध्वाधस्तिर्यग्दृष्टिः ।) कामविशेषेण कुमारीविशेषा जपप्रकाशे काम्यप्रकरणे वक्ष्यन्ते ॥ आमन्त्रयेद्भक्तिपूर्वं कुमारीं पूर्ववासरे ॥ पूजादिने समाहूय सुविताने शुभासने ॥ उपवेश्य च तां भक्त्या स्वाङ्गन्यासं समाचरेत् ॥ ध्यायेच्च शुद्धमनसा महालक्ष्मीस्वरूपिणीम् ॥ मातुलिङ्गं गदां खेटं पात्रं पीयूषपूरितम् ॥ दक्षिणाधःक्रमाद्धस्तैर्बिभ्रतीं सर्वमङ्गलाम् ॥ सुतप्तहेमवर्णाङ्गीं आद्यामाद्येशपूजिताम् ॥ नवाक्षरेण मन्त्रेण सुसिद्धेन समर्चयेत् ॥ तासामावाहने मन्त्रः स्वयं प्रोक्तः स्वयंभुवा ॥ मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥ तासां क्रमेण कन्यानां पूजामन्त्रानथ ब्रुवे ॥ तत्तन्मन्त्रैः पुराणोक्तैस्तां तां कन्यां प्रपूजयेत् ॥ ते मन्त्राश्च प्रयोगे वक्ष्यन्ते ॥ गण्डले चरणौ तस्याः क्षालयेदुष्णवारिणा ॥ अर्चयेद्धेमपात्रस्थगन्धपुष्पाक्षतादिभिः ॥ दद्यादाचमनं

तस्यै वस्त्रं दद्यात्सकञ्चुकम् ॥ सुकङ्कणाङ्गुलीयानि कर्णालङ्करणे शुभे ॥ ग्रैवेयकं समर्प्य च चन्दनेन विलेपयेत् ॥ हरिद्रां कुङ्कुमं दत्वा सिन्दूरं कज्जलं तथा ॥ पूजयेत् पुष्पमालाभिर्दिव्यैर्धूपैः सुधूपयेत् ॥ कुर्यादारार्तिकं साज्यमुद्धृत्याभ्यर्च्य तां मुहुः ॥ भोजयेद्भक्तिभावेन पायसं घृतशर्कराम् ॥ सुपक्वान्नानि चान्यानि वितरेल्लोभवर्जितः ॥ फलेक्षु चाटुवान्यच्च दद्यात्तस्यै विचक्षणः ॥ यावत्सा भोजनं कुर्यात्तावन्मन्त्रं जपेत्सुधीः ॥ दद्यादाचमनं तस्यै ताम्बूलं च समर्पयेत् ॥ तोषयेद्धेमदानेन कुमारीं च प्रयत्नतः ॥ प्रदक्षिणानमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः ॥ विसर्जयेच्च पूजान्ते स्वगृहं सत्वनिर्भरः ॥ अनेन विधिना राजन् कुमारीं योऽभिपूजयेत् ॥ स पृथ्वीराज्यमासाद्य शिवसायुज्यमाप्नुयात् ॥ इति **कुमारीपूजाविधिः** ॥ इदं देवीपूजाकुमारीपूजादि तिथिक्षये एकस्मिन् दिने द्विरावर्तनीयम् ॥ वृद्धौ दिनद्वये द्विरावर्तनीयम् ॥ यत्तु **चण्डिकार्चनरहस्ये**, यदाद्यदिवसे कुर्याच्चण्डिकापूजनादिकम् ॥ द्विगुणं तद्द्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि ॥ नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ॥ इत्युक्तं तन्नवचण्डीविषयकम् ॥ तत्पूर्वं शरदृताविषे मासि शुक्लपक्षे नराधिप ॥ प्रतिपत्तिथिमारभ्य नवचण्डीं समारभेत् ॥ इत्युपक्रम्य अन्ते, एवं कृते महाराज नवचण्डीविधौ नृणाम् ॥ सिध्यत्यभीप्सितं सर्वं दुःखौघश्च विनश्यति ॥ इत्युपसंहृतत्वात् ॥ एतेन एकैकोत्तरया वृद्ध्या नवमीं यावदेव हि ॥ चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥ इत्यादिवचनान्यपि व्याख्यातानि ॥ इयं पञ्चचत्वारिंशत् पाठात्मिका नवचण्डी काम्या ॥ शारदनवरात्रकालविहितापि न तदङ्गम् ॥ तद्विधानं **जपप्रकाशे** वक्ष्यते ॥ **कालिकापुराणे** उपवासेन नक्तेन एकभक्तेन वा पुनः ॥ हविष्यान्नेन वा वर्तेत् सेवमानस्तु चण्डिकाम् ॥ इत्युक्तं तत्र **हविष्याणि** ॥ धान्ये मुद्गयवव्रीहितिलकङ्कुकलायकाः ॥ गोधूमश्यामकाश्चैव शाके सूरणमूलके ॥ (मूलकमत्र श्वेतम् रक्तस्य सर्वदा निषेधात्) सामुद्रं

सैन्धवं चैव लवणे दधिसर्पिषी ॥ क्षीरं चैतानि गव्यानि तक्रं च क्वचिदुच्यते ॥ क्वचित् घृतं माहिषं च पनसाम्रे हरीतकी ॥ चिञ्चा धात्रीनारिकेलकदलीलवलीफलम् ॥ पिप्पली जीरकं शुण्ठी गुडान्येक्षुविकारकाः ॥ अतैलपक्कान्येतानि हविष्याणि प्रचक्षते ॥ इति ॥ क्वचिदितोऽधिकान्यप्युक्तानि ॥ **इति हविष्याणि ॥ इति प्रतिपदादिनवम्यन्तनवतिथिसाधारणकृत्यम् ॥ अथ प्रतिपदातिथिविशेषकृत्यानि ॥ चण्डिकार्चनरहस्ये** । आश्विनस्य सिते पक्षे प्रतिपद्दिवसे नृप ॥ सुस्नातस्तिलतैलेन पूर्वाह्णे समलङ्कृतः ॥ पुण्याहवाचनं कृत्वा यजेन्नान्दीमुखान् पितॄन् ॥ ततश्च कारयेद्वेदीं तत्र धान्यादि निक्षिपेत् ॥ सिञ्चेज्जलं च धान्यानामङ्कुरोत्पत्तिहेतवे ॥ तत्र सप्तधान्यान्युक्तानि **षट्त्रिंशन्मते** ॥ यवगोधूमधान्यानि तिलाः कङ्गुस्तथैव च ॥ श्यामाकं चीनकं चैव सप्तधान्यमुदाहृतम् ॥ चीनकं व्रीहिभेदः ॥ स्थापयेत्पूर्णकलशं पञ्चरत्नसमन्वितम् ॥ सौवर्णं राजतं वापि ताम्रं वा मृन्मयं च वा ॥ पञ्चरत्नेत्युपलक्षणं जलगन्धसर्वौषधिदूर्वापञ्चपल्लवसप्तधान्यसप्तमृत्तिकाफलहिरण्यादीनां सर्वकलशनिक्षेप्यवस्तूनाम् तत्र सर्वौषधयः **छन्दोगपरिशिष्टे** । कुष्टं मांसी हरिद्रे द्वे मुरा शैलेयचन्दनम् ॥ वचा चम्पकमुस्तं च सर्वौषध्यो दश स्मृताः ॥ इति ॥ **अथ पञ्चपल्लवाः ॥ हेमाद्रौ ब्रह्माण्डपुराणे** । अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः ॥ पञ्च भङ्गा इति ख्याताः सर्वकर्मसु शोभनाः ॥ इति ॥ **अथ सप्तमृदो मात्स्ये** । गजाश्वरथवल्मीकसङ्गमह्रदगोकुलात् ॥ मृदमानीय कलशे निक्षिपेच्चत्वरात्तथा ॥ इति ॥ (अत्र गजाश्वरथशब्दैस्तन्निवासस्थानान्युच्यन्ते ॥ सङ्गमह्रदो नद्यादिसङ्गमह्रदः ।) **अथ पञ्चरत्नानि आदित्यपुराणे** । सुवर्णं रजतं मुक्ता राजावर्तः प्रवालकम् ॥ पञ्चरत्नमिति ख्यातं सर्वकर्मसु शोभनम् ॥ इति ॥ **कालिकापुराणे** तु ॥ कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् ॥ एतानि पञ्च रत्नानि रत्नशास्त्रविदो विदुः ॥ इत्युक्तानि ॥ (कुलिशं वज्रः) ॥ सर्वरत्नाभावे

अभावे सर्वरत्नानां हेम सर्वत्र योजयेदिति सुवर्णं सर्वरत्नप्रतिनिधित्वेनोक्तम् ॥ तस्योपरि न्यसेत्पात्रं तन्दुलैः परिपूरितम् ॥ तत्र चारक्तके वस्त्रे लिखेद्यन्त्रमनुत्तमम् ॥ (तस्योपरि कलशस्योपरि) यन्त्रं **नित्यार्चाप्रकरणे** उक्तम् ॥ गर्भे संस्थापयेद्देवीं चाण्डिकां हेमरूपिणीम् ॥ इति ॥ (गर्भे बिन्दुस्थाने) हेमाभावे रजतताम्रादिशुद्धधातुजापि प्रतिमा ग्राह्या ॥ अचलप्रतिमास्थले कलशोपरि देवतास्थापनस्यासम्भवात्तद्विषये विशेष उक्तो **विधानमालायाम्** ॥ देव्या अग्रे मृदा कार्यमालवालं मनोहरम् ॥ प्रक्षिपेत्तत्र धान्यानि ततः सिञ्चेज्जलैः शुभैः ॥ तस्योपरि न्यसेत्कुम्भं जलपूर्णं नवं शुभम् ॥ सुवर्णं निक्षिपेत्तत्र गन्धपुष्पैस्तमर्चयेत् ॥ इति ॥ अत्र सुवर्णपदं पूर्वोक्तकलशनिक्षेप्यसर्ववस्तूनामुपलक्षकम् ॥ **अथ महाष्टम्यां** विशेषः ॥ **कालिकापुराणे** आश्विनस्य तु शुक्लस्य या भवेदष्टमी तिथिः ॥ महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरी सदा ॥ इति ॥ नवरात्रे कृतैकभक्तनक्तहविष्याशननियमेऽपि महाष्टम्यामुपवासमेव कुर्यात् ॥ तदुक्तं **देवीपुराणे** । उपोषितो वस्त्रधूपमाल्यगन्धानुलेपनैः ॥ दीपै रत्नैस्तथा भक्ष्यैर्महाष्टम्यां प्रपूजयेत् ॥ इति ॥ अस्योपवासस्य फलमुक्तं **तिथितत्त्वे देवीपुराणे** । एकादशी कोटिसहस्रतुल्या सिताष्टमी पर्वतराजपुत्र्याः ॥ मताश्विने मासि तु वर्तमाना पराशरव्यासवसिष्ठमुख्यैः ॥ इति ॥ तथापि पुत्रवतोपवासो न कार्यः ॥ उक्तं च **कालिकापुराणे** ॥ उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ॥ यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत् ॥ इति ॥ तत्रैव ॥ अष्टम्यां प्रथमा पूजा द्वितीया नवमी दिने ॥ अष्टमीनवमीसन्धौ तृतीया खलु कथ्यते ॥ इति ॥ नवरात्रनित्यपूजायाः पृथक् पूजात्रयमुक्तम् ॥ तेनाष्टम्यां नवरात्रप्रयुक्तां विशेषपूजां कुर्यात् ॥ एवं नवम्यामपि ॥ अथ सन्धिपूजायां विशेष उक्तो **धर्माब्धिसारे** । यदा तु सन्धिर्मध्याह्नेऽपराह्ने वा पतति तदाष्टमीनवमीपूजे तत्सन्धिपूजाचेति त्रयं तन्त्रेण कार्यम् । यदा शुद्धाधिकाष्टमी

तदा पूर्वेद्युरष्टमीपूजा परेद्युः सन्धिपूजानवमीपूजयोस्तन्त्रमिति ॥ **रुद्रयामले**। अष्टम्यां जागरं कुर्यान्महापूजनपूर्वकम् ॥ होमं कुर्यान्महारात्रे बलिदानं च माधव ॥ इति वचनादष्टम्यां निशीथे होमं बलिदानं च कुर्यादित्येके ॥ नवम्यां बलिदानं तु कर्तव्यं वै यथाविधि ॥ जपं होमं च विधिवत् कुर्यात्तत्र विभूतये इति वचनान्नवम्यामेव पूजोत्तरं होमं बलिदानं च कुर्यादित्यन्ये पुनः पूजां महाष्टम्यां विशेषेण समापयेत् ॥ जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥ प्रभूतबलिदानं तु नवम्यां विधिवच्चरेत् ॥ विसर्जनं दशम्यां तु कुर्याद्वै शारदोत्सवे ॥ इति **कालिकापुराण**वचनादष्टम्यां निशीथे बलिदाने कृतेऽपि पुनर्नवम्यां तत्कुर्यादित्यपरे ॥ यथाकुलाचारं व्यवस्था ॥ तत्र होमो **देवीपुराणे** जयन्ती मङ्गला कालीति मन्त्रेणोक्तः। **चण्डिकार्चनरहस्ये** नवार्णमन्त्रेण नमो देव्यै महादेव्यै इति श्लोकमन्त्रेण वोक्तः। **प्राधानिकरहस्ये**। प्रतिश्लोकं च जुहुयात् पायसं तिलसार्पिषा ॥ इति **सप्तशती**श्लोकैरुक्तः। तत्र श्लोकपदं सप्तशतधा विभक्तमन्त्रपरम् ॥ अष्टसप्तत्युत्तराणां श्लोकानां शतपञ्चकम् ॥ विभज्य जुहुयान्मन्त्री तत्सप्तशतसङ्ख्यया ॥ इति **डामरतन्त्रोक्तेः** ॥ होमद्रव्यं पायसं तिलसर्पिमिश्रमुक्तम् ॥ तत्र पायसविधिर्यथा ॥ दुग्धं पञ्चगुणं प्रोक्तं घृततण्डुलतो गवाम् ॥ शर्करा घृततुल्या च पायसेऽयं विधिः स्मृतः ॥ इति ॥ घृततण्डुलशर्कराः समप्रमाणाः। दुग्धं पञ्चगुणमिति वचनार्थः ॥ अयं होमो नवरात्राङ्गमित्येके ॥ नवरात्रकृतसप्तशतीजपाङ्गमित्यपरे। द्वितीयपक्षे नवमीजपोऽपकर्षेणाष्टम्यामेव समापनीयः ॥ होमप्रयोगो **यागप्रकाशे** द्रष्टव्यः ॥ अथ **बलिदानम्** ॥ तच्चादौ क्षत्रियादिविषये उच्यते ॥ **देवीपुराणे**। तदर्धयामिनीशेषे विजयार्थं नृपोत्तमः ॥ पञ्चाब्दं लक्षणोपेतं गन्धपुष्पस्रगर्चितम् ॥ विधिवत् कालिकालीति जप्त्वा खड्गेन घातयेत् ॥ पशुमिति शेषः ॥ चतुर्थचरणस्थाने महिषं बलिमुत्तममिति क्वचित् पाठः ॥ **कालिकापुराणे**। देवीं तु पूजयित्वा ये अर्धरात्रेऽष्टमीदिने ॥ घातयन्ति

पशून्भक्त्या ते भवन्ति महाबलाः ॥ पशवश्चोत्तमं लोकं गच्छन्ति विधिवद्धताः ॥ अत्र महिषपशुपदे यावद्बल्युपयुक्तप्राण्युपलक्षके ॥ तत्र बलिविषये उपयुक्ताः प्राणिनः ॥ पक्षिणः कच्छपा ग्राहा मत्स्या नवविधा मृगाः ॥ महिषो गोधिका मेषश्छागो बभ्रुश्च सूकरः ॥ खड्गश्च कृष्णसारश्च केसरी शरभस्तथा ॥ शार्दूलश्च नरश्चैव स्वगात्ररुधिरं तथा ॥ इत्यादयः ॥ न कृष्णसारं वितरेत्कदाचन बलिं नृपः ॥ इति निषेधात् क्षत्रियैः कृष्णसारबलिर्न देयः ॥ **अथ बलिदानविधिः** ॥ **कालिकापुराणे** ॥ उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा ॥ विधाय साधकः पश्चादिमं मन्त्रमुदीरयेत् ॥ पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ॥ चण्डिकाबलिरूपाय पशो तुभ्यं नमोऽस्तु ते ॥ यज्ञार्थे बलयः सृष्टाः स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयिष्यामि यस्माद्यज्ञे वधोऽवधः ॥ ऐं ह्रीं श्रीमितिमन्त्रेण तं बलिं मत्स्वरूपिणम् ॥ चिन्तयित्वा न्यसेन्मूर्ध्नि पुष्पं तस्य तु भैरव ॥ अभिषिच्य बलिं पश्चात् करवालं तु पूजयेत् ॥ रसना त्वं चण्डिकायाः सर्वलोकप्रसाधिका ॥ ह्रीं ह्रीं खड्गेतिमन्त्रेण गृहीत्वा खड्गमुत्तमम् ॥ आं ह्रीं फडिति मन्त्रेण छेदयेद्बलिमुत्तमम् ॥ ॐ ह्रीं ऐं ह्रीं कौशिकी रुधिरेणाप्यायतामिति ॥ स्थाने नियोजयेद्रक्तं शिरश्च सम्प्रपूजयेत् ॥ एवं दत्वा बलिं पूर्णफलमाप्नोति मानवः ॥ इति ॥ **हेमाद्रौ भविष्योत्तरे** ॥ अत्र ये ह्युपयुज्यन्ते प्राणिनो महिषादयः ॥ सर्वे ते स्वर्गतिं यान्ति घ्नतां पापं न विद्यते ॥ इत्युक्तम् ॥ अयं पश्चादिर्बलिर्ब्राह्मणेतरविषयो ज्ञेयः ॥ **अथ ब्राह्मणविषये** ॥ कूष्माण्डमिक्षुदण्डं च नारिकेलमथापि वा ॥ अन्यत् फलं माषभक्तं पायसं वार्पयेद्द्विजः ॥ द्विजोऽत्र ब्राह्मणः ॥ **कालिकापुराणे** नरं व्याघ्रं तथा सिंहं स्वगात्ररुधिरं तथा ॥ न दद्याद्ब्राह्मणो मद्यं देवतायै कदाचन ॥ सिंहं व्याघ्रं नरं दत्वा ब्राह्मणो नरकं

व्रजेत् ॥ स्वगात्ररुधिरं दत्त्वा ब्रह्महत्यामवाप्नुयात् ॥ मद्यं वै ब्राह्मणो दत्त्वा ब्राह्मण्यादेव हीयते । इति ॥ **बृहत्सङ्गमतन्त्रे** । वरं प्राणाः प्रगच्छन्तु ब्राह्मणो नार्पयेत् सुराम् ॥ ब्राह्मणो मदिरां दत्वा ब्राह्मण्यादेव हीयते ॥ इति ॥ **अगस्तिसंहितायां** पार्वतीं प्रति सदाशिवः ॥ आवां तु पिशितै रक्तैः सुरया वा महेश्वरि ॥ वर्णाश्रमोचितं धर्मं परित्यज्य यजन्ति ये ॥ जातिभ्रष्टा भवेयुस्ते ब्राह्मणा ब्रह्मराक्षसाः ॥ इति ॥ मद्यमांसादेः प्रतिनिधिर्ब्राह्मणविषयकः **कालिकापुराणे** ॥ अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः ॥ नारिकेलोदकं कांस्ये ताम्रे वा विसृजेन्मधु । (द्विजो ब्राह्मणः) । यत्र सिंहस्य व्याघ्रस्य नरस्य विहितो वधः ॥ ब्राह्मणस्य तु बल्यादौ तत्रायं विहितः क्रमः ॥ कृत्वा घृतमयं सिंहं नरं व्याघ्रं सुभैरवम् ॥ अथवापूपविकृतिं यवक्षोदमयीं द्विजः ॥ घातयेच्चन्द्रहासेन विधिरेवं न लुप्यते ॥ मेषाजमहिषाद्याश्च यत्रोक्ता बलयो नृप ॥ कूष्माण्डं नारिकेलं वा ब्राह्मणस्तत्र योजयेत् ॥ इति ॥ **वैकृतरहस्ये** रुधिराक्तेन बलिना मांसेन सुरया नृपेति वाक्ये नृपेति सम्बोधनात्तादृशबल्यादौ क्षत्रियादेरेवाधिकार इति ज्ञापितम् ॥ **इति महाष्टमीकृत्यम् ॥ अथ महानवमी ॥** अष्टमीनिशीथे होमपक्षे नवमीजपस्यापकर्षणाष्टम्यामेव कृतत्वाज्जपरहितां केवलां नवरात्रप्रयुक्तनित्यपूजां नवमीप्रयुक्तविशेषपूजां च नवम्यां पुनर्बलिदानपक्षे प्राग्वद्बलिदानं कुमारीपूजनं च कृत्वा कुमारीर्ब्राह्मणसुवासिनीश्च भोजयित्वा नवरात्रे स्वस्योपवासपक्षे पारणां च कुर्यात् ॥ तदुक्तं **रुद्रयामले** ॥ अष्टम्यां जागरं कुर्यान्नवम्यां पारणं तथा ॥ दशम्यां च विसर्गः स्यादभिषेकश्च माधव ॥ यो मोहात्पारणं कुर्याच्छारदे दशमीदिने ॥ तद्राष्ट्रं नाशमायाति दुर्भिक्षादिभयं भवेत् ॥ नवम्यां पारिता देवी कुलवृद्धिं करोति वै ॥ दशम्यां पारिता देवी कुलनाशं करोति हि ॥ तस्मात्तु पारणं कुर्यान्नवम्यां विबुधाधिप ॥ इति ॥ अन्ये तु नवरात्रव्रतस्य

नवम्यन्तत्वात्पारणायाश्च व्रतान्ते विहितत्वाद्दशम्यामेव पारणेत्याहुः ॥ तत्र दाक्षिणात्यानां नवम्यां, प्राच्यानां तु दशम्यां पारणाचारस्य दर्शनात् यथाचारं व्यवस्थेति **कौस्तुभः** ॥ **इति नवमीकृत्यम्** ॥ अथ दशम्यां स्नात्वोत्तरपूजां विधाय देवतां विसृज्य प्रयोगे वक्ष्यमाणप्रकारेणाचार्याय देवतापीठं सदक्षिणाकं दत्वा मृन्मयमूर्तिश्चेत्तां, तदभावे नवरात्रे सञ्चितं देवतानिर्माल्यं वाद्यपुरःसरं नद्यादिजले प्रवाहयेत् ॥ साम्प्रतमेतन्नवम्यामेव कुर्वन्ति जनाः ॥ अत्र सर्वत्र मूलवचनानि **व्रतराजकौस्तुभपुरुषार्थचिन्तामण्यादिषु** द्रष्टव्यानि ॥ **इति नवरात्रकृत्यम्** ॥ **अथैतत्प्रयोगः** ॥ साधकः सति सम्भवे नवरात्रारम्भात् प्राक् मण्डपादिकं विधायाश्विनशुक्लप्रतिपदि कृतमङ्गलस्नानः परिहितकौशेयाम्बरो धृततिलको नित्यकृत्यं विधाय पवित्रपाणिर्द्विराचम्य त्रिःप्राणानायम्य सुमुखश्चेत्यादिमङ्गलपद्यानि पठित्वा देशकालौ सङ्कीर्त्य श्रीमहालक्ष्मीप्रीतिद्वारा मम सकुटुम्बस्य सपरिवारस्य सर्वापच्छान्तिपूर्वकदीर्घायुर्धनधान्यपुत्रपौत्राद्यभिवृद्धिशत्रुपराजयकीर्तिलाभाद्यनेककार्यसिध्यर्थं अद्यप्रभृति नवमीपर्यन्तं प्रत्यहं त्रिकालं द्विकालमेककालं वा महालक्ष्मीपूजां उपवासनक्तैकभक्तहविष्याशनान्यतमनियमसहितां अखण्डदीपप्रज्वालनं मालाबन्धनं नवार्णमन्त्रजपं सप्तशतीस्तोत्रपाठं कुमारीपूजनं कुमारीब्राह्मणसुवासिन्यादिभोजनं अष्टमीनवम्योस्तत्सन्धौ च विशेषतः पुनः पूजनं अष्टम्यां निशीथे सप्तशतीहोमं बलिदानं च नवम्यामुत्थापनं पारणं च दशम्यां पीठदानं चेति यथाकुलाचारमुक्त्वा, एवमादिरूपं नवरात्रमहोत्सवं करिष्ये ॥ सति कामे तदङ्गतया स्वस्तिपुण्याहवाचनं नान्दीश्राद्धं पूजाजपाद्यर्थमाचार्यवरणं करिष्ये इति च सङ्कल्प्य ॥ तदनुरोधेन स्वस्तिवाचनादि विधाय आचार्यं वृणुयात् ॥ तद्यथा । आचार्यत्वेनाभिमतं ब्राह्मणं सम्पूज्य । अमुकसूत्रशाखाध्यायी अमुकप्रवरान्वितामुकगोत्रोऽमुकशर्मा यजमानोऽहं अमुकसूत्रशाखा-

ध्यायिनममुकप्रवरान्वितामुकगोत्रममुकशर्माणं ब्राह्मणं त्वां अद्यारभ्य नवरात्रव्रतसमाप्तिपर्यन्तममुककर्मकरणार्थमाचार्यं वृणे ॥ इत्याचारात् पूगफलं दत्वा आचार्यस्तु यथा स्वर्गे इति प्रार्थयेदित्याचार्यवरणम् ॥ ततः कर्ता यजमानश्चेत् आचमनप्राणायामादिदेशकालसङ्कीर्तनान्ते नवरात्रमहोत्सवाङ्गत्वेन कलशस्थापनपूर्वकं महालक्ष्म्याः प्रतिपत्पूजां करिष्ये इति सङ्कल्प्य । कर्ता आचार्यश्चेत् यजमानेन वृतोऽहं तदाज्ञया नवरात्रमहोत्सवे पूजादिकर्म करिष्ये । तत्राद्य प्रतिपत्पूजां करिष्ये इति सङ्कल्प्य । नित्यार्चाक्रमेण आसनविध्यादिपूजामण्डपद्वारदेवतापूजनान्तं कृत्वा पूजामण्डपान्तर्भागे ॐ महीद्यौः पृथिवीति मन्त्रेण भूमिं स्पृष्ट्वा ॥ तत्र ॐ स्योना पृथिवीति मृदा वेदिकां कृत्वा तस्यां जलमासिच्य ॥ ॐ ओषधयः संवदन्ते० इति बीजान्योप्य । तदुपरि ॐ आकलशेषु० इति कलशं निधाय । तस्मिन् ॐ इमं मे गङ्ग इति जलं । ॐ गन्धद्वारां० इति गन्धान् । ॐ या ओषधीः० इति सर्वौषधीः ॥ ॐ काण्डात् काण्डात्० इति दूर्वाः । ॐ अश्वत्थेवो० इति पञ्चपल्लवान् । ॐ स्योनापृथिवी० इति सप्तमृदः । ॐ वर्षन्तु ते विभावरि० इति सप्तधान्यानि । ॐ याः फलिनीर्याः इति फलम् । ॐ सहिरत्नानि० इति पञ्चरत्नानि । ॐ हिरण्यरूपः० इति सुवर्णं च क्षिप्त्वा । ॐ युवासुवासा० इति वस्त्रद्वयेन कलशमावेष्ट्य । कलशोपरि ॐ पूर्णादर्विपरापत० इति देवतास्थापनार्थं तण्डुलपूर्णं विस्तृतमुखं पात्रं निधाय । कुम्भे ॐ तत्वायामि० इति वरुणमावाह्य, वरुणाय नमः इति गन्धादिभिः सम्पूज्य । कलशस्य मुखे विष्णुः० ॥ देवदानवसंवादे० इत्यादि श्लोकैः प्रार्थयेदिति **घटस्थापनं** कृत्वा । पूर्णपात्रे नित्यार्चोक्तं देवतापीठं सञ्चिन्त्य नित्यार्चाक्रमेण पीठदेवताः सम्पूज्य । तदुपरि रक्तकौशेयवस्त्रमास्तीर्य तस्मिन् कुङ्कुमचन्दनादिभिर्हरिद्राकुङ्कुमादिचूर्णेन वा नित्यार्चोक्तप्रकारेण चण्डिकायन्त्रं निर्माय । तत्र हेमादिधातुघटितां महालक्ष्मीप्रतिमां संस्थाप्य । प्रतिमाया नूतनत्वेऽग्न्युत्तारणप्राणप्रतिष्ठादिकं कृत्वा अथवा मृन्मयीं

प्रतिमां संस्थाप्य नित्यार्चोक्तक्रमेण ध्यात्वा । पुरूषसूक्तश्रीसूक्तप्रथमऋगन्ते नित्यार्चनोक्तावाहनश्लोकं पठित्वा ततः आगच्छ वरदे देवि दैत्यदर्पनिषूदनि ॥ पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये ॥ दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय ॥ बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ॥ इति श्लोकाभ्यां मूलमन्त्रनाममन्त्राभ्यां चावाह्य नित्यार्चाक्रमेणावाहनादिमुद्राः प्रदर्श्य ततः स्वागतादीन् मधुपर्कसाङ्गोपाङ्गस्नानसहितान् यागपीठोपवेशनान्तानेकचत्वारिंशदुपचारान्नित्यार्चाक्रमेण समर्प्य । ॐ तदस्तुमित्रा०॥ ॐ गृहावै प्रतिष्ठा०॥ इत्यादि मन्त्रान् पठन्नक्षतैर्देवतां प्रतिष्ठाप्योत्थापनपर्यन्तमाचारात्तां न चालयेत् ॥ इत ऊर्ध्वमुत्थापनपर्यन्तं प्रत्यहं चालनसाध्योपचारा आवाहनतदङ्गोपचारा उत्तरपूजोत्तरार्घ्यविसर्जनोपचाराश्च वर्जयितव्याः ॥ स्नानादिकं प्रोक्षणादिना स्थाने एव सम्पादनीयम् ॥ **इति विशेषः ॥ अथाखण्डदीपस्थापनम् ॥** घृतदीपश्चेद्देवतादक्षिणे तैलदीपश्चेद्वामे भूमौ जलेन त्रिकोणमण्डलं कृत्वा दीपाधारमण्डलाय नमः इति मण्डलं सम्पूज्य तत्रोन्नताधारमलोहमयं दीपायतनं संस्थाप्य तस्मिन् सस्नेहं वर्तिद्वयं त्रयं वा निक्षिप्य ॐ उद्दीप्यस्व जातवेदो० इति मन्त्रेण प्रज्वाल्य दीपदेवतायै नमः इति सम्पूज्य । पूर्ववत् ॐ तदस्तुमित्रा० ॥ गृहावै प्रतिष्ठा० इत्यादिमन्त्रैरक्षतप्रक्षेपपूर्वकं प्रतिष्ठाप्य । भो दीप देवतारूप कर्मसाक्षिन्नविघ्नकृत् ॥ यावद्व्रतसमाप्तिः स्यात्तावत्त्वं सुस्थिरो भव ॥ इति प्रार्थये**दित्यखण्डदीपस्थापनम्** ॥ इदं दीपस्थापनं नवरात्राङ्गम् ॥ नित्यार्चायां आसनविध्यनन्तरं यदुक्तं तत्पूजाङ्गम् ॥ तत्प्रतिदिनपूजान्ते उपसंहरणीयम् ॥ अथ यज्ञोपवीतादिनैवेद्यान्तानुपचारान् चालनसाध्योपचाररहितान् नित्यक्रमेण सम्पाद्य नित्यात्त्रिगुणं पूजाङ्गहोमं कृत्वा नित्यबलिदानादिनमस्कारान्तानुपचारान् पूर्वोक्तवर्ज्योपचाररहितान् समर्प्य पूजामण्डपोपरि पुष्पमालां बध्नीयात् ॥ तत्र मन्त्रः । ग्रथितां तिलकह्लारैर्जातिमन्दारचम्पकैः ॥ पुष्पमालां प्रयच्छामि मण्डपे वंशवृद्धये ॥ इति ॥ अथ ब्रह्मार्प-

णादिवरयाचनान्तमुपचारचतुष्टयं समर्प्य । नवरात्रप्रयुक्तं नवार्णसप्तशतीजपं यथासङ्कल्पं स्वयं ब्राह्मणद्वारा वा कृत्वा कुमारीपूजनं कार्यं तद्यथा ॥ यथासम्भवं द्व्यादिदशवर्षान्तां पूर्वदिने आमन्त्रितां कुमारीं सन्निधाप्य । पीठे उपवेश्य नवरात्राङ्गभूतं कुमारीपूजनं करिष्ये इति सङ्कल्प्य मूलमन्त्रस्य षडङ्गन्यासं कृत्वा ॥ ध्यायाम्यहं महालक्ष्मीं कुमारीरूपधारिणीम् ॥ मातुलिङ्गं गदां खेटं पात्रं पीयूषपूरितम् ॥ दक्षिणाधः क्रमाद्धस्तैर्बिभ्रतीं सर्वमङ्गलाम् ॥ द्रुततप्तकनकाभासामाद्यामाद्येशपूजिताम् ॥ इति ध्यात्वा ॥ मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥ इत्यावाह्य । ततस्तस्या वयोऽनुरूपनाम्ना यथाविभवं पूजां कृत्वा प्रार्थयेत् ॥ तत्र द्विवर्षां कुमारीनाम्ना सम्पूज्य ॥ जगत्पूज्यां जगद्वन्द्यां सर्वदेवस्वरूपिणीम् ॥ त्रैलोक्यवन्दितां देवीं कुमारीं प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ त्रिवर्षां त्रिमूर्तिनाम्ना सम्पूज्य । त्रिपुरां त्रिपुराराध्यां त्रिवर्गज्ञानरूपिणीम् ॥ त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ चतुर्वर्षां कल्याणीनाम्ना सम्पूज्य । कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ॥ कल्याणजननीं देवीं कल्याणीं प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ पञ्चवर्षां रोहिणीनाम्ना सम्पूज्य । अणिमादिगुणाधारां अकाराद्यक्षरात्मिकाम् ॥ अनन्तशक्तिकां देवीं रोहिणीं प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ अथ षड्वर्षां कालिकानाम्ना सम्पूज्य । कामचारां शुभां कान्तां कालचक्रस्वरूपिणीम् ॥ कामदां करुणोदारां कालिकां प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ सप्तवर्षां चण्डिकानाम्ना सम्पूज्य । चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम् ॥ चण्डक्रमां महादेवीं चण्डिकां प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ अष्टवर्षां शाम्भवीनाम्ना सम्पूज्य । सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ॥ सर्वभूतात्मिकां देवीं शाम्भवीं प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ नववर्षां दुर्गानाम्ना सम्पूज्य । दुर्गमे दुस्तरे कार्ये भवार्णवविनाशिनीम् ॥ दुर्गार्तिनाशिनीं भक्त्या

श्रीदुर्गां प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ दशवर्षां सुभद्रानाम्ना सम्पूज्य । सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् । सुभद्रजननीं देवीं सुभद्रां प्रणमाम्यहम् ॥ इति प्रार्थयेत् ॥ इति **कुमारीपूजनम्** ॥ ततः कुमारीर्ब्राह्मणसुवासिनींश्च भोजयित्वा यथाकुलाचारं स्वयमुपवासैकभक्तनक्तहविष्याशनेष्येकतमनियमेन वर्तेत ॥ सप्तम्यादिदिनत्रये पत्रिकापूजनं विहितम् । तन्नवरात्राङ्गमिति केचित् । नेत्यन्ये । तद्विधिः **कौस्तुभादौ** द्रष्टव्यः ॥ अथाष्टम्यां नवम्यां तयोः सन्धौ चेति नवरात्रनित्यपूजायाः पृथक् पूजात्रयं कार्यम् ॥ तत्र यदा सन्धिर्मध्याह्ने पतति तदाष्टमीनवमीपूजे सन्धिपूजां च तन्त्रेण कुर्यात् । यदा शुद्धाधिकाष्टमी तदा पूर्वेद्युरष्टमीपूजां परेद्युः सन्धिपूजानवमीपूजे तन्त्रेण कुर्यात् ॥ अष्टम्यां नवमीप्रयुक्तसप्तशतीजपमपकर्षेण कृत्वा निशीथे महापूजापूर्वकं जपदशांशतो होमं कुर्यात्तत्सम्बधेन कर्तव्यं प्रागुक्तम् ॥ होमप्रयोगो **यागप्रकाशे** द्रष्टव्यः ॥ **अथ बलिदानप्रयोगः** ॥ तत्रादौ **ब्राह्मणेतरविषये** यथा । क्षत्रियादिश्छागादिपशुं देव्यग्रतः पूर्वाभिमुखमवस्थाप्य स्वयमुदङ्मुखः, पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ॥ चामुण्डाबलिरूपाय पशो तुभ्यं नमो नमः ॥ यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयम्भुवा ॥ तस्मात्त्वां घातयाम्यद्य यस्माद्यज्ञे वधोऽवधः ॥ इति बलिं प्रार्थ्य ॐ ऐं ह्रां श्रीमितिमन्त्रेण बलिमूर्ध्नि पुष्पं निक्षिप्य । रसना त्वं चण्डिकायाः सुरलोकप्रसाधिका ॥ ॐ ह्रां ह्रीं खड्ग । इति मन्त्रेण शस्त्रंसम्पूज्य । ॐ कालि कालियज्ञेश्वरि लोहदण्डायै नमः ॥ इति मन्त्रेण छित्वा । ॐ ह्रीं ऐं ह्रीं कौशिकीरुधिरेणाप्यायताम् ॥ इति जलमुत्सृजेत् ॥ शेषं गृहीत्वा पूतनायै चरक्यै विदार्यै पापराक्षस्यै रक्षोभ्यश्च, हुं फट् इति दद्यात् ॥ **इति पशुबलिः** ॥ **अथ तन्त्रान्तरोक्तः** शत्रुप्रतिकृतिबलिर्यथा । माषपिष्टमयीं शत्रुप्रतिमां कृत्वा गन्धपुष्पैः सम्पूज्य । ॐ स्फुर स्फुर, स्कभ

स्कभ, खुनु सुनु, गिल गिल, धुनु धुनु, मारय मारय, विद्रावय विद्रावय, कम्पय कम्पय, पातय पातय, कुन्थय कुन्थय, पूरय पूरय, ॐ ह्रीं ॐ हुं फट् स्वाहा ॥ हुं मर्दय हुं मर्दय ॥ इति मन्त्रेण छित्वा किञ्चिच्छेपं गृहीत्वा स्कन्दाय विशिखाय स्वाहेति स्कन्दाय दद्यात् ॥ ततो हस्तौ पादौ प्रक्षाल्य द्विराचामेत् ॥ **अथ ब्राह्मणविषये बलिदानं** यथा ॥ ब्राह्मणः कूष्माण्डादिफलेक्षुकाण्डादिकं देवीपुरतः संस्थाप्य ऐं ह्रीं श्रीमिति प्राग्वत् सम्पूज्य रसानात्वमितिपूर्वोक्तमन्त्रेण ॐ शस्त्रं सम्पूज्य। कालि-कालीतिपूर्वोक्तमन्त्रेण छित्वा कौशिकी रसेनाप्यायतामिति जलमुत्सृजेत् ॥ माष-भक्तबलौ तु बलिं गृहाण देवेशि माषभक्तं मयार्पितम् ॥ पूजासम्पूर्णतार्थाय वर्षतृप्तिकरं शुभम् ॥ इति मन्त्रेण दद्यात् ॥ चतुर्थपादस्थाने ततः शान्तिं प्रयच्छ मे इति वा पाठः ॥ ततः, बलिं गृह्णन्त्विमे देवा आदित्या वसवस्तथा ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगास्तथा ॥ असुरा यातुधानाश्च पिशाचा भूतगुह्यकाः ॥ डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृम्भकाः सिद्धगन्धर्वा माला विद्याधरा नगाः । दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ सौम्या भवन्तु सुप्रीता भूतप्रेताः सुखावहाः ॥ मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ॥ इति प्रार्थयेत् ॥ **इति बलिदानम् ॥ इत्यष्टमीकृत्यम् ॥ अथ नवमीकृत्यम् ॥** अष्टमीनिशीथकालिकदशांशहोमार्थं नवमीप्रयुक्तनवार्ण-सप्तशतीजपस्यापकर्षेणाष्टमीपूजायामेव कृतत्वान्नवम्यां नवरात्रप्रयुक्तनवार्ण-सप्तशतीजपरहितां नवरात्रप्रयुक्तपूजां, पुनर्विशेषतो विहितां नवमीपूजां च कृत्वा अष्टमीनिशीथवत्पुनर्बलिं दत्वा कुमारीपूजां विधाय कुमारीर्ब्राह्मण-सुवासिनीर्भोजयित्वा स्वस्योपवासपक्षे पारणां कुर्यात् ॥ अथ दशम्यां देवताया वरयाचनान्तां पूजां समाप्य । रूपं देहि जयं देहि भगं भगवति देहि मे ॥ पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ॥ महिषघ्नि महामाये

चामुण्डे मुण्डमालिनि ॥ आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥ इतिनवरात्रप्रयुक्तां पुनर्वरयाचनां कृत्वा । पीठे चावरणे चैव० इति नित्यार्चोक्तं श्लोकं पठन् पीठावरणदेवता महालक्ष्म्यङ्गलीना विभाव्य ॐ यज्ञेनयज्ञ० ऋक् ॥ ॐ यः शुचिः प्रयतो० ऋक् ॥ अभ्यारामिदद्रयो० ऋक् ॥ ततो नित्यपूजोक्तविसर्जनश्लोकं पठित्वा । उत्तिष्ठ देवि चण्डीशे शुभां पूजां प्रगृह्य च ॥ कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥ इमां पूजां मया देवि यथाशक्त्युपपादिताम् ॥ रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ॥ इति नवरात्रप्रयुक्तविसर्जनश्लोकौ पठित्वा देवीमूर्तिं चालयित्वा देवीशरीरस्थमेकं पुष्पं गृहीत्वा आघ्राय श्वासैः सह देवतां हृदि प्रविष्टां विभाव्य यान्तु देवगणाः सर्वे इतिमूर्तावक्षतान् क्षिपेत् । मूलम् । महालक्ष्म्यै नमः विसर्जनं कल्पयामि इति विसृज्य अर्घ्योदकमुत्सृजेत् ॥ ततो यान्तु देवगणा इति दीपं विसृज्य पूजादिकं ब्राह्मणद्वारा कृतं चेत्तच्छ्रेयो गृह्णीयात् तद्यथा । यजमानः मया ब्राह्मणद्वारा यत् कृतममुककर्म तच्छ्रेयो गृह्णीयात् तद्यथा । यजमानः मया ब्राह्मणद्वारा यत्कृतममुकं कर्म तच्छ्रेयोग्रहणं करिष्ये इति सङ्कल्पं कुर्यात् । ततो ब्राह्मणः मया यजमानाज्ञया यत्कृतममुककर्म तच्छ्रेयोदानं करिष्ये । इति सङ्कल्प्य यजमानं गन्धादिभिः सम्पूज्य । मया भवदाज्ञया यत् कृतममुकाख्यं कर्म तदुत्पन्नं यत् श्रेयस्तत्तुभ्यं सम्प्रददे न मम ॥ इति यजमानहस्ते पूर्वगृहीतं पूगफलं दत्वा जलं समर्पयेत् ॥ ततो यजमानः त्वया मदाज्ञया यत्कृतममुककर्म तस्य सम्पूर्णफलप्राप्त्यर्थं तुभ्यमिमां दक्षिणां प्रतिपादयामीति कर्मानुसारेण दक्षिणां दद्यात् ॥ तत आचमनादि देशकालसङ्कीर्तनान्ते श्रीमहालक्ष्मीप्रीत्यर्थं आचार्याय नवरात्रदेवतापीठदानं करिष्ये इति सङ्कल्प्य आचार्यं सम्पूज्य । हेमादिघटिता नूतनप्रतिमा चेत्, त्रैलोक्यमान्ये देवि त्वं सर्वभूतदयानिधे ॥ दानेनानेन सन्तुष्टा सुप्रीता वरदा भव ॥ इति पठित्वा इदं पीठदानं दक्षिणाताम्बूलसहितं अमुकनाम्ने आचार्याय तुभ्यं सम्प-

ददे न मम इति आचार्यहस्ते ताम्बूलदक्षिणासहितमुदकमर्पयेत् ॥ प्रतिगृह्यताम् इति यजमानः प्रतिगृह्णामीत्याचार्यो वदेत् ॥ गृहस्था पुराणमूर्तिश्चेत्तां गृहेऽवस्थाप्य पीठमाचार्याय दद्यात् ॥ मृन्मयमूर्तिश्चेत्पीठमाचार्याय दत्वा । गच्छ गच्छ परं स्थानं पूजिता देवि चण्डिके ॥ व्रज स्रोतोजले वृद्ध्यै स्थीयतां च जले त्विह ॥ संवत्सरे व्यतीते तु पुनरागमनाय वै ॥ इति मूर्तिं पुष्पादिनिर्माल्यं च जले प्रवाहयेत् ॥ ततः कुमारीर्ब्राह्मणसुवासिनीश्च भोजयित्वा दक्षिणादिभिः प्रतोष्य स्वयं भुञ्जीत ॥ साम्प्रतं लोके नवम्यामेव विसर्जनाचारो दृश्यते। **इति नवरात्रपूजाप्रयोगः** ॥ अथ **पुराणान्तरे** आश्विनशुक्लसप्तम्यादिदिनत्रये सपौरस्य राज्ञः सामूहिको नवरात्रमहोत्सव उक्तः स यथा । इषाष्टम्यां भद्रकाली दक्षयज्ञविनाशनी ॥ प्रादुर्भूता महाघोरा योगिनी कोटिभिः सह ॥ पूजनीया ततो देवी ग्रामे ग्रामे पुरे पुरे ॥ स्नातैः प्रमुदितैर्भक्त्या ब्राह्मणैः क्षत्रियैरपि ॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥ सुस्थाने मण्डपं कुर्याद्वितानपरिशोभितम् ॥ बहुध्वजपताकाढ्यं कदलीस्तम्भमण्डितम् ॥ तोरणाढ्यं चतुर्द्वारं नानापल्लवराजितम् ॥ तन्मध्ये वेदिकां कुर्यात् चतुरस्रां सुशोभनाम् ॥ रक्तवस्त्रप्रतिच्छन्नां पताकाभिरलङ्कृताम् ॥ तत्राम्बिकां प्रतिष्ठाप्य सप्तम्यां मृत्तिकामयीम् ॥ महोन्नतां दशभुजां कपर्देन विराजिताम् ॥ तप्तहाटकवर्णाभां त्रिनेत्रां शशिशेखराम् ॥ नितम्बविम्बसन्नद्धकिङ्किणीक्वाणनादिनीम् ॥ किरीटहारकेयूरमञ्जीरकटकान्विताम् ॥ त्रिशूलचक्रकुलिशनागपाशासिधारिणीम् ॥ घण्टागदानरशिरःपानपात्रलसत्कराम् ॥ सर्वतो मातृचक्रेण सेव्यमानां गणैस्तथा ॥ वामतोऽग्रे छिन्नशीर्षं महिषं रुधिराप्लुतम् ॥ तत्कण्ठादर्धनिसृतं दैत्यं चर्मासिधारिणम् ॥ देवीकरस्थितशिखं शूलेनोरसि ताडितम् ॥ नागपाशपरिक्षिप्तं विदध्यान्मृत्तिकामयम् ॥ याम्यास्या शुभदा दुर्गा पूर्वास्या जयवर्धिनी ॥ पश्चिमास्या रोगहन्त्री न स्थाप्या सौम्यदिङ्मुखी ॥ मूर्तावावाहयेद्देवीं सप्तम्यां नृपनन्दन ॥

दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय ॥ अस्मत्पूजां गृहाण त्वं योगिनीकोटिभिः सह ॥ आवाह्यैवं कुङ्कुमचन्दनमदशशिभिरप्पिष्टैः ॥ चर्चितगात्रीं देवीं कुसुमैरभ्यर्चयेच्छुभैर्बहुभिः ॥ (मदः कस्तूरी । शशी कर्पूरः । अप्पिष्टैर्जलपिष्टैः) कुमुदैः सपद्मपुष्पैः सधूपदीपैः सनैवेद्यैः ॥ मांसैर्बल्युपहारैर्जयजयशब्दैः समुच्चलितैः ॥ एवं दिनद्वयं कृत्वा अष्टम्यां जागरे निशि ॥ निशीथे भ्रमयेद्देवीं भवानीं स्यन्दनस्थिताम् ॥ नटनर्तकगीतैश्च नानावाद्यैर्जयावहैः ॥ घातयेन्महिषान्मेषान्नृपतिर्नतकन्धरान् ॥ सुरासवभृतैः कुम्भैस्तर्पयेज्जगदम्बिकाम् ॥ कापालिकेभ्यस्तद्देयं शूद्रादिभ्यस्तथैव च ॥ ततो देवीं समभ्यर्च्य नवम्यां विधिपूर्वकम् ॥ सम्प्रेषणं प्रकर्तव्यं गीतवादित्रनिःस्वनैः ॥ गच्छ गच्छ परं स्थानं स्वकीयं जगदम्बिके ॥ संवत्सरे व्यतीते तु पुनरागमनाय च ॥ व्रज स्रोतोजले वृद्ध्यै स्थीयतां च जले त्विह ॥ एवं विसर्जयेत्सायं नद्यादौ सुबहूदके ॥ एवं समुत्सवो यत्र पुरे ग्रामे भवेन्नृप ॥ न तत्र मारीदुर्भिक्षरोगचौराद्युपद्रवः ॥ राजानश्च जनाश्चैव नन्दन्ति सुखिनः सदा ॥ इति ॥ राजाभावे ग्रामाधिपतिरन्यो काश्चिद्ग्रामीणमुख्य एनं महोत्सवं कुर्यात् ॥ तत्र ब्राह्मणश्चेद्ग्रामाधिपतिस्तदा तेन मद्यमांसदानादिवर्जमयमुत्सवो विधेयः ॥ सुगमत्वादेतत्प्रयोगो न लिख्यते ॥

इति सामूहिकस्त्रिदिननवरात्रमहोत्सवः ॥

इति चण्डिकोपास्तिदीपिकायां नैमित्तिकार्चाप्रकाशे नवरात्रमहोत्सवः॥

अथ दमनार्पणविधानम् ।

अथ चैत्रे शुक्लेऽष्टम्यां नवम्यां पूर्णमास्यां वा देव्यै दमनार्पणम् ॥ तद्विधिर्मन्त्रमहोदधौ ॥ चैत्रे दमनकैः पूजा पवित्रैः श्रावणेऽपि च ॥ प्रत्यब्दं

विधिवत्कुर्याद्वर्षार्चाफलसिद्धये ॥ १ ॥ पूर्वेऽह्नि दमनार्चायाः कृत्वा नित्यार्चनं विभोः ॥ गत्वा दमनकारामं गृह्णीयात्तं क्रयार्पणात् ॥२॥ उपविश्य शुचौ देशे मनुनानेन चार्चयेत् ॥ अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ॥३॥ शोकार्तिहर मे नित्यमानन्दं जनयस्व मे ॥ इति सम्प्रार्थ्य तत्रार्चेद्रतिकामौ स्वमन्त्रतः ॥ ४ ॥ कामदेवाय कामादिहृदन्तोऽष्टाक्षरो मनुः ॥ कामस्य माया रत्यै हृत् पञ्चार्णस्तुरतेर्मनुः ॥ ५ ॥ (कामदेवायेतिस्वरूपम् । कामादिः क्लीं वीजादिः । हृदन्तो नमोऽन्तः । तेन क्लीं कामदेवाय नम इत्यष्टाक्षरः कामस्य मन्त्रः । माया ह्रीं । रत्यै इति स्वरूपम् । हृत् नमः शब्दः तेन ह्रीं रत्यै नमः इति पञ्चाक्षरो रतेर्मन्त्रः) इष्टदेवस्य पूजार्थं नेष्यामि त्वामिति ब्रुवन् ॥ उत्पाट्य पञ्चगव्येनाभिषिच्य क्षालयेज्जलैः ॥ ६ ॥ (इष्टदेवस्येत्यत्र षष्ठ्यन्तं स्वेष्टदेवतानामोच्चार्यम् । यथात्र चण्डिकाया इति वा महालक्ष्म्या इति वा) गन्धादिभिर्हृदाभ्यर्च्य छादयेत्पीतवाससा ॥ निधाय वंशपात्रे तं गीतवादित्रनिःस्वनैः ॥७॥ (हृदा नमः शब्देन) गृहमानीय तद्देशे स्थापयेद्देवतां स्मरन् ॥ ततो देवस्य पुरतः कृत्वाष्टदलमम्बुजम् ॥ सितकृष्णरक्तपीतवर्णैः सम्पूरयेत्तु तत् ॥ भूपुरं तद्बहिः कृत्वा पीतवर्णेन पूरयेत् ॥९॥ सितरक्तपीतवर्णं तद्बहिर्वर्तुलत्रयम् ॥ रक्तवर्णेन तद्बाह्ये विदध्याच्चतुरस्रकम् ॥१०॥ एवं विरचिते रम्ये मण्डले सार्वकामिके ॥ यदि वा सर्वतो भद्रे दध्याद्दमनभाजनम् ॥ ११ ॥ सायङ्कालीनपूजान्ते कुर्यात्तदधिवासनम् ॥ ताराद्याभ्यां कामरतिमन्त्राभ्यां तत्र तौ यजेत् ॥ १२ ॥ दलेष्वष्टसु रत्याद्यानष्टौ कामान् प्रपूजयेत् ॥ कामो भस्मशरीरश्च ततोऽनङ्गश्च मन्मथः ॥ १३ ॥ वसन्तसखसंज्ञश्च स्मर इक्षुधनुर्धरः ॥ पुष्पवाण इमे कामास्तान् यजेन्नामभिर्निजैः ॥ १४ ॥ प्रणवानङ्गबीजाद्यैश्चतुर्थीहृदयान्वितैः ॥ कर्पूररोचनान्यङ्कुनाभिजागुरुकुङ्कुमैः ॥ १५ ॥ (न्यङ्कुनाभिजा कस्तूरी) धात्रीफलैश्चन्दनेन पुष्पैः कामान्यजेत् क्रमात् ॥ दमनं गन्धपुष्पाद्यैरभिपूज्याभिमन्त्रयेत् ॥१६॥

अष्टोत्तरशतं कामगायत्र्या मन्त्रवित्तमः ॥ कामदेवाय घर्णान्ते विग्रहे पदमुच्चरेत् ॥१७॥ पुष्पबाणाय पदान्ते धीमहीति ततो वदेत् ॥ तन्नोऽनङ्गः प्रचोदयादिति मनोभुवः ॥१८॥ गायत्र्येषा बुधैरुक्ता जप्या जनविमोहिनी ॥ हृदा पुष्पाञ्जलिं दत्वा मनुनानेन तं नमेत् ॥१९॥ नमोऽस्तु पुष्पबाणाय जगदानन्दकारिणे ॥ मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदायिने ॥ २० ॥ ततो निमन्त्रयेद्देवं मनुनानेन वै सुधीः ॥ आमन्त्रितोऽसि देवेश प्रातःकाले मया प्रभो ॥ २१ ॥ (देव्यां आमन्त्रितासिदेवित्वमित्यूहः कार्यः ।) कर्तव्यं तु यथालाभं पूर्णं पर्व तवाज्ञया ॥ देवे पुष्पाञ्जलिं दत्वा दण्डवत् प्रणिपत्य च ॥ २२ ॥ दमने वर्मणास्त्रेण विदध्यादवगुण्ठनम् ॥ रक्षणं च क्रमादेतदधिवासनमीरितम् ॥२३॥ (वर्मणा हुमित्यनेन दमनेऽवगुण्ठनमस्त्रेणफडिति मन्त्रेण रक्षणं च कुर्यादित्यर्थः ।) ततो जागरणं कुर्याद्देवं गायन् स्तुवन् जपन् ॥ प्रातःस्नानादि निर्वर्त्य कृत्वा नित्यार्चनं विभोः ॥ २४ ॥ सङ्कल्पं दमनार्चाया विदध्याद्देवताज्ञया ॥ गृहीत्वा दमनस्याथ हस्ताभ्यां मञ्जरीं शुभाम् ॥ २५ ॥ हृदाभिमन्त्रयेन्मन्त्री ततः श्लोकमिमं पठेत् ॥ सर्वरत्नमयीं दिव्यां सर्वगन्धमयीं शुभाम् ॥ २६ ॥ गृहाण मञ्जरीं देव नमस्तेऽस्तु कृपानिधे ॥ मूलमन्त्रेण घण्टादिघोषैर्देवस्य मस्तके ॥ २७ ॥ समर्प्यतामथादाय मालां दमननिर्मिताम् ॥ हृदाभिमन्त्र्य चानेन श्लोकेनाप्यभिमन्त्रयेत् ॥ २८ ॥ सर्वरत्नमयीमेतां दामिनीं वनमालिकाम् ॥ गृहाण तव पूजार्थं सर्वगन्धमयीं विभो ॥ २९ ॥ मूलमन्त्रं जपन् देवमुकुटे तां समर्पयेत् ॥ ततो नैवेद्यताम्बूले दत्वा नत्वा च दण्डवत् ॥ ३० ॥ दमनार्चां कृतां तस्मै श्लोकेन विनिवेदयेत् ॥ देवेश्वर जगन्नाथ कामेश्वर महेश्वर ॥ ३१ ॥ कृत्स्नान् पूरय मे कामान् वाञ्छितार्थप्रदायक ॥ (देव्यां, देवेश्वरि जगन्नाथे कामेश्वरि महेश्वरि ॥ कृत्स्नान् पूरय मे कामान् वाञ्छितार्थप्रदायिके ।) इत्यूहः कार्यः ॥ जप्त्वा मूलमनुं वह्नौ हुत्वा देवं विसृज्य च ॥ ३२ ॥ गुरुं नत्वा दमन-

कैर्यजेत्तं तोषयेद्धनैः ॥ विप्रान् सम्भोज्य भुञ्जीत स्वदेवाय निवेदितम् ॥३३॥ एवं कृते कृतार्थः स्याद्वर्षार्चाफलभाङ्नरः ॥ इति ॥ **इतिदमनार्पणविधानम्** ॥

अथैतत्प्रयोगः ॥ दमनार्पणदिनात्पूर्वदिने सायं, सद्योऽधिवासनपक्षे दमनार्पणदिने एव प्रातःस्नातः कृतनित्याक्रियः गन्धपुष्पादिपूजासामग्रीं गृहीत्वा दमनकारामं गत्वा आरामस्थितमेव दमनं मूल्येन क्रीत्वा तत्रैव तं गन्धपुष्पादिभिरभ्यर्च्य । अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ॥ शोकार्तिं हर मे नित्यमानन्दं जनयस्व च ॥ १ ॥ इति प्रार्थ्य । ॐ क्लीं कामदेवाय नमः ॥ ॐ ह्रीं रत्यै नमः ॥ इतिमन्त्राभ्यां तस्मिन् कामं रतिं च सम्पूज्य । महालक्ष्मीपूजार्थं त्वां नेष्ये, इत्युक्त्वा तमुत्पाट्य पञ्चगव्येनाभिषिच्य जलेन प्रक्षाल्य । ॐ नमः इति गन्धपुष्पादिभिरभ्यर्च्य वंशपात्रे निधाय पीतवाससाच्छाद्य वाद्यध्वनिपुरःसरं तं गृहमानयेत् ॥ एतदसम्भवे गृहे एवोक्तं सर्वं विधिं कुर्यात् ॥ ततो देव्याः पुरतोऽष्टदलं तद्बहिर्भूपुरं तद्बाह्ये वर्तुलत्रयं तद्बहिश्चतुरस्रं च कुङ्कुमादिना विरच्य कमलस्याष्टदलानि श्वेतकृष्णरक्तपीतवर्णद्रव्यैः पर्यायद्वयेन, भूपुरं पीतवर्णद्रव्येण, वर्तुलत्रयं क्रमेण सितरक्तपीतवर्णद्रव्यैः, चतुरस्रं रक्तवर्णद्रव्येण च सम्पूर्य तत्र, एतदसम्भवे सर्वतोभद्रे, दमनभाजनं स्थापयेत् ॥ अथ रात्रौ देवीपूजानन्तरं, सद्योऽधिवासनपक्षे दमनार्पणदिने एव प्रातः, ताम्रादिभाजने कुङ्कुमादिनाष्टदलं निर्माय तन्मध्ये कर्णिकां कृत्वा दमनकं नवधा विभज्य कर्णिकायामेकं भागमष्टदलेष्वष्टभागांश्चावस्थाप्य कर्णिकास्थितभागे ॐ क्लीं कामदेवाय नमः ॥ ॐ ह्रीं रत्यै नमः ॥ इति मन्त्राभ्यां कामं रतिं च सम्पूज्याष्टदलस्थितभागेषु पूर्वादिक्रमेण ॐ क्लीं रतिसहिताय कामाय नमः इति कर्पूरेण, ॐ क्लीं रतिसहिताय भस्मशरीराय नमः इति रोचनया, ॐ क्लीं रतिसहितायानङ्गाय नमः इति कस्तूर्या, ॐ क्लीं रतिसाहिताय मन्मथाय नमः इत्यगुरुणा, ॐ क्लीं रतिसहिताय वसन्तसखाय नमः इति कुङ्कुमेन, ॐ क्लीं रतिसहि-

ताय स्मराय नमः इति धात्रीफलेन, ॐ क्लीं रतिसहितायेक्षुधन्वने नमः इति चन्दनेन, ॐ क्लीं रतिसहिताय पुष्पबाणाय नमः इति पुष्पै। इति कामस्याष्टौ मूर्तीः पूजयेत् ॥ उक्तद्रव्यालाभे सर्वासां गन्धपुष्पाभ्यां पूजा ततः कामदेवाय विद्महे पुष्पबाणाय धीमहि ॥ तन्नोऽनङ्गः प्रचोदयात् ॥ इति कामगायत्रीमष्टोत्तरशतं जप्त्वा दमने पुष्पाञ्जलिं दत्वा। नमोऽस्तु पुष्पबाणाय जगदानन्दकारिणे ॥ मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदायिने ॥ १ इति नमस्कृत्य देवीं प्रार्थयेत् ॥ आमन्त्रितासि देवि त्वं प्रातःकाले मया प्रभो ॥ कर्तव्यं तु यथालाभं पूर्णं पर्व तवाज्ञया ॥ १ ॥ इति ॥ सद्योऽधिवासनपक्षे "प्रातःकाले" इत्यत्र अद्याहनीत्यूहः ॥ ततो देव्यै पुष्पाञ्जलिं दत्वा साष्टाङ्गं नमस्कृत्य दमनं हुमित्यवगुण्ठ्य फडितिमन्त्रेण संरक्षेत् ॥ **इत्यधिवासनम्** ॥ द्वितीयदिने सद्योऽधिवासनपक्षे तस्मिन्नेव दिने नित्यपूजायामावरणपूजानन्तरं, महालक्ष्मीं दमनेन पूजयिष्ये। इति सङ्कल्प्य हस्ते दमनमञ्जरीं गृहीत्वा ॐ नम इत्यभिमन्त्र्य सर्वरत्नमयीं दिव्यां सर्वगन्धमयीं शुभाम् ॥ गृहाण मञ्जरीं देवि नमस्तेऽस्तु कृपानिधे ॥१॥ इति मन्त्रेण घण्टावादनपूर्वकं देवीशिरसि समर्प्य ततो दमननिर्मितां मालां ॐ नम इत्यभिमन्त्र्य। सर्वरत्नमयीं देवि दामिनीं वनमालिकाम् ॥ गृहाण वर्षपूजार्थं सर्वगन्धमयीं शुभाम् ॥१॥ इति मन्त्रेण मूलसहितेन देवीमुकुटेऽर्पयेत् ॥ ततः परिवारदेवताभ्यो दमनं समर्प्य देवेश्वरि जगन्नाथे कामेश्वरि महेश्वरि ॥ कृत्स्नान् पूरय मे कामान् वाञ्छितार्थप्रदायिके ॥ १ ॥ इति प्रार्थ्य नित्यापेक्षया त्रिगुणहोमजपसहितां धूपदीपनैवेद्यप्रभृत्यवशिष्टां पूजां समापयेत् ॥ ततो गुरुं दमनेन सम्पूज्य दक्षिणादिभिः प्रतोष्य कुमारीः सामयिकान् ब्राह्मणसुवासिनीश्च दमनेन सम्पूज्य मधुरान्नेन भोजयित्वा ताम्बूलदक्षिणादि दत्वा स्वयं भुञ्जीत ॥ अस्य श्रावणावधिर्गौणकालः ॥ मुख्यकालातिक्रमे सहस्रमूलमन्त्रजपः प्रायश्चित्तम् ॥ सर्वथा लोपेत्वयुतम् ॥

इति चण्डिकोपास्तिदीपिकायां नैमित्तिकार्चाप्रकाशे दमनार्पणम् ॥

अथ पवित्रार्पणविधानम् ।

अथ पवित्रार्पणविधानम् ॥ अथ श्रावणशुक्लेऽष्टम्यां नवम्यां पूर्णमास्यां वा देव्यै पवित्रापर्णम् ॥ तद्विधिर्**मन्त्रमहोदधौ** ॥ पवित्रयजनाहात्तु पूर्वस्मिन् वासरे सुधीः ॥ विदध्यान्नित्यपूजान्ते पवित्राणि यथाविधि ॥ १ ॥ हेमरूप्यादिसूत्रैश्च तथा कौशेयसूत्रतः ॥ यद्वा कार्पाससूत्रैश्च निर्मितैर्विप्रभार्यया ॥ २ ॥ अन्यया वा सधवया सदाचारप्रसक्तया ॥ कर्तितैस्तानि कुर्वीत न पुंश्चल्या विनिर्मितैः ॥ ३ ॥ त्रिगुणं त्रिगुणीकृत्य निर्माय नवसूत्रिकाम् ॥ तां प्रोक्ष्य पञ्चगव्येन क्षालयेदुष्णवारिणा ॥ ४ ॥ प्रणवेनाभिषिञ्चेत्तां मूलेनाष्टोत्तरं शतम् ॥ मन्त्रयेन्मूलगायत्र्या तावदेव ततः सुधीः ॥ ५ ॥ रचयेन्नवसूत्रीभिरष्टोत्तरशतेन च ॥ तदर्धेन तदर्धेन जानूरुनाभिमानतः ॥ ६ ॥ देवेशस्य पवित्राणि शुचौ देशे प्रसन्नधीः ॥ ज्येष्ठमध्यकनिष्ठानि तेषु ग्रन्थीन् दधीत च ॥७॥ षट्त्रिंशत्तत्वमार्तण्डमितान् ज्येष्ठादिषु क्रमात् ॥ (तत्वानि चतुर्विंशतिः । मार्तण्डा द्वादश) अष्टोत्तरशतग्रन्थिवनमालापवित्रकम् ॥ ८ ॥ अष्टोतरसहस्रेण नवसूत्र्या विनिर्मितम् ॥ कृत्वा तु रञ्जयेद्ग्रन्थीन् रोचनाकुङ्कुमादिभिः ॥ ९ ॥ वैणवे पटले तानि सञ्छाद्य सितवाससा ॥ स्थापयित्वा विनिर्माया दन्यान्यावरणार्चने ॥ १० ॥ सप्तविंशत्यष्टिरविनवसूत्रीमितानि तु ॥ अद्रिनेत्रामिताभिस्तु कुर्याद्गुरुपवित्रकम् ॥ ११ ॥ (अष्टिः षोडश । रवयो द्वादश । अद्रिनेत्राणि सप्तविंशतिः) । तावतीभिः कृशानोस्तत् षड्विंशत्या तथात्मनः ॥ अत्र ग्रन्थीन् यथाशोभं दत्वा तान् रञ्जयेदपि ॥ १२ ॥ यथाशोभमित्यनेन स्वेच्छया ग्रन्थयो देया इत्युक्तम् ।) तानि पात्रान्तरे न्यस्य कुर्याद्गन्धपवित्रकम् ॥ द्वादशग्रन्थितिग्मांशुनवसूत्रीविनिर्मितम् ॥ १३ ॥ (तिग्मांशुर्द्वादशसङ्ख्या) उक्तसङ्ख्यस्य सूत्रस्यालाभे तानि यथारुचि ॥ ज्येष्ठादीनि पवित्राणि सर्वाणि विदधीत च ॥ १४ ॥ निर्मायैवं पवित्राणि कुर्यात्पूजनमण्डलम् ॥ पङ्कजं षोडशदलं पूजयेदष्टवर्णकैः ॥ १५ ॥ नीलहारि-

द्रशोणाह्वमाञ्जिष्ठश्वेतसञ्ज्ञकैः॥ सिन्दूरधूम्रकृष्णाख्यैस्तद्बहिर्मण्डलत्रयम् ॥१६॥ सोमसूर्याग्निसंज्ञं तत्सितपीतारुणं क्रमात् तद्बाह्येऽष्टदलं कुर्यादरुणं यदि वा सितम् ॥ १७ ॥ सम्पूज्य मण्डलं तत्र पात्रे न्यस्याधिवासयेत् ॥ (पात्रे इति द्वितीयाद्विवचनम्) तत्र द्वाविंशतिं देवानाहूय प्रतिपूजयेत् ॥ १८ ॥ ब्रह्मविष्णुमहेशानास्त्रिसूत्र्या देवताः स्मृताः ॥ ॐकारश्चन्द्रमावह्निर्ब्रह्मा नागाः शिखिध्वजः ॥ १९ ॥ (शिखिध्वजः कार्तिकेयः) सूर्यः सदाशिवो विश्वे नवसूत्र्यधिदेवताः ॥ क्रिया च पौरुषी वीरा चतुर्थी त्वपराजिता ॥२०॥ विजया च जया चैव मुक्तिदा च सदाशिवा ॥ मनोन्मनी तु नवमी दशमी सर्वतोमुखी ॥ २१ ॥ एताः पवित्रग्रन्थीनां देवताः परिकीर्तिताः ॥ तदावाहनादिकं तत्र कृत्वार्चेच्चन्दनादिभिः ॥२२॥ एवं पवित्राण्यभ्यर्च्य दद्याद्गन्धपवित्रकम् ॥ यद्धूपितं च तारेण हृदयेनाभिमन्त्रितम् ॥ २३ ॥ प्रणम्य प्रार्थयेद्देवं श्लोकयुग्ममिदं पठन् ॥ आमन्त्रितोऽसि देवेश सार्धं तव गणेश्वरैः ॥ २४ ॥ मन्त्रैर्लोकपालैश्च सहितः परिवारकैः ॥ आगच्छ भगवन्नद्य व्रतसम्पूर्तिकारक ॥ २५ ॥ प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु मे प्रभो ॥ ततो गन्धपवित्रं तत्पादयोर्विन्यसेद्विभोः ॥२६॥ (देव्यां " आमन्त्रितोऽसि देवेश " इत्यत्र आमन्त्रितासि देवि त्वमिति "सहित" इत्यत्र सहिता इति, आगच्छेत्यर्धस्थाने आगच्छ भगवत्याद्ये व्रतसम्पूर्तिकारिके इत्यूहः। सद्योऽधिवासनपक्षे प्रातरित्यत्र अद्येत्यूहः) अधिवासं विधायेत्थं रात्रौ जागरणं चरेत् ॥ देवस्य स्तुतिनामादि वदन् गायंश्च तद्गुणान् ॥ २७ ॥ प्रातर्नित्यार्चनं कृत्वा मूलेनाष्टोत्तरं शतम् ॥ कनिष्ठाख्यं पवित्रं तत् गृहीत्वा चाभिमन्त्रयेत् ॥ २८ ॥ घण्टावादित्रवेदानां कारयन् घोषमुत्तमम् ॥ जयशब्दांश्च देवस्य कण्ठे मूलेन चार्पयेत् ॥ २९ ॥ एवमेवार्पयेदन्ये पवित्रे मध्यमोत्तमे ॥ श्वेतं रक्तं क्रमात्पीतं ध्यायेद्देवं तदर्पणे ॥३०॥ वनमालापवित्रं तु तावन्मूलेन मन्त्रितम् । अर्पयेदिष्टदेवस्य मुकुटे मूलमुच्चरन् ॥३१॥ हृदान्य-

पटलस्थानि पवित्राण्यभिमन्त्र्य च ॥ तत्तन्नाम्ना नमोऽन्तेन परिवारसुरान् यजेत् ॥ ३२ ॥ एवं पवित्रैः सम्पूज्य धूपादीनि प्रकल्पयेत् ॥ पावके देवमावाह्य नित्यहोमं विधाय च ॥ ३३ ॥ मूलेनाग्निपवित्रं तदर्पयेद्देवतां स्मरन् ॥ मूर्नौ देवं समुद्वास्य वह्निं संयोज्य चात्मनि ॥३४॥ पुष्पाञ्जलिं विधायेशे कर्मान्ते च निवेदयेत् ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं कृपानिधे ॥ ३५ ॥ पूजनं पूर्णतामेतु पवित्रेणार्पितेन ते ॥ इति सम्प्रार्थ्य देवेशं योजयेद्हृदये निजे ॥ ३६ ॥ गुर्वन्तिकं ततो गत्वा दत्वा पुष्पाञ्जलिं गुरौ ॥ स्वाङ्गे षडङ्गं विन्यस्य गुरुदेहेऽपि विन्यसेत् ॥ ३७ ॥ (गुरुरत्र मूलमन्त्रोपदेष्टा) पाद्यं दत्वा तथैवार्घ्यं वस्त्रालङ्कारचन्दनम् ॥ पुष्पैः सम्पूज्य मूलेन पवित्रं तद्गलेऽर्पयेत् ॥ ३८ ॥ स्वशक्त्या दक्षिणां दत्वा दण्डवत्प्रणमेद्गुरुम् ॥ कुमार्यै शिष्टवृद्धेभ्यः पवित्राणि ददीत च ॥ ३९ ॥ ततो धृत्वा पवित्रं स्वं भोजयित्वा द्विजोत्तमान् ॥ भुञ्जीत तदनुज्ञातो बन्धुभिस्तनयैः सह ॥ ४० ॥ यथा कथञ्चित् कुर्वीण पवित्राणि सुरार्चने ॥ विधेरुक्तस्य चाशक्तौ पूजा सम्पूर्णताप्तये ॥ ४१ ॥ प्रत्यब्दं यः पवित्रेण पूजां कुर्वीत दैवते ॥ ऐश्वर्यारोग्यसंयुक्तोऽनेकवर्षाणि जीवति ॥ ४२ ॥ प्रत्यब्दं यः पवित्रार्चां न करोति पुमानिह ॥ तस्य संवत्सरं पूजा निष्फला स्यात्स दुखभाक् ॥ ४३॥ इति पवित्रार्पणविधानम् ॥

अथैतत्प्रयोगः ॥ पवित्रार्पणदिनात् पूर्वेद्युः सायं, सद्योऽधिवासनपक्षे पवित्रार्पणदिने एव प्रातः सन्ध्यादिनित्यकर्मानन्तरं कौशेयसूत्रमसम्भवे सदाचारसुवासिनीकर्तितं कार्पाससूत्रं गृहीत्वा त्रिगुणीकृत्य पुनस्त्रिगुणीकरणेन नवसूत्रीं विधाय तया अष्टोत्तरशतप्रतिसरात्मकं देवतायाः कण्ठादाजानुलम्बिषट्त्रिंशद्ग्रन्थियुतं ज्येष्ठपवित्रं, चतुःपञ्चाशत्प्रतिसरं चतुर्विंशतिग्रन्थियुतं देवतोरुप्रमाणं मध्यमपवित्रं, सप्तविंशतिप्रतिसरं द्वादशग्रन्थियुतं देवतानाभिप्रमाणं कनिष्ठपवित्रं, अष्टोत्तरसहस्रप्रतिसरात्मकं मुकुटादापादलम्ब्यष्टोत्तरशत-

ग्रन्थियुतं वनमालापवित्रं च कृत्वा कुङ्कुमेन रञ्जयित्वा वैणवभाजने स्थापयित्वा श्वेतवाससा छादयेत् । ग्रन्थयश्च पवित्रस्य सर्वप्रतिसरानेकत्र कृत्वा तेषु पृथक्सूत्रैर्वेष्टनरूपाः । ते च यथा सर्वग्रन्थिमध्यदेशेषु तुल्यप्रमाणमन्तरं स्यात्तथा कल्प्याः ॥ ततः आवरणदेवतानां क्रमात्सप्तविंशतिषोडशद्वादशभिर्नवसूत्रीप्रतिसरैरुत्तममध्यमकनिष्ठपवित्राणि, सप्तविंशतिसप्तविंशतिप्रतिसरैर्गुरोरग्नेश्च पवित्रे, षड्विंशतिप्रतिसरैरात्मनास्त्रिभिस्त्रिभिः प्रतिसरैरितरेषां च पवित्राणि विधाय तेषु स्वेच्छया ग्रन्थीन् दत्वा द्वादशप्रातिसरैर्द्वादशग्रान्थियुतं गन्धपवित्रं कृत्वा सर्वेषां ग्रन्थीन् कुङ्कुमेन रञ्जयित्वा तानि द्वितीयवेणुपात्रे निदध्यात् ॥ एतदसम्भवे यथासम्भवं पवित्राणि कुर्यात् ॥ ततस्तानि सर्वाणि पञ्चगव्येन प्रोक्ष्योष्णोदकेन प्रक्षाल्य प्रणवेनाभिषिच्य मूलेनाष्टोत्तरशतवारमभिमन्त्र्य पूर्वपात्रद्वये निधाय देव्यग्रे षोडशदलकमलं तद्बाह्ये चन्द्रसूर्यवह्न्यात्मकं क्रमेण मण्डलत्रयं तद्बहिरष्टदलं च कुङ्कुमादिना विलिख्य षोडशदलेषु क्रमेण पूर्वादि, नीलपीतरक्तमाञ्जिष्ठश्वेतसिन्दूरधूम्रकृष्णवर्णद्रव्याण्यापूर्य मण्डलत्रयं क्रमेण सितपीतारुणवर्णद्रव्यैः पूरयित्वाष्टदलं रक्तवर्णेन वा सितवर्णेन वा द्रव्येणापूर्य मण्डलं गन्धपुष्पादिभिः समभ्यर्च्य तत्र पवित्रपात्रद्वयं निधाय त्रिसूत्र्यां ब्रह्मविष्णुरुद्रान्, नवसूत्र्यां ॐकारचन्द्रवह्निब्रह्मनागकार्तिकेयसूर्यशिवविश्वदेवान्, ग्रन्थिषु क्रियां, पौरुषीं, वीरामपराजितां विजयां जयां मुक्तिदां शिवां मनोन्मनीं सर्वतोमुखीं चेति द्वाविंशतिदेवता आवाह्य । गन्धादिभिः सम्पूज्य । गन्धपवित्रं गृहीत्वा प्रणवेन धूपयित्वा नम इति अभिमन्त्र्य । आमन्त्रितासि देवि त्वं सार्धं तव गणेश्वरैः ॥ मन्त्रेशैर्लोकपालैश्च सहिता परिवारकैः ॥१॥ आगच्छ भगवत्याद्ये विधिसम्पूर्तिकारिके ॥ प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु मे विभो ॥ २ ॥ इति प्रार्थयेत् ॥ सद्योऽधिवासनपक्षे प्रातरित्यत्र अद्येत्यूहः ॥ ततो गन्धपवित्रं देव्याः पादयोः समर्प्य रात्रौ नामकीर्तनपुरःसरं जागरणं कुर्यात् ॥ इत्यधिवासनम् ॥

अथ द्वितीयदिने सद्योऽधिवासनपक्षे तद्दिने एव आवरणपूजानन्तरं, संवत्सरपूजापूर्णफलावाप्त्यर्थं महालक्ष्म्यै पवित्रार्पणं कारिष्ये इति सङ्कल्प्य। कनिष्ठपवित्रं गृहीत्वा मूलेनाष्टोत्तरशतवारमभिमन्त्र्य । देवेश्वरि नमस्तुभ्यं गृहाणेदं पवित्रकम् ॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ १ ॥ पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ॥ शुद्धो भवाम्यहं देवि त्वत्प्रसादान्महेश्वरि ॥ २ ॥ इति मन्त्राभ्यां मूलमन्त्रसम्पुटिताभ्यां घण्टादिवादनपुरःसरं देवीकण्ठेऽर्पयेत् ॥ एवमेव मध्यममुत्तमं च पवित्रं समर्प्य तथैव वनमालापवित्रमपि मुकुटात्पादपर्यन्तं लम्बमानमर्पयेत् ॥ ततोऽन्यानि पवित्राणि नम इत्यभिमन्त्र्य परिवारदेवताभ्यस्तत्तन्मूलमन्त्रेण नागमन्त्रेण वा समर्प्य धूपदीपनैवेद्यान् समर्प्य नित्यात्त्रिगुणं होमं सम्पाद्याग्नये तत्पवित्रं दत्वा त्रिगुणजपसहितं पूजाशेषं समाप्य प्रार्थयेत् ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं कृपानिधे ॥ पूजनं पूर्णतामेतु पवित्रेणार्पितेन ते ॥ १ ॥ जानताजानतावापि यत् कृतं न तवार्चनम् ॥ केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे ॥ २ ॥ इति प्रार्थयेत् ॥ ततो गुरुसमीपे गत्वा गुरौ पुष्पाञ्जलिं दत्वा स्वाङ्गे गुर्वङ्गे च मूलषडङ्गं न्यस्य यथाविभवं सम्पूज्य मूलमन्त्रेण तत्कण्ठे पवित्रं समर्प्य यथाशक्ति दक्षिणां दत्त्वा दण्डवत् प्रणमेत् ॥ ततोऽन्येभ्यो वृद्धेभ्यः कुमारीब्राह्मणसुवासिनीभ्यश्च पूजनपूर्वकं पवित्राणि दत्वा स्वयं च धृत्वा कुमारीब्राह्मणसुवासिनीर्भोजयित्वा ताम्बूलदक्षिणादि दत्त्वा परिवारयुतः स्वयं भुञ्जीत ॥ एवमर्पितान्येव पवित्राणि त्रिदिनं प्रक्षाल्य पुनःपुनर्दत्त्वा चतुर्थदिवसे परित्यजेदिति **धर्माब्धिसारे** ॥ इदं व्रतमकरणे प्रत्यवायश्रवणात्करणे फलोक्तेश्च नित्यं काम्यं च ॥ अस्य कार्तिकपूर्णिमावधिर्गौणकालः ॥ मुख्यकालातिक्रमे सहस्रमूलमन्त्रजपः प्रायश्चित्तम् ॥ सर्वथा लोपेत्वयुतम् ॥

इति चण्डिकोपास्तिदीपिकायां नैमित्तिकार्चाप्रकाशे पवित्रार्पणविधिः।

अथेतरपर्वार्चनम् ॥

अथेतरपर्वार्चनम् ॥ वैशाखपूर्णिमायां हेमन्तकाले गृहीतं हिमोदकं तदभावे कस्तूरीसंस्कृतं शीतलं जलं नैवेद्ये देयम् ॥ ज्येष्ठपूर्णिमायां पनसाम्रकदलीफलानि देयानि ॥ आषाढपूर्णिमायां कुङ्कुममिश्रचन्दनं समर्प्य जातिकुसुमैः सावरणां देवीमभ्यर्च्य नैवेद्यान्ते लवङ्गलाकक्कोलादिसहितं ताम्बूलं देयम् ॥ भाद्रपद्यां केतकीदलकुसुममर्पयेत् ॥ आश्विनपूर्णिमायां उत्तमवस्त्राणि भूषणानि चार्पयेत् । कार्तिक्यामतिसुरभिकाश्मीरजं समर्प्य गोधूमपिष्टायतनैः सकर्पूरैः षोडशदीपैरारार्तिकं कुर्यात् ॥ मार्गशीर्षपूर्णिमायां घृतपाचितमाषपिष्टापूपान् कर्पूरसंस्कृतं नारिकेलोदकं च नैवेद्ये दद्यात् ॥ पौषपूर्णिमायां शर्करायुक्तं गोक्षीरं नैवेद्येऽर्पयेत् ॥ माघपूर्णिमायां सकुसुमैः शुक्लतिलैरभ्यर्च्य शर्करादुग्धापूपान्निवेदयेत् ॥ फाल्गुनपूर्णिमायां सुवर्णपुष्पैर्मधूकपुष्पैराम्रादिपुष्पैश्च सावरणां देवीमर्चयेत् ॥ अधिकमासपूर्णिमायां शुद्धमासोक्तं वस्त्वेव देयम् ॥ एतानि सति सम्भवे पूर्वेद्युः सद्यो वाधिवास्य पूजाकाले समर्पयेत् । इतीतरपर्वार्चनानि ॥ अथ तिथ्यादिविशेषैर्देवीभागवते नैवेद्यविशेषाः उक्तास्ते यथा ॥ प्रतिपदि नैवेद्ये प्रभूतघृतदाने नीरोगता ॥ द्वितीयायां शर्करादाने दीर्घायुष्यम् ॥ तृतीयायां दुग्धदाने सर्वदुःखनाशः ॥ चतुर्थ्यामपूपदाने विघ्ननाशः ॥ पञ्चम्यां कदलीफलदाने मेधावृद्धिः ॥ षष्ठ्यां मधुदाने कान्तिवृद्धिः ॥ सप्तम्यां गुडनैवेद्येन शोकनाशः ॥ अष्टम्यां नारिकेलजलदाने तापनाशः ॥ नवम्यां लाजार्पणे इहलोके सुखावाप्तिः ॥ दशम्यां कृष्णतिलसमर्पणे यमभयाभावः ॥ एकादश्यां दधिदाने देवीप्रसादः ॥ द्वादश्यां पृथुकदाने देवीलोकप्राप्तिः ॥ त्रयोदश्यां भृष्टचणकदाने सन्ततिप्राप्तिः ॥ चतुर्दश्यां सक्तुदाने कैलासवासः ॥ पूर्णिमायां पायसनैवेद्येन वैकुण्ठलोकप्राप्तिः अमायां कृसरदाने ब्रह्मलोकावाप्तिः ॥ रविवारे पायसदाने दीर्घायुष्यम् ॥ सोमवारे गव्यघृतदाने नीरोगता ॥ भौमवारे कदलीफलदाने सद्बुद्धिः ॥ बुधवारे नवनीतदाने स्वर्गलोकः ॥

गुरुवारे खण्डशर्करादाने सुखप्राप्तिः ॥ शुक्रवारे सितादाने दुःखध्वंसः ॥ शनिवारे गव्यघृतदाने चक्षूरोगपरिहारः ॥ एवं नक्षत्रयोगकरणविशेषेषु नैवेद्यविशेषाश्च **देवीभागवते** द्रष्टव्याः ॥ तथा **मन्त्रमहोदधौ** ॥ अन्येष्वप्युपरागार्धोदयसौम्यायनादिषु ॥ कुर्यादलभ्ययोगेषु विशेषाद्देवतार्चनम् ॥ शुचौ तत्तदहे कुर्याद्देवतास्वापनोत्सवम् ॥ ऊर्जे तथैव देवानामुत्थापनविधिं सुधीः ॥ (शुचौ आषाढे । तत्तदहे तत्तद्देवताप्रियतिथौ । यथा देव्या अष्टमीनवम्योः स्वापनोत्सवं शयनोत्सवम् ऊर्जे कार्तिके उत्थापनोत्सवं प्रबोधोत्सवम् ।) एवं चैत्रशुक्ले आश्विनशुक्ले वा अष्टमीनवमीपूर्णिमान्यतमदिने देव्या रथोत्सवं कुर्यात् ॥ तद्विधिश्**चण्डीसपर्याक्रमकल्पवल्ल्यां** द्रष्टव्यः ॥ शक्तौ यथा सम्भवमन्यान्यपि देवीव्रतान्यनुष्ठेयानि ॥ तानि व्रतग्रन्थतो ज्ञेयानि ॥ विशेषार्चनदिनेषु होमस्य जपस्य च त्रैगुण्यमिति साम्प्रदायिकाः ॥

इति चण्डिकोपास्तिदीपिकायां नैमित्तिकार्चाप्रकाशः ॥

॥ श्री ॥

अथ चण्डिकोपास्तिदीपिकायां जपप्रकाशः॥

॥ श्री ॥

अथ जपप्रकाशः ।

अथ चण्डिकोपास्तिदीपिकायां जपप्रकाश आरभ्यते ॥ तत्र जपरूपोपासनायां चण्डिकायाः सर्वेषु मन्त्रेषु सर्वेषु स्तवेषु च नवार्णमन्त्रो देवीमहात्म्यस्तवश्चेति द्वावेवातिप्रियौ ॥ तदुक्तं **प्रदीपे स्कान्दे** देव्यैव भैरवं प्रति ॥ न तथा मत्प्रियं किञ्चिद्यथा मन्त्रो नवार्णकः ॥ तथैव देवीमाहात्म्यं प्रियात्प्रियतरं मम ॥ इति ॥ तत्र नवार्णमन्त्रो **देव्यथर्वशीर्षे डामरादितन्त्रेषु देवीभागवतादिपुराणेषु** चोद्धृतोऽस्ति ॥ **देव्यथर्वशीर्षे** यथा ॥ वाङ्माया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितम् ॥ सूर्यो वामश्रोत्रबिन्दुसंयुक्तष्टात्तृतीयकः ॥ नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः ॥ विच्चे नवार्णकोऽणुः स्यान्महदानन्ददायकः ॥ इति ॥ अस्यार्थः ॥ वाक्शब्देन ऐं बीजम् । मायाशब्देन ह्रीं बीजम् । ब्रह्मसूः कामस्तेन क्लीं बीजम् । आत्मभूर्ब्रह्मसूः काम इत्यमरमाला ॥ अथ तस्मात् क्लीं बीजे प्रथमोपस्थितात् ककारात् षष्ठं चेत्यक्षरम् । तच्च वक्त्रेण दीर्घाकारेण समन्वितं चा इति नवार्णस्य चतुर्थो वर्णः ॥ सूर्यो मकारः स च वामश्रोत्रेण ह्रस्वोकारेण बिन्दुनानुस्वारेण च संयुक्तो मुमितिमन्त्रस्य पञ्चमो वर्णः ॥ अथ टात् टकारात् तृतीयको डकारः । स च नारायणेन दीर्घाकारेण सम्मिश्रो डा इति मन्त्रस्य षष्ठो वर्णः । वायुर्यकारः स च अधरेण ऐकारेण युज्यते इत्यधरयुक् । तेन यै इति मन्त्रस्य सप्तमो वर्णः ॥ विच्चे इति स्वरूपतो द्वौ वर्णौ ॥ एवं नवार्णको नवाक्षरोऽणुर्मन्त्रः स्यात् ॥ महदानन्ददायकः ब्रह्मानन्दप्रदः ॥ महत्त्वं च सर्वाधिकत्वम् । श्रुतौ मानुषानन्दमारभ्य उत्तरोत्तरं शतगुणान् बहूनानन्दानुक्त्वाऽन्ते स एको ब्रह्मण आनन्द इति ब्रह्मा-

नन्दस्यैव सर्वाधिकत्वेनाम्नानात् ॥ अस्य मन्त्रस्य महावाक्यार्थप्रतिपादकत्वात्
युक्तमेव ब्रह्मानन्दप्रदत्वम् ॥ उक्तं च **रहस्यतन्त्रे** । ज्ञात्वा नवाक्षरं मन्त्रं
जीवब्रह्मसमाश्रयम् ॥ तत्त्वमस्यादिवाक्यानां सारं संसारभेषजम् ॥ इति
महच्छब्दस्य कर्मधारयपूर्वपदत्वेऽप्यात्वाभावश्छान्दसः ॥ महतां ब्रह्मनिष्ठा-
नामानन्ददायक इति षष्ठीतत्पुरुषो वा ॥ नवार्ण इत्यत्र वर्णशब्दे वकारलोपः
पृषोदरादित्वात् ॥ अर्णशब्द एव वा वर्णवाचकः । सर्वतन्त्रेषु तथाप्रयोग-
दर्शनात् ॥ अस्य मन्त्रस्य स्वरव्यञ्जनोभयगणनायां चतुर्विंशतिवर्णात्मक-
त्वेऽपि अक्षरसङ्ख्यायां व्यञ्जनानामगणीयत्वात्स्वरसङ्ख्यया नवार्णत्वम् ॥
दीर्घाकारादीनां वक्रादिसंज्ञा मातृकानिघण्टुतोऽवगन्तव्याः ॥ **डामरेश्वरे** तु
प्रकटाक्षरैर्नवार्णमुक्त्वा वर्णानां स्वरूपाणि चोक्तानि तद्यथा ॥ ऐं बीजमादी-
न्दुसमानदीप्ति ह्रीं सूर्यतेजोद्युतिमत् द्वितीयम् ॥ क्लीं मूर्तवैश्वानरतुल्यरूपं
तृतीयमत्यन्तसुखाय चिन्त्यम् ॥ चां शुद्धजाम्बूनदकान्ति तुर्यम् ॥ मुं पञ्चमं
रक्ततरं विचिन्त्यम् ॥ डां षष्ठमुग्रार्तिहरं सुनीलम् ॥ यैं सप्तमं कृष्णतरं रिपु-
घ्नम् ॥ विं पाण्डुरं त्वष्टममाशुसाध्यम् ॥ च्चें धूम्रवर्णं नवमं विशालम् ॥ इति ॥
मन्त्राणां पुरश्चरणं विना सिद्ध्यभावात् आदौ पुरश्चरणं कर्तव्यम् ॥ तदुक्तं
वैशम्पायनेन । पुरश्चरणसंयुक्तो मन्त्रो हि फलदायकः ॥ पुरस्क्रिया हि
मन्त्राणां प्रधानं बीजमुच्यते ॥ किं जपैर्यजनैश्चैव किं ध्यानैर्न्यासविस्तरैः ॥
रहस्यानां हि मन्त्राणां यदि न स्यात् पुरस्क्रिया ॥ वीर्यहीनो यथा देही
सर्वकर्मसु न क्षमः ॥ पुरश्चरणहीनस्तु तथा मन्त्रः प्रकीर्तितः ॥ इति ॥ पुर-
श्चरणपदनिरुक्तिर्**वायुसंहितायाम्** ॥ साधनं मूलमन्त्रस्य पुरश्चरणमुच्यते ॥
पुरतश्चरणीयत्वाद्विनियोगाख्यकर्मणाम् ॥ पुरतो विनियोगस्य चरणाद्वा तथो-
दितम् ॥ इति ॥ **मन्त्रतन्त्रप्रकाशे** ॥ फलाय राजसेवायां राजसेवा यथा
तथा ॥ चरणात्पूर्वमेवातः पुरश्चरणमुच्यते ॥ इति **अथ पुरश्चरणस्वरूपं**
तन्त्रान्तरे । जपो होमस्तर्पणं च मार्जनं विप्रभोजनम् ॥ मन्त्रविद्भिस्तु

पञ्चाङ्गं पुरश्चरणमुच्यते इति ॥ तत्र नवार्णपुरश्चरणं द्विविधम् ॥ चतुर्लक्षात्मकमेकलक्षात्मकं चेति ॥ आद्यं **मरीचिकल्पे** । एवं कृत्वा जपेल्लक्षचतुष्कं तद्दशांशतः ॥ पायसान्नेन जुहुयात् पूजिते हेमरेतसि ॥ इत्युक्तम् ॥ (एवं कृत्वेति न्यासादिपूर्वाङ्गस्योपसंहारः ॥ हेमरेतस्यग्नौ) द्वितीयं **मन्त्रमहोदधौ** । आश्विनस्य सिते पक्षे आरभ्याग्नितिथिं सुधीः ॥ अष्टम्यन्तं जपेल्लक्षं दशांशं होममाचरेत् ॥ इत्युक्तम् ॥ (अग्नितिथिः प्रतिपत् ॥ वह्निर्दस्रावुमाविघ्नो भुजङ्गाः षण्मुखो रविः ॥ मातरश्च तथा दुर्गा दिशो धनदकेशवौ ॥ यमो हरः शशी चैव पितरश्च तिथीश्वराः ॥ इति **कादिमतोक्तेः** ।) अथ पुरश्चरणे देश उक्तो **योगियाज्ञवल्क्येन** ॥अग्न्यगारे जलान्ते वा जपेद्देवालयेऽथवा ॥ पुण्यतीर्थे गवां गोष्ठे द्विजक्षेत्रेऽथवा गृहे ॥ इति (अग्न्यगारे अग्निहोत्रशालायाम् । जलान्ते जलसमीपे । द्विजक्षेत्रे ब्राह्मणेभ्यो दत्ताग्राहारादिग्रामे । गृहे स्वगृहे ।) **तन्त्रान्तरे** ॥ पुण्यक्षेत्रेऽगस्त्यबिल्वतुलस्यश्वत्थसन्निधौ ॥ देवालये नदीतीरे जपः सर्वार्थसिद्धिदः ॥ इति ॥ **कूर्मपुराणे** । गुह्यका राक्षसा भूता हरन्ति प्रसभं फलम् ॥ तस्मादेकान्तदेशे तु नरो जाप्यं समाचरेत् ॥ इति ॥ **मन्त्रमहोदधौ** पुरश्चरणार्थं भूमिपरिग्रहः कूर्मचक्रं चोक्तं तत्तत्रैव द्रष्टव्यम् ॥ चतुर्लक्षात्मकपुरश्चरणे काल उपदेशोक्तो ज्योतिःशास्त्रोक्तो वा ग्राह्यः ॥ एकलक्षात्मकपुरश्चरणे तु शारदनवरात्ररूपकालस्योक्तत्त्वान्न तत्र तद्विचारप्रसक्तिः ॥ तथापि प्रतिपदि वैधृतितिथिक्षयादिसत्त्वे नारम्भः ॥ पुरश्चरणारम्भे व्यतीपातवैधृतितिथिक्षयादिषु सकलकर्मारम्भनिषेधात् ॥ गर्भाधानादिसंस्कारेस्वस्तिवाचनं नान्दीश्राद्धं च कुर्यात् ॥ तदुक्तं **गोभिलेन** । गर्भाधानादिसंस्कारेष्विष्टपूर्तादिकर्मसु ॥ नान्दश्राद्धं पुरा कुर्यात् स्वस्तिवाचनपूर्वकम् ॥ इति ॥ जपादिकर्मणि स्वयमशक्तश्चेदाचार्यं वृणुयात्तअशक्तौ गणपतिपूजनमात्रम् ॥ पुरश्चरणकर्तुर्जपकर्तुराचार्यस्य च शारीरनियमप्रकारः प्रयोगे वक्ष्यते ॥ अथ पुरश्चरणकर्तुर्जपकर्तुराचार्यस्य च शारीरनि-

दम्भरहितः पुरश्चरणमारभेत् ॥ इति ॥ **मन्त्रतन्त्रप्रकाशे** । भूशय्या ब्रह्म-
चर्यं च मौनचर्यानसूयता ॥ नित्यं त्रिषवणस्नानं क्षुरकर्मविवर्जनम् ॥ नित्य-
पूजा नित्यदानं देवतास्तुतिकीर्तनम् ॥ नैमित्तिकार्चनं चैव विश्वासो गुरुदेवयोः
जप्तृनिष्ठा द्वादशैते धर्माः स्युर्मन्त्रासिद्धिदाः ॥ एवमादींश्च नियमान् पुरश्चरण-
कृच्चरेत् ॥ इति ॥ **मन्त्रमहोदधौ** । हविष्यं निशि भुञ्जीत त्रिःस्नाय्यभ्यङ्ग-
वर्जितः ॥ व्यग्रतालस्यनिष्ठीवक्रोधपादप्रसारणम् ॥ स्त्रीशूद्रभाषणं निन्दां
ताम्बूलं शयनं दिवा ॥ परिग्रहं नृत्यगीते कौटिल्यं वर्जयेत्सदा ॥ इति ॥
अथ जपधर्मा वायुसंहितायाम् । उक्तसङ्ख्यं जपं कुर्याद्विलम्बं च त्वरां
विना । देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ॥ यत्सङ्ख्यया समारब्धं
प्रत्यहं तावदेव हि ॥ यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टो भवेन्नरः ॥इति । नवार्ण-
पुरश्चरणे प्रतिदिनं सार्धद्वादशसहस्रसङ्ख्येति सम्प्रदायविदः ॥ युक्तं च तत्
अष्टदिनसाध्ये एकलक्षात्मके नवरात्रकालिकपुरश्चरणजपे प्रतिदिनं तावत्स-
ङ्ख्याया एव प्राप्तत्वात् ॥ आरब्धे पुरश्चरणादिजपे एकमपि दिनं जपवन्ध्यं न
कुर्यात् । यथाह **वैशम्पायनः** ॥ नैरन्तर्यविधिः प्रोक्तो दिनं न व्यति-
लङ्घयेत् ॥ दिवसातिक्रमात्पुंसो मन्त्रसिद्धिर्भवेन्न हि ॥ इति ॥ एतदपवाद-
स्तन्त्रान्तरे ॥ न च दोषो महाराजराजचोराद्युपद्रवे ॥ आशौचे दुर्धरे रोगे
शत्रुषु प्राणसङ्कटे ॥ दिवसातिक्रमे पुंसो न्यूनाधिकजपेऽपि च ॥ इति ॥
नवरात्रगतैकलक्षात्मकपुरश्चरणे तिथिक्षये एकदिने दिनद्वयप्रयुक्तो जपः
वृद्धौ प्रथमदिने क्रमप्राप्तसङ्ख्याको जपः ॥ द्वितियदिने तद्दिनस्य जपव-
न्ध्यत्वदोषपरिहारार्थमष्टोत्तरशतमात्रं जपः । एवं सर्वत्र नियततिथ्यारम्भसमाप्ति-
केषु कर्मसु ज्ञेयम् ॥ इति **सामान्यतः पुरश्चरणादिजपधर्माः** ॥ **अथ जप-
विधानम्** ॥ **शक्तिसङ्गमतन्त्रे** ॥ ऋषिच्छन्दोदैवतानि पठेत्स्तोत्रे समा-
हितः ॥ आद्योपान्तं विना पाठे फलमर्धं प्रकीर्तितम् ॥ तस्मात्सर्वं पठेदङ्गहीने
नाशो हि सर्वथा ॥ स्तोत्रे न दृश्यते यत्र प्रणवं तत्र योजयेत् ॥ स्तोत्रेत्युप-

लक्षणं मन्त्रस्यापि ॥ छन्दोदेवर्षिहीनो यः स तु सुप्तो भुजङ्गमः ॥ अशक्तः शक्तिरहितो निष्फलो बीजवर्जितः अतत्वस्तत्त्ववियुतोऽविनियोगोऽप्रभुर्मतः ॥ न्यासहीनो भवेन्मूको मृतः स्याच्छिरसा विना ॥ इत्यादि ॥ (मन्त्र इति शेषः शिरसा प्रणवेन मन्त्राणां प्रणवः शिर इति वचनात् ।) जप्त्वा अप्यफला मन्त्रा गदिता न्यासमन्तरा ॥ इति च **तन्त्रान्तरे** ॥ **योगियाज्ञवल्क्योऽप्याह** । आर्षं छन्दो दैवतं च विनियोगस्तथैव च ॥ वेदितव्यं प्रयत्नेन लक्षणं तस्य चोच्यते ॥ येन यत् ऋषिणा प्रोक्तं सिद्धिः प्राप्ता च येन च ॥ मन्त्रेण तस्य तत्प्रोक्तमृषिभावस्तदात्मकः ॥ छादनाच्छन्द इत्युक्तं वाससा च चाथ तत्कृते ॥ आत्मा तु छादितो देवैर्मृत्युभीतैस्तु वै पुरा ॥ आदित्यैर्वसुभी रुद्रैस्तेनच्छन्द इतीरितम् ॥ यस्य यस्य च मन्त्रस्य उद्दिष्टा या च देवता ॥ तदाधारम्भवेत्तस्य दैवतं देवतोच्यते ॥ पुरा काले समुत्पन्ना मन्त्राः कर्मार्थमेव च ॥ अनेनैव तु कर्तव्यं विनियोगः स उच्यते ॥ एवं चतुर्विधं प्रोक्तं जपकालेष्वनुस्मरेत् ॥ इति ॥ ऋष्यादिपदानां निरुक्तिरुक्ता **प्रपञ्चसारे** ॥ ऋषिवर्णादिकौ धातू स्तो गत्या प्रापणेन च ॥ यात्याभ्यां यत्स्वरूपंच गुरुःस्यद्दिषवाचकः ॥ इच्छादानार्थकौ धातू द्वौस्तच्छांतश्चदादिकः ॥ तयोरिच्छां ददातीति छन्दो मन्त्रार्णवाचकम् ॥ (छांत इतिइषुगमीति सूत्राभिप्रायेणोक्तम् ॥ आत्मनो देवताभावप्रदानाद्देवतापि च ॥ पदं समस्तमन्त्रेषु विद्वाद्भिः समुदीरितम् ॥ इति ॥ अथ नवार्णस्य ऋष्यादयो **डामरतन्त्रे** ॥ नवाक्षरस्य ऋषयो ब्रह्मविष्णुमहेश्वराः ॥ छन्दांस्युक्तानि मुनिभिर्गायत्र्युष्णिगनुष्टुभः ॥ देव्यः प्रोक्ता महापूर्वाः काली लक्ष्मीः सरस्वती ॥ नन्दाशाकम्भरीभीमाः शक्तयोऽस्य मनोः स्मृताः ॥ स्याद्रक्तदन्तिकादुर्गाभ्रामर्यो बीजसन्ततिः ॥ अग्निवायुभगास्तत्वं फलं वेदत्रयोद्भवम् ॥ (भगः सूर्यः । तत्त्वं तत्त्वानि) ॥ सर्वाभीष्टप्रसिद्धार्थे विनियोग उदाहृतः ॥ इति ॥ **देवीभागवते** आदौ बीजानि पश्चाच्छक्तय

उक्ताः **चण्डिकार्चनरहस्ये** बीजं परशिवं लिङ्गं शेषाः शक्तय ईरिता। इत्युक्तम् ॥ शेषा अष्टमाध्यायोक्ता इति **कल्पवल्लीकारः** ॥ अथास्य ऋष्यादिन्यासो **डामरतन्त्रे** । ऋषिच्छदोदैवतानि शिरोमुखहृदि न्यसेत् ॥ शक्तिबीजानि स्तनयोस्तत्त्वानि हृदये पुनः ॥ इति ॥ शक्तीनां दक्षिणस्तने बीजानां वामस्तने न्यास इति **भास्कररायाः** ॥ देवी भागवतटीकाकारस्त्वेतद्विपर्ययमाह ॥ अत्र विनियोगन्यासस्यानुक्तेर्यावद्वाचनिकं प्रमाणमितिन्यायात्तन्न्यासं केचिन्नेच्छन्ति ॥ अपरे अप्रतिषिद्धमनुमतं भवतीति सामान्यपरिभाषया करसम्पुटे तन्न्यासं कुर्वन्ति ॥ उक्तमुद्राभिस्तत्तत्स्थाने हस्तस्पर्शनद्वारा अमुकाय ऋषये नमः शिरसीत्यादिवाक्योच्चारपूर्वकं तेषां स्थापनभावना न्यासपदार्थः ॥ न्यासमुद्रा **आह्निकप्रकाशे उक्ताः** । ऋष्यादीनां न्यासे शिरःप्रभृतिस्थानान्येवोक्तानि तद्धेतुस्तन्त्रान्तरे ॥ ऋषिर्गुरुत्वाच्छिरसि ध्येयत्वाद्देवता हृदि ॥ छन्दोऽक्षरत्वाद्वदने न्यस्तव्यं मन्त्रवित्तमैः ॥ इति ॥ **प्रपञ्चसारेऽपि** । ऋषिर्गुरुत्वाच्छिरसैवधार्य च्छन्दोऽक्षरत्वाद्रसनाप्रदेशे ॥ धियावगन्तव्यतया सदैव हृदि प्रविष्टा मनुर्देवता च ॥ इति ॥ स्मरणकाले एव अमुकाय ऋषये नमः इत्याद्युच्चार्य तत्तत्स्थानेषु न्यास इत्येके ॥ आदौ सर्वान् प्रथमान्तान् स्मृत्वा ततः न्यासकाले पुनश्चतुर्थीनमोऽन्तानुच्चार्य तत्तत्स्थानेषु न्यसेदित्यन्ये ॥ न्यासे शिरोमुखादिस्थानवाचकपदानां सप्तम्यन्तत्वेनोच्चारः कार्य इत्येके नेत्यन्ये ॥ एवं सर्वत्र ज्ञेयम् ॥ इति **ऋष्यादिन्यासः** ॥ तत एकादशन्यासान् कुर्वीतेष्टफलप्रदानित्युक्तेः सति सम्भवे नित्यार्चाप्रकाशोक्तप्रकारेण ते कार्याः ॥ अशक्तावेक एकादशो न्यास एव कार्यः ॥ ततः ह्रीं चण्डिकायै मन्त्रेण चण्डीस्तवनवार्णयोः ॥ व्यस्तेन च समस्तेन कुर्यादङ्गानि षट् सुधीः ॥ इति **तन्त्रान्तरोक्तेः** चण्डिकामन्त्रेण अङ्गुष्ठादिन्यासं हृदयादिन्यासं च कुर्यात् ॥ **अथ मूलमन्त्रन्यासा** मन्त्र**महोदधौ** ॥ ततः षडङ्गं कुर्वीत विभक्तैर्मूलवर्णकैः ॥ एकेनैकेन चैकेन चतुर्भिर्यु-

गलेन च ॥ समस्तेन च मन्त्रेण कुर्यादङ्गानि षट् सुधीः ॥ इति । (षट् अङ्गानि अङ्गुष्ठादीनि हृदयादीनि च) अङ्गुष्ठादिन्यासे हृदयादिन्यासे च जातयः उक्ता **मन्त्रमहोदधौ** । अङ्गुष्ठाद्यङ्गुलिन्यासे उच्यन्ते जातयः क्रमात् ॥ अङ्गुष्ठाभ्यां नमस्तर्जनीभ्यां नम इतीरयेत् ॥ मध्यमाभ्यां नमोऽनामिकाभ्यां नम इतीरयेत् ॥ कनिष्ठाभ्यां नमश्चेति ततः करतलेति च ॥ उक्त्वाथ करपृष्ठाभ्यां नम एवं वदेद्बुधः ॥ हृदयादिषडङ्गे च प्रोच्यन्ते जातयोऽथ षट् ॥ हृदयाय नमश्चेति शिरसे स्वाहया युतम् ॥ शिखायै वषडन्तं च कवचाय हुमित्यति ॥ नेत्रत्रयाय वौषट् स्यादस्त्राय फडितीरितम् ॥ **इति जातयः** ॥ **मुद्रा आह्निकप्रकाशे** उक्ताः ॥ षडङ्गजात्यर्थः **प्रपञ्चसारे** ॥ हृदयं बुद्धिगम्यत्वात्प्रणामः स्यान्नमः पदम् ॥ क्रियते हृदये न्यासो बुद्धिगम्या नमस्क्रिया ॥ तुङ्गार्थत्वाच्छिरः स्वे स्वे विषयाहरणे द्विठः ॥ शिरो मन्त्रेण चोत्तुङ्गविषयाह्रतिरीरिता ॥ (द्विठ इति स्वाहापदपर्यायः) शिखा तेजः समुद्दिष्टा वषडित्यङ्गमुच्यते ॥ तत्तेजोऽस्य तनुः प्रोक्ता शिखामन्त्रेण मन्त्रिणः ॥ कचग्रहणइत्यस्माद्धातोः कवचसम्भवः ॥ हुं तेजस्तेजसां देहो गृह्यते कवचं ततः ॥ नेत्रं दृष्टिः समुद्दिष्टा वौषट्दर्शनमुच्यते ॥ दर्शनं दृशि येन स्यात्तत्तेजो नेत्रवाचकम् ॥ असुत्रसाविमौ धातू स्तः क्षेपचलनार्थकौ ॥ ताभ्यामनिष्टमाक्षिप्य चालयेत् फट्पदाग्निना ॥ प्रोक्तानीत्यङ्गमन्त्राणि सर्वमन्त्रेषु सूरिभिः ॥ इति ॥ **अथ वर्णन्यासः** ॥ शिखायां नेत्रयोः श्रुत्योर्नसोर्वक्त्रे गुदे न्यसेत् ॥ मन्त्रवर्णान् समस्तेन व्यापकं त्वष्टशश्चरेत् ॥ इति ॥ अत्र नेत्रादिद्वन्द्वेषु दक्षिणादित्वं प्रत्येकं भिन्नभिन्नवर्णन्यासश्च ज्ञेयः । अष्टशो व्यापकं स्वदेहे अष्टदिक्ष्वित्येके । **इति सङ्क्षेपतो न्यासप्रकरणम्** ॥ **अथ न्यासे मुद्राः** ॥ तत्रादौ ऋष्यादिन्यासे ॥ संहतं मध्यमातर्जन्यङ्गुष्ठाग्रत्रयं मुनेः ॥ छन्दसोऽनामिकाङ्गुष्ठकनिष्ठाग्रत्रयं स्मृतं ॥ देवतायाः करतलं पञ्चाङ्गुल्यग्रसङ्गमः ॥ बीजशक्त्योः कीलकस्य

तत्वस्यापि च मुद्रिकाः ॥ ग्रन्थान्तरे व्यत्यस्तहस्ताभ्यां पादयोः स्पर्शः शक्तिमुद्रा । अञ्जलिं प्रसार्य शीर्षादिपादान्तं तेन स्पर्शः कीलकमुद्रेत्युक्तं । विनियोगस्य मुद्रा स्यात् हृदये त्वञ्जलिक्रिया ॥ इति ॥ **अथाङ्गुष्ठादिन्यासे मुद्राः** । तर्जनीपृष्ठसंस्पर्शोऽङ्गुष्ठेनाङ्गुष्ठमुद्रिका ॥ तर्जन्यादिपुरोभागेष्वामूलाग्रं स्पृशिक्रिया ॥ अङ्गुष्ठाग्रेण विज्ञेयास्तर्जन्यादिचतुष्टये ॥ (मुद्रा- इति शेषः) करयोस्तलपृष्ठाभ्यां व्यत्यासेन परस्परम् ॥ सस्पर्शाद्भवतो मुद्रे करयोस्तलपृष्ठयोः ॥ इति ॥ **अथ देव्याः षडङ्गन्यासमुद्राः** ॥ हृद्यङ्गुलि- त्रयं न्यस्येत्तर्जन्यादिद्वयं तु के ॥ (अङ्गुलित्रयं तर्जनीमध्यमानामिकाः) के शिरासि) शिखाप्रदेशे साङ्गुष्ठं दशाङ्गुल्यस्तु वर्माणि ॥ (साङ्गुष्ठं तर्जन्या- दिद्वयं तर्जनीमध्यमाङ्गुष्ठाः । वर्माणि कवचे दशाङ्गुल्यः : दशाङ्गुलीभिः स्कन्धावारभ्य नाभ्यतं स्पर्श इत्यर्थः) हृद्दन्नेत्रं पूर्वमस्त्रं शक्त्यङ्गानां तु मुद्रिकाः ॥ (पूर्वमस्त्रं विष्णुमुद्रासूक्तमित्यर्थः । तच्च । प्रसारिताभ्यां हस्ताभ्यां कृत्वा तालत्रयं सुधीः ॥ छोटिकामुद्रया सर्वाः समंतात् बन्धयेद्दिशः ॥ इत्येवं रूपं ॥ अङ्गुष्ठतर्जनीशब्दो मुद्रा स्याच्छोटिकाह्वया ॥ इति छोटिकामुद्रा ।) वर्णन्यासे तत्त्वमुद्रा योज्या तल्लक्षणं **रामतापनीये** । तर्जन्यङ्गुष्ठयोरग्रे संयोज्यान्यास्तथाङ्गुलीः ॥ तिस्रः प्रसारयेदेषा तत्त्वमुद्रा प्रकीर्तिता ॥ इति ॥ ध्यानश्लोकाः प्रयोगे वक्ष्यन्ते ॥

अथ मानसपूजा ॥ सा च सर्वस्य वस्तुजातस्य पाञ्चभौतिकत्वात्तद्बीजैः पञ्चोपचारसमर्पणरूपा ॥ तत्र पृथिव्या गन्धवत्त्वात्तद्बीजेन लमित्यनेन गन्ध- कल्पना ॥ आकाशस्य कमलपुष्पवाचकपुष्करशब्दवाच्यत्वाल्लक्षितलक्षणया तद्बीजेन हमित्यनेन पुष्पकल्पना ॥ वायोर्गन्धवहत्वात्तद्बीजेन यमित्यनेन धूपस्य । अग्नेः प्रकाशकत्वात्तद्बीजेन रमित्यनेन दीपस्य । अपां मधुररस- त्वात्तद्बीजस्य वमित्यस्यामृतवाचकत्वाच्च नैवेद्यस्य च कल्पनेति सूक्ष्मबुद्धि- भिर्वेदितव्यम् ॥ **इति मानसपूजा** ॥ **अथ जपमाला** ॥ सा चोक्ता **शौन-**

केन ॥ रुद्राक्षैर्विद्रुमैर्वापि स्फटिकैर्वापि कल्पिता ॥ माला ग्राह्या न काष्ठादि-
कल्पिता विफला यतः ॥ इति ॥ तुलसीकाष्ठघटितैर्मणिभिर्जपमालिकेति
रामार्चनचन्द्रिकोक्तिर्वैष्णवविषयेति ज्ञेयम् ॥ **ज्ञानार्णवे** ॥ अकारः प्रथमो
देवि क्षकारोऽन्त्यस्ततः परम् ॥ अक्षमालेति विख्याता मातृका वर्णरूपिणी
॥ इत्यक्षमालोक्ता तत्र अकारादिकारान्तपञ्चाशन्मातृकापङ्क्तौवैकैकवर्णस्य
मणित्वेन कल्पना एवमावृत्तिद्वयेन शतसङ्ख्या सम्पद्यते ॥ क्षकारस्य मेरु-
त्वेन कल्पनान्न तस्य मालामणिषु गणना ॥ **इत्यक्षमाला** ॥ **अथ कर-
माला** ॥ पर्वद्वयमनामिकयाः कनिष्ठादिक्रमेण तु ॥ तर्जनीमूलपर्यन्तं कर-
माला प्रकीर्तिता ॥ अथवा ॥ अनामामूलमारभ्य कनिष्ठादिक्रमेण तु ॥
मध्यमामूलपर्यन्तं करमाला प्रकीर्तिता ॥ **इति करमाला** ॥ इयं विशेषतो
गायत्रीमन्त्रजपे एव ॥ पर्वभिस्तु यजेद्देवीमिति **ब्रह्मयामलोक्तेः** (देवीं
गायत्रीम् ।) अथ मालायां मणिसङ्ख्योक्ता प्रजापतिना ॥ अष्टोत्तरशतं
कुर्याच्चतुःपञ्चाशदेव वा ॥ स्युः सप्तविंशतिर्वापि मणयो नाधिका वराः ॥ इति
॥ कामविशेषेण मणिसङ्ख्याविशेषः, काम्यप्रकरणे वक्ष्यते ॥ **अथ माला-
ग्रथनप्रकारस्तन्त्रान्तरे**। मणिमेकैकमादाय सूत्रे तत्र निवेशयेत् ॥ मुखे मुखं
तु संयोज्य पुच्छे पुच्छं तु योजयेत् ॥ (मुखमग्रभागः । पुच्छं पश्चाद्भागः ।
तयोश्च रुद्राक्षे स्पष्टत्वं अन्यत्राकारभेदात् कल्पना ।) प्रोक्तसङ्ख्यान्यमेकाक्षं
मेरुत्वेनाग्रतो न्यसेत् । (एकाक्षं एकं मणिम्) ॥ एकैकमणिमध्ये तु ग्रन्थि-
मेकं प्रकल्पयेत् ॥ आरोपयेद्धेमसूत्रे राजते ताम्रजेऽपि वा ॥ ग्रथयेत् क्षौमसूत्रे
वा मेरुं सूत्रद्वयं न्यसेत् ॥ इति ॥ **अथ प्रसङ्गान्मालासंस्कार उच्यते** ॥
तन्त्रचिन्तामणौ कुशोदकैः पञ्चगव्यैर्मालां प्रक्षालयेत्सुधीः ॥ अश्वत्थपत्र-
नवके मालां संस्थापयेदथ ॥ मातृकास्तत्र विन्यस्य सद्योजातादिपञ्चभिः ॥
अभिमन्त्र्य ततो मन्त्रैर्मालां सम्यक् प्रपूजयेत् ॥ इति ॥ **उत्तरतन्त्रे** । पुष्करं
शिखिबीजाढ्यं सूक्ष्मसूक्ष्मान्वितं भवेत् ॥ आकाशशशिसंयुक्तं सिद्ध्यै हृदय-

संयुतम् ॥ एवं पञ्चाक्षरो मन्त्रो मालायाः सम्प्रकीर्तितः ॥ ग्रहणे पूजने चैव स्थापने विनियोजयेत् ॥ इति ॥ (अस्यार्थः ॥ पुष्करमाकाशस्तेन हकाररूपमक्षरम् । तच्च शिखिबीजेनाग्निबीजेन रेफेणेत्यर्थः । आढ्यं युक्तम् । सूक्ष्मसूक्ष्मं दीर्घ ईकारस्तेनान्वितम् ॥ पुनराकाशेन शून्येन अनुस्वारेणेत्यर्थः । शशिना अर्धचन्द्राकारचिह्नेन च संयुक्तम् । तेन च ह्रीँ इति बीजं सिद्ध्यति ॥ ततः सिद्ध्यै इति पदेन, हृदयं नमःशब्दस्तेन च संयुतं चेत् । ह्रीँ सिद्ध्यै नमः इति पञ्चाक्षरो मन्त्रो भवति ॥ इति) **अथ मालाप्रार्थन**मन्त्रस्तत्रैव । बीजं गाणपतं पूर्वमुच्चार्य तदनन्तरम् ॥ अविघ्नं कुरु माले त्वां गृह्णामि दक्षिणे करे ॥ जपकाले तु सततं प्रसीद मम सिद्धये ॥ इति ॥ (गाणपतं बीजं गं) **अथैतत्प्रयोगः** ॥ कुशोदकेन पञ्चगव्यैश्च मालां प्रक्षाल्याश्वत्थपत्रनवके संस्थाप्य तस्यामेकपञ्चाशन्मातृकान्यस्य सद्योजातादिपञ्चमन्त्रैरभिमन्त्र्य ॐ ह्रीँ सिद्ध्यै नमः इति मन्त्रेण सम्पूज्य । ॐ गं अविघ्नं कुरु माले त्वामिति प्रार्थयेदिति **मालासंस्कारः** ॥ एवं संस्कृतां मालां जपकाले पूर्वोक्तमन्त्राभ्यामभ्यर्च्य प्रार्थ्य च ॐ महामाले महामाये इति श्लोकमन्त्रेण प्रयोगे वक्ष्यमाणेन दक्षिणकरे आदाय जपेत् ॥ जपे करं वस्त्रेणाच्छादयेत् ॥ तदुक्तं **वृद्धमनुना** ॥ वस्त्रेणाच्छाद्य च करं दक्षिणं यः सदा जपेत् ॥ तस्य स्यात्सफलं जाप्यं तद्धीनमफलं स्मृतम् ॥ इति ॥ अनेनैव हेतुना केनाचिद्बुद्धिमता कल्पिता ऊर्णावस्त्रमयी गोमुखाकारत्वाल्लोके गोमुखीसंज्ञया व्यवह्रियमाणा तिर्यक्पेशी सर्वत्र प्रचरति एतन्मूलक एव यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थं वस्त्राभावे चतुर्थकम् ॥ इति स्मृतेस्त्र्यधिकोपवीतधारिणां शिष्टानां चतुर्थोपवीतस्य वस्त्रप्रातिनिध्यात्, तथा केवलगतानुगतिकव्यवहारमात्रशीलानामज्ञाततत्त्वानां चतुरूनोपवीतधारिणामपि सामान्यब्राह्मणानां च यज्ञोपवीतेन करमावेष्ट्य गायत्रीजपसम्प्रदायः प्रवृत्तः स्यादिति भाति ॥ मालां हृदये धृत्वा जपः कार्यः ॥ तदुक्तं **हरितेन**

॥ मालां तु हृदये धृत्वा मन्त्रं जपति यो नरः ॥ तस्य स्यात्सफलं जाप्यं अन्यथा विफलं भवेत् ॥ इति ॥ जपस्य मानसोपांशुवाचिकभेदेनोत्तममध्यमाधमत्वं मानसादिजपलक्षणं चाह **विश्वामित्रः** ॥ उत्तमं मानसं जाप्यं स्यादुपांशु च मध्यमम् ॥ अधमं वाचिकं प्राहुः सर्वमन्त्रेषु पण्डिताः ॥ धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम् ॥ शब्दार्थं चिन्तयन्कुर्यात्स जपो मानसः स्मृतः ॥ नान्येन सन्निधिस्थेन श्रूयते स उपांशुकः ॥ उच्चैः स्पष्टाक्षरैर्यस्तु स जपो वाचिकः स्मृतः ॥ इति जपे मानसादिभेदेनाङ्गुल्य उक्ता **नृसिंहपरिचर्यायाम्** ॥ अनामामध्यमाक्रम्य जपं कुर्यात्तु मानसम् ॥ मध्यमामध्यमाक्रम्य जपं कुर्यादुपांशुकम् ॥ तर्जनीमध्यमाक्रम्य जपं कुर्यात्तु वाचिकम् ॥ इति ॥ **मेरुलङ्घने** जपस्य वैफल्यमाह **गौतमः** ॥ मेरोश्च मेरुपर्यन्तं परिवर्त्य पुनः पुनः ॥ जपे न लङ्घयेन्मेरुं लङ्घिते न फलं भवेत् ॥ इति ॥ गणयेज्जपमव्यग्रो न फलं गणनां विना ॥ इति । **शातातपोक्ते**र्जपस्य गणनावश्यं कर्तव्या ॥ जपकालमालापतनादौ प्रायश्चित्तमुक्तं **कपिलपञ्चरात्रे** ॥ प्रमादात्पतिते सूत्रे प्रक्षाल्य च पुनर्जपेत् ॥ जपमध्ये क्षुते निद्राजृम्भाधःपवनादिके ॥ तथा नीचादिदृष्टौ च आचम्य प्रयतो भवेत् । (प्रयतः पवित्रः) । आचमनासम्भवे ॥ विप्रस्य दक्षिणे कर्णे सन्ति तीर्थानि देवताः ॥ इत्युक्तेः दक्षिणकर्णस्पर्शः कार्यः ॥ जपान्तराले चोत्थाने षडङ्गं विन्यसेत् पुनः ॥ इति ॥ **अथ जपान्ते कर्तव्यमाह पराशरः** ॥ त्वं माले सर्वदेवानां प्रीतिदा शुभदा यतः ॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥ इति मालां च सम्प्रार्थ्य निदध्यान्मस्तकोपरि ॥ देवं नत्वा च मन्त्रस्य षडङ्गं न्यासमाचरेत् ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वर ॥ यज्जप्तं हि मया देव परिपूर्णं तदस्तु मे ॥ इति प्रार्थ्य ततो देव्या वामहस्तेऽर्पयेज्जलम् ॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इतिभावनया चैव देवहस्ते जलं त्यजेत् ॥ इति ।

अत्र देवतायाः स्त्रीत्वात्तद्वाचकपदानां स्त्रीलिङ्गत्वेनोहः कार्यः ॥ एवं पुरश्चरणं
जपसमाप्तिपर्यन्तं प्रत्यहं कृत्वाऽन्ते जपदशांशतो होमं कुर्यात् ॥ तदाह
नारदः ॥ जपपूर्तौ निजैर्द्रव्यैर्जपसङ्ख्यादशांशतः ॥ यथोक्तकुण्डे जुहुया-
द्यथाविधि समाहितः ॥ अथवा प्रत्यहं जप्त्वा जुहुयात्तद्दशांशतः ॥ लक्षे
लक्षेऽथवा होमस्त्रिविधा होमपद्धतिः ॥ इति ॥ कुण्डप्रमाणादिकं अग्रे होम-
प्रकरणे वक्ष्यते ॥ होमद्रव्यं पायसम् ॥ पायसान्नेन जुहुयात्पूजिते हेमरेत-
सीति पूर्वोक्तवचनात् ॥ तल्लक्षणं **नैमित्तिकार्चाप्रकाशे** नवरात्रहोमप्रकरणे
उक्तम् ॥ होमप्रयोगोऽग्रे वक्ष्यते ॥ **अथ तर्पणमार्जनादिकं मन्त्रमहोदधौ**
॥ अथ होमं समाप्यान्ते तर्पयेद्देवतां जले ॥ आवाह्य तद्दशांशेन मार्जनं तद्द-
शांशतः ॥ तर्पयामि नमश्चेति द्वितीयान्तेष्टपूर्वकम् ॥ मूलान्ते तु पदं देयं
सिञ्चामीति तु मार्जने ॥ इति ॥ एतत्प्रयोगे स्फुटीभविष्यति ॥ तर्पणं दुग्धेन
जलेन वा कार्यं मार्जनं तु जलेनैव ॥ ततो नानाविधैरन्नैस्तर्पयेद्द्विजसत्तमान् ॥
इष्टरूपान् सदाचारान् दशांशेन तु मार्जनात् ॥ न्यूनं सम्पूर्णतां याति ब्राह्म-
णाराधनान्नृणाम् ॥ देवताश्च प्रसीदन्ति सम्पद्यन्ते मनोरथाः ॥ इति ॥
तर्पणमार्जनयोः कृताकृतत्वात्तदकरणे होमदशांशतो ब्राह्मणभोजनम् ॥ ब्राह्म-
णान् भोजयेद्धोमदशांशेन सुरेश्वरीति **कात्यायनीतन्त्रवचनात्** ॥ नवार्ण-
पुरश्चरणे कुमारीपूजनभोजनमावश्यकम् ॥ तद्विधिर्नवरात्रप्रकरणे प्रागुक्तः ॥
इति चतुर्लक्षात्मकैकलक्षात्मके नवार्णपुरश्चरणे ॥ अथैतदशक्तावन्योऽपि प्रकारो
मन्त्रमहोदधौ ॥ यद्वा समुद्रगामिन्यां नद्यामिन्दुरविग्रहे ॥ स्पर्शान्मोक्षान्त-
माजप्य जुहुयात्तद्दशांशतः ॥ विप्रान् सम्भोज्य नानान्नैर्मन्त्रसिद्धिमवाप्नुयात् ॥
पुरश्चरणमेतद्धि सर्वमन्त्रेषु भाषितम् ॥ इति ॥ नात्र जपसङ्ख्यानियमः ॥
स्पर्शान्मोक्षान्तं यावान् जपो भवति तावज्जपात्मकमेवैतत्पुरश्चरणम् ॥ तर्पण-
मार्जनयोः कृताकृतत्वान्नात्र तयोरुक्तिः॥ ब्राह्मणभोजनं होमदशांशतोऽर्थात्सि-
द्धम् ॥ **इति नवार्णमन्त्रपुरश्चरणविधानम्** ॥

अथैतत्प्रयोगः ॥ साधक उक्तदिने कृतमङ्गलस्नानः सतिलकः पवित्रपाणिः स्मृत्युक्तविधिनाचम्य प्राणानायम्य सुमुखश्चैकदन्तश्चेत्यादिमङ्गलपद्यादि पठित्वा देशकालौ सङ्कीर्त्य नवार्णमन्त्रसिद्धिकामोऽहं नवार्णमन्त्रस्य चतुर्लक्षात्मकं पुरश्चरणं करिष्ये ॥ एकलक्षात्मके तथोहः कार्यः ॥ तदङ्गत्वेन स्वस्तिपुण्याहवाचनं नान्दीश्राद्धं मातृकापूजनं च करिष्ये इति सङ्कल्प्य स्वस्तिवाचनादि कृत्वा । अशक्तौ गणपतिपूजनमात्रं सङ्कल्प्य कृत्वा च स्वस्य जपाद्यशक्तावाचार्यं वृणुयात् तद्यथा ॥ ब्राह्मणं मधुपर्कादिना यथाविभवं सम्पूज्य अमुकवेदस्यामुकशाखाध्यायी अमुकप्रवरान्वितामुकगोत्रोऽमुकशर्मा यजमानोऽहम् । अमुकवेदस्यामुकशाखाध्यायिनममुकप्रवरान्वितामुकगोत्रममुकशर्माणं ब्राह्मणं त्वां अस्मिन् अमुकलक्षात्मके नवार्णपुरश्चरणे जपाद्यर्थमाचार्यत्वेन वृणे ॥ इति पूगफलं दत्वा ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथात्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥ इति प्रार्थ्य तस्मै पूजाजपाद्यर्थं पूजासामग्रीमासनजपमालादिकं च दद्यत् ॥ ततो जपकर्ता आचार्यश्चेत् प्रथमदिने आचमनादिदेशकालसङ्कीर्तनान्ते, यजमानेन वृतोऽहं तदाज्ञया नवार्णपुरश्चरणकर्म करिष्ये ॥ इति पृथक्सङ्कल्पं कुर्यात् ॥ एवं वक्ष्यमाणेषु सर्वकर्मस्वाचार्यकर्तृकत्वे पृथक्सङ्कल्प आवश्यकः । ततो जपकर्ता (यजमान आचार्यो वा) प्रतिदिनं नित्यार्चोक्तक्रमेणाचमनादिदेशकालसङ्कीर्तनान्ते श्रीमहाकालीमहालक्ष्मीमहासरस्वतीरूपत्रिगुणात्मकादिशक्तिश्रीचण्डिकाप्रीत्यर्थं नवार्णपुरश्चरणान्तर्गतं सार्धद्वादशसहस्रसङ्ख्याकं नवार्णजपं करिष्ये । तदङ्गत्वेन चण्डिकापूजां करिष्ये इति सङ्कल्प्य नित्यार्चोक्तप्रकारेण पूजां कुर्यात ॥ अशक्तौ नित्यार्चोक्तविधिना आसनोपवेशनं भूतोत्सारणं दीपस्थापनं च कृत्वा ॥ चण्डिकापञ्चाक्षरमन्त्रस्य ब्रह्मा ऋषिः । श्रीचण्डिकादेवता । गायत्रीच्छन्दः । न्यासे विनियोगः ॥ ॐ ह्रीं अङ्गुष्ठाभ्यां नमः । ॐ चं तर्जनीभ्यां नमः । ॐ डिं मध्यमाभ्यां नमः । ॐ कां अनामिकाभ्यां

नमः । ॐ यैं कनिष्ठिकाभ्यां नमः । ॐ ह्रीं चण्डिकायै करतलकरपृष्ठाभ्यां
नमः ॥ ॐ ह्रीं हृदयाय नमः । ॐ चं शिरसे स्वाहा । ॐ डिं शिखायै वषट्
ॐ कां कवचाय हुम् । ॐ यैं नेत्रत्रयाय वौषट् । ॐ ह्रीं चण्डिकायै
अस्त्राय फट् ॥ इति न्यासं कृत्वा ॥ तप्तस्वर्णविभूषणां भगवतीं बालार्क-
तुल्यद्युतिं बीजापूरगदे च खेटकसुधापात्रे करैर्बिभ्रतीम् ॥ नागं लिङ्गमहिं
च मूर्ध्नि दधतीं भास्वत्किरीटोज्ज्वलां सर्वाद्यां त्रिगुणात्मिकामिह महालक्ष्मीं
हृदा चिन्तये ॥ इति ध्यात्वा श्रीचण्डिकायै नमः लं पृथिव्यात्मकान् गन्धान्
कल्पयामि ॥ श्रीचण्डिकायै नमः हं आकाशात्मकानि पुष्पाणि कल्पयामि ॥
श्रीचण्डिकायै नमः यं वाय्वात्मकं धूपं कल्पयामि ॥ श्रीचण्डिकायै नमः
रं अग्न्यात्मकं दीपं कल्पयामि ॥ श्रीचण्डिकायै नमः वं अमृतात्मकं
नैवेद्यं कल्पयामीति मानसोपचारैः सम्पूज्य नमो देव्यै महादेव्यै इतिश्लोक-
मन्त्रेण योनिमुद्रया नमस्कुर्यात् ॥ योनिमुद्रालक्षणमाह्निकप्रकाशे उक्तम् ॥
ततः । नवार्णमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभश्छ-
न्दांसि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ नन्दाशाकम्भरी-
भीमाः शक्तयः ॥ रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि ॥ अग्निवायुसूर्यास्तत्त्वानि ॥
वेदत्रयपाठफलावाप्तिपूर्वकसर्वेष्टसिद्ध्यर्थे जपे विनियोगः ॥ अथ ऋष्यादिन्यासः
॥ ब्रह्मविष्णुमहेश्वरेभ्य ऋषिभ्यो नमः शिरसि गायत्र्युष्णिगनुष्टुब्भ्यश्छ-
न्दोभ्यो नमो मुखे ॥ महाकालीमहालक्ष्मीमहासरस्वतीभ्यो देवताभ्यो नमो हृदये
॥ नन्दाशाकम्भरीभीमाभ्यः शक्तिभ्यो नमो दक्षिणस्तने ॥ रक्तदन्तिकादुर्गा-
भ्रामरीभ्यो बीजेभ्यो नमो वामस्तने ॥ अग्निवायुसूर्येभ्यस्तत्त्वेभ्यो नमः पुन-
हृदये ॥ वेदत्रयपाठफलावाप्तिपूर्वकसर्वाभीष्टसिद्ध्यर्थे जपे विनियोगाय नमः
करसम्पुटे ॥ इति अर्चाप्रकाशोक्ताभिस्तत्तन्मुद्राभिस्तत्तत्स्थानेषु ऋष्यादीन्
न्यस्य । नित्यार्चाप्रकाशोक्तप्रकारेण एकादशन्यासान् कुर्यादशक्तौ केवल-
मेकादशमेकमेव कुर्यात् ॥ ततः प्रागवच्चण्डिकापञ्चाक्षरमन्त्रेणाङ्गुष्ठादि षडङ्ग

हृदयादिषडङ्गं च कुर्यात् ॥ अथ मूलमन्त्रन्यासः ॥ ॐ ऐं अङ्गुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ क्लीं मध्यमाभ्यां नमः ॥ ॐ चामुण्डायै अनामिकाभ्यां नमः ॥ ॐ विच्चे कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः ॥ ॐ ऐं हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ क्लीं शिखायै वषट् ॥ ॐ चामुण्डायै कवचाय हुम् ॥ ॐ विच्चे नेत्रत्रयाय वौषट् ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट् ॥ इत्यङ्गुष्ठहृदयादिन्यासौ ॥ अथ वर्णन्यासः ॥ ॐ ऐं नमः शिखायाम् ॥ ॐ ह्रीं नमो दक्षिणनेत्रे ॥ ॐ क्लीं नमः वामनेत्रे । ॐ चां नमः दक्षिणकर्णे । ॐ मुं नमः वामकर्णे । ॐ डां नमः दक्षिणनासापुटे ॥ ॐ यैं नमः वामनासापुटे ॥ ॐ विं नमः मुखे ॥ ॐ च्चें नमः गुदे ॥ इति ॥ ततः समस्तमन्त्रेण स्वङ्गेऽष्टवारं व्यापकं कुर्यात् ॥ इति न्यासविधानम् ॥ अथ ध्यानानि ॥ खड्गं चक्रगदेषुचापपरिघञ् शूलं भृशुण्डीं शिरः शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ॥ नीलास्यद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौच्छयिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥ १ ॥ अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुःकुण्डिकां दण्डं शक्तिमसिं च चर्मजलजं घण्टां सुधाभाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजोद्भवाम् ॥ २ ॥ घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥३॥ इति ध्यात्वा ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः लं पृथिव्यात्मकान् गन्धान् कल्पयामीत्यादिप्रकारेण प्राग्वत् महाकालीमहालक्ष्मीमहासरस्वतीर्मानसोपचारैः सम्पूज्य ॥ ॐ ह्रीं सिद्ध्यै नमः इति मन्त्रेण मालां गन्धपुष्पैरभ्यर्च्य । ॐ महामाले महामाये चतुर्वर्गस्वरूपिणि ॥ चतु-

र्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ इति मालां दक्षिणकरेणादायवस्त्रेणाच्छाद्य हृदये धृत्वा वक्ष्यमाणं मन्त्रार्थं स्मरन् नवार्णं सार्धद्वादशसहस्रसङ्ख्यं जपेत् ॥ जपान्ते प्रणवमुक्त्वा । ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा यतः ॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥ इति मालां शिरसाभिवाद्य यथास्थानं स्थापयेत् ॥ ततः ॐ ऐं हृदयाय नमः । ॐ ह्रीं शिरसे स्वाहा । ॐ क्लीं शिखायै वषट् ॥ ॐ चामुण्डायै कवचाय हुम् ॥ ॐ विच्चे नेत्रत्रयाय वौषट् । ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट् ॥ इत्युत्तरषडङ्गं कृत्वा । अञ्जलिं बध्वा ॥ अज्ञानाद्विस्मृतेर्भ्रान्तेर्यन्न्यूनमाधिकं जपे ॥ विपरीतं च यदभूत्तत् क्षमस्व महेश्वरि ॥ बिन्दुमात्राविसर्गार्णपदवाक्येषु यज्जपे ॥ व्यत्यासन्यूनताधिक्यमभवत्तत्क्षमस्व मे ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यज्जप्तं हि मया देवि परिपूर्णं तदस्तु मे ॥ इति प्रार्थ्य । गुह्यातिगुह्यगोप्त्री त्वं गृहाण मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ इति भावनया देव्या वामकरे जलमर्पयेत् ॥ ततो दीपं निर्वाप्यासनादुत्थाय । आसनदेवताभ्यो नम इति नमस्कृत्य आसनमपसार्य तत्स्थाने शान्तिरस्त्विति जलमासिच्य क्षमायै नमः इति आसनभुवं नत्वा द्विराचामेत् ॥ ततः कुमारीपूजनभोजनादि कृत्वा स्वयं हविष्यादिना वर्तेत ॥ एवं पुरश्चरणसर्वजपसमाप्तिपर्यन्तं प्रतिदिनं कृत्वा सर्वजपसमाप्तौ होमप्रकाशोक्तप्रकारेण जपदशांशतः पायसेन होमं सम्पाद्य नवरात्रोक्तप्रकारेण बलिं दत्वा कर्म समापयेत् ॥ ततस्तद्दिनेऽन्यदिने वा आचमनादिदेशकालसङ्कीर्तनान्ते पुरश्चरणाङ्गत्वेन होमदशांशतस्तर्पणं करिष्ये ॥ इति सङ्कल्प्य ऋष्यादिस्मरणन्यासध्यानमानसपूजनानि कृत्वा मूलमन्त्रान्ते श्रीमहाकालीमहालक्ष्मीमहासरस्वतीस्तर्पयामि ॥ इति दुग्धेन जलेन वा होमदशांशतस्तर्पणं कृत्वा । तर्पणसमाप्त्यनन्तरं तद्दिनेऽन्यदिने वा पूर्ववदाचमनादिदेशकालसङ्कीर्तनान्ते । नवार्णपुरश्चरणाङ्गत्वेन तर्पणदशांशतो मार्जनं

करिष्ये इति सङ्कल्प्य नवार्णस्य ऋष्यादिस्मरणन्यासध्यानमानसपूजनानि कृत्वा मूलमन्त्रान्ते आत्मानमभिषिञ्चामीति तर्पणदशमांशतो जलेनात्मानमभिषिञ्चेत् ॥ प्रत्यक्षहोमाद्यशक्तौ पुरश्चरणस्य समग्रजपसमाप्त्यनन्तरं यथासम्भवं तद्दिनेऽन्यदिने वा आचमनादिदेशकालसङ्कीर्तनान्ते मया कृतस्य पुरश्चरणजपस्य साङ्गतासिद्ध्यर्थं होमतर्पणमार्जनानि जपादिदशमांशसङ्ख्याद्विगुणजपप्रत्याम्नायेनाहमाचरिष्ये ॥ इति सङ्कल्प्य ऋष्यादिस्मरणन्यासध्यानमानसपूजापूर्वकमेकासने अविच्छेदेनैव होमादिमार्जनान्तंकर्मप्रत्याम्नायजपं तन्त्रेण कृत्वा असम्भवे भिन्नभिन्नदिने पृथक् पृथक् कृत्वा समासौ यथाशक्ति कुमारीपूजनभोजनं मार्जनदशमांशतो ब्राह्मणसुवासिनीभोजनं च कुर्यात् ॥ मतान्तरेण तर्पणमार्जनाकरणपक्षे होमदशमांशतो ब्राह्मणभोजनमिति प्रागुक्तमेव ॥ स्वस्याशक्तौ जपादिमार्जनान्तं सर्वमाचार्यद्वारा कुर्यात् ॥ तत्पक्षे कृतस्य कर्मणः श्रेयोदानमाचार्यः, प्रतिग्रहं च यजमानः कुर्यात् तद्यथा ॥ आचार्य आचमनादि कृत्वा मया यजमानाज्ञया कृतस्य पुरश्चरणजपादिकर्मणस्तस्मै श्रेयोदानं करिष्ये इति सङ्कल्प्य यजमानं गन्धादिभिरभ्यर्च्य भवन्नियुक्तेन मया यत्कृतं नवार्णपुरश्चरणजपहोमादिकर्म तदुत्पन्नं श्रेयस्तुभ्यमहं सम्प्रददे न मम ॥ इत्युक्त्वा यजमानहस्ते सोदकं पूर्वगृहीतं पूगफलं दद्यात् ॥ ततो यजमानस्तस्मै जपाद्यनुसारेण दक्षिणां दत्त्वा नवरात्रोक्तविधिना यथाशक्ति कुमारीः सम्पूज्य ताभिः सह ब्राह्मणसुवासिनीश्च भोजयित्वा दक्षिणाताम्बूलादि दत्त्वा स्वयं भुक्त्वा गृहीतनियमांस्त्यजेत् ॥ इति नवार्णमन्त्रस्य चतुर्लक्षैकलक्षात्मकपुरश्चरणयोः सङ्क्षेपेण प्रयोगः ॥ एवमुक्तस्वरूपविस्तृतपुरश्चरणाशक्तौ सूर्यग्रहे चन्द्रग्रहे वा पूर्वदिने उपोषितः ग्रहणदिने स्पर्शात्पूर्वं स्नानादि विधाय महानद्यादौ पुण्यस्थाने आचम्य प्राणानायम्य आसनादिविधिं कृत्वा देशकालौ सङ्कीर्त्य नवार्णमन्त्रसिद्धिकामोऽहं राहुग्रस्ते दिवाकरे, निशाकरे इति वा यथासम्भवमुक्त्वा चण्डीनवार्णमन्त्रस्य स्पर्शादिमोक्षान्त-

जपरूपं पुरश्चरणं करिष्ये इति सङ्कल्प्य ॥ स्पर्शात्पूर्वमेव नवार्णमन्त्रस्य ऋष्यादिस्मरणन्यासध्यानमानसपूजनादि कृत्वा जपमारभेत् ॥ ततो मोक्षपर्यन्तमविच्छेदेन जपं कृत्वा स्पर्शादिमोक्षान्तं यावान् जपो भवति तावन्तं दशांशहोमार्थं गणयित्वा मोक्षानन्तरं उत्तरन्यासजपनिवेदनादिकं कुर्यात् ॥ पुरश्चरणकर्तुर्ग्रहणकालिकस्नानादिकं तत्प्रतिनिधिः भार्यापुत्रादिः कुर्यात् ॥ तत्सङ्कल्पादिकं **धर्माब्धिसारादौ** द्रष्टव्यम् ॥ द्वितीयदिने नित्यकर्मानन्तरं आचम्य प्राणानायम्य देशकालौ स्मृत्वा । मया कृतस्य ग्रहणकालिकनवार्णपुरश्चरणजपस्य साङ्गतासिद्ध्यर्थं होमादि करिष्ये इति सङ्कल्प्य पूर्वोक्तप्रकारेण तत्तद्दशांशतः साक्षात्प्रत्याम्नायेन वा कृत्वा यथाविधिकुमारीपूजनभोजनब्राह्मणसुवासिनीभोजनादिकं कुर्यात् ॥ इदं पुरश्चरणं ग्रस्तोदये ग्रस्तास्ते च स्पर्शमोक्षयोः प्रत्यक्षदर्शनाभावान्न सम्भवति ॥ **इति ग्रहणकालिकपुरश्चरणम् ॥ इति नवार्णपुरश्चरणप्रकरणम् ॥** एवं नवार्णपुरश्चरणेन सिद्धस्य नवार्णमन्त्रस्य जपफलं **चण्डिकार्चनरहस्ये** ॥ नवबीजनि-

बद्धोऽयं मन्त्रस्त्रैलोक्यपावनः ॥ एनं जपति यो मन्त्री फलं तस्य वदाम्यहम् ॥
वश्या भवन्ति कामिन्यो राजानोऽनुचरा इव ॥ न हस्तिसर्पदावाग्निचोरशत्रुभयं
भवेत् ॥ सर्वाः सम्पत्तयस्तस्य जायन्ते चण्डिकाज्ञया ॥ नश्यन्ति दारुणा रोगाः
सत्यं सत्यं न संशयः ॥ जपतां शुद्धचित्तेन धर्मकामार्थमोक्षदः ॥ सहस्रमस्य
मन्त्रस्य नवबीजस्य यो जपेत् ॥ नाभिमात्रे जले स्थित्वा स कवित्वं लभेत्
ध्रुवम् ॥ अयुतं नवबीजस्य भानुमालोक्य यो जपेत् ॥ ब्रह्महत्यादिपापेभ्यो
मुच्यते नात्र संशयः ॥ एकलक्षं जपेद्यस्तु सम्प्राप्ते शत्रुसङ्कटे ॥ ततः सद्यो
विमुच्येत पलायन्ते च शत्रवः ॥ नियुतं नववर्णस्य राजबन्धनसङ्कटे ॥
जपेदाशु विमुच्येत चण्डिकायाः प्रसादतः ॥ कोटिसङ्ख्यजपे सद्यः
क्षयरोगाद्विमुच्यते ॥ दशकोटिजपे साक्षादाविर्भवति चण्डिका ॥ इति ॥

इति चण्डिकोपास्तिदीपिकायां जपप्रकाशे नवार्णमन्त्रजपप्रकरणम् ॥

अथ देवीमाहात्म्यजपप्रकरणम् ।

अथ देवीमाहात्म्यजपप्रकरणम् ॥ तत्र देवीमाहात्म्यं नाम मार्कण्डेयपुराणान्तर्गत एकाशीतितमाध्यायमारभ्य त्रिणवत्यध्यायान्तं त्रयोदशभिरध्यायैः परिच्छिन्नः कात्यायनीतन्त्रमतेन मार्कण्डेय उवाचेत्यादिसप्तपञ्चाशद्गद्यसम्मिश्रः सावर्णिः सूर्यतनय इत्याद्यष्टसप्तत्यधिकपद्यपञ्चाशत्यात्मकश्चण्डिकामहिमप्रतिपादको ग्रन्थविशेषः ॥ अस्य मकारादिर्नुकारान्तो मनुः परमदुर्लभः ॥ इति कात्यायनीतन्त्रवचनान्मार्कण्डेयउवाचेत्येवंरूपसर्वादिमगद्यारम्भीयमकारस्य सावर्णिर्भवितामनुरिति सर्वान्तिमश्लोकचतुर्थपादान्त्यनुकारेण सह प्रत्याहारात्पाठविषये एकमन्त्रात्मकत्वेऽपि तत्रैव होमाद्यर्थे सप्तशतधा विभजनात्सप्तशतीसंज्ञया व्यवहारः ॥ तदप्युक्तं तत्रैव मन्त्रविभागमुक्त्वान्ते ॥ एवं त्रयोदशाध्यायैर्होमपूजनतृप्तिषु ॥ शतानि सप्तसङ्ख्यानि तव प्रोक्तानि शैलजे ॥ इति ॥ **मेरुतन्त्रे** त्वस्य प्रथमचरिते मारणमोहनादयो नवतिः प्रयोगाः ॥ मध्यमचरिते उच्चाटनस्तम्भनयोः शतद्वयम् ॥ उत्तमचरिते विद्वेषवशीकरणयोर्दशाधिकचतुःशतं सन्तीति सप्तशतप्रयोगाश्रयत्वात्सप्तशतीसंज्ञेत्युक्तम् ॥ अथान्यान्यप्यस्य नामान्युक्तानि तन्त्रान्तरे ॥ चारित्रत्रयजाप्यस्य चण्डिकाया महेश्वरि ॥ सरहस्यस्य नामानि ब्रह्मोक्तानि वदाम्यहम् ॥ महाविद्या महामन्त्रो देवीमाहात्म्यमित्यपि ॥ चरितत्रितयं चण्डीस्तवःसप्तशतीति च ॥ महास्तोत्रं च दुर्गेति तथा चण्डीति चोच्यते ॥ एतानि नवनामानि यो जानाति नराधिप ॥ जपं विना भवेच्चण्डीस्तवजाप्यफलं ध्रुवम् ॥ इति ॥ अत्र दुर्गेति चण्डीति च देव्या एव नामनी देवतामन्त्रयोरभेदाच्चण्डीस्तवे प्रयुक्ते । तेन नवदुर्गानवचण्डीत्यादयः सप्तशतीजपात्मककर्मविशेषसंज्ञाः समुत्पन्ना इति ध्येयम् ॥ अस्य वेदवदनादिसिद्धत्वमुक्तं **भुवनेश्वरीसंहितायाम्** ॥ यथा वेदो ह्यनादिस्स्यात्तथा स्तवस्यास्य महादेवी कर्ता कश्चिन्न विद्यते ॥

सप्तशतीस्तवः ॥ इति ॥ **मार्कण्डेयपुराणे**ऽपि । अनादिसिद्धमेतद्धि पुरा प्रोक्तं स्वयम्भुवा ॥ मार्कण्डेयाय मुनये तदिदं कथितं तव ॥ इति जैमिनिं प्रति धर्मपक्षिभिरुक्तम् ॥ **लक्ष्मीतन्त्रे**ऽपि । विश्वैश्वर्यादिकं सूक्तं यद् दृष्टं ब्रह्मणा पुरा ॥ देव्या ययादिकं सूक्तं दृष्टं देवैर्महर्षिभिः ॥ नमो देव्यादिकं सूक्तं दृष्टं देवैस्तथर्षिभिः ॥ नारायणीस्तुतिर्नाम सूक्तं परमशोभनम् ॥ अमुष्याः स्तुतये दृष्टं ब्रह्माद्यैः सकलैः सुरैः ॥ इति देवीमाहात्म्यान्तर्गतस्तोत्राणां दृष्टशब्दप्रयोगेणैतदेव ज्ञापितम् ॥ अस्य पुराणस्थत्वात् स्वमुखतः पठने शूद्राणां नाधिकारः ॥ उक्तं च **कालिकापुराणे** ॥ कामान्मोहाच्च वा शूद्रः पुराणं संहितां स्मृतिम् ॥ पठन्नरकमाप्नोति पितृभिः सहपापकृत् ॥ इति ॥ शूद्राणामिति वेदानधिकारिणामुपलक्षणम् ॥ तेन द्विजस्त्रीणामपि नाधिकार इति ज्ञेयम् ॥ अथास्य महिमा **वाराहीतन्त्रे** ॥ यथाश्वमेधः क्रतुषु देवानां च यथा हरिः ॥ स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ॥ नानेन सदृशं स्तोत्रं पवित्रमिह विद्यते ॥ भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ॥ इति **देवीभागवते** च ॥ नानेन सदृशं स्तोत्रं विद्यते भुवनत्रये ॥ धर्मार्थकाममोक्षाणामालयं जपतां नृणाम् ॥ इति ॥ अथास्य पुरश्चरणं **मरीचिकल्पे** ॥ कृष्णाष्टमीमवष्टभ्य यावत् कृष्णचतुर्दशी ॥ वृध्द्यैकोत्तरया जाप्यं साङ्गं सम्पुटितं तु तत् ॥ एवं देवि मया प्रोक्तः पौरश्चरणिकः क्रमः ॥ तदन्ते हवनं कुर्यात्प्रतिश्लोकेन पायसम् ॥ इति ॥ एतत्पुरश्चरणारम्भस्याष्टम्यां विशेषत उक्तत्वात्तिथिविषये शुभाशुभत्वविचारो न करणीयः इतरांशविषये तु करणीय एव ॥ तेनाष्टम्यां सङ्क्रान्तिव्यतिपातवैधृतिभद्राक्षयवृध्द्यादिसत्त्वे आरम्भो न कार्यः ॥ अन्येऽपि सर्वे नियमा नवार्णपुरश्चरणवत् ज्ञेयाः ॥ स्वस्तिवाचननान्दीश्राद्धाचार्यवरणादि च पूर्ववदेव ॥ **अथास्य शापोद्धारोत्कीलनविचारः वाराहीतन्त्रे** । सर्वेषां स्तोत्राणां परशुरामशापमुक्त्वा " भीष्मपर्वणि या गीता सा प्रशस्ता कलौ युगे ॥ विष्णोर्नामसहस्राख्यं महाभारतमध्यगम् ॥ गजेन्द्र-

मोक्षणं चैव तथा कारुण्यकस्तवः। (कारुण्यकस्तवो भीष्मकृतश्रीकृष्णस्तवः।) देव्याः सप्तशतीस्तोत्रं शैवं नामसहस्रकम् ॥ इत्यादीनि तच्छापरहितानि कानि चित् परिगणय्य भार्गवाख्येन रामेण शप्तान्यन्यानिकारणादित्युपसंहृतम् ॥ तन्मध्ये चण्ड्याः सप्तशतीस्तोत्रस्य परिगणितत्वात् न शापोद्धारप्रसङ्गः ॥ **रहस्यतन्त्रे** शिवकृतकीलनदर्शनेऽपि तत्रैव तत्प्रतिविधायकतया दानप्रतिग्रहाख्यकर्मविशेषस्योक्तत्वान्नोत्कीलनस्यापि ॥ तथापि **कात्यायनीतन्त्रे** पुरश्चरणप्रकरणे, त्रयोदशप्रथमौ । द्वादशद्वितीयौ । एकादशतृतीयौ । दशमचतुर्थौ । नवमपञ्चमौ । अष्टमषष्ठौ । इति क्रमेण द्वादशाध्यायान् पठित्वा सप्तमं द्विः पठेत् ॥ इति शापोद्धारस्य। आदौ मध्यमचरित्रं ततः प्रथमं पश्चात्तृतीयं पठेदित्येवं रूपस्योत्कीलनस्य च प्रयोगोक्तेस्तयोः पुरश्चरणमात्राङ्गत्वात्पुरश्चरणारम्भे ते कर्तव्ये ॥ अन्ये त्वनयोः सप्तशत्यङ्गत्वं मत्वा वक्ष्यमाणार्गलास्तोत्रपाठेन शापोद्धारस्य कीलकपाठेन चोत्कीलनस्य सिद्धिमाहुः ॥ तदनुरोधेनैव केचिदर्गलास्तोत्रानन्तरं, ॐ ह्रीं क्लीं श्रीं क्रां क्रीं चण्डिके देवि शापानुग्रहं कुरु कुरु स्वाहेति द्वाविंशत्यक्षर्याः पुस्तकभेदेन किञ्चित्किञ्चिद्भदयुतायाः सप्तावृत्तीः, तथा कीलकानन्तरं च ॐ श्रीं क्लीं ह्रीं सप्तशतिचण्डिके उत्कीलनं कुरु कुरु स्वाहेत्येकविंशत्यक्षर्यास्तादृश्या एवैकविंशत्या वृत्तीः कुर्वन्ति ॥ तत्र प्रमाणं न पश्यामः ॥ **इति शापोद्धारोत्कीलनविचारः**

अथास्याङ्गन्युच्यन्ते । देवीकवचार्गलाकीलकान्यस्य पूर्वाङ्गानि, प्राधानिकवैकृतमूर्तिरहस्यान्युत्तराङ्गानि, रात्रिसूक्तदेवीसूक्ताभ्यां तथा नवार्णमन्त्रस्याष्टोत्तरशताष्टोत्तरशतजपाभ्यां चेति सम्पुटद्वयं च ॥ तत्र कवचविषये कवचग्रन्थे एव । जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥ निर्विघ्नेन भवेत्सिद्धिश्चण्डीजपसमुद्भवा ॥ इति ॥ अथार्गलाविषयेऽर्गलास्तोत्रे । इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥ स तु सप्तशतीसङ्ख्यावरमाप्नोति सम्पदाम् ॥ इति ॥ (इदं स्तोत्रं अर्गलास्तोत्रम् । महास्तोत्रं सप्तशतीम् ।) कीलक-

त्रिषये कीलक एव क्वचित्पुस्तकेपु सप्तशत्या जपात्पूर्वं पठेत्कीलकमुत्तमम् ॥
हृद्यं काममवाप्नोति हृदि देवी सदा वसेत् ॥ इति उक्तवचनेषु कवचादीनां
देवीमाहात्म्यपाठात्पूर्वं पाठविधानात्तेषां पूर्वाङ्गत्वम् ॥ रहस्यतन्त्रस्थकीलकस्य
देवीमहात्म्याङ्गत्वविधायकवचनाभावान्नाङ्गत्वम् ॥ कवचं बीजमादिष्टमर्गला-
शक्तिरिष्यते ॥ कीलकं कीलकं प्राहुः सप्तशत्या महामनोः ॥ इति कवचा-
दीनां देवीमाहात्म्यबीजादित्रयरूपत्वं वदद्भिर्गौडपादाचार्यैरादौ कवचस्य ततो
ऽर्गलायास्ततः कीलकस्य पाठ इति कवचादीनां पाठक्रमश्च दर्शितः ॥
केचित् अर्गलां कीलकं चादौ पठित्वा कवचं पठेत् ॥ पठेत् सप्तशतीं
पश्चात् क्रम एष शिवोदितः ॥ अर्गला दुरितं हन्ति कीलकं फलदायकम् ॥
कवचं रक्षते नित्यं तस्मादेतत्त्रयं पठेत् ॥ इत्यर्गलाकीलकपाठानन्तरं कवच-
पाठमाहुः तद्वक्ष्यमाणरुद्रयामलवचनविरोधाल्लोके यत्र कुत्रापि तथाचाराभा-
वाच्चोपेक्ष्यम् ॥ अथ रहस्यानामुत्तराङ्गत्वविषये चण्डिकार्चनरहस्ये नित्यचण्डी-
प्रकरणे । चन्दनेन विलिप्ताङ्गः स्रग्वी न्यासपरायणः ॥ प्रणवादिरहस्यान्तं
नित्यं चण्डीस्तवं पठेत् ॥ इति ॥ अत्र रहस्यान्तमित्युक्त्या रहस्यानामुत्तराङ्ग-
त्वं दर्शितम् ॥ एतत्त्रये क्रमेण प्रकृतिविकृत्यंशावताराणां ध्यानार्चनादिकथनेन
पूर्वपूर्वस्य प्राधान्यात् आदौ प्राधानिकस्य ततो वैकृतस्य पश्चान्मूर्तिरहस्यस्येति
पाठक्रमः ॥ क्वचिद्रहस्यानां पञ्चकदर्शनेऽपि आद्यत्रयस्यान्ते एव अधीष्वाव्रहितः
स्वयामित्यध्ययनाविधानादितरयोर्नाङ्गत्वम् ॥ व्रतराजादयः केचित् पूर्वोक्ताङ्ग-
राहित्येनापि केवलसप्तशत्याः पाक्षिकं पाठमाहुः तच्चिन्त्यम् ॥ **कात्यायनी-**
तन्त्रे । अङ्गहीनो यथा देही सर्वकर्मसु न क्षमः ॥ अङ्गषट्कविहीना तु
तथा सप्तशती स्मृता ॥ रावणाद्याः स्तोत्रमेतदङ्गहीनं निषेविरे ॥ हता रामेण
ते सर्वे नाङ्गहीनं पठेदतः ॥ इत्यङ्गषट्कपाठाभावे महाप्रत्यवायोक्तेः ॥ अथ
यानि देवमिहात्म्याङ्गत्वाविधायकवचनगर्भाणि चण्डिकाकवचहृदयसहस्रना-
मादीनि तथा देवीसूक्तमहाकालीमहालक्ष्मीमहासरस्वतीसूक्तादीनि कानिचि-

स्तोत्राण्युपलभ्यन्ते तेषां क्वचिदपि पाठाचारस्यादर्शनात् पूर्वोक्त**कात्यायनीतन्त्रे**ऽङ्गषट्कस्यैवोक्तेर्नाङ्गत्वम् ॥ अङ्गषट्कं कवचादित्रयं रहस्यत्रयं चेत्युभयम् ॥ वक्ष्यमाण**रुद्रयामलवचने** जपहोमयोरुक्तषट्कस्यैव क्रमकथनात् तथा हि ॥ प्रतिश्लोकं च जुहुयात् कृत्वा तु कवचं पुरा ॥ ततश्चाप्यर्गलास्तोत्रं कीलकं तदनन्तरम् ॥ ततश्चण्डीं सप्तशतीं रहस्यत्रितयं ततः ॥ चण्डीपाठे तथा होमे क्रम उक्तो मनीषिभिः ॥ इति ॥ **अथ सम्पुटीकरणविचारः** ॥ तत्र **डामरे** मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठन् ॥ पुटितं मूलमन्त्रस्य जपेनाप्नोति वाञ्छितम् ॥ इति नवार्णजपेन सम्पुटीकरणमुक्तम् ॥ (मूलमन्त्रस्य नवार्णस्य मूलमन्त्रस्य जपेन पुटितं मार्कण्डेयपुराणोक्तं चण्डीस्तवं पठन् वाञ्छितमाप्नोतीति वचनान्वयः ॥ अथ **मरीचिकल्पे** रात्रिसूक्तं जपेदादौ मध्ये सप्तशतीस्तवम् ॥ प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमः ॥ एवं सम्पुटितं स्तोत्रं भवेत्सर्वार्थसिद्धिदम् ॥ इति सूक्तद्वयन सम्पुटीकरणमुक्तम् ॥ एवं सम्पुटद्वयप्राप्तौ कतरेण देवीमाहात्म्यस्य साक्षादव्यवधानेन सम्पुटः । कतरेण च व्यवधानतः परम्परया सम्पुट इति संशये उच्यते ॥ नवार्णसम्पुटविधायकडामरतन्त्रवचने मूलमन्त्रस्य जपेन पुटितं चण्डीस्तवं पठन् वाञ्छितमाप्नोतीत्युक्तम् ॥ तत्र-पुटितमित्येतत् पुटसंश्लेषणे इति तौदादिकस्य कर्मणि भूते क्तान्तं रूपम् ॥ संश्लिष्टमिति तदर्थः । संश्लेषश्चाव्यवधानेन सामीप्यसम्बन्धः ॥ ततश्च नवार्णसम्पुटवचने पुटितशब्दप्रयोगात्, बहुषु तन्त्रेषु नवार्णसप्तशत्योरेकप्रकरणे कथनेनोभयोर्ऋषिच्छन्दोदेवतादीनां न्यासध्यानादीनामैक्येन च सूक्तद्वयापेक्षया नवार्णस्यान्तरङ्गत्वात्, सर्वदेशस्थितसप्तशतीपुस्तकेषु नवार्णसम्पुटीकरणप्रयोगसत्वेन तस्य नित्यत्वज्ञापनाच्च नवार्णजपेन चण्डीस्तवस्याव्यवधानेन साक्षात् सम्पुटः ॥ अथ सूक्तद्वयसम्पुट विधायकमरीचिकल्पवचने तु आदौ मध्ये अन्ते इति पौर्वापर्यक्रममात्रबोधक पदत्रयप्रयोगेण रात्रिसूक्तचण्डीस्तवयोः चण्डीस्तवदेवीसूक्तयोश्च मध्ये नवार्ण-

जपरूपव्यवधानस्याबाधकत्वात्, बहुषु हस्तलिखितेषु मुद्रितेषु च प्राचीनसप्तशतीपुस्तकेषु सूक्तद्वयसम्पुटस्यादर्शनेन तस्यानित्यत्वज्ञापनाच्च सूक्तद्वयेन नवार्णजपसम्पुटितस्य चण्डीस्तवस्य व्यवधानेन सम्पुट इति ॥ एवं च चण्डीस्तवस्यादौ क्रमेण कवचार्गलाकीलकरात्रिसूक्तनवार्णानामन्ते च नवार्णदेवीसूक्तप्राधानिकवैकृतमौर्तरहस्यानां जप इति ज्ञेयम् ॥ अन्ये तु सूक्तद्वयेन चण्डीस्तवस्य साक्षात्सम्पुटः नवार्णेन तत्सम्पुटितस्य व्यवधानेन सम्पुट इत्याहुः ॥ तत् केन वा प्रमाणेन कया वा युक्त्येति ते एव प्रष्टव्याः ॥ क्वचित् कवचस्यादौ रहस्यान्ते चैव नवार्णमन्त्रजप उक्तः ॥ **भास्कररायादयस्तु** नवार्णोपदेशेन सप्तशत्या जपाधिकारोक्तेर्नवार्णस्य प्राधान्यात्सप्तशत्याश्च तदङ्गत्वात्प्रधानेन नवार्णेनाङ्गस्य सप्तशत्याः सम्पुटीकरणमयुक्तं मन्यमाना नवार्णसम्पुटविधायकडामरतन्त्रवचनं "मार्कण्डेयपुराणोक्तं चण्डीस्तवं पुटितं यथा तथा (सम्पुटाकारतयेत्यर्थः ।) पठन् मूलमन्त्रस्य जपेन वाञ्छितमाप्नोतीति योजयन्तश्चण्डीस्तवेनैव नवार्णस्य सम्पुटीकरणमिच्छन्ति तत्पक्षे शतमादौ शतं चान्ते जपेन्मन्त्रं नवाक्षरम् ॥ चण्डीसप्तशतीमध्ये सम्पुटोऽयमुदाहृतः ॥ इत्यसन्दिग्धार्थं नवार्णसम्पुटविधायकं चण्डिकार्चनरहस्यवचनं कथं वा स्वानुकूलार्थतया योज्यते इति न जानीमः ॥ अथैषामङ्गाङ्गिनां स्वरूपाण्युच्यन्ते ॥ तत्र मार्कण्डेय उवाचेत्युपक्रम्य यद्गुह्यं परमं लोके इत्यादिमहामायाप्रसादत इत्यन्तमेकपञ्चाशत् श्लोकात्मकं देवीकवचम् ॥ मार्कण्डेय उवाचेत्युपक्रम्य जयन्तीमङ्गलाकालीत्यादिवरमाप्नोति सम्पदामित्यन्तं चतुर्विंशतिश्लोकात्मकं अर्गलास्तोत्रम् । पुनर्मार्कण्डेयउवाचेत्युपक्रम्य विशुद्धज्ञानदेहायेत्यादि हृदि देवी सदा वसेत् इत्यन्तं पञ्चदशश्लोकात्मककं कीलकम् ॥ रात्रिसूक्तं ऋग्वेदशाकलसंहितायामष्टमाष्टके रात्रीव्यख्यदायतीत्यादिरात्रिस्तोमं न जिग्युषे इत्यन्तमष्टर्चं प्रसिद्धम् ॥ केचित् देवीमाहात्म्यप्रथमाध्यायस्थः त्वं स्वाहा त्वं स्वधेत्यादि हन्तुमेतौ महासुरावित्यन्तं पञ्चदशश्लोका-

त्मकः स्तवः कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारुणेत्यादिरात्रिपदाङ्कितत्वाद्रात्रिसूक्तमित्याहुस्तत्र । मरीचिकल्पे सूक्तद्वयसम्पुटकथनानन्तरं रात्रिसूक्तं प्रतिऋचं तथा देव्याश्च सूक्तकम् ॥ हुत्वान्ते प्रजपेत्स्तोत्रमादौ पूजादिकं मुने इति तद्धोमविधायकवचने सूक्तावयवानामृक्शब्देनाभिधानाद्वैदिकेतरमन्त्रेषु तथाभिधाने मानाभावात् सम्भवति शक्यार्थे लक्षणाया अयुक्तत्वाच्च ॥ तस्मात्पूर्वोक्तं वैदिकमेव ग्राह्यम् ॥ नवार्णमन्त्रः प्रागुक्तः ॥ प्रधानस्य देवीमाहात्म्यस्य स्वरूपमपि प्रागेवोक्तम् ॥ अथ देवीसूक्तमपि ऋग्वेदशाकलसंहितायामष्टमाष्टके एव अहं रुद्रेभिर्वसुभिरित्यादितावती महिनासम्बभूवेत्यन्तमष्टर्चं प्रसिद्धमेव ग्राह्यम् न पञ्चमाध्यायस्थं नमो देव्यै महादेव्यै इत्यादिसर्वापदोभक्तिविनम्रमूर्तिभिरित्यन्तं त्रिंशत् श्लोकात्मकम् ॥ तद्विषये रात्रिसूक्तनिर्णये उक्तमेव । अथ राजोवाचेत्यारभ्य भगवन्नवतारा मे इत्यादि, नाम्ना चान्येन केनचिदित्यन्तमेकोनत्रिंशत् श्लोकात्मकं प्राधानिकरहस्यम् । ऋषिरुवाचेत्यारभ्य त्रिगुणा तामसी देवीत्यारभ्य सुखमाप्स्यसीत्यन्तमेकोनचत्वारिंशत्श्लोकात्मकं **वैकृतरहस्यं** ॥ पुनर्ऋषिरुवाचेत्यारभ्य नन्दा भगवतीत्यादिसर्वकामफलप्रदमित्यन्तं द्वाविंशतिश्लोकात्मकं मूर्तिरहस्यं । क्वचिद्ब्रह्माण्डपुराणनाम्ना "श्रीवज्रकवचस्य त्रिपञ्चाशत् श्लोकशालिता ॥ अर्गलाकीलकश्लोका अष्टाविंशतिविंशती ॥ इति कवचादित्रयश्लोकसङ्ख्योक्ता सा कवचांशमात्रे क्वचित्सम्भवेऽप्यर्गलाकीलकयोरत्यन्तासम्भवादुपेक्ष्यैव ॥ इति कवचादीनां स्वरूपाणि ॥ अथोक्तक्रमेणैषामृष्यादिकमुच्यते ॥ तत्र कवचादित्रयस्य रहस्यत्रयस्य च वाचनिकमृष्यादिकं नोपलभ्यते ॥ तथापि कवचस्य ब्रह्मोक्तत्वात्, क्वचिदर्गलास्तोत्रपुस्तकान्ते, अर्गलं हृदये यस्य नरोऽनर्गलवागसौ ॥ भवेदिति विनिश्चित्य विष्णुना कथितं पुरा ॥ इति ॥ तथा कीलकान्ते च, कीलकं हृदये यस्य सोऽकीलितमनोरथः ॥ भविष्यति न सन्देह इत्याह भगवान् भवः ॥ इतिवचनयोर्दर्शनात् ॥ तथा क्वचिद्व्रतराजपुस्तके नवरात्रप्रकरणे अर्गलं विष्णुरचितं कीलकं शिवनिर्मितम्

॥ इति रुद्रयामलनाम्नो वचनस्य दर्शनाच्च, यस्य वाक्यं स ऋषिः । या तेनोच्यते सा देवता । यदक्षरपरिमाणं तच्छन्दः । इति सामान्यपरिभाषया कवचस्य ब्रह्माऋषिः । अर्गलाया विष्णुः । कीलकस्य च शिवः ॥ अनयोरारम्भे मार्कण्डेय उवाचेत्यस्य सत्वेऽपि तस्य विष्णुशिवयोर्वचनानुवादकत्वान्न ऋषित्वम् ॥ त्रयाणामप्यनुष्टुप्छन्दोघाटितत्वादनुष्टुप्छन्दः ॥ देवताविशेषाणामनुक्त्या आदिशक्तिर्महालक्ष्मीर्देवता ॥ सर्वेषां देवीमाहात्म्यपूर्वाङ्गत्वाद्देवीमाहात्म्यजपपूर्वाङ्गत्वेन विनियोगश्च ॥ अथ रात्रिसूक्तस्य ऋष्यादिकं वैदिकसर्वानुक्रमे । रात्री कुशिकः सौभरो रात्रिर्वा भारद्वाजी । रात्रिस्तवं गायत्रम् । इति ॥ रात्रीपदं सूक्तप्रतीकः । सोभरेः पुत्रः कुशिकऋषिः ॥ यद्वा भारद्वाजस्य सुता रात्र्याख्या अस्य सूक्तस्य ऋषिका ॥ रात्रिस्तवमिति । समाख्याबलात् सप्तशत्यङ्गत्वाच्चात्र । रात्रित्वाभिमानिनी आदिशक्तिर्महालक्ष्मीर्देवता ॥ गायत्रीच्छन्दः ॥ वैदिकमन्त्रेषु प्रथमं देवतायाः कीर्तनं पश्चाच्छन्दस इति हि तत्परिभाषा ॥ विनियोगस्तु देवीमाहात्म्यसम्पुटीकरणपूर्वांशत्वेनेति ॥ नवार्णमन्त्रस्य ऋष्यादिकं न्यासध्यानादिकं च नवार्णविधाने प्रागुप्तम् ॥ तस्य विनियोगे त्वत्र देवीमाहात्म्यसम्पुटीकरणाङ्गत्वाद्देवीमाहात्म्यसम्पुटीकरणपूर्वांशत्वेनेति विशेषः ॥अथ देवीमाहात्म्यस्य ऋष्यादिकं **चण्डिकार्चनरहस्ये** । चण्डीसप्तशतीस्तोत्रे आद्यस्य चरितस्य तु ॥ ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रीच्छन्द ईरितम् । महाकालीदेवता स्याद्बीजं वै रक्तदन्तिका ॥ नन्दा शक्तिः समाख्याता अग्निस्तत्त्वमुदाहृतम् ॥ विनियोगस्तु धर्मार्थकाममोक्षाप्तये नृप ॥ मध्यमस्य चरित्रस्य मुनिर्विष्णुरुदाहृतः ॥ पङ्क्तिश्छन्दः समाख्यातं शक्तिः शाकम्भरी मता ॥ वायुस्तत्त्वमिति प्रोक्तं विनियोगस्तु पूर्ववत् ॥ उत्तमस्य चरित्रस्य ऋषीरुद्रः समीरितः ॥ अनुष्टुब्छन्द इत्युक्तं देवता च सरस्वती ॥ भ्रामरीबीजमित्युक्तं भीमा शक्तिर्नृपोत्तम ॥ सूर्यस्तत्त्वमितिप्रोक्तं विनियोगस्तु पूर्ववत् ॥ इति ॥ **डामरतन्त्रे** मध्यमचरितस्यो-

ष्णिक्, उत्तमस्य च त्रिष्टुप्छन्द उक्तम् ॥ बीजानि चरितक्रमेण ऐं ह्रीं क्लीमित्युक्तानि ॥ शक्तयो नोक्ताः ॥ विनियोगः क्रमेण धर्मार्थकामेषूक्त इति विशेषः ॥ अत्र केचित् ऋष्यादीनां चरितभेदेन विभज्योक्तेस्तांस्तत्तच्चरितारम्भे विभज्य स्मरन्ति । तन्न युक्तम् ॥ ऋष्यादीनां तत्तच्चरितारम्भे विभागेन स्मरणस्य शक्यत्वेऽपि ऋष्यादिस्मरणानन्तरं कर्तव्यानां सम्पूर्णसप्तशत्यङ्गत्वेनोक्तानामेकादशन्यासादीनां तत्तच्चरितारम्भे विभागेन कर्तुमशक्यत्वात् ॥ अत एव डामरेश्वरतन्त्रे विभागेनैव चरितत्रयस्य ऋष्यादीनुक्त्वा स्पष्टप्रतिपत्त्यर्थं “ एवं संस्मृत्य ऋष्यादीन् ध्यात्वा पूर्वोक्तमार्गतः ॥ सार्थस्मृति पठेच्चण्डीस्तवं स्पष्टपदाक्षरम् ” ॥ इति चरितत्रयस्य ऋष्यादिस्मरणन्यासध्यानानन्तरमेव समस्तचण्डीस्तवपाठस्योक्तत्वाच्च ॥ ऋष्यादीन् संस्मृत्येत्युक्तिर्न्यासस्याप्युपलक्षिका ॥ तस्मात् प्रथमचरितारम्भे एव नवार्णवत् देवीमाहात्म्यस्य प्रथममध्यमोत्तमचरितानां ब्रह्मविष्णुरुद्रा ऋषयः ॥ गायत्रीपङ्क्त्यनुष्टुभश्छन्दांसि ॥ इत्येवंप्रकारेण सर्वेषां बहुवचनान्तत्वेन स्मरणं कृत्वा एकादशन्यासादिकं कार्यम् ॥ उभयत्रापि ऋष्यादीनां विभज्य स्पष्टकथनं तु कामविशेषेणैकैकचरितपाठप्रसङ्गे तत्तच्चरितर्षिच्छन्दोदेवतादेः स्पष्टबोधार्थम् ॥ एकैकचरितपाठे एकादशादिन्यासानां सम्पूर्णसप्तशत्यङ्गत्वान्न कर्तव्यता ॥ किन्तु तत्र सामान्यपरिभाषया प्रथमचरिते ऐंबीजेन मध्यमचरिते ह्रींबीजेन उत्तमचरिते क्लींबीजेनेति तत्तच्चरितदेवताबीजैः षडङ्गन्यासौ कार्यौ ॥ येषां तु मतं ऋष्यादीनां चरितभेदेन विभज्योक्तिस्तत्तच्चरितारम्भे एव तेषां समास्मरणार्थेति, तैः सम्पूर्णचण्डीस्तवाङ्गत्वेन विहितानामेकादशादिन्यासानां समावेशार्थं “ सप्तशत्याख्यमन्त्रस्य मार्कण्डेयो मुनिर्मतः ॥ अनुष्टुप् शक्वरी चाथ ततोऽनुष्टुप् पुनर्भवेत् ॥ जगत्यनुष्टुभौ त्रिष्टुबनुष्टुप्त्रिष्टुबेव च ॥ शक्वरी च तथानुष्टुप्छन्दांसि कथितानि च ॥ देवता तु महालक्ष्मीरादिशक्तिः परा शिवा ॥ इति तन्त्रान्तरोक्त्यनुसारेण सर्वादौ देवीमाहात्म्यस्य मार्कण्डेय

ऋषिः ॥ अनुष्टुप्शक्कर्यनुष्टुब्जगत्यनुष्टुप्त्रिष्टुबनुष्टुप् त्रिष्टुप्शक्कर्यनुष्टुभश्छन्दांसि ॥ आदिशक्तिर्महालक्ष्मीर्देवता ॥ चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ॥ इति समस्तचण्डीस्तवस्य ऋष्यादीन् स्मृत्वा तान् शिरोमुखहृत्सु न्यस्यैकादशन्यासचण्डिका पञ्चाक्षरमन्त्रन्याससप्तशतीश्लोकन्यासान् कृत्वा सर्वस्याद्या महालक्ष्मीरिति प्राधानिकरहस्योक्तश्लोकत्रयेण ध्यात्वा श्रीमदादिशक्तये महालक्ष्म्यै नम इति नाममन्त्रेण मानसोपचारैः सम्पूज्य ततस्तत्तच्चरितारम्भे तत्तच्चरितप्रयुक्तऋष्यादिस्मरणतन्न्यासबीजन्यासतत्तद्देवताध्यानानि कार्याणि ॥ **अथ चण्डीस्तवस्य ऋष्यादिन्यासः** ॥ यद्यपि **चण्डिकार्चनरहस्ये** केवलमृष्यादय उक्तास्तन्न्यासो नोक्तस्तथाप्यप्रतिषिद्धमनुमतं भवतीति न्यायात्सामान्यपरिभाषया नवार्णवत्स कर्तव्य एव ॥ ततः सम्भवे एकादशन्यासाः कर्तव्याः ॥ तदुक्तं **चण्डिकार्चनरहस्ये** एकादशन्यासाननुक्त्वान्ते । एते न्यासाः प्रकर्तव्याश्च**ण्डीसप्तशतीजपे** ॥ तथा नवार्णमन्त्रस्य जाप्ये चापि फलप्रदे ॥ इति चण्डिकापञ्चाक्षरन्यासोऽपि नवार्णवत् कार्यः ॥ उक्तं च । ह्रीं चण्डिकायै मन्त्रेण चण्डीस्तवनवार्णयोः ॥ व्यस्तेन च समस्तेन कुर्यादङ्गानि षट् सुधीः ॥ इति ॥ अथ सप्तशतीश्लोकैर्न्यासः ॥ सचोक्तश्च**ण्डिकार्चनरहस्ये** ॥ चण्डीसप्तशतीजाप्ये सरहस्ये नृपोत्तम ॥ न्यासं ते सम्प्रवक्ष्यामि ब्रह्मविष्णुशिवोदितम् ॥ अस्मिन्न्यासे दश श्लोका ब्रह्मविष्णुशिवोदिताः ॥ खड्गिनी शूलिनी घोरेत्येकं कृष्णतरं न्यसेत् ॥ शूलेन पाहि नो देवीत्यादिश्लोकचतुष्टयम् ॥ बालार्कसदृशं न्यासे चिन्तनीयं महत्तरम् ॥ सर्वस्वरूपे इत्यादिश्लोकानां पञ्चकं पुनः ॥ ध्यात्वा तु स्फटिकाभासं न्यसेत्त्रैलोक्यपावनम् ॥ इति ॥ अस्मिन्न्यासे न्यासश्लोका उक्ता न्यासस्थानानि नोक्तानि ॥ तेनानेके पद्धतिग्रन्थकारा अनेकप्रकारैरेनं न्यासमाहुः ॥ तत्र कल्पवल्ल्यामुक्तश्लोकविभागेन व्यापकत्रयमुक्तम् ॥ देवीमहोत्सवे एको हृदये चतुष्टयं शिरसि पञ्चकं शिखायामिति त्र्यङ्गन्यास उक्तः ॥ **मन्त्रकल्पलतायां** एकं श्लोकं

मूर्धादिहृदयान्तम् । चतुष्टयं हृदयादिनाभ्यन्तम्, पञ्चकं नाभ्यादिपादान्तं न्यस्य पुनःश्लोकदशकं क्रमेण शिरोमुखदक्षवामनेत्रदक्षवामकर्णदक्षवामनासापुटलिङ्गोदरेषु न्यसेदन्ते च सर्वश्लोकैर्व्यापकं कुर्यादित्युक्तम् ॥ वस्तुतस्तु सर्वेषु न्यासेषु हृदयादिषडङ्गस्यैव मुख्यत्वादुक्तश्लोकविभागस्यावृत्तिद्वयेन हृदयादिषडङ्गं कुर्यात् ॥ सम्भवेऽङ्गुष्ठन्यासमपि कुर्यात् ॥ **इति चण्डीस्तवन्यासाः** ध्यात्वा पूर्वोक्तमार्गतः इति डामरतन्त्रवचनाद्ध्यानादिकं नवार्णवत् ॥ चण्डीस्तवपाठान्ते च प्राग्वत् पूर्वोक्तसप्तशतीश्लोकैरुत्तरषडङ्गं कृत्वा पुनः पूर्ववन्नवार्णस्य देवीमाहात्म्यजपसम्पुटोत्तरांशत्वेन जपं कुर्यात् तत्र विनियोगे देवीमाहात्म्यसम्पुटोत्तरांशत्वेन जपे, इति विशेषः ॥ **अथ देवीसूक्तस्य ऋष्यादिकं सर्वानुक्रमे** ॥ अहमष्टौ वागाम्भृण्यात्मानं तुष्टाव । द्वितीया जगती ॥ इति ॥ अहमिति सूक्तप्रतीकः ॥ अष्टाविति ऋक्सङ्ख्या ॥ आम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी परमात्मतादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वाधिष्ठानत्वेन चाहमेवास्मि । इत्यात्मानं स्तौति अतः सा ऋषिः ॥ सर्वात्मकस्य ब्रह्मणः प्रतिपाद्यत्वाद्ब्रह्मरूपा आदिशक्तिर्महालक्ष्मीर्देवता ॥ द्वितीया ऋक् जगतीछन्दस्का ॥ प्रक्रान्तत्वाच्छेषाः सप्त त्रिष्टुभः ॥ अत्रास्य देवीमाहात्म्यसम्पुटोत्तरांशत्वाद्देवीमाहात्म्यसम्पुटोत्तरांशत्वेन जपे इति विनियोगे विशेषः ॥ अथ रहस्यत्रयस्य ऋष्यादि ॥ रहस्यत्रयस्य सुमेधसोक्तत्वात्स ऋषिः ॥ अनुष्टुप्वृत्तात्मकत्वात्सा तच्छन्दः ॥ आद्ये आदिशक्तेर्महालक्ष्म्या वर्णनात् सा तद्देवता ॥ द्वितीये महाकाल्याद्यवतारस्वरूपादिवर्णनान्महाकाल्यादिविकृतित्रयरूपिणी महालक्ष्मीः ॥ तृतीये नन्दादिमूर्तीनां स्वरूपादिकथनान्नन्दादिमूर्तिस्वरूपिणी महालक्ष्मीर्देवतेति व्यवस्था ॥ सर्वेषां देवीमाहात्म्योत्तराङ्गत्वाद्देवीमाहात्म्यजपोत्तराङ्गत्वेन विनियोगश्च ॥ क्वचित्सप्तशतीपुस्तकेषु नारायणऋषिर्महालक्ष्मीर्देवतेति क्वचिद्ब्रह्मविष्णुरुद्रा ऋषयः ॥ महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः इत्युक्तम् ॥ तत्र मूलं युक्तिं च न पश्यामः

अथ पुस्तकोपरिवाचने विशेषस्तन्त्रान्तरे ॥ पुस्तके वाचनं शस्तं सहस्रादधिकं यदि ॥ ततो न्यूनस्य तु भवेत् वाचनं पुस्तकं विना ॥ इति वचनात् प्रकृतस्तवस्याङ्गसहितस्य च सहस्रान्न्यूनत्वात् पुस्तकं विनैव पठनं प्रशस्तम् ॥ अत एव रहस्ये ततः कृताञ्जलिपुटः स्तुवीत चरितैरिमैरित्युक्तम् ॥ ग्रन्थसङ्ख्या तु ग्रन्थो द्वात्रिंशदक्षर इति **त्रिकाण्डीशेषात्** द्वात्रिंशदक्षरात्मक एको ग्रन्थ इतिप्रकारेण ज्ञेया ॥ अत्राक्षरशब्देन स्वर उच्यन्ते ॥ तदुक्तमक्षरमालिकायाम् । न क्षरत्यक्षरं तेन स्वरा एव तदुच्यते ॥ स्वमेवार्थं स्वयं रान्ति तेनाकारादय स्वराः ॥ स्वराभावे ककारादिव्यञ्जनं व्यर्थमेव हि ॥ इति ॥ अत एव **शक्तिसङ्गमतन्त्रे** द्वात्रिंशता स्वरैर्युक्तो ग्रन्थ इत्यभिधीयते ॥ इत्यक्षरस्थाने स्वरशब्दएव प्रयुक्तः ॥ मुखतः पाठासम्भवे तु पुस्तकोपरिवाचनम् ॥ तत्र पुस्तकलेखने विशेष उक्तो **वाराहीतन्त्रे** । शूद्रेण लिखितं यच्च स्वयं विलिखितं च यत् ॥ अब्राह्मणेन लिखितं तच्चापि परिवर्जयेत् ॥ इति ॥ (अब्राह्मणेन ब्राह्मणसदृशेन, भ्रष्टब्राह्मणेनेत्यर्थः । ब्राह्मणादीषन्न्यूनेन क्षत्रियादिना वा ॥) **शक्तिसङ्गमतन्त्रेऽपि** ॥ न स्वयं लिखितं स्तोत्रं नाब्राह्मणलिपिं पठेदित्युक्तम् ॥ पुस्तकोपरिवाचने पुस्तकपूजा कार्या ॥ तदुक्तं **वाराहीतन्त्रे** । वाङ्मातृकासरस्वत्यै हृद्भिः पुस्तकमर्चयेत् ॥ तस्य स्यात्सफलं जाप्यमन्यथा विफलं भवेत् ॥ इति ॥ वाक् ऐं । मातृकासरस्वत्यै इति स्वरूपम् । हृत् नमः शब्दः ॥ तथा च ऐं मातृकासरस्वत्यै नम इति दशाक्षरः पुस्तकपूजने मन्त्रः ॥ आदौ ध्यानं यथा । पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ॥ अक्षस्रक्पुस्तहस्तामभयवरकरां तीक्षणामब्जसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥ इति ध्यात्वा उक्तमन्त्रेण हरिद्राकुङ्कुमगन्धपुष्पादिभिः वस्त्रकाष्ठफलकादिव्यवधानेन पुस्तकं सम्पूज्य । या देवी स्तूयते नित्यं विबुधैर्वेदपारगैः ॥ सा मे वसतु जिह्वाग्रे मातृ-

काख्या सरस्वती ॥ इति प्रार्थयेत् ॥ **तन्त्रान्तरे** न्यासपीठावरणपूजाबलिदानसहितं जातवेदसे इति मन्त्रेण विस्तृतं पुस्तकपूजनमुक्तम् ॥ क्वचित्सप्तशतीपुस्तकेषु ॐ नमः पिशाचिनि करङ्किनि त्रिशूलखड्गहस्ते एह्येहि, आगच्छागच्छ इमां पूजां गृह्ण गृह्ण स्वाहेति मन्त्रेणावाह्य श्रीसप्तशतीसरस्वत्यै नम इति नाममन्त्रेण पूजनमुच्यते । तत्र मानं न दृश्यते ॥ **इति सप्तशतीपुस्तकपूजनम्** ॥ **अथ वाचने नियमाः** ॥ **वाराहीतन्त्रे** । आधारे स्थापयित्वा तु पुस्तकं वाचयेत्ततः ॥ हस्तस्थिते वाचने तु भवेदर्धफलं ध्रुवम् ॥ प्रणवं पूर्वमुच्चार्य स्तोत्रं वा संहितां पठेत् ॥ अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥ **कालिकापुराणेऽपि** ॥ स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते ॥ तस्मात्सम्पुटितं कुर्याज्जाप्यं सर्वार्थसिद्धिदम् ॥ इति ॥ **न्यासः** ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ इति ॥ (जयं देवतोत्कर्षप्रतिपादकं ग्रन्थम् ॥ जय इति महाभारतग्रन्थस्य नामेत्यन्ये) ॥ **शक्तिसङ्गमतन्त्रे** । अध्यायं प्राप्य विरमेन्नतु मध्ये कदाचन ॥ कृते विरामे मध्ये तु तमध्यायं पठेत्पुनः ॥ न मानसं पठेत्स्तोत्रं वाचिकं तु प्रशस्यते ॥ मन्त्रे तु मानसं जाप्यं प्रशस्तं परिकीर्तितम् ॥ इति ॥ **कीलके** ॥ शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ॥ भवत्येव समग्रापि इत्युक्तम् ॥ (शनैरत्वरया ॥ उच्चकैर्महती) ॥ **तन्त्रान्तरे** ॥ जपमध्ये क्षुते निद्रा जृम्भाधःपवनादिके ॥ तथा नीचादिदृष्टौ च आचम्य प्रयतो भवेत् ॥ (प्रयतः पूतः ॥) जपमध्ये समुत्थाने षडङ्गं विन्यसेत्पुनः ॥ इत्यादि ॥ आदौ कवचादित्रयं पठित्वा सम्पुटद्वयस्याधाररूपपूर्वांशात्मकौ रात्रिसूक्तनवार्णमन्त्रजपौ विधाय देवीमाहात्म्यस्य ऋष्यादिस्मरणन्यासध्यानादि कृत्वा मध्ये स्वेष्टसङ्ख्यानुसारेण देवीमाहात्म्यावृत्तीर्विधायान्ते पुनरुत्तरन्यासं सम्पुटद्वयस्य पिधानरूपोत्तरांशात्मकौ नवार्णमन्त्रदेवीसूक्तजपौ च कृत्वा रहस्यत्रयं पठेत् ॥ सर्वान्ते च नवार्णपुरश्चरणजपोक्तप्रकारेण जपनिवे-

दनादिकं कुर्यात् ॥ एकासनेऽनेकपाठकरणे कवचाद्यङ्गषट्कस्य सम्पुटीकरणप्रयुक्तसूक्तद्वयनवार्णजपस्य देवीमाहात्म्यन्यासादेश्च प्रतिपाठं नावृत्तिः॥ किन्तु प्रथमपाठारम्भे कवचादित्रयरात्रिसूक्तनवार्णजपदेवीमाहात्म्यन्यासध्यानादेरनुष्ठानम् ॥ चरमपाठान्ते च देवीमाहात्म्योत्तरन्यासनवार्णदेवीसूक्तरहस्यत्रयजपजपानिवेदनादेश्चानुष्ठानम् ॥ तिथिक्षये एकस्मिन् दिने दिनद्वयप्रयुक्ता आवृत्तयः कार्याः ॥ वृद्धौ प्रथमदिने तद्दिनप्रयुक्ता आवृत्तीः कृत्वा द्वितीयदिने तद्दिनस्य जपवन्ध्यत्वदोषपरिहारायैका आवृत्तिः कार्या। न तस्या मुख्यकर्मजपसङ्ख्यायां गणना ॥ शक्त्यधिकावृत्तिकरणप्रसङ्गे तद्दिनेऽन्यः सहायो वरणीयः ॥ एवं चतुर्दशीपर्यन्तमेकैकावृत्तिवृद्ध्या सप्तभिर्दिनैरष्टाविंशत्यावृत्त्यात्मकं सप्तशतीपुरश्चरणं कृत्वा । परदिने जपदशांशतः सप्तशत्यावृत्तित्रयेण होमः ॥ ताराखण्डे होमस्य प्रकारत्रयमुक्तम् ॥ तद्यथा ॥ स्तोत्रादीनां मध्यभागे सम्पूर्णं हवनं चरेत् ॥ इति गौडक्रमे प्रोक्तमिति साङ्ख्यायनोऽब्रवीत् ॥ काश्मीराख्यक्रमे देवि शृणु यत्नेन साम्प्रतम् ॥ सम्पूर्णं स्तोत्रमुच्चार्य तदन्ते जुहुयादथ ॥ कात्यायन्यादिषु प्रोक्तं मन्त्रान्ते हवनादिकम् ॥ इति ॥ एवं त्रिधा प्राप्तस्य होमस्य **मरीचिकल्पे,** तदन्ते हवनं कुर्यात् प्रतिश्लोकेन पायसमितिवचनेन सप्तशतीहोमविषये नियमः कृतः ॥ तेन पाठक्रमेण कवचादिरहस्यान्तस्य होमः ॥ होमे पायसं तिलसर्पिर्मिश्रं ग्राह्यम् ॥ पायसं तिलसर्पिषेति रहस्यात् ॥ केचित् अन्धकाख्यो महादैत्यो दुर्गाहोमपरायणः ॥ कवचाहुतिमात्रेण महेशेन निपातितः ॥ इति कवचहोमस्यानिष्टफलोक्तेः कवचहोमं नानुतिष्ठन्ति ॥ शिष्टास्तु कुर्वन्त्येव ॥ चण्डिकार्चनरहस्ये होममन्त्रविषये त्रिधा विकल्प उक्तः स यथा चण्डीसप्तशतीजाप्ये होममन्त्रो नवाक्षरः ॥ नमो देव्यै महादेव्यै इतिश्लोकोऽथवा भवेत् ॥ अथवायं भवेद्धोमः श्लोकैः स्तोत्रनिरूपितैः ॥ इति ॥ अत्र श्लोकपदं सप्तशतधा विभक्तमन्त्रपरम् ॥ श्लोकमन्त्रबाहुल्यात् श्लोकपद-

प्रयोगः ॥ तत्र सप्तशतीमन्त्रैर्होमपक्षे यत्र सप्तशतीमन्त्रसङ्ख्याया दशांशत्वं सम्भवति यथा त्रिंशत्पाठात्मिकायां नित्यचण्ड्यां सप्तशत्यावृत्तित्रयस्य, शतचण्ड्यामावृत्तिदशकस्य, सहस्रचण्ड्यामावृत्तिशतकस्य, तत्र नास्त्येव संशयः ॥ नवरात्रनवदुर्गाकालरात्रिषु सप्तशतीपुरश्चरणे, पञ्चचत्वारिंशदावृत्त्यात्मकनवचण्ड्यां चाल्पसङ्ख्यया दशांशाधिक्येपि शिष्टसम्प्रदायबलान्नवरात्रादित्रये साङ्गसप्तशत्या एकावृत्त्या, सप्तशतीपुरश्चरणेआवृत्तित्रयेण, नवचण्ड्यां पञ्चावृत्तिभिर्होमः कार्यः ॥ अन्यत्र नवार्णमन्त्रेण नमो देव्यै इति श्लोकेन वा जपदशांशतो होमः कार्यः ॥ जपे प्रतिमन्त्रं पल्लवसम्पुटादिसत्वे होममन्त्रेष्वपितद्योजना ॥ एवं तर्पणमार्जनपक्षे तयोरपि ॥ तर्पणमार्जनयोः कृताकृतत्वमुक्तम् शक्तिसङ्गमतन्त्रे ॥ एवं पुरस्क्रियां कृत्वा दशांशं हवनं चरेत् ॥ ब्राह्मणान् भोजयेद्धोमदशांशेन सुरेश्वरि ॥ महाकालमतस्थश्चेत्कुर्यात्तर्पणमार्जने ॥ इति ॥ करणपक्षे मार्जनदशांशेन ब्राह्मणभोजनम् ॥ कुमार्यः पाठसङ्ख्या यथाशक्ति वा पूज्या भोज्याश्च । कुमारीपूजाविधिर्नवरात्रव्रतप्रकरणे प्रागुक्तः ॥ अन्यत् सर्वं नवार्णपुरश्चरणवत् ॥ तच्च प्रयोगे स्फुटीभविष्यति ॥ अथाचार्यद्वारानुष्ठाने तद्दक्षिणाप्रमाणं तन्त्रान्तरे ॥ एकावृत्तावष्टगुञ्जापरिमितसुवर्णदानमुत्तमा. दक्षिणा ॥ तदर्धं मध्यमा ॥ तदर्धमधमा ॥ सपल्लवपाठे एतद्द्विगुणा ॥ प्रतिमन्त्रं मन्त्रान्तरेण सम्पुटीकरणे तु चतुर्गुणा ॥ अत्रापि उत्तममध्यमाधमकल्पना प्राग्वत् ॥ शतचण्डीसहस्रचण्ड्योस्तु विशेषो वक्ष्यते ॥ क्वचित्तु । नवदुर्गाकालरात्र्योः स्वर्णमेकं तु दक्षिणा ॥ पुरश्चर्यानित्यचण्ड्योः स्वर्णद्वयमुदाहृतम् ॥ नवचण्ड्यां त्रयः स्वर्णाः शतावृत्तिषु पञ्च च, (इयं नवचण्डीपञ्चचत्वारिंशत्पाठात्मिका ।) सहस्रपाठे पञ्चाशदेकपाठे तु रूप्यकः ॥ इत्युक्ता । सा धनिकविषया ॥

इति सप्तशतीपुरश्चरणविधानम् ॥

चण्डीस्तवपुरश्चरणप्रयोगः ।

अथ चण्डीस्तवपुरश्चरणप्रयोगः ॥ नवार्णपुरश्चरणोक्तप्रकारेणाचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य देवीमाहात्म्यमालामन्त्रसिद्धिकामोऽहं अद्याष्टमीतिथिमारभ्य चतुर्दशीपर्यन्तं सप्तभिर्दिनैः देवीमाहात्म्यपुरश्चरणं करिष्ये ॥ तदङ्गत्वेन स्वस्ति पुण्याहवाचनं नान्दीश्राद्धं च करिष्ये ॥ तदङ्गतया निर्विघ्नतासिद्ध्यर्थमहागणपतिपूजां करिष्ये ॥ इति सङ्कल्प्य । अशक्तौ गणपतिपूजनमात्रं सङ्कल्प्य च । स्वयं जपादिकर्तुमशक्तश्चेत् जपाद्यर्थमाचार्यवरणं करिष्ये इति सङ्कल्प्य नवार्णपुरश्चरणोक्तप्रकारेणाचार्यं वृणुयात् ॥ ततो जपकर्ता आचार्यश्चेत् आचमनादि देशकालसङ्कीर्तनान्ते यजमानेन वृतोऽहं तदाज्ञया सप्तशतीपुरश्चरणजपादिकं करिष्ये इति पृथक्सङ्कल्पं कुर्यात् ॥ ततः कर्ता शापोद्धारोत्कीलनचिकीर्षायां पुरश्चरणजपारम्भात्प्राक् आचमनादि विधाय करिष्यमाणसप्तशतीपुरश्चरणस्य यथावत् फलप्राप्त्यर्थं शापोद्धारोत्कीलने करिष्ये इति सङ्कल्प्य । देवीमाहात्म्यस्य मार्कण्डेय ऋषिः । आदिशक्तिर्देवता । नानाविधानि च्छन्दांसि । शापोद्धारे विनियोगः ॥ इति ऋष्यादि स्मृत्वा सप्तशत्यास्त्रयोदशप्रथमौ द्वादशद्वितीयावेकादशतृतीयौ दशमचतुर्थौ नवमपञ्चमावष्टमषष्ठावितिक्रमेणाध्यायान् पठित्वा सप्तमं द्विः पठेत् ॥ इति शापोद्धारं कृत्वा कर्म समाप्य ॥ पुनराचमनादि विधाय पूर्वोक्तप्रकारेण ऋष्यादि स्मृत्वा उत्कीलने विनियोगं कृत्वा क्रमेण मध्यमप्रथमोत्तमचरित्राणि पठेदित्युत्कीलनं विधाय कर्म समापयेत् ॥ नात्र कवचाद्यङ्गजातस्य जपानुष्ठानम् ॥ इति शापोद्धारोत्कीलने कृत्वा ततः पूर्ववदाचमनादिदेशकालसङ्कीर्तनान्ते श्रीमदादिशक्तिमहालक्ष्मीप्रीत्यर्थं सङ्कल्पितपुरश्चरणान्तर्गतं (कर्मान्तरान्तर्गतत्वे तु तत्तत्कर्मपदोहं कृत्वा) आदौ क्रमेण देवीकवचार्गलाकीलकानां पूर्वाङ्गानां, अन्ते प्राधानिकवैकृतमौर्तरहस्यानामुत्तराङ्गानां सकृत्सकृत् जपेन, सम्पुटीकरणार्थं कीलकजपानन्तरं प्राधानिकरहस्यजपात्प्राक्

च क्रमेण रात्रिसूक्तदेवीसूक्तयोः सकृत् सकृत् जपेन, तथा रात्रिसूक्तजपानन्तरं देवीसूक्तजपात्प्राक् च नवार्णमन्त्रस्याष्टोत्तरशताष्टोत्तरशतवारजपेन सहितं (अन्तर्गत सप्तशतमन्त्रेषु प्रतिमन्त्रं मन्त्रान्तरेण पल्लवसम्पुटान्यतरपक्षेच्छायाम्) पल्लवपक्षे सप्तशतधा विभक्तमन्त्राणां प्रतिमन्त्रमन्ते अमुकपल्लवयुतं, सम्पुटपक्षे सप्तशतधा विभक्तमन्त्राणां प्रतिमन्त्रमाद्यन्तयोरमुकमन्त्रसम्पुटितं इत्युक्त्वा देवीमाहात्म्यस्यैकं पाठं, पाठद्वयं, पाठत्रयमित्यादि यथाभीष्टमुच्चार्य करिष्ये इति जलमुत्सृजेत् ॥ ततो नवार्णपुरश्चरणोक्तरीत्या सर्वं कृत्वा पुस्तकोपरिवाचने पुस्तकपूजनं कुर्यात् ॥ तद्यथा । स्वभिन्नब्राह्मणलिखितं देवीमाहात्म्यपुस्तकं पीठे संस्थाप्य पञ्चाशद्वर्णभेदैरिति पूर्वोक्तश्लोकेन ध्यात्वा ॐ ऐंमातृकासरस्वत्यै नमः इति गन्धहरिद्राकुङ्कुमाक्षतपुष्पादिभिः सम्पूज्य। या देवी स्तूयते नित्यं विबुधैर्वेदपारगैः॥ सा मे वसतु जिह्वाग्रे मातृकाख्या सरस्वती॥इति प्रार्थयेदिति पुस्तकं सम्पूज्य । ततः नारायणाय नमः । नरोत्तमाय नराय नमः ॥ देव्यै सरस्वत्यै नमः ॥ श्रीचण्डिकायै नमः ॥ इति नत्वा ॥ आधारस्थापिते एव देवीमाहात्म्यपुस्तके नात्युच्चैर्नातिनीचैर्नातिशीघ्रं नातिमन्दं सुस्पष्टपदाक्षरं सार्थज्ञानं, अध्यायमध्ये न विरमन्, विरामे तमध्यायमादितः पुनः पठन्, प्रतिस्तोत्रमाद्यन्तयोः प्रणवमुच्चरन् सङ्कल्पोदितक्रमेण देवीकवचादिमूर्तिरहस्यान्तं पठेत ॥ तत्र देवीकवचस्य ब्रह्माऋषिः ॥ अनुष्टुप् छन्दः ॥ नानाशक्तिस्वरूपिणी महालक्ष्मीर्देवता ॥ देवीमाहात्म्यजपपूर्वाङ्गत्वेन जपे विनियोगः ॥ ॐ मार्कण्डेय उवाच ॥ यद्गुह्यं परमं लोके इत्यारभ्य महामायाप्रसादतः ॥ ॐ इत्यन्तं पञ्चाशत्श्लोकात्मकं देवीकवचं पठेत् ॥ ततः अर्गलास्तोत्रस्य विष्णुर्ऋषिः ॥ अनुष्टुप्छन्दः ॥ आदिशक्तिः श्रीमहालक्ष्मीर्देवता । देवीमाहात्म्यजपपूर्वाङ्गत्वेन जपे विनियोगः ॥ मार्कण्डेय उवाच ॥ जयन्ती मङ्गला कालीत्यारभ्य वरमाप्नोति सम्पदामित्यन्तं चतुर्विंशतिश्लोकात्मकमर्गलास्तोत्रं पठेत् ॥ ततः कीलकस्तोत्रस्य शिवऋषिः ॥ अनुष्टुप्-

छन्दः ॥ आदिशक्तिर्महालक्ष्मीर्देवता ॥ देवीमाहात्म्यजपपूर्वाङ्गत्वेन जपे विनियोगः ॥ ॐ मार्कण्डेय उवाच ॥ विशुद्धज्ञानदेहायेत्यादि हृदि देवी सदा वसेदित्यन्तं पञ्चदशश्लोकात्मकं कीलकं पठेत् ॥ रात्रीव्यख्यदित्यष्टर्चस्य सूक्तस्य सौभरः कुशिकऋषि ॥ रात्रित्वाभिमानिनी आदिशक्तिर्महालक्ष्मीर्देवता ॥ गायत्रीच्छन्दः ॥ देवीमाहात्म्यसम्पुटीकरणपूर्वांशत्वेन जपे विनियोगः ॥ ॐ रात्रीव्यख्यदायतीत्यारभ्य रात्रिस्तोमं न जिग्युषे ॥ इत्यन्तमष्टर्चं रात्रिसूक्तं जपेत् ॥ ततः नवार्णपुरश्चरणोक्तप्रकारेण ऋष्यादिस्मरणन्यासध्यानमानसपूजोत्तरषडङ्गसहितं जपनिवेदरहितं नवार्णमन्त्रस्याष्टोत्तरशतं जपं कुर्यात् ॥ तत्र विनियोगे देवीमाहात्म्यसम्पुटीकरणपूर्वांशत्वेनेति विशेषत ऊहः कर्तव्यः ॥ अथ देवीमाहात्म्यस्य प्रथममध्यमोत्तमचरितानां क्रमेण ब्रह्मविष्णुरुद्रा ऋषयः ॥ गायत्रीपङ्क्त्यनुष्टुभश्छन्दांसि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि । नन्दाशाकम्भरीभीमाः शक्तयः ॥ अग्निवायुसूर्यास्तत्वानि ॥ धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥ अथ ऋष्यादिन्यासः । ब्रह्मविष्णुरुद्रेभ्यो ऋषिभ्यो नमः शिरसि ॥ गायत्रीपङ्क्त्यनुष्टुब्भ्यश्छन्दोभ्यो नमो मुखे ॥ महाकालीमहालक्ष्मीमहासरस्वतीभ्यो देवताभ्यो नमो हृदि ॥ रक्तदन्तिकादुर्गाभ्रामरीभ्यो बीजेभ्यो नमो दक्षिणस्तने ॥ नन्दाशाकम्भरीभीमाभ्यः शक्तिभ्यो नमो वामस्तने ॥ अग्निवायुसूर्येभ्यस्तत्त्वेभ्यो नमो हृदये ॥ धर्मार्थकाममोक्षार्थे जपे विनियोगाय नमः कराञ्जलौ ॥ इति तत्तन्मुद्राभिस्तत्तत्स्थानेषु न्यसेदिति ऋष्यादिन्यासः ॥ अथ सम्भवे पूजाप्रकरणोक्तानेकादशन्यासान् कुर्यात् ॥ अथ चण्डिकापञ्चाक्षरमन्त्रन्यासः ॥ ॐ ह्रीं अङ्गुष्ठाभ्यां नमः ॥ ॐ चं तर्जनीभ्यां नमः ॥ ॐ डिं मध्यमाभ्यां नमः ॥ ॐ कां अनामिकाभ्यां नमः ॥ ॐ यैं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रीं चण्डिकायै करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि ॥ अथ सप्तशतीश्लोकैर्न्यासः ॥

ॐ खड्गिनीशूलिनी० ॥ १ ॥ अङ्गुष्ठाभ्यां० ॥ ॐ शूलेन पाहि नो देवि० ॥ १ ॥ ॐ प्राच्यां रक्ष० ॥ २ ॥ ॐ सौम्यानि यानि रू० ॥ ३ ॥ ॐ खड्गशूल० ॥ ४ ॥ तर्जनीभ्यां० ॥ ॐ सर्वस्वरूपे० ॥ १ ॥ ॐ एतत्ते वदनं ॥ २ ॥ ॐ ज्वालाकरा० ॥ ३ ॥ ॐ हिनस्ति दैत्य० ॥ ४ ॥ ॐ असुरासृग्व० ॥५॥ मध्यमाभ्यां०॥ पुनः खड्गिनीश्लोकमुक्त्वा अनामिकाभ्यां०॥ शूलेन पाहि न इतिश्लोकचतुष्टयं पठित्वा कनिष्ठिकाभ्यां० ॥ सर्वस्वरूपे इत्यादिश्लोकपञ्चकं पठित्वा करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि ॥ ध्यानमानसपूजने नवार्णवत् ॥ ततः स्वेष्टसङ्ख्यया देवीमाहात्म्यपाठान् कृत्वा पूर्ववत् सप्तशतीश्लोकैरुत्तरषडङ्गं कृत्वा सम्पुटीकरणोत्तरांशत्वेन नवार्णजपं कुर्यात् ॥ तत्र विनियोगे सम्पुटीकरणांशत्वेनेत्यूहः कार्यः ॥ अहंरुद्रेभिरित्यष्टर्चस्य सूक्तस्य आम्भृणी वागृषिः ॥ ब्रह्मरूपा आदिशक्तिर्महालक्ष्मीर्देवता ॥ त्रिष्टुप्छन्दः ॥ द्वितीया जगती ॥ देवीमाहात्म्यसम्पुटीकरणोत्तरांशत्वेन जपे विनियोगः ॥ ॐ अहंरुद्रेभिरित्यारभ्य महिनासम्बभूवेत्यष्टर्चं देवीसूक्तं पठेत् ॥ प्राधानिकरहस्यस्य सुमेधा ऋषिः ॥ अनुष्टुप्छन्दः ॥ आदिशक्तिर्महालक्ष्मीर्देवता ॥ देवीमाहात्म्योत्तराङ्गत्वेन जपे वि०॥ राजोवाच ॥ भगवन्नवतारा मे० इत्यारभ्य नाम्ना नान्या च केनचिदित्यन्तमेकोनत्रिंशत्श्लोकात्मकं प्राधानिकरहस्यं पठित्वा । वैकृतरहस्यस्य सुमेधा ऋषिः ॥ अनुष्टुप्छन्दः ॥ महाकाल्यादिविकृतिस्वरूपिण्यादिशक्तिर्महालक्ष्मीर्देवता ॥ विनियोगः प्राग्वत् ॥ ऋषिरुवाच । त्रिगुणा तामसी देवीत्यारभ्य सुखमाप्स्यसीत्यन्तमेकोनचत्वारिंशत्श्लोकात्मकं वैकृतरहस्यं पठेत् ॥ ततः मूर्तिरहस्यस्य । ऋषिच्छन्दसी प्राग्वत् ॥ नन्दादिमूर्तिस्वरूपा आदिशक्तिर्महालक्ष्मीर्देवता ॥ विनियोगः प्राग्वत् ॥ ऋषिरुवाच ॥ नन्दाभगवतीनामेत्यारभ्य अधीष्वावहितः स्वयमित्यन्तमेकविंशतिश्लोकात्मकं मूर्तिरहस्यं पठेत् ॥ एकासने अनेकपाठकरणे अङ्गानामृष्यादिस्मरणन्यासादीनां च न प्रतिपाठमावृत्तिः ॥

किन्तु प्रथमपाठारम्भे कवचादिनवार्णजपान्तानां पूर्वाङ्गानां स्तवीयर्ष्यादिस्मरणन्यासादीनां चानुष्ठानं, चरमपाठान्ते च, स्तवीयोत्तरषडङ्गस्य नवार्णादि मूर्तिरहस्यान्तानामुत्तराङ्गानां चानुष्ठानम् । सवान्ते अञ्जलिं बध्वा नवार्णवत् जपसम्पूर्णतायाचनाजपनिवेदनादिकं कुर्यात् ॥ ततः पुस्तकं चैलखण्डे बध्वा दीपं निर्वाप्य आसनादुत्थाय नवार्णवदासनविसर्जनाङ्गविधिं कुर्यात् प्रत्यहमावृत्तिसङ्ख्यया कुमारीपूजनभोजने,असम्भवे यथाशक्ति सर्वान्ते कुर्यात् ॥ उक्तरीत्या चतुर्दशीपर्यन्तमेकोत्तरवृद्ध्या सम्भूयाष्टाविंशत्यावृत्तीः कृत्वान्ते तद्दिने तत्परदिने वा **यागप्रकाशे** वक्ष्यमाणप्रकारेण यथाक्रमं साङ्गायाः सम्पुटितायाः पल्लवादिपक्षे तत्सहितायाः सप्तशत्या आवृत्तित्रयेण प्रतिमन्त्रं सर्पिस्तिलमिश्रपायसेन यथाविधि होमं सम्पाद्य सति कामे होमदशांशतस्तर्पणं तद्दशांशतो मार्जनं कुर्यात् ॥ ते च स्वसङ्ख्यापेक्षया देवीमाहात्म्यमन्त्राणां बह्वाधिक्येन तैः कर्तुमशक्यत्वात् नवार्णमन्त्रेण वा नमो देव्यै इति श्लोकमन्त्रेण वा स्वस्वसङ्ख्यया कार्ये ॥ तत्राचम्य प्राणायामदेशकालसङ्कीर्तनादि कृत्वा । मया कृतस्य सहोमस्य सप्तशतीपुरश्चरणजपस्य यथावत् फलप्राप्त्यर्थं होमदशांशतस्तर्पणं करिष्ये इति सङ्कल्प्य । नवार्णेन करणपक्षे तस्य ऋष्यादि स्मृत्वा महालक्ष्मीतर्पणे विनियोगः । इत्युक्त्वा ऋष्यादिन्यासमूलमन्त्रन्यासध्यानमानसपूजनानि कृत्वा मूलमन्त्रान्ते महालक्ष्मी तर्पयामीतिदुग्धेन जलेन वा होमदशांशतस्तर्पयित्वा । नमो देव्यै इति मन्त्रेण करणपक्षे नमो देव्यै इतिमन्त्रस्य देवाऋषयः ॥ अनुष्टुप्छन्दः । आदिशक्तिर्महालक्ष्मीर्देवता ॥ तर्पणे विनि० ॥ इत्युक्त्वा ह्रीं बीजेन षडङ्गं कृत्वा सर्वस्याद्यामहालक्ष्मीरिति श्लोकत्रयेण ध्यात्वा मानसोपचारैः सम्पूज्योक्तश्लोकेन पूर्ववन्महालक्ष्मीं तर्पयेत् ॥ इति तर्पणम् ॥ **अथ मार्जनम्** ॥ प्राग्वदाचमनादि विधाय तर्पणदशांशेन मार्जनसङ्कल्पं कृत्वा मन्त्रस्य प्राग्वदृष्यादिस्मरणादिकं विधाय मूलमन्त्रान्ते नमो देव्यै इति मन्त्रान्ते वा आत्मानम-

भिषिञ्चामीतितर्पणदशमांशतो मार्जयेत् ॥ इति **तर्पणमार्जनविधानम्** ॥
प्रत्यक्षहोमाद्यशक्तौ तानि यथासम्भवं सप्तशत्या नवार्णस्य नमो देव्यै इति
मन्त्रस्य वा तत्तच्चतुर्गुणद्विगुणान्यतरसङ्ख्यजपप्रत्याम्नायेन कार्याणि ॥ यथा
आचमनादिदेशकालसङ्कीर्तनान्ते, मया कृतस्य सप्तशतीपुरश्चरणजपस्य
दशांशहोमं तद्द्विगुणसङ्ख्यजपप्रत्याम्नायेनाहमाचरिष्ये इति सङ्कल्प्य प्राग्व-
दृष्यादिस्मरणन्यासादिसहितस्य साङ्गस्य देवीमाहात्म्यस्य षडावृत्तीः कुर्यात्
॥ ततस्तर्पणमार्जनपक्षे प्राग्वत्सङ्कल्पपूर्वकं नवार्णमन्त्रेण वा नमो देव्यै इति-
मन्त्रेण वा स्वद्विगुणजपसङ्ख्यया कार्ये ॥ तत्र तर्पणे, होमदशांशतस्तर्पणं
अमुकमन्त्रस्य द्विगुणजपप्रत्याम्नायेन करिष्ये ॥ मार्जने तर्पणदशांशतोऽमुकम-
न्त्रस्य द्विगुणजपप्रत्याम्नायेन मार्जनमितिसङ्कल्पे विशेषः ॥ ब्राह्मणभोजनादिकं
प्रत्यक्षमेव ॥ एकाधिककर्मणामेकासने करणे आद्यकर्मारम्भे आसनादि-
विधिरन्त्यकर्मान्ते च तद्विसर्जनादिकं कार्यम् ॥ **इति जपप्रत्याम्नायेन**
होमादिविधानम् ॥ आचार्यद्वारा जपादिकरणे नवार्णपुरश्चरणवत्तस्माज्जपस्य
श्रेयो गृहीत्वा तस्मै जपाद्यनुसारेण दक्षिणां दत्वा प्रत्यहं कुमारीपूजाद्यकरणे
जपावृत्तिसङ्ख्यया यथाशक्ति वा कुमारीः सम्पूज्य ताभिः सह होमदशांशत-
स्तर्पणमार्जनपक्षे मार्जनदशमांशतो ब्राह्मणसुवासिनीश्च भोजयित्वा दक्षिणा-
दिभिः प्रतोष्य स्वयं भुक्त्वा गृहीतनियमांस्त्यजेत् ॥ एवं पुरश्चरणेन सिद्ध-
सप्तशतीमहमन्त्रो नित्यनैमित्तिककाम्यकर्माणि कुर्यात् ॥ **इति सप्तशती-**
पुरश्चरणम् ॥

अथ नित्यचण्डीविधानं चण्डिकार्चनरहस्ये ॥ नित्यचण्ड्यादि-
जाप्यस्य विधानं ते वदाम्यहम् ॥ क्रमेण सर्वकार्याणां सिद्धये यज्ञपुण्यदम्
॥ आदिपदेन नवदुर्गाकालरात्रिनवचण्डीशतचण्डीसहस्रचण्डीनां ग्रहणम् ॥ शु-
क्लभूतमवष्टभ्य मासं प्रतिदिनं जपेत् ॥ सकृद्रहस्यसंयुक्तं चण्डिकाचरित-
त्रयम् ॥ दशांशहोमसहितं सोच्यते नित्यचण्डिका ॥ धनपुत्रयशोदात्री महा-

व्याधिविनाशिनी ॥ महाभयमहादुःखहन्त्री सौख्यप्रदायिनी ॥ इति ॥ (यस्य कस्यापि मासस्य दुष्टनक्षत्रादिदोषरहितां शुक्लचतुर्दशीमारभ्याग्रिममासस्य शुक्लत्रयोदश्यन्तं प्रतिदिनं रहस्यत्रयसहितं चण्डिकाचरितत्रयं सकृत्सकृज्जपेत् ॥ तिथिक्षये एकदिने आवृत्तिद्वयं वृद्धौ द्वितीयदिने अविच्छेदार्थमेकावृत्तिः ॥ रहस्यपदं सर्वाङ्गानामुपलक्षकम् ॥ इयं त्रिंशत्पाठात्मिका ॥ होमस्त्वावृत्तित्रयेण सप्तशत्याः ॥ अन्यत्सर्वं सप्तशतीपुरश्चरणवत् ॥ सङ्कल्पस्तु फलश्रुत्युक्तानिमित्तान्युद्दिश्य कार्यः ॥ यथा धनपुत्रयशोऽवाप्त्यर्थं महादुःखमहाभयमहाव्याधिपरिहाराद्यर्थं चेति । एकैकनिमित्तोद्देशेन कार्यत्वे एकैकनिमित्तमुच्चार्य सङ्कल्पः ॥ एतत्प्रयोगः पुरश्चरणवदेव । जपसङ्ख्यायां प्रतिदिनमेकैकावृत्तिर्न पुरश्चरणवदेकोत्तरावृत्तिवृद्धिरिति विशेषः ॥ **इति नित्यचण्डीविधानम्** ॥

अथ नवदुर्गाविधानं तत्रैव ॥

शुक्लषष्ठीं समारभ्य यावच्छुक्लचतुर्दशी ॥ नवदुर्गा विधातव्या सर्वकामफलप्रदा ॥ कलशं पञ्चरत्नाढ्यं सहकारदलैर्युतम् ॥ सवस्त्रं सम्प्रतिष्ठाप्य चण्डिकाग्रेऽम्भसा भृतम् ॥ समन्तात्पूजयेद्दिक्षु दिशां पालान् यथाक्रमम् ॥ चन्दनेन विलिप्ताङ्गः स्रग्वी न्यासपरायणः ॥ नवाहं रूपमेकैकं मौनी बद्धासनो जपेत् ॥ कवचादिरहस्यान्तं चण्डिकाचरितत्रयम् ॥ (एकैकरूपमेकैकामावृत्तिम् । रूपं तु श्लोकशब्दयोः ॥ ग्रन्थावृत्तौ स्वभावे चेति हेमचन्द्रः) चतुरस्रे समे कुण्डे समन्ताद्धस्तमात्रके ॥ एकावरणसंयुक्ते योनिमण्डलमण्डिते ॥ दशांशविधिना होममुक्तद्रव्येण साधयेत् ॥ (एकावरणसंयुक्ते एकमेखलायुक्ते) दिक्पालेभ्यः स्वस्वमन्त्रैर्जुहुयादुदितं हविः ॥ दानं दद्याद्द्विजातिभ्यो हेमधेन्वम्बरात्मकम् ॥ एवं कृते यद्यदिष्टं तत्सर्वं लभते ध्रुवम् ॥ हेमादिदानमन्त्राः प्रयोगे वक्ष्यन्ते ॥ नवदुर्गेतिविख्याता सर्वपापप्रणाशिनी ॥ सर्वैश्वर्यप्रदा भूप कुर्वतामविलम्बितम् ॥ **इति ॥ नवदुर्गाविधानम्** ॥ **अथैतत्प्रयोग उच्यते** साधकः शुक्लषष्ठीदिने दुर्योग-

रहिते कृतनित्यक्रिय आचमनादिदेशकालसङ्कीर्तनान्ते मम अमुककार्यसिद्ध्यर्थं
अद्यारभ्य शुक्लचतुर्दशीपर्यन्तं नवभिर्दिनैर्नवदुर्गाविधानं कारिष्ये ॥ इति सङ्कल्प्य
सम्भवे स्वस्तिवाचनादिकं सङ्कल्प्य कृत्वा च जपादिकर्मणि स्वस्याशक्तावा-
चार्यं वृणुयात् ॥ ततः कर्ता तान्त्रिकाचमनादि देशकालसङ्कीर्तनान्ते पुरश्चर-
णवन्नित्यजपसङ्कल्पं कृत्वा नित्यार्चोक्तविधिना अशक्तौ यथाशक्ति वा देवीं
सम्पूज्य तदग्रे जलपूर्णं पञ्चरत्नसहितं चूतपल्लवभूषितमुखं स्वर्णादिकल्पित-
कलशं यथाविधि संस्थाप्य । तस्य समन्तात्पूर्वाद्यष्टदिक्षु क्रमेणेन्द्राद्यष्टदि-
क्पालान् ऐशान्यैन्द्योर्मध्ये ब्रह्माणं नैर्ऋतीपश्चिमयोर्मध्ये अनन्तं च तत्तन्म-
न्त्रैरावाह्य सम्पूज्य च कलशपुरतः स्वयं चन्दनलिप्ताङ्गो धृतसुगन्धिपुष्पमालः
पुस्तकपूजनपूर्वकं पूर्वोक्तप्रकारेण साङ्गोपाङ्गस्य देवीमहात्म्यस्यैकं पाठं कृत्वा
सम्भवे कुमारीपूजनादिकं कुर्यात् ॥ एवं शुक्लचतुर्दशीपर्यन्तं प्रतिदिनं चन्द-
नानुलेपनपुष्पमालादिधारणपूर्वकमेकैकं पाठमिति नवपाठान् सम्पाद्य तिथिक्षये
एकस्मिन् दिने तिथिद्वयप्रयुक्तं पाठद्वयं वृद्धौ तद्दिनेऽप्येकमधिकं पाठं कृत्वा
सम्भवे प्रत्यहं कुमारीपूजनादिकं कृत्वान्त्यदिने साङ्गसप्तशत्या एकावृत्या
जपाङ्गीकृतपल्लवादिधर्मसहितं होमं सम्पाद्य । दिक्पालेभ्यस्तत्तन्मन्त्रैरुक्तं हविः
पाठसङ्ख्यया हुत्वा सुवर्णधेनुवस्त्रदानानि कुर्यात् ॥ तत्र सुवर्णदाने हिरण्यग-
र्भगर्भस्थमितिमन्त्रः ॥ धेनुदाने गवामङ्गेषु तिष्ठन्तीति ॥ वस्त्रदाने शरणं
सर्वलोकानां लज्जाया रक्षणं परम् ॥ सुवेषकारि वस्त्रत्वमतः शान्तिं
प्रयच्छ मे ॥ इति मन्त्रः ॥ ततः ब्राह्मणद्वारा जपादिकरणे श्रेयो
गृहीत्वा कुमारीपूजनभोजनब्राह्मणसुवासिनीभोजनादिकं यथाशक्ति कुर्यात् ॥
इति **नवदुर्गाविधानम्** ॥ **अथ कालरात्रिविधानं** तत्रैव ॥ कृष्णषष्ठीं
समारभ्य यावत् कृष्णचतुर्दशी ॥ कालरात्रिर्विधातव्या नवदुर्गाविधानवत् ॥
महाकालोद्भवं दुःखं कालरात्रिर्व्यपोहति ॥ महाकालो मृत्युः ॥ नवदुर्गा-
विधाने च यत्फलं परिकीर्तितम् ॥ कालरात्रिविधानेऽपि तत्फलं लभते ध्रुवम् ॥

इति ॥ उभयोः फलसाम्येऽपि मृत्युपरिहाररूपं कालरात्र्या अधिकम् ॥ तेन केवलमृत्युपरिहारार्थमनुष्ठाने सङ्कल्पे तथोहः कार्यः ॥ अस्याः सर्वः प्रयोगो नवदुर्गावत् ॥ **इति कालरात्रिविधानम् ॥ अथ नवचण्डीविधानं तत्रैव ॥** शरदृताविषे मासि शुक्लपक्षे नराधिप ॥ प्रतिपत्तिथिमारभ्य नवचण्डीं समारभेत् ॥ अत्रापि दिनशुद्धिरावश्यकी ॥ तेन तिथिक्षयवैधृत्यादिसत्वेनारम्भः ॥ तोरणाढ्ये शुभे स्थाने सुविताने स्वलङ्कृते ॥ पूर्वादिक्रमयोगेन दिग्देवीभ्यो बलिं हरेत् ॥ गन्धपुष्पाक्षतैर्धूपैर्दीपैश्चटुभिरुत्तमैः ॥ कादम्बरी गजारूढा उल्कास्यादजपृष्ठगा ॥ कराली महिपारूढा रक्ताक्षी प्रेतसंस्थिता ॥ श्वेतकुम्भीरगा श्वेता हरिता मृगवाहना (कुम्भीरो नक्रः) ॥ यक्षिणी सिंहपृष्ठस्था कङ्काली वृषवाहना ॥ हंसपृष्ठे सुरश्रेष्ठा सर्पराज्ञ्यहिवाहना ॥ अनेन विधिना दत्त्वा दिग्देवीभ्यो बलिं जपी ॥ (कादम्बर्याद्यष्टाभ्यः क्रमेण पूर्वाद्यष्टदिक्षु सुरश्रेष्ठायै ईशान्यैन्द्र्योर्मध्ये, सर्पराज्ञ्यै नैर्ऋतीप्रतीच्योर्मध्ये पायसबलिदानं कृत्वेत्यर्थः ॥) नवग्रहान् लोकपालान् दिशांपालांश्च पूजयेत् ॥ नवग्रहाः प्रसिद्धाः ॥ तत्र सूर्यं प्राच्याम्, सोममाग्नेय्याम्, भौमं दक्षिणस्याम्, बुधमैशान्याम्, बृहस्पतिमुत्तरस्याम्, शुक्रं प्राच्याम्, शनिं प्रतीच्याम्, राहुं नैर्ऋत्याम्, केतुं वायव्यां च तत्तन्मन्त्रैः पूजयेत् ॥ विनायकस्तथा दुर्गावायुराकाश एव च ॥ अश्विनौ च महात्मानौ लोकपालाः प्रकीर्तिताः ॥ इत्युक्तान् लोकपालान् उत्तरस्यां पूजयेत् ॥ इन्द्राद्यष्टलोकपालान् क्रमेण प्राच्याद्यष्टदिक्षु, ब्रह्माणमीशानैन्द्रयोर्मध्ये, अनन्तं नैर्ऋतवरुणमध्ये च पूजयेत् ॥ देवीमहोत्सवे सर्वेभ्य एव पूजनपूर्वकं बलिदानमुक्तम् ॥ कलशं सर्वरत्नाढ्यं हेमवस्त्रोदकान्वितम् ॥ सम्प्रतिष्ठाप्य सम्पूज्य चण्डिकार्चनमारभेत् ॥ इदं कलशस्थापनं देवतास्थापनार्थम् ॥ तेन नवरात्रवत् कलशस्थापनं कृत्वा तदुपरिदेवतास्थापनं कार्यमिति पर्यवस्यति ॥ पूर्वोक्तेन विधानेन गन्धपुष्पैरनुत्तमैः ॥ वस्त्रालङ्कारकस्तूरीसिन्दूरागुरुकुङ्कुमैः ॥ धूपैर्दीपैर्बहुविधैर्नैवेद्यैवर्णसंस्थया ॥ (वर्णसंस्थया

स्वस्ववर्णोचितधर्मेणेत्यर्थः ॥) कृत्वान्यत्पूर्ववत्सर्वं जपेदेकाग्रमानसः ॥ सकृद्रहस्यसंयुक्तं चण्डिकाचरितत्रयम् ॥ (अन्यत्सर्वं चन्दनलेपनपुष्पमालाधारणादिकं पूर्ववन्नवदुर्गाविधानोक्तप्रकारेण कृत्वा । रहस्यसंयुक्तं चण्डिकाचारितत्रयं सकृज्जपेदित्यर्थः । सकृज्जपेदित्युक्तिः प्रथमदिनाभिप्रायेण । रहस्यपदं सर्वाङ्गोपलक्षकम् ।) कुमारीर्विप्रमुख्यांश्च भोजयेद्विधिपूर्वकम् ॥ यदाद्यदिवसे कुर्याच्चण्डिकापूजनादिकम् ॥ द्विगुणं तद्द्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि ॥ नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ॥ एकाहारव्रती कुर्यात्सत्यादिनियमैर्वृतः ॥ (पूजायां वृद्धिरुपचारद्रव्यादिप्रमाणानाम्) कृत्वा होमादिकं सर्वं नवदुर्गाविधानवत् ॥ कादम्बर्यादिदेवीभ्यो ग्रहेभ्यो जुहुयाद्धविः ॥ लोकपालदिगीशेभ्यस्तत्तन्मन्त्रैर्यथाविधि ॥ इयं पञ्चचत्वारिंशत्पाठात्मिका ॥ अत्र होमः साङ्गायाः सप्तशत्याः पञ्चावृत्तिभिरिति साम्प्रदायिकाः ॥ वित्तशाठ्यं परित्यज्य कुर्यादाचार्यतोषणम् ॥ वस्त्राङ्गुलीयभूधेनुवाजिहेमप्रदानतः ॥ अशक्तो निष्कमेकं तु दद्यात्तस्मै विचक्षणः । (चतुःकर्षमितं सुवर्णं निष्कः) य एतेन विधानेन करोति नवचण्डिकाम् ॥ ऐन्द्रब्रह्मादयो भागास्तमायान्त्युपसेवितुम् ॥ अपुत्रो लभते पुत्रमधनः सधनो भवेत् ॥ व्याधयः सङ्क्षयं यान्ति शत्रवश्च सुदारुणाः ॥ न तस्यास्ति भयं किञ्चित् व्यालचौराग्निवायुजम् ॥ **इति नवचण्डीविधानम्** ॥

अथैतत्प्रयोगः ॥ आश्विनशुक्लप्रतिपदि दुर्योगरहितायां कृताभ्यङ्गस्नानो नित्यकर्म कृत्वा तोरणवितानाद्यलङ्कृतस्थाने आचमनादिदेशकालसङ्कीर्तनान्तं कृत्वा मम अमुककार्यसिद्ध्यर्थमद्यारभ्य महानवमीपर्यन्तं नवचण्डीविधानं करिष्ये ॥ इति सङ्कल्प्य सम्भवे स्वस्तिवाचनादिकं जपाद्यशक्ताचाचार्यवरणं च कृत्वा । जपकर्ता आचार्यश्चेत् प्रथमदिने यजमानेन वृतोऽहं तदाज्ञया नवचण्डीविधानं करिष्ये ॥ इति पृथक्सङ्कल्पं कुर्यात् ॥ ततः कर्ता आचमनादि विधाय नवचण्डयङ्गत्वेन दिग्देवताभ्यः पूजनपूर्वकं बलिदानं

करिष्ये इति सङ्कल्प्य । प्राच्यां, कादम्बरि गजारूढे वज्रहस्ते एह्येहि गन्धपुष्पादिसहितमिमं पायसबलिं गृह्ण गृह्ण ममेप्सितं कुरु कुरु स्वाहा ॥ कादम्बर्यै नमः पायसबलिं समर्पयामि ॥ इति बलिं दत्त्वा जलमुत्सृजेत् ॥ एवमग्रेऽपि ज्ञेयम् ॥ आग्नेय्यां, उल्के अजारूढे शक्तिहस्ते एह्येहि० उल्कायै नमः पायस० ॥ दक्षिणस्यां, करालिमहिषारूढे दण्डहस्ते एह्येहि० करात्यै नमः पायस० ॥ नैर्ऋत्यां, रक्ताक्षिप्रेतारूढे खड्गहस्ते एह्येहि० रक्ताक्ष्यै नमः पायस० ॥ प्रतीच्यां, श्वेते श्वेतनक्रारूढे पाशहस्ते एह्येहि० श्वेतायै नमः पायस० ॥ वायव्यां, हरिते मृगवाहने अङ्कुशहस्ते एह्येहि० हरितायै नमः पायस० ॥ उत्तरस्यां, यक्षिणि सिंहारूढे गदाहस्ते एह्येहि० यक्षिण्यै नमः पायस० ॥ ऐशान्यां कङ्कालिवृषभारूढे त्रिशूलहस्ते एह्येहि० गन्धपु० कङ्काल्यै नमः पायस० ॥ ऐशानीपूर्वयोर्मध्ये, सुरश्रेष्ठे हंसारूढे दण्डकमण्डलुहस्ते एह्येहि० सुरश्रेष्ठायै नमः पायस० ॥ नैर्ऋतीपश्चिमयोर्मध्ये, सर्पराज्ञि अहिवाहने चक्रहस्ते एह्येहि० सर्पराज्ञ्यै नमः पायस० ॥ इति ॥ **अथ ग्रहेभ्योबलिदानम्** ॥ तत्र प्राच्यां सूर्यसप्ताश्वरथारूढ पद्माभयहस्त एह्येहि गन्धपुष्पादिसहितमिमं पायसबलिं समर्पयामि ॥ आग्नेय्यां, सोम दशश्वेताश्वरथारूढ गदावरहस्थ एह्येहि० ॥ दक्षिणस्यां, भौम रक्तमेषरथारूढ शक्तिशूलगदाखड्गहस्त एह्येहि० ॥ ऐशान्यां, बुध चतुःसिंहरथारूढ खड्गखेटगदावरहस्त एह्येहि० ॥ उदीच्यां बृहस्पते पीताश्वरथारूढ दण्डकमण्डल्वक्षसूत्रवरहस्त एह्येहि० ॥ पुनः प्राच्यां, शुक्र शुक्लाश्वरथारूढ दण्डकमण्डल्वक्षसूत्रवरहस्त एह्येहि० ॥ प्रतीच्यां, शनैश्चर नीलगृध्ररथारूढ चापतूणखङ्गाभहयस्त एह्येहि० ॥ नैर्ऋत्यां, राहो कृष्णसिंहरथारूढ खड्गचर्मशूलवरहस्त एह्येहि० ॥ वायव्यां, केतो चित्रकपोतरथारूढ गदावरहस्त एह्येहि० ॥ **इति ग्रहेभ्यो बलिदानम्** ॥

अथ लोकपालेभ्यः ॥ उदीच्यां विनायक मूषकारूढ परशुहस्त एह्येहि गन्धपुष्पादिसमन्वितमिमं पायसबलिं गृह्ण गृह्ण ममेप्सितं कुरु कुरु

स्वाहा ॥ विनायकाय नमः पायसबलिं समर्पयामि ॥ दुर्गे सिंहारूढे शूलहस्ते एह्येहि० ॥ वायो मृगारूढ अङ्कुशहस्त एह्येहि० ॥ आकाश एह्येहि० ॥ आश्विनावोषधिहस्तावेतमेतं गन्धपुष्पादिसहितामिमं बलिं गृह्णीतं गृह्णीतं ममेप्सितं कुरुतं कुरुतं स्वाहा अश्विभ्यां नमः पायस बलिं० ॥ **इति लोकपालबलिदानम्** ॥ **अथ दिक्पालेभ्यः** प्राच्यां, इन्द्रगजारूढ वज्रहस्त एह्येहि० ॥ आग्नेय्यां, अग्ने मेषारूढ शक्तिहस्त एह्येहि० ॥ दक्षिणस्यां, यम महिषारूढ दण्डहस्त एह्येहि० ॥ नैर्ऋत्यां, निर्ऋते प्रेतारूढ खड्गहस्त एह्येहि० ॥ प्रतीच्यां, वरुण नक्रारूढ पाशहस्त एह्येहि० ॥ वायव्यां वायो मृगारूढ अङ्कुशहस्त एह्येहि० ॥ उदीच्यां, कुबेर सिंहारूढ गदाहस्त एह्येहि० ॥ ऐशान्यां, ईशान वृषभारूढ त्रिशूलहस्त एह्येहि० ॥ ऐशान्यैन्द्रयोर्मध्ये, ब्रह्मन् हंसारूढ दण्डकमण्डलुहस्त एह्येहि० ॥ नैर्ऋती प्रतीच्योर्मध्ये, सर्पराज अहिवाहन चक्रहस्त एह्येहि० ॥ इति बलीन् दत्त्वा तान्त्रिकप्रकारेण द्विराचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य पुरश्चरणवन्नित्यसङ्कल्पं कृत्वा तदङ्गतया महालक्ष्मीपूजां करिष्ये इति च सङ्कल्प्य नित्यार्चाक्रमेणासनविध्यादिद्वारदेवतापूजनान्तं कृत्वा नवरात्रोक्तविधिना कलशं संस्थाप्य पूर्णपात्रे नित्यपूजोक्ता पीठदेवताःसम्पूज्य तदुपरि रक्तवस्त्रादौ कुङ्कुमेन नित्यपूजोक्तं यन्त्रं विलिख्य तत्र देवीप्रतिमां संस्थाप्य नित्यक्रमेण सम्पूज्य अशक्तौ यथाशक्ति सम्पूज्य पुस्तकोपरिवाचने पुस्तकपूजां कृत्वा पूर्वोत्तराङ्गसहितयाः सूक्तद्वयनवार्णमन्त्रजपसम्पुटितायाः सप्तशत्या एकामावृत्तिं कृत्वा कुमारिकां सम्पूज्य भोजयित्वा सम्भवे यथाशक्ति ब्राह्मणसुवासिनीश्च भोजयित्वा स्वयमेकभुक्त हविष्याशनादिं यथासम्भवं कुर्यात् ॥ एवं प्रथमदिने कृत्वा द्वितीयादिदिनेषु सप्तशत्यावृत्तिं कुमारीपूजनाद्येकोत्तरवृद्ध्या कुर्यात् ॥ मध्ये तिथिक्षयवृद्ध्योः सत्त्वे तत्र कर्तव्यप्रकारः पूर्वमुक्तः ॥ प्रसङ्गे सति तद्दिने जपार्थमेकोऽधिका वा ब्राह्मणा वरणीयाः ॥ एवं नवमीपर्यन्तं कृत्वा दशमीदिने जपोक्तक्रमेण वक्ष्यमाण-

प्रकारेण सप्तशत्याः पञ्चावृत्तिभिर्होमं सम्पाद्य कादम्बर्यादिभ्यो नवग्रहेभ्यो लोकपालदिक्पालेभ्यश्च तत्तद्द्रव्याणि पाठसङ्ख्यया हुत्वा आचार्यद्वारा जपादिकरणे तस्मात् कर्मश्रेयो गृहीत्वा ब्राह्मणेभ्यो वस्त्राङ्गुलीयकभूमिधेनुवाजिहेमदानानि कृत्वा यथाशक्ति ब्राह्मणसुवासिनीकुमारीर्भोजयित्वा स्वयं गृहीतनियमत्यागपुरःसरं भुञ्जीत ॥ हेमधेनुवस्त्रदानमन्त्राः प्रागुक्ताः ॥ अथाङ्गुलीयकस्य ॥ सर्वभूषाधिकं हेम निर्मितं चाङ्गुलीयकम् ॥ विप्राय सम्प्रयच्छामि तन्मे शान्तिं प्रयच्छतु ॥ इति ॥ अथ भूमेः ॥ सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता ॥ अनन्तस्योत्तमाङ्गस्था मम शान्तिं प्रयच्छतु ॥ इति ॥ अथाश्वस्य ॥ वाहनेषु च सर्वेषु शीघ्रगं राजवल्लभम् ॥ वाजिनं सम्प्रयच्छामि स मे शान्ति प्रयच्छतु ॥ इति ॥ अन्यत्सर्वं सप्तशतीपुरश्चरणवत् ॥ **इति नवचण्डीविधानम्** ॥

अथ शतचण्डीविधानम् ॥ तत्रैव ॥ शतचण्डीविधानं ते यथावत् कथयाम्यहम् ॥ सुघोरायामनावृष्ट्यां भूकम्पे च सुदारुणे ॥ परचक्रागमे गात्रे क्षयरोगे समुत्थिते ॥ राज्यावाप्त्यादिकामेषु स्वायुष्मत्सुतजन्मने ॥ महोपघातनाशाय पञ्चविंशतियोजने ॥ देशे सर्वत्र शान्त्यर्थं शतचण्डीं समारभेत् ॥ चतुर्दिनं जपं कृत्वा पञ्चमे होममाचरेत् ॥ अष्टमीनवमीचतुर्दश्यन्यतमतिथौ यथासमाप्तिर्भवेत्तथारम्भः कार्य इति **साम्प्रदायिकाः** ॥ यत्तु त्रिपञ्चसप्तनवभिरेकादशभिरेव वा ॥ दिनैः पक्षेण वा क्षिपं विदध्याच्चण्डिकामखम् ॥ इति वचनं क्वचित् दृश्यते तन्निर्मूलमिति **नागेशभट्टाः** ॥ अत्र कुण्डमण्डपविधानमावश्यकम् ॥ तदुक्तं **रुद्रयामले** ॥ कृत्वा दृढं चतुर्द्वारं पताकातोरणान्वितम् ॥ दुकूलैर्वेष्टितस्तम्भं कदलीराजिराजितम् ॥ आम्रपल्लवमालाभिः शोभितद्वारमुत्तमम् ॥ मण्डपं कुण्डवेद्याढ्यं शतचण्डीं समारभेत् ॥ इति ॥ मण्डपविधानं **स्मृतिकौस्तुभे** अयुतहोमप्रकरणे विस्तरेणोक्तं तत्रैव द्रष्टव्यम् ॥ मण्डपपूजाविधिर्**देवीमहोत्सवे** द्रष्टव्यः ॥ कुण्डविधानं होमप्रकरणे

वक्ष्यते ॥ सदाचाराः कुलीना ये ह्रीमन्तः सत्यवादिनः ॥ चण्डिकापाठसम्पूर्णा दयावन्तो जितेन्द्रिया ॥ (चण्डिकापाठसम्पूर्णाः सप्तशतीजपविधानविदः ।). ईदृग्लक्षणसम्पन्नान् दम्भमोहविवर्जितान् ॥ दश विप्रान् समभ्यर्च्य साचार्यान्मधुपर्कतः ॥ यत्तु अयुग्मैर्ब्राह्मणैः कार्यं शतावृत्तं तु वृद्धये ॥ युग्मैर्विप्रैः कृतं यत्तु निष्फलं तद्भवेदिह ॥ इति वचनं क्वचिद्दृश्यते तन्निर्मूलमिति **नागेशभट्टाः** ॥ (अयुग्मैः विषमसङ्ख्यैः । युग्मै समसङ्ख्यैः ।) अर्चितास्ते द्विजश्रेष्ठाः सम्पूर्णास्तुष्टमानसाः ॥ यजमानं सपत्नीकं सुतबन्धुसमन्वितम् ॥ वेदमन्त्राक्षतैः पूर्वं कुर्वन्ति स्वस्तिवाचनम् ॥ कृतस्वस्त्ययनो विप्रैर्वेदवादित्रनिस्वनैः ॥ चण्डिकामण्डपं यायात् परिवारसमन्वितः ॥ पश्चिमद्वारमार्गेण प्रविश्य क्रतुमण्डपम् ॥ ददाति पूजनानुज्ञां दैशिकाय कृताञ्जलिः ॥ दैशिकः सर्वतन्त्रज्ञो नवभिर्ब्राह्मणैः सह ॥ मण्डपे कलशौ द्वौ द्वौ द्वारे द्वारे निवेशयेत् ॥ गालितोदकसम्पूर्णौ आम्रपल्लवशोभितौ ॥ मण्डपस्य चतुर्दिक्षु दत्त्वा भूतबलिं बहिः ॥ **भूतबलि-विधानं** प्रयोगे वक्ष्यते ॥ दिग्देवीश्च ग्रहान् सर्वान् लोकपालसमान्वितान् ॥ दिशां पालांश्च सम्पूज्य चण्डिकार्चनमारभेत् ॥ अत्र सम्पूज्येत्यनेन पूजनपूर्वकं बलिदानं विवक्षितम् ॥ तत्प्रयोगः प्राङ् नवचण्ड्यामुक्तः ॥ उपविश्यासने वेद्यां बध्वा पद्मासनं दृढम् ॥ उपस्पृश्योदकं स्मृत्वा चण्डिकां देववन्दिताम् ॥ पद्मासनलक्षणं **नित्यार्चाप्रकरणे** उक्तम् ॥ (उपस्पृश्याचम्य ।) प्राणायामविशुद्धात्मा दशैकन्यासभूषितः ॥ चण्डिकापूजनं कुर्याद्विशेषेण समन्वितम् ॥ (दशैकन्यासभूषितः कृतैकादशन्यास इत्यर्थः ।) देवीप्रतिमायाः सुवर्णपरिमाणमुक्तं **रुद्रयामले** ॥ मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै ॥ तदर्धेन तदर्धेन तदर्धेनाथवा पुनः ॥ इति ॥ कस्तूरीचन्दनं जात्यं सकर्पूरं च कुङ्कुमम् ॥ पलद्वयं सुसम्पूर्णमनुलेपनमाहरेत् ॥ (जात्यं जातिफलम् ।) चन्दनं पलमितं अन्यच्चतुष्टयम् कर्षकर्षमेव पलद्वयमिति **कल्पवल्लीकारः** ॥ दिव्यवस्त्रमलङ्कारं

हेमगद्याणकत्रयम् ॥ लक्षपुष्पचतुर्थांशं गुग्गुलोश्च पलत्रयम् ॥ (गद्याणं लौकिकतोलकार्धमिति **कल्पवल्लीकारः** ॥ तत्त्रितयमितसुवर्णघटितमलङ्कारमित्यर्थः ॥ लक्षपुष्पचतुर्थांशं पञ्चविंशतिसहस्राणि पुष्पाणि ॥) दीपानां विंशतिं श्रेष्ठां मण्डपे जपसाधनम् ॥ कुडवौ द्वौ हविष्यान्नं नैवेद्यं सरसं शुचि ॥ (जपसाधनं मालासनादि) नैवेद्यार्थे द्विकुडवमितं हविष्यान्नम् ॥ कुडवप्रमाणं तु मृद्वेणुकाष्ठलोहादेः पात्रं यच्चतुरङ्गुलम् ॥ विस्तीर्णं च तथोच्चं च तन्मानं कुडवं वदेत् ॥ इति ॥ अन्यत्र तु । पञ्चगुञ्जामितो माषः कर्षो माषास्तु षोडश ॥ पलं कर्षास्तु चत्वारः कुडवस्तच्चतुष्टयम् ॥ इत्युक्तम् ॥ हविष्यान्नं नवरात्रप्रकरणे उक्तम् ॥ कर्पूरयुक्तताम्बूलशतद्वयमनुद्वयम् ॥ नवचण्डीविधानेन महालक्ष्मीं प्रपूजयेत् ॥ यथाविधि स्थापितकलशोपरि देवीप्रतिमां संस्थाप्य पूजयेदित्यर्थः ॥ कलशस्थापनं च लिङ्गतो भद्रे ब्रह्मादिमण्डलदेवतास्थापनपूर्वकमिति **शान्तिसारादयः** ॥ लिङ्गतो भद्रलक्षणं ब्रह्मादिमण्डलदेवताश्च व्रतग्रन्थतो ज्ञेयः ॥ दद्याच्च नवविप्रेभ्य आचार्यश्चण्डिकार्चकः ॥ जपकर्मप्रसिद्ध्यर्थमनुज्ञां मानपूर्वकम् ॥ ततोऽनुज्ञामनुप्राप्य वेद्यामाचार्यसन्निधौ ॥ मृद्वासनेषूपविष्टाः सुसन्तुष्टाः सुनिश्चलाः ॥ न्यासध्यानसमायुक्ता नासाभ्याशावलोकिनः ॥ नासाभ्याशावलोकिन इत्युक्त्या पुस्तकं विनैव पाठः सूचितः ॥ सुगन्धिपुष्पमालाढ्याश्चण्डिकाचरितत्रयम् ॥ सरहस्यमृषिच्छन्दो देवताशक्तिसंयुतम् ॥ बीजेन च समायुक्तमुपांशुन्यासभूषितम् ॥ सरहस्यमित्येतत् सर्वाङ्गोपलक्षकम् ॥ शक्तिसंयुतमित्यनेन चण्डिकार्चनरहस्योक्तमृष्यादिस्मरणं कर्तव्यं न डामरोक्तमिति सूचितम्॥ **डामरोक्ते** शक्तीनामनुक्तेः ॥ अतएवात्र पुरश्चरणप्रकरणे चण्डिकार्चनरहस्योक्तमेव ऋष्यादिस्मरणं स्वीकृतम् ॥ उपांशु इत्येतत् जपक्रियाविशेषणम् ॥ जपेयू रूपमेकैकं मौनिनस्त्यक्तमत्सराः ॥ (एकैकरूपमेकैकावृत्तिम् ॥ रूपशब्दस्यावृत्तिवाचकत्वं हैमकोशोपन्यासेन प्राग्दर्शितम् ॥ त्यक्तमत्सराः पाठशैघ्र्या-

दिविषयकपरस्परसङ्घर्षरहिताः ॥) समुत्थाय ततः कुर्युरेकां सर्वे प्रदक्षिणाम् ॥ चण्डिकां सुनमस्कारैः परितोष्य पुनः पुनः ॥ तत्र शूलेन पाहि नो देवीतिश्लोकचतुष्टयेनैका प्रदक्षिणा ॥ नमो देव्यै महादेव्यै इतिश्लोकपञ्चकेन पञ्च नमस्काराः इति प्राक् **नित्यार्चाप्रकाशे** उक्तम् ॥ उपविश्यासनेपूक्तैः श्लोकैः सर्वार्थसाधकैः ॥ प्रार्थयेयुः पञ्चभिश्च महालक्ष्मीं धृतव्रताः ॥ (सर्वार्थसाधकैः पञ्चभिः श्लोकैः सर्वस्वरूपे इत्यादिभिरेकादशाध्यायोक्तैः ।) कुमार्यो दश सम्पूज्या भोज्या विप्रा दशोत्तमाः ॥ दश कुमार्यः पूज्या भोज्याश्च । दश विप्राः जापकेभ्योऽन्ये ॥ महाकालीं महालक्ष्मीं महासरस्वतीं जपन् ॥ भोजयेत् परया भक्त्या आचार्यादि दश द्विजान् ॥ ततो भक्तिसमायुक्तो भुञ्जीयाद्यज्ञकृत् पुमान् ॥ सत्कथाभिः सुगीतैश्च शुभवादित्रनिस्वनैः पूजनैः प्रेक्षणीयैश्च वेदपाठैर्निशा नयेत् ॥ (प्रेक्षणीयैर्नृत्यादिभिः ।) द्वितीये दिवसे स्नात्वा आचार्यो नवभिर्द्विजैः ॥ पूर्वस्माद्द्विगुणं कुर्याच्चण्डिकापूजनादिकम् ॥ कृते च पूजने विप्रा जपेयुर्द्विगुणं जपम् ॥ द्विगुणं च प्रकर्तव्यं कुमारीपूजनादिकम् ॥ तृतीयेऽहनि तत्सर्वं त्रिगुणं च सजागरम् ॥ चतुर्थे दिवसे कुर्युः सम्यक् सर्वे चतुर्गुणम् ॥ महाजागरणोपेतं होमः स्यात्पञ्चमेऽहनि ॥ एकैकब्राह्मणेन चतुर्षु दिनेषु मिलित्वा नवार्णमन्त्रस्यायुतायुतजपश्च कार्यः ॥ तदुक्तं **मन्त्रमहोदधौ** ॥ नवार्णं चण्डिकामन्त्रं जपेयुश्चायुतं पृथक् ॥ इति ॥ (पृथक् पार्थक्येन । एकैको ब्राह्मण इत्यर्थः ॥ स जपश्च एकैकावृत्तिवृद्ध्या सप्तशतीजपवत् प्रतिदिनमेकैकसहस्रवृद्ध्या कार्यः ॥ तथा च प्रथमदिने एकैकब्राह्मणेन नवार्णस्य सहस्रं सहस्रं जपः ॥ सप्तशत्या एकैका आवृत्तिश्च कार्या ॥ द्वितीयदिने नवार्णस्य द्वे द्वे सहस्रे जपः ॥ सप्तशत्या द्वे द्वे आवृत्ती ॥ तृतीयदिने नवार्णस्य त्रीणि त्रीणि सहस्राणि जपः ॥ सप्तशत्यास्तिस्रस्तिस्र आवृत्तयः ॥ चतुर्थदिने चत्वारि चत्वारि सहस्राणि चत्वारि सहस्राणि नवार्णजपः, चतस्रश्चतस्रः सप्तशत्यावृत्तयश्च ॥ एवं

द्विनचतुष्टये मिलित्वा प्रतिब्राह्मणं नवार्णस्यायुतायुतजपः । सप्तशत्या दशदशावृत्तयश्च भवन्ति ॥ सर्वेषां सम्भूय नवार्णस्य लक्षजपः सप्तशत्याः शतावृत्तयश्च ॥ एवं दिनक्रमेण पूजोपचारद्रव्याणां कुमारीपूजनभोजनब्राह्मणभोजनजागरादिकृत्यानां च द्वैगुण्यत्रैगुण्यादिकं ज्ञेयम् ॥ तच्च प्रयोगे स्फुटीभविष्यति ॥ पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितम् ॥ जुहोत्युक्तविधिं कृत्वा दशांशेन नृपोत्तम ॥ (उक्तविधिमग्निस्थापनपात्रासादनपायसश्रपणादिकं होमोपयुक्तविधिं) दशांशेन नवार्णस्यायुतेन सप्तशत्या दशावृत्तिभिश्चेत्यर्थः ॥ जपहोमे तु सम्पूर्णे दिग्देवीनां शतं शतम् ॥ होतव्यं नाममन्त्रैश्च हविषान्नेन सादरम् ॥ गृहेभ्यो वैदिकैर्मन्त्रैः समिदाज्यचरूंस्तिलान् ॥ शतं शतं क्रमाद्द्युः फलपुष्पं शतं शतम् ॥ लोकेशादिक्पतीनां च होमे सर्पिश्चरूंस्तिलान् ॥ आचार्यादिद्विजाः सर्वे जुहुयुस्ते शतं शतम् ॥ स्तम्भद्वये स्रुचं कृत्वा यजमानः स्वलंकृतः ॥ घृतकुम्भदशांशेन दद्यात् पूर्णाहुतिं स्वयम् ॥ मूर्धानं मन्त्रपाठेन नवार्णसहितेन च ॥ कुम्भप्रमाणं तु ॥ पञ्चगुञ्जामितो माषः कर्षो माषास्तु षोडश ॥ पलं कर्षास्तु चत्वारः कुडवस्तच्चतुष्टयम् ॥ चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थस्तथाढकः ॥ चतुर्भिराढकैर्द्रोणः कुम्भो द्रोणद्वयं स्मृतम् ॥ इति ॥ तथा चाष्टाचत्वारिंशदधिकद्विसहस्रकर्षाः कुम्भ इति फलितम् ॥ तद्दशांशश्च किञ्चिदूनपञ्चाधिककर्षशतद्वयम् ॥ ततो देव्यै जपं होमं निवेद्य च मनोरथम् ॥ ब्रह्मणे निष्कषट्काढ्यं दद्याद्गोमिथुनद्वयम् ॥ दद्याद्गोमिथुनान्यष्टावाचार्याय च भक्तिमान् ॥ यस्याः प्रभावमतुलं श्लोकमुक्त्वा कृताञ्जलिः ॥ चतुर्विंशतिसङ्ख्याकैरथ निष्कैः समर्च्य तम् ॥ एकैकमन्यविप्रेभ्यो दद्याद्गोमिथुनं शुभम् ॥ निष्कत्रयसमायुक्तं वस्त्रालङ्कारसंयुतम् ॥ वस्त्रालङ्कारसंयुतमित्यस्य सर्वत्र सम्बन्धः ॥ अत्र गोमिथुनपदनैको गौरेको वृषभश्चेति द्वयं ज्ञेयम् ॥ तत्र तयोः प्रत्यक्षत्वाभावे, गवामभावे निष्कं स्यात्तदर्धं पादमेव वा ॥ वृषमूल्यं तु षट्कर्षास्तदर्धं च तदर्धकमित्युक्तं मूल्यं देयम् ॥

अशीतिगुञ्जापारिमितं द्रव्यमेकः कर्षः ॥ कर्षचतुष्टयं निष्कः ॥ स चात्र यजमानशक्त्यनुसारेण सुवर्णरूप्यान्यतरद्द्रव्यस्य ग्राह्यः ॥ दीनारेऽपि च निष्कोऽस्त्रीत्यमराद्दीनारवाचकोऽपि निष्कशब्दः ॥ व्यावहारिको रूप्यको दीनार इति बहवः ॥ **मन्त्रमहोदधौ** निष्कस्सुवर्णमथवा प्रत्येकं दक्षिणां दिशेदित्युक्तम् ॥ कर्षमात्रं हिरण्यं सुवर्णः ॥ सुस्थितं स्वासने शान्तं यजमानं महोत्सवम् ॥ कुङ्कुमाक्ताक्षतान् दूर्वाः सुगन्धिचन्दनं दधि ॥ आदायादाय ते विप्राः आचार्याद्याः सुपूजिताः ॥ स्तवानां च चतुर्णां तु महालक्ष्मीपरायणाः ॥ एकैकं श्लोकमुच्चार्य दद्युराशिषमुत्तमाम् ॥ सभार्यः ससुतः पूर्णलब्ध्वाशीर्वादमङ्गलः ॥ रक्तपुष्पाञ्जलिं दद्याच्चण्डिकां च विसर्जयेत् ॥ भूरिदानं ततो दद्यान्महालक्ष्मीप्रतुष्टये ॥ तत्र विशेषतो दानान्युक्तानि रुद्र**यामले** ॥ कपिलां गां श्वेतमार्णि नीलाश्वं छत्रचामरे ॥ दद्याद् द्विजेभ्यो दुर्गायाः प्रीतये विधिपूर्वकम् ॥ इति ॥ अभिषेकं ततः कुर्युर्यजमानस्य ऋत्विजः ॥ यजमानस्ततश्चैव पुण्यवादित्रनिस्वनैः ॥ प्रविशेच्छान्तिपाठैश्च तोरणाढ्यं स्वमालयम् ॥ सभार्याबान्धवसुतः स्मरंश्चित्तेन चाण्डिकाम् ॥ शतचण्डीविधानस्य कृतेन सुकृतेन हि ॥ महालक्ष्मीर्ददात्यस्मै त्रैलोक्यसुखमुत्तमम् ॥ यद्यत्कार्यं समुद्दिश्य क्रियते शतचण्डिका ॥ तत्तत्तस्य महालक्ष्मीः स्वयमाशु करोति वै ॥ इति **शतचण्डीविधानम्** ॥

अथैतत्प्रयोगः ॥ शतचण्डीं चिकीर्षुः शुभकाले, मण्डपादिकरणपक्षे तत्स्थाने गणेशकूर्मशेषवसुधाः पृथक् पृथक् सम्पूज्य ताम्रपात्रेऽर्घ्यमादाय जानुभ्यामवनौ स्थित्वा । आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ॥ उद्धृतासि वराहेण सशैलवनकानना ॥ मण्डपं कारयाम्यद्य त्वदूर्ध्वं शुभलक्षणम् ॥ गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भव ॥ इति भूम्ये अर्घ्यं दत्वा तदुपरि षोडशस्तम्भं षोडशहस्तं चतुर्द्वारं मण्डपं कौस्तुभोक्तप्रकारेण विधाय । तन्मध्ये देवतास्थापनार्थं हस्तोच्छ्रितां मण्डपतृतीयांशायामविस्तारा-

मष्टकोणां चतुष्कोणां वा वेदीं कृत्वा पश्चिमे वक्ष्यमाणप्रकारं कुण्डं कृत्वा मण्डपोपारि ध्वजंपताकोच्छ्रयणं कुर्यात् ॥ ततः शतचण्ड्युक्तकाले यजमानः कृतमङ्गलस्नानो रक्तकौशेयवसनो धृतकुङ्कुमतिलकः स्वनित्याह्निकं निर्वर्त्य वाद्यघोषपुरःसरं मण्डपसमीपमागत्य भद्रं कर्णेभिरिति मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेणान्तःप्रविश्यासनोपविष्ट आचम्य प्राणानायम्य सुमुखश्चेत्यादि मङ्गलानि पठित्वा देशकालौ सङ्कीर्त्य, मम सकुटुम्बस्य सपरिवारस्य सर्वापच्छान्तिपूर्वकदीर्घायुर्विपुलैश्वर्यपुत्रपौत्राद्यपरिच्छिन्नसन्ततिस्थिरलक्ष्मीकीर्तिलाभरोगनिवृत्तिशत्रुपराजयाद्यभीष्टसिद्ध्यर्थं (विशेषकामे सति तं चोक्त्वा) ब्राह्मणद्वारा शतचण्डीं कारिष्ये ॥ तदङ्गतया निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं स्वस्तिपुण्याहवाचनं नान्दीश्राद्धं जपाद्यर्थमाचार्यादिवरणं च करिष्ये ॥ इति सङ्कल्प्य गणपतिपूजनादि कृत्वा स्वस्य ब्राह्मणस्य च शाखासूत्रप्रवरगोत्रनामान्युक्त्वा अस्मिन् शतचण्डीकर्मणि जपाद्यर्थमाचार्यं त्वां वृणे इत्येकं, ब्रह्माणं त्वामिति द्वितीयं, ऋत्विजं त्वामित्यन्यानष्ट ऋत्विजश्चेति दश ब्राह्मणान् वृणुयात् ॥ सर्वान् मधुपर्कविधिना सम्पूज्य तेभ्यो वस्त्रयुग्मजलकुम्भाचमनपात्रजपमालासनादिकं दत्त्वा आचार्यायाङ्गुलीयककर्णभूषणादिकं च दद्याच्छक्त्या सर्वेभ्योऽपि ॥ तत आचार्य आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य यजमानेन वृतोहमस्मिन्नवचण्ड्याख्ये कर्मण्याचार्यकर्म कारिष्ये इति सङ्कल्प्य मण्डपाद्बहिः प्रतिद्वारं भूतबलिं दद्यात् ॥ तद्यथा ॥ जलपात्रसहितमन्नपात्रं बलिस्थाने निधाय तस्य परितो भूतानि ध्यात्वा सर्वभूतेभ्यो नमः इति गन्धपुष्पाक्षतादिभिः सम्पूज्य ॥ ॐ भूता ये विविधाकारा दिग्विदिक्षु समाश्रिताः ॥ पातालतलसंस्थाश्च ये च लोकान्तरस्थिताः ॥ योगिन्यो भैरवाश्चैव विघ्नानामधिपाश्च ये ॥ सर्वे ते प्रीतमनसो मम गृह्णन्त्विमं बलिम् ॥ ॐ हुं विघ्नकृद्भ्यो भूतेभ्यः स्वाहा ॥ इति भूतेभ्यो बलीन् दत्त्वा ॥ भूतानि यानीह वसन्ति भूतले बलिं गृहीत्वा विधिवत् प्रयुक्तम् ॥

सन्तुष्य चित्ते परियान्तु सर्वाण्यन्यत्र वासाय नमोऽस्तु तेभ्यः ॥ इति नमस्कृत्याक्षतैर्विसृजेत् ॥ इति द्वारचतुष्टये पश्चिमादिदक्षिणान्तं प्रादाक्षिण्येन पृथक् पृथक् बलीन् दत्वा अशक्तावेकमेव पश्चिमद्वारे दत्त्वा नवचण्ड्युक्तप्रकारेण कादम्बर्यादिदिग्देवीभ्यो नवग्रहेभ्यो लोकपालेभ्यो दिक्पतिभ्यश्च पूजनपूर्वकं पायसबलीन् दत्त्वा द्वारचतुष्टयस्य पार्श्वद्वये जलपूर्णौ चूतपल्लवशोभितौ हरिद्राकुङ्कुमादिरञ्जितौ द्वौ द्वौ नवौ कलशौ वैदिकविधिना संस्थाप्य गन्धपुष्पाक्षतादिभिर्मण्डपं सम्पूज्य नित्यार्चोक्तप्रकारेण मण्डपस्य पश्चिमादिद्वारचतुष्टयदेवताश्च प्रादाक्षिण्येन पूजयित्वा मण्डपासम्भवे गृहे एव सर्वमुक्तविधिं कृत्वा ॥ आसने उपविश्यागमोक्तप्रकारेण द्विराचम्य मूलेन त्रिःप्राणानायम्य देशकालौ सङ्कीर्त्य शतचण्डीजपाङ्गत्वेन महालक्ष्मीपूजां करिष्ये ॥ इति सङ्कल्प्यासनाविध्यादिपात्रादिस्थापनान्तं कृत्वा ब्रह्मादिमण्डलदेवतास्थापनपक्षे लिङ्गतो भद्रे ब्रह्मादिमण्डलदेवतास्थापनपूजने कृत्वा तदुपरि धान्यराशौ यथाविधि कलशं संस्थाप्य पूर्णपात्रे देवीपीठं विचिन्त्य नित्यार्चाक्रमेण पीठदेवतः सम्पूज्य तदुपरि रक्तवस्त्रे कुङ्कुमादिनिर्मितं चण्डिकायन्त्रं संस्थाप्य तस्मिन् सुवर्णपलेन तदर्धेन तदर्धेन तदर्धेन वा घटितां नूतनां देवीप्रतिमां अग्न्युत्तारणपूर्वकं कृतप्राणप्रतिष्ठां तदसम्भवे गृहस्थितां पूर्वप्रतिष्ठितां प्राचीनप्रतिमां संस्थाप्य नित्यक्रमेण ध्यानावाहनादिभिर्नवरात्रवत् पूजयेत् ॥ तत्र पूजासामग्र्यादौ विशेषः ॥ प्रथमदिने पलमितं चन्दनम् । कस्तूरीकुङ्कुमकर्पूरजातीफलानि प्रत्येकं कर्षमितानि ॥ सर्वं मिलित्वा पलद्वयमितमनुलेपनम् ॥ देवतापरिधानार्थं रक्तकौशेयवस्त्रम् ॥ सार्धकर्षमितं सौवर्णं कण्ठाभरणम् ॥ पञ्चविंशतिसहस्राणि पुष्पाणि ॥ धूपार्थं पलद्वयमितो गुग्गुलुः ॥ विंशतिर्घृतदीपाः ॥ नैवेद्यार्थे कुडवद्वयमितं हविष्यान्नम् ॥ शतद्वयं सकर्पूरताम्बूलानि ॥ रात्रौ एकप्रहरपर्यन्तं जागरः ॥ द्वितीयदिने एतत्सर्वं द्विगुणम् ॥ तृतीये त्रिगुणं चतुर्थे चतुर्गुणमिति कल्पवल्लीकारः ॥

वस्त्राभरणे मुक्त्वान्यत्सर्वं द्विगुणात्रिगुणादीति **देवीमहोत्सवकारः** ॥ अथाचार्यादयो दश विप्रा ऋष्यादिस्मरणन्यासध्यानादि पुरःसरं सहस्रं सहस्रं नवार्णजपं कृत्वा तथैव पूर्वोत्तराङ्गसहितस्य रात्रिसूक्तदेवीसूक्ताभ्यां नवार्णजपेन च सम्पुटितस्य चण्डीस्तवस्यैकैकं पाठं कुर्युः ॥ पश्चाद्यजमानेन सह सर्वे शूलेन पाहि नो देवीतिश्लोकचतुष्टयेनैकां प्रदक्षिणां नमो देव्यै महादेव्यै इति पञ्चश्लोकैः पञ्च नमस्कारांश्च कृत्वासनेषूपविश्य सर्वस्वरूपे सर्वेशे इति श्लोकपञ्चकेन प्रार्थयेयुः ॥ ततो यजमानो नवरात्रोक्तविधिना दशकुमारीः सम्पूज्य ताभिः सह ऋत्विग्भिन्नान् दशद्विजान् मिष्टान्नेन भोजयित्वा स्वयमाचार्यादि दश ऋत्विग्भिःसह हविष्यं भुञ्जीत ॥ रात्रौ च तैः सह वेदपाठसत्कथाश्रवणनृत्यगीतवाद्यादिघोषैर्जाग्रत् प्रथमं प्रहरं नयेत् ॥ ब्रह्मचर्यादयः पुरश्चरणोक्तधर्मा यजमानेन जपकर्तृब्राह्मणैश्च पारिपालनीयाः ॥ **इति प्रथमदिनकृत्यम्** ॥ द्वितीयदिने आचार्यः पूर्वोक्तद्विगुणसामग्र्या देवतां पूजयित्वान्यब्राह्मणैः सह नवार्णस्य देवीमाहात्म्यस्य च द्विगुणजपं कृत्वा यजमानेन पूजनपूर्वकं कुमारीभोजनं ब्राह्मणभोजनं च द्विगुणं कारयित्वा रात्रौ यजमानेनान्यैर्ब्राह्मणैश्च सहपूर्वोक्तप्रकारेण प्रहरद्वयं जागरणं कुर्यात् ॥ एवं तृतीयदिने सर्वं त्रिगुणं चतुर्थदिने चतुर्गुणं च कृत्वा पञ्चमदिने जपदशांशतो नवार्णेनायुतं घृतहोमं साङ्गसप्तशत्याश्च पाठक्रमेण दशावृत्तिभिः प्रतिमन्त्रं सर्पिस्तिलमिश्रपायसहोमं च कृत्वा कादम्बर्यादिदिग्देवीभ्यः पायसेन, नवग्रहेभ्यः घृततिलचरुतत्तत्समिद्भिः फलपुष्पैश्च, लोकपालदिक्पालेभ्यो घृतचरुतिलैः प्रत्येकं प्रतिद्रव्यं यथासम्भवं तत्तन्नाममन्त्रवैदिकपौराणमन्त्रैश्च शतं शतमाहुतीर्हुत्वा प्रायश्चित्तास्विष्टकृतबलिदानादि कृत्वा कुण्डस्य पश्चिमे स्तम्भद्वयोपरि तिर्यक्काष्ठं बध्वा तस्मिन् अग्न्यभिमुखीं कुण्डान्तःप्रविष्टाग्रां स्रुचं निधाय गन्धादिभिः सम्पूज्य स्रुवेणाच्छाद्य तिष्ठन् मूर्धानं दिव इति मन्त्रेण मूलमन्त्रसहितेन कुम्भदशांशघृतस्याच्छिन्नधारया

पूर्णाहुतिं जुहुयात् ॥ ततो होमशेषं समाप्य आचार्यं सम्पूज्य यस्याः प्रभावमितिश्लोकं पठित्वा तस्मै चतुर्विंशतिनिष्कैः सहाष्टौ गोमिथुनानि, ब्रह्मणे निष्कषट्कसहितं गोमिथुनद्वयमन्यविप्रेभ्यो निष्कत्रयसमन्वितमेकैकगोमिथुनमसम्भवे सर्वेभ्यस्तत्तन्मूल्यम् ॥ मन्त्रमहोदधिमतेन सर्वेभ्य एव एकैकं निष्कं अशक्तौ सुवर्णं सुवर्णं दद्यात् ॥ तत आचार्यादयः कृतस्य कर्मणः श्रेयो यजमानाय दत्त्वा सपत्नीकाय ससुतायासनोपविष्टाय तस्मै गन्धदधिदूर्वाङ्कुङ्कुमाक्षतहस्ताः सप्तशतीस्थितैश्चतुर्भिः स्तवैः प्रतिश्लोकं स्वस्त्यास्त्विति वदन्त आशिषो दद्युः ॥ तत आचारात् सुवासिनीभिर्नीराजितो महालक्ष्मीं सम्पूज्य रक्तपुष्पाञ्जलिं दत्त्वा ॥ रूपं देहि जयं देहि भर्ग भगवति देहि मे ॥ पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वरि ॥ यन्मयैतत्कृतं कर्म परिपूर्णं तदस्तु मे ॥ इति प्रार्थ्य स्वदेहे मूलषडङ्गं न्यस्य उत्तिष्ठ देवि चण्डीशे शुभां पूजां प्रगृह्य च ॥ कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥ इमां पूजां महादेवि यथाशक्त्युपपादिताम् ॥ रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ॥ इति श्लोकं द्वयं पठित्वा मूलेन सपरिवारां देवीं संहारमुद्रयोद्वास्य तदुपरिस्थितं पुष्पमेकं गृहीत्वावघ्राय देवतां नासाद्वारेण हृदि प्रविष्टां ध्यात्वा आचामेत् ॥ ततो विप्राः कलशोदकेनासनोपविष्टं यजमानं सभार्यं ससुतं समुद्रज्येष्ठा० इत्यादिभिर्वैदिकैः सुरास्त्वामभिषिञ्चन्त्वित्यादिभिरागमोक्तैश्च मन्त्रैश्चण्डीस्तवान्तर्गतैः पूर्वोक्तैश्चतुर्भिस्तवैश्चाभिषिञ्चेयुः ॥ ततो यजमानः यान्तु देवगणाः सर्वे इति मन्त्रेणाक्षतप्रक्षेपपूर्वकं मण्डपदेवतां विसृज्याचार्यं सम्पूज्य तस्मै समण्डपं पूजितहेमप्रतिमासहितं मुख्यपीठं दद्यात्तत्र मन्त्रः ॥ आचार्य त्वं गृहाणेमां चण्डिकाप्रतिमां शुभाम् ॥ समर्चितां मया भक्त्या सपीठां च समण्डपाम् ॥ त्रैलोक्यनाथे देवि त्वं सर्वभूतदयानिधे ॥ दानेनानेन सन्तुष्टा प्रसन्ना वरदा भव ॥ इति ॥ ततोऽन्य ब्राह्मणेभ्यः कापि-

लधेन्वादिदानानि दद्यात्तत्र तन्मन्त्राः ॥ कपिले सर्वभूतानां पूजनीयासि रोहिणि ॥ तीर्थदेवमयी यस्मात्ततः शान्तिं प्रयच्छ मे ॥ **इति कपिलधेनुदानमन्त्रः** ॥ **अथ श्वेतमणेः** । यतः सर्वेषु रत्नेषु सर्वे देवा व्यवस्थिताः ॥ ततः शान्तिं प्रयच्छन्तु श्वेतरत्नप्रदानतः ॥ इति ॥ **अथ नीलाश्वस्य** । महार्णवसमुद्भूत उच्चैःश्रवसपुत्रक ॥ नीलाश्वविप्रमुख्याय दत्तः शान्ति प्रयच्छ मे ॥ इति ॥ **अथ छत्रस्य** ॥ इहामुत्रातपत्राणं कुरु केशव मे प्रभो ॥ छत्रं त्वत्प्रीतये दत्तमतः शान्तिं प्रयच्छ मे ॥ इति ॥ **अथ चामरस्य** शशाङ्ककरसङ्काशं हिमडिण्डीरपाण्डरम् ॥ प्रोत्सारयाशु दुरितं गृहीत्वा चामरं द्विज ॥ इति ॥ यथासम्भवमितराण्यपि भूरीणि दानानि दत्त्वा । शान्तिपाठपुरःसरं मङ्गलवाद्यघोषेण स्वलङ्कृतं स्वगृहं गत्वा नवरात्रोक्तप्रकारेण शतं यथाशक्ति वा कुमारीः सम्पूज्य ताभिः सह शतं यथाशक्ति वा ब्राह्मणान् सुवासिनीश्च भोजयित्वा ताम्बूलदक्षिणादिभिः प्रतोष्य स्वयं सपरिवारो भुक्त्वाङ्गीकृतब्रह्मचर्यादिनियमांस्त्यजेत् ॥ **इति सङ्क्षेपतः शतचण्डीप्रयोगः ॥ इति शतचण्डी** ॥

अथ सहस्रचण्डीविधानं रुद्रयामले ॥ राज्यभ्रंशे कुलोच्छेदे जनमारमहाभये ॥ गजमारेऽश्वमारे च परचक्रभये तथा ॥ इत्यादौ विविधे दुःखे क्षयरोगादिजे भये ॥ सहस्रं चण्डिकापाठान् कुर्याद्वाकारयेत् ॥ वा जापकाश्च शतं प्रोक्ता विंशद्धस्तश्च मण्डपः ॥ (विंशद्धस्त इत्यार्षः प्रयोगः ॥) भोज्याः, सहस्रं विप्रेन्द्रा गोशतं दक्षिणां दिशेत् ॥ द्विगुणा गुरवे देया शय्यादानं तथैव च ॥ सप्तधान्यानि भूदानं श्वेताश्वश्च मनोहरः ॥ पञ्चनिष्कमिता मूर्तिः कर्तव्या वार्धमानतः ॥ अवारितान्नं दातव्यं सहस्रं वाथवा शतम् ॥ प्रत्यहं नियताहारः पयःपानेन वर्तयन् ॥ एवं यश्चाण्डिकापाठसहस्रं तु समाचरेत् ॥ तस्य स्यात् कार्यसिद्धिस्तु नात्र कार्या विचारणा ॥ इति ॥ इयं दशदिनसाध्या ॥ तदुक्तं **मन्त्रमहोदधौ** ॥ विद्यावतः सदा-

चारान् ब्राह्मणान् वृणुयाच्छतम् ॥ प्रत्येकं चाण्डिकापाठान् विदध्युस्ते दिशामितान् ॥ अयुतं प्रजपेयुस्ते प्रत्येकं नववर्णकम् ॥ एवं दशाहं सम्पाद्य होमं कुर्युर्दशांशतः ॥ लक्षसङ्ख्यनवार्णेन चण्डीस्तवशतेन च ॥ होतृभ्यो दक्षिणां दत्वा पूर्वोक्तान् भोजयेद्द्विजान् ॥ सहस्रसम्मितान् साधून् देव्याराधनतत्परान् ॥ एवं सहस्रसङ्ख्याके कृते चण्डीविधौ नृणाम् ॥ सिध्यत्यभीप्सितं सर्वं दुःखौघश्च विनश्यति ॥ मारीदुर्भिक्षरोगाद्याः शाम्यन्ति व्यसनोच्चयाः ॥ एवं सा चण्डिका तुष्टा वक्तॄन् श्रोतॄंश्च रक्षति ॥ इति ॥ एकैकब्राह्मणेन प्रतिदिनं सहस्रं सहस्रं जपः, साङ्गायाः सप्तशत्याः, सूक्तद्वयनवार्णजपसम्पुटिताया एकैकपाठश्च कार्यः ॥ तेन शतब्राह्मणानां दशभिर्दिनैर्दशलक्षाणि नवार्णजपः सप्तशत्याः सहस्रं पाठाश्च भवन्तिः ॥ शतब्राह्मणैः शतचण्डीवच्चतुर्दिनैरेवैषा एकैकसहस्रनवार्णजपवृद्धया च कार्येत्यन्ये ॥ **इति सहस्रचण्डीविधानम् ॥ अथैतस्य प्रयोगः ॥** यजमानः शुभदिने शतचण्ड्युक्तप्रकारेण विंशतिहस्तं मण्डपं तन्मध्ये तृतीयांशेन वेदीं पश्चिमे यथायोग्यं कुण्डं च विधायोक्तदिने नित्यकृत्यं निर्वर्त्य आचमनादिदेशकालसङ्कीर्तनान्ते मम सकुटुम्बस्य सपरिवारस्य श्रीमहालक्ष्मीप्रसादेन अमुकसङ्कटपरिहारार्थमिति राज्यभ्रंशकुलोच्छेदादिपूर्वोक्तसङ्कटेषूपस्थितसङ्कटनामोच्चार्य ब्राह्मणद्वारा सहस्रचण्डीं करिष्ये ॥ इति सङ्कल्प्य शतचण्डीवत् स्वस्तिवाचनादि सङ्कल्प्य कृत्वा च । मधुपर्कसहितपूजनपूर्वकं, शतचण्डीवत् आचार्यं ब्रह्माणमष्टनवतिं ऋत्विजश्चेति शतं ब्राह्मणान् वृणुयात् ॥ तत आचार्यो भूतबलिं दिग्देवतानवग्रहलोकपालदिक्पालेभ्यो बलिदानं मण्डपद्वारदेवतापूजनं च शतचण्डीवत् कृत्वा नित्यसङ्कल्पान्ते आसनादि पात्रस्थापनान्तं नित्यक्रमेण कृत्वा लिङ्गतो भद्रे ब्रह्मादिमण्डलदेवताः सम्पूज्य तदुपरि धान्यराशौ कलशस्थापनादि विधाय तत्र पीठं विचिन्त्य तत्पूजान्ते यन्त्रे पञ्चनिष्कतदर्धान्यतरमित सुवर्णमूर्तौ असम्भवे पूर्वप्रतिष्ठापितताम्रादिमूर्तौ वा नित्यक्रमेण महालक्ष्मीपूजनं कृत्वा अन्यब्राह्मणैः सह प्रतिदिनं

सहस्रं सहस्रं नवार्णजपं साङ्गायाः ससम्पुटायाश्च सप्तशत्या एकैकं पाठं च कुर्यात् ॥ एवं दशदिनैः सहस्रचण्डी भवति ॥ मतान्तरे शतचण्डीवत् प्रथमदिने सहस्रं सहस्रं जपः एकैकपाठश्च ॥ द्वितीयदिने द्वे द्वे सहस्र ज़पः द्वौ द्वौ पाठौ च तृतीये त्रिगुणास्त्रिगुणो जपस्त्रयस्त्रयः पाठाश्च ॥ चतुर्थे सर्वं चतुर्गुणं एवं चतुर्भिर्दिनैः सा भवति ॥ जपसमाप्तेः परदिने लक्षसङ्ख्यनवार्णेन केवलसर्पिषा, साङ्गायाः सप्तशत्याः शतावृत्तिभिः सर्पिस्तिलमिश्रपायसेन, कादम्बर्याद्यङ्गदेवताभ्यश्च पूर्वोक्तद्रव्यैः सहस्रसहस्राहुतिभिः, ब्रह्मादिमण्डलदेवताद्वारदेवतापीठावरणदेवताश्च जपदिनसङ्ख्यया आज्येनेति होमं सम्पाद्य कुम्भपरिमितघृतेन पूर्णाहुतिं हुत्वा होमशेषं समाप्याचार्याय धेनुद्वयमन्येभ्य एकैकां धेनुं दक्षिणां दत्वा अन्यत्सर्वं शतचण्डीवत् कुर्यात् ॥ ततः ॥ यथा न कृष्णशयनं शून्यं सागरजातया ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥ **इति शय्याम्** ॥ तृप्तिं करोति भूतानामिह लोके परत्र च ॥ तस्मात्प्रदीयते धान्यमतः शान्तिं प्रयच्छतु ॥ **इति धान्यम्** ॥ सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता ॥ अनन्तानन्तशीर्षस्था मम शान्तिं प्रयच्छतु ॥ **इति भूमिम्** ॥ द्विजोत्तम नमस्तुभ्यं श्वेताश्वं प्रतिपादितम् ॥ प्रतिगृह्णीष्व सुखदमतः शान्तिं प्रयच्छ मे ॥ इति श्वेताश्वं दत्वा पूर्ववद्गृहं प्रविश्य सहस्रं यथाशक्ति वा कुमारीब्राह्मणसुवासिनीश्च भोजयित्वा शक्ताववारितान्नं दद्यात् ॥ **इति सहस्रचण्डी** ॥ एतद्दशगुणा अयुतचण्डी तद्दशगुणा लक्षचण्डी ॥ एतयोर्विधाने अन्यत्र द्रष्टव्ये ॥ अथ कामविशेषानुसारेण चण्डीस्तवावृत्तिसङ्ख्याविशेषा वाराहीतन्त्रे ॥ चण्डीपाठफलं देवि शृणुष्व गदतो मम ॥ एकावृत्त्यादिपाठानां प्रत्यहं पठतां नृणाम् ॥ सङ्कल्पपूर्वं सम्पूज्य न्यस्याङ्गेषु मनून् सकृत् ॥ पश्चाद्बलिप्रदानेन फलमाप्नोति मानवः ॥ एकावृत्त्या कार्यसिद्धिर्भवत्येव न संशयः ॥ ग्रहदोषोपशान्त्यर्थं त्रिरावृत्तं पठेन्नरः ॥ उपसर्गोपशान्त्यर्थं पञ्चावृत्तं

वरानने ॥ महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत् ॥ नवावृत्त्या भवेच्छान्तिर्मुच्येत्प्राणार्तिजाड्यात् ॥ वाजपेयफलं लभेदिति क्वचित्पाठः ॥ इयमेव चण्डीपदस्य चण्डीस्तवे लक्षणया नवचण्डीति साम्प्रतं लोके व्यवह्रियते ॥ पूर्वोक्तपञ्चचत्वारिंशत्पाठात्मककर्मणो नवचण्डीसंज्ञा तु रूढ्येति ज्ञेयम् ॥ राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ॥ अर्कावृत्या भवेत्सिद्धिर्वैरिनाशश्च जायते ॥ मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्रीवश्यतामियात् ॥ सौख्यं पञ्चदशावृत्त्या श्रियं चाप्नोति मानवः ॥ कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ॥ राजभीतिविनाशाय वैरस्योच्चाटनाय च ॥ कुर्यात्सप्तदशावृत्तं तथाष्टादशकं प्रिये ॥ राजभीतिविनाशाय सप्तदश वैरस्योच्चाटनायाष्टादशेति यथासङ्ख्यमन्वयः ॥ महाव्रणविमोक्षाय विंशावृत्तं वरानने ॥ पञ्चविंशावर्तनाच्च भवेद्बन्धविमोक्षणम् ॥ चण्ड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः ॥ मनसा चिन्तितं कार्यं सिद्ध्येदष्टोत्तराच्छतात्॥सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा। अयुतावृत्तितः सर्वान्नरः कामानवाप्नुयात्॥ इति॥ स्वस्वावृत्तिसङ्ख्यावाचकपूर्वपदश्चण्डीशब्द एतेषां आवृत्तिसङ्ख्याविशेषात्मककर्मणां संज्ञा ॥ यथा एकचण्डीपञ्चचण्डीनवचण्डीपञ्चदशचण्डीशतचण्डीसहस्रचण्डीत्यादि ॥ तत्र नवावृत्यात्मककर्मणः आरम्भसमाप्तितिथिविशेषविधानविशेषफलविशेषानुरोधेन नवदुर्गेति कालरात्रिरिति च संज्ञान्तरे ॥ एवं त्रिंशत्पाठात्मककर्मणो **नित्यचण्डीति**, पञ्चचत्वारिंशदावृत्त्यात्मककर्मणो नवचण्डीति च ॥ एतासां शतचण्डीसहस्रचण्ड्योश्च विधानानि प्रागुक्तानि ॥ अन्यासां विधिर्नित्यचण्डीवत् ज्ञेयः ॥ सङ्कल्पस्तत्तदावृत्त्युक्तफलानुरोधेन कार्यः ॥ यथा ग्रहदोषोपशान्त्यर्थं त्रिचण्डीं करिष्ये उपसर्गोपशान्त्यर्थं पञ्चचण्डीमित्यादि ॥ पूजादिकं नित्यवत् ॥ होमो जपदशांशतः ॥ इति कामविशेषेणावृत्तिसङ्ख्याविशेषाः ॥ अथ **सप्तशतीपाठानुकल्पाः** ॥ सम्पूर्णसप्तशतीपाठाशक्तौ मध्यमचरितं पठेदिति **वैकृतिरहस्ये** ॥ नवार्णस्य शतं जपेदिति **चण्डिकार्चनरहस्ये** ॥ इन्द्रियाणा-

मधिष्ठात्रीतिश्लोकस्य पाठ इति गुरुपरम्परया श्रुतं रहस्यम् ॥ अस्य श्लोकस्य मार्कण्डेयः सुमेधा वा ऋषिः ॥ देवकृतस्तुतिमध्यगतत्वाद्देवा वा ऋषयः ॥ अनुष्टुप्छन्दः ॥ श्रीमहालक्ष्मीर्देवता ॥ देवीमाहात्म्यपाठफलप्राप्त्यर्थे जपे विनियोगः ॥ इति ऋष्यादि स्मृत्वा शिरोमुखहृदयकराञ्जलिषु न्यस्य । ह्रीं-चण्डिकायै इति मन्त्रेण व्यस्तसमस्तेन कराङ्गुलिन्यासं हृदयादिषडङ्गं च कृत्वा सर्वस्याद्या महालक्ष्मीरितिश्लोकत्रयेण ध्यात्वा मानसोपचारैः सम्पूज्य स्वेष्ट-सङ्ख्यानुसारेणावृत्तीः कुर्यात् ॥ अन्ते उत्तरषडङ्गो जपनिवेदनादिकं च ॥ **अथ कात्यायनीतन्त्रे** कामविशेषेण प्रतिमन्त्रं पल्लवत्वेन योज्याः केचन देवी-माहात्म्यस्थाः श्लोकाः ॥ सर्वापन्निवृत्तये दुर्गेस्मृतेति श्लोको (१) देविप्रपन्नार्तिहरे इति श्लोकः (२) शरणागतेति श्लोको वा ॥ (३) ॥ सर्वकार्यसिद्ध्यर्थं चतुर्थाध्यायस्थं भगवत्या कृतं सर्वमित्यारभ्य भवेथाः सर्वदाम्बिके इत्यन्तं सार्धश्लोकचतुष्टयं (१) ॥ करोतु सा नः शुभहेतुरीश्वरीत्यर्धं वा (२) ॥ मोहनार्थे ज्ञानिनामपीतिश्लोकः ॥ अनुभवसिद्धमेतदिति नागेशभट्टाः ॥ (१) ॥ मारणार्थे एवमुक्त्वेतिश्लोकः ॥ (१) ॥ विद्याप्राप्त्यर्थं वाग्विकारनाशार्थं च इत्युक्ता सा तदा देवीति श्लोकः ॥ (१) ॥ बालग्रहशान्त्यर्थं हिनस्ति दैत्य-तेजांसीति श्लोकः ॥ अनेन देवालये घण्टाबन्धनेऽप्येतत्फलम् ॥ (१) ॥ रोगनाशार्थे रोगानशेषानिति श्लोकः ॥ (१) ॥ सर्वाबाधाशमनार्थे सर्वाबाधा-प्रशमनमिति श्लोकः ॥(१)॥ महामारीशान्त्यर्थं इत्थं यदा यदा बाधेति श्लोकः (१) ॥ नष्टराज्यस्य पुनःप्राप्त्यर्थं ततो वव्रे नृपो राज्यमिति श्लोकः ॥ (१) ॥ स्वाभीष्टवरप्राप्तये एवं देव्या वरं लब्ध्वेति श्लोकः ॥(१) इति ॥ एते तत्तत्कार्येषु चण्डीस्तवस्य प्रतिमन्त्रमन्ते पल्लवत्वेन योज्याः ॥ प्रतिमन्त्रं सम्पुटीकारे तु शीघ्रं सिद्धिः ॥ केवलानामेषां जपेऽप्युक्तं फलम् ॥ तदैतेषां यस्य वाक्यं स ऋषिः । यदक्षरपरिमाणं तच्छन्दः । या तेनोच्यते सा देवता । यत्फलमुक्तं तत्र विनियोगः ॥ इति सामान्यपरिभाषया ऋष्यादिकमूह्यम् ॥ **अथ वैदिका**

अपि केचिन्मन्त्रा पल्लवत्वेनोक्तास्ते यथा ॥ सर्वापन्निवृत्तये दुर्गेस्मृतेति श्लोकार्धद्वयसम्पुटिता यदन्ति यच्च दूरके इति ऋक् ॥ (१)॥ सर्वकामावाप्तये जातवेदसे इति ऋक् ॥ (२)॥ लक्ष्मीप्राप्तये कांसोस्मीति ऋक् ॥ (३) ॥ अपमृत्युपरिहाराय त्र्यम्बकं यजामहे इति ॥ (४)॥ ऋणपरिहाराय अनृण आस्मिन्निति ॥ (५) ॥ एते स्वकार्यानुसारेण सप्तशत्याः प्रतिमन्त्रमन्ते योज्याः प्रतिमन्त्रं सम्पुटीकारे तु शीघ्रं फलम् ॥ केवलानां जपेऽप्युक्तं फलम् ॥ तदेतेषामृष्यादिकं सर्वानुक्रमादिभ्यो ज्ञेयम् ॥ **अथ चण्डिकार्चनरहस्ये** केचित्पल्लवा उक्तास्ते यथा ॥ नमोऽन्तःशान्तिके पुष्टे प्रणिपाते च कीर्तितः ॥ वश्याकर्षणहोमेषु स्वाहान्तः सम्प्रकीर्तितः ॥ वौषट्पल्लवसंयुक्तो मन्त्रपुष्ट्यादिसाधकः ॥ हुङ्कारपल्लवोपेतो मारणे ब्राह्मणं विना ॥ यन्त्रभञ्जनकार्येषु सुघोरभयनाशने ॥ वषडन्तः प्रकल्प्यो हि ग्रहबाधाविनाशकः ॥ खण्डनोच्छदने भेदे मन्त्रः फट्पल्लवान्वितः ॥ इति ॥ **अथ प्रयोगान्तराणि ॥ कात्यायनीतन्त्रे** ॥ प्रतिमन्त्रमादौ सप्रणवं व्याहृतित्रयमनुलोममन्ते च विलोममित्येवं तत्तत्कार्योचिताभिरावृत्तिभिः शीघ्रं सिद्धिः ॥ १ ॥ प्रथमचरित्रे प्रतिमन्त्रमादौ ह्सौं नमइत्यक्षरत्रयम् अन्ते च विलोमम् ॥ मध्यमचरित्रे प्रतिमन्त्रमादौ ह्रीं नम इत्यनुलोममन्ते च विलोमम् ॥ उत्तमचरित्रे प्रतिमन्त्रमादौ क्लीं नम इत्यनुलोममन्ते च विलोममित्येवं तत्तत्कार्योचिताभिरावृत्तिभिरतिशीघ्रं सिद्धिः ॥ २ ॥ प्रतिमन्त्रमाद्यन्तयोः स्वेष्टमन्त्रयोजनेन शतावृत्तिभिस्तन्मन्त्रसिद्धिः ॥ ३ ॥ प्रतिमन्त्रं वाग्भवबीजसम्पुटितस्य शतावृत्तिभिर्विद्याप्राप्तिः ॥ ४ ॥ प्रतिमन्त्रं मायाबीजेन सम्पुटीकृत्य पञ्चाशद्दिनपर्यन्तं प्रत्यहं पञ्चदशावृत्तिभिर्लक्ष्मीप्राप्तिः ॥ ५ ॥ प्रतिमन्त्रमुक्तबीजेन सम्पुटीकृत्यान्ते फट् पल्लवं दत्त्वा प्रत्यहं पञ्चदशावृत्तिभिः सप्ताहादुच्चाटनम् ॥ ६ ॥ दिनचतुष्टयमीदृशीभिरेव प्रत्यहमेकादशावृत्तिभिः सर्वोपद्रवनाशः ॥७॥ प्रतिमन्त्रं कामबीजेन सम्पुटीकृत्यैकचत्वारिंशद्दिनपर्यन्तं

प्रत्यहमावृत्तित्रयेण सर्वकामसिद्धिः ॥ ८ ॥ एकविंशतिदिनपर्यन्तं तादृशदशावृत्तिभिर्वशीकरणम् ॥ ९ ॥ इत्यादीनि ॥ एकस्यैव दिने उक्तावृत्तिकरणाशक्तौ साहाय्यार्थमन्ये विप्रा वरणीयाः इत्युक्तं प्राक् ॥ **हरगौरीतन्त्रे** ॥ श्रीकामः पुष्टिकामो वा सृष्टिमार्गक्रमेण तु ॥ चण्ड्याः यथाक्रमं पाठः सृष्टिमार्ग उदाहृतः ॥ शान्त्यादिकामः सर्वत्र स्थितिमार्गक्रमेण च ॥ जपेच्छक्रादिमारभ्य शुम्भदैत्यवधावधि ॥ ततोऽध्यायत्रयं त्वाद्यमन्त्यं च त्रितय पठेत् ॥ सङ्कटे चान्त्यमारभ्य प्रथमान्तं विलोमतः ॥ जपेत्संहारमार्गेण इति मार्गस्त्रिधा मतः ॥ इति ॥ **अथ प्रयोगान्तरं नागेशभट्टीये चण्डीस्तोत्रव्याख्याने** ॥ पूर्वाह्णे षोडशाङ्गुलविस्तारायामं चतुरङ्गुलोन्नतं स्थण्डिलं कृत्वा तत्र शुद्धगोघृतेन त्रयोदशदीपान् रुद्रवर्तिषु प्रज्वाल्य एकैकदीपे क्रमादेकैकाध्यायदेवतामावाह्य आसनपाद्यादिगन्धान्तां पूजां कृत्वा नवभिः श्लोकैर्नवपुष्पाणि समर्पयेत् ॥ ते च श्लोका यथा ॥ विश्वेश्वरीं जगद्धात्रीं० ॥ १ ॥ स्तुतासुरैः पूर्वं० ॥ २ ॥ इति द्वौ ॥ या साम्प्रतमिति श्लोकस्य प्रत्यर्धं करोतु सा न इत्यर्धयोजनेन द्वौ । एवं चत्वारः ॥ ३ ॥४॥ ततः सर्वाबाधाप्रशमनं० ॥ ५ ॥ सर्वमङ्गलमाङ्गल्ये० ॥ ६ ॥ सृष्टिस्थितिविनाशानां० ॥ ७ ॥ शरणागतदीनार्त० ॥ ८ ॥ सर्वस्वरूपे० ॥ ९ ॥ इति पञ्च एवं नवश्लोकैर्नवपुष्पाणि समर्प्य तत्तदध्यायं पठेत् ॥ अध्यायान्ते धूपदीपौ पायसनैवेद्यताम्बूलदक्षिणादि च समर्प्य नीराज्य एकां कुमारीं ब्राह्मणं सुवासिनीं च भोजयेत् ॥ एवं देवतावाहनादिब्राह्मणसुवासिनीभोजनादिप्रत्यध्यायं कुर्यात् ॥ सर्वान्ते प्रभूतनैवेद्यादिभिर्महापूजां कृत्वा त्रयोदशकुमारीस्तावतो ब्राह्मणान् सुवासिनीश्चैकमुपनीतमष्टवर्षमेकमनुपनीतं च भोजयेत् ॥ एवं प्रयोगसमाप्तिं यावत् प्रत्यहं कुर्यात् ॥ प्रयोगसमाप्तिश्च कार्यसिद्ध्यनुसारेण ॥ रोगपरिहारार्थानुष्ठाने तु पूर्वोक्तपुष्पसमर्पणश्लोकेषु या साम्प्रतमितिश्लोके दैत्यतापितैरित्यत्र रोगतापितैरिति, सर्वाबाधामितिश्लोके वैरिविनाशनमित्यत्र-

रोगविनाशनमिति चोहः कार्यः। एतदनुग्रहे ॥ निग्रहे तु सर्वाबाधाप्रशमनमिति श्लोकानन्तरं एवमुक्त्वा समुत्पत्येति श्लोकमधिकं पठेत्॥वश्ये तु ह्रीं रक्तचामुण्डे तुरु तुरु अमुकं मे वशमानय स्वाहेतिमन्त्रेण प्रत्यध्यायमाद्यन्तयोः पूजा॥ सर्वान्ते अयुतजपश्च ॥ परार्थप्रयोगे तु प्रतिमन्त्रं प्रत्यध्यायं वा सत्याः सन्तु यजमानस्य कामाः इति वदेत् ॥ अनुग्रहे पूर्वाह्णे समाप्तिः ॥ निग्रहे त्वपराह्णे ॥ दीपासम्भवे सर्वोऽयं विधिः कुमारीषु वा जलकुम्भेषु वाक्षतपुञ्जेषु वा कार्यः ॥ अत्र तर्पणपक्षे त्रयोदशपात्राणि दुग्धेनापूर्य अध्यायस्याद्यन्तयोरमुकाध्यायदेवतायै नमः इति पुष्पाञ्जलिं दत्त्वा प्रतिमन्त्रममुकाध्यायदेवतां तर्पयामि नम इति तर्पणं कृत्वा त्रयोदशाग्नीन् प्रतिष्ठाप्य तेषु क्रमात्तत्तदध्यायदेवतामावाह्य सम्पूज्य प्रतिमन्त्रममुकाध्यायदेवतायै स्वाहेति पायसं जुहुयात् ॥ इति ॥ **अथ मन्त्रमहोदध्यादिषु शान्त्यादिषट्कर्मानुरोधने सामग्र्यादिषु विशेषा उक्तास्ते** यथा ॥ कर्माणि षडथो वक्ष्ये सिद्धिदानि प्रयोगतः ॥ शान्तिर्वश्यं स्तम्भनं च द्वेषउच्चाटमारणे ॥ उक्तानि षट् तु कर्माणि शान्ती रोगादिनाशनम् ॥ वश्यं वचनकारित्वं स्तम्भोवृत्तिनिरोधनम् ॥ द्वेषोऽप्रीतिः प्रीतिमतोरुच्चाटः स्थानतश्च्युतिः ॥ मारणं प्राणहरणं इति **षट्कर्मलक्षणम्** ॥ **अथादौ दिशः** ॥ शान्तावीशानदिग्वक्त्रो वश्ये तूदङ्मुखो यजेत् ॥ स्तम्भने पूर्वदिग्वक्त्रो विद्वेषे नैर्ऋतीमुखः ॥ उच्चाटे वायवीवक्त्रो मारणेत्वग्निदिङ्मुखः ॥ इति ॥ **अथासनानि तन्त्रसारे** ॥ कृष्णाजिनं शान्तिके स्यात् वश्ये मेषाजिनं भवेत् ॥ स्तम्भने वार्षभं प्रोक्तं आजमुच्चाटने मतम् ॥ औष्ट्रं विद्वेषणे प्रोक्तं मारणे गार्दभं मतम् ॥ इति ॥ अन्यत्र तु गोखङ्गगजफेरूणां मेषीमहिषयोस्तथेति शान्त्यादिक्रमेणोक्तानि ॥ अथ **देवतापूजापीठानि चण्डिकार्चनरहस्ये** ॥ चतुरस्रे हि शान्त्यादौ पीठे पूजा फलप्रदा ॥ वश्यादौ वर्तुले तद्वदर्धचन्द्रे च पुष्टिदा ॥ त्रिकोणे चापदुद्धारः पञ्चकोणेऽपि वा भवेत् ॥ षट्कोणपीठे पूजायां निर्भयस्तत्क्षणाद्भवेत् ॥

खण्डन्दादौ रविमितकोणे स्यात्पूजनक्रिया ॥ विधूनयति शत्रूणां सप्तरात्रान्मनांसि वै ॥ इति ॥ **अथ देवतावर्णध्यानान्यपि तत्रैव** ॥ शुद्धस्फटिकसङ्काशं ध्यानं स्याच्छान्तिके मतम् ॥ वश्ये रक्ततरं ध्यानं कर्बुरं पुष्टिदं भवेत् ॥ (कर्बुरं चित्रवर्णम्) धूम्रमुच्चाटने प्रोक्तं कृष्णं ध्यानं च मारणे ॥ नीलोत्पलदलश्यामं ध्यात्वा भवति सुप्रजाः ॥ सर्वरत्नसमाभासं ध्यात्वा निश्चलमानसः ॥ सर्वान्कामानवाप्नोति सत्यमुक्तं मया तव ॥ कल्पान्ताग्निसमं ध्यानं युद्धे प्रोक्तं स्वयम्भुवा ॥ महाशोषसमायुक्तं ध्यानं वारिभये भवेत् ॥ पीयूषवर्षसंयुक्तं पूर्णचन्द्रसमप्रभम् ॥ ध्यानं कृत्वा लभेच्छीघ्रं विषबाधानिवारणम् ॥ इति ॥ **अथ पुष्पाण्यपि तत्रैव** ॥ धर्मार्थे बिल्वपत्रैश्च वश्यार्थे करवीरकैः ॥ पुत्रार्थे तुलसीपत्रैः पुष्ट्यर्थे पङ्कजैस्तथा ॥ इति ॥ क्वचिद्वश्ये जपापुष्पमुक्तम् ॥ **अथ दीपार्थ घृतं मन्त्रमहोदधौ** । गव्याज्यं शान्तिके प्रोक्तं माहिषं स्तम्भने मतम् ॥ वश्ये तथाविकं ज्ञेयं आजमुच्चाटने मतम् ॥ विद्वेषणे तथौष्ट्रं स्यान्मारणे गार्धभं मतम् ॥ इति ॥ **अथ दीपमुखं तत्रान्तरे** ॥ पूर्वामुखे तु सर्वाप्तिः स्तम्भोच्चाटनयोरथ ॥ वश्यविद्वेषयोश्चैव दीपस्यात्पश्चिमामुखः ॥ लक्ष्मीप्राप्तावुत्तरास्यो मारणे दक्षिणामुखः ॥ इति ॥ **अथ जपमालामणिसङ्ख्या तत्रैव** ॥ अष्टोत्तरशतं सङ्ख्या तदर्धं च तदर्धकम् ॥ मणीनां शुभकार्ये स्यात्तिथिसङ्ख्याभिचारिके ॥ इति ॥ **अथ कुमार्यः स्कान्दे** ॥ आयुष्यबलवृद्ध्यर्थं कुमारीं पूजयेन्नरः । (कुमारीं तन्नाम्नीं द्विवर्षामित्यर्थः ।) आयुष्कामस्य त्रिमूर्तिं तु त्रिवर्गस्य फलाप्तये ॥ (त्रिवर्षा त्रिमूर्तिः ।) कल्याणीमपमृत्यूग्रव्याधिपीडानिवारणे ॥ (चतुर्वर्षा कल्याणी) जयारोग्ययशस्कामो रोहिणीं परिपूजयेत ॥ (पञ्चवर्षा रोहिणी) राज्यविद्याजयाद्याप्त्यै शत्रुहत्यै च कालिका ॥(षड्वर्षा कालिका) सङ्ग्रामे जयकामस्तु चण्डिकां पूजयेन्नरः॥ (सप्तवर्षा चण्डिका) दुःखदारिद्र्यनाशाय नृपसम्मोहनाय च ॥ महापापविनाशाय शाम्भवीं पूजयेन्नरः ॥

(अष्टवर्षा शाम्भवी) बलदुर्गाद्यशत्रूणां दुर्गां नाशाय पूजयेत् ॥ (नववर्षा दुर्गा) सुभद्रां धनधान्यश्रीसौभाग्याद्याप्तये यजेत् ॥ (दशवर्षा सुभद्रा) इति ॥ **अथ कुमारीसङ्ख्या** च तत्रैव ॥ एकां कन्यां भोजयित्वा ऐश्वर्यं लभते नरः ॥ कन्याद्वयं मुक्तिकामस्त्रिवर्गस्याप्तये त्रयम् ॥ चतुष्टयं च राजाप्त्यै सर्वकामाप्तये तथा ॥ विद्याप्तये पञ्चकं स्यात् षट्कं सत्कर्मसिद्धये ॥ सप्तभिर्लभते राज्यमष्टभिर्गुणसम्पदः ॥ नवभिः पृथिवीशः स्यात् कुमारीपरिपूजकः ॥ इति ॥ **अथ कुमारीजातयोऽपि** तत्रैव ॥ विप्रां सर्वेष्टसंसिद्ध्यै यशसे क्षत्रियोद्भवाम् ॥ वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत् ॥ दारुणे त्वन्त्यजातीयां स्वजातीयां तु सर्वदा ॥ इति ॥ **अथ कुण्डदिक्, मन्त्रमहोदधौ** ॥ शान्तिके पश्चिमे कुण्डं उदीच्यां वश्यके मतम् ॥ स्तम्भने पूर्वतः प्रोक्तं द्वेषे नैर्ऋतकोणके ॥ उच्चाटने तु वायव्यां दक्षिणस्यां तु मारणे ॥ इति ॥ **अथ कुण्डाकारोऽपि** तत्रैव ॥ शान्तिकं वर्तुलं वश्ये पद्माभं स्तम्भने त्वथ ॥ चतुष्कोणं त्रिकोणं तूच्चाटने द्वेषणे पुनः ॥ षट्कोणं मारणेऽर्धेन्दुसन्निभं कुण्डमिष्यते इति ॥ अन्यत्र शान्तिके चतुष्कोणं स्तम्भने वर्तुलमुक्तम् ॥ **अथ समिधस्तत्रैव** ॥ दूर्वायाः समिधः शान्तौ गोघृतेन समन्विताः ॥ दाडिमप्रभवा होमे वश्येऽजाघृतसंयुताः ॥ मेषीघृताक्ताः समिधः स्तम्भे राजतरूद्भवाः ॥ (राजतरुः शम्याकः) धत्तूरसमिधो द्वेषे अतसीतैलसंयुताः ॥ चूतजाः कटुतैलाक्ता उच्चाटनविधौ मताः ॥ कटुतैलयुता शस्ता मारणे खदिरोद्भवाः ॥ इति ॥ **अथ रुद्रयामले होमद्रव्याणि** ॥ फलैर्हुत्वा सुखावाप्तिः पलाशैरिष्टसम्पदः ॥ (पलाशैः पत्रैः) बिल्वपत्रैर्घृतैः पद्मैः पाटलैश्चम्पकैः श्रियः ॥ हयमारैः स्त्रियो वश्या गडूच्यारोगसङ्क्षयः ॥ (हयमारः करवीरः) सिद्धार्थैर्मल्लिकाभिश्च कीर्तयो जातिभिर्गिरः ॥ दूर्वाभिर्बुद्धिवृद्धिः स्याद्गुडेन जनवश्यता ॥ व्रीहिभिश्च यवैः प्लक्षोदुम्बराश्वत्थजैधसा ॥ तिलैस्त्रिमधुरैश्चैव इष्टाः स्युः सम्पदो नृणाम् ॥ (दधि

मधुघृतानि मिश्राणि त्रिमधुराणि) हुत्वा बिल्वैस्त्रिमध्वक्तैः कमलैः क्षीरसंयुतैः ॥ धनदेन समां लक्ष्मीं प्राप्नुयान्मानवो ध्रुवम् ॥ होमयेत् कटुतैलेन रक्तचन्दनराजिकाः ॥ एकावर्तनमात्रेण राजानं वशमानयेत् ॥ मधुनाशोकपुष्पं च हुवेद्रात्रौ च पूर्ववत् ॥ चक्रवर्ती भवेद्वश्यश्चण्डीमन्त्रप्रभावतः ॥ किंशुकैः कासमर्दैश्च कृतमालैश्च पाटलैः॥ विप्रादयः क्रमाद्वश्याः सौगन्ध्यं गन्धवस्तुभिः॥ (किंशुकादिभिश्चतुर्भिर्हुतैः क्रमाद्विप्रादयो वश्या भवन्ति । सुगन्धिवस्तुभिर्हुतैर्होतुरङ्गेषु सौगन्ध्यमुत्पद्यते ॥) कोद्रवैर्व्याधयोऽरीणामुन्मत्तत्वं विभीतकैः ॥ कलायैः साध्वसोत्पत्तिर्माषैस्तेषां तु मूकता ॥ समिद्भिःशाल्मलीजाभिस्तन्नाशश्चाचिराद्भवेत् ॥ हुवेत्प्रदीपिते वह्नौ तिलधान्यादितन्दुलान् ॥ धर्मार्थकामसंसिद्ध्यै मोक्षार्थी पायसं हुवेत् ॥ मारणे मोहने चैव तथोच्चाटनकर्मणि ॥ हुवेन्मांसं त्रिमध्वक्तं शान्तिके मधुपायसम् ॥ स्तम्भने मातुलफलं वश्ये तु सितसर्षपान् ॥ इति ॥ (मातुलो धत्तूरः) **अथ होमे दिङ्मुखं** तत्रैव ॥ धर्मार्थकाममोक्षार्थी पूर्वाशाभिमुखो हुवेत् ॥ मारणे मोहने चैव हुवेद्दै दक्षिणामुखः ॥ वश्ये द्वेषे स्तम्भने च पश्चिमाभिमुखो हुवेत् ॥ उच्चाटने तूत्तरास्य इत्याह भगवान् भवः ॥ इति ॥ **अथाहुतिदानमन्त्रा मन्त्रमहोदधौ** ॥ नमः स्वाहा स्वधा वौषट् हुंफट्वषडिति क्रमात् ॥ शान्तौ वश्ये स्तम्भने च द्वेष उच्चाटने वधे ॥ इति ॥ **अथाहुतिप्रक्षेपमुद्रा अपि** तत्रैव ॥ मृगी हंसी सूकरीति होमे मुद्रात्रयं भवेत् ॥ शान्तौ मृगी वशे हंसी स्तम्भनादिषु सूकरी ॥ इति ॥ एतन्मुद्रालक्षणानि यथा । मिलितानामिकाङ्गुष्ठमध्यमाग्राणि योजयेत् ॥ उच्छ्रयेच्चाङ्गुलिद्वन्द्वं मृगमुद्रेयमीरिता ॥ हंसी कनिष्ठाहीनानां सर्वासां योजने मता ॥ सर्वाङ्गुलीनां संकोचो मुद्रिका सूकरी मता ॥ इति ॥ ३ ॥ **अथ स्रुक्स्रुवौ** तत्रैव ॥ सौवर्णौ यज्ञवृक्षोत्थौ स्रुक्स्रुवौ शान्तिवश्ययोः ॥ स्तम्भनादिषु कार्येषु मतौ लोहमयौ हि तौ ॥ इति ॥ **अथ ब्रह्मणभोजनसङ्ख्या** तत्रैव ॥ शान्तौ वश्ये भोजयेत्तु विप्रान्

होमाद्दशांशतः ॥ उत्तमं तद्भवेत्कर्म तत्त्वांशेन तु मध्यमम् ॥ (चतुर्विंशतितमोंशस्तत्त्वांशः) होमाच्छतांशतो विप्रभोजनं त्वधमं स्मृतम् ॥ शान्तेर्द्विगुणितं विप्रभोजनं स्तम्भने मतम् ॥ त्रिगुणं द्वेषणोच्चाटे मारणे होमसम्मितम् ॥ इति ॥ मन्त्रमहोदधावितोऽप्यन्ये बहवः सामग्रीविशेषा उक्तास्ते सति कामे तत्रैव द्रष्टव्याः ॥ इति **षट्कर्मसाधनसामग्री** ॥ ॥ सम्यक कृत्वा न्यासजालमात्मरक्षां विधाय च ॥ काम्यं कर्म प्रकर्तव्यमन्यथाभिभवो भवेत् ॥ शुभं वाप्यशुभं वापि काम्यं कर्म करोति यः ॥ तस्यारित्वं व्रजेन्मन्त्रो न तस्मात्तत्परो भवेत् ॥ निष्कामं भजतां पुंसामन्यथात्वे भयं न हि ॥ इति ज्ञात्वा तु निष्कामं नरः कुर्वीत कर्म च ॥ काम्यकर्मप्रसक्तानां तावन्मात्रं फलं भवेत् ॥ निष्कामं भजतां च स्युरखिलाभीष्टसम्पदः ॥ प्रतिमन्त्रं तु कथिता ये प्रयोगाः सुखाय वै ॥ तदासक्तिं विहायैव निष्कामो देवतां भजेत् ॥ वेदोदितं कर्म कुर्यादुपासीत च देवताः ॥ शुद्धान्तःकरणस्तेन लभते ज्ञानमुत्तमम् ॥ लब्धज्ञानः कृतार्थः स्यात्परत्रेह च मानवः ॥ **इति चण्डिकोपास्तिदीपिकायां जपप्रकाशः समाप्तः** ॥

इति चण्डिकोपास्तिदीपिकायां जपप्रकाशः ।

॥ श्री ॥

अथ चण्डिकोपास्तिदीपिकायां यागप्रकाशः ॥

॥ श्री ॥

यागप्रकाशः ।

अथ चण्डिकोपास्तिदीपिकायां **यागप्रकाशः** ॥ तत्रादौ कुण्डविधानं चण्डिकार्चनरहस्ये ॥ चतुरस्रे समे कुण्डे समन्ताद्धस्तमात्रके ॥ एकावरणसंयुक्ते योनिमण्डलमण्डिते ॥ (आवरणं मेखला) दशांशविधिना होममुक्तद्रव्येण साधयेत् ॥ नवदुर्गानित्यचण्डीनवचण्डीमखादिषु ॥ एतस्माद्द्विगुणं कुण्डं शतचण्ड्यां प्रकीर्तितम् ॥ सहस्रचण्ड्यां त्रिगुणं कुण्डं जानीहि भूपते ॥ मेखलात्रितयं कुर्याद्योनिं नाभिं तथैव च ॥ कुण्डस्य च बहिर्व्यासचतुर्विंशांशसम्मितम् ॥ कण्ठं त्यक्त्वा बहिःकार्यं मेखलात्रितयं क्रमात् ॥ परस्परेण संलग्नं लघुमानं यथोत्तरम् ॥ मेखलामध्यतो योनिः कुण्डार्धात्त्र्यंशविस्तृता ॥ अङ्गुष्ठमानोन्नतिका कार्याश्वत्थदलाकृतिः ॥ तथा कुण्डमध्ये चतुर्विंशांशोन्नतमंशचतुष्टयविस्तृतं कुण्डाकारं पद्माकारं वा नाभिं च कुर्यात् ॥ मेखलारहिते शोकोऽभ्याधिक्ये वित्तसङ्क्षयः ॥ भार्याविनाशनं कुण्डं प्रोक्तं योन्या विवर्जितम् ॥ खाताधिक्ये भवेद्रोगी हीने धेनुधनक्षयः ॥ वक्रकुण्डे तु सन्तापो मरणं छिन्नमेखले ॥ असमं दोषकृत् कुण्डं दिङ्मूढं कुलनाशकृत् ॥ कुण्डमेवंविधं कष्टं स्थण्डिलेऽतो हुतं चरेत् ॥ इति ॥ स्थण्डिलस्याप्येतदेव मानम् ॥ अत्रापि योनिः कार्येति बहवः ॥ **अथ होमः** ॥ स च **मन्त्रमहोदधितन्त्रे** । सर्वमन्त्रसाधारण्येन, **चडिकार्चनरहस्ये** च विशेषतः सकलचण्डीजपकर्मसामन्येनोक्तः ॥ स चात्रोभयसमुच्चयेनोच्यते ॥ तत्र **मन्त्रमहोदधौ** ॥ प्राणायामषडङ्गौ च कृत्वा मूलेन मन्त्रवित् ॥ कुण्डे वा स्थण्डिले वापि संस्काराणां चतुष्टयम् ॥ मूलेनेक्षणमन्त्रेण प्रोक्षणं ताडनं कुशैः ॥ वर्मणा मुष्टिना सिञ्चेदेतत्कुर्याच्चतुष्टयम् ॥ (मूलमन्त्रेणेक्षणम् ॥

अस्त्रेण फडितिमन्त्रेण प्रोक्षणम्॥ पुनरस्त्रेण कुशैस्ताडनम् ॥ वर्मणा हुमिति मन्त्रेण मुष्टिनाद्भिः प्रोक्षणम् ॥ एतत्कुण्डस्य संस्कारचतुष्टयम् ।) अथ **चण्डिकार्चनरहस्ये** ॥ कुण्डमध्यभुवं दर्भैः परिमृज्योपलेपयेत् ॥ प्रागग्राः स्रुवमूलेन लेखास्तिस्रः समुल्लिखेत् ॥ उदगग्रास्तथा तिस्रः प्रागग्रासु हरीश्वरौ ॥ इन्द्रश्चेति त्रयोऽन्यासु पूज्या ब्रह्मान्तकेन्दवः ॥ (अन्तको यमः) **मन्त्रमहोदधौ** ॥ तत्र च त्रिषडस्राष्टदलभूमन्दिरात्मके यन्त्रे मायां तारपुटां लिखित्वा पीठमर्चयेत् ॥ (तारपुटां मायां प्रणवसम्पुटितं ह्रीं बीजम् ।) वागीश्वरीवागीश्वरयोर्योगपीठात्मने नमः ॥ मायादिकः पीठमनुस्तयोस्तेनासनं दिशेत् ॥ यजेत्तौ तारमायाभ्यां गन्धाद्यैरुपचारकैः ॥ (मायादिकः ह्रीं बीजपूर्वः । तयोः वागीश्वरीवागीश्वरयोः । तारमायाभ्यां प्रणवह्रींबीजाभ्याम्) सूर्यकान्तादरणितः श्रोत्रियागारतोऽपि वा ॥ पात्रेण पिहिते पात्रे धृत्वान्येनाग्निमाहरेत् ॥ (अन्येन स्वभिन्नेन) अस्त्रेणादाय तत्पात्रं वर्मणोद्घाटयेत्तु तम् ॥ अस्त्रमन्त्रेण नैर्ऋत्यां क्रव्यादांशं ततस्त्यजेत् ॥ मूलेन पुरतो धृत्वा संस्कारांश्च ततश्चरेत् ॥ वीक्षणाद्यान् पुरा प्रोक्तान् अल्पप्रोक्षणमाचरन् ॥ परमात्मानलेनाथ जाठरेणापि वह्निना ॥ स्मरनैक्यं वह्निबीजाच्चैतन्यं योजयेत्ततः ॥ (वह्निबीजात् रं बीजात्) तारेण चाभिमन्त्र्याग्निं सुधया धेनुमुद्रया ॥ अमृतीकृत्य संरक्षेदस्त्रमन्त्रेण मन्त्रवित् ॥ (सुधया वं बीजेन) मुद्रया त्ववगुण्ठिन्या कवचेनावगुण्ठयेत् ॥ कुण्डोपरि ततो वह्निं भ्रमयेत्त्रिध्रुवं पठन् ॥ (कवचेन हुमितिमन्त्रेण । ध्रुवं प्रणवम् ॥) शय्यागतामृतुस्नातां नीलेन्दीवरधारिणीम् ॥ देवेन भुज्यमानां तां स्मृत्वा तद्योनिमण्डले ॥ ईशरेतोधिया वह्निं स्थापयेदात्मसम्मुखम् ॥ मूलं नवार्ण च पठन् जानुस्पृष्टधरातलः ॥ (नवार्ण वक्ष्यमाणम्) रेफाधीशेन्दुसंयुक्तं गगनं वह्नि चै ततः ॥ तन्न्यायहृदयान्तोऽयं नवार्णोऽग्निनिधापने ॥ (रेफो रः । अधीशो दीर्घ ऊकारः । इन्दुरनुस्वारः । तैः संयुक्तं गगनं हकारः । तेन ह्रमिति-

बीजम् ॥ ततः “ वह्निचै ” इति, ‘ तन्याय ’ इति च स्वरूपतोऽक्षरषट्कम् ॥ हृदयान्तो नमोऽन्तः ॥ तथा च हुं वह्निचैतन्याय नमः इति नवार्णोऽग्निस्थापने मन्त्रः ।) विश्राण्याचमनं देवीदेवयोर्ज्वालयेद्वसुम् ॥ (विश्राण्य दत्त्वा । वसुमग्निम्) चित्पिङ्गलहनद्वन्द्वं दहयुग्मं पचद्वयम् ॥ सर्वज्ञाज्ञापयस्वाहा मन्त्रो वेदभुजाक्षरः ॥ (चित् पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापयस्वाहेति चतुर्विंशत्यक्षरोऽग्निप्रदीपने मन्त्रः) प्रदर्श्य ज्वालिनीं मुद्रां उत्थाय विहिताञ्जलिः ॥ श्लोकेन वक्ष्यमाणेनोपतिष्ठेत हुताशनम् ॥ (**ज्वालिनीमुद्रा** यथा । मणिबन्धयुतौ कृत्वा प्रसृताङ्गुलिकौ करौ ॥ कनिष्ठाङ्गुष्ठयुगले मिलित्वान्तःप्रसारिते ॥ ज्वालिनी नाम मुद्रेयं वैश्वानरप्रियङ्करी ॥ इति ॥ **तृचभास्करेत्वियं** सप्तजिव्हेत्युक्ता ॥ (१०) अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ॥ सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥ अथाग्निमन्त्रं विन्यस्येत्तद्विधानमुदीर्यते ॥ वैश्वानरान्ते जातेति वेदान्ते स्यादिहावह ॥ लोहिताक्षपदात्सर्वकर्माण्यन्ते तु साधय ॥ वह्निप्रियान्तो मन्त्रोऽयं षड्विंशत्यक्षरात्मकः ॥ (वह्निप्रिया स्वाहा) वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति षड्विंशत्यक्षरः समस्तो मन्त्रः) ऋषिच्छन्दोदेवतास्युर्भृगुगायत्रपावकाः ॥ रं बीजं ठद्वयं शक्तिर्हवने विनियोजनम् ॥ (ठद्वयं स्वाहा शब्दः) लिङ्गे पायौ मूर्ध्नि वक्त्रे नासि नेत्रेऽखिलाङ्गके ॥ वह्नेर्जिह्वाः स्वबीजाढ्याः न्यसेन् ङेन्ता नमोऽन्विताः ॥ (नासि नासिकायाम् । ङेऽन्ताश्चतुर्थ्येकवचनान्ताः ।) हिरण्या गगना रक्ता कृष्णा च प्रभयान्विता ॥ बहुरूपाति रक्तेति जिह्वा दमुनसो मताः ॥ (कृष्णा च प्रभयान्विता कृष्णा प्रभाचेति द्वयमित्यर्थः ॥ दमुनसोऽग्नेः) अन्यत्रैता सात्विकीराजसीभेदात्त्रिविधा उक्ताः ॥ तत्र हिरण्या गगनेत्याद्याः सात्विक्यः ॥ **अथ राजस्यः** ॥ पद्मरागा सुवर्णा च तृतीया भद्रलोहिता ॥ ततश्च लोहिता श्वेता धूमिनी च करालिनी इति ॥ **अथ तामस्यः** ॥ विश्वमूर्तिस्फुलिङ्गिन्यौ धूम्रवर्णा मनो-

जवा ॥ लोहिता च करालाख्या काली तामसजिह्विकाः ॥ सात्त्विक्यो दिव्यपूजासु राजस्यः काम्यकर्मसु ॥ तामस्यः क्रूरकार्येषु प्रयोक्तव्या विपश्चिता ॥ ॥ इति ॥ अग्निवात् दीपिकेन्द्वन्ताः सादियान्ता विलोमगाः ॥ वर्णाः सप्ताग्निजिह्वानां सप्तानां बीजतां गताः ॥ (अग्निः रेफः । वात् वायुर्यकारः । दीपिका दीर्घ ऊकारः । इन्दुरनुस्वारः । एतच्चतुष्टयान्ताः सकारादियकारान्ता विलोमाः सप्तवर्णाः सप्तजिह्वानां क्रमाद्बीजानि ॥ तानि च–स्र्यूं, ष्र्यूं, श्र्यूं, व्र्यूं, ल्र्यूं र्र्यूं, य्र्यूं, एवं रूपाणि ॥ गीर्वाणपितृगन्धर्वयक्षनागपिशाचकाः ॥ राक्षसाश्चेति जिह्वानां देवतास्तत्स्थले न्यसेत् ॥ (तत्स्थले पूर्वोक्तजिह्वान्यासस्थाने) सहस्रार्चिषे हृदयं स्वस्तिपूर्णाय मस्तकम् ॥ उत्तिष्ठपुरुषायेति शिखायै वषडीरितम् ॥ वर्म धूमव्यापिने स्यात् सप्तजिह्वाय नेत्रकम् ॥ अस्त्रं धनुर्धरायेति षडङ्गानि समाचरेत् ॥ (सहस्रार्चिषे हृदयाय नमः स्वस्तिपूर्णाय शिरसे स्वाहेत्यादिस्तत्प्रयोगः ॥ जातवेदाः सप्तजिह्वो हव्यवाहन इत्यपि ॥ अश्वोदरजसंज्ञोऽन्यस्तथा वैश्वानराह्वयः ॥ कौमारतेजाः स्याद्विश्वमुखो देवमुखस्तथा ॥ मूर्ध्नि वामांसके पार्श्वे कटौ लिङ्गे तथा कटौ ॥ दक्षे पार्श्वेऽसके न्यस्येन्मूर्तीरष्ट विभावसोः ॥ ताराग्नेयपदाद्याश्च चतुर्थीनमसान्विताः ॥ (ॐ अग्नये जातवेदसे नमः मूर्ध्नि इत्यादिस्तत्प्रयोगः ॥) एवं विन्यस्य च ततः पावकं चिन्तयेत्तनौ ॥ त्रिनेत्रमारक्ततनुं च शुक्लवसुं सुवर्णस्रजमग्निमीडे ॥ वराभयस्वस्तिकशक्तिहस्तं पद्मस्थमाकल्पसमूहयुक्तम् ॥ (शुक्लवसुं श्वेतकिरणम् । स्वस्तिकं मुद्राविशेषः । आकल्पो भूषणम् ।) एवं ध्यात्वार्चनं कुर्यान्मानसं विधिवद्वसोः ॥ (वसोरग्नेः) परिषिञ्चेत्ततस्तोयैः कुण्डं स्थण्डिलमेव वा ॥ दर्भैः परिस्तरेदग्निं प्रागग्रैरुदगग्रकैः ॥ प्रत्यग्दक्षिणसौम्यासु परिधींस्त्रीन्न्यसेत् क्रमात् ॥ पालाशबिल्वजांस्तेषु ब्रह्मविष्णुशिवान् यजेत् ॥ वह्नौ तत्पीठमभ्यर्च्य आधारादि यथोदितम् ॥ बीजं वन्ह्यासनायेति हृदन्तः पीठमन्त्रकः ॥ बीजं

रं । वन्ह्यासनायेतिस्वरूपम् ॥ हृदन्तो नमोऽन्तः) पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ॥ रुचिरा ज्वालिनी चेति शक्तयस्ता यजेत् क्रमात् ॥ अष्टासु दिक्षु मध्ये चाथाह्वयेत्स्वहृदोऽनलम् ॥ कुण्डस्थितेऽग्नौ संयोज्य सावृत्तिं पूजयेच्च तम् ॥ षट्कोणेषु च मध्ये च जिव्हास्तद्देवता यजेत् ॥ ईशानादिषु वाय्वन्तषट्कोणेषु प्रदक्षिणम् ॥ हिरण्याद्यतिरक्तान्ता मध्ये च बहुरूपिणीम् ॥ (षण्णां कोणानां मूलेषु षड्जिह्वाश्चक्रमध्ये सप्तमीं यजेत् । एवं षट्सु कोणमध्यभागेषु षड्जिह्वादेवताश्चक्रमध्ये सप्तमजिह्वादेवतां यजेत् इत्यर्थः) तदग्रेष्वङ्गपूजा स्याद्दलमूलेषु मूर्तयः ॥ मातरो दलमध्येषु भैरवाश्च तदग्रतः ॥ (तदग्रेषु षटकोणानामग्रेषु । अङ्गपूजा हृदयादिषडङ्गावरणपूजा ॥ दलमूलेषु अष्टदलमूलेषु ॥ तदग्रतः अष्टदलाग्रेषु ।) ग्रन्थान्तरे मात्रावरणं भैरवावरणं च नोक्तम् । धरापुरे तु शक्राद्या वज्राद्यायुधसंयुताः ॥ एवमावरणैर्युक्तं सप्तभिः पावकं यजेत् ॥ (धरापुरे भूपुरे । इन्द्राय वज्रसहिताय नमः । अग्नये शक्तिसहिताय नमः । इत्यादिस्तत्प्रयोगः ।) अन्यत्र दिक्पालावरणं तदायुधावरणं च पृथगुक्ते ॥ **चण्डिकार्चनरहस्ये** ॥ चण्डिकापाठसम्पूर्णं ब्रह्माणं दक्षिणे द्विजम् ॥ सम्पूज्य साग्निकं कुण्डं नवसूत्रेण वेष्टयेत् ॥ कुण्डस्योत्तरतः स्थाप्या प्रणीता वारिपूरिता ॥ प्रणीतापात्रतो याम्ये उत्तरे चाग्निकुण्डतः ॥ स्थापयेत् प्रोक्षणीपात्रं प्रणीतोदकपूरितम् ॥ प्रणीतापूर्वतश्चैव स्थाप्यः पात्रगणः क्रमात् ॥ आज्यस्थाली चरुस्थाली गव्यक्षीरं सशर्करम् ॥ स्रुक् स्रुवश्च घृतं गव्यं तण्डुलाः कुशपूलकाः ॥ पालाश्यः समिधस्तिस्रः पूर्णपात्रमतःपरम् ॥ सप्तद्वीपेश्वरीं ध्यात्वा गृहीत्वा कुशपूलकान् ॥ निक्षिपेत् प्रोक्षणीपात्रे वारुणं बीजमुच्चरन् ॥ (वारुणं बीजं वं) तेन दर्भसमूहेन शतसङ्ख्येन संस्थितम् ॥ क्रमात् पात्रगणं प्रोक्षेत् प्रोक्षणीपात्रवारिणा ॥ आज्यपात्रे घृतं स्थाल्यां निक्षिपेत श्वेततण्डुलान् ॥

यथाक्रमं च कर्तव्यं ततो विश्रपणं तयोः ॥ **पायसे तण्डुलादिविभागस्तन्त्रान्तरे** ॥ दुग्धं पञ्चगुणं प्रोक्तं घृततण्डुलतो गवाम् ॥ शर्करा घृततुल्या च पायसेऽयं विधिः स्मृतः ॥ इति ॥ घृततण्डुलशर्कराः समप्रमाणाः। पञ्चगुणं गव्यं दुग्धमित्यर्थः ॥ अध्यूनपायसे कार्यं पर्यग्निकरणं तयोः ॥ दीप्तपालाशकाष्ठेन त्रिस्त्रिर्दर्भैश्च सूज्वलैः ॥ स्रुवयोस्तापनं कार्यं प्रणीतोदकसेचनम् ॥ पुनः प्रतापनं कृत्वा दक्षिणे स्थापनं मतम् ॥ **अथ मन्त्रमहोदधौ विशेषः** । हस्ताभ्यां स्रुक्स्रुवौ धृत्वा तापयेत्त्रिरधोमुखौ ॥ वामहस्तेन धृत्वा तौ दर्भैर्दक्षेण मार्जयेत् ॥ सम्प्रोक्ष्य प्रोक्षणीतोयैः प्रताप्य पूर्ववत् पुनः ॥ न्यस्याग्नौ मार्जनान् दर्भान् तयोः शक्तित्रयं न्यसेत् ॥ इच्छाज्ञानक्रियासंज्ञं चतुर्थीनमसान्वितम् ॥ दीर्घत्रयेन्दुयुग्व्योमपूर्वकं स्थानकत्रये ॥ ॐ ह्रां इच्छाशक्त्यै नमः । ॐ ह्रीं ज्ञानशक्त्यै नमः । ॐ ह्रूं क्रियाशक्त्यै नमः ॥ इति तत्प्रयोगः ॥ हृदा स्रुचि न्यसेच्छक्तिं स्रुवे शम्भु. ततस्तु तौ ॥ सूत्रत्रयेण संवेष्ट्य सम्पूज्य कुसुमादिभिः ॥ कुशोपरि न्यसेद्दक्षे तयोः संस्कार ईरितः ॥ इति ॥ उद्वास्य प्रथमं चाज्यमानीयाग्नेः प्रदक्षिणम् ॥ कुण्डाचार्यान्तरे स्थाप्यं स्वबीजजपगौरवम् ॥ (स्वबीजस्य मायाबीजस्य जपेन गौरवं यस्येत्याज्यस्य विशेषणम् । स्वबीजजपसंस्कारे धेनुमुद्रां च दर्शयेत् ॥अभिघार्याज्यभागेन वायव्ये स्थापयेच्चरुम् ॥ (चरुं पायसम्) स्वबीजजपसंस्कारे धेनुमुद्रां प्रदर्शयेत् ॥ तिष्ठन् पालाशसमिधौ मौनी वैश्वानरे क्षिपेत् ॥ कुशपूलकमुक्ताभिः प्रोक्षण्यद्भिः प्रदक्षिणम् ॥ पर्युक्ष्याग्निं प्रणीतायां निक्षिपेत् कुशपूलकान् ॥ निधाय दक्षिणं जानुं भूमावग्निं धमेच्छनैः॥ इति ॥ **अथ मन्त्रमहोदधौ** ॥ दर्भद्वयं ग्रन्थियुतं सान्तरे निक्षिपेत् घृते ॥ वामे दक्षे च मध्ये चेडादिनाडीत्रयं स्मरेत् ॥ दक्षिणाद्वामतो मध्यात् हृदादाय घृतं सुधीः ॥ अग्नयेऽग्निप्रियासोमाय स्वाहेत्याग्निनेत्रयोः ॥ जुहुयादग्नीषोमाभ्यां स्वाहेत्यग्नितृतीयके ॥ भूयो हृदा दक्षभागादादायाज्यं मुखे

हुवेत्।। **अथ चण्डिकार्चनरहस्ये विशेषः**।।निधाय दक्षिणं जानु भूमावग्निमुखे हुवेत् ।। अन्वारब्ध स्रुवेणाज्यं निर्धूमे हव्यवाहने ।। प्रजापतिं महाकालीं महालक्ष्मीं सरस्वतीम् ।। अथाग्नये स्विष्टकृते स्वाहेत्यग्निमुखे हुवेत् ।। एतदग्निमुखं नाम मायावीजपुरःसरम् ।। इति ।। **मन्त्रमहोदधौ** ।। ततो व्यस्तसमस्ताभिर्महाव्याहृतिभिः शुचौ ।। आज्येन जुहुयाद्दीप्ते आहुतीनां चतुष्टयम् ।। (शुचौ अग्नौ । महाव्याहृतयः प्रयोगे वक्ष्यन्ते ।) आहुतीनां त्रयं वह्निमन्त्रेणैव ततश्चरेत् ।। [वह्निमन्त्रो वैश्वानर जातवेद इत्यादिरूपः] घृताहुतिभिरष्टाभिरेकैकां संस्कृतिं चरेत् ।। **देवीमहोत्सवे** प्रतिसंस्कारमाहुतित्रयमुक्तम् ।। होमस्याग्नेरमुं संस्कारं करोम्यग्निवल्लभा ।। इत्थं मनुं जपन् गर्भाधानं पुंसवनं ततः ।। सीमन्तोन्नयनं जातकर्म कृत्वा ततश्चरेत् ।। कुर्याद्देवाभिधानेन पूर्ववन्नाम शुष्मणः ।। देवाभिधाननेन कर्मदेवतानाम्ना । पूर्ववदेकाहुत्या । शुष्मणः अग्नेः) **चण्डिकार्चनरहस्ये** ।। शतमङ्गलनामानं कुण्डेऽग्निं सन्निधापयेदित्युक्तम् ।। नामानन्तरमेतस्य पितरौ खेऽर्पयेत् हृदि ।। (पितरौ वागीश्वरीवागीश्वरौ) **देवीमहोत्सवे** त्वेतत्सर्वसंस्कारान्ते उक्तम् ।। अन्नप्राशं तथा चौलोपनयौ दारयोजनम् ।। संस्काराःस्युर्विवाहान्ता मृत्यन्ताः क्रूरकर्मणि ।। **देवीमहोत्सवे** उपनयनानन्तरं महानाम्न्यादिव्रतचतुष्टयं समावर्तनं चेति पञ्चकमधिकमुक्तम् ।। वह्नेरावृत्तिदेवेभ्य एकैकामाहुतिं चरेत् ।। आवृत्तिदेवताः प्रागुक्ताः ।। स्रुवेणाज्यं चतुर्वारं निधाय स्रुचि तां ततः ।। अपिधाय स्रुवेणैतौ गृहीत्वा करयुग्मतः ।। तिष्ठन् मूलं तयोर्नाभौ कृत्वाग्रे कुसुमं क्षिपेत् ।। वामस्तनान्तं तन्मूलं कृत्वाग्निमनुना सुधीः जुहुयाद्वौषडन्तेन सम्पत्त्यर्थमतन्द्रितः ।। (तन्मूलं स्रुक्स्रुवयोर्मूलम् वामस्तनान्तमुद्धृत्य । अग्निमनुना पूर्वोक्तेन वैश्वानरजातवेदइत्यादिना । सम्पत्त्यर्थं पूर्णतार्थम्] महागणेशमन्त्रेण व्यस्तेन दशधा ततः ।। जुहुयाच्च समस्तेन चतुर्वारं घृताहुतीः ।। (व्यस्तेन दश, समस्तेन चतस्र एवं चतुर्दशेत्यर्थः ।)

तारो लक्ष्मीर्गिरिसुता कामो भूर्गणनायकः ॥ चतुर्थ्यन्तो गणपतिर्वरान्ते वरदेति च ॥ सर्वान्ते जनमित्युक्त्वा मे वशान्ते तु मानय ॥ स्वाहान्तो वसुयुग्मार्णो महागणपतेर्मनुः ॥ (तारः प्रणवः । लक्ष्मीः श्रीम् । गिरिसुता ह्रीम् । कामः क्लीम् । भूः ग्लौम् । गणनायकः गम् । चतुर्थ्यन्तो गणपतिः गणपतये नम इति पदम् । ततो वरशब्दः । तदन्ते वरदेति शब्दः सर्वान्ते सर्व इति शब्दस्यान्ते जनमितिपदम् ॥ मे वश इत्यक्षरत्रयान्ते मानयेति वर्णत्रयम् । वसुयुग्मार्णोऽष्टाविंशत्यक्षरः ॥ ततश्च ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा इति समस्तो मन्त्रः ।) पूर्वपूर्वयुतं बीजषट्कं बाणाश्च सायकाः ॥ मुनयो मार्गणाश्चेति विभागस्तन्मनोः स्मृतः ॥ (अथास्य मन्त्रस्य दशधा विभाग उच्यते । तत्र केवलप्रणवात्मकः प्रथमो भागः । तत्सहितं श्रीं बीजं इति द्व्यक्षरो द्वितीयो भागः । तदुभयसहितं ह्रीं बीजमिति त्र्यक्षरस्तृतीयः । तत्त्रयसहितं क्लीं बीजमिति चतुरक्षरश्चतुर्थः । तच्चतुष्टयसहितं ग्लौं बीजमिति पञ्चाक्षरः पञ्चमः । तत्पञ्चकसहितं गं बीजमिति षडक्षरः षष्ठो भागः । ततो गणपतये इति चतुरक्षरः सप्तमः । वरवरदेति पञ्चाक्षरोऽष्टमः ॥ सर्वजनं मे वशमिति सप्ताक्षरो नवमः । आनयस्वाहेति पञ्चाक्षरो दशमो भागः ॥) एवं कृत्वाग्निसंस्कारं पीठं देवस्य पूजयेत् ॥ अग्नौ तत्रावाह्य देवं देवस्य वदने ततः ॥ मूलेन जुहुयात्पञ्चनेत्रसङ्ख्या घृताहुतीः ॥ (पञ्चनेत्रसङ्ख्याः । पञ्चविंशतिसङ्ख्याः ।) नाडीसन्धानसिध्यर्थं वह्निदेवतयोस्ततः ॥ जुहुयान्मूलमन्त्रेण रुद्रसङ्ख्या घृताहुतीः ॥ स्मृत्वा ऋष्यादि मन्त्रस्य कृत्वा होमे नियोजनाम् ॥ ततः कल्पोक्तद्रव्येण दशांशं जुहुयाज्जपात् ॥ **चण्डिकार्चनरहस्ये तु,** संस्रावान् प्रोक्षणीपात्रे निक्षिपेद्यज्ञसाधनान् ॥ विदध्यात्कल्पितं होममुक्तेन हविषा ततः॥ इत्युक्तम् ॥ तत्र नवार्णमन्त्रस्य लक्षात्मके पुरश्चरणे दश सहस्राणि होमः ॥ चतुर्लक्षात्मके चत्वारिंशत्सहस्राणि ॥ होमद्रव्यं पायसम् ॥ **तदुक्तं डामरे** ॥

एवं कृत्वा जपेल्लक्षचतुष्कं तद्दशांशतः ॥ पायसान्नेन जुहुयात् पूजिते हेमरेतसि ॥ इति ॥ (एवं कृत्वेति न्यासादेरुपसंहारः ।) अथ सप्तशतीजपकर्मसु नवरात्रनवदुर्गाकालरात्रिजपेषु साङ्गसप्तशत्या जपक्रमेणैकैकावृत्त्या यथासम्भवं प्रतिश्लोकं प्रत्यृचं प्रतिमन्त्रं च होमः ॥ सप्तशतीपुरश्चरणनित्यचण्ड्योरावृत्तित्रयेण ॥ पञ्चचत्वारिंशत्पाठात्मिकायां नवचण्ड्यां पञ्चावृत्तिभिः ॥ शतचण्ड्यां साङ्गसप्तशत्या दशावृत्तिभिर्नवार्णस्यायुतसङ्ख्यया च होमः ॥ सहस्रचण्ड्यां साङ्गसप्तशत्याः शतावृत्तिभिर्नवार्णमन्त्रस्य च लक्षेण ॥ तदुक्तं **मन्त्रमहोदधौ** ॥ शतचण्ड्यां दशावृत्त्या प्रतिमन्त्रं हुतं चरेत् ॥ अयुतं च नवार्णेन स्थापितेऽग्नौ विधानतः ॥ शतावृत्त्या तु साहस्र्यां लक्षसङ्ख्या नवार्णतः ॥ इति ॥ अयं शतचण्डीसहस्रचण्ड्योर्नवार्णस्यायुतलक्षजपः सम्पुटीकरणजपदशांशात् पृथक्भूतो ज्ञेयः ॥ तत्र नवार्णहोमे विशेषानुक्तेराज्यद्रव्यम् । साङ्गसप्तशत्यास्तु सर्पिस्तिलमिश्रं पायसम् ॥ तदुक्तं **चण्डिकार्चनरहस्ये** । पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितम् ॥ जुहोत्युक्तविधिं कृत्वा दशांशेन नृपोत्तम ॥ इति ॥ **वैकृतरहस्ये** च ॥ प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषा इत्युक्तम् ॥ यानि तु **रुद्रयामलादौ** होमे द्रव्यान्तराण्युक्तानि तानि कामविशेषपरत्वेन ज्ञेयानि ॥ ते कामविशेषाश्च पूर्वं काम्यप्रकरणे उक्ताः ॥ केचिदुवाचमन्त्राणामध्यायसमाप्तिवाक्यानां च पुष्पफलेक्षुखण्डादिभिर्होममनुतिष्ठन्ति ॥ तन्न युक्तम् ॥ प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषेति **रहस्यवचने** श्लोकपदस्य सर्वमन्त्रोपलक्षकत्वादुवाचमन्त्राणां च तदन्तःपातित्वाद्विशेषवचनं विनोवाचमन्त्रमात्रे द्रव्यान्तरस्वीकारस्यायुक्तत्वात् ॥ अध्यायसमाप्तिवाक्यानां च कात्यायनीतन्त्रे मन्त्रत्वेनाग्रहणात् तेषां होमे अमन्त्राहुतिजन्यप्रत्यवायप्रसङ्गाच्च ॥ **अथाङ्गदेवताहोमश्चण्डिकार्चनरहस्ये** । तत्र शतचण्ड्याम् ॥ जपहोमे सुसम्पूर्णे दिग्देवीभ्य शतं शतम् ॥ होतव्यं नाममन्त्रैश्च हविषान्नेन सादरम्॥ (दिग्देवीभ्यः

कादम्बर्यादिभ्यः। हविषान्नेन पायसेन) ग्रहेभ्यो वैदिकैर्मन्त्रैः समिदाज्यचरूंस्तिलान्॥ शतं शतं क्रमाद्दद्यात् फलं पुष्पं शतं शतम्॥ तत्र ग्रहाणां समिध उक्ता **ज्योतिर्निबन्धे**॥ अर्कः पालाशखदिरावपामार्गोऽथ पिप्पलः॥ उदुम्बरः शमी दूर्वा कुशश्च समिधः क्रमात्॥ इति॥ दिक्पाललोकपालानां होमे सर्पिश्चरुं तिलान्॥ आचार्यादिद्विजाः सर्वे जुहुयुस्ते शतं शतम्॥ इयं शतचण्डयां दिग्देव्यादीनां शतसङ्ख्याहुत्युक्तिः अणुरपि विशेषोऽध्यवसायकर इति न्यायेनान्यत्रापि सप्तशतीजपहोमेऽङ्गदेवताहुतीनां सप्तशत्यावृत्तिसमसङ्ख्यां गमयति॥ तेन नवदुर्गाकालरात्र्योरारम्भे केवलदिक्पालपूजाया उक्तत्वात् तयोर्होमे दिक्पालेभ्यः उक्तद्रव्याणां प्रतिद्रव्यं नवनवाहुतयो वैदिकमन्त्रैर्नाममन्त्रैर्वा देयाः॥ नवचण्डीशतचण्डीसहस्रचण्डीषु दिग्देवतानवग्रहलोकपालदिक्पालानां पूजाद्युक्तेस्तासु तेभ्यः उक्तद्रव्याणां यथासम्भवं नाममन्त्रैः वैदिकमन्त्रैश्च सप्तशत्यावृत्तिसमसङ्ख्यया होमः॥ द्वारदेवतापीठदेवतावरणदेवताभ्यो ब्रह्मादिमण्डलदेवतास्थापनपक्षे ताभ्यश्च विशेषादर्शनादेकैकाज्याहुतिर्देया॥ सर्वत्र प्रतिमन्त्रं स्वाहायोजनेन होमः। ऋषिच्छन्दोदेवतास्मरणकाले या देवताङ्गीकृता तन्नाम्ना अमुकदेवतायै इदं न ममेति त्यागश्च तत्प्रकारः प्रयोगे स्फुटीभविष्यति॥ अथ **स्विष्टकृतादि चण्डिकार्चनरहस्ये**। ततः स्विष्टकृतं दद्याद्धविषा प्रोज्वलेऽनले॥ ॐ ह्रीं ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै नारसिंह्यै चामुण्डायै विच्चे स्विष्टकृते स्वाहा॥ इति मन्त्रविदा प्रोक्तो मन्त्रः स्विष्टकृदाहुतेः॥ आज्यस्य नवकं दद्यान्मायाबीजादिनामभिः॥ नन्दा भगवती त्वाद्या द्वितीया रक्तदन्तिका॥ शाकम्भरी तृतीया स्यात् दुर्गा भीमा च पञ्चमी॥ भ्रामरी कालिका चैव शिवदूती प्रजापतिः॥ इति॥ ततो नवरात्रोक्तप्रकारेण बलिदानं कुर्यात्॥ अथ पूर्णाहुतिस्तत्रैव॥ गन्धपुष्पफलोपेतां कृत्वा यज्ञात्मिकां स्रुचम्॥ ततः र्णाहुतिं दद्याद्घृतस्याच्छिन्नधारया॥ नवाक्षरेण मन्त्रेण महालक्ष्मीपरायणः॥

अथ शतचण्डीविषये विशेषस्तत्रैव ॥ स्तम्भद्वये स्रुचं कृत्वा यजमानः स्वलङ्कृतः ॥ घृतकुम्भदशांशेन दद्यात् पूर्णाहुतिं स्वयम् ॥ मूर्धानं मन्त्रपाठेन नवाक्षरजपेन च ॥ इति ॥ तत्र कुम्भप्रमाणं पूर्वमुक्तमपि स्मरणार्थं पुनरुच्यते ॥ पञ्चगुञ्जामितो माषः कर्षो माषास्तु षोडश ॥ पलं कर्षास्तु चत्वारः कुडवस्तच्चतुष्टयम् ॥ चत्वारः कुडवाः प्रस्थं चतुःप्रस्थमथाढकम् ॥ चतुर्भिराढकैर्द्रोणः कुम्भो द्रोणद्वयं स्मृतम् ॥इति॥ एवं चाष्टाचत्वारिंशदधिकद्विसहस्रकर्षमितः कुम्भ इति फलितम् ॥ तद्दशांशश्च किञ्चदूनपञ्चाधिककर्षशतद्वयम् ॥ ध्यात्वा यज्ञपुरोडाशमनन्तं देवदुर्लभम् ॥ प्रोक्षणीपात्रमध्यस्थान् मन्त्रेणाश्नाति संस्रवान् ॥ यस्मात् यज्ञरसात्प्रीता यज्वानो ब्रह्मरूपिणः ॥ तं संस्रावपुरोडाशं प्राश्नामि सुखपुण्यदम् ॥ सलिलेन प्रणीतायास्तीर्थध्यानपरायणः ॥ करोति मार्जनं दर्भशतेन श्लोकमन्त्रतः ॥ याः शिवाः शक्तयो याश्च याभिश्च सविता सह ॥ या आपः सप्तधा यातास्ता मे कृण्वन्तु भेषजम् ॥ अभिषिञ्चेत्तदात्मानं चतुर्भिश्चण्डिकास्तवैः ॥ इति ॥ इत उत्तरं कर्मविशेषेण विहितं दानादि तत्तत्कर्मसु पूर्वमुक्तत्वान्न पुनरिहोच्यते ॥ **अथाग्निविसर्जनादिकं मन्त्रमहोदधौ** देवं सम्पूज्य विधिना विसृज्य स्वहृदि स्मरन् ॥ अग्निं सम्पूज्य गन्धाद्यैः प्रोक्ष्य च प्रोक्षणीजलैः ॥ सम्प्रार्थ्यानेन मनुना नत्वा तं विसृजेत् हृदि ॥ भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक ॥ कर्मान्तरे तु सम्प्राप्ते सान्निध्यं कुरु सादरम् वह्नौ पवित्रे निक्षिप्य प्रणीताम्बु भुवि क्षिपेत् ॥ वह्निं विसृज्य सकुशान् परिधीन् विन्यसेद्वसौ ॥ **इति मन्त्रमहोदधिचण्डिकार्चनरहस्यसमुच्चयेन सकलचण्डीकर्मसाधारणमागमोक्तहोमविधानं समाप्तम्** ॥

अथैतत्प्रयोगः ॥ आचम्य पवित्रपाणिः प्राणानायम्य सुमुखश्चेत्यादिमङ्गलपद्यानि पठित्वा देशकालौ सङ्कीर्त्य । मया कृतस्यामुककर्मणः साङ्गतार्थं जपदशमांशतः कल्पोक्तद्रव्यैर्होमं करिष्ये ॥ इति सङ्कल्प्य यथा

सम्भवं स्वस्तिवाचनऋत्विग्वरणादि कुर्यात्॥तत आचार्यः यदत्र संस्थितं भूतं०॥ अपक्रामन्तु० ॥ इति मन्त्राभ्यां सर्वतो गौरसर्षपान् विकीर्य पञ्चगव्यकुशोदकैः प्रोक्ष्य मूलमन्त्रेण षडङ्गन्यासं कृत्वा॥ यथाविधिनिर्मितं कुण्डं स्थण्डिलं वा मूलेन वीक्ष्य अस्त्रमन्त्रेण प्रोक्ष्य पुनस्तेनैव दर्भैः सन्ताड्य कवचमन्त्रेणाभ्युक्ष्य स्रुवमूले प्रागग्राश्च तिस्रस्तिस्रो लेखा विलिख्य प्रागग्रासूत्तरसंस्थान् विष्णुरुद्रशक्रान्, उदगग्रांश्च प्राक्संस्थान् ब्रह्मयमचन्द्रांश्च क्रमेणाभ्यर्च्य ॥ ततस्तत्र कुङ्कुमादिना त्रिकोणषट्कोणवृत्ताष्टदलानि चतुरस्रत्रयं च बहिःक्रमेण रचयित्वा त्रिकोणे प्रणवसम्पुटितं मायाबीजं विलिख्य मूलेनाभ्युक्ष्य॥ ॐ ह्रीं वागीश्वरी वागीश्वरयोर्योगपीठात्मने नमः ॥ इति वागीश्वरीवागीश्वरयोरासनं दत्वा प्रणवपूर्वकमायाबीजेन तयोर्गन्धादिपञ्चोपचारैः पूजनं कुर्यात् ॥ अथ सूर्यकिरणैः सूर्यकान्तोत्पन्नं, अरणेर्मन्थनतः समुद्भूतं, श्रोत्रियागारस्थं वाग्निं ताम्रपात्रसम्पुटेनानाय्य आग्नेय्यां संस्थाप्य अस्त्रमन्त्रेण स्वहस्ते गृहीत्वा कवचमन्त्रेण पिधानमुद्धृत्य अस्त्रमन्त्रेण क्रव्यादांशं नैर्ऋत्यां त्यक्त्वा अवशिष्टमग्निं पुरतः स्थापयित्वा तस्य पूर्वोक्तान् वीक्षणादींश्चतुरः संस्कारान् कृत्वा परमात्माग्निजठराग्निभ्यां च सह तस्यैक्यं भावयित्वा अग्निबीजेन चैतन्यं योजयेत् ॥ ततस्तं प्रणवेनाभिमन्त्र्य अमृतबीजेन धेनुमुद्रयामृतीकृत्य अस्त्रेण संरक्ष्य कवचनावगुण्ठनमुद्रयावगुण्ठ्य त्रिरुच्चरितेन प्रणवेन कुण्डोपरि त्रिर्भ्रमयित्वा वागीश्वरीमृतुस्नातां नीलेन्दीवरधारिणीम् ॥ शय्यागतां वागीश्वरेण भुज्यमानां ध्यात्वा जानुभ्यां स्थित्वा तद्योनिमण्डले शिववीर्यबुद्धया ॐ ह्रीं वह्निचैतन्याय नमः ॥ इति मन्त्रेण व्याहृतिभिर्मूलमन्त्रेण च वह्निमभिमुखं संस्थाप्य वागीश्वरीवागीश्वरयोराचमनं दत्त्वा ॥ ॐ चितिपिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा ॥ इति मन्त्रेणाग्निं प्रज्वाल्य ज्वालिनीमुद्रां प्रदर्श्य गर्भरक्षणार्थमिन्धनैराच्छादयेत् ॥ तत उत्थाय कृताञ्जलिः । अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ॥ सुवर्णवर्णममलं समृद्धं विश्वतो मुखम् ॥ इत्यु-

पस्थाय ॥ वैश्वानरमन्त्रस्य भृगुर्ऋषिः ॥ गायत्रीच्छन्दः ॥ पावको देवता ॥ रं बीजम् । स्वाहा शक्तिः होमे विनियोगः ॥ इति ऋष्यादि स्मृत्वा न्यासान् कुर्यात् ॥ **तत्रादौवह्निजिह्वान्यासः** ॥ ॐ स्न्यूं हिरण्यायै नमः लिङ्गे । ॐ ष्न्यूं गगनायै नमः पायौ । ॐ श्र्यूं रक्तायै नमः मूर्ध्नि । ॐ ञ्न्यूं कृष्णायै नमः मुखे ॥ ॐ ल्न्यूं प्रभायै नमः नासयोः । ॐ र्न्यूं बहुरूपायै नमः नेत्रयोः ॥ ॐ य्न्यूं अतिरक्तायै नमः सर्वाङ्गे ॥ **अथ जिह्वादेवतान्यासः** ॥ ॐ गीर्वाणेभ्यो नमः लिङ्गे ॥ ॐ पितृभ्यो नमः पायौ ॥ ॐ गन्धर्वेभ्यो नमः मूर्ध्नि ॥ ॐ यक्षेभ्यो नमः मुखे ॥ ॐ नागेभ्यो नमः नासयोः ॥ ॐ पिशाचेभ्यो नमः नेत्रयोः । ॐ राक्षसेभ्यो नमः सर्वाङ्गे । **अथाग्निनामन्यासः** ॥ ॐ सहस्रार्चिषे नमः हृदयाय नमः ॥ ॐ स्वस्तिपूर्णाय नमः शिरसे स्वाहा ॥ ॐ उत्तिष्ठपुरुषाय नमः शिखायै वषट् ॥ ॐ धूमव्यापिने नमः कवचाय हुम् ॥ ॐ सप्तजिह्वाय नमः नेत्रत्रयाय वौषट् ॥ ॐ धनुर्धराय नमः अस्त्राय फट् ॥ **अथाग्निमूर्तिन्यासः** ॐ अग्नये जातवेदसे नमः मूर्ध्नि । ॐ अग्नये सप्तजिह्वाय नमः वामांसे ॥ ॐ अग्नये हव्यवाहनाय नमः वामपार्श्वे ॥ ॐ अग्नये अश्वोदरजाय नमः वामकट्याम् ॥ ॐ अग्नये वैश्वानराय नमः लिङ्गे ॥ ॐ अग्नये कौमारतेजसे नमः दक्षिणकट्याम् ॥ ॐ अग्नये विश्वमुखाय नमः दक्षिणपार्श्वे ॥ ॐ अग्नये देवमुखाय नमः दाक्षिणांसे ॥ एवं न्यस्य ध्यायेत् ॥ त्रिनेत्रमारक्ततनुं च शुक्लवसुं सुवर्णस्रजमग्निमीडे ॥ वराभयस्वस्तिकशक्तिहस्तं पद्मस्थमाकल्पसमूहयुक्तम् ॥ इति ध्यात्वा मानसैरुपचारैः सम्पूज्य त्रिः परिसमुह्य प्रागुदग्रदर्भैः परिस्तृणीयात् ॥ ततो मध्यमेखलायां दक्षिणापश्चिमोत्तरासु दिक्षु पालाशान् बैल्वान्वा त्रीन् परिधीन् निधाय तेषु क्रमेण ब्रह्मविष्णुरुद्रान् पूजयेत् ॥ ततोऽग्नौ आधारशक्त्यादिपीठदेवताः पूजयेत् ॥ ता यथा ॥ ॐ आं आधारशक्तये नमः ॥ ॐ कूं कूर्माय नमः ॥ ॐ अं अनन्ताय नमः ॥ ॐ पृं पृथिव्यै नमः ॥ ॐ सुं

सुधासिन्धवे नमः ॥ ॐ श्वें श्वेतद्वीपाय नमः ॥ ॐ कं कल्पवृक्षोद्यानाय० ॥ ॐ हें हेमप्रासादाय० ॥ ॐ हें हेमपर्यङ्काय न० ॥ पर्यङ्कस्याग्नेयादिकोणचतुष्टयस्थपादेषु ॐ धं धर्माय० ॥ ॐ ज्ञां ज्ञानाय० ॥ ॐ वैं वैराग्याय० ॥ ॐ ऐं ऐश्वर्याय० ॥ पर्यङ्कस्य गात्रेषु पूर्वादिक्रमेण । ॐ अं अधर्माय० ॐ अं अज्ञानाय० ॥ ॐ अं अवैराग्याय० ॥ ॐ अं अनैश्वर्याय० ॥ मध्ये वं वह्निमण्डलाय० ॥ ॐ सूं सूर्यमण्डलाय० ॥ ॐ सों सोममण्डलाय० ॥ ॐ सं सत्त्वाय० ॥ ॐ रं रजसे० ॥ ॐ तं तमसे० ॥ ॐ आं आत्मने० ॥ ॐ अं अन्तरात्मने० ॥ ॐ पं परमात्मने० ॥ ॐ ह्रीं ज्ञानात्मने० ॥ ॐ मां मायातत्त्वाय० ॥ ॐ कं कलातत्त्वाय० ॥ ॐ विं विद्यातत्त्वाय० ॥ ॐ पं परतत्त्वाय० ॥ इति सम्पूज्य ॥ ॐ रं वह्न्यासनाय नमः इति पीठमभ्यर्च्य ॥ अष्टदिक्षु मध्ये चाग्नेर्नवशक्तीः पूजयेत् ॥ ता यथा ॥ ॐ पीतायै नमः ॥ ॐ श्वेतायै० ॥ ॐ अरुणायैनमः ॥ ॐ कृष्णायै० ॥ ॐ धूम्रायै० ॥ ॐ तीव्रायै० ॥ ॐ स्फुलिङ्गिन्यै० ॥ ॐ रुचिरायै० ॥ ॐ ज्वालिन्यै० ॥ इति अग्नेः पीठशक्तीः सम्पूज्य पीठे ॐ वैश्वानरजातवेद इहावह लोहिताक्ष सर्वकार्याणि साधय स्वाहा इति स्वहृदयेऽग्निमावाह्य बाह्याग्निना सहैक्यं चिन्तयित्वा गन्धादिभिः सम्पूज्याग्नेरावरणदेवतापूजां कुर्यात् ॥ तत्र षट्कोणचक्रस्य तान्त्रिकेशानादिवाय्वन्तकोणषट्कमूलेषु प्रादक्षिण्येन ॐ स्र्यूं हिरण्यायै नमः ॥ ॐ ष्र्यूं गगनायै० ॥ ॐ श्र्यूं रक्तायै० ॥ ॐ व्र्यूं कृष्णायै० ॥ ॐ ल्र्यूं प्रभायै० ॥ ॐ र्र्यूं बहुरूपायै० ॥ इति संपूज्य चक्रमध्ये ॐ य्र्यूं अतिरक्तायै० ॥ इति वह्निजिह्वात्मकं प्रथमावरणम् ॥ अनेनैव क्रमेण कोणमध्येषु चक्रमध्ये च ॐ गीर्वाणेभ्यो नमः ॥ ॐ पितृभ्यो नमः ॐ गन्धर्वेभ्यो० ॥ ॐ यक्षेभ्यो० ॥ ॐ नागेभ्यो० ॥ ॐ पिशाचेभ्यो० ॥ ॐ राक्षसेभ्यो नमः ॥ इति द्वितीयावरणम् ॥ कोणाग्रेषु चक्रमध्ये चोक्तक्रमेण ॥ ॐ सहस्रार्चिषे हृदयाय

नमः हृदयदेवतां पूजयामि ॥ ॐ स्वस्तिपूर्णाय शिरसे स्वाहा शिरोदे० ॥ ॐ उत्तिष्ठपुरुषशिखायै वषट् शिखादे० ॥ ॐ धूमव्यापिने कवचाय हुं कवचदे० ॥ ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् नेत्रदे० ॥ ॐ धनुर्धराय अस्त्राय फट् अस्त्रदेवतां पूजयामि ॥ इति तृतीयावरणम् ॥ अथाष्टदलमूलेषु पूर्वादिक्रमेण ॐ अग्नये जातवेदसे नमः ॥ ॐ अग्नये सप्तजिह्वाय० ॥ ॐ अग्नये हव्यवाहनाय० ॥ ॐ अग्नये अश्वोदरजाय न० ॥ ॐ अग्नये वैश्वानराय० ॥ ॐ अग्नये कौमारतेजसे० ॥ ॐ अग्नये विश्वमुखाय ० ॥ ॐ अग्नये देवमुख्याय० ॥ इति चतुर्थावरणम् ॥ दलानां मध्यभागेषु प्राग्वत् ॥ ॐ ब्राह्म्यै नमः ॥ ॐ माहेश्वर्यै० ॥ ॐ कौमार्यै० ॥ ॐ वैष्णव्यै० ॥ ॐ वाराह्यै० ॥ ॐ नारसिंह्यै० ॥ ॐ ऐन्द्र्यै० ॥ ॐ चामुण्डायै नमः ॥ इति पञ्चमावरणम् ॥ दलाग्रेषु प्राग्वत् ॐ असिताङ्गभैरवाय नमः ॥ ॐ रुरुभैरवाय०॥ ॐ चण्डभैरवाय ॥ ॐ क्रोधभैरवाय० ॥ ॐ उन्मत्तभैरवाय०॥ ॐ कपालिभैर० ॥ ॐ भीषणभैरवाय० ॥ॐ संहारभैरवाय० ॥ इति षष्ठावरणम् ॥ अथ भूपुरे प्रसिद्धप्रागादि ॥ ॐ इन्द्राय सवज्राय नमः ॥ ॐ अग्नये सशक्तिकाय० ॥ ॐ यमाय सदण्डाय० ॥ ॐ निर्ऋतये सखड्गाय० ॥ ॐ वरुणाय सपाशाय० ॥ ॐ वायवे साङ्कुशाय० ॥ ॐ कुबेराय सगदाय० ॥ ॐ ईशानाय सशूलाय नमः ॥ इति सप्तमावरणम् ॥ एवमग्न्यावरणदेवताः सम्पूज्य कुण्डाद्दक्षिणे ब्रह्मणः पीठमासाद्य तत्र ब्रह्माणं हस्ते धृत्वोपवेश्य ब्रह्मणे नम इति गन्धादिभिः सम्पूज्य अग्निकुण्डं नवसूत्र्या आवेष्टयेत् । तान्त्रिकहोमविधाने देवतान्वाधानं न दृश्यते ॥ अथ कुण्डादुत्तरतोऽद्भिः प्रोक्ष्य तत्र दर्भानास्तीर्य तदुपरि पात्राण्यासादयेत् ॥ तत्रादौ जलपूर्णं प्रणीतापात्रं संस्थाप्य प्रणीताकुण्डयोर्मध्ये प्रोक्षणीपात्रं प्रणीतोदकपूर्णं निधाय प्रणीतायाः पूर्वतः क्रमेणाज्यस्थालीं चरुस्थालीं सशर्करं गव्यं क्षीरम् स्रुक्स्रुवौ गव्यं घृतं श्वेततण्डुलान् कुशपूलकान् तिस्रः

पलाशसमिधः, अन्यत् ग्रहादिहोमोपयोगिदर्भसमित्तिलचर्वादि च संस्थाप्य । ततः परं पूर्णपात्रं च स्थापयेत् ॥ अथ सप्तद्वीपेश्वरीं ध्यात्वा वं बीजमुच्चरन् कुशपूलकान् प्रोक्षणीपात्रे निक्षिप्य तैः प्रोक्षणीपात्रोदकेन सर्वाणि पात्राणि वस्तुचयं च प्रोक्षेत् ॥ ततः आज्यपात्रे घृतं निक्षिप्य चरुस्थाल्यां तण्डुलान्निक्षिपेत् ॥ ततो घृतमग्नावधिश्रित्योद्धृत्याग्नेः प्रदक्षिणमानीय कुण्डाचार्ययोर्मध्ये मायाबीजमुच्चरन् स्थापयेत् ॥ धेनुमुद्रां प्रदर्श्य चरुस्थाल्यां तण्डुलान् सशर्करं क्षीरं च निक्षिप्याग्नौ चरुस्थालीमारोप्यार्धसिद्धे पायसे सदर्भपलाशसमिदुल्मुकेन घृतपायसयोस्त्रिः प्रादक्षिण्येन पर्यग्निकरणं कुर्यात् ॥ ततः स्रुक्स्रुवौ हस्ताभ्यां गृहीत्वा त्रिरधोमुखौ प्रताप्य वामहस्ते गृहीत्वा दक्षिणहस्तेन यथाधर्मं दर्भैर्मार्जयित्वा प्रोक्षणीजलेन प्रोक्ष्य पुनः प्रताप्य मार्जनान् दर्भानग्नौ क्षिपेत् ॥ ततः स्रुक्स्रुवयोर्मूलमध्याग्रेषु क्रमेण ॐ हां इच्छाशक्त्यै नमः । ॐ हीं ज्ञानशक्त्यै नमः । ॐ हूं क्रियाशक्त्यै० ॥ इति शक्तित्रयं सम्पूज्य हृन्मन्त्रेण स्रुचि शक्तिं स्रुवे शिवं च विचिन्त्य तौ त्रिसूत्र्या आवेष्ट्य पुष्पादिभिः सम्पूज्याज्याद्दक्षिणे कुशोपरि न्यसेत् ॥ ततः सिद्धे पायसे स्रुवगृहीतेनाज्येनाभिघार्याग्नेः प्रादक्षिण्येनानीय वायव्ये संस्थाप्य स्वबीजेन संस्कृत्य धेनुमुद्रां प्रदर्श्य ततस्तिष्ठन् मौनी तिस्रः समिधो वह्नौ निक्षिप्य प्रोक्षणीपात्रस्थेन कुशपूलकेन प्रदक्षिणमग्निं पर्युक्ष्य प्रणीतायां कुशपूलकान् निक्षिप्य जानुनी भूमौ निधाय मुखेनाग्निं धमेत् ॥ तत आज्ये प्रादेशसम्मितौ द्वौ दर्भौ सान्तरौ निधाय वामभागे इडां दक्षिणभागे पिङ्गलां मध्ये सुषुम्नां च ध्यात्वा स्रुवेण दक्षिणभागादाज्यं गृहीत्वा अग्नये स्वाहेत्यग्नेर्दक्षिणनेत्रे हुत्वा अग्नये इदं न ममेति त्यजेत् ॥ पुनर्वामभागाद्गृहीत्वा सोमाय स्वाहा सोमायेदं न ममेति वामनेत्रे जुहुयात् ॥ सम्मुखस्थितस्याग्नेरुत्तरस्यां दक्षिणं दक्षिणस्यां च वामं नेत्रं भवति ॥ पुनः स्रुवेण मध्यभागादाज्यं गृहीत्वा अग्नीषोमाभ्यां स्वाहा अग्नीषोमाभ्यामिदं न ममेति

भालस्थतृतीयनेत्रे जुहुयात् ॥ पुनरपि दक्षिणभागादाज्यमादाय ॐ ह्रीं प्रजापतये स्वाहा प्रजापतय इदं न मम ॥ ॐ ह्रीं महाकाल्यै० ॥ ॐ ह्रीं महालक्ष्म्यै० ॥ ॐ ह्रीं महासरस्वत्यै० ॥ अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृत इदं न ममेति मुखे जुहुयात् ॥ ततः समस्ताद्घृतादादाय ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा अग्नये च पृथिव्यै च महते च इदं न मम ॥ ॐ भुवो वायवे चान्तरिक्षाय च महते च स्वाहा वायवे चान्तरिक्षाय च महते च इदं न मम ॥ सुवरादित्याय च दिवे च महते च स्वाहा आदित्याय च दिवे च महते च इदं न मम ॥ ॐ भूर्भुवः सुवश्चन्द्रमसे च दिग्भ्यश्च महते च स्वाहा चन्द्रमसे च दिग्भ्यश्च महते च इदं न मम ॥ इति व्यस्तसमस्तमहाव्याहृतिभिश्चतस्र आज्याहुतीर्हुत्वा ॥ ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकार्याणि साधय स्वाहा अग्नये इदं न ममेत्याहुतित्रयं जुहुयात् ॥ ततोऽग्नेर्गर्भाधानादिसंस्कारान् अष्टाष्टाभिस्तिसृभिस्तिसृभिर्वाहुतिभिः कुर्यात् ॥ अस्याग्नेर्गर्भाधानसंस्कारं करोमि स्वाहा अग्नये इदं न मम ॥ अस्याग्नेः पुंसवनसंस्कारं करोमि० ॥ अस्याग्नेरनवलोभनसंस्कारं० ॥ अस्याग्नेः सीमन्तोन्नयनसं० ॥ अस्याग्नेर्जातकर्मसं० ॥ इत्याज्याहुतीर्हुत्वा ॥ शतमङ्गलनामासि त्वं हुताशनेत्यग्नेर्नाम कृत्वा अस्याग्नेर्नामकरणसं० ॥ अस्याग्नेरन्नप्राशनसं० ॥ अस्याग्नेश्चूडाकरणसं० ॥ अस्याग्नेरुपनयनसं० ॥ अस्याग्नेः समावर्तनसं० ॥ अस्याग्नेःविवाहसं० ॥ ततो वह्नेः पितरौ वागीश्वरीवागीश्वरौ सम्पूज्य विसृज्य स्वहृदये समारोपयेत् ॥ ततोऽग्नेः पूर्वोक्तजिह्वादिसप्तावरणदेवताभ्यः स्वाहान्तैर्नाममन्त्रैस्त्यागसहितैः एकैकामाज्याहुतिं जुहुयात् ॥ ततः स्रुवेण स्रुचि चतुर्वारमाज्यं गृहीत्वा स्रुवेणाच्छाद्य तिष्ठन् स्रुक्स्रुवयोरग्रे पुष्पे निक्षिप्य करद्वयेनादाय स्वनाभिसमीपे धृत्वा तयोर्मूलं वामस्तनान्तमुद्धृत्य ॐ वैश्वानरजातवेद इहावह लोहिताक्ष सर्वकार्याणि साधय स्वाहा ॥ वौषट् ॥ अग्नय इदं न मम ॥ इति पूर्णा-

हुतिं हुत्वा व्यस्तसमस्तेन महागणपतिमन्त्रेण चतुर्दशाज्याहुतीर्जुहुयात् तद्विभागो यथा ॥ ॐ ॐ स्वाहा महागणपतये इदं न मम ॥ १ ॥ ॐ ॐ श्रीं स्वाहा महागण० ॥२॥ ॐ ॐ श्रीं ह्रीं स्वाहा महागण० ॥ ३ ॥ ॐ ॐ श्रीं ह्रीं क्लीं स्वाहा महागण०॥४॥ ॐ ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा महा० ॥ ५ ॥ ॐ ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा महा० ॥ ६ ॥ ॐ गणपतये स्वाहा महा० ॥ ७ ॥ ॐ वर वरद स्वाहा महा० ॥ ८ ॥ ॐ सर्वजनं मे वशं स्वाहा महा० ॥ ९ ॥ ॐ आनय स्वाहा महा० ॥ १० ॥ इति व्यस्तेन दशाज्याहुतीर्हुत्वा ॐ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा महागणपतय इदं न ममेति समस्तमन्त्रेण चतस्र आज्याहुतीर्जुहुयात् ॥ १४ ॥ सर्वत्र प्रणवारब्धमन्त्रेष्वादावन्यः प्रणवो योज्यः ॥ एवं स्वाहान्तेष्वन्यः स्वाहाकारः ॥ अथ पूजाप्रकरणोक्तान् न्यासान् कृत्वा महालक्ष्मीं ध्यात्वा वह्नौ देवीपीठं विचिन्त्य तत्र महालक्ष्मीमावाह्य देवताङ्गेषु मूलेन षडङ्गं न्यस्य मूलमन्त्रेण यथाशक्ति सम्पूज्य वह्निदेवतात्मनामैक्यं विचिन्त्य देवतामुखे मूलेन त्यागसहिताः पञ्चविंशत्याज्याहुतीर्हुत्वा पुनर्वह्निदेवतयोर्नाडीसन्धानार्थं पूर्ववन्मूलेनैकादशाज्याहुतीर्जुहुयात् ॥ ततः प्रधानमन्त्रस्य स्तोत्रस्य च ऋष्यादि स्मृत्वा होमे विनियोगं कृत्वा तत्तत्कल्पोक्तहविर्द्रव्यैर्जपदशांशतो होमं कुर्यात् ॥ सर्वत्र स्वाहायोजनेन होमः अमुकदेवतायै इदं न ममेति त्यागश्च ॥ तत्र नवार्णमन्त्रस्य लक्षात्मकपुरश्चरणे दशमांशतो दशसहस्राणि पायसाहुतयः महाकालीमहालक्ष्मीमहासरस्वतीभ्य इदं न ममेति त्यागः ॥ चतुर्लक्षात्मके चत्वारिंशत्सहस्राण्याहुतयः प्राग्वत् त्यागश्च ॥ **अथ सप्तशतीजपकर्मसु ॥** तत्र नवरात्रनवदुर्गाकालरात्रिषु साङ्गसप्तशत्याः पाठक्रमेणैकावृत्त्या यथासम्भवं प्रतिश्लोकं प्रत्यृचं प्रतिमन्त्रं च होमः ॥ तत्र कवचादित्रयस्य कण्ठरवेण देवतानुक्तेस्तत्र सर्वसाधारणप्रकृतिभूतमहालक्ष्म्या एव देवतात्वान्म-

हालक्ष्म्यै इदं न ममेति त्यागः ॥ होमद्रव्यं सर्पिस्तिलमिश्रपायसम् ॥ रात्रिसूक्तस्य रात्रिरूपमहालक्ष्मीदेवताकत्वात्तत्र रात्रिरूपायै महालक्ष्म्यै न ममेति त्यागः ॥ सम्पुटाङ्गनवार्णहोमे तिलमिश्रं पायसमाज्यं वा होमद्रव्यं महाकालीमहालक्ष्मीमहासरस्वतीभ्यो न ममेति त्यागः ॥ प्रथमचरित्रे महाकाल्यै इदं न ममेति, मध्यमचरित्रे महालक्ष्म्यै इदं न ममेति, उत्तमचरित्रे महासरस्वत्यै इदं न ममेति त्यागः ॥ देवीसूक्ते ब्रह्मरूपायै महालक्ष्म्यै इदं न ममेति ॥ रहस्यत्रये प्राधानिके महालक्ष्म्यै इदं न ममेति, वैकृते महाकाल्यादिविकृतित्रयस्वरूपायै महालक्ष्म्यै इदं न ममेति मूर्तिरहस्ये नन्दादिमूर्तिस्वरूपायै महालक्ष्म्यै इदं न मम इति त्यागः ॥ प्रतिमन्त्रं त्यागाशक्तौ सर्वारम्भे सकृदेव इमान्युपकल्पितहविर्द्रव्याणि अत्र होमे या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तानि न मम ॥ यथा दैवतं सन्तु ॥ इति त्यागं कुर्यात् ॥ सप्तशतीपुरश्चरणे नित्यचण्ड्यां चावृत्तित्रयेण होमः ॥ पञ्चचत्वारिंशदावृत्त्यात्मकनवचण्ड्यां पञ्चावृत्तिभिः ॥ शतचण्ड्यां सम्पुटीकरणनवार्णजपात् पृथगादौ नवार्णेनायुतहोमः पश्चात्साङ्गसप्तशत्या दशावृत्तिभिः ॥ सहस्रचण्ड्यामादौ नवार्णेन लक्षसङ्ख्यया पश्चात्साङ्गसप्तशत्याः शतावृत्तिभिश्च ॥ एवमन्येष्वपि कर्मसु दशांशतो होमसङ्ख्या स्वयमूह्या ॥ सप्तशतीमन्त्राणां जपसङ्ख्यादशमांशापेक्षया अल्पाधिकत्वे नवरात्रनवदुर्गाकालरात्रिषु नवावृत्त्यात्मककर्मसु सप्तशत्या एकावृत्त्या, अष्टाविंशत्यात्मकपुरश्चरणे सप्तशत्यावृत्तित्रयेण, पञ्चचत्वारिंशदावृत्त्यात्मकनवचण्ड्यां पञ्चावृत्तिभिर्होमाचारस्य दर्शनादाधिकं तु न हानिकरमिति न्यायेन सप्तशतीमन्त्रैर्होमः ॥ बह्वाधिकत्वे न्यूनत्वे वा नवार्णमन्त्रेण नमो देव्यै इति श्लोकेन वा दशांशसङ्ख्यया होमः ॥ कवचाद्यङ्गहोमस्तु स्वमन्त्रैरेव ॥ जपे सप्तशतीमन्त्रेषु पल्लवादियोजने तत्प्रयुक्तनवार्णहोमे नमो देव्यै इति मन्त्रेण वा होमें जपाङ्गीकृतपल्लवादियोजना कर्तव्यैव । होमे सर्वत्र कवचाद्यङ्गेषु

सूक्तयोर्नवार्णमन्त्रस्य तत्तच्चारित्राणां चारम्भे ऋष्यादिस्मरणं होमे विनियोगश्च कार्यः॥**अथाङ्गदेवताहोमः** ॥ तत्र नवदुर्गाकालरात्र्योरारम्भे केवलदिक्पालानां पूजोक्तेस्तत्र तेभ्यः सप्तशत्यावृत्तिसमसङ्ख्यया सर्पिस्तिलचरुभिः प्रतिद्रव्यं नव नवाहुतयः ॥ नवचण्डीशतचण्डीसहस्रचण्डीनामारम्भे दिग्देवीनवग्रहलोकपालदिक्पालानां पूजाद्युक्तेः दिग्देवीभ्यः कादम्बर्यादिभ्यः आज्येन पायसेन वा ग्रहेभ्यः समित्तिलचर्वाज्यैः, लोकपालदिक्पालेभ्यः सर्पिस्तिलचरुभिः प्रतिद्रव्यं सप्तशत्यावृत्तिसमसङ्ख्यया, यथाक्रमं पञ्चचत्वारिंशत् शतं सहस्रं चाहुतयः ॥ देवीपूजाङ्गद्वारदैवतपीठदेवतावरणेदवताभ्यो विशेषानुक्तेः सर्वत्र एकैकाज्याहुतिः ॥ ब्रह्मादिमण्डलदेवतास्थापने ताभ्यश्चैकैकाज्याहुतिः ग्रहादिहोमे यथालाभं वैदिका मन्त्रा अन्यत्र स्वबीजसहिता नाममन्त्रा योज्याः एवमुक्तक्रमेण सर्वं प्रधानाङ्गहोमं सम्पाद्य स्विष्टकृद्धोमं कुर्यात् ॥ ॐ ह्रीं ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै नारसिंह्यै ऐन्द्र्यै चामुण्डायै विच्चे स्विष्टकृते स्वाहा ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै नारसिंह्यै ऐन्द्र्यै चामुण्डायै विच्चे स्विष्टकृते इदं न मम ॥ इत्येकामाहुतिं हुत्वा । ॐ ह्रीं नन्दजायै विच्चे स्वाहा नन्दजायै इदं न मम ॥ ॐ ह्रीं रक्तदन्तिकायै विच्चे स्वाहा रक्त० ॥ ॐ शाकम्भर्यै विच्चे स्वाहा शाकं० ॥ ॐ ह्रीं दुर्गायै विच्चे स्वाहा दुर्गा० ॥ ॐ ह्रीं भीमायै विच्चे स्वाहा भीमायै० ॥ ॐ ह्रीं भ्रामर्यै विच्चे स्वाहा भ्रामर्यै० ॥ ॐ ह्रीं कालिकायै विच्चे स्वाहा कालि० ॥ ॐ ह्रीं शिवदूत्यै विच्चे स्वाहा शिव० ॥ ॐ ह्रीं प्रजापतये विच्चे स्वाहा प्रजा० ॥ इति नवाहुतीर्जुहुयात् ॥ **इति डामरतंत्रोक्त स्विष्टकृतम्** ॥ ततः प्रायश्चित्तार्थं पूर्ववत्व्यस्तसमस्तमहाव्याहृतिभिश्चतस्र आज्याहुतीर्जुहुयात् ॥ ततो यजमानो नवरात्रोक्तप्रकारेण कूष्माण्डादिबलिं माषपिष्टमयशत्रुप्रतिकृतिबलिं च दत्वा ॥ स्रुचि होमावशिष्टमाज्यं निक्षिप्य तदग्रे पुष्पफलं च निधाय स्रुवेणाच्छाद्य तिष्ठन् वौषडन्तेन

मूलेन घृतस्याच्छिन्नधारया पूर्णाहुतिं जुहुयात् ॥ **अथ शतचण्ड्यादौ विशेषो यथा** ॥ कुण्डस्य पश्चिमे स्तम्भद्वयं निखाय तदुपरि तिर्यक् काष्ठं बध्वा तस्मिन्नग्न्यभिमुखीं कुण्डान्तःप्रविष्टाग्रां स्रुचं निधाय तां गन्धादिभिः सम्पूज्य तया घृतकुम्भदशांशेन मूर्धानं दिव इत्यादिमन्त्रान् मूलमन्त्रं च पठन् पूर्णाहुतिं जुहुयादिति ॥ ततः प्रोक्षणीपात्रस्थान् संस्रवान् प्राश्नीयात्तत्र मन्त्रः ॥ यस्माद्यज्ञरसात् प्रीता यज्वानो ब्रह्मरूपिणः ॥ तं संस्रावपुरोडाशं प्राश्नामि सुखपुण्यदम् ॥ इति ॥ ततः प्रणीताया जले सर्वतीर्थानि ध्यात्वा तेन कुशपूलकैरात्मानं मार्जयेत्तत्र मन्त्राः ॥ याः शिवाः शक्तयो याश्च याभिश्च सविता सह ॥ या आपः सप्तधा यातास्ता मे कृण्वन्तु किल्बिषम् ॥ इति श्लोकः ॥ तथा प्रथमाध्यायस्था देव्या ययेत्यादयः पञ्चविंशतिश्लोकाः ॥ पञ्चमाध्यायस्था नमो देव्यै महादेव्यै इत्याद्यास्त्रिंशत् ॥ एकादशाध्यायस्था देवि प्रपन्नार्तिहरे इत्याद्यास्त्रयस्त्रिंशत् श्लोकाश्च ॥ इदमवभृथस्नानं सर्वकल्मषघ्नम् ॥ इत उत्तरं दक्षिणाप्रदानश्रेयोग्रहणाशीर्ग्रहणदेवताविसर्जनाभिषेकपीठदानतत्तत्कर्मप्रयुक्तविशेषदानादिकृत्यं पूर्वं तत्कर्मसूक्तत्वान्नात्र तत्पुनरुच्यते ॥ अथाचार्योऽग्निं सम्पूज्य विभूतिं धृत्वा ॥ याहि वह्ने महाशक्ते सर्वकर्मप्रसाधक ॥ कर्मान्तरे तु सम्प्राप्ते सान्निध्यं कुरु सादरम् ॥ इत्यग्निं विसृज्यात्मनि समारोपयेत् ॥ ततः पवित्रपरिस्तरणपरिध्यादिकमग्नौ निक्षिप्य प्रणीताजलं होमाग्नेः पुरतो निनीय द्विराचम्य कर्मेश्वरार्पणं कुर्यात् ॥ ग्रहमखपक्षे ग्रहपीठस्थापनं ग्रहादीनां तत्तन्मन्त्रैस्तत्तद्द्रव्यैर्होमस्तेभ्यो बलिदानं ग्रहपीठविसर्जनदानादिकं च यथासमयं स्वगृह्योक्तविधिना कार्यम् ॥ इति **तान्त्रिकः सकलचण्डीकर्महोमप्रयोगः** ॥ अयमशक्तौ स्वगृह्योक्तविधिना कार्यः ॥ तत्राप्यशक्तौ चतुर्गुणद्विगुणान्यतरजपद्वारा कार्यः ॥

इति चण्डिकोपास्तिदीपिकायां यागप्रकाशः ।

॥ श्री ॥

अथ चण्डिकोपास्तिदीपिकायां मन्त्रविभागप्रकाशः ॥

श्री

अथ मन्त्रविभागप्रकाशः ।

अथ मन्त्रविभागप्रकाशः प्रारभ्यते । तत्र रहस्ये प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषेत्यत्र श्लोकपदस्य मन्त्रलक्षकत्वात्, मुनीषुमितेंगद्याव्यनागर्षिशंरेंसंम्मितान् ॥ श्लोकान् विभज्य जुहुयाच्छतसप्तकसङ्ख्यया ॥ इति तन्त्रान्तरोक्तेश्च होमाद्युपयोगार्थं **कात्यायनीतन्त्रोक्तो** मन्त्रविभागः प्रदर्श्यते ॥ **मूलम्** ॥ ईश्वर उवाच ॥ मार्कण्डेय उवाचाद्यो मन्त्रः श्लोकात्मकास्ततः ॥ व्योमादिवर्णमारभ्य द्वितीयस्वरसंयुतम् ॥ नृपमित्यन्तिमा मन्त्रा भवन्त्यष्टादश प्रिये ॥ इति ॥ (मार्कण्डेय उवाचेति प्रथमाध्यायस्य प्रथमो मन्त्रः । ततः, व्योमहकारस्तस्य मातृकाक्रमेणादिः सकारः । तं द्वितीयस्वरेण दीर्घाकारेण संयुतं ‘ सा ’ इत्येवं रूपं आरभ्य, नृपमितिपदं अन्तिमं येषान्ते अष्टादशमन्त्रा भवन्ति ॥ सावर्णिः सूर्यतनय इत्यारभ्य प्रश्रयावनतो नृपमित्यन्तं सार्धाः सप्तदशश्लोका अष्टादशमन्त्रा भवन्तीत्यर्थः ॥ सार्धसप्तदशश्लोकानां अष्टादशमन्त्रत्वोक्तेः सप्तदशश्लोकमन्त्रा एकोऽर्धश्लोकमन्त्र इत्यर्थात्सिद्धम् ॥ श्लोकात्मका अष्टादशमन्त्रा इत्युक्तिः श्लोकमन्त्राणां बाहुल्यात् ॥ अथैतेषु सार्धसप्तदशश्लोकेषु कतमोऽर्धश्लोकमन्त्र इति संशये उच्यते तन्त्रे प्रथमाध्याये यैर्निरस्त इत्यादिद्वयं तथा भवेतामद्य मे इत्यादि द्वयं च चतुर्थे म्रियतां त्रिदशा इत्येकः । त्रयोदशे स्वल्पैरहोभिरित्यादिषट्कं चेत्येकादशार्धश्लोकमन्त्राः कण्ठरवेणोक्ताः । तदन्येषां तत्र प्रतीकैरनिर्देशेन तन्निर्णयस्य मन्त्रलक्षणाधीनत्वादादौ तदुच्यते । **“एकवाक्यव्याप्यत्वं मन्त्रत्वमिति”** ॥ मन्त्रत्वप्रसिद्धिविषयत्वं मन्त्रत्वमिति मन्त्रलक्षणं तु हुं फडादि लोकप्रसिद्धबीजमन्त्रेष्वेव ॥ **परस्परसाकाङ्क्षपदसमूहो वाक्यम्** ॥ तच्च द्विविधम् ॥ वाक्यान्तरनिराकाङ्क्षं वाक्यान्तरसाकाङ्क्षं चेति ॥ **साकाङ्क्षवाक्यसमूहो महा-**

वाक्यम् ॥ उक्तं च **तन्त्रवार्तिके**। स्वार्थबोधे समाप्तानामङ्गाङ्गित्वव्यपेक्षया ॥ वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥ इति ॥ महावाक्यावयवीभूतवाक्यानामवान्तरवाक्यसंज्ञा ॥ मन्त्रत्वं तु त्रितयसाधारणम् ॥ तत्राद्ये यथा ॥ स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥ इत्यादीनां वाक्यान्तरनिराकाङ्क्षाणां श्लोकानां तथा ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ इत्यादीनां तादृशानामर्धानां च क्रमेण श्लोकमन्त्रत्वमर्धश्लोकमन्त्रत्वं च ॥ द्वितीये यथा ॥ योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥ इत्यादिश्लोकानां यत्तत्पदघटितत्वेन परस्परसाकाङ्क्षाणां, तथा यैर्निरस्तो भवान् लुब्धैः पुत्रदारादिभिर्धनैः ॥ तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥ इत्यादीनां तादृशानामर्धानां च यथाक्रमं प्रत्येकं श्लोकमन्त्रत्वमर्धश्लोकमन्त्रत्वं च ॥ तृतीये यथा ॥ सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ इत्यादिश्लोकानां यत्तच्छब्दगर्भार्धद्वयरूपसाकाङ्क्षवाक्यद्वयसमूहात्मकमहावाक्यरूपाणां श्लोकमन्त्रत्वम् ॥ क्वचिन्मन्त्रान्तर्गतपदैर्वाक्यपूर्त्यभावे पूर्वोत्तरमन्त्रतोऽपेक्षितार्थांशस्यानुकर्षापकर्षाभ्यामध्याहारादिना च सा सम्पाद्या ॥ यथाद्वादशाध्याये, दैत्याश्च देव्या निहते० माययुरिति सार्धश्लोकात्मकमहावाक्ये प्रथमे श्लोकमन्त्रे उत्तरस्मात् निशुम्भे च महावीर्ये इत्यर्धश्लोकमन्त्रात् शेषाः पातालमाययुरित्यंशस्यापकर्षः। एवमुत्तरेऽर्धश्लोकमन्त्रे पूर्वस्मात् दैत्याश्च देव्या निहते इति श्लोकमन्त्रात् दैत्याश्च देव्या निहते इत्यंशस्यानुकर्षः। एवमन्यत्राप्यूह्यम्। तच्च प्रायस्तत्तत्स्थलेव्याख्यायां दर्शयिष्यते ॥ अनुकर्षापकर्षाध्याहाराश्च मनसा कर्तव्याः न तु मुखेन तत्तदर्थकपदोच्चारः ॥ अथात्रसार्धसप्तदशश्लोकेषु कतमोऽर्धमन्त्र इति जिज्ञासायां पूर्वोक्तमन्त्रलक्षणसम्पन्नत्वात्सोचिन्तयत्तदा तत्र ममत्वाकृष्टमानस

इत्ययं वेदितव्यः ॥ ननु तस्थौ कञ्चित्स कालं च मुनिना तेन सत्कृत इत्यर्धस्यापि मन्त्रलक्षणसम्पन्नत्वात् प्रथमोपस्थितत्वाच्च तस्यैवार्धमन्त्रत्वमस्त्विति चेन्न तथा सति तेन जायमाने इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥ सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः ॥ इति श्लोकात्मकमन्त्रे तस्मिन्निति, तत्रेति च समानार्थपदद्वयप्राप्तिप्रसङ्गात् ॥ यदा यस्य श्लोकस्यार्धस्य वा मन्त्रत्वमास्थीयते तदा तत्पूर्वेषामुत्तरेषां च मन्त्राणां यथा कश्चित्काव्यदोषो नोत्पद्येत तथावश्यमवधातव्यं भवति ॥ सोऽचिन्तयदित्यस्यार्धमन्त्रत्वे तु तत्पूर्वोत्तरमन्त्रेषु काव्यदोषोत्पत्त्यसम्भवात् तस्यैवार्धमन्त्रत्वं युक्तम् ॥ केचित् पूर्वोवाचमन्त्रादुत्तरोवाचमन्त्रपर्यन्तं श्लोकमन्त्रान् गणयित्वान्ते एवमर्धमवशिष्यते चेत्सोऽर्धमन्त्रः ॥ तदुत्तरोवाचमन्त्रात्परमर्धमपि पूर्वश्लोकोत्तरार्धत्वादर्धमन्त्र एव ॥ एवं चैकश्लोकस्यार्धद्वयमध्ये उवाच मन्त्रपाते तत्पूर्वोत्तरार्धयोरर्धमन्त्रत्वम्। एवमध्यायान्तेऽवशिष्टस्यार्धस्याप्यर्धमन्त्रत्वम् ॥ उक्तन्यायेन उत्तराध्यायारम्भीयोवाचमन्त्रात्परस्यार्धस्य तु नार्धमन्त्रत्वम् अध्यायसमाप्त्या पूर्वसम्बन्धस्य परिसमाप्तत्वादिति स्वकपोलकल्पितमर्धमन्त्रलक्षणं कृत्वा तदनुरोधेनात्र प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपमित्यर्धस्यार्थमन्त्रत्वमाहुस्तत्तदुक्तार्धमन्त्रलक्षणस्य कात्यायनीतन्त्रोक्तमन्त्रविभागविरोधादुपेक्ष्यम्॥ स विरोधस्त्रयोदशाध्यायमन्त्रविभागे दर्शयिष्यते) **मूलम्** । वैश्यवाक्यं ततः श्लोका व्योमाद्यात् पञ्चमन्त्रकाः ॥ इति ॥ (वैश्यवाक्यं वैश्य उवाचेति मन्त्रः ॥ ततो व्योमाद्यात् व्योम हकारस्तस्य आद्यात् सकारात् सकारमारभ्येत्यर्थः ॥ ल्यब्लोपे पञ्चमी ॥ तथा च समाधिर्नामवैश्योऽहमित्यारभ्य चत्वारः श्लोका पञ्च मन्त्रा भवन्ति ॥ तत्र प्रथमे त्रयः श्लोकमन्त्राः । अन्त्यौ द्वावर्धमन्त्रौ ।) **मूलम्** ॥ नृपस्योक्तिर्मान्तवर्णाद्द्वादशस्वरसंयुतात् ॥ सकारो बिन्दुयुक्तोऽन्ते मन्त्रौ द्वावीदृशौ मतौ ॥ इति ॥ (नृपस्योक्तिः राजोवाचेतिमन्त्रः ॥ द्वादशस्वर ऐकारः तत्संयुतान्मान्तवर्णात् मकारस्यान्ते

वर्तमानाद्वर्णात् यकारात् यै इति वर्णमारभ्येत्यर्थः ॥ अन्ते बिन्दुयुक्तः सानुस्वारः सकारः ॥ ईदृशौ द्वौ मन्त्रौ मतौ ॥ यैर्निरस्त इत्यारभ्य अनुबध्नाति मानसमित्यन्तस्यैकश्लोकस्य द्वावर्धमन्त्रावित्यर्थः ।) मूलम् । ततो वैश्य उवाचेति स्वरैकादश आदितः ॥ वह्निबीजं बिन्दुयुक्तमन्ते स्यान्मनुपञ्चकम् ॥ इति ॥ (वैश्य उवाचेत्येको मन्त्रः ॥ आदितः आदौ । स्वरैकादशः एकादशः स्वरः एकारः । अन्ते बिन्दुयुक्तं वह्निबीजम् । सानुस्वारो रेफः । तेन रमिति ॥ तथा च एवमेतदित्यारभ्य तेष्वप्रीतिषु निष्ठुरमित्यन्तं चत्वारः श्लोकाः पञ्च मन्त्रा भवन्ति ॥ तत्राद्यास्त्रयः श्लोकमन्त्रा अन्त्यौ द्वावर्धमन्त्रौ ।) मूलम् ॥ मार्कण्डेय उवाचैकस्ततो मन्त्रत्रयं भवेत् ॥ तादिवर्णं च भुवनस्वरयुग्वारुणान्तिमम् ॥ इति ॥ (मार्कण्डेय उवाचेत्येको गद्यमन्त्रः । ततः तकारः आदिवर्णो यस्य तत् तादिवर्णम् । भुवनस्वरश्चतुर्दशस्वर औकारः तद्युक्तम् । वारुणं तकारः तेन वौ इति वर्णः । सोऽन्तिमो यस्य तत् वारुणान्तिमम् ॥ आदौ तकारः अन्ते वौ इति वर्णो यस्य । एतादृशं श्लोकद्वयं मन्त्रत्रयं भवेत् ॥ ततस्तौ सहितावित्यारभ्य वैश्यपार्थिवावित्यन्तं श्लोकद्वयं त्रयो मन्त्रा इत्यर्थः ॥ तत्राद्यौ द्वावर्धमन्त्रौ अन्त्यः श्लोकमन्त्रः ।) मूलम् । ततो राजेति षण्मन्त्रा भादितान्ताः शुभानने ॥ इति ॥ (ततो राजोवाचेत्येको गद्यमन्त्रः । भकारः आदिर्येषाम् ता इति वर्णो अन्ते येषान्ते भादितान्ताः । भगवंस्त्वामहमित्यारभ्य विवेकान्धस्य मूढतेत्यन्तं पञ्च श्लोकाः षण्मन्त्रा भवन्तीत्यर्थः । तत्राद्यौ द्वावर्धमन्त्रौ । अन्त्याश्चत्वारः श्लोकमन्त्राः ॥ शुभानने इति पार्वत्याः सम्बोधनम् ।) मूलम् । अथोवाच ऋषिर्ज्ञानमस्तीत्यारभ्य पार्वति ॥ सर्वेश्वरेश्वरीत्यन्ता मन्त्रा द्वादशकीर्तिताः ॥ इति ॥ (ऋषिरुवाचेत्येको मन्त्रः । ततोज्ञानमस्तीत्यारभ्य एकादशश्लोका द्वादशमन्त्रा भवन्ति ॥ तत्र आद्या दशश्लोकमन्त्राः अन्त्यौ द्वावर्धमन्त्रौ) मूलम् । राजोवाचेति भगवन्नादावन्ते

विदांवर ॥ मन्त्रत्रयमिदं ख्यातमिति ॥ (राजोवाचेत्येको मन्त्रः ततो
भगवन् का हि सा देवीति श्लोकद्वयं मन्त्रत्रयं भवन्ति ॥ तत्र आद्यः श्लोक-
मन्त्रः ॥ अन्त्यावर्धमन्त्रौ) **मूलम्** । पश्चादृषिरुवाच ह ॥ नित्यैव सा
जगदादौ प्रभुरन्तेऽष्टमन्त्रकाः ॥ इति ॥ (ऋषिरुवाचेत्येको मन्त्रः । ततो
नित्यैव सा जगन्मूर्तिरित्यारभ्य अतुलां तेजसः प्रभुरित्यन्तं सप्तश्लोका अष्ट-
मन्त्रा भवन्ति ॥ तत्राद्यौ द्वावर्धमन्त्रौ इतरे षट्श्लोकमन्त्राः) **मूलम्** । ब्रह्मोवाच
ततश्चैव त्वं स्वाहा त्वं स्वधादिमाः ॥ महासुरान्तिमा मन्त्रा मताः पञ्चदश-
प्रिये ॥ इति ॥ (ब्रह्मोवाचेत्येको मन्त्रः । ततः त्वं स्वाहा त्वं स्वधेत्यारभ्य
हन्तुमेतौ महासुरावित्यन्ताः चतुर्दश श्लोकाः पञ्चदशमन्त्रा भवन्ति ॥
तत्राद्यास्त्रयोदश श्लोकमन्त्राः । अन्त्यौ द्वावर्धमन्त्रौ) **मूलम्** । ऋषिरेवं
स्तुतेत्याद्याः सप्त स्युः केशवान्तिमाः ॥ इति ॥ (ऋषिरुवाचेत्येको गद्य-
मन्त्रः । एवं स्तुता तदा देवीत्यारभ्य व्रियतामिति केशवमित्यन्तं षट्
श्लोकाः सप्तमन्त्रा भवन्ति ॥ तत्र आद्याः पञ्च श्लोकमन्त्राः । अन्त्यौ
द्वावर्धमन्त्रौ) **मूलम्** । ततो भगवदुक्तिः स्याद्भवेतामित्युभौ मनू ॥ इति ॥
(भगवदुक्तिर्भगवानुवाचेति गद्यमन्त्रः । ततो भवेतामद्य मे तुष्टाविति
श्लोकस्यार्धमन्त्रद्वयम् ।) **मूलम्** । अथर्षिर्वञ्चिताभ्यामित्येतन्मन्त्रद्वयं शिवे ॥
इति ॥ (ऋषिरुवाचेत्येको गद्यमन्त्रः । ततो वञ्चिताभ्यामिति श्लोकमन्त्रः ।
आवां जहीत्यर्धमन्त्रः ।) **मूलम्** । ऋष्युक्तिश्च तथेत्यादि श्लोकौ मन्त्रद्वयं
भवेत् ॥ इति ॥ (ऋषिरुवाचेत्येको गद्यमन्त्रः । तथेत्युक्त्वेति द्वौ श्लोक-
मन्त्रौ) **मूलम्** । सर्वे श्लोका इहाध्याये त्वष्टयुक् सप्ततिर्मताः ॥ मध्येऽर्ध-
श्लोकमन्त्रास्तु चतुर्विंशतिरीरिताः ॥ उवाचान्तास्तत्र बोध्या मन्त्रा भुवन-
सङ्ख्यया ॥ संहत्याहुतयो ज्ञेयाश्चतुर्भिरधिकं शतम् ॥ इति ॥ (अस्मिन्न-
ध्याये अष्टयुक् सप्ततिः अष्टसप्ततिः श्लोकाः । तत्र षट्षष्टिः श्लोकमन्त्राः ।
चतुर्विंशतिरर्धमन्त्राः । उवाचान्ता मन्त्रा भुवनसङ्ख्यकाः । चतुर्दशेत्यर्थः

।। सर्वे मिलित्वा चतुरधिकशतं मन्त्राः ।) इति कात्यायनीतन्त्रे मन्त्रविभागे प्रथमाध्यायविभागो नाम विंशतितमः पटलः ।।

मूलम् । ईश्वर उवाच ।। द्वितीये ऋषिवागष्टषष्टिः श्लोका इति क्रमः।। इति ।। (ऋषिवाग् ऋषिरुवाचेति मन्त्रः ।। ततः देवासुरमभूद्युद्धमित्यादयोऽष्टषष्टिः श्लोकमन्त्राः । एवं सर्वे मन्त्रा एकोनसप्ततिः ।) **मूलम्** । ततस्तृतीयेऽध्याये तु ऋषिरुवाच देशिके ।। पञ्चत्रिंशत्तथाश्लोकमन्त्रा ज्ञेया वरानने ।। इति ।। (तृतीये प्रथम ऋषिरुवाचेत्येको मन्त्रः । ततो निहन्यमानमित्याद्याः पञ्चत्रिंशत् श्लोकमन्त्राः । देशिके इति स्त्रीत्वेपि मन्त्रोपदेशाधिकारात् पार्वत्याः सम्बोधनम् ।।) **मूलम्** । देव्युवाच ततः श्लोकमन्त्र एको महेश्वरि ।। इति ।। (देव्युवाचेत्यको गद्यमन्त्रः । ततो गर्जगर्जेत्येकः श्लोकमत्रः ।) **मूलम्** ।। ऋषेरुक्तिः पुनः श्लोकमन्त्राः पञ्च सनातनाः ।। एवमाहुतयः प्रोक्ताश्चत्वारिंशच्चतुर्युताः ।। (ऋषेरुक्तिर्ऋषिरुवाचेति मन्त्रः । पुनः एवमुक्त्वेत्यादयः पञ्च श्लोकमन्त्राः ।। एवं सर्वे चतुश्चत्वारिंशन्मन्त्रास्तृतीये ।।) **मूलम्** ।। चतुर्थे ऋषिवाङ्मन्त्रः श्लोकाः षड्विंशतिस्ततः ।। इति ।। (ऋषिवाङ्मन्त्रः ऋषिरुवाचेति मन्त्र ततः । शक्रादय इत्यादयः षड्विंशतिः श्लोकमन्त्राः) **मूलम्** । पुनस्तथैव ऋष्युक्तिः श्लोकौ द्वौ मन्त्ररूपिणौ ।। इति ।। (पुनर्ऋषिरुवाचेति मन्त्रः । ततः एवं स्तुतेति, भक्त्या समस्तैरिति च द्वौ श्लोकमन्त्रौ ।) **मूलम्** । देव्युक्तिर्व्रियतां मन्त्रः कथितः षोडशाक्षरः ।। इति ।। (देव्युक्तिर्देव्युवाचेति मन्त्रः । ततः व्रियतां त्रिदशा इति षोडशाक्षरोऽर्धश्लोकात्मको मन्त्रः ।) **मूलम्** । देवा ऊचुरिति प्रोच्य भगवत्या कृतं वदेत् ।। मन्त्रोऽयं शतवर्णाढ्यो द्वादशोत्तरयुक् पुनः ।। इति ।। (देवा ऊचूरित्येको गद्यमन्त्रः । ततो भगवत्या कृतमित्यारभ्य भवेथाः सर्वदाम्बिके इत्यन्तः सार्धश्लोकत्रयात्मको द्वादशाधिकशताक्षर एको मन्त्रो जपे सर्वकामप्रदः सर्वापद्विनाशनश्च । अस्य सपल्लवादिपाठे होमादौ च चतुर्धा

विभागः कर्तव्यः ॥ तत्राद्यौ द्वौ श्लोकमन्त्रौ । यश्च मर्त्य इत्यर्धमन्त्रः ॥ तस्य वित्तर्द्धिविभवैरित्यन्तिमः श्लोकमन्त्र इति ज्ञेयम् ॥ आद्यास्त्रयः श्लोकमन्त्राः अन्त्योऽर्धश्लोकमन्त्र इति भास्करराया: ॥ तन्मतानुसारेण वृद्धयेऽस्मत्प्रसन्ना त्वमित्यन्तिमाधस्यार्धमन्त्रत्वस्वीकारे तद्गतस्य वृद्धये इति पदस्य पूर्वश्लोकगतेन धनदारादिसम्पदामित्यनेन सह सम्बन्धादुभयत्राप्यपूर्णवाक्यत्वेन मन्त्रलक्षणायोगात्तत्सम्पत्त्यर्थं चातिक्लिष्टव्याख्यानप्रसङ्गात् ॥ तस्माद्यश्च मर्त्य इत्यस्यैवार्धमन्त्रत्वमास्थेयम् ॥ तथा सति तस्य तदुत्तरश्लोकस्य च यत्तच्छब्दघटितसाकाङ्क्षवाक्यद्वयसमूहात्मकमहावाक्यावान्तरवाक्यद्वयरूपत्वेन, गैर्गिरस्तौ भवान्–तेषु किं भवत इत्यर्धयोरिव मन्त्रद्वयत्वं निर्बाधम् ।) **मूलम्** । अथो ऋषिरुवाचेति मन्त्रश्चेति प्रसादिता ॥ इति श्लोकास्तु चत्वारो मन्त्रास्तावन्त एव ते ॥ इति ॥ ऋषिरुवाचेत्येको गद्यमन्त्रः। इति प्रसादिता देवैरित्यादयो यावदध्यायसमाप्ति चत्वारः श्लोकमन्त्राः।) **मूलम्** । श्लोकाश्चतुर्थेऽध्याये तु षट्त्रिंशत् परमेश्वरि ॥ अर्धमन्त्रद्वयं सर्वे चत्वारिंशद्द्वियुक्पुनः ॥ इति ॥ (अत्राध्याये षट्त्रिंशत् श्लोकाः । पञ्चत्रिंशत् श्लोकमन्त्रा। द्वावर्धमन्त्रौ । पञ्चोवाचमन्त्राः। सर्वे द्वियुक्चत्वारिंशत् द्विचत्वारिंशन्मन्त्रा इत्यर्थः ।) **मूलम्** । एवं मध्यचरित्रस्य पञ्चपञ्चाशदुत्तरम् ॥ शतं स्युः सकला मन्त्रा अध्यायत्रितयात्मनः ॥ इतिः ॥ (सर्वस्मिन् मध्यमचरित्रे श्लोकाः पञ्चचत्वारिंशदधिकं शतम् ॥ श्लोकमन्त्राश्चतुश्चत्वारिंशदधिकं शतम् ॥ श्लोकमन्त्राश्चतुश्चत्वारिंशदधिकं शतम् ॥ अर्धमन्त्रौ द्वौ ॥ उवाचमन्त्रा नव) ॥ **इतिकात्यायनीतन्त्रमन्त्रविभागे मध्यमचरित्रमन्त्रविभागो नाम एकविंशः पटलः ।**

मूलम् ईश्वर उवाच ॥ ऋषिवाक्यं पुरेत्याद्याः विष्णुमायां प्रतुष्टुवुः इत्यन्ताः श्लोकमन्त्राः षट् ॥ इति ॥ (ऋषिवाक्यं ऋषिरुवाचेति गद्यमन्त्रः ॥) पुरेत्याद्याः पुरा शुम्भनिशुम्भाभ्यामित्याद्याः षट् श्लोकमन्त्राः ॥

मूलम् । देवा ऊचुस्ततः परम् ॥ नमो देव्या इति त्रिंशत्श्लोक्यन्ते नम्रमूर्तिभिः ॥ विष्णुमायादिकास्तेषु भ्रान्त्यन्ता एकविंशतिः ॥ अवतारैः पृथङ्मन्त्रास्त्रिषष्ट्याहुतयस्तु ताः ॥ इति ॥ (देवा ऊचुरित्येको मन्त्रः ॥ ततो नमो देव्यै महादेव्यै इत्यारभ्य विनम्रमूर्तिभिरित्यन्तं त्रिंशत्श्लोका वर्तन्ते ॥ तेषु विष्णुमायादिभ्रान्त्यन्तपदगर्भाणामेकविंशतिश्लोकानां महाकाली-महालक्ष्मीमहासरस्वतीरूपावतारभेदेन प्रतिश्लोकं त्रयस्त्रय इति त्रिषष्टिर्मन्त्रा भवन्ति ॥ तत्र प्राचीनमते प्रथमो या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै इति विंशत्यक्षरः ॥ द्वितीयो नमस्तस्यै इति चतुरक्षरः ॥ तृतीयो नमस्तस्यै नमो नम इत्यष्टाक्षरः । एवं प्रतिश्लोकं त्रयस्त्रय इति त्रिषष्टिः ॥ भास्कररायप्रभृतिनव्यमते तु एतेषु श्लोकेषु नमस्तस्यै इति त्रीणि वाक्यानि त्रयो मन्त्राः ॥ तेषां प्रत्येकं पूर्वभागे या देवीत्यर्धस्य, अन्ते च नमो नम इति चतुरक्षर्यायोजनेन प्रतिश्लोकं चतुर्विंशत्यक्षरा गायत्रीच्छन्दकास्त्रयस्त्रय इति त्रिषष्टिः ॥ तत्प्रयोगो यथा । या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै नमो नमः ॥ पुनरेवं द्विः ॥ एवमन्यश्लोकेष्वपि ज्ञेयम् ॥ एतद्विषये विचारविस्तरो गुप्तवत्यां द्रष्टव्यः ॥ मूलम् । चितिरूपेणापि देयमाहुतीनां त्रयं प्रिये ॥ एवं मन्त्रा द्व्यशीतिस्ते ॥ इति ॥ (चितिरूपेण या कृत्स्नमिति श्लोकस्यापि प्राग्वत् त्रयो मन्त्रा इत्यर्थः ॥ विष्णुमायाद्येकविंशतिश्लोकानां चितिरूपेणेत्येकस्य च विशेषतस्त्रित्रिमन्त्राश्रयत्वोक्तेरिन्द्रियाणामधिष्ठात्रीति श्लोक एकमन्त्रात्मक एव न मन्त्रत्रयात्मक इति ज्ञेयम् ॥ अत्र श्लोकसङ्ख्यामन्त्रसङ्ख्ययोरत्यन्तवैसादृश्यान्मन्त्रसङ्ख्याभ्रमनिरासार्थं मध्येपि मन्त्राणां समुदितसङ्ख्यामाह एवं मन्त्रा द्व्यशीतिस्ते इति ॥ ते द्व्यशीतिर्यथा ॥ अध्यायारम्भे ऋषिरुवाचेत्येको मन्त्रः । ततः पुरा शुम्भेत्यादयः षट् श्लोकमन्त्राः । ततो देवा ऊचुरित्येको गद्यमन्त्रः । नमो देव्यै इति पञ्च श्लोकमन्त्राः ॥ ततो विष्णुमायादिभ्रान्त्यन्तपदगर्भाणामेकविंशति-

श्लोकानां प्रतिश्लोकं त्रयस्त्रय इति त्रिषष्टिर्मन्त्राः । अनन्तरामिन्द्रियाणामधिष्ठात्रीति श्लोकमन्त्रः । ततश्चितिरूपेणेति श्लोकस्य मन्त्रत्रयम् । पश्चात् स्तुता सुरैरिति, या साम्प्रतमिति च द्वौ श्लोकमन्त्रौ ॥ एवं द्व्यशीतिर्मन्त्राः।) मूलम् । अथोऋषिरुवाच ह ॥ आदावेवं स्तवादि स्यादन्ते कस्मान्न गृह्यते ॥ इति सप्तदशश्लोकमन्त्राः ॥ इति ॥ (ऋषिरुवाचेत्येको गद्यमन्त्रः प्रथमः। तत एवं स्तवादियुक्तानामित्यारभ्य त्वयाकस्मान्न गृह्यते इत्यन्तं सप्तदशश्लोकमन्त्राः ॥ अत्र एवं स्तवादियुक्तानामित्युक्तेः कचित्सप्तशतीपुस्तकेषु दृश्यमानः एवं स्तवाभियुक्तानामिति पाठोऽनार्ष इति ज्ञेयम् । , मूलम् । अथ ऋषेर्वचः ॥ निशम्येत्यादयः श्लोका गिरेत्यन्तास्ततस्त्रयः ॥ इति ॥ (ऋषेर्वचः ऋषिरुवाचेति मन्त्रः ॥ ततः निशम्येति वचः शुम्भ इत्यारभ्य श्लक्ष्णं मधुरया गिरेत्यन्तं त्रयः श्लोकमन्त्राः ।) मूलम् । अथ दूत उवाचेति देवि दैत्येश्वरादयः ॥ व्रजान्ता नव मन्त्राः स्युः ॥ इति ॥ (दूत उवाचेत्येको गद्यमन्त्रः । ततो देवि दैत्येश्वरः शुम्भ इत्यारभ्य मत्परिग्रहतां व्रजेत्यन्ता नव श्लोकमन्त्राः) मूलम् । अथोऋषिरुवाच ह ॥ इत्युक्ता सा तदेत्येकः श्लोकमन्त्रः सरस्वति ॥ इति ॥ (आदौ ऋषिरुवाचेति मन्त्रः । ततः इत्युक्ता सेत्येकश्लोकमन्त्रः । सरस्वतीति पार्वत्याः सम्बोधनं पार्वतीतृतीयचरितदेवतयोरभेदसूचनार्थम् । मूलम् । देव्युवाचाथ चत्वारः श्लोकाः सत्यादयो लघु ॥ इति ॥ (देव्युवाचेत्येको मन्त्रः । ततः सत्यमुक्तं त्वयेत्यारभ्य पाणिं गृह्णातु मे लघु इत्यन्ताश्चत्वारः श्लोकमन्त्राः ।) मूलम् । दूतोक्तिरवलिप्तासि मैवमित्यादयस्ततः ॥ श्लोका गमिष्यसीत्यन्ताश्चत्वारो मनवस्तु ते ॥ इति ॥ (दूतोक्तिर्दूत उवाचेति मन्त्रः । अवलिप्तासि मैवं त्वमित्यादयो गमिष्यसीत्यन्ताश्चत्वारः श्लोकमन्त्राः ।) मूलम् । देव्येवमेतदादौ स्यादन्ते युक्तं करोतु तत् ॥ इत्यन्तौ द्वौ मनू श्लोकौ ॥ इति ॥ (देवी देव्युवाचेति मन्त्रः । ततः एवमेतद्बलीत्यादि स च युक्तं करोतु

तदित्यन्तं द्वौ श्लोकमन्त्रौ) मूलम् । अङ्गमन्त्रास्तु ते नव ॥ इत्यूनत्रिंशदधिकं शतं मन्त्रास्तु पञ्चमे ॥ इति ॥ (अत्र श्लोकाः षट्सप्ततिः । श्लोकमन्त्राश्चतुःपञ्चाशत् ॥ नमस्तस्यै मन्त्राः षट्षष्टिः । अङ्गमन्त्रा उवाच मन्त्रा नव सन्ति ॥ सर्वे मन्त्रा एकोनत्रिंशदधिकं शतं स्युः ।) मूलम् । षष्ठे ऋष्युक्तिरित्याकर्ण्येति श्लोकचतुष्टयम् ॥ इति ॥ (ऋषिरुवाचेत्येको मन्त्रः । इत्याकर्ण्येति चत्वारः श्लोकमन्त्राः ।) मूलम् । पुनर्ऋषिरुवाचेति तेनाज्ञप्तादयस्त्रयः ॥ श्लोकात्मका मता मन्त्राः ॥ इति ॥ (सुगमम् ।) मूलम् । देव्युवाच ततः परम् ॥ दैत्येश्वरेण प्रहित इत्येकः श्लोकमन्त्रकः ॥ (सुगमम्) मूलम् । अथर्षिवाक्यमित्युक्तः सोऽभ्यधावदिति ह्यमी ॥ श्लोका द्वादश मन्त्राः स्युः ॥ इति ॥ (ऋषिवाक्यं ऋषिरुवाचेति मन्त्रः । तत इत्युक्तः सोऽभ्यधावत्तामित्यादयो द्वादश श्लोकमन्त्राः ।) मूलम् । षष्ठेऽध्याये तु संहताः ॥ चतुर्विंशतिसङ्ख्याका भवन्त्याहुतयः प्रिये ॥ इति ॥ (अत्राध्याये श्लोकाः श्लोकमन्त्राश्च विंशतिः ॥ उवाच मन्त्राश्चत्वारः ॥ सर्वे मन्त्राश्चतुर्विंशतिः ।) मूलम् । सप्तमे ऋषिराज्ञप्तास्त्रयोविंशतिमातरः ॥ इति ॥ (ऋषिः ऋषिरुवाचेतिमन्त्रः । आज्ञप्ताः आज्ञप्ता इत्यादयस्त्रयोविंशतिश्लोकमन्त्राः । मातृशब्दो मन्त्रवाचकः । स च पुंसि । अग्रे द्वौ मातराविति प्रयोगात् ।) मूलम् । ऋषिवाक्यं ततस्तावानीतौ द्वावपि मातरौ ॥ इति ॥ (ऋषिवाक्यं ऋषिरुवाचेतिमन्त्रः । तावानीताविति द्वौ श्लोकमन्त्रौ ।) मूलम् । सप्तविंशतिसङ्ख्याका भवन्त्याहुतयः क्रमात् ॥ अत्राध्यायद्वये देवी धूम्राक्षीति प्रकीर्तिता ॥ इति ॥ (अत्र श्लोकमन्त्राः पञ्चविंशतिः उवाचमन्त्रौ द्वौ ॥ एवं सप्तविंशतिः ॥ अध्यायद्वये षष्ठसप्तमाध्याययोः ॥ धूम्राक्षी विशेषदेवता ॥ उत्तमचरितसामान्येन महासरस्वती ॥ चण्डीस्तवविशेषेण चण्डिका चेति ज्ञेयम् ।) मूलम् ॥ अष्टमे ऋषिवाक् चण्डे चेत्यध्यायावसानिकाः ॥ त्रिषष्ट्याहुतयः प्रोक्ता एकान्ना-

र्धाहुतिर्मता ॥ रक्ताक्षी देवता चाष्टौ महाशक्त्यः प्रकीर्तिताः ॥ इति ॥ (ऋषिवाक् ऋषिरुवाचेत्येको गद्यमन्त्रः । ततः चण्डे च निहते दैत्ये इत्यारभ्य अध्यायावसानपर्यन्तं द्विषष्टिः पद्यमन्त्राः । तन्मध्ये एकोऽर्धमन्त्रः । स च मुखेन काली जगृहे रक्तबीजस्य शोणितमित्येवं रूपः । अन्ये एकषष्टिः श्लोकमन्त्राः ॥ एवं सर्वे त्रिषष्टिर्मन्त्राः । रक्ताक्षी चामुण्डा, तथा अष्टौ महाशक्त्यो ब्राह्मयादयो मातरश्चेति नवदेवताः ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही नारसिंह्यैन्द्रीशिवदूत्योऽष्टशक्तयः ॥ अत्रापि प्राग्वत् अध्यायानुसारेण नवशक्तयो देवताः । चरितानुसारेण महासरस्वती देवता । समस्तचण्डीस्तवानुसारेण चण्डिका च एवमग्रेऽपि ज्ञेयम् ।) मूलम् । राजा विचित्रमित्यादि श्लोकद्वयम् ॥ इति ॥ (नवमाध्याय मन्त्रविभागमाह राजेति । राजा राजोवाचेति मन्त्रः । ततो विचित्रमित्यादि द्वौ श्लोकमन्त्रौ) मूलम् । अथो ऋषिः ॥ चकार कोपमतुलमित्याद्याः श्लोकरूपकाः ॥ सप्तत्रिंशच्च विज्ञेया मन्त्रा वै देवतात्मकाः ॥ इति ॥ (ऋषिः ऋषिरुवाचेतिमन्त्रः । ततः चकार कोपमित्यादयः सप्तत्रिंशत् श्लोकमन्त्राः । देवतात्मका मन्त्रा इति मीमांसकमतेनोक्तम्) मूलम् । इत्येकचत्वारिंशत् स्युर्नवमाध्यायमन्त्रकाः ॥ देवता भैरवी तारा गोप्यमेतद्वरानने ॥ इति ॥ (एवं सर्वे मन्त्रा एकचत्वारिंशत् । भैरवी तारेति देवताद्वयं विशेषरूपम् ।) मूलम् । ऋषिर्निशुम्भं निहतमितिश्लोकावुभौ मनू ॥ इति ॥ (ऋषिर्ऋषिरुवाचेति मन्त्रः । ततो निशुम्भनिहतमितिश्लोकमन्त्रद्वयम् ।) मूलम् । ततो देवीवचः प्रोक्तमेकैवाहमिति द्वयम् । इति ॥ (देव्युवाचेत्येको मन्त्रः । ततः एकैवाहमितिश्लोकमन्त्रद्वयम्) मूलम् । देव्युवाच ततश्चाहं विभूत्येत्येकश्लो मनुः ॥ इति ॥ (देव्युवाचेत्येको गद्यमन्त्रः । ततोऽहं विभूत्येत्येकः श्लोकमन्त्रः ।) मूलम् । ऋषिस्ततः प्रववृते सार्धा द्वाविंशतिर्मता ॥ इति ॥ (ऋषिरुवाचेत्येको गद्यमन्त्रः । अनन्तरं ततः प्रववृते इत्यादयः

सार्धद्वाविंशतिः श्लोकाः ॥ तत्र द्वाविंशतिश्लोकमन्त्राः ॥ एकोऽर्धमन्त्रः स च अश्वांश्च पातयामासेति बोध्यः । भास्कररायमते तु तत्रापि सा निराधारेत्यर्धमन्त्रः ॥ तच्चिन्त्यम् । तस्य वाक्यलक्षणसम्पन्नत्वेऽपि तत्पूर्वतृतीयश्लोकस्थहृदयपदस्य तदुत्तरश्लोकस्थेन देव्या इति पदेन सह सम्बधादुभयोरपि श्लोकयोरपूर्णवाक्यत्वेन मन्त्रत्वायोगात् अश्वांश्च पातयामासेत्यस्यार्धमन्त्रत्वे तु पूर्वोक्तपदद्वयस्यैकश्लोकान्तःपातित्वेनोक्तापत्यभावात्तत्पूर्वश्लोकयोश्च सम्यग्वाक्यलक्षणसम्पन्नत्वेन निराबाधमन्त्रत्वयोगात् ॥ अत्राध्याये सार्धाः सप्तविंशतिश्लोकाः ॥ तत्र सप्तविंशतिश्लोकमन्त्राः ॥ एकोऽर्धश्लोमन्त्रः ॥ चत्वार उवाच मन्त्रा ॥ सर्वे मन्त्रा द्वात्रिंशत् ।) मूलम् । दशमे सिंहमारूढा शूलपाशविधारिणी ॥ मुख्या चतुर्भुजा चापबाणहस्तां शुभेक्षणा ॥ इति ॥ (अत्राध्याये मुख्या कौशिकी देवता ।) **इति कात्यायनीतन्त्रे मन्त्रविभागे पञ्चमादिदशमाध्यायान्तविभागो नाम द्वात्रिंशतितमः पटलः ॥**

मूलम् । ईश्वर उवाच ॥ ऋषेः सुमेधसः प्रोक्तं ततो देव्या हतादयः ॥ चतुस्त्रिशन्मिताः श्लोका मन्त्रास्तत्सङ्ख्यकाश्च ते ॥ इति ॥ प्रोक्तं वचः । भावे क्तः । ऋषिरुवाचेत्येको मन्त्र इत्यर्थः । अत्र सुमेधस इत्युक्त्या देवीमाहात्म्यस्य प्रथमाध्याये द्विजवर्यस्य मेधस इत्यत्र द्विजवर्यसुमेधस इत्येव पाठो युक्तः । तत्पक्षे पदद्वयस्य कर्मधारयः । मार्कण्डेयकृतं क्रोष्टुकेः द्विजवर्येति सम्बोधनं वा । ततो देव्याहते तत्रत्यादयश्चतुस्त्रिशत् श्लोकमन्त्राः ।) मूलम् । देव्युवाचेति मन्त्रश्च वरदाहं तथैककः ॥ इति ॥ (देव्युवाचेत्येको मन्त्रः । ततो वरदाहमिति एकः श्लोकमन्त्रः ।) मूलम् । देवा ऊचुस्ततः सर्वबाधाप्रशमनं त्विति ॥ श्लोकमन्त्रश्च देवेशि ॥ इति ॥ (देवा ऊचुरित्येको मन्त्रः । ततः सर्वबाधेत्येकः श्लोकमन्त्रः ।) मूलम् । देव्युवाच ततः परम् ॥ वैवस्वतेऽन्तरे प्राप्ते इति सार्धाश्चतुर्दश ॥ इति ॥ (देव्युवाचेत्येको

मन्त्रः । ततो वैवस्वतेऽन्तरे इत्यादि सार्धचतुर्दशश्लोकेष्वाद्या अष्टौ श्लोकमन्त्राः । ततः शाकम्भरीति विख्यातिमित्यर्धश्लोकमन्त्रः । ततः तत्रैव चेत्यादयः पट् श्लोकमन्त्राः ।) **मूलम्** । एवमाहुतयः सर्वाः पञ्चाशत् पञ्चसंयुताः ॥ वैष्णवी देवता ह्यत्र महागरुडवाहिनी ॥ इति ॥ (एवमेकादशाध्याये पञ्चपञ्चाशन्मन्त्राः ॥ श्लोकाः सार्धाः पञ्चाशत् । तत्र पञ्चाशत् श्लोकमन्त्राः ॥ एकोऽर्धश्लोकमन्त्रः ॥ चत्वार उवाचमन्त्राः ।) **मूलम्** । देव्युवाच ततश्चैव एभिस्तवैश्च मामिति ॥ दूरेत्यर्धेन सहिता अष्टाविंशतिरूपकाः ॥ इति ॥ (द्वादशे देव्युवाचेति प्रथमो मन्त्रः । एभिस्तवैश्च मामित्यारभ्य दूरादेव पलायन्ते स्मरतश्चरितं ममेत्यन्ताः सार्धा अष्टाविंशतिश्लोकाः सन्ति ॥ तत्र श्लोकानां सार्धाष्टाविंशतिसङ्ख्यत्वादष्टाविंशतिः श्लोकमन्त्रा एकोर्धश्लोकमन्त्र इति फलितं ॥ तत्राद्या अष्टादशश्लोकमन्त्राः ॥ सर्वं ममैतन्माहात्म्यमित्यर्धश्लोकमन्त्रः । ततो दश श्लोकमन्त्राः ॥ रूपकशब्दः श्लोकपर्यायः ॥ केचिद्दूरेत्यर्धेन सहिता इति दूरादेवेत्यर्धस्य पृथगुक्तेस्तस्यैवार्धमन्त्रत्वमिच्छन्ति तदयुक्तम् । तस्य तत्पूर्वेषां च बहूनां श्लोकानामपूर्णवाक्यत्वेन मन्त्रत्वायोगात् ॥ वस्तुतः एभिस्तवैश्च मामिति, दूरेत्यर्धेन सहिता इति चैतदुभयं सार्धाष्टाविंशतिश्लोकसमूहस्याद्यन्तावयवबोधकम् ।) **मूलम्** । ततश्चर्षिरुवाचेतीत्युक्त्वा श्लोकादिकैश्च तैः ॥ अर्धयुङ्नवभिः श्लोकैस्तत्सङ्ख्या मनवो मताः ॥ एवं च द्वादशे चैकचत्वारिंशन्मिताहुतिः ॥ इति ॥ (ततश्च ऋषिरुवाचेत्येको मन्त्रः । अनन्तरं इत्युक्त्वा सा भगवतीति श्लोक आदिर्येषां तैरित्युक्त्वा श्लोकादिकैः अर्धयुङ्नवभिः सार्धैर्नवभिः श्लोकैस्तत्सङ्ख्याः एकोऽर्धश्लोकमन्त्रः नवश्लोकमन्त्रा इत्यर्थाः मताः सन्ति ॥ तत्र आद्यास्त्रयः श्लोकमन्त्राः ॥ निशुम्भे च महावीर्ये इत्यर्धमन्त्रः ॥ ततः षट्श्लोकमन्त्राः ॥ एवमेकचत्वारिंशत्सर्वे मन्त्राः ॥ तत्र श्लोकमन्त्राः सप्तत्रिंशत् ॥ अर्धश्लोकात्मकौ द्वौ ॥ श्लोका

अष्टत्रिंशत् ॥) मूलम् । ततस्त्रयोदशेऽध्याये ऋषिरुवाच वाक्यतः ॥ एतत्ते कथितं भूपेत्यादि सार्धत्रयं मनुः । इति ॥ (त्रयोदशे ऋषिरुवाचेति प्रथमो गद्यमन्त्रः । ततः सार्धत्रयं मनुः सार्धास्त्रयः श्लोकाश्चत्वारो मन्त्राइत्यर्थः ॥ तत्र प्रथमोऽर्धश्लोकात्मकः उत्तरे त्रयः श्लोकमन्त्राः ।) मूलम् । मार्कण्डेय उवाचेति इति तस्य वचोमुखम् ॥ श्लोकषट्कम् ॥ इति ॥ (ततो मार्कण्डेय उवाचेत्येको मन्त्रः । इति तस्य वच इति श्लोकः मुखमारम्भो यस्य तच्छ्लोकषट्कं षट्श्लोकमन्त्राः) ॥ मूलम् । ततो देवी उवाच परमेश्वरि ॥ यत् प्रार्थ्यते त्वया भूप त्वयेति श्लोक एककः ॥ इति ॥ (ततो देव्युवाचेति मन्त्रः । परमेश्वरीति पार्वत्याः सम्बोधनम् । यत् प्रार्थ्यते इत्येकश्लोकमन्त्रः ।) मूलम् । मार्कण्डेय उवाचेति ततो वव्रे मनुद्वयम् ॥ इति ॥ (ततो मार्कण्डेय उवाचेति मन्त्रः । ततो वव्रे नृपो राज्यं, सोऽपि वैश्यस्ततो ज्ञानमिति द्वौ श्लोकमन्त्रावित्यर्थः ।) मूलम् । देव्युवाच ततःस्वल्पैरितिश्लोकत्रयेण वै ॥ अर्धानामेव मन्त्रत्वात् भवन्त्याहुतयोऽत्र षट् ॥ इति ॥ (ततो देव्युवाचेतिमन्त्रः । स्वल्पैरहोभिरिति श्लोकस्य षडर्धानि षडर्धमन्त्राः ॥ एतेन मध्ये उवाच मन्त्राभावेपि एकत्र षडर्धश्लोकमन्त्राणामविच्छेदतः कथनेन एकश्लोकस्यार्धद्वयमध्ये उवाच मन्त्रे पतिते पूर्वोत्तरार्धयोरर्धमन्त्रत्वमिति केषाञ्चिन्मतं निरस्तम् । मूलम् । ततो मार्कण्डेयवच्च इति दत्त्वा तयोरिति द्वौ श्लोकौ पुनरुच्चार्य सावर्णिर्भविता मनुः ॥ एवं त्रयोदशेऽध्याये चोनत्रिंशन्मिताहुतिः ॥ इति (मार्कण्डेयवचः मार्कण्डेय उवाचेति मन्त्रः ततः, इति दत्त्वेति, एवं देव्यावरमिति, च श्लोकद्वयं पुनरुच्चार्य द्व्यूनसप्तशतीमन्त्रसङ्ख्यापूर्तिः कार्येति शेषः सावर्णिर्भविता मनुरिति वचनं ग्रन्थसमाप्तिद्योतकं यथा विष्णुसहस्रनामसु ग्रन्थसमाप्तौ रथाङ्गपाणिरक्षोभ्यः, सर्वप्रहरणायुधः ॥ इत्यस्यानन्तरं सर्वप्रहरणायुधोंनम इति चरमचरणः पुनः पठ्यते तद्वन्नास्य वाक्यार्थेऽन्वयः ॥ तत्र यथाप्राप्तक्रमेणादौ श्लोकद्वयं पठित्वा तेनैव क्रमेण

पुनरुभयं पठेत् ॥ नत्वेकं द्विः पठित्वा पुनरन्यं द्विः पठेत् ॥ समग्रहोमानन्तरं सप्तशताहुतिसङ्ख्याया न्यूनत्वे एव पुनरावृत्तेः प्राप्तत्वात् इयमावृत्तिश्च प्रत्यक्षहोमतर्पणमार्जनेषु सपल्लवपाठादिषु चावश्यकसप्तशतमन्त्रविभागात्मककर्मस्वेव कार्या नत्वेकमालामन्त्रात्मकत्वेन पाठरूपेषु ॥ एवं पञ्चमाध्याये विष्णुमायादिपदाङ्कितश्लोकानां त्रेधा विभागविषयेऽपि ज्ञेयम् ॥ एवं चैतदध्याये सार्धसप्तदशश्लोकात्मके सकृदुक्तश्लोकमन्त्रा द्वादश ॥ पुनरुक्तश्लोकमन्त्रौ द्वौ ॥ अर्धश्लोकात्मकाः सप्त ॥ उवाचमन्त्राः षट् ॥ इत्येकोनत्रिंशन्मन्त्राः ॥ एकश्लोकार्धद्वयमध्ये उवाचमन्त्रपाते पूर्वोत्तरार्धयोरर्धमन्त्रत्वमिति मतेऽत्राध्याये एकादशार्धमन्त्रा भवन्ति ॥ तथा चैकादशार्धमन्त्राः । द्वादशश्लोकमन्त्राः । षडुवाचमन्त्राः । एवमेकोनत्रिंशत् ॥ एतन्मते सकृदुक्तमन्त्रैरेव सप्तशतीसङ्ख्यापूरणान्नान्त्यश्लोकयोः पुनरुच्चारप्रसङ्गः ॥ तथा च तत्कृता त्रयोदशाध्यायमन्त्रपरिगणनकारिका यथा । एकादशार्धाहुतयो द्वादशश्लोकमन्त्रकाः ॥ उवाचवचनैः षड्भिर्मन्त्रास्ते चोक्तसङ्ख्यकाः ॥ इति ॥ तथा वैय्याकरणप्रवैर्नागेशभट्टैः स्वकृते चण्डीस्तोत्रव्याख्याने त्रयोदशाध्याये आराधिता सैव नृणामिति, इति तस्य वचः श्रुत्वेति, परितुष्टा जगद्धात्रीति, त्रीन् पूर्वोक्तमतानुसारेण, स्वल्पैरहोभिर्नृपते इत्यादीन् षट् कात्यायनीतन्त्रानुसारेणेत्यर्धजरतीयन्यायेन नवार्धमन्त्रान् स्वीकृत्यानन्तरं, ततो मार्कण्डेयवच इति दत्त्वा तयोरिति ॥ द्वौ श्लोकौ पुनरुच्चार्य सावर्णिर्भविता मनुः ॥ इति कात्यायनीतन्त्रोक्तश्लोके पुनरुच्चार्येतित्यन्तं सविसर्गपाठपूर्वकं प्रथमान्तत्वेन गृहीत्वा द्वौ श्लोकाविति पदद्वयं च वस्तुतः पुनरुच्चार्येत्यस्य कर्मभूतं द्वितीयान्तं सत् तदपि प्रथमान्तत्वेन स्वीकृत्य ततः इति दत्त्वा तयोर्देवीति, एवं देव्या वरंलब्ध्वेति च द्वौ श्लोकमन्त्रौ । सावर्णिर्भविता मनुरिति चरमचरणश्च एकन्यूनसप्तशतीसङ्ख्यापूरणार्थं पुनरुच्चार्यः । इति योजनां मनसि निधाय तदर्थसूचिका

कारिका निबद्धा सा यथा । मार्कण्डेयस्ततः पद्यद्वयं मन्त्रत्रयं स्मृतम् ॥ आवृत्त्या त्वधिको मन्त्रः सावर्णिर्भविता मनुः ॥ इति ॥ एतदर्थो यथा मार्कण्डेय उवाचेत्येक उवाच मन्त्रः । इति दत्त्वा तयोरिति, एवं देव्या वरमिति च द्वौ श्लोकमन्त्रौ । एवं मन्त्रत्रयं । सङ्ख्यापूरणार्थं सावर्णिर्भविता मनुरिति चरमपादो मन्त्रत्वेन पुनरावर्तनीयः इति ॥ एतन्मतद्वयविषये " अत्रापरे नवार्धानि केचिदेकादशाभ्यधुः ॥ न तत् कात्यायनीतन्त्रकल्पितं किन्तु जल्पितम् ॥ इति गुप्तवत्यां भास्करराया आहुः ॥ इति त्रयोदशाध्यायमन्त्रविभागः **मूलम्** ॥ एवमन्त्यचरित्रस्य अध्यायनवकात्मनः मन्त्राणां च चतुःशत्येकचत्वारिंशताऽधिका ॥ इति (उत्तमचरित्रे सर्वे मन्त्रा एकचत्वारिंशदधिकचतुःशतानि ॥ तत्र सकृदुक्तश्लोकमन्त्राः सप्तत्रिंशदधिकत्रिशतम् ॥ पुनरुक्तश्लोकमन्त्रौ द्वौ ॥ अर्धमन्त्रा द्वादश ॥ नमस्तस्यै मन्त्राः षट्षष्टिः ॥ उवाचमन्त्राश्चतुस्त्रिंशत् ॥ श्लोकाः पञ्चपञ्चाशदधिकशतत्रयम् ॥) **मूलम्** ॥ एवं त्रयोदशाध्यायैर्होमपूजनतृप्तिषु ॥ शतानि सप्तसङ्ख्यानि तत्र प्रोक्तानि शैलजे ॥ इति ॥ (होमः प्रसिद्धः ॥ पूजनमेकैकमन्त्रेण पुष्पतुलसीबिल्वपत्रप्रदक्षिणनमस्काराद्युपचारार्पणम् ॥ तृप्तिस्तर्पणं तदुपलक्षितं मार्जनं च ॥ इत्यादिषु सप्तशतधा विभागस्तत्रोक्तः ॥ एवं च सम्पूर्णसप्तशतीस्तवे श्लोका अष्टसप्तत्यधिकशतपञ्चकम् ॥ तत्र सकृदुक्तश्लोकमन्त्राः सप्तत्रिंशदधिकपञ्चशतानि ॥ पुनरुक्तश्लोकमन्त्रौ द्वौ ॥ अर्धश्लोकमन्त्रा अष्टत्रिंशत् ॥ नमस्तस्यै मन्त्राः षट्षष्टिः ॥ उवाचमन्त्राः सप्तपञ्चाशत् ॥ सर्वे मन्त्राः सप्तशतानि ॥ **इति कात्यायनीतन्त्रे मन्त्रविभागे त्रयोविंशतितमः पटलः ॥**

अयमेव मन्त्रविभागो **डामरतन्त्रे** सङ्क्षिप्योक्तः स यथा ॥ एको भगवता श्लोक एकधा गादितः प्रिये ॥ समाधिनाम्ना गादिताः श्लोका अष्टौ द्विवारतः ॥ राज्ञा प्रोक्तं चतुर्वारं श्लोकानां दशकं तथा ॥ वारद्वयं तु

दूतेन श्लोकाः प्रोक्तास्त्रयोदश ॥ ब्रह्मणा त्वेकवारेण श्लोका उक्ताश्चतुर्दश ॥ सार्धैकत्रिंशदुदिता मार्कण्डेयेन पञ्चधा ॥ देवैः सार्धाश्चतुस्त्रिंशात्त्रिवारमुदिताः शिवे ॥ देव्या द्वादशधा सार्धैकोनषष्टिः प्रकीर्तिताः ॥ ऋषिणा सप्तविंशत्या सार्धाष्टाढ्या चतुःशती ॥ एवं पञ्चशतानि स्युः श्लोका अष्टौ च सप्ततिः ॥ तैरेवाहुतयः सप्तशतानि स्युर्महेश्वरि ॥ इति ॥ नन्वत्र सर्वश्लोकानां सम्भूयाष्टसप्तत्युत्तरशतपञ्चकसङ्ख्योक्ता । तदनुसारेण तदन्तर्गतभगवदाद्युक्तश्लोकसङ्ख्यायाः सम्भूय गणनायां तु अशीत्यधिकपञ्चशतानि सम्पद्यन्ते इति श्लोकद्वयमधिकं भवतीति विरोध इति चेन्न । तन्त्रे सम्भूयोक्ता अष्टसप्तत्युत्तरशतपञ्चकश्लोकसङ्ख्यैव कात्यायनीतन्त्रोक्तश्लोकसंवादान्मुख्या । अन्तस्थभगवदाद्युक्तश्लोकानां सम्भूय सङ्ख्यायां तु वस्तुतो मार्कण्डेयोक्तश्लोकानां सार्धैकोनत्रिंशत्सङ्ख्याकत्वेऽपि तेषु पुनरुक्तश्लोकद्वयसङ्ख्याया मेलनेन श्लोकद्वयमधिकमुक्तमिति न विरोधः । एवं तन्त्रद्वयेऽपि सप्तशतमन्त्रसङ्ख्यापूर्त्यर्थं त्रयोदशाध्यायान्त्यश्लोकद्वयस्य पुनरुक्तिकथनेऽपि तदनादृत्य नवार्धमन्त्रकल्पनमेकादशार्धकल्पनं च शास्त्रविरुद्धमित्यनादेयम् । **इति तन्त्रोक्तः सप्तशतीमन्त्रविभागः ॥** अयं विभागोऽग्रे चण्डीस्तवार्थप्रकाशे स्पष्टबोधार्थं तत्तदध्यायव्याख्यारम्भे स्वकृतसुगमकारिकाभिः प्रदर्शयिष्यते ॥ **इति चण्डिकोपास्तिदीपिकायां मन्त्रविभागप्रकाशः समाप्तः ॥**

॥ इति चण्डिकोपास्तिदीपिकायां मन्त्रविभागप्रकाशः ॥

॥ श्री ॥

अथ चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशः ।

श्री

॥ चण्डीस्तवार्थप्रकाशः ॥

अथ चण्डीस्तवार्थप्रकाशः प्रारभ्यते ॥ आदौ प्रत्यक्षहोमसहितविस्तृतचण्डीस्तवजपप्रयोगाशक्तानां साधकानां हिताय सङ्क्षेपतो द्विगुणजपप्रत्याम्नायसम्पाद्यहोमोऽखिलचण्डीस्तवकर्मसाधारणो जपप्रयोगो लिख्यते ॥ तत्रादौ स्मृत्युपस्थित्यर्थं जपप्रकाशे कामविशेषेणोक्ताश्चण्डीस्तवावृत्तिसङ्ख्याविशेषाः केचित्पल्लवाश्च प्रदर्श्यन्ते सर्वकार्यसिद्ध्यर्थं चण्डीस्तवस्यैकावृत्तिः ॥ ग्रहदोषनिवारणायावृत्तित्रयं ॥ उपसर्गोपशान्त्यर्थं पञ्चावृत्तयः ॥ महाभयनिवृत्त्यर्थं सप्त ॥ सर्वशान्त्यर्थं नव ॥ राजवश्यार्थमेकादश ॥ वैरिनाशार्थं द्वादश ॥ स्त्रीवश्यार्थं चतुर्दश ॥ सम्पत्प्राप्त्यर्थं पञ्चदश ॥ पुत्रपौत्रादिप्राप्तये षोडश ॥ राजभयविनाशाय सप्तदश ॥ शत्रूच्चाटनायाष्टादश ॥ महाव्रणपरिहाराय विंशतिः ॥ बन्धमुक्तये पञ्चविंशतिः ॥ सर्वकार्यसिद्ध्यर्थं शतं ॥ मनश्चिन्तितकार्यसिद्ध्यर्थमष्टोत्तरशतं ॥ स्थिरलक्ष्मीप्राप्त्यर्थं सहस्रं ॥ इत्यादि ॥ स्वस्वावृत्तिसङ्ख्यावाचकपूर्वपदश्चण्डीशब्द एतेषामावृत्तिसङ्ख्याविशेषात्मककर्मणां संज्ञा यथा, एकचण्डी, नवचण्डी, विंशतिचण्डी, सहस्रचण्डीत्यादिः ॥ अथ कामविशेषेण केचित्पल्लवाः ॥ सर्वापन्निवृत्तये दुर्गे स्मृतेति श्लोको देवि प्रपन्नार्तिहरे इति श्लोको शरणागतदीनार्तेति श्लोको वा ॥ सर्वकार्यसिद्ध्यर्थं करोतु सा नः शुभहेतुरीश्वरीत्यर्धं ॥ मोहनार्थे ज्ञानिनामपीति श्लोकः ॥ मारणार्थे एवमुक्त्वेति श्लोकः ॥ विद्याप्राप्त्यर्थं इत्युक्ता सा तदेतिश्लोकः ॥ बालग्रहशान्त्यर्थं हिनस्ति दैत्यतेजांसीतिश्लोकः ॥ रोगनाशार्थे रोगानशेषानिति श्लोकः ॥ सर्वपीडापरिहारार्थे सर्वाबाधाप्रशमनमिति श्लोकः ॥ महामारीशान्त्यर्थं इत्थं यदा यदा बाधेति श्लोकः ॥ नष्टराज्यस्य पुनः प्रात्यर्थं ततो वव्रे नृपो राज्यमिति श्लोकः ॥ स्वाभीष्टवरप्राप्तये एवं देव्या वरमिति श्लोकः ॥ इति ॥ अथ वैदिका अपि केचित् पल्लवाः ॥ सर्वापन्नि-

वृत्तये यदन्ति यच्च दूरके इति ऋक् ॥ सर्वकामावाप्तये जातवेदसे इति ऋक् ॥ लक्ष्मीप्राप्तये कांसोस्मीति ऋक् ॥ अपमृत्युपरिहाराय त्र्यम्बकं यजामहे इति ऋक् ॥ ऋणपरिहाराय अनृणा अस्मिन्निति ऋक् ॥ एते तत्तत्कार्येषु चण्डीस्तवान्तर्गतसप्तशतमन्त्रेषु प्रतिमन्त्रमन्ते योज्याः॥ प्रतिमन्त्रमेभिः सम्पुटीकारे तु शीघ्रं फलम् ॥ इति ॥ **अथ द्विगुणजपप्रत्याम्नायसम्पाद्यहोमः सकलचण्डीस्तवकर्मसाधारणो जपप्रयोगः** ॥ साधको दुर्योगरहिताष्टमीनवमीचतुर्दश्यन्यतमातिथौ भौमशुक्रान्यतरवासरे वा तदसम्भवे ज्योतिःशास्त्रोक्तशुभदिने स्नातः कृतनित्यक्रियः पवित्रपाणिराचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य सकुटुम्बस्य सपरिवारस्य मम महालक्ष्मीप्रसादेन आयुरारोग्यैश्वर्याद्यभिवृद्ध्यर्थं (कामविशेषे तमप्युक्त्वा) अद्यारभ्य अमुकदिनैः सम्भूय साङ्गचण्डीस्तवस्यामुकपाठात्मिकां (प्रतिमन्त्रपल्लवसम्पुटान्यतरपक्षे अन्तर्गतमन्त्रसप्तशत्यां प्रतिमन्त्रं अमुकमन्त्रेण पल्लवितां सम्पुटितामिति वा यथोद्देशमुक्त्वा) । द्विगुणजपप्रत्याम्नायसम्पाद्यदशांशहोमां अमुकचण्डीं करिष्ये ॥ (स्वस्याशक्तौ तत्सम्पादनार्थमाचार्यवरणं करिष्ये) इति सङ्कल्प्य । (आचार्यचरणपक्षे) आचार्यत्वेन वरणीयं ब्राह्मणं सम्पूज्य । अमुकवेदस्यामुकसूत्रशाखाध्यायी अमुकप्रवरान्वितामुकगोत्रोऽमुकशर्मा यजमानोऽहं अमुकवेदस्यामुकसूत्रशाखाध्यायिनमुकप्रवरान्वितममुकगोत्रममुकशर्माणं ब्राह्मणं त्वां आस्मिन् अद्यारभ्यामुकदिनैः सम्भूयकरणीये साङ्गचण्डीस्तवस्यामुकपाठात्मके (प्रतिमन्त्रपल्लवसम्पुटान्यतरपक्षे अन्तर्गतमन्त्रसप्तशत्यां प्रतिमन्त्रं अमुकमन्त्रेण पल्लविते सम्पुटिते इति वा यथोद्देशमुच्चार्य) द्विगुणजपप्रत्याम्नायसम्पाद्यहोमे अमुकचण्ड्याख्ये कर्मण्याचार्यं वृणे इति पूगफलं दत्त्वा आचार्यस्तु यथास्वर्गे० इति प्रार्थयेत् ॥ ततः आचार्यः कर्मकर्ता चेत्स आचमनादि कृत्वा यजमानेन वृतोऽहं तस्य सकुटुम्बस्येत्यादि अमुकचण्डीं करिष्ये इति यजमानवत्सङ्कल्पं कुर्यात् ॥ ततो जपकर्ता यजमान आचार्यो वा वक्ष्यमाण नित्यजपारम्भकृत्याचरणपूर्वकं प्रतिदिनं आरब्धकर्मसमाप्तिपर्यन्तं सङ्कल्पानुसारेण चण्डीस्तवजपं

कृत्वा सम्पूर्णजपकर्मसमाप्तौ तद्दिनेऽन्यदिने वा आचमनादि कृत्वा मया कृतस्यामुकचण्डीजपस्य साङ्गतार्थं दशांशहोमप्रतिनिधिभूतं जपाङ्गीकृतधर्मयुतं साङ्गचण्डीस्तवस्यामुकपाठरूपं कर्म करिष्ये इति सङ्कल्प्य सङ्कल्पानुसारेण कुर्यात् ॥ ततः कर्मकर्ता आचार्यश्चेत्स आचमनादि कृत्वा मया यजमानाज्ञया कृतस्य अमुककर्मणः यजमानाय श्रेयोदानं करिष्ये इति सङ्कल्प्य यजमानं सम्पूज्य मया भवन्नियोगेन यत्कृतममुककर्म तदुत्पन्नं यच्छ्रेयस्तत्तुभ्यमहं सम्प्रददे ॥ न ममेति पूर्वगृहीतं पूगफलं प्रतिदद्यात् ॥ ततो यजमान आचमनादि विधाय आचार्यं सम्पूज्य । भवता मन्नियोगेन यत्कृतममुककर्म तत्साङ्गतार्थमिमां दक्षिणां तुभ्यमहं प्रतिपादयामीति कर्मानुसारेणाचार्याय दक्षिणां दद्यात् ॥ ततो यजमानः कर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति कुमारीः सम्पूज्य भोजयेत् तद्यथा । पूर्वदिने कुमारीं निमन्त्र्य द्वितीयदिने गृहमानीय आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मया कृतस्यामुककर्मणो यथोक्तफलावाप्तये कुमारीपूजनं करिष्ये इति सङ्कल्प्य । मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं ॥ नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहं ॥ इत्यावाह्य । ध्यायाम्यहं महालक्ष्मीं कुमारीरूपधारिणीं ॥ मातुलिङ्गं गदां खेटं पात्रं पीयूषपूरितं ॥ दक्षिणाधः क्रमाद्धस्तैर्बिभ्रतीं सर्वमङ्गलाम् ॥ सुतप्तकनकाभासामाद्यामाद्येशपूजितां ॥ इति ध्यात्वा ॥ कुमार्यै नमः इति नाममन्त्रेण पादक्षालनपूर्वकं यथाविभवं नानाविधैरुपचारैः सम्पूज्य । जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोस्तुते ॥ इति प्रार्थयेत् ॥ इति सर्वाः कुमारीः सम्पूज्य ताभिःसह आचार्यं होमदशांशतो ब्राह्मणसुवासिनीश्च भोजयित्वा ताम्बूलदक्षिणादिभिः प्रतोष्य स्वयं भुञ्जीतेति सङ्क्षेपतो जपप्रत्याम्नायसम्पाद्यहोमश्चण्डीस्तवसकलकर्मसाधारणो जपप्रयोगः ॥

अथ जपारम्भकृत्यम् ॥ साधकः कृतनित्यक्रियो जपस्थानोपकण्ठे पूर्वोत्तरान्यतरदिङ्मुख उपविष्टः स्मृत्युक्तविधिना आचम्य प्राणानायम्य देवीमाहात्म्यजपानुष्ठानाङ्गत्वेनासनविधिं भूतोत्सारणं च करिष्ये इति

सङ्कल्प्य मूलेनासनस्थानं प्रोक्ष्य। आधारशक्तये नमः। कूर्माय नमः। अनन्ताय नमः। पृथिव्यै नमः। इति नमस्कृत्य यथोक्तमासनमास्तीर्य मूलेन प्रोक्ष्य। पृथ्वीतिमन्त्रस्य मेरुपृष्ठमृषिः। कूर्मो देवता। सुतलं छन्दः। (अथवा) ब्रह्मा ऋषिः। पृथ्वी देवता। अनुष्टुप् छन्दः (इत्युक्त्वा) आसनोपवेशने विनियोगः॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवी पवित्रं कुरु चासनम्॥ इति श्लोकमन्त्रेणोपविश्य। अपसर्पन्त्वपक्रामन्त्विति मन्त्रद्वयस्य वामदेव ऋषिः। अनुष्टुप्छन्दः। श्रीसदाशिवो देवता। भूतोत्सारणे विनियोगः॥ ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः॥ ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया॥ ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशः॥ सर्वेषामविरोधेन जपकर्म समारभे॥ इति मन्त्रद्वयं पठन्नात्मानं शङ्करं ध्यात्वा क्रूरदृष्ट्या दिव्यानुपर्युपरि तालत्रयेणान्तरिक्षान् वामपादपार्ष्णिघातेन भौमांश्च भूतानुत्सार्य। ॐ नमः सुदर्शनायास्त्रायफट्। इति सुदर्शनमन्त्रेणात्मनः समन्तात् प्रदक्षिणं तर्जन्यङ्गुष्ठशब्दैर्दिग्बन्धनं कृत्वा। ॐ ऐं आत्मतत्त्वाय नमः॥ ॐ ह्रीं विद्यातत्त्वाय नमः॥ ॐ क्लीं शिवतत्त्वाय नमः॥ इति ब्राह्मतीर्थेन त्रिरपः पीत्वा हस्तं प्रक्षाल्य दक्षिणकर्णं स्पृशेत्॥ इत्येकमाचमनम्॥ एवं द्विराचम्य। चण्डिकानवार्णमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। गायत्र्युष्णिगनुष्टुभश्छन्दांसि। श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः। प्राणायामे विनियोगः॥ इति ऋष्यादि स्मृत्वा। एकवारावृत्तेन मूलेन दक्षिणनासया वायूमापूर्य। चतुरावृत्तेन निरुध्य द्विरावृत्तेन वामनासया वायुं विसृजेत्॥ इत्येकः प्राणायामः॥ उक्तावृत्तिभिरेव वामनासया वायुमापूर्य पूर्ववन्निरुध्य दक्षिणनासया विसृजेदिति द्वितीयः॥ प्रथमवत्तृतीयः॥ इति प्राणायामत्रयं कृत्वा। गणपतये नमः। दुर्गायै नमः। क्षेत्रपालाय नमः। वास्तोष्पतये नमः। गुरुभ्यो नमः। परमगुरुभ्यो नमः। परमेष्ठिगुरुभ्यो

नमः । परात्परगुरुभ्यो नमः । श्रीचण्डिकायै नमः ॥ इति नमस्कृत्य देशकालौ सङ्कीर्त्य । मम श्रीमदादिशक्तिमहालक्ष्मीप्रसादेन सकलापन्निवृत्तिपूर्वकसर्वाभीष्टसिद्ध्यर्थं आदौ पूर्वाङ्गत्वेन कवचार्गलाकीलकानां ततः सम्पुटीकरणपूर्वांशत्वेन रात्रिसूक्तनवार्णयोः अन्ते च सम्पुटीकरणोत्तरांशत्वेन नवार्णदेवीसूक्तयोः तत उत्तराङ्गत्वेन प्राधानिकवैकृतमौर्तरहस्यानां जपेन सहितं (अन्तर्गतसप्तशतमन्त्रेषु प्रतिमन्त्रं मन्त्रान्तरेण पल्लवसम्पुटान्यतरपक्षे, अन्तर्गतमन्त्रसप्तशत्यां प्रतिमन्त्रं अमुकमन्त्रेण पल्लवितं अथवा सम्पुटितमिति यथार्हमुक्त्वा पूर्वसङ्कल्पितकर्मान्तर्गतत्वे अमुककर्मान्तर्गतामित्युक्त्वा) देवीमाहात्म्यस्यैकं पाठं करिष्ये ॥ इति सङ्कल्पयेत् ॥ (अधिकपाठकरणेच्छायां तदनुसारेण पाठद्वयं पाठत्रयमित्यादिर्यथार्हमूहः कर्तव्यः) अथ सति सम्भवे कर्मसाक्षित्वार्थं दीपस्थापनं करिष्ये इति सङ्कल्प्य दीपस्थापनं कुर्यात्तदित्थम् । घृतदीपश्चेद्दक्षिणे तैलदीपश्चेद्वामे भूमौ जलेन त्रिकोणमण्डलं कृत्वा गन्धादिना तत्सम्पूज्य तत्र वर्तिद्वयसहितं सस्नेहमुन्नतं दीपायतनं संस्थाप्य ॐ उद्दीप्यस्व जातवेदोपघ्नन्निर्ऋतिं मम ॥ पशूंश्च मह्यमावह जीवनं च दिशोदश ॥ इतिमन्त्रेण दीपं प्रज्वाल्य । दीपदेवतायै नमः इति गन्धपुष्पादिभिः सम्पूज्य । ॐ भो दीप देवतारूप कर्मसाक्षिन्नविघ्नकृत् ॥ यावत्कर्मानुतिष्ठामि तावत्त्वं सुस्थिरो भव ॥ इति प्रार्थयेत् ॥ अथ चण्डिकापञ्चाक्षरमन्त्रस्य ब्रह्मा ऋषिः । गायत्रीछन्दः । श्रीचण्डिकादेवता । न्यासे विनियोगः ॥ ॐ ह्रीं अङ्गुष्ठाभ्यां नमः । ॐ चं तर्जनीभ्यां नमः । ॐ डिं मध्यमाभ्यां नमः । ॐ कां अनामिकाभ्यां नमः । ॐ यैं कनिष्ठिकाभ्यां नमः । ॐ ह्रीं चण्डिकायै करतलकरपृष्ठाभ्यां नमः ॥ ॐ ह्रीं हृदयाय नमः । ॐ चं शिरसे स्वाहा । ॐ डिं शिखायै वषट् ॐ कां कवचाय हुम् । ॐ यैं नेत्रत्रयाय वौषट् । ॐ ह्रीं चण्डिकायै अस्त्रायफट् । इति न्यासं कृत्वा । ॐ सर्वाद्यामगुणामलक्ष्यवपुषं व्याप्याखिलं संस्थितां लक्ष्यां च

त्रिगुणात्मिकां कनकभां सौवर्णभूषान्विताम् ॥ बीजापूरगदे च खेटकसुरापात्रे करैर्बिभ्रतीं योनिं लिङ्गमहिं च मूर्ध्नि दधतीं चण्डीं भजे चिन्मयीम् ॥ इति ध्यात्वा श्रीमदादिशक्तये महालक्ष्म्यै नमः लं पृथिव्यात्मकान् गन्धान् कल्पयामि ॥ श्रीमदादिशक्तये० हं आकाशात्मकानि पुष्पाणि कल्पयामि । श्रीमदादिशक्तये० यं वाय्वात्मकं धूपं कल्पयामि । श्रीमदादिशक्तये० रं अग्न्यात्मकं दीपं कल्पयामि । श्रीमदादिशक्तये० वं अमृतात्मकं नैवेद्यं कल्पयामि ॥ इति मानसोपचारैः सम्पूज्य ॥ ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः प्रणतास्म ताम् ॥ इति योनिमुद्रया नमस्कुर्यात् ॥ ततः सप्तशत्या मुखतः पाठाभावेन पुस्तकोपरि वाचनप्रसङ्गे पुस्तकपूजनं कुर्यात् । तदित्थम् ॥ स्वभिन्नब्राह्मणलिखितं देवीमाहात्म्यपुस्तकं पीठे संस्थाप्य । पंचाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ॥ अक्षस्रक्पुस्तहस्तामभयवरकरां त्रीक्षणामब्जसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥ इति पुस्तकं सरस्वतीरूपं ध्यात्वा । ॐ ऐं मातृकासरस्वत्यै नमः । इति गन्धेण गन्धहरिद्राकुङ्कुमपुष्पादिभिः पुस्तकं सम्पूज्य । ॐ प्रणोदेवी सरस्वतीवाजेभिर्वाजिनीवती ॥ धीनामवित्र्यवतु ॥ इति मन्त्रेणोपस्थाय । या देवी स्तूयते नित्यं विबुधैर्वेदपारगैः ॥ सा मे वसतु जिह्वाग्रे मातृकाख्या सरस्वती ॥ इति प्रार्थयेत् ॥ ततो नारायणाय नमः ॥ नरोत्तमाय नराय नमः ॥ देव्यै सरस्वत्यै नमः ॥ इति नमस्कृत्य । नात्युच्चैर्नातिनीचैः स्पष्टपदाक्षरं सार्थानुसन्धानं कवचादिमूर्तिरहस्यान्तं साङ्गोपाङ्गं देवीमाहात्म्यं क्रमेण पठेत् ॥ प्रतिस्तोत्रमाद्यन्तयोः प्रणवं जपेत् ॥ अध्यायमध्ये न विरमेद्विरामे तमध्यायमादितः पठेत् ॥ क्षुतनिद्राजृम्भाऽधःपवनादावाचामेत्तदसम्भवे दक्षिणकर्णं स्पृशेत् ॥ मध्ये उत्थाने षडङ्ग कुर्यात् ॥ इति जपारम्भकृत्यम् ॥

॥ अथ देवीकवचम् ॥

देवीकवचस्य ब्रह्माऋषिः । अनुष्टुप् छन्दः । सर्वशक्तिसमष्टिभूता आद्या श्रीमहालक्ष्मीर्देवता । शरीररक्षणार्थे देवीमाहात्म्यपूर्वाङ्गत्वेन जपे विनियोगः ॥

॥ ॐ मार्कण्डेय उवाच ॥

अथ व्याख्या ॥ योऽर्थज्ञइत्सकलं भद्रमश्नुते ॥ यदेव विद्यया
करोति तदेवास्य वीर्यवत्तरं भवति ॥ यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते ॥
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥ इत्यादि श्रुतिस्मृतिभिरर्थ-
ज्ञानसहितस्यैव जपादिकर्मणः सम्पूर्णफलप्राप्तेस्तद्रहितस्य च तदप्राप्तेरुक्तत्वात्,
तथा डामरतन्त्रे एवं संस्मृत्य ऋष्यादीन् ध्यात्वा पूर्वोक्तमार्गतः ॥
सार्थस्मृति पठेच्चण्डीस्तवं स्पष्टपदाक्षरम् ॥ इति चण्डीस्तवपाठस्य विशे-
पतोऽर्थस्मरणपूर्वकमेव विहितत्वाच्च, साधकानां तदर्थबोधाय साङ्गोपाङ्ग
देवीमाहात्म्यमन्वयमुखेन यथामति व्याख्यायते ॥ कवचादित्रये पुस्तकभेदात्
श्लोकसङ्ख्यापाठभेदादिकृतो भूयान् भेदो दृश्यते ॥ तत्रोगानन्दनाथशोधि-
ताङ्गषट्कस्य सुव्यवस्थितत्वमालोक्यात्र व्याख्याने तदङ्गीकारः कृतः । तेनै-
तदन्यपुस्तकेभ्यो बहु भिद्यते इति ज्ञेयम् ।

मार्कंडेय उवाचेति । अत्र ब्रह्मगार्कण्डेययोः संवादः ॥ मार्कण्डेयः
प्रष्टा । ब्रह्मा प्रतिवक्ता ॥ मार्कण्डेयश्च सुदीर्घकालजीवी मुनिविशेषः । मृक-
ण्डोर्ऋषेरपत्यं पुमान् मार्कण्डेयः । शुभ्रादित्वात् ढक्प्रत्ययः (अथपाठ-
भेदादिकम्) क्वचिन्मार्कण्डेयस्थाने नारद इति शतानीक इति वा पठ्यते ॥

यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ॥
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥

ब्रह्मोवाच ।—

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ २ ॥

मार्कण्डेयः पृच्छति यदिति । हे पितामह ब्रह्मन् । पितृणां पिता पितामहः । जगति सर्वेषां पितृणां पितृत्वात् ब्रह्मणः पितामहत्वम् । पितामहः पितृपितेति, ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामह इति चामरः । **मातृपितृभ्यां पितरि डामहच्** ॥ अत्र ब्रह्मणः सर्वनामानि परित्यज्य पितामहनाम्ना सम्बोधनं आत्मनो नप्तृतुल्यत्वात् अन्येभ्योऽकथनीयस्यापि परमगुह्यस्य स्वस्मै कथनं नायुक्तमितिध्वनयितुम् ॥ यद्वस्तु लोके परमं गुह्यं गुह्यतममित्यर्थः ॥ अस्तीति शेषः । यद्भवता अद्यापि कस्यचिदपि नाख्यातम् । यच्च नृणां सर्वरक्षाकरम् सर्वेभ्यः सकाशाद्रक्षकं चास्ति । तन्मे ब्रूहि ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युतेत्युक्तेरिति भावः । (अथ पाठभेदादि) क्वचित्पुस्तके इमं श्लोकमपठित्वा तत्स्थाने पितामह महाप्राज्ञ सर्वशास्त्रविशारद ॥ यैका दुर्गा पुराणेषु त्रिधा च नवधा च या ॥ तस्याः परमगुह्यं मे कवचं वक्तुमर्हसि ॥ इति सार्धश्लोकः पठ्यते ॥१॥

ब्रह्मेति । बृंहयति प्रजा वर्धयति ब्रह्मा । बृहिवृद्धौ । अन्तर्भावितण्यर्थोत्र बृंहतिः (अथ पाठभेदादि) ब्रह्मेत्यत्र पितामह इति क्वचित्पठ्यते ॥

अस्तीति । हे विप्र मार्कण्डेय । गुह्यतमं परमगुह्यम् पुण्यं पवित्रं । सर्वभूतोपकारकं सर्वभूतानां पठितृश्रोतृस्मर्त्रादिप्राणिनां रक्षणद्वारा उपकारकम् ॥ देव्याः कवचं तन्नाम ग्रन्थविशेषोऽस्ति । कवचवत्सर्वाङ्गरक्षकत्वात् कवचशब्दो ग्रन्थविशेषे प्रयुक्तः । देवीदेवताकत्वाद्देव्याःकवचमित्युक्तम् ।

प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी ॥
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥ ३ ॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च

तुशब्दः पादपूर्तौ । हे महामुने तच्छृणुष्व शृणु । आत्मनेपदं छान्दसम् । छन्दोवत्पुराणानीत्युक्तत्वात् छन्दसि च परस्मैपदात्मनेपदयोर्व्यत्ययस्य शास्त्रसम्मतत्वात् । महामुने इत्युक्त्या श्रुतस्य मननं सूचितम् । श्रोतव्यो मन्तव्य इति श्रुतेः । मननान्मुनिरुच्यते इति मुनिपदनिरुक्तेश्च । (अथ पाठभेदादि) महामुने इत्यत्र वदामि ते इति क्वचित्पाठः ॥ २ ॥

अथादौ कवचदेवतानां नवदुर्गाणां नामान्याह । प्रथमं शैलपुत्रीत्यादिना । अत्र प्रथममित्यादिपदेषु नामेतिपदं विशेष्यत्वेनाध्याहार्यम् । ततश्च प्रथमं नाम शैलपुत्रीति इत्यादिप्रकारेण योजना ॥ शैलस्य हिमाचलस्य पुत्री शैलपुत्री ॥ जाता हिमवतो यस्माच्छैलपुत्रीति सा स्मृतेति **देवीपुराणे** ॥ द्वितीयं नाम ब्रह्मचारिणीति । ब्रह्म तपः तच्चरतीति ब्रह्मचारिणी । वेदस्तत्त्वं तपो ब्रह्मेत्यमरः । ताच्छील्ये णिनिः ॥ तृतीयं नाम चन्द्रघण्टेति । चन्द्र इव चन्द्र एव वा घण्टा यस्याः सा चन्द्रघण्टा । आल्हादकारिणी देवी चन्द्रघण्टेति कीर्तितेति **रहस्यागमे** ॥ चतुर्थकं नाम कूष्माण्डेति । कूष्माण्डा प्रियकूष्माण्डफला कूष्माण्डसंज्ञकतामसगणविशेषस्वामिनी वा ॥ कूष्माण्डौ फलभिद्गणौ इति **हैमः** । उभयत्रापि मत्वर्थीयाजन्तात् टाप् । कुत्सित ऊष्मा-तापो यस्मिन् स कूष्मा संसारः सीडण्डे उदरे यस्याः सा कूष्माण्डेति प्रदीपे । मायारूपेति तदर्थः । (अथ पाठान्तरादि) शैलपुत्रीतीत्यत्र इतिपदस्थाने चकारो वा स्यादिति वा । चन्द्रघण्टेत्यत्र चित्रघण्टेति, कूष्माण्डेत्यत्र षकारस्थाने शकारश्च क्वचित्पठ्यते ॥ ३ ॥

पञ्चममिति । पञ्चमं नाम स्कन्दमातेति । स्कन्दस्य कार्तिकेयस्य माता

सप्तमं कालरात्रिश्च महागौरीति चाष्टमम् ॥ ४ ॥
नवमं सिद्धिदा प्रोक्ता नवदुर्गाः प्रकीर्तिताः ॥

स्कन्दमाता । चस्कन्द रेतोऽतिभयेन यस्मात्सा स्कन्दसंज्ञं सुपुत्रे कुमारमिति-स्कन्दपदनिरुक्तिः **शिवपुराणे** उक्ता ॥ षष्ठं नाम कात्यायनीति । पुरा देव-कार्यार्थं भगवती कतमुन्याश्रमे प्रादुर्भूता तेन च कन्यात्वेनाभिरक्षितेति तस्याः कात्यायनीति नामेति **शिवपुराणे**। कतस्य ऋषेर्गोत्रापत्यं स्त्री कात्यायनी। कतशब्दाद्गोत्रार्थे गर्गादियञन्तात् स्त्रियां ष्फप्रत्यये फकारस्यायन्नादेशे पित्वान् ङिपि कात्यायनीति रूपम् । इयमोड्डुयाणपीठाधिष्ठात्री । कात्यायनी-चोड्डियाने इति कालीपुराणात् ॥ सप्तमं कालरात्रिरिति । राति भयं ददातीति रात्रिः । कालस्य रात्रिः कालरात्रिः । मृत्योरपि भयजनिकेत्यर्थः । भीषास्मा-दग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति **श्रुतेः** । **वाराहपुराणे** तु । रौद्री तपोरता देवी तामसी शक्तिरुत्तमा ॥ संहारकारिणी नाम्ना कालरात्रिं च तां विदुरि-त्युक्तम् । अष्टमं नाम महागौरीति । महागौरी अतिश्वेतवर्णा । योगाग्निना तु या दग्धा पुनर्जाता हिमालयात् ॥ कुन्देन्दुशुभ्रवर्णा च महागौरीत्यतः स्मृता ॥ इति **देवीपुराणात्** ॥ **शिवपुराणे** किल सदाशिवेन नर्मोक्त्या कालीति सम्बोधिता पार्वती तपश्चरित्वा ब्रह्मणो वरात् कृष्णवर्णं शरीरकोशमुत्सृज्या-त्यन्तगौरवर्णा जातेत्यतो महागौरीति भगवत्या नामेत्युक्तम् । इयं कान्यकु-ब्जपीठाधिदेवता । कान्यकुब्जे महागौरीति **पाद्मात्** ॥ ४ ॥

नवममिति नवमं नाम सिद्धिदेति । कर्मफलानामष्टसिद्धीनां वा दात्री सिद्धिदा । अष्टसिद्धयश्च । अणिमा महिमा चैव गरिमा लघिमा तथा ॥ प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ इति । अणिमा अणुत्वं अतिसूक्ष्मत्वमित्यर्थः । महिमा महत्वम् । गरिमा गुरुत्वम् । लघिमा लघुत्वम् । प्राप्तिरिष्टवस्तुलाभः प्राकाम्यमिच्छाऽनभिघातः । ईशित्वं साम-

उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥
अग्निना दह्यमानस्तु शत्रुमध्यगतो रणे

र्थ्यम् । वशित्वं वश्यसर्वजनत्वम् अणिमादिपदचतुष्टयमण्वादिशब्देभ्यो भावे इमनिचि पुंसि बोध्यम् । प्रोक्तेतिपदस्य नवमपदानुरोधेनाध्याहृतनामपदविशेषणत्वेपि स्त्रीत्वं छान्दसम् । एता नवदुर्गाः प्रकीर्तिताः नामभिरुक्ताः ॥ एतानि नामानि महात्मना पूज्यतमेन सर्वप्रमाणमूर्धन्येनेत्यर्थः । ब्रह्मणा वेदेनैवोक्तानि ॥ अथवा तपःस्थितस्य मम स्मृत्युपस्थितत्वात्तपसैव कथितानीति वा ॥ वेदस्तत्वं तपो ब्रह्मेत्यमरः ॥ अथवा ब्रह्मणैव मयेतिशेषः सर्वज्ञेनेति भावः । उक्तानि । तानि त्वं आत्मना स्वयम् । मह पूजय । जपादिना सत्कुर्वित्यर्थः ॥ महपूजायां भ्वादिः ॥ आत्मनो गौरवसम्भावनया गर्वात्स्वनामोच्चारः ॥ दृश्यन्ते च--रामो द्विर्नाभिभाषते ॥ अश्वत्थामा करधृतधनुः किं न यातः स्मृतिं ते ॥ ममापि नाम दुर्योधनस्य शङ्कास्थानं पाण्डवाः ॥ इत्याद्या रामाश्वत्थामदुर्योधनादीनां गर्वात्स्वनामोच्चारगर्भाः स्वोक्तयः ॥ (अथ पाठान्तरादि) सिद्धिदा प्रोक्तेत्यत्र सिद्धिदात्री चेति क्वचित्पठ्यते । महात्मनेत्यत्र मयात्मनेति च । तत्पक्षे मया ब्रह्मणैव आत्मना स्वयं सर्वज्ञेनेति भावः । एतानि नामान्युक्तानीत्यन्वयः ॥ ५ ॥

अथार्तौ नवदुर्गाः प्रति शरणं गतानां सर्वार्तिनाशो भवतीत्याहाग्निना दह्यमानस्त्वित्यादिश्लोकद्वयेन । यस्त्वग्निना दावानलादिना दह्यमानः । यो रणे शत्रुमध्यगतः । गतपदस्य विषमे दुर्गमे इत्येताभ्यां च सम्बन्धः । तेन यो विषमे राजापराधादिसङ्कटे गतः पतितः । यो दुर्गमे गन्तुमशक्ये महाटवीपर्वतसागरादौ गतः ॥ तथा । यश्च भयार्तः भूतप्रेतपिशाचव्याघ्रसर्पचौरादिभयेनार्तः । एते सर्वे नवदुर्गाः प्रति शरणं गताश्चेत्सङ्कटपरिहारेच्छया तन्नामजपादितत्पराश्चेदित्यर्थः । उत्तरश्लोकेनान्वयपूर्तिः ॥ अत्र शरणशब्दस्य

विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥ ६ ॥
न तेषां जायते किञ्चिदशुभं रणसङ्कटे
आपदं न च पश्यामि शोकदुःखभयं न हि ॥ ७ ॥
यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते ॥

नपुंसकैकवचनान्तस्य अध्याहृतद्वितीयाबहुवचनान्तस्त्रीलिङ्गनवदुर्गापदविशेषणत्वेन बोधः ॥ तदुक्तं हरिणा ॥ लिङ्गसङ्ख्याविभेदेपि विशेषणविशेष्यता ॥ विभक्तिः पुनरेकैव विशेषणविशेष्ययोः ॥ इति ॥ (अथ पाठान्तरादि) मध्यगत इत्यत्र मध्येगत इत्यसमस्तं क्वचित् पठ्यते ॥ तथा भयार्त इत्यत्र भयार्ता इति बहुवचनं च ॥ ६ ॥

न तेषामिति ॥ तेषां पूर्वोक्तानां अग्निदह्यमानादिभयार्तान्तानां पञ्चानां-क्रमेण ॥ तत्राग्निना दह्यमानस्य किञ्चिदशुभं मरणादिकं न जायते ॥ रणे शत्रुमध्यगतस्य रणसङ्कटे युद्धसम्बाधे आपदं मृत्युं पराजयं वा न च पश्यामि ॥ राजापराधादिसङ्कटे पतितस्य शोकं राजकोपप्राप्तकारागारादिवासजन्यं मनःक्षोभं दुर्गमे अटवीपर्वतसागरादौ गतस्य दुःखं तज्जन्यप्राणसंशयादिपीडां, सिंहव्याघ्रसर्पचोरभूतप्रेतपिशाचादिभयार्तस्य भयं तज्जन्यमरणादिभीतिं च न हि पश्यामि । इति यथाक्रमं योजना ॥ शोकदुःखभयमिति समाहारे एकवचनम् ॥ (अथ पाठान्तरादि) आपदं न च पश्यामीत्यत्र आपदं न च पश्यन्ति, आपदं ते न पश्यन्ति, नापदं तस्य पश्यामीति वा क्वचित्पाठः ॥ भयं नहीत्यत्र भयङ्करीमिति च ॥ ७ ॥

पूर्वश्लोके आर्तभक्तेः फलमुक्त्वा अथानार्तौ भक्तेः फलमाह ॥ यैः । पुम्भिस्तु अनार्तैरिति भावः । भक्त्या केवलानुरागेण स्मृताः । नवदुर्गा इति शेषः ॥ तेषां सिद्धिर्मोक्षो नूनं निश्चयेन प्रजायते भवति । एवं नवदुर्गां

प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥ ८ ॥
ऐन्द्री गजसमारूपा वैष्णवी गरुडासना ॥
माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ ९ ॥
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥

उक्त्वाथ सप्तमातॄराह ॥ प्रेतसंस्थेत्यादिना ॥ तत्र चामुण्डा चण्डमुण्डहन्त्री काली तु प्रेते भूतविशेषे सन्तिष्ठते इति प्रेतसंस्था ॥ प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गवदिति **मेदिनी** ॥ चामुण्डापदव्युत्पत्तिः सप्तशतीसप्तमाध्याये यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ॥ चामुण्डेति ततो लोके ख्याता देवी भविष्यसि ॥ इत्युक्ता ॥ वाराही तन्नाम्नी वराहरूपधारिणो विष्णोः शक्तिः । महिष आसनं यस्याः सा महिषासना ॥ अत्र आसनशब्द आस्यते उपविश्यते आरुह्यतेऽत्रेति यावत् इतिव्युत्पत्त्या वाहनार्थकः ॥ एतेन वाराह्या मुखमात्रे वराहत्वम् तदधोभागे नराकारत्वमिति ज्ञेयम् ॥ अधोभागे वराहत्वे महिषारोहणस्यासम्भवत्वात् ॥ **त्रिपुरासिद्धान्तेप्युक्तम्** वराहाच्चन्दनाथस्य प्रसन्नत्वान्महेश्वरी । वाराहीति प्रसिद्धेयं वराहवदनेन वा इति ॥ ८ ॥

ऐन्द्रीति ॥ ऐन्द्री तन्नाम्नी इन्द्रशक्तिः गजसमारूढा गजमैरावतनागं समारूढास्ति ॥ वैष्णवी तन्नाम्नी विष्णोः शक्तिर्गरुडो वैनतेय-आसनं वाहनं यस्याः सा गरुडासनास्ति । माहेश्वरी तन्नाम्नी महेश्वरशक्तिर्वृषभारूढा वृषभारूढास्ति ॥ कौमारी तन्नाम्नी कुमारस्य कार्तिकेयस्य शक्तिः । शिखी मयूरो वाहनं यस्याः सा शिखिवाहनास्ति ॥ ९ ॥

ब्राह्मीति ॥ ब्राह्मी तन्नाम्नी ब्रह्मणः शक्तिः । हंसं पक्षिविशेषं समारूढा हंससमारूढा सर्वैराभरणैश्चूडामण्यादिपादाङ्गुलीयान्तैश्चत्वारिंशदलङ्कारैर्भूषिता चास्ति ॥ अथोपसंहरति ॥ इत्येता इति ॥ इति एवं प्रकाराः

इत्येता मातरो देव्यः प्रोक्ताः कारुण्यविग्रहाः ॥१०॥
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥
खेटकं तोमरं चैव परशुं पाशमेव च ॥ ११ ॥

करुणैव कारुण्यम् तदेव विग्रहो मूर्तिर्यासां ताः कारुण्यविग्रहाः करुणापूर्णा इत्यर्थः ॥ एताःसप्त मातरः सर्वलोकजननीत्वान्मातृसंज्ञा देव्यस्ते प्रोक्ताः ॥ (पाठान्तरादि ।) भूपिता इत्यत्र शोभितेति । प्रोक्ता इत्यत्र सर्वा इति । कारुण्यविग्रहा इत्यत्र कारुण्यमूर्तय इति, योगसमन्विता इति वा पठ्यते । कैश्चित् इत्येता मातर इत्यर्धं न पठ्यते । तदयुक्तम् । पूर्वत्र नवदुर्गाः प्रकीर्तिता इतिवदत्रापि इत्येता मातरो देव्य इत्युपसंहारस्यावश्यकत्वात् ॥ अत्र पूर्वार्धोत्तरम् लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥ श्वेतरूपधरा देवी ईश्वरी वृषवाहना ॥ दुर्गा सिंहासनासीना धनुर्बाणकरास्थिता ॥ इति सार्धश्लोकः, उत्तरार्धोत्तरं च नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ श्रेष्ठैश्च मौक्तकैः सर्वा दिव्यहारप्रलम्बिभिः ॥ इन्द्रनीलैर्महानीलैः पद्मरागैः सुशोभनैः ॥ दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ॥ इति श्लोकद्वयं चाधिकं क्वचित्पठ्यते ॥ १० ॥

अथासामविशेषेणायुधान्याह । शङ्खमित्यादिश्लोकद्वयेन । तत्र शङ्खचक्रगदाः प्रसिद्धाः । शक्तिः कासूसंज्ञकमायुधम् तल्लक्षणम**भिधानचिन्तामणिपरिशिष्टे** । कासूःशक्तिर्महाफला। अष्टतालायता सा चेति ॥ तालोत्र वितस्तिः इयं महाराष्ट्रभाषायां सैतीति प्रसिद्धेति **नामलिङ्गानुशासनव्याख्यायां महेश्वरभट्टः** ॥ हलं लाङ्गलम् । मुसलाख्यमायुधम् मुसलायुधम् । खेटकं चर्म । तोमरो लोहमयोऽनेकधारफलो मन्थाकारः । परशुः कुठारः । पाशो रज्जुमयो बन्धनसाधनविशेषः (अथ पाठभेदादि) हलं च मुसलायुधमित्यत्र मुसलं च हलायुधमिति, परशुं पाशमेव चेत्यत्र पाशमङ्कुशमेव चेति च क्वचित्पठ्यंते ॥ ११ ॥

कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ।
कुलिशं परिघं खड्गं पट्टिशं मुद्गरं तथा ॥ १२ ॥
दैत्यानां देहनाशाय भक्तानामभयाय च ।

कुन्तायुधमिति । कुन्तः प्रासः भाला इति लोके । तद्रूपमायुधं कुन्तायुधम् । त्रिशूलं प्रसिद्धम् । शृङ्गस्य पशुविषाणस्य विकारः शार्ङ्गम् शृङ्गघटितमित्यर्थः । तच्च तदायुधं च शार्ङ्गायुधम् । धनुरित्यर्थः । कुलिशं वज्रम् । परिघो लोहपत्रावृतलगुडात्मक आयुधविशेषः । भाषायां लोहाङ्गीति प्रसिद्धः । परितो हन्यतेऽनेनेति परिघः । करणे हन्तेरप्प्रत्ययः । खड्गः प्रसिद्धः । पट्टिं ललाटं श्यति भिनत्तीति पट्टिशः । पट्टिशस्तु क्षुरोपमः ॥ तीक्ष्णधारो लोहदण्डः ॥ इत्याभिधानचिन्तामणिपरिशिष्टे मुद्गरो मुद्गल इति प्रसिद्धः । यं मल्ला बाहुबलवर्धनाय स्वशिरः परितो भ्रमयन्ति । एतदुपलक्षणं सर्वायुधानां न परिगणनम् । (अथ पाठान्तरादि) शार्ङ्गमायुधमुत्तमम् इत्यत्र शार्ङ्गायुधमनुत्तमामिति, कुलिशं परिघं खड्गमित्यत्र खड्गचर्मत्रिशूलं चेति च क्वचित्पठ्यते । क्वचिदुत्तरार्धं न पठ्यते च ॥ १२ ॥

अथायुधधारणस्य प्रयोजनमाह दैत्यानामिति देहनाशाय वधायेत्यर्थः । देवदत्तस्य गुरुकुलमिति सापेक्षत्वेपि समासः । तदुक्तं हरिणा । समुदायेन सम्बन्धो येषां गुरुकुलादिना ॥ संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह ॥ सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते ॥ वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते ॥ इति ॥ भक्तानां स्वोपासकजनानां अभयाय हिंस्रप्राणिजन्यभयपरिहाराय । वक्ष्यते चैकादशाध्याये । ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥ त्रिशूलं पातु नो भीतेरिति ॥ देवानां हिताय च शत्रुवधेन सुखजननाय च । इत्थं एवं रूपाणि । आयुधानि धारयन्ति । वै पादपूर्तौ । (अथ पाठान्तरादि) इत उत्तरं नमस्तेऽस्तु महारौद्रे महा-

धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥ १३ ॥
एवं ध्यात्वा पुमानेतत्कवचं कामदं पठेत्
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥१४॥
दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥

घोरपराक्रमे ॥ महाबले महोत्साहे महाभयविनाशिनि ॥ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ॥ सर्वकामप्रदे नित्यं सर्वसौभाग्यदायिनि ॥ इति श्लोकद्वयमधिकं क्वचित्पठ्यते ॥ १३ ॥

ध्यानोपसंहारपूर्वकं कवचपाठं विधत्ते एवमिति । पुमानुपासकपुरुषः एवं प्रेतसंस्था तु चामुण्डेत्यादि देवानां च हिताय वै इत्यन्तं पूर्वोक्तप्रकारेण ध्यात्वा एतत् प्राच्यां रक्षत्वित्यादिना वक्ष्यमाणं कामदं मनोरथपूरकं कवचं रक्षाकरवाक्यसमूहात्मकग्रन्थं पठेत् । अथ पठनीयं कवचमाह प्राच्यामित्यादिना । ऐन्द्री इन्द्रस्य प्राग्दिगीशस्य शक्तिः न तु तस्य स्त्री । एवमग्रेपि ज्ञेयम् । प्राच्यां दिशि मां रक्षतु । अग्निदेवता अग्निशक्तिरूपा देवता । अग्नेरियमाग्नेयी तस्यामाग्नेय्यां दिशि मां रक्षतु । ऐन्द्री आग्नेय्यामित्यत्र अविवक्षितत्वान्न संहिता । तदुक्तम् । संहितैकपदे नित्या नित्या धातूपसर्गयोः ॥ नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते ॥ इति ॥ अस्य श्लोकस्य प्रथमार्धं केचिन्न पठन्ति । (अथ पाठान्तरादि) मामैन्द्रीत्यत्र माहेन्द्रीति क्वचित्पठ्यते ॥ १४ ॥

दक्षिणे इति । वरान् श्रेष्ठपुरुषानप्याहन्तीति वराहो यमः । अन्येभ्योपि दृश्यन्ते इति हन्तेऽप्रत्ययः । तस्येयं शक्तिर्वाराही यमशक्तिः । दक्षिणे दक्षिणस्यां दिशि मां अवतु रक्षतु । अव रक्षणे खड्गधारिणी नैर्ऋतशक्तिः । नैर्ऋतस्य खड्गायुधत्वात् । सा नैर्ऋत्यां दिशि मामवतु । वरुणस्येयं वारुणी

प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥ १५ ॥

उदीच्यां पातु कौबेरी ईशान्यां शूलधारिणी ॥
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥ १६ ॥

वरुणशक्तिः प्रतीच्यां दिशि मां रक्षेत् । मृगेणात्मानं वाहयतीति मृगवाहिनी वायुशक्तिः । वायोर्मृगवाहनत्वात् । सा वायव्यां दिशि मां रक्षेत् । (अथ पाठान्तरादि) क्वचित् दक्षिणेऽवत्वित्यत्रावतु पदस्थाने रक्षेति मध्यमपुरुषंपठित्वा वाराही खड्गधारिणीपदे सम्बुध्यन्ते पठ्येते ॥ १५ ॥

उदीच्यामिति । कुबेरस्येयं कौबेरी कुबेरशक्तिः उदीच्यां मां पातु । शूलधारिणी ईशानशक्तिः । ईशानस्य शूलायुधत्वात् । ईशान्यां दिशि मां पातु । ईशानीपदस्याण्णन्तत्वेप्यादिवृद्ध्यभावः संज्ञापूर्वकविधेरनित्यत्वात् । असंहिता । प्राग्वत् । ब्रह्माणी ब्राह्मी ब्रह्मशक्तिः । आनुगागमच्छान्दसः । अथवा ब्रह्म वेदं अणति पठतीति ब्रह्माणी कर्मण्यण् । ब्रह्मणो वेदपाठस्तच्छक्तावुपचर्यते ऊर्ध्वं ऊर्ध्वायां दिशि मां रक्षेत् । तथा वैष्णवी विष्णुशक्तिः अधस्तात् अधरस्यां दिशि मां रक्षेत् । ऊर्ध्वाधोदेशयोः क्रमात् । ब्रह्मविष्णुदिक्त्वेन प्रसिद्धत्वात्तच्छक्त्योस्तत्र रक्षकत्वमुक्तम् । ऊर्ध्वं ब्रह्माणी मे रक्षेदित्यत्र पञ्चमाक्षरस्य गुरुत्वं छान्दसत्वान्न दुष्यति । एवं शुक्रं ब्रह्माणी मे रक्षेत्, गोत्रमिन्द्राणी मे रक्षेदित्यत्रापि ज्ञेयम् (अथ पाठान्तरादि) केचिच्छन्दोभङ्गपरिहाराय ब्रह्माणीपदं सम्बुध्यन्तं पठित्वा रक्षेदित्यनेन सह सामानाधिकरण्यार्थं मध्ये भवतीति कर्तृपदमध्याहरन्ति । एवं शुक्रं ब्रह्माणी मे रक्षेत्, गोत्रमिन्द्राणी मे रक्षेदित्यत्रापि । अत्र एवं दशादिशो रक्षेच्चामुण्डा शववाहना ॥ इत्यर्धमधिकं केचित्पठान्ति ॥ १६ ॥

जया ममाग्रतः स्थातु विजया स्थातु पृष्ठतः
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥ १७ ॥
शिखां मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥

जयेति । जयत्युत्कर्षेण वर्तत इति जया । जि जये अकर्मकः । जय उत्कर्षप्राप्तिः । पचाद्यच् टाप् । जयानाम्नी देवी मम अग्रतः पुरोभागे स्थातु तिष्ठतु । मद्रक्षणार्थमिति भावः । अन्यथावस्थानस्य निष्प्रयोजनत्वात् । अतएव लघुन्यासे प्रजनने ब्रह्मा तिष्ठतु, पादयोर्विष्णुस्तिष्ठतु । इत्यादिबहुभिर्वाक्यैस्तत्तदवयवेषु तत्तदवस्थानं प्रार्थ्य अन्ते मां रक्षन्त्विति वाक्यशेषेण पूर्तिः कृता । स्थात्वित्यत्र तिष्ठादेशाभावश्छान्दसः । इयं वराहशैलस्था । जया वराहशैले स्यादिति **पाद्मात्** । विजयते शत्रूनभिभवतीति विजया । जि अभिभवे सकर्मकः । विजया नाम्नी देवी मम पृष्ठतः पश्चाद्भागे स्थातु । जयिर्जयाभिभवयोराद्यार्थेऽसावकर्मकः ॥ उत्कर्षप्राप्तिराद्यार्थो द्वितीयार्थे सकर्मकः इत्यभियुक्ताः । केनापि न जिता अजिता । अजितानाम्नी देवी मम वामपार्श्वे स्थातु । क्वचिदपि युद्धे पराजयं न प्राप्ता अपराजिता । अपराजितानाम्नी देवी मम दक्षिणपार्श्वे स्थातु । विजित्य पद्मनामानं दैत्यराजं महाबलम् ॥ त्रिषु लोकेषु विख्याता विजया चापराजिता ॥ इति **देवीपुराणे** । (अथ पाठान्तरादि) ममाग्रत इत्यत्र मे अग्रत इति, स्थात्वित्यत्र च पात्विति च क्वचित्पठ्यते ॥ १७ ॥

एतावत्पर्यन्तसकलशरीरावच्छेदेन रक्षणं प्रार्थ्याथ पृथग्पृथगवयवभेदेन तत्प्रार्थ्यते । शिखामित्यादिना ॥ अत्र कानिचिद्वाक्यानि द्वितीयान्तरक्ष्यावयववाचकपदगर्भाणि, कानिचिच्च सप्तम्यन्तरक्ष्यावयववाचकपदगर्भाणि सन्ति ॥ तत्र येषु शिखां मे द्योतिनी रक्षेदित्यादिषु द्वितीयान्तरक्ष्यावयववाचकपदगर्भेषु वाक्येषु यावदपेक्षितपदानां प्रयोगोस्ति तत्र निर्विवाद एवान्वयः । येषु

मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ॥ १८ ॥

स नास्ति तत्रान्वयपूर्त्यर्थं पूर्ववाक्यतोऽपेक्षितपदानामनुवृत्तिः कर्तव्या । यथा भ्रुवौ रक्षेद्यशस्विनीत्यत्र मे इति पदस्य । वाचं मे सर्वमङ्गलेत्यत्र रक्षेदित्यस्य कर्णमूले च शाङ्करीत्यत्रोभयोश्च । एवमन्यत्रापि ज्ञेयम् ॥ अथ यानि ' उमा मूर्ध्नि व्यवस्थिता ॥ मालाधरी ललाटे चेत्यादीनि सप्तम्यन्तरक्ष्यावयववाचकपदगर्भाणि सन्ति तेषु सप्तम्यन्तावयवपदं पुनरावर्त्यैकं खण्डं द्वितीयान्तत्वेन विपारिणमय्यापेक्षितपदानि पूर्ववाक्येभ्योऽनुवर्त्य, उमा मे मूर्ध्नि व्यवस्थिता सती मूर्धानं रक्षेत् । मालाधरी मे ललाटे व्यवस्थिता सती ललाटं रक्षेदित्येवं योजना कार्या । अत्र प्रथमवाक्ये मे रक्षेदिति पदद्वयस्य, द्वितीये व्यवस्थिता मे रक्षेदिति पदत्रयस्यानुवृत्तिः । **भास्कररायादयस्तु** सर्ववाक्यार्थानां समानस्वरूपत्वार्थं द्वितीयान्तावयववाचकपदगर्भवाक्येष्वपि द्वितीयान्तपदानि सप्तम्यन्तत्वेन पुनरावर्त्य व्यवस्थितेतिपदमनुवर्त्य पूर्वोक्तप्रकारेण तेषामपि योजनामाहुः अथात्र भ्रमनिरासाय द्वितीयान्तावयवपदानां सप्तम्यन्तावयवपदानां च कारिकाभिः परिगणनं क्रियते ॥ शिखा भ्रुवौ चक्षुषी च कपोलौ कर्णमूलके ॥ दन्ताश्च घण्टिका चैव चुबुकं वाक् तथैव च स्कन्धौ बाहू नखाः कक्षौ स्तनौ मेढ्रं च गुह्यकम् ॥ ऊरू जङ्घे पादपृष्ठे पादाङ्गुल्योर्नखास्तथा ॥ केशास्त्वगस्थिरक्तादिपित्तान्तानां तथाष्टकम् ॥ स्नसाजालं च शुक्रं च छायाहङ्कार एव च ॥ मनोबुद्धिस्तथा प्राणाद्याः पञ्च रसपञ्चकम् ॥ सत्वं रजस्तमश्चायुर्धर्मोऽर्थ यश एव च ॥ कीर्तिर्लक्ष्मीश्च गोत्रं च पशवः पुत्रकास्तथा ॥ भार्या धनं कन्यकाश्च मार्गः सर्वमिति त्रियुक् ॥ द्वितीयान्तानि षष्टिः स्युः, सप्तम्यन्तान्यथ क्रमात् ॥ मूर्धा ललाटं श्रोत्रे च नासिका चोत्तरोष्ठकः ॥ अधरश्चाथ जिह्वा च कण्ठदेशश्च तालुकम् ॥ ग्रीवा च पृष्ठवंशश्च हस्तावङ्गुल्य एव च ॥ हृदयं चोदरं नाभिः कटी जानू च गुल्फकौ ॥ पादाधो रोमकूपाश्च

शङ्खिनी चक्षुषी रक्षेच्छ्रोत्रयोर्द्वारवासिनी ॥

पद्मकोशोकफस्तथा ॥ सन्धयः सर्वतःश्चेति पञ्चविंशतिसङ्ख्यया ॥ इति ॥ अथ व्याख्या ॥ द्योतयति प्रकाशयति सर्वमिति द्योतिनी। णिजन्ताण्णिनिः। यस्य भासा सर्वमिदं विभातीति श्रुतेः। शून्यं तदखिलं स्वेन पूरयामास तेजसेति पुराणाच्च। द्योतिनीनाम्नी देवी मे शिखां रक्षेत् ॥ उमेति पार्वत्या नाम। तन्निरुक्तिः **कालिकापुराणे**। यतो निषिद्धा तपसे वनं गन्तुं तु मेनया ॥ उमेति, तेन सोमेति नाम प्राप तदा सती ॥ इति ॥ उ इति सम्बोधनेऽव्ययम्। मा इति निषेधे। ततश्च अयि बाले तपोर्थं वनं मा यासीरिति पदद्वयार्थः। इति उमेति च पदाभ्यां तपोर्थे तस्या गमनस्य निषेधादुमेति तस्या लोके नामाभवदित्यर्थः। इयं विनायकपीठाधिष्ठात्री। उमा विनायके देवीति **पाद्मात्**। उमानाम्नी देवी मे मूर्ध्नि व्यवस्थिता सती मूर्धानं रक्षेदिति योजना ॥ मालाधारिणी। आपादलम्बिनीं मालां वनमालां विदुर्बुधाः ॥ इति वनमालालक्षणम् ॥ जपमालाधारिणी वा। अक्षस्रक्पुस्तहस्तामिति शारदाध्यानोक्तेः। षष्ठीसमासः। बह्वादित्वान् ङीप्। मालाधारीनाम्नी देवी मे ललाटे व्यवस्थिता सती ललाटं रक्षेत् ॥ यशो लोकत्रयव्यापिनी गुणप्रसिद्धिर्यस्याः सा यशस्विनी। अस्मायास्रज इति विनिः। नान्तत्वान् ङीप्। यशस्विनी नाम्नी देवी मे भ्रुवौ रक्षेत् ॥ मालाधरी यशस्विनीत्यादिपदानां विशेषणरूपत्वेपि नानातीर्थक्षेत्रनिवासिदेवतानां तैस्तैर्गुणैः प्रसिद्धास्ताः संज्ञा एवेति बोध्यम्। (अथ पाठान्तरादि) शिखां मे द्योतिनोत्यत्र शिखामुद्योतिनीति पाठः क्वचित्। एतच्छ्लोकोत्तरं त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके। इत्यर्धमाधिकं क्वचित्पठ्यते ॥ १८ ॥

शङ्खिनीति। शङ्खो निधिविशेषस्तद्वती शङ्खिनी। तद्देवतेत्यर्थः ॥ शङ्खधारिणी वा। शङ्खो निधौ ललाटास्थि कम्बावित्यमरः। शङ्खिनी नाम

कपोलौ कालिका रक्षेत्कर्णमूले च शाङ्करी ॥ १९ ॥
नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥

देवी मे चक्षुषी नेत्रद्वयं रक्षेत् । द्वारवासिनीत्यत्र द्वारपदेन गङ्गाद्वारं द्वारवती वा ग्राह्या । अतिप्रसिद्धे वस्तुनि नामैकदेशप्रयोग इति **दण्डी** । तद्वासिनी द्वारवासिनी द्वारवासिनी नाम देवी मे श्रोत्रयोर्व्यवस्थिता सती श्रोत्रे कर्णौ रक्षेत् ॥ कृष्णवर्णत्वात् काली । जानपदेति ङीष् । सैव कालिका स्वार्थे कन् केण इति ह्रस्वः । कालिकानाम्नी देवी मे कपोलौ गण्डौ रक्षेत् ॥ शङ्करस्य शम्भोरियं शङ्करी तस्येदमित्यण् । अण्णन्तत्वान् ङीष् शङ्करसहचरीत्यर्थः । उक्तं च **कालिपुराणे** । प्रतिसर्गादिमध्यान्तेष्वहं शम्भुं निराकुला ॥ स्त्रीरूपेणानुयास्यामि शाङ्करीत्यभिधानतः ॥ इति ॥ इयं श्रीगिरिस्था । श्रीगिरौ शाङ्करी मतेति **देवीभागवतात्** । शाङ्करी नाम्नी देवी मे कर्णमूले कर्णयोर्मूलप्रदेशौ रक्षेत् । कर्णमूले इति क्लीबं द्वितीयाद्विवचनम् । (अथ पाठान्तरादि) चक्षुषी रक्षेदित्यत्र चक्षुषोर्मध्ये इति क्वचित्पाठः ॥ १९ ॥

नासिकायामिति । शोभनो गन्धोऽङ्गसौरभ्यं यस्याः सा सुगन्धा इत्वाभावश्छान्दसः । छंदोवत्पुराणानीत्युक्तत्वेन छन्दसीव पुराणेषु सर्वविधीनां विकल्पात् । शोभनाः गन्धाः गन्धद्रव्याणि यस्या इति वा । इयं माधववनस्था । सुगन्धा माधवे वने इति **देवीभागवतात्** । सुगन्धा नाम्नी देवी मे नासिकायां स्थिता सती नासिकां रक्षेत् । चर्चति तर्जयति शत्रूनिति चर्चिका । चर्ममुण्डाख्या देवी । चर्ममुंडा तु चर्चिकेत्य**मरः** । अथवा चर्चिका अध्येत्री । चर्चअध्ययने । **ब्रह्माण्डपुराणे** तु । शक्तीनामपि याश्चर्चाः सर्वास्तस्या वशंवदाः ॥ तस्मात्सा चर्चिका प्रोक्तेत्युक्तम् चर्चा विचारणाः चर्चिका नाम्नी वी मे उत्तरोष्ठे स्थिता सती उत्तरोष्ठं रक्षेत् ॥ अमृता चासौ कला चामृतकला पुंवद्भावच्छान्दसः अमृता मानदा पूषेत्यादिनोक्तासु चन्द्रस्य षोडशकलासु

अधरे चामृतकला जिह्वायां च सरस्वती ॥ २० ॥
दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ॥

प्रथमा अमृता अत्र तद्रूपा देवतेत्यर्थः अथवा अमृतस्य नित्यस्य परमात्मनः कला अंशः । तद्रूपा अमृतकला नाम्नी देवता मे अधरे अधरोष्ठे व्यवस्थिता सती अधरं रक्षेत् ॥ सरस्वती वाग्देवी उक्तं च **भारद्वाजस्मृतौ** या वसेत्प्राणिजिह्वासु सदा वागुपवर्तनात् सरस्वतीति नाम्नेयं समाख्याता महर्षिभिः ॥ इति । रसवती जिह्वा तया सहिता सरस्वती वाग्देवतेत्यर्थः । अकारलोपः पृषोदरादित्वात् सरणात् सर्वदृष्टीनां कथितैषा सरस्वती ॥ इति ॥ **वासिष्ठरामायणे** सर्वदृष्टीनां सरणात् सर्वज्ञानानां प्रसारादित्यर्थः । सरस्वती नाम्नी देवी मे जिह्वायां व्यवस्थिता सती जिह्वां रक्षेत् ॥२०॥

दन्तानिति । कौमारीपदं पूर्वं मातृकासप्तकनामसु व्याख्यातम् । कौमारी नाम्नी देवी मे दन्तान् रक्षतु । चण्डते कुप्यति इति चण्डिका । तन्नाम्नी अत्यन्तकोपना तामसी शक्तिः । तदुक्तं **देवीमाहात्म्ये** । ततो देवीशरीरात्तु विनिष्क्रान्ताऽतिभीषणा ॥ चण्डिकाशक्तिरत्युग्रा शिवा शतनिनादिनीति । इयममरकण्टकस्था । चण्डिकाऽमरकण्टके । इति **देवीभागवतात्** उपोद्घाते चण्डिका शब्दः परब्रह्मरूपादिपरत्वेन व्याख्यातः । चण्डिका नाम्नी देवी मे कण्ठदेशे व्यवस्थिता सती कण्ठदेशं रक्षतु ॥ चित्रास्वनेनैव दैत्यतेजोविनाशकत्वाद्विचित्रसामर्थ्यवती घण्टा यस्याः सा चित्रघण्टा । वक्ष्यते चैकादशाध्याये । हिनस्ति दैत्यतेजांसिस्वनेनापूर्य या जगदिति॥ चित्रघण्टा नाम्नी देवी मे घण्टिकां घाटापरपर्यायं कण्ठमणिं रक्षतु ॥ महती मनोवाचामगोचरा माया सर्वजनमोहनशक्तिर्यस्याः सा महामाया । उक्तं च **कालिकापुराणे** ॥ गर्भान्तज्ञानसम्पन्नं प्रेरितं सूतिमारुतैः ॥ उत्पन्नं ज्ञानरहितं कुरुते या निरन्तरम् ॥ महामायेति च प्रोक्ता तेन सा जगदीश्वरी ॥ इति ॥ इयं महालयस्थानस्था ।

घण्टिकां चित्रघण्टा च महामाया च तालुके ॥२१॥
कामाक्षि चुबुकं रक्षेद्वाचं मे सर्वमङ्गला ॥

महामाया महालये ॥ इति **देवीभागवतात्** ॥ महामाया नाम्नी देवी मे तालुके तालुनि व्यवस्थिता सती तालुकं रक्षतु तालुके इत्यत्र तालुशब्दात्स्वार्थे कन् ॥ (अथ पाठान्तरादि) कण्ठदेशे इत्यत्र कण्ठमध्ये इति, घण्टिकामित्यत्र घाटिकामिति, तालुकेत्यत्र तालुनीति च क्वचित्पाठः ॥ २१ ॥

कामाक्षीति । कामाः सर्वजनेच्छाः अक्ष्णोर्यस्याः सा कामाक्षी । कटाक्षमात्रेण सर्वजनकामपूरिकेत्यर्थः । तदुक्तं **ब्रह्माण्डपुराणे** । सर्वज्ञा चाक्षिमात्रेण तत्तत्कामानपूरयत् ॥ तद्दृष्ट्वाचरितं तस्या ब्रह्मालोकपितामहः कामाक्षीति तदा नाम ददौ कामेश्वरीति च ॥ इति ॥ कामो मदनः अक्ष्णोर्यस्या इति वा । मदनजनकनेत्रकटाक्षेत्यर्थः । इयं काञ्चीपीठाधिष्ठात्री । कामाक्षी नाम्नी देवी मे चुबुकमधराधोभागं रक्षेत् । सर्वेषां मङ्गलकरी सर्वमङ्गला । उक्तं च **देवीपुराणे** । सर्वेषां हृदयस्थानि मङ्गलानि शुभानि च ॥ ईप्सितानि ददातीति तेनेयं सर्वमङ्गला ॥ इति ॥ **लक्ष्मीतन्त्रे** च । शोभनानि विशिष्टानि या देवी ददते हरे । भक्तानामार्तिहरणात्तेनेयं सर्वमङ्गला ॥ इति ॥ सर्वमङ्गला नाम्नी देवी मे वाचं वचनशक्तिं रक्षेत् । भद्राणि सुखानि कलयतीति भद्रकाली । कलसङ्ख्याने चुरादिः । कर्मण्यण् । अणन्तान् ङीप् । भद्रकाली सुखप्रदेति **रहस्यागमे** ॥ भद्रकाली नाम्नी देवी मे ग्रीवायां कण्ठस्य पश्चाद्भागे व्यवस्थिता सती ग्रीवां रक्षेत् । धनुषोधरी धनुर्धरी । वह्वादित्वान् ङीप् । धनुर्धरीनाम्नी देवी मे पृष्ठवंशे पृष्ठगतास्थिपञ्जराधारभूते माणिदण्डे व्यवस्थिता सती पृष्ठवंशं रक्षेत् । (अथ पाठान्तरादि) कामाक्षीत्यत्र कामाख्येति पाठे तन्निरुक्तिः **कालिकापुराणे** । कामार्थमागता यस्मान्मया सार्धं महागिरौ ॥ कामाख्या प्रोच्यते तेन नीलकूटरहोगता ॥

ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ २२ ॥
खड्गधारिण्युभौ स्कन्धौ बाहू मे वज्रधारिणी ॥

इति ॥ अन्यत्र तु ॥ कामदा कामिनी कान्ता कामाङ्गदायिनी ॥ कामाङ्गनाशिनी यस्मात्कामाख्या तेन कथ्यते ॥ इत्युक्तम् ॥ कामाङ्गनाशकत्वं स्मरहरार्धाङ्गरूपत्वात् । एतदनन्तरम्, नीलग्रीवा बहिः कण्ठे नलिकां नलकूचरीत्यर्धमाधिकं क्वचित्पठ्यते ॥ २२ ॥

खड्गधारिणीति । पूर्वं नैर्ऋतादिग्देवतापरत्वेन खड्गधारिणिपदं व्याख्यातम् । इदानीं तु केवलखड्गधारणमात्रप्रयुक्तखड्गधारिणिसंज्ञापरत्वेन व्याख्येयम् । खड्गिनी शूलिनीति वक्ष्यमाणत्वात् । अथवा खड्गान् गण्डकान् धारयति मृगयायां गृह्णातीति खड्गधारिणी शबरवेषधरशङ्करसहकरी शबरवेषा भवानीत्यर्थः । गण्डके खड्गखाड्गिनावित्यमरः । क्वचित्क्वचिन्नाम्नां समानवर्णानुपूर्वीकत्वेऽपि प्रवृत्तिनिमित्तभेदान्न पौनरुक्त्यम् । तदुक्तं विष्णुधर्मोत्तरे । निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात् ॥ विभिन्नान्येव साध्यन्ते फलानि द्विजसत्तम ॥ इति ॥ अथवा एकस्या देवताया अनेकावयवरक्षकत्वेऽपि न बाध इत्यग्रे वक्ष्यते । खड्गधारिणी नाम्नी देवी मे उभौ स्कन्धौ रक्षेत् । वज्रं पविं हस्ते धारयतीति वज्रधारिणी । अथवा वज्रान् हीरकान् तन्मयालङ्कारानित्यर्थः सर्वाङ्गेषु धारयतीति वज्रधारिणी ॥ वज्रधारिणी नाम्नी देवी मे बाहू रक्षेत् ॥ दण्डो यष्टिः सैन्यं दमो वा तद्वती दण्डिनी । दण्डो लगुडमन्थानदमसैन्येषु दृश्यते इति शाश्वतः ॥ इयं महास्थानस्था । महास्थाने दाण्डिनी स्यादिति देवीभागवतात् । दण्डिनी नाम्नी देवी मे हस्तयोः स्थिता सती हस्तौ रक्षेत् ॥ ग्रीवायाः सकाशात् भुजशिखरान्तं स्कन्धौ । ततः कूर्परपर्यन्तं बाहू । ततोङ्गुलिमूलपर्यन्तं हस्ताविति विवेकः । अम्बते शब्दं करोतीत्याम्बिका वैखरीरूपेत्यर्थः । अथवा अम्बिका मातृरूपा

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ॥ २३ ॥
नखाञ् शूलेश्वरी रक्षेत् कक्षौ रक्षेन्नलेश्वरी

शिवपत्नी वा । अम्बिकानाम्नी देवी मे अङ्गुलीषु हस्ताङ्गुलीषु स्थिता सती हस्ताङ्गुलीः रक्षेत् (अथ पाठान्तरादि) अङ्गुलीषु चेत्यत्र अङ्गुलीस्तथा इति क्वचित्पाठः । इत उत्तरं हस्ताङ्गुष्ठौ तथा गौरी तर्जन्यौ कालिकावतु ॥ महामाया मध्यमयोरनामिक्योः सुरेश्वरी ॥ कनिष्ठिके तु चामुण्डा काली करतले तथा ॥ इति सार्धश्लोकोऽधिकः क्वचित्पठ्यते ॥ २३ ॥

नखानिति । शूलेश्वरी शूलाख्यशस्त्रधारिणी शूलरोगविनाशिनी वा । ऐश्वर्यं सामर्थ्यं तन्निग्रहेऽप्युपयुज्यते ॥ यथा मृगेश्वरशब्दे । शूलेश्वरीनाम्नी देवी मे नखान् हस्तनखान् रक्षेत् ॥ नलेश्वरी कमलोपविष्टा, कमलधारिणी वा । नलतीति नलं कमलं । णल् गन्धे भ्वादिः । नलस्य तन्नाम्नो राज्ञो वा । नरस्य वा ईश्वरी अनुग्राहिका इति वा । नलः पोटगले राज्ञि पितृदेवे कपीश्वरे ॥ कमलेपि च नद्यां च क्रमेण क्लीबयोपितोः ॥ इति **नामलिङ्गानुशासनव्याख्यायां व्याख्यासुधायां** वनौषधिवर्गे नलीशब्दव्याख्याने **मेदिनी** ॥ रेफलकारयोरभेदान्नरेश्वरी वा सम्राज्ञीति तदर्थः । नलेश्वरी नाम्नी देवी मे कक्षौ उभे बाहुमूले रक्षेत् ॥ बाहुमूले उभे कक्षावित्य**मरः** ॥ महादेवस्य स्त्री महादेवी । पुंयोगलक्षणो ङीष् । महती महाप्रमाणा देवी महादेवी वा । बृहच्छरीरोविमिमातीति, परो दिवा पर एना पृथिव्यै तावती महिना सम्बभूवेति च श्रुतेः । बृहदस्याः शरीरं तु अप्रमेयं प्रमाणतः ॥ धातुर्महेति पूजायां महादेवी ततः स्मृतेति **देवीपुराणाच्च** । इयं गण्डक्यां चक्रतीर्थाधिष्ठात्री । शालग्रामे महादेवीति **पाद्मात्** । शालग्रामं चक्रतीर्थम् । मनःशोकविनाशिनीति समस्तं पदम् । तच्च मनसः शोकं विनाशयति व्युत्पत्या महादेव्या विशेषणम् । न तु मन इति रक्ष्याङ्गवाचकं पृथक्पदम् । अहङ्कारं मनोबुद्धिं रक्षेन्मे धर्म-

स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी ॥ २४ ॥
हृदये ललिता देवी उदरे शूलधारिणी ॥

चारिणीति मनसो रक्ष्यत्वेनाग्रे वक्ष्यमाणत्वात् । तथा च मनःशोकविनाशिनी महादेवी नाम्नी देवी मे स्तनौ रक्षेत् । (अथ पाठान्तरादि) कक्षावित्यत्र कुक्षाविति केचित्पठन्ति । तन्न युक्तम् । अग्रे उदरस्य वक्ष्यमाणत्वात् । कुक्ष्युदरयोरेकार्थत्वात् प्राप्तक्रमेण स्तनाभ्यां प्राक् कक्षयोरुक्तेरेव युक्तत्वाच्च ॥ २४ ॥

हृदये इति । ललितं विलासस्तद्वती ललिता । अर्श आद्यच् ॥ लोकानतीत्य ललते ललिता तेन चोच्यते इति **पाद्मात्** । लल् विलासे ॥ ललितं रतिचेष्टितमिति **रतिरहस्ये** । तद्वती वा ललिता । इयं प्रयागस्था, प्रयागे ललिता देवीति देवीति **पाद्मात्** । हृदयमुरोऽन्तर्गतः पद्मकोशसदृशोऽवयवविशेषः । तदुक्तं **नारायणोपनिषदि** । पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् ॥ अधोनिष्ठ्या वितस्त्यां तु नाभ्यामुपरि तिष्ठति ॥ इति ॥ ललिता नाम्नी देवी मे हृदये व्यवस्थिता सती हृदयं रक्षेत् ॥ शूलधारित्वात् शूलधारिणी नाम्नी देवी मे उदरे कुक्षौ व्यवस्थिता सती उदरं रक्षेत् ॥ देवी उदरे इत्यत्र सन्ध्यभावः, संहिताया अविवक्षितत्वात् ॥ कामिनी स्मरयुक्ता । अथवा पूर्णकामा । **विष्णुसहस्रनामभाष्ये**, कामी कान्तः कृतागम इत्यत्र कामिपदस्य पूर्णकाम इति व्याख्यानात् ॥ कामिनी नाम्मी देवी मे नाभौ व्यवस्थिता सती नाभिं रक्षेत् । तथा तद्वत् गुह्यस्य गुप्तस्य कौलमार्गस्येश्वरी गुह्येश्वरी । उक्तं च **कुलार्णवे** । इयं च शाम्भवी विद्या गुप्ता कुलवधूरिव ॥ अन्यास्तु सकला विद्याः प्रकटा गणिका इव ॥ इति ॥ अथवा गुह्यानां गुह्यकानाम् यक्षाणामीश्वरी गुह्येश्वरी ॥ तदुक्तं **दुर्वाससा** श्रीललिता वरणदेवतास्तवप्रसङ्गे । वन्दे मणिभद्रमुखामम्बाचरणावलम्बिनो यक्षानिति ॥ गुह्येश्वरी नाम्नी देवी

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ॥ २५ ॥
भूतनाथा च मेढ्रं मे ऊरू मे मेघवाहना ॥

मे गुह्यं गुदं रक्षेत् ॥ गुह्यं गुदे तथोपस्थे रहस्ये वाच्यलिङ्गवत् ॥ गुह्यके तु पुमान् ज्ञेय इति **विश्वः** ॥ (अथ पाठान्तरादि) शूलधारिणीत्यत्र सिंहवाहिनीति । नाभावित्यत्र नाभिमिति च क्वचित्पठ्यते ॥ २५ ॥

भूतनाथेति । भूतानां प्रमथानां नाथा स्वामिनी भूतनाथा शिवपत्नीत्वात् । सर्वप्राणिनामीश्वरी वा । भूतं प्राण्यतीते समे त्रिष्वित्य**मरः** । भूतनाथा नाम्नी देवी मे मेढ्रमुपस्थं रक्षेत् । मेघः ऐरावतगजो वाहनं यस्याः सा मेघवाहना । ऐरावतस्याभ्रमान्तर्गतत्वान्मघेपदेनैरावतगजो गृह्यते । अतएवेन्द्रस्य मेघवाहन इति संज्ञा । इयं कादम्बर्यपरनामधेया पूर्वदिग्देवता । कादम्बरी गजारूढेति अष्टदिग्देवतासु प्रथमाया उक्तत्वात् । मेघवाहनानाम्नीं देवी मे ऊरू सक्थिनी रक्षेत् । भगवती नाम्नी देवी मे कट्यां स्थितां सती कटिं रक्षेत् । एकवचनं जात्यभिप्रात्येण भगवतीपदार्थो **देवीभागवते** । उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ॥ अविद्याविद्ययोस्तत्त्वं वेत्तीति भगवत्यसौ ॥ इति ॥ उर्वोरनन्तरं कट्युक्तिश्छन्दोनुरोधात् ॥ विन्ध्ये तत्संज्ञका गिरौ निवसतीति विन्ध्यनिवासिनी । नन्दाख्या देवी । तदुक्तं **लक्ष्मीतन्त्रपाञ्चरात्रे** । वैवस्वतेऽन्तरे तौ च पुनः शुम्भनिशुम्भकौ ॥ उत्पत्स्येते वरोन्मत्तौ देवोपद्रवकारिणौ ॥ नन्दगोपकुले जाता यशोदागर्भसम्भवा ॥ नन्दाख्या नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ इति ॥ विन्ध्यनिवासिनीनाम्नी देवी मे जान्वोः ऊरुपर्वणोः व्यवस्थिता सती जानू रक्षेत् । जानुर्नलकीलोष्ठीवानिति **हेमचन्द्रा**ज्जानुशब्दस्य पुंस्त्वम् । जानूरुपर्वाष्ठीवदस्त्रियामित्य**मरकोशे** जान्वदित्रये अस्त्रियामिति पदस्यान्वयाच्च । (अथ पाठान्तरादि) मेघवाहनेत्यत्र महिषवाहनेति क्वचित्पठ्यते तदा महिषवाहनापदेन कराली नाम्नी दक्षिणदि-

कट्यां भगवती रक्षेज्जान्वोर्विन्ध्यनिवासिनी ॥ २६ ॥

जङ्घे महाबला पातु सर्वकामप्रदायिनी ॥
गुल्फयोर्नारसिंही च पादपृष्ठेऽमितद्युतिः ॥ २७ ॥

ग्देवता ग्राह्या । कराली महिषारूढेति दक्षिणदिग्देवतावर्णनात् ॥ जान्वोर्विन्ध्यनिवासिनीत्यत्र जानुनी विन्ध्यवासिनीति, जानुमध्ये विनायकीति वा क्वचित्पाठः ॥ २६ ॥

जङ्घे इति । सर्वान् कामान् प्रददातीति सर्वकामप्रदायिनी ॥ एतादृशी महाबला सर्वाधिकसामर्थ्या । महासैन्या वा देवता । चतुरङ्गबलेश्वरीति ललितासहस्रनामसूक्तत्वात् । तथा च सर्वकामप्रदायिनी महाबला नाम्नी देवी मे जङ्घे जान्वधोभागौ पातु । कण्ठादधोनरस्तदूर्ध्वं सिंहो नरसिंहो विष्णोरवतारविशेषस्तस्य शक्तिर्नारसिंही । इदमर्थेऽण् । नारसिंही नाम्नी देवी मे गुल्फयोर्व्यवस्थिता सती गुल्फौ पातु ॥ अमिता प्रमाणातीता द्युतिस्तेजो यस्याः सा अमितद्युतिः । न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निरिति श्रुतेः । अमितद्युतिनाम्नी देवी मे पादपृष्ठे पादयोरुपरितनौ भागौ पातु । पादपृष्ठे इत्यत्र प्रकृतिवद्भावाभावश्छान्दसः । जात्यभिप्रायेण सप्तम्येकवचनं वा । (अथ पाठान्तरादि) पात्वित्यत्र रक्षेदिति प्रोक्तेति वा । अमितद्युतिरित्यत्र घनद्युतिरिति, अमितौजसीति वा । समग्रचतुर्थपादस्थाने पादौ चामिततेजसीति वा क्वचित्पाठः । नाभौ च कामिनी रक्षेदित्याद्यर्धचतुष्टयस्थाने । नाभिं च कामिनी पातु कटिं कनकमेखला ॥ गुदं रक्षतु दुर्गन्धा मेढ्रं महिषवाहना ॥ जघनं जयशीला मे शक्तिः कुण्डलिनी परा ॥ त्रिकं भगवती रक्षेदूरू मे मेघवाहना ॥ रुद्राणी जानुनी पातु जङ्घयोश्च विनायकी ॥ ॥ इति सार्धश्लोकद्वयं क्वचित्पठ्यते ॥२७॥

पादाङ्गुलीः श्रीधरी च पादाधस्तलवासिनी ॥
नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ॥ २८ ॥
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥

पादाङ्गुलीरिति । श्रीधरस्य विष्णोः स्त्री श्रीधरी । पुंयोगे ङीप् । श्रीधरीनाम्नी देवी मे पादाङ्गुलीः पातु । तलवासिनी पातालवासिनी । तलवासिनी नाम्नी देवी मे पादाधः पादाधोभागयोः स्थिता सती पादाधोभागौ पातु । अधःशब्दोऽधिकरणशक्तिप्रधानमव्ययम् । दंष्ट्राभिः कराली भीषणा दंष्ट्राकराली । बव्हादित्वात् ङीष् । दंष्ट्राकराली नाम्नी देवी मे नखान् पादनखान् पातु । ऊर्ध्वा उच्छ्रिताः केशा यस्या इत्यूर्ध्वकेशिनी । न कर्मधारयान्मत्वर्थीय इति त्वनित्यम् । ऊर्ध्वकेशिनी नाम्नी देवी मे केशान् शिरोरुहान् पातु । दंष्ट्राकरालीति, ऊर्ध्वकेशिनीति च द्वे चामुण्डाया एव नामनी । एकादशाध्याये दंष्ट्राकरालवदने इति, शिखाबन्धनमन्त्रे ऊर्ध्वकेशीति च चामुण्डाया विशेषणत्वेन प्रयोगात् (अथ पाठान्तरादि) पादाङ्गुलीः श्रीधरी चेत्यत्र पादाङ्गुलीषु च श्रीर्मे इति ॥ दंष्ट्राकरालीत्यत्र दंष्ट्रा इति विसर्गान्तं, समग्रपादस्थाने दंष्ट्राः करालिनी रक्षेदिति च क्वचित् पाठः ॥ २८ ॥

रोमकूपेष्विति । कौबेरी कुबेरपत्नी । इदमर्थेऽण् । अणन्तत्वान् ङीप् । पूर्वमुत्तरदिग्भागरक्षत्वकत्वेनोक्तः कौबेरीशब्दः कुबेरशक्तिपरः । अत्र तु तत्पत्नीपर इत्यपौनरुक्त्यम् अथ वा एकस्या एव देवताया अनेकावयवरक्षणेऽपि न बाधः । उत्तरार्धे तथैव दर्शनात् । तेन वर्णानुपूर्व्या वाऽर्थतो वा पौनरुक्ते व्याख्यानान्तरप्रयत्नो नावश्यक इति ज्ञेयम् । शतसहस्रादिनियतसङ्ख्यानाम सङ्घातात्मकस्तोत्रेषु वर्णानुपूर्व्या नाम्नां पौनरुक्त्ये तेषां सङ्ख्यापूर्तये भेददर्शनार्थं तत्र व्याख्यानान्तराश्रयणं कर्तव्यमेव ॥ कौबेरी नाम्नी

रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ २९ ॥

देवी मे रोमकूपेषु रोमगर्तेषु व्यवस्थिता सती रोमकूपान् पातु ॥ गर्तोदपानयोः कूप इति **शाश्वतः** ॥ वागीश्वरी वाग्देवता । वागीश्वरी नाम्नी देवी मम त्वचं शारीरचर्माख्यं प्रथमं धातुं पातु ॥ उक्तं च **प्रपञ्चसारे** धातुसप्तकम् । त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः ॥ इति ॥ **वैद्यके** तु त्वक्स्थाने रस उक्तः । रसोऽन्नसारः । तस्य च त्वगाश्रयत्वादुभयोरविरोधः ॥ पार्वती हिमालयपुत्री । तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहावेति **कालिदासः** । पर्वतशब्दादिदमर्थेऽण् । अणन्तत्वान् ङीप् । नत्वितो मनुष्यजातेरितीञन्तान् ङीप् । पार्वत्या देवतात्वात् । पार्वतीनाम्नी देवी मे रक्तादिचतुष्टयम्, अस्थ्यादिद्वयं च पातु अस्थ्नां बहुत्वादस्थिमेदांसीति बहुवचनान्तः प्रयोगः । समासद्वयेप्येकत्वाभावच्छान्दसः । रक्तं द्वितीयो धातुः । मज्जास्थ्यन्तर्गतो द्रवरूपः षष्ठो धातुः । यद्यप्य**मरसिंहेन** सारो मज्जा नरीति मज्जाशब्दो नान्तः पुंस्युक्तस्तथापि मज्जाख्यातः स्मृता मज्जेति **द्विरूपकोशात्** । अत्र स्त्रीत्वमाबन्तत्वं च ज्ञेयम् । वसा मांसस्नेहः । अयमुपधातुः । उपधातवः **शार्ङ्गधरेणोक्ताः** । स्तन्यं रजो वसा स्वेदो दन्ताः केशास्तथैव च ॥ ओजश्च सप्तधातूनां क्रमात्सप्तोपधातवः ॥ इति ॥ अन्यत्रैते सप्तधातूनां मलत्वेनोक्ताः । मांसं तृतीयो धातुः । अस्थीनि पञ्चमो धातुः । मेदो मांसजन्यश्चतुर्थो धातुः । यद्यपि **नाम लिङ्गानुशासने** मेदस्तु वपा वसेति मेदोवसयोरेकार्थत्वमुक्तं तथापि **वैद्यनेत्रे** यन्मांसं स्वाग्निना पक्वं तन्मेद इति कथ्यते ॥ पच्यमानस्य मांसस्य स्नेहस्तु गदिता वसेति द्वयोर्भेदात्र पृथगुक्तिः ॥ (अथ पाठान्तरादि) रोमकूपेष्वित्यत्र रोमकूपाणीति, मज्जाशब्दो नान्तश्च क्वचित्पठ्यते ॥ २९ ॥

अन्त्राणीति । कालरात्रिपदं प्राग्व्याख्यातम् । कालरात्रिनाम्नी देवी

अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥ ३० ॥

मे अन्त्राणि कोष्ठगतान्याहारनिगरणोद्गिरणादिसाधनानि मांसमयनलकानि पातु । मुकुटस्य किरीटस्य तदुपलक्षितसाम्राज्यस्येत्यर्थः । ईश्वरी मुकुटेश्वरी महासाम्राज्यशालिनीति **ललितासहस्रनामसूक्तत्वात्** । इयं माकोटस्थानस्था । माकोटे मुकुटेश्वरीति **देवीभागवतात्** । मुकुटेश्वरी नाम्नी देवी मे पित्तं दोषत्रये द्वितीयं दोषं पातु । पद्मस्य तन्नाम्नो राज्ञः अवती रक्षित्री पद्मावती । उक्तं च **पाद्मे** हत्त्वा वृकासुरं पद्मराजानमवति स्म या ॥ पद्मावतीति नाम्नासौ पृथिव्यां प्रथिताभवत् ॥ इति ॥ अवतीति शत्रन्तं । न लोपः पृषोदरादित्वात् । न लोकेति निषेधेऽपि समासश्छान्दसः । पद्मं हृदयपद्मं कोश आवरकं यस्य स पद्मकोशो वातः । दोषत्रये प्रथमः ॥ यद्यपि **वैद्यतंत्रे** पक्वाशयकटीसक्थिस्रोतोस्थिस्पर्शनेन्द्रियम् ॥ स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥ इत्यत्र हृदयं वातस्थानत्वेन नोक्तम् । तथापि हृदयादिभ्रूमध्यान्तं वृत्तं षड्बिन्दुलाञ्छितम् । यं बीजयुक्तं धूम्राभं मरुतो मण्डलं स्मरेत् ॥ इति योगशास्त्रवचनाद्वातस्य हृदयपद्मस्थितत्वोक्तिर्न विरुद्धा । किं च प्राक्पित्तस्याग्रे कफस्य चोक्तेर्मध्यस्थस्य पद्मकोशपदस्य वातार्थकत्वमेवोचितम् । पद्मावती नाम्नी देवी मे पद्मकोशे वाते व्यवस्थिता सती तं पातु । चूडायां केशपाशे मणिः रत्नं यस्याः सा चूडामणिः इयं रक्तासुरहन्त्री । चूडामणिनाम्नी देवी मे कफे तृतीयदोषे व्यवस्थिता सती तं पातु । दोषाणां रक्षणं च न्यूनाधिकभावतः । तस्य रोगहेतुत्वात् । उक्तं च ॥ रोगस्तु दोषवैषम्यं दोषसाम्यमरोगितेति । साम्यं स्वप्रमाणस्थितिः ॥ ३० ॥

ज्वालामुखीति । ज्वाला एव मुखं हविर्भक्षणसाधनं यस्य स ज्वाला-

ज्वालामुखी स्नसाजालमभेद्या सर्वसन्धिषु ॥
शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा ॥३१॥

मुखोऽग्निः । तस्य स्त्री ज्वालामुखी । पुंयोगे ङीष् । अथवा ज्वालामुखी स्थलविशेषेषु सदा ज्वलद्वन्हिज्वाला सन्ततिरूपा देवता । तथा च ज्वालामुखी नाम्नी देवी मे स्नसाजालं नवशतस्नायुसमूहं पातु । वस्नसा तु स्नसा स्नायुरिति **हैमः** । शतानि नव जायन्ते शरीरे स्नायवो नृणामिति **भावप्रकाशश्च** । अभेद्या भेत्तुमशक्या । भिदिर्विदारणे । परस्परमविश्लेष एव सर्वसंधीनां रक्षणं । तच्चाभेद्याच्छेद्यदेवतयैव कर्तुं शक्यमत उक्तमभेद्या सर्वसन्धिष्विति । अभेद्यानाम्नी देवी मे सर्वसन्धिषु व्यवस्थिता सती सर्वसन्धीन् पातु । ब्रह्मणः पत्नी ब्रह्माणी । आनुगाममश्छान्दसः । अथवा ब्रह्म वेदं अणति पठतीति ब्रह्माणो ब्रह्मा । कर्मण्यण् । तस्य स्त्री ब्रह्माणी । यद्वा ब्रह्माणमानयति जीवयतीति ब्रह्माणी । अन्प्राणने । णिच् कर्मण्यण् ङीप् । भर्त्तुर्भार्यापतिः पत्न्याः परमं जीवनं मतमिति **स्मरणात्** ब्रह्माण्या ब्रह्मणो जीवयितृत्वम् । ब्रह्माणी नाम्नी देवी मे शुक्रं रेतःसंज्ञकं चरमं धातुं रक्षेत् । पञ्चमाक्षरस्य गुरुत्वं छान्दसम् । छत्रस्य तदात्मकसार्वभौमत्वचिन्हस्येश्वरी स्वामिनी । सर्व जगत्स्वामिनीत्यर्थः । छत्रेश्वरी नाम्नी देवी मे छायां शरीरकान्ति रक्षेत् । अथवा छत्रेश्वरी छत्रधारिणी देवी मे छायां अनातपे रक्षेत् । सर्वदा ममोपरिच्छायां कुर्यादित्यर्थः । छायाकरणस्य छत्रधारिण्याः कार्यत्वात्तथोक्तम् ॥ छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ॥ **इत्यमरः** ॥ (अथ पाठान्तरादि) स्नसाजालमित्यत्र नसाजालमिति क्वचित्पाठः । तत्पक्षे आदिसकारलोपश्छान्दसः । अर्थः प्राग्वत् । अथवा नसाया नासिकाया जालं पुटद्वयविभाजकश्चर्ममयोऽवयवविशेषस्तं, नसा नासा च नासिकेति **हैमः** । नखज्वाला इति पाठे नखतेजांसीति तदर्थः । शुक्रमित्यत्र शुक्लमिति क्वचि-

अहङ्कारं मनोबुद्धिं रक्षेन्मे धर्मचारिणी ॥
प्राणापानौ तथा व्यानमुदानं च समानकम् ॥ ३२ ॥
रसं रूपं च गन्धं च शब्दं स्पर्शं च योगिनी ॥

त्पाठः । अर्थः समानः । ब्रह्माणीति सम्बुध्यन्तं केचित्पठन्ति तद्विषये प्रागुक्तम् ॥ ३१ ॥

अहङ्कारमिति । धर्मं चरति तच्छीला धर्मचारिणी । धर्मपदनिरुक्तिर्मात्स्ये । धरित्येवं धृञोधातोर्मो महत्त्वे निगद्यते ॥ धारणेन महत्त्वेन धर्म एव निरुच्यते ॥ इति ॥ धारणाद्धर्म इत्याहुरित्यन्यत्र । धारणं समाजव्यवस्थापनम् । धर्मचारिणी नाम्नी देवी मे अहङ्कारादित्रयं प्राणादिपञ्चकं च रक्षेत् । तत्राहङ्कारोऽहमित्याकारान्तःकरणवृत्तिः । मनःसङ्कल्पविकल्पात्मिका तद्वृत्तिः । बुद्धिर्निश्चयात्मिका तद्वृत्तिः । प्राणःश्वासोच्छ्वासादिकृत् हृदयस्थो वायुः । अपानो मलमूत्रादिप्रवर्तको गुदस्थो वायुः । व्यानो देहेऽन्नरसादिसञ्चारकोऽखिलशरीरसञ्चारी वायुः । उदानो वचनादिप्रवर्तकः कण्ठस्थो वायुः । समानो जाठराग्निवृद्ध्यादिकृन्नाभिस्थो वायुः । एते प्राणादिशब्दास्तत्तदर्थविशेषद्योतकप्राद्युपसर्गपूर्वादनितेर्नयतेर्वा व्युत्पन्नाः ॥ (अथ पाठान्तरादि) धर्मचारिणीत्यत्र ब्रह्मचारिणीति वा, धर्मधारिणीति वा, व्यानमुदानं च समानकमित्यत्र व्यानसमानोदानमेव चेति च क्वचित्पठ्यते । क्वचिदेतदुत्तरं वज्रहस्ता च मे रक्षेत् प्राणं कल्याणशोभनेत्यर्थमधिकं च पठ्यते ॥ ३२ ॥

रसमिति योगश्चित्तवृत्तिनिरोधः । जीवात्मपरमात्मनोरैक्यभावनौ वा । उक्तं च विष्णुपुराणे । ज्ञानेन्द्रियाणि सर्वाणि निगृह्य मनसा सह ॥ एकत्वभावनायोगो जीवात्मपरमात्मनोः ॥ इति ॥ तद्वती योगिनी । इयं योगेश्वरीति च प्रसिद्धा । रसो रसनेन्द्रियग्राह्यो गुणः । रूपं चक्षुरिन्द्रिय-

सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥ ३३ ॥
आयुर्मेऽवतु वाराही धर्मं रक्षतु वैष्णवी

ग्राह्यो गुणः । गन्धो घ्राणेन्द्रियग्राह्यः ॥ शब्दः श्रोत्रेन्द्रियग्राह्यः । स्पर्शस्त्वगिन्द्रियग्राह्यः । योगिनी नाम्नी देवी मे रसादिपञ्चकं रक्षेत् । नराणां समूहो नारम् । तस्य समूह इत्यण् । नारं अयनमाश्रयो यस्य स नारायणः सर्वान्तर्यामी परमात्मेत्यर्थः । एको देवः सर्वभूतेषु गूढ इति श्रुतेः । उक्तं च **स्मृत्यन्तरे** । नारायणां समवायस्तु नारमित्यभिधीयते ॥ अयनं तद्यतस्तस्य तेन नारायणः स्मृतः ॥ इति तस्य शक्तिर्नारायणी, अर्थान्तराण्यप्येकादशाध्याये दर्शयिष्यन्ते इयं सुपार्श्वस्था ॥ नारायणी सुपार्श्वे तु इति **पाद्मात्** ॥ सत्त्वादिगुणानां स्वरूपं तेषां कार्यं चोक्तं भगवता **श्रीकृष्णेन** सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ॥ निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ॥ सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ॥ तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ सत्त्वं सुखे सञ्जयति रजःकर्मणि भारत ॥ ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ इति ॥ नारायणी नाम्नी देवी मे सत्त्वादिगुणत्रयं रक्षेत् ॥ ननु तमसोऽनर्थकारित्वात्कुतस्तद्रक्षणमिष्यते इति चेन्न । तस्य निद्राजनकत्वेन सुखस्यापि हेतुत्वात् ॥ (अथ पाठान्तरादि) रसादिपञ्चकं सप्तम्यन्तत्वेन क्वचित्पठ्यते क्वचित्त्वयं श्लोक एव न पठ्यते ॥३३॥

आयुरिति वाराही वराहशक्तिः । वाराही नाम्नी देवी मे आयुः शतवार्षिकीं जीवनकालमर्यादां अवतु पालयतु । नानानिमित्तैर्जायमानमायुःक्षयं

यशः कीर्तिं च लक्ष्मीं च सदा रक्षन्तु मातरः ॥३४॥
गोत्रमिन्द्राणी मे रक्षेत् पशून्मेऽवतु चण्डिका ॥
पुत्रान्रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥ ३५ ॥

प्रतिबध्नात्वित्यर्थः । वेवेष्टि व्याप्नोतीति विष्णुःपरमात्मा । तस्य शक्तिर्वैष्णवी । वैष्णवी नाम्नी देवी मे धर्मं वर्णाश्रमाचारं । आचारः प्रथमो धर्म इति स्मृतेः । रक्षतु मया सम्यगनुष्ठापयत्वित्यर्थः । मातरः प्रेतसंस्था तु चामुण्डा इत्यादिना पूर्वमुक्ताः मातृसंज्ञाः सप्त देव्यः समुच्चिताः, यशःशौर्यादिप्रभवां प्रसिद्धिं कीर्तिं दानादिप्रसिद्धिं च । दानादिप्रभवा कीर्तिः शौर्यादिप्रभवं यशः ॥ इति **हैमपरिशिष्टम्** ॥ लक्ष्मीं सम्पदं च सदा रक्षन्तु ॥ (अथ पाठान्तरादि) आयुर्मेऽवतु वाराहीत्यत्र आयुर्मे रक्ष वाराहि इति ॥ रक्षन्तु मातर इत्यत्र रक्षतु चक्रिणीति च क्वचित्पठ्यते । क्वचित्तु पूर्वार्धमेव न पठ्यते ॥ ३४ ॥

गोत्रमिति । इन्द्राणीन्द्रभार्या शची मे गोत्रं कुलं रक्षेत् । सन्ततिर्गोत्रजननकुलानीत्य**मरः** । पञ्चमाक्षरस्य गुरुत्वं छान्दसम् ॥ चण्डिकानाम्नी देवी मे पशून् गोमहिष्यादीनवतु रक्षतु । चण्डिकापदं प्राग्व्याख्यातम् महालक्ष्मी नाम्नी देवी मे पुत्रान् रक्षेत् । महालक्ष्मीपदनिरुक्ति**र्मरालतन्त्रे** । महालनामकं दैत्यं स्यति क्षपयतीति च ॥ महालसा महालक्ष्मीरिति च ख्यातिमागता ॥ उपत्यकायां सह्याद्रेः पश्चिमोदधिरोधसि ॥ इति ॥ महालक्ष्मीशब्द उपोद्घाते परब्रह्मरूपादिशक्तिपरत्वेन व्याख्यातः ॥ भैरवी भीषणस्वरूपा चतुःषष्टिभैरवाणां शक्तिर्वा । इयं भैरवक्षेत्रस्था । भैरवाख्यं तु भैरवीति **देवीभागवतात्** । भैरवीनाम्नी देवी मे भार्यां रक्षतु ॥ (अथ पाठान्तरादि) इन्द्राणीपदं सबुध्यन्तं क्वचित्पठ्यते । अवतु चण्डिकेत्यत्र रक्ष चण्डिके इति च ॥ ३५ ॥

धनेश्वरी धनं रक्षेत् कुमारीकन्यकास्तथा ॥
मार्गं क्षेमकरी रक्षेद्विजया सर्वतः स्थिता ॥ ३६ ॥

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन च ॥
तत्सर्वं पातु मे देवी जयन्ती पापनाशनी ॥ ३७ ॥

धनेश्वरीति । अपरिमितधनस्वामिनी धनेश्वरी । धनेश्वरस्य कुबेरस्य पत्नी वा । धनेश्वरी नाम्नी देवी मे धनमर्थसञ्चयं रक्षेत् । कुत्सितान् दैत्यान् मारयतीति कुमारी। कुमारस्य कार्तिकेयस्य शक्तिर्वा कुमारी । सदा कौमारावस्थास्थितत्वाद्वा कुमारी कुमारी नाम्नी देवी मे कन्यकाः पुत्रीः रक्षेत् ॥ क्षेमकरी सर्वजगत्कल्याणकर्त्री करोतेः पचाद्यचि षष्ठीसमासः । बह्वादित्वान् ङीष् । क्षेमप्रियेति कर्मण्यणि खचि वा, क्षेमकारी क्षेमं करोति च स्यात् ॥ क्षेमकरी नाम्नी देवी मे मार्गं रक्षेत् । मार्गे मां रक्षेदित्यर्थः । सर्वतः सर्वत्रस्थिता विजया तन्नाम्नी देवी सर्वतः सर्वत्र मां रक्षेत् ॥ (अथ पाठान्तरादि । (कुमारीत्यत्र कौमारीति क्वचित्पाठः । क्वचित्त्विदमर्धमेव न पठ्यते । अन्यत्रैतच्छलोकोत्तरम् राजद्वारे महालक्ष्मीः सङ्ग्रामे जयवर्धिनी ॥ पातु मे सर्वगात्राणि दुर्गा दुर्गार्तिहारिणीत्येकोऽधिकः श्लोकश्च पठ्यते ॥ ३६ ॥

रक्षाहीनमिति। यत् यद्यदित्यर्थः । अग्रे तत्सर्वमित्युक्त्यात्र वीप्साया गम्यमानत्वात् । मे स्थानं रक्षणीयमवयवादिवस्तुजातं । कवचेन प्राच्यां रक्षतु मामैन्द्रीत्यादिरक्षाकरमन्त्रवाक्येन । वर्जितं परिहृतं अतएव रक्षाहीनं असञ्जातरक्षणमस्ति । तत्सर्वं, पापं नाशयतीति पापनाशनी जयन्ती । तन्नाम्नी देवी । पातु । इयं हास्तिनपुरास्थिता ॥ जयन्ती हास्तिनपुरे इति **देवीभागवतात्** ॥ (अथ पाठान्तरादि) क्वचित् पात्वित्यत्र रक्षेति मध्यमपुरुषान्तं पठित्वा देवीत्यादिपदत्रयं सम्बुध्यन्तं पठ्यते ॥ ३७ ॥

इदं रहस्यं विप्रर्षे भक्त्या तव मयोदितम् ॥
सर्वरक्षाकरं पुण्यं कवचं कामदं नृणाम् ॥ ३८ ॥

देव्यास्तु कवचेनानेनारक्षिततनुः पुमान् ॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥ ३९ ॥

कवचेनावृतो नित्यं यत्र यत्र हि गच्छति ॥

अथ यद्गुह्यं परममिति मार्कण्डेयमुनिप्रश्नात् अस्ति गुह्यतमं विप्रेत्युपक्रान्तं देवीकवचमुपसंहरति ब्रह्मा । इदं रहस्यमिति । हे विप्रर्षे मार्कण्डेय । क्षत्रियादिष्वपि ऋषीणां सत्त्वाद्विप्रर्षे इत्युक्तिः । इदं रहस्यं गुह्यं । सर्वरक्षाकरं सर्वेभ्यः सकाशाद्रक्षणकारकं पुण्यं पवित्रं नृणां जपतां कामदं मनोरथपूरकं कवचं भक्त्या त्वदीयया हेतुभूतया तव मयोदितमुक्तम् । (अथ पाठान्तरादि) इमं श्लोकं कतिचिन्न पठन्ति ॥ ३८ ॥

इत आरभ्य कवचपाठस्य फलं कथयन्नादौ कवचेनाकृतस्वशरीररक्षणस्यान्यत्र गमनं निषेधति । देव्यास्त्विति । यदि अन्यत्र गमिष्यन् कश्चित् पुमान् पुरुषः मार्गादावात्मनः शुभमिच्छेत् । तदा सोऽनेन पूर्वोक्तेन कवचेन अरक्षिततनुः अकृतशरीररक्षः एकं पदमपि न गच्छेत् ॥ (अथ पाठान्तरादि) यदीत्यत्र यदि ह्रस्वं, शुभमित्यत्र सिद्धिमिति च क्वचित् पठ्यते क्वचित्तु पूर्वार्धमेव न पठ्यते तदयुक्तम् । केवलोत्तरार्धस्यापूर्णवाक्यत्वात् ॥ एतच्छ्लोकान्तरं तस्मात्सर्वप्रयत्नेन कवची भव सर्वदेत्यर्धमधिकं केचित्पठन्ति ॥ ३९ ॥

अथ कवचेन कृतशरीररक्षणस्य गमने फलमाह कवचेनेति । नित्यं कवचेनावृतः कृतावरणः कवचग्रन्थपठनेन कृतशरीररक्षइत्यर्थः । लोके कवचस्य शरीरावरकत्वादस्य स्तोत्रस्य च कवचशब्दवाच्यत्वात्कवचेनावृत

तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ॥ ४० ॥

यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥ ४१ ॥

इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥

इत्युक्तम् । यत्र यत्र हि गच्छति । तत्र तत्र अर्थलाभो धनप्राप्तिः कार्यसिद्धिर्वा भवेत् । (अथ पाठान्तरादि) नित्यमित्यत्र भूय इति । हि गच्छतीत्यत्राधिगच्छतीति, अधितिष्ठतीति वा । तत्र तत्रार्थलाभश्चेत्यत्र तत्रार्थलाभः पुण्यं चेति । सार्वकामिक इत्यत्र सार्वकालिक इति च क्वचित्पठ्यते ॥ ४० ॥

यं यमिति । कवचेनावृतः पुमान् । काम्यते इष्यते इति कामः इष्टवस्तु । यं यं कामं यद्यदिष्टं वस्तु चिन्तयते स्मरति । इच्छाविषयीकुरुते इत्यर्थः । तं तं कामं तत्तदिष्टवस्तु निश्चितं निश्चयेन । क्रियाविशेषणमेतत् । प्राप्नोति लिप्स्यमानसिद्धौ चेति लट् । तथा भूतले परमुत्कृष्टं । अतुलमपरिमितं ऐश्वर्यं प्राप्स्यते । आत्मनेपदं छान्दसम् । (अथ पाठान्तरादि) प्राप्नोति निश्चितमित्यत्र प्राप्नोत्यसंशयमिति, प्राप्स्यते भूतले पुमानित्यत्र प्राप्नोति विपुलं धनमिति, समग्रपूर्वार्धस्थाने यद्यत् कामयते नित्यं तत्तद्भवति निश्चितमिति च क्वचित्पठ्यते । क्वचित्सर्वान्कामानवाप्नोति सर्वत्र विजयीभवेत्यर्धमधिकं च पठ्यते ॥

इदमिति । यः पुमान् श्रद्धया फलावश्यंभावनिश्चयेनान्वितः प्रयतः शुचिश्च सन् । पवित्रः प्रयतः पूत **इत्यमरः** । देवानामपि दुर्लभं दुष्प्रापम् । गुह्यतमत्वादिति भावः । इदं देव्याः कवचं तु नित्यं प्रतिदिनं ।

यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥४२॥
दैवी कला भवेत्तस्य त्रैलोक्ये चापराजितः ॥
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ ४३ ॥
नश्यन्ति व्याधयः सर्वे लूता विस्फोटकादयः ॥

त्रिसन्ध्यं तिसृषु सन्ध्यासु प्रातर्मध्याह्नसायाह्नकालेष्वित्यर्थः । पठेत् । उत्तरश्लोकेन पूर्णान्वयः । (अथ पाठान्तरादि) यः पठेत्प्रयत इत्यत्र य एतत् पठते इति, क्वचित् पठ्यते ॥ ४२ ॥

दैवीति । तस्य तस्मिन् कवचपाठकपुरुषे । शेषे षष्ठी । देवानामियं दैवी कला अंशः । कला स्यादंशशिल्पयोरिति हैमः । भवेत् सङ्क्रामेदित्यर्थः । किं च स त्रैलोक्ये अपराजितः । अपमृत्युविवर्जितः आगन्तुमृत्युरहितश्च सन् । महामृत्योरपारिहार्यत्वादिति भावः । उक्तं च । एकोत्तरशतं मृत्यूनथर्वाणः प्रचक्षते ॥ तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः ॥ यथा सत्यपि तैलादौ दीपं निर्वापयेन्मरुत् ॥ एवं सत्यपि चायुष्ये हिंसन्त्यागन्तुमृत्यवः ॥ संसर्गदेवताकोपस्वप्रमादभवास्त्विमे ॥ शाम्यन्ति मणिमन्त्राद्यैर्भेषजप्रक्रियादिभिः ॥ कालमृत्युस्तु केनापि नोपायेन प्रशाम्यति ॥ इति ॥ **लिङ्गपुराणे** कार्तिकेयं प्रति शिवोक्तिश्च ममायुर्ग्रसते कालः कुतस्तत्र रसायनम् ॥ मणिमन्त्रादिकं चापि न स वार्यः कथंचन ॥ इति ॥ साग्रं विंशत्यधिकं वर्षशतं जीवेत् । उक्तं च । विंशत्युत्तरकं पुंसां शतमायुः प्रकीर्तितम् ॥ इति ॥ (अथ पाठान्तरादि) त्रैलोक्येष्विति बहुवचनान्तं क्वचित् पठ्यते तन्न साधु ॥ ४३ ॥

नश्यन्तीति । लूताः शुष्कपामाः । विस्फोटका आर्द्रपामाः । लूता पामाविशेषे स्यात् इति **हैमः** । विस्फोटकशब्देन मसूरिका वा । तदादयः सर्वे व्याधयो

स्थावरं जङ्गमं चापि कृत्रिमं चापि यद्विषम्
आभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ॥
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥ ४५ ॥
सहजाः कुलजा माला शाकिनीडाकिनी तथा ॥
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥ ४६ ॥

रोगा नश्यन्ति । स्थावरं शिलावृक्षादिजन्यं मल्लवत्सनाभादि । जङ्गमं सर्पवृश्चिकजन्यम् । कृत्रिमं कृत्यानिर्वृत्तं पदार्थसंयोगादिजम् । क्षीरं कुलत्थैः पनसेन मत्स्यैस्तक्रं दधिक्षौद्रघृते समांशे इत्यादि वैद्यशास्त्रोक्तम् । एवं त्रिविधं यद्विषं तदपि नश्यति (अथ पाठान्तरादि) चकारद्वयस्थाने वाकारद्वयं क्वचित् पठ्यते ॥ ४४ ॥

आभिचाराणीति । भूतले आभिचाराणि अभिचारार्थं परैः प्रयुक्तानि सर्वाणि मन्त्रयन्त्राणि च नश्यन्ति । भूचराः स्थलचारिणः । खेचराः आकाशचारिणः । तत्पुरुषे कृतीति सप्तम्या अक् । जलजा जलचारिणश्च औपदेशिकाः । उपदेशेन एकस्य प्रेरणयान्यस्य नाशाय प्रवर्तमानाः । विशेषकेणान्वयः॥४५॥

सहजा इति ॥ सहजाः कवचपाठकस्य जन्मना सहजाताः । कुलजाः तस्यैव कुलपरम्परया आगताः । तथा माला शाकिनीडाकिन्यादयश्च दुष्टदेवताजातिविशेषाः । उपलक्षणमेतद्राकिणीलाकिनीहाकिनीयक्षिण्यादीनाम् ॥ ग्रहाःपूतनादयो बालग्रहाः दुष्टस्थानास्थिताः शनैश्चरादयो वा ॥ भूतादयो राक्षसान्ता देवयोनिविशेषाः । उक्तं **चामरसिंहेन** । विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नरा ः । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥ इति ॥ तत्र भूता रुद्रानुचराः । पिशाचाः पिशिताशाः । यक्षाः कुबेरजातीयास्तत्सेवकाः । गन्धर्वा देवगायनाः । राक्षसा लङ्कावासिनः ॥ (अथ पाठान्तरादि) पूर्वार्धोत्तरं अन्तरिक्षचरा घोरा यक्षिण्यश्च महाबला इत्यर्धमाधिकं क्वचित्पठ्यते ॥ ४६ ॥

ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ ४७ ॥

मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिः परा भवेत् ॥
यशसा वर्धते सोपि कीर्तिमण्डितभूतले ॥ ४८ ॥

ब्रह्मराक्षसेति । ब्रह्मराक्षसाः राक्षसजात्यन्तर्गता ब्राह्मणा राक्षसत्वं प्राप्ता ब्राह्मणा वा । वेतालाः पिशाचराजाः । कूष्माण्डाः प्रथमाविशेषाः । भैरवाः क्रूरास्तामसदेवताजातिविशेषाः । ते च चतुष्षष्टिः । आदिना चतुष्षष्टियोगिन्यश्च । एते सर्वे कवचे तदाख्येऽस्मिन्स्तोत्रे हृदि स्थिते स्मृतिविषये सतीत्यर्थः । तस्य हृदि स्थितकवचस्य पुरुषस्य दर्शनात् तन्दृष्ट्वेत्यर्थः । नश्यन्ति अदृश्या भवन्ति पलायन्ते इत्यर्थः । (अथ पाठान्तरादि) कूष्माण्डशब्दस्तालव्यगर्भः क्वचित्पठ्यते । चतुर्थपादस्थाने कवचेनावृतस्तु यः इति च ॥ ४७ ॥

अथ राजा कवचं पठति चेत्फलमाह मानोन्नतिरिति । राज्ञः कवचपाठकस्य मानोन्नतिरुत्कर्षातिशयो भवेत् । परा अतिशयिता तेजसः प्रभावस्य बलस्य वा वृद्धिर्भवेत् । तेजःप्रभावे दीप्तौ च बले शुक्रे विदृश्यते इत्यमरः । स राजा कीर्त्या मण्डिते शोभिते भूतले यशसापि वर्धते । दानादिप्रभवा कीर्तिः शौर्यादिप्रभवं यश इति कीर्तियशसोर्भेदः । केचिद्राज्ञ इति पञ्चम्यन्तं मत्वा राज्ञः सकाशात् कवचपाठकस्य मानोन्नतिः सत्कारातिशयोः परा तेजोवृद्धिश्च भवेदिति योजयन्ति ॥ (अथ पाठान्तरादि) द्वितीयपादस्थाने तेजोवृद्धिकरं परमिति केचित्पठान्ति । क्वचित् य इदं कवचं धृत्वा सङ्ग्रामं प्रविशेन्नरः ॥ जित्वा च स रिपून्सर्वान् कल्याणी गृहमाप्नुयादित्यधिकश्लोकः पठ्यते ॥ ४८ ॥

अथ देवीकवचस्य सप्तशतीपाठाङ्गत्वं विधत्ते जपेदिति श्लोकेन ।

जपेच्चण्डीसप्तशतीं कृत्वा तु कवचं पुरा ॥
निर्विघ्नेन भवेत्सिद्धिश्चण्डीजपसमुद्भवा ॥ ४९ ॥

यावद् भूमण्डलं धत्ते सशैलवनकाननम् ॥
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥५०॥

कवचं पुरा कृत्वा पूर्वं पठित्वेत्यर्थः । चण्डीसप्तशतीं चण्ड्याः सप्तशतीस्तवं जपेत् । एवं कृते चण्डीजपसमुद्भवा सिद्धिः सप्तशतीपाठजन्यं फलम् । अत्र चण्डीशब्दः सप्तशतीपरः । निर्विघ्नेन विघ्नं विना भवेत् । इति वाक्यभेदेनान्वयः । अर्धद्वये क्रमेण यस्तस्येत्यध्याहारे एकवाक्यत्वेनापि स्यात् । निर्विघ्नेनेत्यत्र विघ्नानामभावो निर्विघ्नमित्यव्ययीभावः । तृतीयासप्तम्योर्बहुलमिति विकल्पादम्भावो न । (अथ पाठान्तरादि) चण्डीसप्तशतीमित्यत्र सप्तशतीं चण्डीमिति, कृत्वा तु कवचं पुरेत्यत्र कृत्वा कवचमग्रत इति च क्वचित्पठ्यते । क्वचित् द्वितीयार्धं न पठ्यते तदयुक्तम् । फलश्रवणं विना कर्तुः क्रियायां प्रवृत्यसम्भवात् ॥ ४९ ॥

अथ सदा कवचपाठपूर्वकसप्तशतीपाठकर्तुरसाधारणं फलद्वयमाह यावदितिश्लोकद्वयेन । यावत् यत्कालपर्यन्तम् । शैलाः पर्वताः वनं जलम् । वने सलिलकानने इत्यमरः । काननानि विपिनानि । तैः सहितं भूमण्डलम् कर्तृ । धत्ते आत्मानं धारयति स्वरूपेणावतिष्ठतीत्यर्थः । तावत्प्रलयकालपर्यन्तमित्यर्थः । अथवा शेषः यावद्भूमण्डलं धत्ते इति योज्यम् । तावत् तत्कालपर्यन्तं मेदिन्यां भूमौ सदा कवचपाठपूर्वकसप्तशतीपाठकर्तुः पुत्रपौत्राः सन्त्यस्यामिति पुत्रपौत्रिकी । पुत्रपौत्रपदं तदादिपरम् तेन पुत्रपौत्रादिमतीत्यर्थः । मत्वर्थीयठन्प्रत्ययः । पिप्पल्यादेराकृतिगणत्वान् ङीष् । सन्ततिर्वंशस्तिष्ठति स्थिरा स्यादित्यर्थः । (अथ पाठान्तरादि) यावद्भूमण्डलं धत्ते इत्यर्धस्थाने यावत्कूर्मो धरां धत्ते सशैलवनकाननामित्यर्धं क्वचित्पठ्यते ॥ ५० ॥

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥ ५१ ॥

इति देवीकवचम् ।

अथार्गलास्तोत्रम् ।

अर्गलास्तोत्रस्य विष्णुर्ऋषिः । अनुष्टुप्छन्दः । सर्वशक्तिसमष्टिभूता आदिशक्तिर्महालक्ष्मीर्देवता । देवीमाहात्म्यजपपूर्वाङ्गत्वेन जपे विनियोगः ॥

देहान्ते इति । सदा कवचपाठपूर्वकसप्तशतीपाठकर्ता पुरुषः । देहान्ते मरणानन्तरम् । यत् सुरैर्देवैरपिदुर्लभं दुष्प्रापम् । नित्यं शाश्वतं । परमं सर्वोत्तमम् । स्थानं शिवलोकरूपमस्ति । तदिति शेषः । महामायायाः परमेश्वर्याः प्रसादतः कृपया प्राप्नोति गच्छति महामायापदं प्राग्व्याख्यातम् । (अथ पाठान्तरादि) इत उत्तरं शिवेन च समो भूत्वा यावदाभूतसम्प्लवम् ॥ तत्र तिष्ठति भक्तो हि पुनश्चागमनं न हि ॥ कवचं हृदये यस्य सवज्रकवचः खलु ॥ ब्रह्मणा रचितं पूर्वमिति निश्चित्य चेतसा ॥ इदं तु देव्याः कवचपुस्तकं लिखितं गृहे ॥ यस्य तिष्ठत्यसौ पूज्यो भवेद्भीतिविवर्जितः ॥ इति श्लोकत्रयं क्वचित् पठ्यते ॥ ५१ ॥

इतीति । (अथ पाठान्तरादि) क्वचित्समाप्तौ **मार्कण्डेयपुराणे** अथवा **वाराहपुराणे** । इति पठित्वा हरिहरब्रह्मविरचितं देव्याः कवचमिति पठ्यते ॥

॥ इति श्रीचण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
देवीकवचव्याख्या ॥

अर्गलेति । वस्तुतः कपाटोद्घाटनप्रतिबन्धकविष्कम्भवाचकोप्यर्गलाशब्दोऽत्र प्रतिबन्धकत्वसामान्याल्लक्षणया सप्तशतीपाठफलप्रतिबन्धकभार्गवरामादिशापपरः । ततस्तदुत्तरपदत्वेन प्रयुक्तस्योद्धारकपदस्य विनापि प्रत्ययं

ॐ मार्कण्डेय उवाच ।

जयन्ती मङ्गला काली भद्रकाली कपालिनी ॥
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥१॥

पूर्वोत्तरपदलोपो वाच्य इति वार्तिकेन लोपेऽवशिष्टोऽर्गलाशब्दः सप्तशतीपाठफलप्रतिबन्धकोद्धारकग्रन्थपर इति ज्ञेयम् ॥

अस्य स्तोत्रस्य विष्णुकृतत्वेपि मार्कण्डेय उवाचेत्युक्तिर्मार्कण्डेयस्य तदनुवादकत्वादिति ज्ञेयम् । (अथ पाठान्तरादि) मार्कण्डेय उवाचेत्यस्यानन्तरं, जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि ॥ जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥ इत्येकोऽधिकः श्लोकः क्वचित्पठ्यते ॥

जयन्तीति । हे देवि त्वं जयन्त्यादिस्वधान्तदेवतारूपासि । ते तुभ्यं नमोऽस्तु । इति वाक्यभेदेनान्वयः । अथवा जयन्त्यादिशब्देभ्यश्चतुर्थ्यर्थे प्रथमा । ततश्च जयन्त्यादिशब्दवाच्यायै ते नमोस्त्वित्येकवाक्यत्वेनान्वयः । तत्र जयन्तीपदं प्राग्व्याख्यातम् । मङ्गला मङ्गलस्वरूपा मङ्गलकरी वा । इयं गयापीठाधिष्ठात्री । गयायां मङ्गला प्रोक्तेति **देवीभागवतात्**। कालयति द्रावयति भयान्मृत्युमपीति काली मृत्युर्धावति यद्भयादिति**लक्ष्मीतन्त्रोक्तेः** । यो यमः स खलु कल्यते त्वया भूतसंयमनकेलिकोविद इति **कालिदासोक्तेश्च** इयं कालञ्जरपर्वतस्था । काली कालञ्जरे मतेति **देवीभागवतात्** । भद्रं सुखं फलयति करोतीति भद्रकाली कर्मण्यण्णन्तान् ङीप् । कपालिनी करधृतनरशिरःकपाला । दुःखेन गम्यते प्रविश्यतेऽस्यामिति दुर्गा । दुर्ज्ञेयेत्यर्थः । सुदुरोरधिकरणे इति डट् ॥ **देवीपुराणे** दुर्गापदनिरुक्तिरुक्ता सा यथा ॥ सुबलादिभये दुर्गे तारिता रिपुसङ्कटे ॥ देवाः शक्रादयो यस्मात्तस्माद्दुर्गा प्रकीर्तिता ॥ इति ॥ इयं सुबाहुनाम्नो राज्ञः प्रार्थनया वाराणस्यां वसतीति **देवीभागवते** । तथा च सुबाहुराजोक्तिः । नगरेऽत्र त्वया मातः स्थातव्यं सर्वदा

मधुकैटभविद्राविविधातृवरदे नमः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २ ॥

शिवे ॥ दुर्गादेवीति नाम्ना वै ॥इति॥ क्षमते भक्तापराधानिति क्षमा । पचाद्यच् । क्षमाशब्दान्मत्वर्थीयोऽज्वा तेन क्षमावतीत्यर्थः । शिवा सुखकरी । उक्तं च **देवीपुराणे** । शिवाय यततेऽन्येषां तस्माल्लोके शिवा स्मृतेति ॥ **भारते तु** । समेधयति या नित्यं सर्वार्थानामुपक्रमम् ॥ शिवेन यन्मनुष्याणां तस्मादेषा शिवा स्मृता । इत्युक्तम्। धात्री मातृरूपा जगत्प्रपञ्चधारिणी वा॥ धात्री माता समाख्याता धारणाच्चोपगीयते ॥ इति **देवीपुराणात्** ॥ स्वाहास्वधाशब्दौ वह्निभार्याद्वयनामनी । स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथेति वह्निध्याने उक्तत्वात् । तेनाग्निभार्याद्वयरूपा । एतत्पदयोर्व्युत्पत्तिस्त्वं स्वाहा त्वं स्वधेति प्रथमाध्यायश्लोके विस्तरेण दर्शयिष्यते॥ तत्र स्वाहा माहेश्वरपुरस्था । स्वाहा माहेश्वरे पुरे इति **देवीभागवतात्** । (अथ पाठान्तरादि) स्वाहास्वधेत्यत्र स्वधास्वाहेति व्यत्यस्तपाठः क्वचित् ॥ १ ॥

मध्विति इत आरभ्य श्लोकाष्टकेन देवीस्तुतिद्वारा अक्रमेण चण्डीस्तवार्थं सूचयन् स्वेष्टं प्रार्थयते ॥ मधुकैटभौ तन्नामानौ दैत्यौ विद्रूणाति हिनस्तीति मधुकैटभविद्रावी विष्णुः । द्रूञ् हिंसायाम् क्र्यादिः । ताच्छील्याभावेपि क्वचिण्णिनिर्दृश्यते । विदधाति सृजति जगदिति विधाता ब्रह्मा । तयोर्वरदा । अथवा मधुकैटभयोर्वधे विष्णुप्रयोजकत्वान्मधुकैटभविद्राविणी सा चासौ विधातुर्ब्रह्मणो वरदा च मधुकैटभविद्राविविधातृवरदा । पूर्वपदस्य पुंवद्भावो नलोपश्च । तस्याः सम्बुद्धिर्हे मधुकैटभविद्राविविधातृवरदे । तुभ्यं नमः । रूपं शरीरसौन्दर्यं देहि । जयमुत्कर्षं देहि । यशः कीर्तिं देहि । द्विषः शत्रून् जहि मारय । इदमर्धमग्रे बहुषु श्लोकेषूत्तरार्धत्वेन पठ्यते । अनेन श्लोकेन प्रथमाध्यायार्थः सूचितः ॥ (अथ पाठान्तरादि) क्वचित्पुस्तके " मधुकैटभविद्रावविधात्रि " इति पाठः । क्वचित् इतःपरं महिषासुरसैन्या-

महिषासुरनिर्णाशविधात्रि वरदे नमः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ३ ॥
रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ४ ॥
शुम्भस्य च निशुम्भस्य धूम्राक्षस्य च मर्दिनि ॥

न्तविधात्रि वरदे नमः ॥ रूपं देहि० ॥ इत्येकोऽधिकः श्लोकः पठ्यते ॥ २ ॥

महिषेति । महिषासुरस्य निर्णाशः समूलोच्छेदः । उपसर्गादसमासेपीति णत्वम् । तस्य विधात्रि कर्त्रि हे वरदे । तुभ्यं नमः । रूपं देहीत्यादेर्व्याख्या प्राग्वत् । अनेन तृतीयाध्यार्थः सूचितः । (अथ पाठान्तरादि), विधात्रि इत्यत्र विधातृ इति पाठः प्रामादिकः । वरदे इत्यत्र जयदे, सुखदे इति वा क्वचित्पाठः ॥ ३ ॥

रक्तबीजेति । रक्तबीजस्य वधो यस्याः सकाशात् सा रक्तबीजवधा । तस्याः सम्बुद्धिः हे रक्तबीजवधे । चण्डमुण्डौ तदाख्यावसुरौ विनाशयतीति चण्डमुण्डविनाशिनी । तस्याः सम्बुद्धिर्हे चण्डमुण्डविनाशिनि ॥ रूपं देहीत्यादि प्राग्वत् । अत्र स्तोत्रे ईकारान्तानि सर्वाणि पदानि सम्बुध्यन्तानि । तेषां प्रथमान्तत्वेन पाठः प्रामादिकः । अनेनाष्टमसप्तमाध्याययोरर्थः सूचितः ॥४॥

शुम्भस्येति । शुम्भस्य, निशुम्भस्य च तदाख्ययोर्दैत्येश्वरयोः ॥ धूम्राक्षस्य धूमाभनयनत्वात्तदाख्यस्य धूम्रलोचनासुरस्य चेत्यर्थः । मर्दिनि विनाशिनि । रूपं देहीत्यादि प्राग्वत् । अनेन दशमनवमषष्ठाध्यायानामर्थः सूचितः ॥ (अथ पाठान्तरादि) शुम्भशब्दो दन्त्यादिरिति **भास्कररायाः** । तन्निर्णयः पञ्चमाध्यायव्याख्यायां करिष्यते । इमं श्लोकं प्रक्षिप्तमिति मत्वा केचिन्न पठति तदयुक्तम् । मूले चण्डीस्तवान्तर्गतानां प्रधानभूतानां सर्वेषां दैत्यानां वधमुक्त्वा तत्प्रवरयोः शुम्भनिशुम्भयोस्तत्सेनापतेर्धूम्रलोचनस्य च वधानुक्तौ

रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ५ ॥
देविप्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ६ ॥
वन्दिताङ्घ्रियुगे देवैर्देवि सौभाग्यदायिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ७ ॥

कारणाभावात् ॥ क्वचिच्चतुर्थपञ्चमश्लोकयोः स्थाने श्लोकपञ्चकं पठ्यते तद्यथा । धूम्रलोचननिःपातविधात्रि वरदे नमः ॥ रूपंदेहि० ॥ चण्डमुण्डप्रमथनविधात्रिवरदे नमः ॥ रूपं० ॥ रक्तबीजकुलोच्छेदविधात्रि वरदे नमः ॥ रूपं० ॥ निशुम्भप्राणसंहारविधात्रि वरदे नमः ॥ रूपं० ॥ शुम्भदानवनिर्णाशविधात्रि वरदेनमः ॥ रूपं० ॥ इति ॥ इत उत्तरेषां श्लोकानां पुस्तकभेदात् भिन्नभिन्नः क्रमो दृश्यते ॥ ५ ॥

देवीति । प्रचण्डा महान्तो दोर्दण्डा बाहुदण्डा येषां तेषां दैत्यानां महिषासुरसेनापतीनां चिक्षुरादीनां दर्पं गर्वं विनाशयति, अथवा प्रचण्डैः स्वीयदोर्दण्डैः दैत्यानां पूर्वोक्तानां दर्पं बलगर्वं विनाशयतीति प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनी । तस्याः सम्बुद्धिः प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि । हे देवि रूपं देहीत्यादि प्राग्वत् । अनेन द्वितीयाध्यायार्थः सूचितः ॥ ६ ॥

वन्दितेति । देवैरिन्द्रादिभिर्वन्दितं स्तुतिसमये मनसा वाचा देहेन चाभिवादितं अङ्घ्रियुगं चरणद्वयं यस्यास्तस्याः सम्बुद्धिर्वन्दिताङ्घ्रियुगे । ततश्च तेभ्यः सौभाग्यं सुभगत्वं शोभनलक्ष्मीकीर्तिवीर्यादिरूपम् ददाति तस्याः सम्बुद्धिः सौभाग्यदायिनि । भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वित्यमरः ॥ हृद्भगेत्युभयपदवृद्धिः । हे देवि रूपं देहीत्यादिप्राग्वत् ॥ अनेन चतुर्थपञ्चमैकादशाध्यायार्थः सूचितः । (अथ पाठान्तरादि) प्रथमपादान्ते देवैरित्यत्रापि देवीति सम्बुध्यन्तं पठ्यते कैश्चित् ॥ ७ ॥

अचिन्त्येति । अचिन्त्यं अतर्क्यं रूपं स्वभावो यस्य तदचिन्त्यरूपं ।

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥८॥
देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥
प्रचण्डदैत्यदर्पघ्नि चण्डिके प्रणताय मे ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १० ॥

पठितृश्रोतृस्मर्तृजनसर्वदुःखध्वंसकरमित्यर्थः । रूपं स्वभावे सौन्दर्ये इति **विश्वः** ॥ तादृशं चरितं उत्पत्तिस्वरूपप्रभावप्रतिपादको देवीमाहात्म्यसंज्ञको ग्रन्थविशेषो यस्यास्तस्याः सम्बुद्धिः हे अचिन्त्यरूपचरिते । प्रतिपाद्यते चैतद्देवीमाहात्म्यस्याचिन्त्यरूपत्वं देव्यैव द्वादशाध्याये बहुभिः श्लोकैः । सर्वे शत्रवो देवशत्रवः शुम्भनिशुम्भवधानन्तरमवशिष्टास्तत्सैनिकास्तान् विनाशयति भूतलात्पाताले निर्वासनेनादृश्यान् करोतीति सर्वशत्रुविनाशिनी । शुम्भनिशुम्भवधेन निराश्रयीकरणात्तत्सैन्यानां पातालगमनप्रयोजिकेत्यर्थः । तस्याः सम्बुद्धिः । वक्ष्यते च द्वादशाध्याये । दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि । जगद्विध्वंसके तस्मिन् महोग्रेऽतुलविक्रमे ॥ निशुम्भे च महावीर्ये शेषाः पातालमाययुरिति ॥ अनेन श्लोकेन द्वादशाध्यायार्थः सूचितः ॥ ८ ॥

देवीति । भक्तजनेषु उद्दामानौ प्रवरौ यौ सुरथसमाधी तयोर्दत्तः इष्टवरप्रदानेनानन्दोदयो यया तस्याः सम्बुद्धिः भक्तजनोद्दामदत्तानन्दोदये । हे अम्बिके देवि रूपं देहीत्यादि प्राग्वत् । अनेन श्लोकेन त्रयोदशाध्यायार्थः सूचितः ॥ ९ ॥

इत आरभ्य केवलं सामान्यतो गुणवत्वेन स्तुवन् स्वेष्टमर्थयते । प्रचण्डेति । प्रचण्डा अतिकोपना ये दैत्यास्तेषां दर्पं बलगर्वं तद्वधेन हन्ति नाशयतीति प्रचण्डदैत्यदर्पघ्नी । तस्याः सम्बुद्धिः हे प्रचण्डदैत्यदर्पघ्नि । हे

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ११ ॥

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १२ ॥

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १३ ॥

कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके ॥

चण्डिके । प्रणताय नम्राय मे रूपादिकं देहि मम द्विषश्च जहि ॥ १० ॥

सुरासुरेति। सुरा अग्न्यादयो देवाः । अग्निरग्रे देवतानामिति श्रुतेः। सुरा वह्निपुरोगमा इत्येकादशे वक्ष्यमाणत्वाच्च। असुराः प्रह्लादादयो बाणाद्याश्च। तत्र आद्यानां सर्वं विष्णुमयं जगदिति भावनया सर्वत्राविरोधात् । द्वितीयानां शिवभक्तत्वेन तत्पत्न्यामम्बिकायां बहुमानात् । तेषां शिरोरत्नैश्चूडामणिभिः निघृष्टौ वन्दनसमये कृतनिघर्षणौ चरणौ यस्यास्तस्याः सम्बुद्धिः हे सुरासुरशिरोरत्ननिघृष्टचरणे । अम्बिके रूपं देहीत्यादिप्राग्वत्। (अथ पाठान्तरादि) निघृष्टचरणेम्बिके इत्यत्र निघृष्टचरणाम्बुजे इति क्वचित् पाठः ॥ ११ ॥

इन्द्राणीति । इन्द्राण्याः पतिरिन्द्रस्तेन सद्भावेन श्रद्धया पूजिते हे परमेश्वरि रूपं देहीत्यादि प्राग्वत् ॥ अत्रेन्द्रस्य इन्द्राणीपतिशब्देन निर्देशादिन्द्राण्या लोकोत्तरपातिव्रत्यप्रसिद्धिर्व्यज्यते ॥ १२ ॥

चतुर्भुजे इति । चतुर्वक्त्रेण ब्रह्मणा संस्तुते हे चतुर्भुजे परमेश्वरि रूपं देहीत्यादि प्राग्वत् ॥ (अथ पाठान्तरादि) चतुर्वक्त्रे इतित्वपपाठः ॥१३॥

कृष्णेनेति । कृष्णेन विष्णुना । शश्वत् मुहुः भक्त्या संस्तुतेऽम्बिके त्वं रूपादिकं देहि । अस्य स्तोत्रस्य विष्णुकृतत्वेऽपि विष्णुना संस्तुते इति पारो-

रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १४ ॥
हिमाचलसुतानाथसंस्तुते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १५ ॥
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १६ ॥
स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७ ॥
नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १८ ॥

क्ष्येणोक्तिः परोक्षप्रिया इव हि देवा इति श्रुतेर्देवानां परोक्षप्रियत्वात् । (अथ पाठान्तरादि) त्वामित्यत्र तथेति च क्वचित् पाठः ॥ १४ ॥

हिमाचलेति । हिमाचलसुतायाः पार्वत्या नाथेन सदाशिवेन संस्तुते हे परमेश्वरि रूपं देहीत्यादि प्राग्वत् ॥ १५ ॥

एतावत्पर्यन्तमात्मनोऽभीष्टं प्रार्थ्याथ चतुर्भिश्श्लोकैः सर्वजनाभीष्टं प्रार्थयते । विद्यावन्तमिति । जनं सर्वजनं विद्यावन्तं विद्वांसं । यशस्वन्तं कीर्तिमन्तं । असन्तत्वेऽपि सरस्वान् सरस्वतीत्यादिवन्मतुप् । लक्ष्मीवन्तं श्रीमन्तं कुरु । तस्मै रूपादिकं देहि तस्य द्विपश्च जहि ॥ १६ ॥

स्तुवद्भ्य इति ॥ हे व्याधिनाशिनि सर्वरोगध्वंसिनि चण्डिके । वक्ष्यते चैकादशाध्याये रोगानशेषानपहंसि तुष्टेति । त्वां भक्तिपूर्वं स्तुवद्भ्यो जनेभ्यो रूपादिकं देहि तेषां द्विपश्च जहि ॥ १७ ॥

नतेभ्य इति । दुरितं पापमपहन्तीति दुरितापहा । तस्याः संबुद्धिः हे दुरितापहे । पापघ्नि चण्डिके सर्वदा भक्त्या त्वां नतेभ्यो जनेभ्यः रूपादिकं देहि तेषां द्विपश्च जहि ॥ १८ ॥

चण्डिके सततं ये त्वामर्चयन्ति हि भक्तितः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १९ ॥

देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २० ॥

विधेहि देवि कल्याणं विधेहि विपुलां श्रियम् ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २१ ॥

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २२ ॥

चण्डिके इति । हे चण्डिके ये जनास्त्वां सततं भक्तितो भक्त्या तृतीयार्थे तसिः । अर्चयन्ति पूजयन्ति हि । तेभ्य इति शेषः । रूपादिकं देहि तेषां द्विषश्च जहि । हिः पादपूरणे (अथपाठान्तरादि) अर्चयन्ति हि इत्यत्र अर्चयतीहेति केचित्पठन्ति ॥ १९ ॥

इत आरभ्य स्वस्य परेषां चेष्टं प्रार्थयते देहीति । हे देवि । मह्यं त्वदर्चकजनेभ्यश्चेति शेषः । एवमग्रेपि ज्ञेयम् । सौभाग्यं सुभगत्वं समग्रैश्वर्यमित्यर्थः । आरोग्यं नैरुज्यं । देहि । हे देवि परं निरवधि । सुखं देहि । रूपादिकं देही द्विषश्च जहि ॥ २० ॥

विधेहीति । हे देवि कल्याणं मङ्गलं । विधेहि कुरु । मम त्वदर्चकजनानां चेति शेषः । विपुलां बहुलां । श्रियं सम्पदं विधेहि । रूपादिकं देहि । द्विषश्च जहि । (अथ पाठान्तरादि) विपुलामित्यत्र परमामिति कचित्पाठः ॥ २१ ॥

विधेहीति । द्विषतां शत्रूणां नाशं अदर्शनं विधेहि । उच्चकैः बहुलं बलं सामर्थ्यं सैन्यं वा विधेहि । रूपादिकं देहि । द्विषश्च जहि । (अथ पाठान्तरादि) अत्र पुत्रान् देहि धनं देहि सर्वान् कामान् प्रदेहि च ॥ रूपं देहि० ॥ इत्येकोऽधिकः श्लोकः कचित्पठ्यते ॥ २२ ॥

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ॥
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥ २३ ॥
इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥
स तु सप्तशतीसङ्ख्यावरमाप्नोति सम्पदाम्

इति अर्गलास्तोत्रम् ।

पत्नीमिती । मनो रमयतीति मनोरमा तां । सुरूपां सुगुणां चेत्यर्थः । कर्मण्युपदे रमेर्ण्यन्तादच्प्रत्ययः । मनो वृत्तं पतिचित्तवृत्तिः । तदनुसारिणीं सदानुकूलामित्यर्थः । दुर्गस्य दुस्तरस्य संसारसागरस्य तारिणीम् यथाधर्मवर्तनेन भर्तुः संसारसमुद्रतरणे नावामिव साधनभूतामित्यर्थः । कुलोद्भवां सत्कुलोत्पन्नां । पत्नीं सहधर्मचारिणीं देहि । पत्युर्नो यज्ञसंयोगे इति पतिशब्दस्य नकारादेशः । ऋन्नेभ्य इति ङीप् ॥ २३ ॥

अस्य स्तोत्रस्य सप्तशतीपाठाङ्गत्वं विधत्ते । इदमिति । नरः चण्डीस्तवं पिपठिषुः पुरुषः। इदं अर्गलास्तोत्रं । पठित्वा तु आदौ पठित्वैव । तुस्याद्भेदेऽवधारणे **इत्यमरः** ॥ महास्तोत्रं चण्डीस्तवं पठेत् । स तु एवं कर्ता पुरुषस्तु सम्पदां गजरथतुरगगृहक्षेत्रारामादि सम्पद्विशेषाणां या सप्तशतीसङ्ख्या तत्प्राप्तिरूपं वरं इष्टार्थमाप्नोति । सप्तशतसङ्ख्याकान् भिन्नभिन्नान् सम्पद्विशेषान् प्राप्नोतीत्यर्थः ॥ (अथ पाठान्तरादि) सम्पदामित्यत्र सम्पदं इति पाठे सप्तशतीसङ्ख्या इति भिन्नं पदम् ॥ सप्तशतीसङ्ख्याकाः पूर्वोक्ताः सम्पदः वरमाप्नोतीति सामानाधिकरण्येनान्वयः । सप्तशतीसङ्ख्यसम्पद्रूपं वरं प्राप्नोतीत्यर्थः । क्वचित् तृतीयपादस्थाने सप्तशतीं समाराध्येति पठ्यते । उक्तप्रकारेण सप्तशतीमनुष्ठायेति तदर्थः । इत ऊर्ध्वं केचिदधिकाः श्लोकाः । अर्गलं पापजातस्य दारिद्र्यस्य तथार्गलम् ॥ इदमादौ पठित्वा तु पश्चात्सप्तशतीं पठेत् । अर्गलाख्यां स्तुतिं चैतां सर्वकामफलप्रदाम् ॥ महा-

अथ कीलकस्तोत्रम् ॥

कीलकस्तोत्रस्य । शिवऋषिः । अनुष्टुप्छन्दः । श्रीमदादिशक्तिर्महालक्ष्मीर्देवता । देवीमाहात्म्यपूर्वाङ्गत्वेन जपे विनियोगः ।

ॐ मार्कण्डेय उवाच--

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥
श्रेयः प्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥ १ ॥

देवीप्रसादार्थं जपेत्स्नात्वा दिने दिने ॥ अर्गलां पठते यस्तु स्यादनर्गलवागसौ ॥ इति निश्चित्य मनसा विष्णुना कथिता पुरा ॥ २४ ॥ इति ॥

॥ इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे अर्गलास्तोत्रव्याख्या ॥

कीलकेति । कीलबन्धे इत्यस्माद्व्युत्पन्नौ कीलकीलकशब्दौ क्रमात् आयसादिशङ्कुपशुदामबन्धनाश्रयस्थाणुवाचिनौ । तयोरत्र प्रतिबन्धकसामान्यालक्षणया क्वचित् शिवकृतसप्तशतीपाठफलप्रतिबन्धककीलने, क्वचित्तदुत्तरं प्रयुक्तस्योद्धारकपदस्य विनापि प्रत्ययमिति वार्तिकाल्लोपेन तदुद्धारकविधौ, क्वचित्प्रतिपाद्यप्रतिपादकयोरभेदादुत्कीलनविधिप्रतिपादकग्रन्थे च प्रयोगः । तत्र यो निष्कीलामित्यत्राद्येऽर्थे इत्थंरूपेण कीलेनेत्यत्र द्वितीयेऽर्थे सप्तशत्या जपात्पूर्वं पठेत्कीलकमुत्तममित्यत्र तृतीयेऽर्थे प्रयोगो ज्ञेयः ॥

शिवनिर्मितस्य कीलकविधेर्मार्कण्डेयस्यानुवादकत्वादादौ मार्कण्डेय उवाचेति पठ्यते ॥

अथ भगवान् मार्कण्डेयः कीलकविधेः शिवनिर्मितत्वात्तत्प्रतिपादकग्रन्थारम्भे शिवनमस्काररूपं मङ्गलमाचरन् पाठकानां पठनार्थं श्लोकतो

सर्वमेतद्विनायस्तु मन्त्राणामपि कीलकम् ॥
सोपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥ २ ॥

निबध्नाति । विशुद्धेति । विशुद्धज्ञानदेहाय शुद्धज्ञानस्वरूपाय । प्रज्ञानं ब्रह्मेति श्रुतेः । त्रयाणां वेदानां ऋग्यजुःसामाख्यानां समाहारस्त्रिवेदी । सैव दिव्यानि त्रीणि चक्षूंषि यस्य तस्मै । श्रेयसो मोक्षस्य प्राप्तेर्निमित्ताय कारणाय । आत्मज्ञानोपदेशेनापवर्गप्रदायेत्यर्थः । सोमार्धधारिणे इन्दुकलाकलितमौलये शिवाय नमः । अस्त्विति शेषः अयं श्लोकस्तर्कचरणमीमांसावार्तिकारम्भेऽपि दृश्यते । स च तत्र सोमयागपरत्वेन व्याख्यातोस्ति ॥ १ ॥

पुरा सप्तशतीवर्जमन्यान् सर्वान् मन्त्रान् कलौ यथावत् फलदाने मन्दशक्तीनवेक्ष्य भूतदयया पार्वती शिवमुवाच । देवदेव जगन्नाथ वैदिके तान्त्रिकेऽखिले ॥ कर्मण्यस्मिन् कलौ काले येन सिद्धिरनुत्तमा ॥ जप्तेन संस्मृतेनापि मन्त्रस्योत्कीलनेन हि ॥ तद्वदस्व महादेव कृपां कृत्वा ममोपरि ॥ इति पार्वत्या प्रेरितः सदाशिवः सर्वेषां मन्त्राणां यथावत्फलसिध्यर्थं **शिवरहस्यपाञ्चरात्रागमे मत्स्येन्द्रसंहितायां** सर्वमन्त्रोत्कीलनाख्यं विधानविशेषमुक्तवान् तस्मिन् कृते एवान्ये मन्त्रा यथावत् फलदा बभूवुः । सप्तशतीमन्त्रस्तु तदनपेक्ष एव यथावत् फलद आसीत् । ततश्च सर्वे जना उत्कीलनसापेक्षानन्यान् मन्त्रान् विहायोत्कीलननिरपेक्षं केवलमेकं सप्तशतीस्तोत्रमेवोपासामासुः ॥ तेनान्येषां मन्त्राणां वैयर्थ्यं दृष्ट्वा तत्तन्मन्त्रर्षयः परमां चिन्तामापुः । तां चिन्तां पञ्चधा दर्शयति सर्वमेतदित्यादिना सपादश्लोकत्रयेण । तत्र प्रथमा चिन्ता यथा । यस्तु पुरुषः मन्त्राणां कीलकं विनापि पूर्वोक्तं मत्स्येन्द्रसंहितान्तर्गतं सर्वमन्त्रोत्कीलनाख्यं विधानमकृत्वापीत्यर्थः । सततं जाप्यतत्परः केवलसप्तशतीजपमात्रासक्तो भवति सोप्येतसर्वं पुत्रपौत्रदारगृहारामक्षेत्रादिलाभरूपं क्षेमं सुखमवाप्नोति इत्येवंरूपा । (अथ

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ॥
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिध्यति ॥ ३ ॥
न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते ॥
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥ ४ ॥

पाठान्तरादि) विनायस्त्वित्यत्र विजानीयादिति । अपि कीलकमित्यत्र अभिकीलकमिति च क्वचित् पठ्यते ॥ २ ॥

अथ द्वितीयां चिन्तामाह । सिध्यन्तीति । केवल सप्तशतीजपतत्परस्य पुरुषस्य उच्चाटनादीनि । अत्र उच्चाटनशब्दः षट्कर्मोपलक्षकः । तेनोच्चाटनवशीकरणस्तम्भनविद्वेषणमारणशान्तिरूपाणि सर्वाणि ग्राह्याणि । आदिपदेन आरोग्यं च । एतानि सकलान्यपि वस्तूनि कार्याणि सिध्यन्ति इति द्वितीया चिन्ता । अथ तृतीयामाह एतेनेति । एतेन स्तोत्रमात्रेण । पूर्वोक्तोत्कीलनरहितेन केवलसप्तशतीस्तोत्रेणेत्यर्थः । स्तुवतां जनानां देवी सिध्यति । सिद्धिदा भवति । इति तृतीया चिन्ता ॥ (अथ पाठान्तरादि) देवीति पदस्थाने नित्यामिति मात्रेणेत्यत्र मन्त्रेणेति, वृन्देनेति वा क्वचित्पठ्यते ॥ ३ ॥

अथ चतुर्थी चिन्तामाह । न मन्त्र इति । तत्र उच्चाटनाद्यारोग्यादि सकलकार्येषु मन्त्रः सप्तशतीस्तोत्रादन्यः न विद्यते न लोकादरं प्राप्नोतीत्यर्थः । नौषधं विद्यते । तथा अन्यदेवतोपासनादिकमपि किञ्चिन्न विद्यते । किन्तु जाप्येन विना, तत्तत् कार्योपयोगितत्तन्मन्त्रजपं विनैवेत्यर्थः । केवलसप्तशतीजपेनैव सर्वपूर्वोक्तमुच्चाटनादिकमारोग्यादिकं च सिध्येत सिध्यति लिङ्तङौ छान्दसौ । इति चतुर्थी चिन्ता । (अथ पाठान्तरादि) क्वचिन्मन्त्रशब्दो नपुंसकालिङ्गः, सिध्येतेत्यत्र सिध्येत्तु इति पठ्यते ॥ ४ ॥

अथ पञ्चमीं चिन्तामाह । समस्तान्यपीति । सप्तशतीस्तोत्रजपेन

समस्तान्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः ॥
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥
समाप्नोति सुपुण्येन तां यथावन्निमन्त्रणाम् ॥
सोपि क्षेममवाप्नोति सर्वमेव न संशयः ॥ ६ ॥
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥

समस्तानि सर्वाण्यपि कार्याणि सिध्यन्ति । तेनास्माकं तत्तन्मन्त्रर्षीणां मन्त्राः वैद्यानामौषधादिकं च वैयर्थ्यं प्राप्नोतीति भावः । इति पञ्चमी चिन्ता ॥ इति सपादश्लोकोक्तां पञ्चप्रकारां लोकानां शङ्कां तत्तन्मन्त्रर्षीणां चिन्तां मनसि कृत्वा हरः सदाशिवः । शुभं कल्याणकरं इदं चण्डीस्तोत्रं सर्वं एवं “ कृष्णायां वा चतुर्दश्यामिति वक्ष्यमाणदानप्रतिग्रहाख्यकर्मणा नियन्त्रयामास वक्ष्यमाणदानप्रतिग्रहाख्यकर्मानुष्ठाने एव यथावत् फलदं भवेन्नान्यथेति नियमयामासेत्यर्थः । (अथ पाठान्तरादि) समस्तानीत्यत्र समग्राणीति, सिध्यन्तीत्यत्र सेत्स्यन्तीति, नियन्त्रयामासेत्यत्र निमन्त्रयामास चेति क्वचित्पठ्यते ॥ बहुषु पुस्तकेषु स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार सः । इत्यर्धं पठ्यते तदनार्षमित्युमानन्दनाथः ॥ ५ ॥

समाप्नोतीति । यस्तां नियन्त्रणां दानप्रतिग्रहाख्यकर्मानुष्ठानरूपं नियमं सुपुण्येन पुण्यातिशयेन यथावत् यथाविधि समाप्नोति सम्पूर्णतां नयति स एव सर्वमपि क्षेमं भार्यापुत्रगृहारामक्षेत्रादिरूपं सुखमवाप्नोति अत्र संशयो नास्ति । अत्रापिशब्दैवशब्दौ भिन्नक्रमौ । तेन स इत्यस्यानन्तरं एवशब्दस्य, सर्वमित्यस्यानन्तरं च अपिशब्दस्य योजना । (अथ पाठान्तरादि) समाप्नोति सुपुण्येनेत्यत्र समाप्तिर्न च पुण्यस्येति क्वचित् पाठः ॥६॥

उक्तां नियन्त्रणामाह कृष्णायामिति । सप्तशतीजापकः पुरुषः नवार्णमन्त्रग्रहणानन्तरं लब्धं धनधान्यादिकं समस्तवस्तुप्रथमोपस्थितायां

ददाति प्रतिगृह्णाति नान्यथैषा प्रसिद्ध्यति ॥ ७ ॥
इत्थंरूपेण कीलेन महादेवेन कीलितम् ॥
निष्कीलं च ततः कृत्वा पठितव्यं समाहितैः ॥ ८ ॥
यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ॥
स सिद्धः स गणः सोऽपि गन्धर्वो जायते वने ॥ ९ ॥

कृष्णचतुर्दश्यां कृष्णाष्टम्यां वा, ततः प्रतिमासं तस्यामेव तिथौ प्रतिमासलब्धसमस्तं वस्तु समाहितः स्वस्थचित्तः सन् ददाति देव्यै समर्पयति । ततः प्रसन्नया देव्या प्रतिदत्तमिति भावनया प्रतिगृह्णाति च तर्ह्येवैषा सप्तशती प्रसिद्ध्यति फलदा भवति । अन्यथा तदभावे न प्रसिद्ध्यति । एतद्विधिरग्रे वक्ष्यमाणरहस्यतन्त्रस्य कीलकपटले स्फुटीभविष्यति । (अथ पाठान्तरादि) प्रसिद्ध्यतीत्यत्र प्रसीदतीति क्वचित्पाठः । तत्पक्षे एषेति पदेन देव्या ग्रहणम् ॥ ७ ॥

इत्थमिति । इत्थंरूपेण पूर्वश्लोक्तप्रकारकेण कीलेन फलप्रतिबन्धकशङ्कुना करणेन महादेवेन सदाशिवेन कर्त्रा कीलितं प्रतिबद्धफलं कृतम् ॥ चण्डीस्तोत्रमिति शेषः । ततः तस्मात् । निष्कीलं दानप्रतिग्रहाख्यकर्माचरणेन फलप्रतिबन्धकशङ्कुरहितं च कृत्वा समाहितैः स्वस्थान्तःकरणैः पुरुषैः पठितव्यम् । चण्डीस्तोत्रमिति शेषः । (अथ पाठान्तरादि) निष्कीलमित्यर्धं केचिन्न पठन्ति ॥ ८ ॥

अथ निष्कीलसप्तशतीजपस्य फलमाह य इति । यः पुरुषः । एनां सप्तशतीं निष्कीलां दानप्रतिग्रहाख्यकर्माचरणेन फलप्रतिबन्धकशङ्कुरहितां विधाय कृत्वा नित्यं प्रतिदिनं संस्फुटं स्पष्टपदाक्षरं यथा भवति तथा जपति । सः सिद्धः तदाख्यदेवयोनिजातिविशेषः अष्टसिद्धिसम्पन्नो वा । स गणः देव्याः शिवस्य वा प्रमथः । स वने गन्धर्वोऽपि वा जायते ॥ वने

न चैवाप्यटतस्तस्य भयं क्व च न जायते ।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥
ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥११॥

गन्धर्व इत्युक्तिः गन्धर्वाणां प्रायशो वनसञ्चारित्वात् । (अथ पाठान्तरादि) केचिन्निष्कीलशब्दे षकारस्थाने विसर्गं पठन्ति ॥ ९ ॥

न चेति । अटतः दुर्गमेषु कान्ताराटवीपर्वतादिषु सञ्चरतस्तस्य निष्कीलसप्तशतीजापकस्य क्व च न कुत्रापि भयं भूतप्रेतपिशाचचौरव्याघ्रसर्पादिजं नैव जायते च । अपमृत्योर्वशं अधीनतां न याति । अपमृत्युग्रहणं महामृत्योरपरिहार्यत्वात् । स्फुटीकृतं चैतद्विस्तरेण कवचव्याख्याने । मृतः मरणानन्तरमित्यर्थः । मोक्षमवाप्नुयात् । अर्चिरादिमार्गेण ब्रह्मलोकं गत्वा ब्रह्मण आयुषोऽन्ते तेन सह मुच्येतेत्यर्थः । (अथ पाठान्तरादि) क्वचनेत्यत्र क्वापीहेति क्वचित्पाठः ॥ १० ॥

अथ सप्तशतीस्तोत्रस्य प्रथमारम्भे विशेषमाह ज्ञात्वेति । ज्ञात्वा, नवार्णमन्त्रं स्वीकृत्य तदर्थं च गुरोर्ज्ञात्वा । ततः प्रारभ्य, अद्यावधि यावज्जीवं नित्यं चण्डीजपं करिष्ये प्रमादेन सकृदपि न त्यक्ष्ये इति सङ्कल्पपूर्वं जपारम्भं कृत्वा । कुर्वीत हि, सङ्कल्पानुसारेण यावज्जीवं जपं कुर्यादेव । हि शब्दोऽवधारणे । अकुर्वाणः सङ्कल्पं कृत्वापि जपं न कुर्वन् । मध्ये त्यजन्नित्यर्थः । विनश्यति प्रत्यवायी भवति नाशमाप्नोति वा । ततस्तस्मात् बुधैः प्राज्ञैः । सम्पन्नं उत्कृष्टगुणयुक्तम् । गुणोत्कर्षे विभूतौ च सम्पदुक्ता मनीषिभिरिति शाश्वतः ॥ इदं सप्तशतीस्तोत्रं ज्ञात्वैव, गुरुमुखान्नवार्णग्रहणतदर्थज्ञानपूर्वकं यावज्जीवानुष्ठानसङ्कल्पं कृत्वैवेत्यर्थः । प्रारभ्यते ॥ अयमप्यर्थो वक्ष्यमाणरहस्यतन्त्रस्थकीलकपटले स्फुटीभविष्यति ॥ ११ ॥

सौभाग्यादि च यत्किञ्चिद्दृश्यते ललनाजने ॥
तत्सर्वं तत्प्रसादेन तेन जप्यमिदं शुभम् ॥ १२ ॥
शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ॥
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥ १३ ॥
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ॥
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः॥१४॥

सौभाग्यदीति । ललनाजने स्त्रीजने यत् सौभाग्यादि जीवद्भर्तृकत्वपुत्रवत्वपातिव्रत्यादिकं किञ्चित् दृश्यते तत् सर्वं तत्प्रसादेन । तस्याः सप्तशतीस्तोत्रजपेन तुष्टायाः देव्याः प्रसादेनैवास्ति । उक्तं च पाद्मे । त्रिलोकसौभाग्यकरीं भुक्तिमुक्तिप्रदामुमाम् ॥ आराध्य सुभगां नारी किं सौभाग्यं न विन्दति ॥ इति । तेन हेतुना शुभं इदं सप्तशतीस्तोत्रं जप्यं जपनीयम् । पोरदुपधादिति यत् ॥ (अथ पाठान्तरादि) तेनेत्यत्र तस्मादिति, जप्यमित्यत्र जाप्यमिति शुभमित्यत्र नन्विति च क्वचित्पठ्यते ॥ १२ ॥

शनैरिति । अस्मिन् स्तोत्रे सप्तशतीस्तोत्रे शनैरत्वरया जप्यमाने तु समग्रापि सम्पत्तिः उच्चकैः उन्नता भवत्येव । उन्नतत्वं चापरमितत्वम् । एतेन अत्वरयैव पाठ उत्तम इति सूचितम् । ततस्तस्मात् तत् सप्तशतीस्तोत्रं यावज्जीवजपानुष्ठानरूपनियन्त्रणदुःखदमपि प्रारभ्यमेव यावज्जीवं च जप्यमेव । (अथ पाठान्तरादि) जाप्यमाने इति दीर्घादिः पाठः क्वचित् ॥१३॥

ऐश्वर्यमिति । यत्प्रसादेन यस्याः सप्तशतीस्तवजपेन तुष्टायाश्चण्डिकायाः प्रसादेन ऐश्वर्यं ईशितृत्वं । सौभाग्यं सुभगत्वं भाग्यवत्तेतियावत् । आरोग्यं नीरोगत्वं । सम्पल्लक्ष्मीः । शत्रुहानिर्वैरिनाशः । किञ्च परः सर्वोत्कृष्टो मोक्षश्च भवति । सा चण्डिका । जनैः सर्वलोकैः । किं न स्तूयते सप्तशतीस्तवेनेति भावः । (अथ पाठान्तरादि) द्वितीयपादस्थाने सोभाग्यारोग्यमेवचेति क्वचित्पाठः ॥ १४ ॥

सप्तशत्या जपात्पूर्वं पठेत्कीलकमुत्तमम् ॥
हृद्यं काममवाप्नोति हृदि देवी सदा वसेत् ॥१५॥

ॐ इति कीलकस्तोत्रम् ।

अथ कीलकग्रन्थस्य सप्तशतीपाठाङ्गत्वं विधत्ते सप्तशत्या इति । सप्तशत्याः जपात् पूर्वं उत्तममुपासकानां सर्वकामपूरकम् । कीलकं तन्नामकं ग्रन्थविशेषं पठेत् । एवंकृते फलमाह । स पुरुषः हृद्यं हृदयस्य प्रियं, काम्यते इष्यते इति कामः तं इष्टवस्तु इत्यर्थः. अवाप्नोति । किञ्च तस्य हृदि देवी सदा वसेत् ॥ अयं श्लोकः क्वचित्पुस्तके दृश्यते तथापि लोकप्रसिद्धे सप्तशतीपाठात्पूर्वं कीलकपाठाचारे प्रमाणभूतत्वादङ्गीकृतः ॥ इत उत्तरं श्लोकद्वयमधिकं क्वचित्पठ्यते । तद्यथा ॥ कीलकं हृदये यस्य सोऽकीलितमनोरथः ॥ भविष्यति न सन्देहो नान्यथा शिवभाषितम् ॥ सर्वेषां चैव मन्त्राणां विद्यानां च यशस्विनी ॥ इयं योनिः समाख्याता सर्वतन्त्रेषु गोपिता ॥ इति ॥१५॥

अथास्य संक्षिप्तस्य कीलकग्रन्थस्य सम्यगर्थबोधाय **विस्तृतो रहस्यतन्त्रस्थः कीलकपटलो** लिख्यते ॥ शिव उवाच ॥ स्कन्दम्प्रतीति शेषः ॥ पुरा सनत्कुमाराय दत्तमेतन्मयानघ ॥ संवर्ताय ददौ तच्च सचान्यस्मै ददौ च तत् ॥ (एतच्चण्डीस्तोत्रम्) सर्वत्र चण्डीस्तोत्रस्य प्राचुर्येण महीतले ॥ ब्रह्मकाण्डःकर्मकाण्डस्तन्त्रकाण्डश्च सर्वथा ॥ अभूत् प्रतिहतोऽनेन शीघ्रसिद्धिप्रदायिना ॥ तदा तेषां च सार्थक्यं कर्तुकामेन भूतले ॥ दानप्रतिग्रहाख्येन मन्त्रोऽयं कीलितो मया ॥ दानप्रतिग्रहाख्यं यत् तत्कीलकमुदाहृतम् ॥ तदारभ्य च मन्त्रोऽयं कीलकेनासकीलितः ॥ न सर्वेषां भवेत्सिध्द्यै ये कीलकपराङ्मुखाः ॥ ये नराः कीलकेनेमं जपन्ति परया मुदा ॥ तेषां देवी प्रसन्नास्यात्ततः सर्वाः समृद्धयः ॥ कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥ समर्पयेन्महादेव्यै स्वार्जितं सकलं धनम् ॥ त्वत्प्रसूतस्त्वदाज्ञसस्त्वद्दासस्त्व-

त्परायणः ॥ त्वन्नामचिन्तनपरस्त्वदर्थेऽहं नियोजितः ॥ मयार्जितमिदं सर्वं तव स्वं परमेश्वरि ॥ राष्ट्रं बलं कोशगृहं सैन्यमन्यच्च साधनम् ॥ त्वदधीनं करिष्यामि यत्रार्थे त्वं नियोक्ष्यसि ॥ तत्र देवि सदावर्ते त्वदाज्ञामेव पालयन् ॥ राष्ट्रं बलं कोशगृहं नवं यद्यदुपार्जितम् ॥ अस्मिन् मासि मया देवि तुभ्यमेतत्समर्पितम् ॥ इति दत्त्वा ततो देव्याः प्रसादात् प्रतिगृह्य च ॥ विभज्य पञ्चधा सर्वं त्र्यंशान् स्वार्थं प्रकल्पयेत् ॥ देवपित्रतिथीनां च क्रियार्थं त्वेकमादिशेत् ॥ एकांशं गुरवे दद्यात् तेन देवी प्रसीदति ॥ तस्य राज्यं बलं सैन्यं कोशः साधु विवर्धते ॥ नानारत्नाकरः श्रीमान् यथा पर्वणि वारिधिः ॥ (एतत्कर्मणः प्रयोगोऽग्रे वक्ष्यते ॥) ज्ञात्वा नवाक्षरं मन्त्रं जीवब्रह्मसमाश्रयम् ॥ तत्त्वमस्यादिवाक्यानां सारं संसारभेषजम् ॥ सप्तशत्याख्यमन्त्रस्य यावज्जीवमहं जपम् ॥ कुर्वंस्ततो न प्रमादं प्राप्नुयामिति निश्चयम् ॥ कृत्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ नाहं ब्रह्म निराकुर्यां मा मां ब्रह्म निराकरोत् ॥ अनिराकरणं मेऽस्तु अनिराकरणं मम ॥ इति वेदान्तमूर्धन्ये छान्दोग्येऽस्य प्रपञ्चनात्॥ प्रारभ्य तत्परित्यागो न तस्य श्रेयसे मतः।। नाब्रह्मवित् कुले तस्य जायते हि कदाचन ॥ न दारिद्र्यं कुले तस्य यावत् स्थास्यति मेदिनी ॥ प्रतिसंवत्सरं कुर्यात् शारदं वार्षिकं तथा ॥ (शारदं आश्वीनमासगतम् वार्षिकं वर्षारम्भोक्तं । चैत्रमासगतमित्यर्थः । शुक्लप्रतिपदादिनवम्यन्तं नवरात्रमहोत्सवं कुर्यात् ॥ तेन सर्वमवाप्नोति सुरासुरसुदुर्लभम् ॥ अन्यच्च यद्यत् कल्याणं जायते तत् क्षणे क्षणे ॥ सत्यं सत्यमिदं सत्यं गोपनीयं प्रयत्नतः ॥ पुत्राय ब्रह्मनिष्ठाय पित्रा देयं महात्मना ॥ अन्यथा देवता तस्मै शापं दद्यान्न संशयः ॥ इति रहस्यतन्त्रस्थं कीलकम् ॥

अथाज्ञहितायैतावदुक्तस्य **दानप्रतिग्रहाख्यकर्मविशेषस्य प्रयोग उच्यते** ॥ नवार्णमन्त्रग्रहणानन्तरं स्वार्जितं धनादिकं तन्मासान्तर्गतकृष्णाष्टमीकृष्णचतुर्दश्यन्यतरप्रथमोपस्थिततिथौ देवीपुरतो निधाय आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य, श्रीमहालक्ष्मीप्रीत्यर्थं दानप्रतिग्रहाख्यं कर्म करिष्ये,

अथ रात्रिसूक्तम् ॥

रात्रीव्यख्यदित्यष्टर्चस्य सूक्तस्य सौभरः कुशिक ऋषिः । रात्रिरूपा आदिशक्तिः श्रीमहालक्ष्मीर्देवता । गायत्रीच्छन्दः । देवीमाहात्म्यसम्पुटीकरणपूर्वांशत्वेन जपे विनियोगः ॥

ॐ रा॒त्रीव्य॑ख्यदाय॒तीपु॑रु॒त्रादे॒व्य॑१॒क्षभि॑ः ॥
विश्वा॒ अधि॒श्रियो॑ऽधित ॥ १ ॥

इति सङ्कल्प्य । महालक्ष्मीं सम्पूज्य । “ त्वत्प्रसूतस्त्वदाज्ञप्त ” इत्यादिश्लोकत्रयेण प्रार्थ्य । राष्ट्रं बलं कोशगृहमितिश्लोकन्मत्रेण देवीचरणयोः समर्प्य । प्रसन्नया देव्या प्रतिदत्तमिति भावनया प्रतिगृह्य पञ्चधा विभज्य एकं भागं गुरवे तत्पुत्रादिभ्यो वा दत्त्वा एकं भागं पञ्चमहायज्ञाद्यर्थमवस्थाप्य भागत्रयं यथेष्टं विनियोजयेत् ॥ एवं प्रतिमासं कुर्यात् ॥ तत्र प्रथममासो मन्त्रोपदेशदिनादारभ्य प्रथमोपस्थितकृष्णाष्टमीकृष्णचतुर्दश्यन्यतरतिथिपर्यन्तं यथासम्भवदिनैः कल्प्यः । तदग्रे कृष्णाष्टम्यादिकृष्णसप्तम्यन्तं कृष्णचतुर्दश्यादिकृष्णत्रयोदश्यन्तं वा प्रथममासाङ्गीकृततिथ्यनुरोधेन ज्ञेयः ॥

इति दानप्रतिग्रहाख्यकर्मविशेषप्रयोगः ॥

॥ इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
कीलकस्तोत्रव्याख्या ॥

अथास्या ऋचः पदानि ॥ रात्री । वि । अख्यत् । आऽयती । पुरुऽत्रा ॥ देवी । अक्षऽभिः ॥ विश्वाः । अधि । श्रियः । अधित ॥ इति ॥ अथ व्याख्या ॥ रात्रीति । पुरुत्रा बहुषु देशेषु । दीव्यतीति देवी । क्रीडन्तीत्यर्थः । दिवु क्रीडायाम् । आयती आगच्छन्ती । आङ्पूर्वादेतेः शत्रन्तान् ङीप् । रात्री रात्रिः । रात्रेश्चाजसाविति ङीप् । अक्षभिः अक्षिस्थानीयैस्तारकैः । अन्येभ्योऽपि दृश्यते इत्यक्षिशब्दादनङ् । व्यख्यत् विचष्टे

ओर्व॑प्रा॒ अम॑र्त्या नि॒वतो॑ दे॒व्यु१॒ द्वत॑: ॥
ज्योति॑षा बाधते॒ तम॑: ॥ २ ॥
निरु॒ स्वसा॑रं मस्कृ॒तोषसं॑न्दे॒व्या॑ य॒ती ॥
अपेदु॑हासते॒ तम॑: ॥ ३ ॥
सा नो॑ अ॒द्य यस्या॑ व॒यं नि ते॒ याम॒न्नवि॑ क्ष्महि ॥

पश्यति । किञ्च । विश्वाः सर्वाः । नानाविधा इत्यर्थः । श्रियः शोभाः अध्यधित अधिधारयति ॥ १ ॥

अथ पदानि । आ । उरु । अप्राः । अमर्त्या । निवऽतः । देवी । उत्ऽवतः ॥ ज्योतिषा । बाधते । तमः ॥ इति ॥ अथ व्याख्या । ओर्वप्रा इति । अमर्त्या मरणरहिता । प्रत्यहमागन्तृत्वादिति भावः । देवी रात्रिः । उरु विस्तीर्णमन्तरिक्षम् । तथा निवतः अवनतान् प्रदेशान् । उद्वतः उन्नतांश्च प्रदेशान् । आप्राः प्रथमं पूरयति । तमसेति शेषः । प्रापूरणे । लङ् मध्यमपुरुषश्च व्यत्ययेन । ततः ज्योतिषा, ग्रहनक्षत्रादिरूपेण तेजसा । तमः बाधते पीडयति ॥ २ ॥

पदानि । निः । ऊँ इति । अस्कृत । उपसम् । देवी । आऽयती ॥ अप । इत् । ऊँ इति । हासते । तमः ॥ इति ॥ अथ व्याख्या ॥ निरिति । आयती आगच्छन्ती । देवी रात्रिः स्वसारं भगिनीमुषसम् । निरस्कृत निष्करोति प्रकाशेन संस्करोति । अतएव उषसि प्राप्तायाम् । तमः अपेदुहासते अपैवगच्छति । इदिति निपातोऽवधारणे । हासते इति ओहाङ्गतावित्यस्य लेटि रूपम् ॥ ३ ॥

पदानि ॥ सा । नः । अद्य । यस्याः । वयम् । नि । ते । यामन् । अविक्ष्महि ॥ वृक्षे । न । वसतिम् । वयः ॥ इति ॥ अथ व्याख्या ॥ सेति । सा रात्रिः । अद्य अस्मिन् दिवसे । नः अस्माकम् । प्रसीदत्विति शेषः ।

वृ॒क्षेन व॑स॒तिं वयः॑ ॥ ४ ॥

निग्रामा॑सो अविक्षत॒ निप॒द्वन्तो॒ निप॒क्षिणः॑ ॥
नि श्ये॒नास॑श्चिद॒र्थिनः॑ ॥ ५ ॥

या॒वया॑ वृ॒क्यं१॒वृकं॑ य॒वय॑स्ते॒नमू॑र्म्ये ॥
अथा॑नः सु॒तरा॑ भव ॥ ६ ॥

यस्याः रात्रेः । यामन् यामनि प्राप्तौ सत्याम् । ते तादृशाः प्रसादविषयीभूता इत्यर्थः । वयम् न्यविक्ष्महि सुखेन गृहे निवसामः ॥ अत्र दृष्टान्तः । वयः पक्षिणः । वृक्षे तरौ । न यथा । वसतिं निवासं । कुर्वन्तीति शेषः ॥ नेतिनिपातो यथार्थे ॥ ४ ॥

पदानि ॥ नि । ग्रामासः । अविक्षत । नि । पत्ऽवन्तः । नि । पक्षिणः ॥ नि । श्येनासः । चित् । अर्थिनः ॥ इति ॥ अथ व्याख्या ॥ निग्रामास इति । यस्याः प्राप्तौ ग्रामासो । ग्रामाः। ग्रामजना इत्यर्थः। ग्रामशब्दोत्र लक्षणया ग्रामजने वर्तते । यथा ग्राम आगत इत्युक्ते ग्रामजना आगता इत्यर्थः प्रतीयते । न्यविक्षत निविशन्ते शेरते इत्यर्थः । व्यत्ययेन लुङ् तथा पद्वन्तः पादवन्तो गवाश्वादयः । न्यविक्षत निविशन्ते । पक्षिणः न्यविक्षत । अर्थिनः सदा गतिशीलाः । ऋगतावित्यस्य रूपम् । श्येनाश्चित् श्येना अपि न्यविक्षत अहनि सञ्चारेण श्रान्तानि सर्वाण्यापि भूतानि रात्रिः स्वयमागत्य विश्रान्तिदानेन सुखयतीत्यर्थः ॥ ५ ॥

अथ पदानि ॥ यवय । वृक्यम् । वृकम् । यवय । स्तेनम् । ऊर्म्ये ॥ अथ । नः । सुऽतरा । भव ॥ इति ॥ अथ व्याख्या ॥ यावयेति । हे ऊर्म्ये रात्रिनामेतत् । हे रात्रे । वृक्यं वृकस्य स्त्रियम् । वृकं च । एतत्सर्वं हिंसकप्राण्युपलक्षणम् । यवय अस्मत्तः पृथक् कुरु । दूरं विद्रावयेत्यर्थः । यु अ-

उप॑ मा॒ पेपि॑ श॒त्तमः॑ कृ॒ष्णं व्य॑क्तमस्थित ॥
उष॑ ऋ॒णेव॑ यातय ॥ ७ ॥
उप॑ ते॒ गा इ॒वाक॑रं वृणी॒ष्व दु॑हितर्दिवः ॥
रा॒त्रि॒स्तोमं॒ न जि॒ग्युषे॑ ॥ ८ ॥ ॐम् ॥

इति रात्रिसूक्तम् ॥

मिश्रणे । तथा स्तेनं तस्करं च यवय । अथ च । त्वं नः सुतरा सुखेन तरणीया अतिक्रमणीया भव ॥ ६ ॥

अथ पदानि ॥ उप । मा । पेपिशत् । तमः । कृष्णम् । व्यक्तम् । अस्थित । उपः । ऋणाऽइव । यातय ॥ इति ॥ अथ व्याख्या ॥ उपेति । पेपिशत् । भृशं पिंशत् । सर्ववस्त्वाश्लिष्टमित्यर्थः ॥ कृष्णं कृष्णवर्णं । व्यक्तं स्पष्टस्वरूपम् । तमः ध्वान्तम् । मा माम् । उपा।स्थित उपस्थितम् । सङ्गतिकरणे आत्मनेपदम् । तत् त्वं उपः उपसि । सप्तम्यर्थे द्वितीया ऋणेव ऋणानीव यातय अपगमय ॥ यथा स्तोतॄणामृणानि धनदानेनापाकरोषि तथा तमः अपाकुर्वित्यर्थः ॥ ७ ॥

अथ पदानि ॥ उप । ते । गाः । इव । अकरम् । वृणीष्व । दुहितः । दिवः ॥ रात्रि । स्तोमं । न । जिग्युपे ॥ इति ॥ अथ व्याख्या ॥ उपेति । हे दिवो दुहितः रात्रि । रात्रेः प्रथममाकाशे प्रकटनाद्दिवो दुहितृत्वम् ॥ ते तुभ्यम् । गा इव स्तुतिवाच इव । हविरिति शेषः । उपाकरम् उपकरोमि अर्पयामीत्यर्थः । तत् हविः । जिग्युषे । त्वत्प्रसादाच्छत्रून् जिग्युषो मम । षष्ठ्यर्थे चतुर्थी । स्तोमं न, स्तुतिमिव । वृणीष्व स्वीकुरुष्व ॥८॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
रात्रिसूक्तभाष्यम् समाप्तम् ॥

अथ नवार्णमन्त्रः ॥

नवार्णमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । गायत्र्युष्णिगनुष्टुभश्छन्दान्सि । महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । नन्दाशाकम्भरीभीमाः शक्तयः । रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि । अग्निवायुसूर्यास्तत्त्वानि । वेदत्रयपाठफलावाप्तिपूर्वकसर्वेष्टसिध्यर्थे देवीमाहात्म्यसम्पुटीकरणपूर्वांशत्वेन जपे विनियोगः ॥ अथ ऋष्यादिन्यासः ॥ ब्रंह्मविष्णुमहेश्वरेभ्य ऋषिभ्यो नमः इति मध्यमातर्जन्यङ्गुष्ठाग्रैः शिरसि न्यसेत् । गायत्र्युष्णिगनुष्टुभ्यश्च्छन्दोभ्यो नमः इति कनिष्ठानामिकाङ्गुष्ठाग्रैर्मुखे न्यसेत् । महाकालीमहालक्ष्मीमहासरस्वतीभ्यो देवताभ्यो नमः इति दक्षिणकरतलेन हृदये । नन्दाशाकम्भरीभीमाभ्यः शक्तिभ्यो नमः इति पञ्चाङ्गुल्यग्रैर्दक्षिणस्तने । रक्तदन्तिकादुर्गाभ्रामरीभ्यो बीजेभ्यो नमः इति तथैव वामस्तने । अग्निवायुसूर्येभ्यस्तत्त्वेभ्यो नमः इति तथैव हृदये । वेदत्रयपाठफलावाप्तिपूर्वकसर्वेष्टसिध्यर्थे देवीमाहात्म्यसम्पुटीकरणपूर्वांशत्वेन जपे विनियोगाय नमः इति हृदये करद्वयाञ्जलिं कुर्वन् तत्र न्यस्तं भावयेत् ॥ इति ऋष्यादिन्यासः ॥ अत्र चण्डीस्तवे च ह्रीं चण्डिकायै इति मन्त्रन्यासस्योक्तत्वेपि सर्वादावेव तस्य कृतत्वेन पुनः प्रसक्त्यभावान्न पुनरुच्यते ॥ अथ मन्त्रन्यासास्तत्रादावङ्गुष्ठादिः । ॐ ऐं अङ्गुष्ठाभ्यां नमः । ॐ ह्रीं तर्जनीभ्यां नमः । ॐ क्लीं मध्यमाभ्यां नमः । ॐ चामुण्डायै अनामिकाभ्यां नमः । ॐ विच्चे कनिष्ठिकाभ्यां नमः । ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे, करतलकरपृष्ठाभ्यां नमः ॥ इत्यङ्गुष्ठादिः ॥ अथ हृदयादिषडङ्गः ॥ ॐ ऐं हृदयाय नमः । इति तर्जनीमध्यमानामिकाग्रैर्हृदये न्यसेत् । ॐ ह्रीं शिरसे स्वाहा । इति तर्जनीमध्यमाग्राभ्यां शिरसि । ॐ क्लीं शिखायै वषट् । इति मध्यमातर्जन्यङ्गुष्ठाग्रैः शिखायाम् । ॐ चामुण्डायै कवचाय हुम् । इति दशाङ्गुलिभिः स्कन्धादिनाभ्यन्तं व्यापकत्वेन न्यसेत् । ॐ विच्चे नेत्रत्रयाय वौषट् । इति तर्जनीमध्यमानामिकाग्रैर्नेत्र-

अथ ध्यानानि ॥

खड्गं चक्रगदेषुचापपरिघाञ् शूलं भुशुण्डीं शिरः ।
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां ।
यामस्तौच्छयिते हरौ कमलजो हन्तु मधुं कैटभम् ॥१॥

त्रये न्यसेत् । तत्र तर्जन्यनामिकाभ्यां दक्षिणवामनेत्रयोर्मध्यमया ललाटनेत्रस्थाने च युगपन्न्यासः । ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट् । इति प्रसारिताभ्यां हस्ताभ्यां तालत्रयं कृत्वात्मनः परितश्छोटिकाशब्दैर्दिग्बन्धं चरेत् ॥ इति हृदयादि षडङ्गः ॥ अथ तर्जन्यङ्गुष्ठाग्राभ्यामक्षरन्यासः ॥ ॐ ऐं नमः शिखायाम् । ॐ ह्रीं नमः दक्षिणनेत्रे । ॐ क्लीं नमः वामनेत्रे । ॐ चां नमः दक्षिणकर्णे । ॐ मुं नमः वामकर्णे । ॐ डां नमः दक्षिणनासापुटे । ॐ यैं नमः वामनासापुटे । ॐ विं नमः मुखे । ॐ च्चें नमः गुदे । इत्यक्षरन्यासः । ततः समस्तमन्त्रेण सर्वाङ्गेऽष्टवारं व्यापकं कुर्यात् ॥

इति न्यासविधिः ॥

अथ महाकालीध्यानमाह । खड्गमिति । करैः खड्गादीनि दशायुधानि सन्दधतीं धारयन्तीम् । तत्र खड्गचक्रगदाः प्रसिद्धाः । इषुर्बाणः । चापो धनुः । परिघो लोहपत्रवेष्टितो लगुडः । परिघपदव्युत्पत्तिः कवचव्याख्यायां दर्शिता । चक्रादिपरिघान्तानां पञ्चानां द्वन्द्वैकवद्भावाभावश्छान्दसः । शूलं प्रसिद्धम् । भृशुण्डीलक्षणम**भिधानचिन्तामणि**परिशिष्टे । भृशुण्डी स्याद्दारुमयी वृत्ताऽयःकीलसञ्चितेति । अन्यत्र तु उड्डीयोड्डीय च प्राप्य नन्दती दशकर्त्रिका ॥ क्रमते चानताङ्गी या सा भुशुण्डीति कथ्यते ॥ इत्युक्तम् ॥ शिरः च्योतद्रुधिरं नृशीर्षम् । शीर्षं निश्च्योतद्रुधिरं दधौ इति रहस्योक्तेः । अस्य शत्रूणां भयजनकत्वेनोपयोगः । शङ्खः प्रसिद्धः । दशायुधत्वाद्दशभुजेयम् ।

अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुः कुण्डिकां ।

दशवक्त्रा दशभुजेति **रहस्यं** च। आयुधानां रहस्योक्तक्रमविरोधश्छन्दोऽनुरोधात्। त्रिनयनां प्रतिवक्त्रं त्रिनेत्राम्। तेन त्रिंशल्लोचनाम्। विशालया रोचमाना त्रिंशल्लोचनमालयेति **रहस्योक्तेः**। सर्वाङ्गभूषावृताम् सर्वेष्वङ्गेषु भूषणैर्युक्ताम्। नीलाश्मा नीलमणिः तस्येव द्युतिर्यस्यास्तां नीलाश्मद्युतिम्। कृष्णवर्णामित्यर्थः। आस्यानां पादानां च दशके यस्यास्तामास्यपाददशकाम्। दशास्यां दशपादां चेत्यर्थः। एवंविधां महाकालिकां महाकालीनाम्नीं देवीम्। स्वार्थिकः कन्। अहं भजे सेवे ध्यायामीति। यावत्। एवं स्वरूपलक्षणमुक्त्वा तटस्थलक्षणमाह-यामिति। यां महाकालिकां। कमलजो विष्णुनाभिकमलोत्पन्नो ब्रह्मा। हरौ विष्णौ शयिते सुप्ते सति। योगनिद्रां गते सतीत्यर्थः। मधुं कैटभं च तन्नामानौ विष्णुकर्णमलोद्भूतौ दैत्यौ हन्तुं, स्तुतिप्रसन्नया योगनिद्रारूपया तया देव्या निर्मुक्तेन विष्णुना घातयितुमित्यर्थः। अस्तौत् त्वं स्वाहा त्वं स्वधेत्यादिश्लोकैः स्तुतवान्। ष्टुञ् स्तुतौ आदादिकः। तस्माल्लङ्॥ (अथ पाठान्तरादि) परिघानित्यत्र परिघमिति, भृशुण्डीमित्यत्र भुशुण्डीमिति, भूषावृतामित्यत्र भूषाभृतमिति च क्वचित्पाठः। शयिते इत्यत्र स्वपिते इति पाठस्तु प्रामादिकः। स्वपोऽनिट्कत्वात्सम्प्रसारणेन सुप्ते इति रूपस्य जायमानत्वात्। चतुर्थपादस्थाने यां हन्तुं मधुकैटभौ जलजभूस्तुष्टाव सुप्ते हरावित्यपि क्वचित्पाठो दृश्यते सचाप्ययुक्तः। यामित्यस्य हन्तुमित्यनेन, तुष्टावेत्यस्य मधुकैटभावित्यनेन च सह सन्निकर्षात् यां हन्तुं मधुकैटभौ तुष्टावेति विरुद्धार्थस्य प्रतीतिसम्भवात्॥ १॥

अथ महालक्ष्मीध्यानमाह। अक्षस्रगिति। अक्षस्रगादि सुदर्शनान्तान्यायुधानि हस्तैर्दधतीम्। अक्षस्रक्परशू इति द्विवचनम्। अक्षस्रजः सेनाङ्गत्वाभावान्न परशुना सह द्वन्द्वैकवद्भावः। अक्षस्रङ् मणिमाला। परशुः कुठारः।

दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां ।
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सुरौजो भवाम् २

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुस्सायकं ।

गदेषुकुलिशमितिसमाहारे क्लीबत्वमेकवचनान्तत्वं च । तत्र गदा प्रसिद्धा । इषुः शरः । कुलिशं वज्रम् । पद्मं धनुश्च प्रसिद्धे । कुण्डिकां कमण्डलुम् । अस्त्री कमण्डलुः कुण्डीत्यमरः । स्वार्थे कन् । केण इति ह्रस्वः । दण्डः कालदण्डः कालदण्डाद्यमो दण्डमिति वक्ष्यमाणत्वात् । शक्तिः कवचव्याख्यायां व्याख्याता । असिः खड्गः । चर्म खेटकम् । जलजोऽत्र शङ्खः । पद्मस्य पूर्वमुक्तत्वात् । घण्टा प्रसिद्धा । सुराभाजनं मदिरापूर्णपात्रम् । शूलं त्रिशूलम् । पाशो बन्धनसाधनम् । सुदर्शनं चक्रम् । आयुधानामष्टादशसङ्ख्याकत्वादष्टादशभुजेयम् । अष्टादशभुजा पूज्या सा सहस्रभुजा सतीति रहस्यं च । प्रवालं विद्रुमं किसलयं वा । तस्येव प्रभा यस्यास्तां प्रवालप्रभाम् । अरुणवर्णामित्यर्थः । सुरौजोभवां देवतेजःसमुद्भूताम् ओजो दीप्तौ प्रभावे चेत्यमरः । सैरिभो महिषः । लुलायो महिषो वाह द्विषत्कासरसैरिभाः इत्यमरः । अत्र सैरिभशब्देन महिषासुरो गृह्यते । तं मृद्नाति चूर्णयति मारयतीति सैरिभमर्दिनी, ताम् । महालक्ष्मीं तदाख्यां देवीं इहास्मिन् कर्मणि भजे सेवे ध्यायामीत्यर्थः॥ (अथ पाठान्तरादि) अक्षस्रक्परशुमिति पाठे अक्षस्रक्सहितं परशुमिति मध्यमपदलोपीसमासः । प्रवालप्रभामित्यत्र प्रसन्नाननामिति पाठो न युक्तः । पूर्वोत्तरयोर्द्वयोरिवास्या अपि वर्णकथनस्यावश्यकत्वात् । सुरौजोभवामित्यत्र सरोजस्थितामिति क्वचित् पाठः ॥२॥

अथ महासरस्वतीध्यानमाह घण्टेति । हस्ता अब्जानीव हस्ताब्जानि उपमितसमासः । तैः घण्टादिसायकान्तान्यष्टायुधानि दधतीम् । तत्र

हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्॥
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥३॥

इति ध्यानानि ॥

घण्टा प्रसिद्धा । शूलं त्रिशूलम् । हलं लाङ्गलम् । शङ्खमुसले चक्रं धनुश्च प्रसिद्धानि । सायको बाणः । अष्टायुधत्वादष्टभुजेयम् । घनान्ते मेघकालान्ते शरदीत्यर्थः । विलसन् प्रकाशमानो यः शीतांशुश्चन्द्रस्तत्तुल्या प्रभा कान्तिर्यस्यास्ताम् । श्वेतवर्णामित्यर्थः । गौर्याः पार्वत्या देहात्समुद्भवः कौशिकीनाम्ना उत्पत्तिर्यस्यास्ताम् । त्रिजगतां स्वर्गमृत्युपाताललोकानाम् । सप्तर्षय इतिवत्समासस्य संज्ञारूपत्वान्न द्विगुः । तेन नैकवचनम् । आधारभूतामाधिष्ठानरूपाम् । भूतं क्ष्मादौ पिशाचादौ जाते रूपे समेऽपि चेति **शब्दार्णवः** । शुम्भादीन् शुम्भप्रमुखान् दैत्यानर्दयति हिनस्तीति शुम्भादिदैत्यार्दिनी ताम् । अर्द हिंसायां चुरादिः । महापूर्वां सरस्वतीं महासरस्वतीमित्यर्थः । हिरण्यपूर्वं कशिपुं प्रचक्षते, दशपूर्वरथं यमाख्ययेत्यादाविवात्रापि वाक्यस्य संज्ञाबोधकत्वम् । महा इति महच्छब्दस्य कृतात्वस्य निर्देशः । अत्र जपकर्मणि । अनुभजे सेवे ध्यायामीत्यर्थः ॥ (अथ पाठान्तरादि) त्रिजगतामित्यत्र त्रिनयनामिति पाठो न रुचिरः आधारभूतामित्यस्यान्वयपूर्तये षष्ठ्यन्ताधेयबोधकपदस्यावश्यकत्वात् शुम्भशब्दं दन्त्यादित्वेन केचित्पठन्ति तद्विषये पञ्चमाध्यायव्याख्यायां विचारयिष्यते ॥ ३ ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
नवार्णमन्त्रध्यानश्लोकव्याख्या ॥

अथ पञ्चमहाभूतबीजैर्मानसपूजा ॥

अस्या एतैर्बीजैरेव विधाने प्रयोजनं प्राग्जपप्रकाशे उक्तम् ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः । लं पृथिव्यात्मकान् गन्धान् कल्पयामि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः हं आकाशात्मकानि पुष्पाणि कल्पयामि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः यं वाय्वात्मकं धूपं कल्पयामि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः रं अग्न्यात्मकं दीपं कल्पयामि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः वं अमृतात्मकं नैवेद्यं कल्पयामि ॥ इति मानसोपचारैः सम्पूज्य । ॐ ह्रीं सिध्द्यै नमः इति मन्त्रेण रुद्राक्षस्फटिकविद्रुमादिमणिमालां गन्धपुष्पादिभिरभ्यर्च्य । ॐ महामाले महामाये चतुवर्गस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ इति मालां दक्षिणहस्ते गृहीत्वा, वस्त्रेणाच्छाद्य, हृदये धृत्वा । मानसजपे अनामिकामध्यपर्वणि, उपांशुजपे मध्यमामध्यपर्वणि, वाचिकजपे तर्जनीमध्यपर्वणि मालामणीन् परिवर्तयन्, मेरुं न लङ्घयन्, वक्ष्यमाणं मन्त्रार्थं चिन्तयन्, जपमध्ये क्षुतजृम्भाधःपवनादिष्वाचमन्, दक्षिणकर्णं वास्पृशन्, हस्तान्मालापतने मालां प्रक्षाल्य मध्ये उत्थाने षडङ्गं कृत्वा च पुनर्जपन् अष्टोत्तरशतं नवार्णमन्त्रं जपेत् ॥ जपान्ते प्रणवमुक्त्वा, त्वं माले सर्वदेवानां प्रीतिदा शुभदा यतः ॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥ इति मालां शिरसि धृत्वा ततो यथास्थानं स्थापयेत् ॥ जपान्ते पुनः, ॐ ऐं हृदयाय नमः । ॐ ह्रीं शिरसे स्वाहा । ॐ क्लीं शिखाय वषट् । ॐ चामुण्डायै कवचाय हुम् । ॐ विच्चे नेत्रत्रयाय वौषट् । ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट् । इत्युत्तरषडङ्गं न्यासं कुर्यात् ॥ अत्र नवार्णस्याङ्गत्वाज्जपनिवेदनादिकं न । किन्तु मूर्तिरहास्यान्ते एव ॥ **इतिनवार्णमन्त्रस्य जपविधानम्** ॥

अथ नवार्णमन्त्रस्य व्याख्या ॥ अस्य मन्त्रस्य ऐं ह्रीं क्लीं । इति बीजत्रयं त्रीणि पदानि । चामुण्डायै, विच्चे इति च द्वे । एवं पञ्च पदानि । तत्र ऐं बीजं महाकाल्याः । ह्रीं बीजं महालक्ष्म्याः । क्लीं बीजं महासरस्वत्याः ॥ यद्यपि लोके काल्याः क्रीं बीजम् । लक्ष्म्याः श्रीं बीजम् । सरस्वत्याश्च ऐं बीजं प्रसिद्धम् । तथापि महाकालीदेवताके सप्तशतीप्रथमचरिते ऐमित्यस्य महालक्ष्मीदेवताके मध्यमचरिते ह्रीमित्यस्य महासरस्वतीदेवताके उत्तमचरिते च क्लीमित्यस्य बीजत्वेनोक्तत्वात्, तत्रान्तरे तैरेवबीजैस्तेषु चरितेषु न्यासस्योक्तत्वात् । महाकाल्यादिदेवतात्रयपूजायां तेषामेव क्रमेण मन्त्रत्वकथनाच्च, डामरादितन्त्रेषूक्तस्य, देव्यः प्रोक्ता महापूर्वाः काली लक्ष्मीःसरस्वती॥ इति नवार्णदेवतात्रयस्य बीजक्रमेणैवोक्तिरितिकल्पनाया युक्तत्वात्, केवलकालीलक्ष्मीसरस्वतीनां क्रमेण क्रीं श्रीं ऐं बीजानि । प्राधानिकरहस्योक्तानां महाकालीमहालक्ष्मीमहासरस्वतीनां च नवार्णोक्तानि क्रमेण ऐं ह्रीं क्लीं बीजानीति व्यवस्था ज्ञेया ॥ अथ वाचकं देवतानां यदक्षरं बीजमुच्यते ॥ इति **त्रिशतीभाष्ये** वचनात्, ॐकारवाच्यः ह्रींकारवाच्येत्यादि प्रयोगदर्शनाच्च बीजानां स्वस्वदेवतावाचकत्वस्य सिद्धत्वादुक्तबीजैर्महाकाल्यादिदेवतानां ग्रहणम्। एषां चतुर्थ्येकवचनान्तचामुण्डापदविशेषणत्वात् चतुर्थ्येकवचनान्तत्वम् । स्वरादेराकृतिगणत्वेनाव्ययत्वाद्विभक्तिलोपः । चामुण्डायै पदमादिशक्तिपरम् । यद्यपि यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ॥ चामुण्डेति ततो लोके ख्याता देवी भविष्यसीति **देवीमाहात्म्यस्थ** कौशिकीवचनेन, तथा, देवी तु त्रिशिखेनाजौ तं रुरुं समताडयत् ॥ तया तु ताडितस्यास्य दैत्यस्य नृप तत्क्षणे ॥ चर्ममुण्डे उभे सम्यक् पृथक्भूते बभूवतुः ॥ ते गृहीत्वाचरद्देवी चामुण्डा तेन चाभवदिति **वाराहवचनेन** च चामुण्डाशब्दो विकृत्यात्मकदेवीविशेषपरो दृश्यते । तथापि महालक्ष्मीः शिवा दुर्गा चामुण्डा सर्वमङ्गला ॥ चण्डिकाम्बेत्यादिशब्दैरादिशक्तिरुदीर्यते ॥

इति देवीभागवंतवचनात्, तथा चमत्यत्ति सर्वं चराचरमिति चामुः परमात्मा। यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनकमिति श्रुतेः। अत्ति यो जगदिति **पुराणाच्च**। चमु अदने इत्यस्मादुण्प्रत्यये चामुरिति रूपम्। श्रुतौ ब्रह्मक्षत्रशब्दौ चराचरोपलक्षकौ। अतएव भगवता **श्रीव्यासेन** अत्ता चराचरग्रहणादिति सूत्रितम्। चामुं डाति लाति आदत्ते वशीकुरुते इति चामुण्डा पदव्युत्पत्तेश्चात्र चामुण्डापदमादिशक्तिपरमेव। चामुमित्यत्र द्वितीयायाच्छान्दसः अलुक्, मुमागमो वा। विच्चे इत्येतत्स्वरादेराकृतिगणत्वान्नमस्कारार्थमव्ययम्। बहुषु मन्त्रेषु चतुर्थ्यन्तदेवतानामान्तेऽस्य प्रयोगादुक्तार्थं विनान्यार्थकल्पनेऽधिकस्वारस्यादर्शनात्। तद्योगे पूर्वपदस्य चतुर्थी तु हृदयादिन्यासे कवचाय हुम्, नेत्रत्रयाय वौषट्, अस्त्राय फट् इत्यादिषु हुमादियोगे कवचादिपदेभ्य इव ज्ञेया। तथा च महाकालीमहालक्ष्मीमहासरस्वत्यात्मिकायै आदिशक्तये नमः इति मन्त्रार्थो भवति ॥ अथ वा विच्चे इत्येतदाबन्तविच्चाशब्दस्य सम्बुध्यन्तं रूपम्। अमोघां चैव विच्चां च तथेशां क्लिन्नदेवताम् ॥ इत्यादिभगमालिनीनित्यादिमन्त्रदेवतासु विच्चानाम्न्या देवताया दर्शनात्, वित् ज्ञानं तच्चिनोत्युपासकजनेभ्यः समर्पयतीत्यर्थे चिनोते 'रन्येभ्योपि दृश्यते, इति डप्रत्ययेऽदन्तत्वात् टापि विच्चेति तद्व्युत्पत्तिसम्भवाच्च। चतुर्थीबलाच्च ह्रीं चण्डिकायै इत्यादिमन्त्रेष्विव नमः शब्दस्य, विच्चे इति सम्बुद्धिबलाच्च तुभ्यमित्यस्याध्याहारः। अस्मिन् पक्षे हे ज्ञानप्रदे देवि महाकाल्याद्यात्मिकायै आदिशक्तये तुभ्यं नम इति मन्त्रार्थः पर्यवस्यति ॥ इत्येकोऽर्थः ॥

डामरतन्त्रेऽस्य मन्त्रस्य, निर्धूतनिखिलध्वान्ते नित्यमुक्ते परात्परे ॥ अखण्डब्रह्मविद्यायै चित्सदानन्दरूपिणि ॥ अनुसन्दध्महे चण्डि वयं त्वां हृदयाम्बुजे ॥ इत्थं विशदयत्यर्थं कल्याण्येषा नवाक्षरी ॥ इत्यर्थ उक्तः। स च यथामति मन्त्राक्षरैः स्फुटीक्रियते ॥ एतत्पक्षेऽपि मन्त्रस्य प्राग्वत् पञ्चैव पदानि। निर्धूतनिखिलध्वान्ते इत्यादि सम्बुध्यन्तविशेषणत्रयेण

क्रमाद्बीजत्रयस्यार्थो दर्शितः । तेन बीजानां स्त्रीलिङ्गत्वं सम्बुध्यन्तत्वं च ज्ञेयम् । स्वरादेराकृतिगणत्वेनैषामव्ययत्वाद्विभक्तिलोपः । तत्र निर्धूतनिखिलध्वान्ते इत्येतदैंबीजस्य व्याख्यानम् । आ–समन्तात्, एः तेजो यस्याः सा ऐः । आङीषदर्थेऽभिव्याप्तावित्यमरः । एकारस्तेजसि जले इत्येकाक्षररत्नमाला च। उक्तबहुव्रीहिणा ऐकारस्य अभिव्यापकतेजोविशिष्टत्वमर्थः। तेन तस्य निर्धूतनिखिलध्वान्ते इति व्याख्यानमुचितमेव। वर्णानां बीजत्वसिध्यर्थं तदुपरि बिन्दुदानस्य चण्डिकार्चनरहस्ये उक्तत्वादत्रानुस्वारस्य बीजत्वमात्रलक्षकत्वेन तस्य वाक्यार्थे नास्ति कश्चिदुपयोगः । एवमग्रेऽपि ज्ञेयम् । नित्यमुक्ते इति ह्रीं बीजस्य व्याख्यानम् । अस्मिन् बीजे हकाररेफेकारबिन्दवश्चत्वारो वर्णाः । तत्र हकारस्याकाशवाचित्वात्तस्य च नित्यत्वात्तद्गतं नित्यत्वं लक्ष्यते । रेफस्याग्निवाचकत्वात्तेन च सर्वकर्मणां दाहान्मुक्तत्वं च । ईकार उभयोः सामानाधिकरण्यद्योतकः । तेन नित्यमुक्ते इत्यत्र नित्या चासौ मुक्ता चेति कर्मधारयः सूचितः ॥ कर्मधारयत्वात्पूर्वपदस्य पुंवद्भावः। बिन्दोर्बीजत्वलक्षकत्वम् । ह्रीं बीजार्थः स्वच्छन्दपद्धतौ । खवाचकहकारेण त्रिकालाबाध्यता मता ॥ सर्वकर्मविदाहश्च रेफेनानलवाचिना ॥ ईकारेणोभयोरैक्यं बिन्दुर्बीजत्वलक्षकः ॥ ह्रीं बीजार्थस्ततो ब्रह्मयोगिभिस्तेन जप्यते ॥ इति ॥ हकाररेफोत्तरवर्त्यकारलोपः पृषोदरादित्वात् ॥ परात्परे इति क्लींबीजस्य व्याख्यानम् । अत्र ककारलीकारबिन्दवस्त्रयो वर्णाः । कं शिरोऽम्बुसुखे क्लीबमित्यैकाक्षरः । लीङ् श्लेषणे इतिधातोर्भावे क्विपि लीः । लीः श्लेषे पि लयेऽपिचत्येकाक्षरनिघण्टः । तथा च कानां सर्वसुखानां सर्वानन्दानामिति यावत् लीः श्लेषः सम्बन्धो लयो वा यस्मिन् स क्लीर्ब्रह्मानन्दः । एतस्यैवानन्दस्य सर्वे मात्रामुपजीवन्तीति श्रुतेः । अथ सर्वेषां प्राणिनां सुखार्थमेव सर्वप्रवृत्तीनां सत्त्वेन सर्वविषयापेक्षया सुखस्यैव परत्वात्तस्य चानन्दशब्दवाच्यत्वात् परशब्देनात्रानन्द उच्यते । श्रुतौ मानुषानन्दमार-

भ्योत्तरोत्तरं शतगुणाधिकान् प्राजापत्यान्तानानन्दानुक्त्वाऽन्ते 'स एको ब्रह्मण आनन्द, इति सर्वानन्दापेक्षया ब्रह्मानन्दस्यैव परत्वोक्तेः परात्परो ब्रह्मानन्दः ततश्चक्लीम्बीजस्य तत्समानार्थत्वात् तस्य परात्परे इति ब्रह्मानन्दपरत्वेन व्याख्यानं कृतम् । बिन्दोर्बीजत्वलक्षकत्वम्, ककारोत्तरवर्त्यकारलोपश्च प्राग्वत् ॥ अखण्डब्रह्मविद्यायै इत्येतच्चामुण्डायै इति पदस्य व्याख्यानम् । चमति कर्मफलं भुङ्क्ते इति चामुर्जीवः । तयोरन्यः पिप्पलं स्वाद्वत्तीति श्रुतेः । चामुपदव्युत्पत्तिः प्रागुक्ता । तं डाति डलयोरैक्याल्लात्यादत्ते अज्ञाननाशेनानुगृह्णातीति यावत् । चामुण्डा ब्रह्मविद्या । अखण्डेति विशेषणपदमभेदार्थकम् । तेनाद्वैतब्रह्मविद्येति तदर्थ । तादर्थ्ये चतुर्थी । अद्वैतब्रह्मविद्याधिगमार्थमित्यर्थः । चित्सदानन्दरूपिणीति विच्चे पदस्य व्याख्यानम् । अत्र वित्, चा, ई, इति पदत्रयम् । तत्र ज्ञानार्थकस्य वित् पदस्य तत्समानार्थकेन चित्पदेन व्याख्यानम् । आबन्तश्चा दिविस्मृत इत्येकाक्षररत्नमालाकोशाच्चाशब्द आकाशवाचकः । आकाशस्य च नित्यत्वा न्नित्यस्यैव सत्तावत्त्वाच्च सत्पदेन तद्व्याख्य नम् । ई रत्यां मदिरामोहे महानन्दे शिरोभ्रमेत्येकाक्षरकोशादीकारो महानन्दवाचकः । ततश्च पदत्रयस्य कर्मधारयद्वये विच्चे इति समस्तं पदम् । तस्मात्प्रयुक्तस्य सम्बुद्धेःसुप्रत्ययस्य एङ्ह्रस्वादिति लोपे विच्चे इति सम्बुद्ध्यन्तम् । हे चित्सदानन्दरूपिणि इति तदर्थः । अनुसन्दध्महे इत्यादिः शेषोऽध्याहारलभ्यः । तत्र श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति श्रुतेः सच्चिदानन्दब्रह्मणः श्रवणमनननिदिध्यासनैरनुसन्धानं विना अखण्डब्रह्मविद्याधिगमस्य दुःसाध्यत्वान्मन्त्रर्षीणां ब्रह्मविष्णुशिवानां त्रित्वाच्च । अनुसन्दध्महे इति बहुवचनान्तक्रियापदस्याध्याहारः । अनुसन्धानं च चिन्तनम् निर्धूतनिखिलध्वान्ते इत्यादिसम्बुध्यन्तविशेषणानाम् सम्बधबोधनार्थं विशेष्यरूपस्य सम्बुध्यन्तस्यादिशक्तिवाचकस्य चण्डीपदस्याध्याहारः । अनुसन्धानक्रियायाः कर्त्रपेक्षणात् अध्याहृतस्य अनुसन्दध्महे इति क्रियापदस्योत्तमपुरुषबहुवच-

नान्तत्वाद्वयमितिकर्तृपदस्य कर्मापेक्षणाच्च पूर्वोक्तसम्बुध्यन्तविशेषणानुरोधेनाध्याहृतस्य सम्बुध्यन्तचण्डीपदरूपविशेष्यस्य युष्मच्छब्दैकवचनार्थेन सामानाधिकरण्यात्त्वामिति कर्मपदस्य अनुसन्धानक्रियाया हृदयाधिकरणकत्वात् हृदयाम्बुजे इत्यस्य चाध्याहारः। तथा च हे निर्धूतनिखिलध्वान्ते नित्यमुक्त परात्परे चित्सदानन्दरूपिणि चण्डिके त्वां वयं ब्रह्मविष्णुमहेश्वरा अद्वैतब्रह्मविद्याधिगमार्थं हृदयाम्बुजे चिन्तयामः। इति मन्त्रार्थः फलितः॥ इति द्वितीयोऽर्थः॥

रहस्यतन्त्रे तु। ज्ञात्वा नवाक्षरं मन्त्रं जीवब्रह्मसमाश्रयम्॥ तत्त्वमस्यादिवाक्यानां सारं संसारभेषजम्॥ इति जीवब्रह्मणोरभेदएवास्य मन्त्रस्यार्थो वर्णितः। सोपि यथाप्रज्ञं प्रदर्श्यते॥ अस्मिन् अर्थे मन्त्रस्य पूर्ववद्बीजत्रयं त्रीणि पदानि। ततः चा अमुण्डा अयै विच्चे इति चत्वारि। एवं सप्तपदानि॥ बीजत्रयस्य प्राग्वत् क्रमेण निर्धूतनिखिलध्वान्तत्वं नित्यमुक्तत्वम् परात्परत्वं चार्थः। ईदृशलक्षणत्रयस्य ब्रह्मण्येव समन्वयात् बीजत्रयेण परं ब्रह्म लक्ष्यते। बीजानामव्ययत्वादत्र तेषां द्वितीयान्तत्वम्। चः पुंसि चेतने चन्द्रे इत्यकाक्षररत्नमालाकोशात् चकारश्चेतनवाचकः। चेतनो जीवः द्वितीयैकवचनान्तस्य तस्य “ या देव विप्र ता त्वा ” इति मन्त्रे यं तमित्यत्र सुपां सुलुगित्यनेन अम आकारदेशेन या ता इतिवत् चमित्यस्य चा इति रूपम्। जीवमिति तदर्थः। मुडि खण्डने इति धातोर्भावे घञि मुण्ड इति रूपम्। खण्ड इति तदर्थः। खडि भेदे इत्यनेन खण्डपदस्य भेदार्थकत्वान्मुण्डपदस्य भेदोऽर्थः। न विद्यते मुण्डो भेदो ययोस्तावमुण्डौ। अत्रापि द्वा सुपर्णा इतिवत् औकारस्याकारादेशे अमुण्डा इति रूपम्। अभिन्नौ इति तदर्थः। अयै इत्येतत् अय् गतावित्यस्य लोडुत्तमैकवचनम्। तच्च ब्रह्मादित्रयस्य मन्त्रर्षित्वाद्व्यत्ययेन बहुवचने पर्यवस्यति। गत्यर्थानां ज्ञानार्थत्वाज्जानामहे इति तदर्थः। प्रार्थनायां लोट्। वि इत्येतद्विच्चानाम्न्या

देवतायाः सम्बोधनम् । अद्वैतज्ञानप्रदे, चित्सदानन्दरूपिणि इति वा तदर्थः पूर्वमुक्तः ॥ ततश्च हे अद्वैतज्ञानदायिनि चित्सदानन्दरूपिणि वा चण्डिके निर्धूतनिखिलध्वान्तं नित्यमुक्तं परात्परं ब्रह्म जीवं च अभिन्नौ जानामहै ॥ तथानुगृह्णीष्वेति शेषः इति मन्त्रार्थः । यद्यप्यत्रार्थे तत्त्वमस्यादिमहावाक्यापेक्षया देवताप्रार्थनारूपोऽधिकोऽर्थो दृश्यते तथाप्यस्य नवार्णस्य चण्डिकामन्त्रत्वात् मन्त्रे च मन्त्रदेवताया नमस्कारप्रार्थनादिरूपार्थस्यावश्यकत्वात्तावानधिकार्थांशो न बाधकः । अत एव तन्त्रे तत्त्वमस्यादिवाक्यानां सारमित्युक्तम् । **इति तृतीयोर्थः** ॥ बीजघटिततान्त्रिकमन्त्राणां विवक्षितार्थपरतया व्याख्याने क्लिष्टार्थतादिदोषा दुष्परिहरा इति विदितमेव विदुषाम् ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे नवार्णमन्त्रव्याख्या ॥ इति पूर्वाङ्गपञ्चकम् ॥

अथ देवीमाहात्म्यम् ॥ तत्रादौ तत्साधनक्रमः ॥ देवीमहात्म्यस्य प्रथममध्यमोत्तमचरितानां क्रमेण ब्रह्मविष्णुरुद्रा ऋषयः ॥ गायत्रीपङ्क्त्यनुष्टुभश्छन्दांसि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि ॥ नन्दाशाकम्भरीभीमाः शक्तयः ॥ अग्निवायुसूर्यास्तत्त्वानि ॥ धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥ **अथ ऋष्यादिन्यासः** ॥ ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो नमः इति संहताङ्गुष्ठतर्जनीमध्यमाग्रैः शिरसि न्यस्सेत् ॥ गायत्रीपङ्क्त्यनुष्टुब्भ्यश्छन्दोभ्यो नमः इति कनिष्ठानामिकाङ्गुष्ठाग्रैः संहतैर्मुखे ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो देवताभ्यो नमः इति हस्ततलेन हृदये ॥ रक्तदन्तिकादुर्गाभ्रामरीभ्यो बीजेभ्यो नमः इति सर्वाङ्गुल्यग्रैः संहतैर्वामस्तने ॥ नन्दाशाकम्भरीभीमाभ्यः शक्तिभ्यो नमः इति तथैव दक्षिणस्तने ॥ अग्निवायुसूर्येभ्यस्तत्त्वेभ्यो नमः तथैव हृदये ॥ धमार्थकाममोक्षार्थे जपे विनियोगाय नमः इति कराञ्जलौ । इति हृदयेऽञ्जलिं कुर्वंस्तत्र न्यस्तं

भावयेत् ॥ **इति ऋष्यादिन्यासः** ॥ **अथ सप्तशतीश्लोकन्यासः** ॥ ॐ खड्गिनी शूलिनी० ॥ १ ॥ अङ्गुष्ठाभ्यां नमः ॥ ॐ शूलेन पाहि नो० ॥१॥ प्राच्यां रक्ष० ॥२॥ सौम्यानि० ॥ ३ ॥ खड्गशूल० ॥ ४ ॥ तर्जनीभ्यां ॥ ॐ सर्वस्वरूप० ॥ १ ॥ एतत्ते वदनं० ॥ २ ॥ ज्वालाकराल० ॥ ३ ॥ हिनस्ति दैत्य० ॥ ४ ॥ असुरासृग्वसा० ॥ ५ ॥ मध्यमाभ्यां० ॥ ॐ खड्गिनी-शूलिनी० ॥ १ ॥ अनामिकाभ्यां० ॥ ॐ शूलेन पाहि० ॥ १ ॥ प्राच्यां रक्ष० ॥ २ ॥ सौम्यानि यानि० ॥ ३ ॥ खड्गशूल० ॥ ४ ॥ कनिष्ठिकाभ्यां० ॥ ॐ सर्वस्वरूपे० ॥ १ ॥ एतत्ते वदनं० ॥ २ ॥ ज्वालाकराल० ॥ ३ ॥ हिनस्ति दैत्य० ॥ ४ ॥ असुरासृग्वसा० ॥ ५ ॥ करतलकरपृष्ठाभ्यां० ॥ इत्यङ्गुष्ठादिः ॥ **अथ हृदयादिः** ॥ पूर्ववत् खड्गिनीशूलिनीत्येकं श्लोकं पठित्वा। हृदयाय नमः इति हृदये न्यसेत् ॥ शूलेन पाहीत्यादिश्लोकचतुष्टयं पठित्वा शिरसे स्वाहेति शिरसि न्यसेत् ॥ सर्वस्वरूपे इत्यादिश्लोकपञ्चकं पठित्वा शिखायै वषडिति शिखायां ॥ पुनःखड्गिनीत्येकश्लोकं पठित्वा कवचायहुमिति हृदयादिनाभ्यन्तं व्यापकत्त्वेन विन्यसेत् ॥ शूलेन पाहीति श्लोकचतुष्टयं पठित्वा नेत्रत्रयाय वौषडिति नेत्रत्रये न्यसेत् ॥ सर्वस्वरूपे इत्यादिश्लोकपञ्चकं पठित्वा अस्त्रायफडिति तालद्वयशब्दं कुर्यात् ॥ **इति हृदयादिः** षडङ्गः॥ अत्र न्यासे मुद्रा नवार्णप्रकरणे उक्ताः ॥ **अथ ध्यानानि** ॥खड्गं चक्रगदेषुचापपरिघान् शूलं भृशुण्डीं शिरः, शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥ नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौच्छयिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥ १ ॥ अक्षस्रक्परशूगदेषुकुलिशं पद्मं धनुःकुण्डिकां दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सुरौजोभवाम् ॥ २ ॥ घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवां त्रिज-

गतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥ ३ ॥ इति ध्यात्वा ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः लं पृथिव्यात्मकान् गन्धान् कल्पयामि ॥ श्रीमहाकाली० स्वतीभ्यो नमः हं आकाशात्मकानि पुष्पाणि क० ॥ श्रीमहाका०तीभ्यो नमः यं वाय्वात्मकं धूपं० ॥ श्रीमहाकाली०तीभ्यो नमः रं अग्न्यात्मकं दीपं ० ॥ श्रीमहाकाली०तीभ्यो नमः वं अमृतात्मकं नैवेद्यं कल्पयामि ॥ इति मानसोपचारैः सम्पूज्य देवीमहात्म्यं सार्थानुसन्धानं पठेत् ॥

ॐ मार्कण्डेय उवाच ॥ १ ॥

अथ प्राक् मन्त्रविभागप्रकाशे कात्यायनीतन्त्रोक्तो मन्त्रविभागो विस्तरेण दर्शितः । स एव स्मृत्युपस्थितये प्रत्यध्यायं व्याख्यायामारम्भे तत्तदध्यायप्रयुक्तः स्वकृतस्पष्टार्थकारिकाभिः प्रदर्श्यते, तत्रादौ प्रथमाध्यायस्य ॥ सप्तपञ्चाशता गद्यैरुवाचान्तैः समन्वितम् ॥ अष्टसप्तत्युत्तराणां श्लोकानां शतपञ्चकम् ॥ विभज्य शम्भुना मन्त्राः कृताः सप्तशतीमिताः ॥ ते स्फुटीक्रियन्तेऽत्र श्लोकैः कैश्चित् स्वनिर्मितैः ॥ तत्र तु प्रथमेऽध्याये मार्कण्डेय उवाच ह ॥ प्रथमो गद्यमन्त्रः स्यात्स च सप्ताक्षरो मतः ॥ ततः सावर्णिरित्याद्याः श्लोकमन्त्रा दश स्मृताः ॥ सोऽचिन्तयत्तदा तत्रेत्यर्धश्लोकात्मको मनुः ॥ मत्पूर्वैरिति चारभ्य श्लोकमन्त्राश्च सप्त वै ॥ ततो वैश्य उवाचेति गद्यात्मा मन्त्र ईरितः ॥ समाधिर्नाम वैश्याद्याः श्लोकमन्त्रास्ततस्त्रयः ॥ किन्नु तेषां कथं ते किमित्यर्धश्लोकमन्त्रकौ ॥ ततो गद्यात्मको मन्त्रो राजोवाचेति हि स्मृतः ॥यैर्निरस्तस्तेषु किमित्यर्धश्लोकात्मकौ मनू ॥ ततो वैश्य उवाचेति गद्यात्मैको मनुर्मतः ॥ एवमेतत्तथेत्याद्याः श्लोकमन्त्रास्ततस्त्रयः ॥

तेषां कृते करोमीति द्वावर्धश्लोकमन्त्रकौ । अथो मार्कण्डेय उवाचेति गद्यात्मको मनुः ॥ ततस्तौ च समाधिश्च द्वावर्धश्लोकमन्त्रकौ ॥ कृत्वा तु तौ यथान्यायमित्येकः श्लोकमन्त्रकः ॥ राजोवाचेति च ततो गद्यात्मा मनुरीरितः ॥ भगवंस्त्वामहं दुःखायेति द्वावर्धमन्त्रकौ ॥ ततो ममत्वमित्याद्याश्चत्वारः श्लोकमन्त्रकाः ॥ अथो ऋषिरुवाचेति गद्यात्मा मनुरेककः ॥ ज्ञानमस्तीत्यादयस्तु श्लोकमन्त्रा दश स्मृताः ॥ सा विद्येति च संसारेत्यर्धश्लोकात्मकौ मनू ॥ राजोवाचेति ततो मन्त्रो गद्यात्मको मतः ॥ नित्यैव सा तथापीति द्वावर्धश्लोकमन्त्रकौ ॥ देवानामिति चारभ्य श्लोकमन्त्राश्च षण्मताः॥ ब्रह्मोवाचेति मन्त्रोऽयमेको गद्यात्मको मतः ॥ त्वं स्वाहा त्वं स्वधेत्याद्याः श्लोकमन्त्रास्त्रयोदश ॥ प्रबोधं चाथ बोधश्चेत्यर्धश्लोकात्मकौ मनू ॥ ततश्चर्षिरुवाचेति गद्यात्मा मन्त्र ईरितः ॥ एवं स्तुता तदेत्याद्याः श्लोकमन्त्राश्च पञ्च वै ॥ तावपीत्युक्तवन्तावित्यर्धश्लोकात्मकावुभौ ॥ गद्यात्मा चैव भगवानुवाचेति मनुः स्मृतः ॥ भवेतां च किमिन्येनेत्यर्धश्लौकात्मकौ मनू ॥ अथो ऋषिरुवाचेति गद्यात्मैको मनुर्मतः ॥ वञ्चिताभ्यामिति तदेत्येकः श्लोकात्मको मनुः ॥ आवां जहीति चैकः स्यादर्धश्लोकात्मको मनुः ॥ ततश्चर्षिरुवाचेति मन्त्रो गद्यात्मको मतः ॥ तथेत्युक्त्वैवमेषेति श्लोकमन्त्रावुभौ मतौ ॥ प्रथमाध्यायरूपस्य चरितस्यादिमस्य तु ॥ सर्वे मन्त्राश्च सम्भूय चतुर्भिरधिकं शतम् ॥ श्लोकमन्त्रास्तु षट्षष्टिश्चतुर्विंशतिरर्धकाः ॥ चतुर्दश च गद्याख्याः श्लोका अष्टौ च सप्ततिः ॥ **इति प्रथमाध्याय मन्त्रविभागकारिकाः ।**

अथ मन्त्रव्याख्या॥ मार्कण्डेय इति ॥ क्रौष्टुकिं भागुरिं प्रतीति शेषः ॥ मार्कण्डेयभागुरिसंवादात्मकमिदं देवीमाहात्म्यं त्रिकालज्ञैर्द्रोणर्षिपुत्रैः पाक्षिरूपैर्मुनिभिः जैमिनिं प्रत्युच्यते ॥ तेन मार्कण्डय उवाचेत्युक्तिर्द्रोणर्षिपुत्राणां मुनिपक्षिणां जैमिनिं प्रतीत्यवगन्तव्यं ॥ अयं सप्तशतधा विभक्तस्य देवीमाहात्म्यस्य प्रथमो गद्यमन्त्रः॥ अत्र मूले व्याख्यायां च मन्त्राणां सङ्ख्याक्रमोऽ-

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥

क्वचिन्हैः प्रदर्श्यते ॥ मार्कण्डेयपदव्युत्पत्तिः कवचव्याख्यायां दर्शिता ॥ **(अथ पाठान्तरादि)** मार्कण्डेय उवाचेत्यतः प्राक् केषुचित्पुस्तकेषु क्रौष्टुकिरुवाच ॥ मार्कण्डेय महाप्राज्ञ सर्वशास्त्रविशारद ॥ वक्तुमर्हस्यशेषेण देवीमहात्म्यमुत्तमम् ॥ मन्वन्तरे पुरा स्वामिन् मही केन प्रकाशिता ॥ कोऽयं सावर्णिको नाम मनुसंज्ञत्वमागतः ॥ काचेयं चण्डिका देवी महामायेति गीयते ॥ यया सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ॥ तदुत्पत्तिं महायोगिन् वद सर्वज्ञ विस्तरात् ॥ परोपकारहेतुत्वाद्यथावत् प्रणतस्य मे ॥ इति क्रौष्टुकिप्रश्नात्मकं श्लोकचतुष्टयमधिकं दृश्यते ॥ एवमग्रेऽपि क्वचित् क्वचित् बहवोऽधिकश्लोका उपलभ्यन्ते ते तत्र तत्र प्रदर्शयिष्यन्ते तेषां सप्तशती बहिर्भूतत्वाज्जपकर्माणि नोपयोगः ॥ १ ॥

अथ भगवान् मार्कण्डेयः " सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंशानुचरितं चेति पुराणं पञ्चलक्षणम् " इत्युक्तेषु पुराणलक्षणेषु चतुर्थलक्षणोदाहरणप्रसङ्गेन स्वायम्भुवादिसप्तमन्वन्तरवृत्तकथनान्ते "स्वायम्भुवाद्याः कथिता सप्तैते मनवो मम ॥ तदन्तरेषु ये देवा राजानो मुनयस्तथा । अस्मिन् कल्पे सप्तयेऽन्ये भविष्यन्ति महामुने ॥ मनवस्तान् समाचक्ष्व ये च देवादयस्तथा ॥ " इति क्रौष्टुकिप्रश्नात् भविष्यत्सावर्णिकादिसप्तमन्वन्तरवृत्तानि कथयिष्यन् आदौ क्रमप्राप्ताष्टममन्वन्तरकथाप्रसङ्गे तदधिपस्य सावर्णेर्मन्वन्तराधिपत्यावाप्तिभूतं देवीप्रसादं वक्तुं तस्य प्राग्जन्मवृत्तकथनप्रस्तावेन देवीमहात्म्यं वर्णयितुमुक्रपमते ॥ सावर्णिरिति ॥ सावर्णिपदनिरुक्तिरुक्ता **मार्कण्डेयपुराणे** । " पूर्वजस्य मनोस्तुल्यश्छायासंज्ञासुतो यतः ॥ ततः सावर्णिकीं संज्ञामवाप तनयो रवेः ॥ " इति ॥ अस्यार्थः । यतः छायासंज्ञासुतःसंज्ञाख्यरविभार्यायाः छायावस्थायां जातो रवेस्तनयं पूर्व-

निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ २ ॥

जस्य तस्या एव पूर्वावस्थायां जातस्य वैवस्वतमनोस्तुल्यः समानवर्ण आसीत् ततस्तस्माद्धेतोः सावर्णिकीं सावर्णिरित्येवंरूपां संज्ञामाख्यामवापेति ॥ उक्तार्थस्य सम्यगवबोधाय सङ्क्षेपतः पौराणिकी कथात्राभिधीयते ॥ संज्ञानाम्नी विश्वकर्मणः पुत्री सूर्यस्य भार्यासीत् ॥ सा सूर्याद्वैवस्वतमनुं यमं चेति पुत्रद्वयं यमुनानाम्नीमेकां कन्यां चावाप । केनचित्कालेनैकदा संज्ञा पितुर्गृहं गन्तुमिच्छन्ती गमनाय भर्तुः सूर्यस्यानुज्ञामयाचत ॥ तां नान्वजानाद्भर्ता ततः प्रभावशालिनी सा भर्तुः प्रतारणाय स्वप्रभावेणात्मनः सदृशीं छायामयीमन्यां स्त्रियमुत्पाद्य स्वाधिकारेऽवस्थाप्य पितृगृहं ययौ ॥ सूर्यस्तां छायामयीं प्रतिकृतिं सत्यामेव संज्ञां मन्वानस्तया सह विषयान् भुञ्जानस्तस्यामपि सावर्णिं मनुं शनैश्चरं चेति पुत्रद्वयं तपतीं नामैकां कन्यां चाजनयत् । संज्ञा च यावदिच्छं पितृसद्मन्युषित्वा पुनर्भर्तृगृहमागत्य छायामयीं प्रतिकृतिमात्मन्युपसंहृत्य यथापूर्वं स्वाधिकारमकरोदिति ॥ तथा च समानः अग्रजेन संज्ञायाः पूर्वावस्थायां जातेन वैवस्वतमनुना तुल्यः वर्णो यस्य स सवर्णः । ज्योतिर्जनपदेतिसमानशब्दस्य सभावः । सवर्ण एव सावर्णिः । स्वार्थे इञ् छान्दसः । काठके " औद्दालकिरारुणिर्मत्प्रसृष्ट इत्यत्र औद्दालकिपदे यथा ॥ **अथ प्रकृतमन्त्रव्याख्या** । यः सूर्यतनयः सावर्णिर्नामाष्टमो मनुः कथ्यते पुराणादिष्विति शेषः । दक्षसावर्ण्यादिव्यावृत्त्यर्थं सूर्यतनय इति विशेषणम् । शनैश्चरनिवृत्यर्थं मनुरिति । वैवस्वतमनुनिरासार्थं अष्टम इति ॥ तदुत्पत्तिं तस्य मन्वन्तराधिपत्यावाप्तिप्रकारम् । विस्तरात् शब्दप्रपञ्चेन गदतः कथयतो मम मत्तः । अपादानस्य शेषत्वविवक्षया षष्ठी । मम गदतो मम वचनान्मम मुखाद्वेति कश्चित् । तत्पक्षे यथाक्रमं गदनं गदः । गद्यतेऽनेनेति गदः। इति भावे करणे च घञर्थेऽकविधानम् ॥ निशामय जानीहि । शम् आलो-

महामायानुभावेन यथा मन्वन्तराधिपः ॥
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥ ३ ॥

चने इति चौरादिकस्य रूपम् । तस्य नान्ये मितोऽहेताविति मित्वनिषेधान्न ह्रस्वत्वम् । आलोचनशब्देन ज्ञानसामान्यं गृह्यते ॥ धातूनामनेकार्थत्वात् शृण्वित्यर्थो वा ॥ तदुक्तं **दीक्षितैर्वैय्याकरणसिद्धान्तकौमुद्यां** भ्वादौ मित्वप्रकरणे । " कथं तर्हि निशामय तदुत्पत्तिं विस्तराद्गदतो ममे " त्याशङ्क्य । शम आलोचने इति चौरादिकस्य रूपम् । धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिरिति ॥ शन्तनुस्तु आलोचनपदस्य दर्शनरूपविशेषज्ञानार्थं गृहीत्वा ममेत्यस्यानन्तरं मुखमिति पदमध्याहृत्य गदतो मम मुखं निशामय पश्येति व्याख्याय शृण्विति तु कुव्याख्यानमित्याह तदुपेक्षार्हम् ॥ **रहस्ये,** इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥ उपासनं जगन्मातुः पृथगासां निशामय ॥ इति ॥ **देवीभागवते षष्ठस्कन्धे च** । निशामय महाराज ब्रवीमि विशदाक्षरम् ॥ माहात्म्यं खलु मायाया नारदात्तु मया श्रुतम् ॥ इति ॥ अत्रोभयत्रापि निशामयतेर्दर्शनार्थत्वासम्भवेनतस्य जानीहीति वा, शृण्विति वा व्याख्यानस्यैवौचित्यात् ॥ अस्याकुस्मीयत्वेप्यात्मनेपदाभावश्छान्दसः ॥ णिजन्ताण्णिचा परस्मैपदमिति **तत्त्वबोधिनीकारः** ॥ २ ॥

पूर्वश्लोकोक्तमुत्पत्तिपदं विवृणोति ॥ महामायेति । महाभागो भाग्यवान् ॥ भाग्यैकदेशयोर्भाग इति **शाश्वतः** ॥ अथ वा भगानां श्रीकाममाहात्म्यवीर्यादीनां समूहो भागं । सामूहिकोऽण् । तन्महद्यस्य स महाभागः ॥ भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वित्यमरः ॥ स पूर्वोक्तो रवेस्तनयः सावर्णिः । महती अपरिच्छिन्ना माया जगत्सर्जनादिरूपमिन्द्रजालं यस्याः सा महामाया । अथ वा मान्ति अन्तः प्रविशान्ति प्रलयकाले सर्वभूतानि यस्यामिति माया । यत् प्रयन्त्यभिसंविशन्तीति श्रुतेः ॥ माछाससिभ्यो यं

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ॥
सुरथो नामराजाऽभूत्समस्ते क्षितिमण्डले ॥ ४ ॥
तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ॥
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ ५ ॥

इति यप्रत्ययः । स्त्रीत्वाट्टाप् । महती अपरिछिन्नसामर्थ्या चासौ माया च महामाया ॥ सर्वस्याद्या महालक्ष्मीरित्यादिनोक्ता आदिशक्तिरित्यर्थः । न तु गुणत्रयसाम्यावस्था जडा प्रधानाख्या । विस्तरेण प्रतिपाद्यते चैतदग्रे तया विसृज्यते विश्वमिति श्लोके ॥ तस्या अनुभावेन प्रभावेण । यथा येन प्रकारेण । मन्वन्तरस्य एकसप्ततिदिव्ययुगपरिमितकालस्य तावत्कालोपभोग्यसाम्राज्यस्येत्यर्थः ॥ अधिपः स्वामी बभूव । भविष्यतोऽपि भूतवन्निर्देशः कल्पान्तरे जातत्वात् ॥ यत्तदोर्नित्यसम्बन्धात्तथेत्यस्योपस्थितिः ॥ तं प्रकारमित्यर्थः ॥ निशामयेत्यनुवर्तते ॥ ३ ॥

अथैतस्य प्राग्जन्मकथामवतारयति स्वारोचिष इति । पूर्वं प्राक्काले । तमेव विशेषतो निर्दिशति स्वारोचिषेऽन्तरे इति । स्वरोचिषोराज्ञोऽपत्यं पुमान् स्वारोचिषो मनुः । तस्येदं स्वारोचिषम् । तस्मिन् । वृद्धाच्छे भवितव्ये औत्सर्गिकोऽण् । अन्तरे काले । स्वारोचिषमन्वन्तरे इत्यर्थः । चैत्रस्य स्वारोचिषमनुपुत्रस्य वंशे समुद्भवो जन्म यस्य स चैत्रवंशसमुद्भवः । चैत्रकिम्पुरुषाद्याश्च सुतास्तस्य महात्मनः ॥ इति **मार्कण्डेयपुराणात्** । शोभनरथत्वात्सुरथो नाम । सुरथ इति प्रसिद्ध इत्यर्थः । नामेति प्रसिद्धावव्ययम् । समस्ते क्षितिमण्डले राजाऽभूत्सार्वभौमो राजासीदित्यर्थः ॥ ४ ॥

तस्येति। औरसानुरसानिर्मितान् स्वदेहजानित्यर्थः । पुत्रानिव । प्रजाः पौरजानपदादीन् जनान् सम्यक् नीतिशास्त्रानुसारेण पालयतः तस्य सुरथस्य तदा तस्मिन् काले कोलाविध्वंसिनो भूपाः । तन्नामानः क्षत्रियकुलविशेषाः

तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः ॥
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ ६ ॥
ततःस्वपुरमायातो निजदेशाधिपोऽभवत् ॥
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥७॥
अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ॥

शत्रवः शातयितारः अभियोक्तार इति यावत् । बभूवुः । शदेर्णिजन्तात् क्रुन् । अथवा । सुरथस्य कुलपरम्परागताः शत्रवो भूपास्तेन स्वबलार्जितस्य शत्रुराज्यस्य स्वावासीकृतां कोलाख्यां राजधानीं विध्वंसयितुं शीलं येषां ते कोलाविध्वंसिनो बभूवुः । कोलाविध्वंसिपदस्य युक्तायुक्तानि व्याख्यानान्तराणि सति कुतुके शान्तनव्यादिषु द्रष्टव्यानि ॥ (अथ पाठान्तरादि) तदेत्यत्र तथेति क्वचित्पाठः ॥ ५ ॥

तस्य तैरिति । तदा अतिप्रबलानपि शत्रून् दण्डयितुं शीलं यस्य सोऽतिप्रबलदण्डी ताच्छील्ये णिनिः । अथवा अतिप्रबलः शत्रुदुष्प्रधर्षः दण्डो हस्त्यश्वादिसैन्यमस्त्यस्य सोऽतिप्रबलदण्डी । तस्यातिप्रबलदण्डिनः कर्मधारयादणि मत्वर्थीय इनिः । तस्य सुरथस्य तैः कोलाविध्वंसिभिः सह युद्धमभवत् । न्यूनैरपि सुरथात् हीनबलैरपि तैः कोलाविध्वंसिभिः स सुरथो जितः पराजितः आसीत् । जयपराजययोर्दैवाधीनत्वादिति भावः ॥ ६ ॥

तत इति ॥ तैः आदौ सुरथान्न्यूनैरपि सम्प्रति जयावाप्त्या प्रबलैः अरिभिः आक्रान्तः पराजितो महाभागः भूतपूर्वभाग्यवान् स सुरथः । तदा तस्मिन् काले । ततः पराजयप्रदेशात् । स्वपुरं निजपूर्वराजधानीम् । आयातः आगतः सन् निजदेशस्य पूर्वजार्जितदेशमात्रस्याधिपः स्वाम्यभवत् ॥ ७ ॥

अथ स्वपुरगमनानन्तरजं वृत्तमाह अमात्यैरिति । ततः स्वपुरगमनानन्तरं तत्र स्वपुरेऽपि निजराजधान्यामपि । दुरात्मभिः दुष्टस्वभावैः । आत्मा

कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥ ८ ॥
ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ॥
एकाकी हयमारुह्य जगाम गहनं वनम् ॥ ९ ॥
स तत्राश्रममद्राक्षीद्द्विजवर्यसुमेधसः ॥
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥१०॥

यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चेत्यमरः । कृतघ्नैरित्यर्थः । अतएव दुष्टैर्दूषितैर्भेदं प्राप्तैः शत्रुपक्षाश्रितैरिति यावत् । बलिभिः बलवद्भिः । अमात्यैःनित्यमन्तिकस्थैः सचिवादिभिः । दुर्बलस्य असहायत्वात्सामर्थ्यहीनस्य सुरथस्य कोशोऽर्थसञ्चयः । अपहृतः आत्मसात्कृतः । बलं सैन्यं चापहृतम् । (अथ पाठान्तरादि) अपेत्यत्र अपीति, तत इत्यत्र सत इत्यपि क्वचित्पाठः । प्रथमार्धानन्तरं । " तनयैश्च महावीर्यैर्वैरिपक्षवशङ्गतैरित्यर्धमधिकं क्वचित्पठ्यते " ॥ ८ ॥

तत इति । ततः कोशबलापहरणानन्तरं हृतं स्वाम्यं स्वामित्वं राज्याधिपतित्वं च यस्य स हृतस्वाम्यः । स भूपतिः राजा सुरथः । एकाकी असहायः भार्यापुत्राप्तस्वजनादिकं परित्यज्येत्यर्थः । हयमश्वमारुह्य मृग्यन्ते पशवोऽस्यामिति मृगया तस्या व्याजोऽपदेशस्तेन । वस्तुतः परिग्रहत्यागेच्छयेति भावः । गहनं लतावृक्षादिभिर्निबिडं वनं जगाम ॥ ९ ॥

स इति । स राजा । तत्र वने । द्विजवर्यसुमेधसः सुमेधो नाम्नः ऋषिश्रेष्ठस्य । मयूरव्यंसकादिवत्समासः । द्विजवर्येति क्रौष्टुकेः सम्बोधनार्थं पृथक् पदं वा । कात्यायनीतन्त्रे त्रयोविंशे पटले एकादशाध्यायमन्त्रविभागे " ऋषेः सुमेधसः प्रोक्तं वचो देव्याहते शुभे " ॥ इत्युक्तत्वात् सुमेधस इत्येव पाठो मुख्यः । प्रशान्तैर्मुनिप्रभावान्निर्वैरैः श्वापदैः सिंहगज, व्याघ्रमृग, नकुलसर्प, मार्जारमूषकादि पशुभिः इतस्ततः सञ्चरद्भिराकीर्णं व्याप्तम् ।

तस्थौ कञ्चित्स कालं च मुनिना तेन सत्कृतः ॥
इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥ ११ ॥
सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः ॥१२॥

मुनिशिष्यैरुपशोभितं आश्रमं निवासस्थानमद्राक्षीत् दृष्टवान् । (अथ पाठान्तरादि) श्रीशस्तु रूपमास्थाय पुरा विप्रस्य मेधसः ॥ स्वां मायां ज्ञापयामास सुरथाय महात्मने ॥ इति तन्त्रान्तरे मेधोनाम्नो दर्शनात् द्विजवर्यस्य मेधस इति पाठे विनापि प्रत्ययं पूर्वोत्तरपदलोपो वाच्यः इति वार्त्तिकेनसु इति पूर्वपदस्य लोपो ज्ञेयः । यत्तु लक्ष्मीतन्त्रे, जन्मानि चरितैः सार्धं स्तुतिभिर्वेदवादिना ॥ कथितानि पुरा शक्र वसिष्ठेन महात्मना ॥ स्वारोचिषेऽन्तरे राज्ञे सुरथाय महात्मने ॥ समाधये च वैश्याय प्रणतायावसीदते ॥ इत्युक्तं तत्कल्पान्तराश्रयणेन वा, वसिष्ठस्यैव सुमेधो मधोऽन्यतरनामान्तरकल्पनया वा समाधेयं उपशोभितमित्यत्रोपसेवितमित्यपि पाठः ॥ १० ॥

तस्थाविति । तेन मुनिना सुमेधसा सत्कृतः कृतातिथ्यः । स राजा सुरथः । तस्मिन् मुनिवरस्य सुमेधस आश्रमे । इतश्चेतश्च अनियतदेशे इत्यर्थः । विचरन् सञ्चरन् कञ्चित् कलाकाष्ठाक्षणादीभिरविवक्षितविशेषं कालं । अत्यन्तसंयोगे द्वितीया । तस्थौ उवास च ॥ ११ ॥

स इति । अर्धश्लोकात्मकोऽयं मन्त्रः । स राजा तदा इतश्चेतश्च विचरणकाले । तत्र ऋष्याश्रमे । मम भावो ममत्वम् । ममेदं राज्यादिकमित्यभिमानः । तेनाकृष्टं स्वायत्तीकृतं मानसं चित्तं यस्य स ममत्वाकृष्टमानसः सन् अचिन्तयत् वक्ष्यमाणमर्थं चिन्तितवान् । ममत्वमित्यत्र ममेति षष्ठीप्रतिरूपकादव्ययाद्भावे त्वप्रत्ययः । (अथ पाठान्तरादि) ममत्वाकृष्टमानस इत्यत्र ममत्वाकृष्टचेतन इति पाठे चेतनापदार्थो बुद्धिः । चेतना बुद्धिसंज्ञयोरिति विश्वः ॥ इत उत्तरं ममत्वं चाभवत्तस्य प्रयुक्तं विष्णुमायया ॥

मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥
मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥१३॥
न जाने स प्रधानो मे शूरो हस्ती सदामदः ॥
मम वैरिवशं यातः कान् भोगानुपलप्स्यते ॥१४॥

कथं नु वर्तते राज्यं बलादपहृतं परैः ॥ इत्येकोऽधिकः श्लोकः क्वचित्पठ्यते ॥ १२ ॥

चिन्तामेवाह मत्पूर्वैरित्यादिना । यत् पुरं पूर्वं प्राक्काले मत्पूर्वैः मत्पूर्वजैः धर्मतः धर्मेण न्यायेन । धर्माः पुण्ययमन्यायस्वभावाचारसोमपा **इत्यमरः** । पालितम् । तत् तैर्हीनं मयापि धर्मतः पालितमिति शेषः । अधुना मया हीनं हि तत्, असत्, दुष्टं वृत्तमाचारो येषां तैरसद्वृत्तैस्तैर्मद्भृत्यैर्मया भृतिदानेन पोषितैरमात्यादिभिः धर्मतः पाल्यते न वा पाल्यते इति उक्तं हि **यमेन**। अन्ववायागतं वस्तु धर्माद्यर्थोपसाधनम् ॥ अन्ववायोद्भवैः सम्यक् पालनीयं हि धर्मतः ॥ इति ॥ १३ ॥

न जाने इति । स मत्प्रियः प्रधानः सर्वहस्तिषु श्रेष्ठः । मुख्यवाची प्रधानशब्दो विशेष्यलिङ्गोऽपि क्वचित् । ये प्रधानाः प्लवङ्गमाः इत्यादिप्रयोगदर्शनात् । शूरो रिपुदुर्धर्षः । सदा मदो यस्य स सदामदः, तन्नामा । सदोन्मत्तो वा । मे हस्ती गजः । अधुना मम वैरिणां शत्रुभूतानाममात्यादीनां वशमधीनतां यातः सन् कान् भोगान्, भुज्यन्ते इति भोगास्तान् भोग्यवस्तूनीत्यर्थः । उपलप्स्यते प्राप्स्यति न जाने । वाक्यार्थः कर्म । अथवा स मत्प्रियः शूरो मे प्रधानो महामात्रः । महामात्रः प्रधानः स्यादिति वो पालितान्महामात्रवाचिनः प्रधानशब्दस्य पुंस्त्वम् । तथा स मत्प्रियः दामबन्धनशृङ्खलं द्यति छिनत्तीति दामदो हस्ती च इतिवाक्यभेदेन व्याख्येयम् । उभयत्रापि

ये ममानुगता नित्यं प्रसादधनभोजनैः ॥
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ॥ १५ ॥
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ।
सञ्चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति॥१६॥
एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ॥

आवृत्या मम वैरिवशं यात इत्यादेर्योजना। (अथ पाठान्तरादि) सःप्रधान इत्यत्र सुप्रधान इति, शूरो हस्तीत्यत्र शूरहस्तीति समस्तं च क्वचित्पठ्यते॥१४॥

ये इति । ये अमात्यादयः पूर्वं मद्राज्यस्य शत्रुहस्तगमनात् प्राक् नित्यं प्रतिदिनम्। प्रसादस्तुष्टिदानम्, धनं मासिकवार्षिकादिवेतनम्, भोजनं सहभुक्तिः, तैः प्रसादधनभोजनैर्हेतुभिर्ममानुगता मदनुवर्तिन आसंस्तेऽद्य सम्प्रति अन्यमहीभृतां मच्छत्रुभूपानामित्यर्थः । अनुवृत्तिमानुकूल्येन वर्तनं कुर्वन्ति । ध्रुवमिति तर्के । ध्रुवं खेऽजस्रतर्कयोरिति हैमः । (अथ पाठान्तरादि) इत उत्तरं । मम भार्या वरारोहा पुत्रश्चातीव शोभनः ॥ सद्मानि स्वर्गसदृशान्यप्सरःप्रतिमाः स्त्रियः ॥ इत्येकोऽधिकः श्लोकः क्वचित् पठ्यते ॥१५॥

असम्यगिति । आयादर्धव्ययः सम्यग्व्ययः । ततोऽधिकः असम्यग्व्ययः । तत्करणशीलैः । तथा सततं व्ययमेव कुर्वद्भिः न तु सञ्चयमिति भावः । तैः पूर्वोक्तैर्मद्विरोधिभिरमात्यादिभिर्हेतुभूतैः, मया अतिदुःखेनातिकष्टेन सञ्चितः स कोशोऽर्थसञ्चयः क्षयं समाप्तिं गमिष्यति ॥ उक्तं च । आगमे च व्ययाभावे व्यये चानागमे तथा ॥ कोशस्य वृद्धिनाशौ स्तस्तत्साम्ये पूर्ववत्स्थितिः ॥ इति ॥ १६ ॥

चिन्तामुपसंहरति एतदिति । एतत् एतावतोक्तं च । अन्यत् शत्रुपराजयस्वराज्यावाप्त्युपायात्मिकं च सततमविरतं पार्थिवः पृथिव्या ईश्वरो राजा सुरथः चिन्तयामास। चिन्तयंश्च सः तत्र वने विप्रस्य सुमेधसः आश्र-

तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ॥ १७ ॥
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥
सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥ १८ ॥
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥
प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥ १९ ॥

माभ्याशे आश्रमसमीपे । विप्रेति क्रौष्टुकेः सम्बोधनं वा । एकं कञ्चित् वैश्यं ददर्श । (अथ पाठान्तरादि) अभ्याशे इत्यत्र शकारस्थाने सकारं, तथान्ते स इत्यत्र हेति च क्वचित्पठन्ति । इत उत्तरं निरस्तं पुत्रपौत्राद्यैःस्वजनैः परिवर्तितम् ॥ विचरन्तं वनोद्देशे दुःखितं दीनमानसम् इत्येकोऽधिकश्लोकःपठ्यते क्वचित् ॥ १७ ॥

स इति । स वैश्यस्तेन राज्ञा पृष्टः ॥ प्रश्नमेवाह । कस्त्वमित्यादिना । भोः हे पुरुष । त्वं कः । एतेन नामजातिकुलानां प्रश्नः । किंनामा, किंजातिः, किंकुलश्चेत्यर्थः । तवात्रारण्ये आगमने हेतुश्च कः । किञ्च । त्वं सशोक इव इष्टजनवियोगजन्यदुःखवानिव तथा दुर्मना इव उद्विग्नचित्त इव च लक्ष्यसे दृश्यसे तत् कस्मात् कारणात् तत् कारणं किमित्यर्थः । एतत्तव परिम्लानमुखत्वादस्वस्थचित्तत्त्वाच्च ज्ञायते इति भावः । (अथ पाठान्तरादि) इत उत्तरं, तत्त्वमाख्याहि भद्रं ते यत्ते मनसि वर्तते ॥ दुःखमत्र च ते नास्ति यश्शोकस्सोऽपि नश्यति ॥ इत्येकोऽधिकः श्लोकः क्वचित्पठ्यते ॥ १८ ॥

इतीति । मार्कण्डेयवचनमिदम् । इति प्रणयेन प्रेम्णा उदितमुक्तम् । प्रणयास्त्वमी ॥ विस्रम्भयाञ्चाप्रेमाण इत्यमरः । तस्य भूपते राज्ञः सुरथस्य वचः आकर्ण्य श्रुत्वा प्रश्रयेण विनयेनावनतो नम्रः सन् तं नृपम् प्रत्युवाच ॥ (अथ पाठान्तरादि) अस्मात् श्लोकात्पूर्वं मार्कण्डेय उवाचेत्यपेक्षितमपि नास्ति । क्वचित्पठ्यते तदनार्षम् ॥ १९ ॥

वैश्य उवाच ॥ २० ॥

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥ २१ ॥
विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ॥

वैश्य इति । (अथ पाठान्तरादि) पूर्वश्लोके वैश्यःप्रत्युवाचेत्युक्तेरत्र पुनर्वैश्य उवाचेत्यनपेक्षितमप्यस्ति ॥ २० ॥

अथ वैश्यः राज्ञः प्रश्नानामुत्तराण्याह । तत्र प्रथमार्धेन नामादिप्रश्नत्रयस्योत्तरमाह समाधिरिति । अहं समाधिरिति प्रथमप्रश्नस्योत्तरम् । नामेति प्रसिद्धावव्ययम् । समाधिरिति प्रसिद्ध इत्यर्थः । वैश्य इति द्वितीयप्रश्नस्य वैश्यजातीय इत्यर्थः । धनिनां कुले उत्पन्न इति तृतीयस्य । धनिनां कुले धनिसंज्ञकानां कुले इत्यर्थः । अथ हेतुश्चागमनेऽत्र क इति चतुर्थप्रश्नस्योत्तरमाह पुत्रदारैरित्यादिसार्धश्लोकेन । असाधुभिरनार्यैः पुत्रदारैः पुत्रैर्दारैश्च धनलोभान्मद्धनग्रहणेच्छया निरस्तो गृहान्निसारितश्च । उत्तरश्लोके दारैः पुत्रैरिति वक्ष्यमाणत्वादत्र पुत्रदारैःस्नुषाभिरिति वा । प्रभवन्त्यो हि स्नुषाः श्वश्रूश्वशुरौ गृहान्निस्सारयन्ति गूढानुमत्या पत्युरिति प्रत्यक्षं हि लोके ॥ २१ ॥

विहीन इति । दारयन्ति पृथककुर्वन्ति भर्तारं तद्भ्रात्रादिभ्य इति दारास्तैः । पुत्रैश्च । आप्ताःसुहृदः । बन्धवो ज्ञातयस्तैश्च । मे धनं आदाय गृहीत्वा निरस्तो गृहान्निस्सारितः अतो धनैर्विहीनः अतएव दुःखी सन् वनमभ्यागतोऽस्मि । अथ वा आप्तबन्धुभिरित्येतद्दाराणां पुत्राणां च विशेषणम् । तत्पक्षे आप्ताः प्राप्ताः बन्धवः स्वसम्बन्धिनो यैस्ते आप्तबन्धवस्तैः । तत्र दाराणां बन्धवस्तत्पितृमात्रादयः । पुत्राणां तच्छ्वशुरश्यालादयः ।

वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥ २२ ॥
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥२३॥
किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम् ॥२४ ॥
कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥२५॥

तादृशैर्दारैः पुत्रैश्च मे धनमादायेत्यादि प्राग्वत् । (अथ पाठान्तरादि) विहीनः स्वजनैरिति पाठे पूर्वोक्तैर्दारादिभिर्मे धनमादाय निरस्तः अत एव तैः स्वजनैर्विहीनः तांस्त्यक्त्वेत्यर्थः दुःखी सन् वनमभ्यागतोऽस्मीति योजना ॥२२॥

अथ सशोक इव कस्मात्त्वमिति प्रश्नस्योत्तरमाह सोऽहमिति सार्धश्लोकेन । स वनमभ्यागतोऽत्र वने संस्थितोऽहं पुत्राणां दाराणां स्वजनानां च कुशलमकुशलं चात्मा स्वरूपं यस्यास्तां कुशलाकुशलात्मिकां सुखदुःखात्मिकामित्यर्थः प्रवृत्तिं वार्तां न वेद्मि ॥ २३ ॥

उक्तार्थमेव विवृणोति किन्वित्यर्धमन्त्रेण । साम्प्रतं तेषां पुत्रदारस्वजनानाम् । किं नु क्षेमं कुशलमस्ति, किं नु अक्षेमं अकुशलमस्ति । एतन्न वेद्मि । एतच्छोककारणमिति भावः । समुच्चितं किन्वितिपदद्वयं तर्के ॥२४॥

अथ दुर्मनस्त्वकारणप्रश्नस्योत्तरमाह कथं त इत्यर्धमन्त्रेण । ते मे सुताः कथं कीदृशा वर्तन्ते । कीदृशत्वमेव विवृणोति । किं नु सद्वृत्ताः सदाचाराः सन्ति किं नु दुर्वृत्ता दुराचाराः सन्ति । एतन्न वेद्मि । एतद्दुर्मनस्त्वकारणमिति भावः । सुता इत्येतद्दाराणां स्वजनानां चोपलक्षणम् ॥ (अथ पाठान्तरादि) एतदुत्तरं, एतन्मनसि राजेन्द्र वर्ततेऽहर्निशं ममेत्यर्धमधिकं क्वचित्पठ्यते ॥ २५ ॥

राजोवाच ॥ २६ ॥

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥ २७ ॥
तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥२८॥

वैश्य उवाच ॥ २९ ॥

एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥
किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥ ३० ॥

राजेति । प्रकृतिरञ्जनाद्राजा सुरथः उवाच पप्रच्छेत्यर्थः ॥ २६ ॥

यैरिति । अर्धश्लोकमन्त्रोऽयम् । लुब्धैर्धनलोलुपैः यैः पुत्रदारादिभिः आदिना स्वजनैश्च । धनैर्धनहेतोरित्यर्थः । हेतौ तृतीया । भवान् गृहस्वामी निरस्तो गृहान्निस्सारितः । तेष्वित्युत्तरेणार्धमन्त्रेण पूर्णान्वयः । अवान्तरवाक्यत्वादुभयोर्मन्त्रत्वम् । भवानित्यत्र तोर्लि इति नकारस्यानुनासिको लकारः ॥ २७ ॥

तेष्विति । अयमप्यर्धमन्त्रः । तेषु गृहान्निःसारकेष्वपि पुत्रदारस्वजनेषु । भवतो मानसं कर्तृ । किं कुतः स्नेहं प्रीतिमनुबध्नाति धारयति । द्विषत्सु स्नेहस्यायुक्तत्वादिति भावः ॥ २८ ॥

वैश्य इति ॥ २९ ॥

एवमिति । भवान् अस्मद्गतं मद्विषयकं वचः यथा प्राह यथा ब्रवीति । एतदेवम् तत्तथा सत्यमित्यर्थः । एवं जानतोऽपि मम मनः अस्निह्यत्स्वपि पुत्रादिषु निष्ठुरतां निस्नेहतां न बध्नाति न स्वीकरोति । तत् किं करोमि किं करवाणि । अस्मद्गतमित्यत्र अस्मान् गतमस्मद्गतमिति विग्रहः । द्वितीयाश्रितेति समासः, अत्र समासान्तर्गतास्मच्छब्दलक्ष्यव्यक्तेरेकत्वेप्य-

यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥
पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ॥ ३१ ॥
किमेतन्नाभिजानामि जानन्नपि महामते ॥
यत् प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ॥ ३२ ॥
तेषां कृते मे निश्वासो दौर्मनस्यं च जायते ॥ ३३ ॥

स्मदो द्वयोश्चेत्यनुशासनात्पाक्षिकबहुवचनविवक्षयास्मद्गतमिति प्रयोगः । (अथ पाठान्तरादि) अस्मद्गतमित्यत्र यन्मद्गतमिति क्वचित्पाठः ॥ ३० ॥

उक्तार्थमेव स्फुटयति यैरिति । यैः पुत्रदारस्वजनैः पितृस्नेहं पतिस्वजनहार्दं च परित्यज्य । निराकृतः निरस्तोऽस्मि । तत्र पुत्रैः पितृस्नेहं दारैः पतिहार्दं भर्तृस्नेहं स्वजनैः स्वजनस्य मम हार्दं चेति यथाक्रमं योजना । हार्दपदस्य द्वन्द्वान्तेस्थितत्वात्पतिशब्देन स्वजनशब्देन च सम्बन्धः । हृदयस्येदं हार्दम् । तस्येदमित्यण् । हृदयस्य हृल्लेखेति हृदादेशः प्रेमा ना प्रियता हार्दं प्रेम स्नेह इत्यमरः । तेष्वेव मे मनः हार्दि स्नेहयुक्तम् । हार्दशब्दान्मत्वर्थीय इनिः । (अथ पाठान्तरादि) पतिपदं क्वचित् प्रथमान्तत्वेन व्यस्तं पठ्यते, क्वचित्पतिपदस्थाने प्रीतिमिति, तेष्वेवेत्यत्र तेष्वपीति च पठ्यते ॥ ३१ ॥

किमेतदिति । हे महामते प्राज्ञ । यत् मम चित्तं विगुणेषु विरुद्धेष्वपि बन्धुषु पुत्रदारादिषु प्रेमप्रवणं स्नेहप्रह्वमस्ति एतत् किं कुतः इति जानन् विचारयन्नपि नाभिजानामि तत् कारणं न वेद्मि । अथ वा विगुणेष्वपि बन्धुषु मम चित्तं प्रेमप्रवणमस्तीत्येतदनुचितमिति जानन्नपि यन्नाभिजानामि ज्ञानानुरूपं तन्निवर्तनप्रयत्नमनुष्ठातुं न शक्नोमि एतत् किमिति योजना ॥ ३२ ॥

तेषामिति । अर्धश्लोकमन्त्रोऽयम् । तेषां विगुणानामपि बन्धूनां कृते

करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥ ३४ ॥

मार्कण्डेय उवाच ॥ ३५ ॥

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ ३६ ॥

समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ॥३७॥

अर्थे । कृते इति तादर्थ्येऽव्ययम् । मे निश्वासः शोकजः जायते । दौर्मनस्यं अनवस्थितचित्तत्वं च जायते इति वाक्यभेदेनान्वयः । (अथ पाठान्तरादि) निश्वासा इति पाठे जायन्ते इति वचनविपरिणामः ॥ ३३ ॥

करोमि किमिति । अयमप्यर्धश्लोकमन्त्रः । नास्ति मयि प्रीतिर्येषां ते अप्रीतयस्तेष्वप्रीतिषु । मह्यं द्रुह्यत्स्वपीत्यर्थः । तेषु बन्धुपु । मे मनः यन्निष्ठुरं निःस्नेहं न भवति तत् किं करोमि । इत्युद्वेगं दर्शयति उपायं पृच्छति वा (अथ पाठान्तरादि) अप्रीतिपु निष्ठुरमित्यत्र अप्रीतेषु निष्ठुरं, अप्रीतिसुनिष्ठुरमिति वा क्वचित् पाठः ॥ ३४ ॥

मार्कण्डेय इति । क्रौष्टुकिं प्रतीतिशेषः ॥ ३५ ॥

तत इति । अर्धश्लोकमन्त्रोऽयम् । हे विप्र क्रौष्टुके । ततस्तौ सहितौ परस्परान्वितौ । मिलिताविन्यर्थः । तं पूर्वोक्तम् । मुनिं सुमेधसम् । समुपस्थितौ तस्य समीपं प्राप्ताविन्यर्थः । प्रकृतमर्थं प्रष्टुमिति भावः ॥ ३६ ॥

तौ काविन्याह समाधिरिति । अयमप्यर्धश्लोकमन्त्रः । असावनन्तरोक्तः समाधिर्नाम वैश्यः । स पूर्वमुक्तः पार्थिवसत्तमो राजश्रेष्ठः सुरथश्च । निर्देश्यस्य देशकालान्यतरसन्निकर्षेऽदसः प्रयोगः, विप्रकर्षे तच्छब्दस्य । असौ मया हतः शत्रुः । स राजा तत्सौख्यं स च शिशुजनस्ते च दिवसा इत्यादौ तथा दर्शनात् ॥ ३७ ॥

कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम्
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ ३८ ॥

राजोवाच ॥ ३९ ॥

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ ४० ॥

कृत्वेति । तौ वैश्यपार्थिवौ समाधिसुरथौ तु । अल्पाच्तरत्वाद्वैश्यस्य पूर्वनिपातः । यथान्यायं यथाधिकारम् । आदौ राजा ततो वैश्य इति क्रमेणेत्यर्थः । यथार्हं वर्णधर्मानुसारेण । सुरथवर्माहमभिवादये, समाधिगुप्तोऽहमभिवादये इति वचनप्रयोगेणेत्यर्थः । संविदं वन्दनाद्याचारं कृत्वा । संवित्सम्भाषणे ज्ञाने संयमे नाम्नि तोषणे ॥ क्रियाकारे प्रतिज्ञायां सङ्केताचारयोरपीति **हैमः** । ततो मुन्याज्ञयोपविष्टौ सन्तौ आदौ तेन मुनिना सह काश्चित् अनियतविषया इत्यर्थः । कथाः संलापांश्चक्रतुः ॥ ३८ ॥

राजेति । अभ्यर्हितत्वात्प्राज्ञत्वाच्च राजैवोवाच ॥ ३९ ॥

अथ प्रकृतप्रश्नमाह भगवन्निति । अर्धश्लोकमन्त्रोऽयम् । हे भगवन् सर्वज्ञ मुने । एतद्विशेषणेन भवान् मत्प्रश्नस्योत्तरदाने समर्थ इति सूचितम् । भगमत्र ज्ञानम् । तदस्यास्तीति भगवान् । भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिष्विति **मेदिनी** ॥ अहं त्वां एकं वस्तु प्रष्टुमिच्छामि तद्वदस्व । भासनोपसम्भाषेति सूत्रेण भासनार्थे आत्मनेपदम् । भासनं च तत्तदाक्षेपेषु समाधानाय नवनवयुक्त्युल्लेखनमिति **बालमनोरमाकारः** । नवनवयुक्तिभिः समादधानो वदेत्यर्थः । उपच्छन्दनार्थे आत्मनेपदमिति **शन्तनुः** । यत्ने इति **नागेशः** । वस्तुतस्तु छन्दोवत्पुराणानीति पुराणानां छन्दस्तुल्यत्वात् छन्दसि च सुप्तिङुपग्रहलिङ्गनरकालादीनां व्यत्ययस्य शास्त्रसम्मतत्वान्नास्ति विरोधशङ्कैव । उपग्रहः परस्मैपदात्मनेपदे । नरः प्रथमादिपुरुषः ॥ ४० ॥

दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥ ४१ ॥
ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ॥
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥ ४२ ॥
अयं च निष्कृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥
स्वजनेन च सन्त्यक्तस्तेषु हार्दी तथाप्यति ॥ ४३ ॥

दुःखायेति । अयमप्यर्धमन्त्रः । प्रष्टव्यं वस्तु विशिनष्टि यदिति । यद्वस्तु स्वचित्तस्य मम विचारात्मकान्तःकरणवृत्तेः । आयत्ततां विना मदधीनत्वाभावादित्यर्थः । अधीनो निघ्न आयत्त इत्यमरः । मे मनसः सङ्कल्पविकल्पात्मकान्तःकरणवृत्तेर्दुःखाय भवति । विचारशक्त्यभावेन निश्चयाभावात्सङ्कल्पविकल्पयोः पुनः पुनः प्रादुर्भावेन मम दुःखं भवतीत्यर्थः । क्लृपि सम्पद्यमाने चेति चतुर्थी ॥ ४१ ॥

प्रष्टव्यं वस्त्वाह ममत्वमित्यादि श्लोकचतुष्टयेन । हे मुनिसत्तम ऋषिश्रेष्ठ । श्रेयान् श्रेष्ठः पुष्कलस्स्यात्सत्तमश्चेत्यमरः । गतराज्यस्य नष्टराज्यस्य तथा जानतोऽपि नष्टे वस्तुनि ममत्वं न युक्तमित्यवगच्छतोऽपि मम । अज्ञस्य यथा अजानतइवेत्यर्थः । यथाशब्द इवार्थे । अखिलेषु सर्वेषु राज्याङ्गेषु अमात्यसुहृत्कोशराष्ट्रदुर्गबलादिषु ममत्वं मदीयत्वबुद्धिः स्नेह इत्यर्थः । अस्तीति शेषः । एतत् किम् कुत इत्यर्थः । (अथ पाठान्तरादि) गतराज्यस्येत्यत्र मम राज्यस्येति क्वचित्पाठः ॥ ४२ ॥

एवं स्वामवस्थामुक्त्वाथ वैश्यस्याह अयं चेति । अयं मत्समीपस्थो वैश्यश्च पुत्रदारैर्निष्कृतो निरस्तः । तथा भृत्यैः सेवकैरुज्झित उत्सृष्टः । उज्झ उत्सर्गे । स्वजनेन च सन्त्यक्तः । तथापि तेषु पुत्रदारभृत्यस्वजनेषु । अति अत्यन्तम् । हार्दी स्नेहवानस्ति । (अथ पाठान्तरादि) निष्कृत इत्यत्र निकृत इत्यपि पाठः । विप्रकृत इति तदर्थः ॥ ४३ ॥

एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ ॥
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥ ४४ ॥

तत् किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥
ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥ ४५ ॥

ऋषिरुवाच ॥ ४६ ॥

उक्तमुपसंहरति । एवमिति । एवमुक्तप्रकारेण । एष वैश्यस्तथा अहं चेति द्वावपि । दृष्टोऽनुभूतो दोषो दुःखहेतुत्वं यस्य तस्मिन् दृष्टदोषेऽपि विषये यथाक्रमं पुत्रदारादौ, राज्याङ्गादौ च । ममत्वेन मदीयत्वभावनया कर्त्र्या आकृष्टं स्वायत्तीकृतं मानसं ययोस्तौ ममत्वाकृष्टमानसावतोऽत्यन्तदुःखितौ स्वः ॥ ४४ ॥

तदिति । या विवेके अन्धस्य अथ वा अविवेकेनान्धस्य । विचारशून्यस्येत्यर्थः । मूढता मोहः अविवेक इत्यर्थः । एषा मम अस्य वैश्यस्य च भवति । विवेकिनोरपीति भावः । तत् तस्मात् । भगानां धर्मज्ञानवैराग्याणां समूहो भागम् । तस्य समूह इत्यण् । भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु ॥ माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षेऽथवा रवाविति **मेदिनी** । महदपरिच्छिन्नं भागं यस्य स महाभागस्तस्य सम्बोधनं हे महाभाग सुमेधो मुने। यत् ज्ञानिनोरपि विवेकिनोरप्यावयोर्मोहः प्रतिकूलेष्वपि पुत्रदारस्वजनभृत्यराज्यराज्याङ्गादिषु स्नेहरूपः अविवेकः भवति, एतत् किम् ॥ ज्ञानाज्ञानयोः सामानाधिकरण्यं कथमिति प्रश्नार्थः । (अथ पाठान्तरादि) किमेतदित्यत्र केनैतदिति क्वचित्पाठः ॥ ४५ ॥

ऋषिरिति । ऋषिः सुमेधाः ॥ ४६ ॥

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ॥
विषयश्च महाभाग याति चैव पृथक् पृथक् ॥ ४७ ॥

अथ ऋषिः, तत् किमेतन्महाभाग ‘यन्मोहो ज्ञानिनोरपीति’ राज्ञः विवेकाविवेकयोः अर्थाद्वैषयिकज्ञानाज्ञानयोः सामानाधिकरण्ये विस्मयं अग्रे ज्ञानेऽपि सति पश्यैतानित्यादिना तदविरोधदर्शनेन परिहरिष्यन् आदौ तेन ‘यन्मोहो ज्ञानिनोरपी’त्यनेन दर्शितमुक्तज्ञानस्य मनुजैकनिष्ठत्वाभिप्रायेणात्मनो ज्ञानित्वाभिमानं तज्ज्ञानस्य सर्वप्राणिसाधारणताप्रदर्शनेन निराकरोति ज्ञानमस्तीत्यादिना । विपयगोचरे विषयशब्देन प्रसिद्धेऽर्थे इत्यर्थः । ज्ञानं समस्तस्य जन्तोः सर्वेषां प्राणिनामस्ति । जन्तोरिति जातित्वादेकवचनं । न मनुजानामेव । येन युवयोस्तत्प्रयुक्तो ज्ञानिनोरपीति ज्ञानित्वाभिमानः सङ्गच्छेत । अथ यद्विपये समस्तस्य जन्तोर्ज्ञानमस्तीत्युक्तं स विषयो द्विविधोऽस्तीत्याह विषयश्चेति । हे महाभाग श्रीवीर्यकीर्तिसम्पन्न राजन् । विग्रहः कोशश्च पूर्वश्लोकव्याख्यायां दर्शितो । विषयश्च स विषयस्तु पृथक् पृथक् चैव याति ऐन्द्रियकबौद्धभेदेन लोके द्विधा प्रचरतीत्यर्थः । तत्र श्रोत्रत्वक्चक्षुरादिभिरिन्द्रियैर्गृह्यमाणः शब्दस्पर्शरूपादिर्विषय ऐन्द्रियकः ॥ अयं मे पुत्रः इयं मे भार्या । इदं मम गृहं । इदं मम राज्यं । इमे मे अमात्यादयः । इदं मद्भोग्यधनधान्यादि । अयं मे शत्रुः । इदं मम मित्रं । इत्येवंबुद्ध्या कल्पितो विषयो बौद्धः । एवं तज्ज्ञानमपि द्विविधं । आद्यस्य क्रमेण श्रवणस्पर्शनदर्शनादि । द्वितीयस्य अयं मम पुत्रस्तस्मात्पालनीयः । इयं मद्भार्या लालितापि प्रतिकूला वर्तते तस्मात् दण्ड्या । इदं मम राज्यं शत्रुभिर्हृतं तस्मादत्र नात्मीयत्वाभिमानोऽवसेयः । अयं मे शत्रुस्तस्मादविश्वसनीयः । इदं मित्रं तस्मादुपकारार्हम् । इमे धान्यकणाः अस्माभिर्भक्षिताश्चेद्बुभुक्षा शाम्यति शिशुभ्यो दत्ताश्चेत् क्षुधायाः पीडा जायेत । इत्यादि विवेकरूपं अनेकविधं । एतदुभयमपि समस्तस्य जन्तोरस्ति । (अथ पाठान्तरादि) विपय इत्यत्र

दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ॥
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ४८ ॥
ज्ञानिनो मनुजाः सत्यं किं नु ते नहि केवलम्

विषया इति बहुवचनं, तदनुरोधेन यातीत्यत्र यान्तीति, क्वचिज्जातिरिति च । एवेत्यत्र एवमिति च पठ्यते ॥ ४७ ॥

ज्ञानमस्ति समस्तस्य जन्तोरित्युक्तं तत्र प्रथमं ऐन्द्रियकविषयज्ञानान्तर्गतरूपाख्यविषयज्ञानस्य दर्शनात्मकस्य तत्तत्प्राणिजात्यनुरोधात् किञ्चित् किञ्चिद्भेदेन सर्वप्राणिसाधारणतां दर्शयति दिवान्धा इत्यादिना। केचित् प्राणिनः उलूकवल्गुलीचुच्छुन्दर्यादयः दिवा अन्धाः । अर्थाद्रात्रौ रूपज्ञाः । तथा अपरे मनुष्यवायसचटकादयः रात्रावन्धाः। अर्थाद्दिवा रूपज्ञाः। केचित् प्राणिनः व्याघ्रमार्जारमूषिकगवाश्वादयः दिवा तथा रात्रौ तुल्यदृष्टयः सदा रूपज्ञाः । एवं सर्वेषां प्राणिनां किञ्चित् किञ्चित् भेदेन रूपज्ञानमस्त्येव। जन्मान्धादीनां सर्वदा रूपाज्ञानं तु वैकृतं ज्ञेयं । एवमन्यैन्द्रियकविषयेऽपि ज्ञेयं ॥ अत्र दिवारात्रिपदे प्रकाशाप्रकाशपरे । तेन दिवापि खग्रासग्रहणादौ दिवान्धानां रूपदर्शनं । रात्र्यन्धानां तदभावश्च । एवं रात्रौ प्रचुरतरप्रकाशे रात्र्यन्धानां रूपदर्शनं दिवान्धानां तदभावश्च ॥ ४८ ॥

एवमैन्द्रियकज्ञानस्य सर्वप्राणिसाधारणतां दर्शयित्वा अथ बौद्धज्ञानं विवेकरूपं मनुजानामेव नेतरेषामिति यन्मोहो ज्ञानिनोरपीत्यनेन ज्ञापितस्य राज्ञो मतस्य निषेधपूर्वकं तस्यापि सर्वप्राणिसाधारणतामाह ज्ञानिन इति। मनुजा एव ज्ञानिनो विवेकवन्तः इति यन्मतं तत्र मनुजा ज्ञानिन इत्येतावत्सत्यं किन्तु ते केवलमिति न हि सत्यं । मनुजा एव ज्ञानिन् इत्यवधारणं नाङ्गीकुर्म इत्यर्थः। सत्यमित्यर्धाङ्गीकारे। केवलशब्दोऽ-

यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥ ४९ ॥
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥ ५० ॥
ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु ॥

त्रावधारणे । कुत एतदित्याह । यत इति । यतः यस्मात् । सर्वे पशुपक्षिमृगादयः । पश्यन्ते बध्यन्ते इति पशवः । ग्राम्या गवाश्वादयः । पशुबन्धने । पक्षिणः प्रसिद्धाः । मृग्यन्ते अन्विष्यन्ते वधार्थं लुब्धकैरिति मृगाः वन्याः व्याघ्रसूकरहरिणादयः । मृग अन्वेषणे आदिना जलचरबिलेशयप्रभृतयः । एते सर्वे ज्ञानिनो हि विवेकिन एव । हिरवधारणे ॥ ४९ ॥

मनुष्यतिरश्चोर्विवेकज्ञाने कश्चिद्भेदः स्यादितिचेत्सोऽपि नास्तीत्याह ज्ञानं चेति । यत् तेषां मृगपक्षिणां ज्ञानं तदेव मनुष्याणामस्ति । अत्र मृगशब्दः पशुसामान्यवाची । तेन ग्राम्यारण्यकयोरुभयोर्ग्रहणं । पशवोऽपि मृगा इत्यमरः । यच्च मनुष्याणां ज्ञानं तदेव तेषां मृगपक्षिणामस्ति । तथा उभयोर्मनुष्यतिरश्चोरन्यदज्ञानमपि तुल्यमेव । अथवान्यपदेनाहारनिद्राभयादिग्राह्यं । आहारनिद्राभयादेरुभयोस्तुल्यत्वात् ॥ ५० ॥

एवं प्राणिमात्रस्य वैषयिकज्ञानवत्तां प्रतिपाद्याथ प्रथमं तिर्यक्षु ज्ञानाज्ञानयोः सामानाधिकरण्यं दर्शयति ज्ञानेऽपीति । हे राजन् एतान् पुरो दृश्यमानान् पतङ्गान् पक्षिणः स्वतः क्षुधा बुभुक्षया पीड्यमानानपि ज्ञाने एतेषु धान्यकणेषु आत्मना भक्षितेषु स्वक्षुन्निवृत्तिः स्यात् शिशुभ्यो दत्तेषु कदाचिदात्मनः प्राणहानिरपि स्यात् । एवंरूपे विवेके सत्यपि मोहात् स्नेहमूलकादविवेकात् शावानां शिशूनां चञ्चुषु त्रोटिषु कणमोक्षे धान्यलवविसर्गे आदृतान् सादरान् पश्य । विवेकमो-

कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ॥५१॥
मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति ॥
लोभात् प्रत्युपकाराय नन्वेतान् किं न पश्यसि ॥५२॥

ह्योः सामानाधिकरण्यं प्रत्यक्षीकुर्वित्यर्थः । कणोऽतिसूक्ष्मे धान्यांशे **इत्यमरः** । मोक्षो निश्रेयसे वृक्षविशेषे मोचने मृताविति **हैमः** ॥ मोचनं विसर्जनं पतङ्गान्छावेत्यत्र स्तोश्चुनाश्चुरिति नकारस्य ञकारः । शश्छोटीति शकारस्य छकारः । पतङ्गान् शावेति प्राथमिकी स्थितिः । (अथ पाठान्तरादि) पतङ्गानित्यत्र निरनुस्वारोपि पाठः क्वचित् ॥ ५१ ॥

तिर्यक्षु दर्शितं ज्ञानमोहयोः सामानाधिकरण्यमथ मानुषेषु दर्शयति । मानुषा इति श्लोकद्वयेन । हे मनुजव्याघ्र नरश्रेष्ठ । स्युरुत्तरपदे व्याघ्रकुञ्जरर्षभपुङ्गवाः ॥ सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचरा **इत्यमरः** ॥ **उपमितं व्याघ्रादिभिरिति** समासः । मनुजो व्याघ्र इवेति, विग्रहः ॥ मानुषा मानवाः लोभात् सम्प्रत्यस्माभिः सुताः पालनपोषणादिभिरुपकृताश्चेत्तेऽस्मान् वार्धके पालनपोषणादिभिः प्रत्युपकरिष्यन्ति इतीच्छया । सुतान् प्रति साभिलाषाः तेषु सस्नेहा इत्यर्थः । एतेन तेषां विवेको दर्शितः । परन्तु सुताः पालनपोषणादिरुपकृता अपि प्रत्युपकाराय ननु कल्पन्ते किम्? नेत्यर्थः । सुता इत्यस्याध्याहारः । प्रत्युपकारायेत्यत्र अध्याहृतेन क्लृपिना योगात् **क्लृपि सम्पद्यमाने चेति** चतुर्थी । ननु प्रश्ने । एतान् न पश्यसि किम् । अनुभवस्येवेति ध्वनिः ॥ (अथ पाठान्तरादि) नत्वेते किं न पश्यसीति वा पाठः । तत्पक्षे लोभादित्यन्तं प्राग्वत् । ततः एते सुताः प्रत्युपकाराय ननु कल्पन्ते किमिति च प्राग्वत् । एतन्न पश्यसि किम् इति वाक्यार्थः कर्म ॥ ५२ ॥

तथापि ममतावर्ते मोहगर्ते निपातिताः ॥
महामायाप्रभावेण संसारस्थितिकारिणा ॥ ५३ ॥

तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥
महामाया हरेश्चैषा तया संमोह्यते जगत् ॥ ५४ ॥

तथापीति । तथापि पुत्रेष्वप्रत्युपकुर्वत्स्वपि इत्यर्थः । विवेकिनोऽपि मानुषाः । संसरति पुनः पुनरुत्पद्यते जन्तुरस्मिन्निति संसारो जगत्प्रपञ्चः । जन्ममरणप्रवाह एव वा संसारः । तस्य स्थितिं प्राप्तिं करोतीति संसारस्थितिकारी तेन । महामायायाः जगन्मोहिन्याः । परमेश्वरशक्तेः प्रभावेण विचित्रसामर्थ्येन कर्त्रा । ममता—मदीया एते सुता इति भावना, सैव आवर्तोऽधोगतिहेतुर्जलभ्रमो यस्मिंस्तस्मिन् मोहगर्ते मोहात्मकसजलखाते निपातिताः ॥ महामायास्वरूपमुक्तं **कालिकापुराणे** । गर्भान्तर्ज्ञानसम्पन्नं प्रेरितं सूतिमारुतैः ॥ उत्पन्नं ज्ञानरहितं कुरुते या निरन्तरं ॥ महामायेति सम्प्रोक्ता तेन सा जगदीश्वरी ॥ इति ॥ (अथ पाठान्तरादि) प्रभावेणेत्यत्र प्रातिपदिकेतिणत्वविकल्पात् तवर्गपञ्चमान्तपाठोऽपि । संसारस्थितिकारिणः इति पाठे मानुषाः महामायाप्रभावेण मोहगर्ते निपातिताः सन्तः संसारस्थितिकारिणो भवन्तीति योजना ॥ ५३ ॥

एवं ज्ञानमोहयोः सामानाधिकरण्यं दर्शयित्वाथोपसंहरति तदित्यादिना । तत् तस्मात् महामायाया विचित्रप्रभावाद्धेतोः । अत्र—वैषयिकज्ञानाज्ञानयोः सामानाधिकरण्ये । तत् किमेतन्महाभाग यन्मोहो ज्ञानिनोरपीत्येवंरूपो विस्मयो न कार्यः ॥ यतः एषा महामाया जगत्पतेर्हरेर्योगनिद्रा । तदाख्या ज्ञानाज्ञानसामानाधिकरण्यवती विचित्रा शक्तिरस्ति । योगनिद्रालक्षणमुक्तं **योगरहस्ये** । योगो ज्ञानं तथा निद्रा तदभावोऽभिधीयते ॥ उभयोश्चैव संयोगो योगनिद्रेति कीर्त्यते ॥ इति ॥ तया जगत् सम्मोह्यते मोहं

ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥५५॥

नीयते ॥ (पाठान्तरादि) एषेत्यत्र एतदिति क्वचित्पठ्यते ॥ ५४ ॥

यद्राज्ञा पृष्टं ज्ञानिनोरप्यावयोर्मोहः कथमिति तत्र सङ्क्षेपादुत्तरमाह ज्ञानिनामपीति । सा भगवती देवी महामाया भगवतीपदार्थो **देवीभागवते** । उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं ॥ अविद्याविद्ययोस्तत्त्वं वेत्तीति भगवत्यसौ ॥ इति ॥

ज्ञानिनामपि भवादृशानां विवेकिनामपि चेतांसि बलादाकृष्य इतरजनानामिव अञ्जसा आक्रष्टुमशक्यत्वादिति भावः । मोहाय प्रयच्छति मोहाधीनानि करोति अथवा ज्ञानिनामपि अध्यात्मज्ञानिनामपि चेतांसि मोहयतीति व्याख्येयं । ननु तथा व्याख्याने " यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः ॥ तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ " " एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ " " ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ॥ " " इत्याद्या अध्यात्मज्ञाने मोहशोकादिनिवृत्तिप्रतिपादिका श्रुतिस्मृतयो व्याकुप्येयुतिरिचेन्न । तासामपरोक्षज्ञानविषयत्वात् । अध्यात्मज्ञानं तावद्द्विविधम् । परोक्षमपरोक्षं चेति । शास्त्रतोऽहंब्रह्मेति ज्ञानं परोक्षम् । परोक्षज्ञानानन्तरं श्रवणादिभिर्गुरुप्रसादेन च तथा साक्षादनुभवोऽपरोक्षम् । तत्रापरोक्षज्ञानमुक्तश्रुतिस्मृतितात्पर्यविषयः । यस्य सर्वाणि भूतान्यात्मैवाभूत् एकत्वमनुपश्यतः । ब्रह्मभूतः प्रसन्नात्मा । इत्यादीनां तद्गतवाक्यैकदेशानां अपरोक्षज्ञानपरत्वस्य स्पष्टत्वात् । एतदभिप्रायेणैव भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ इति श्रुतौ दृष्टे इति साक्षात्कारबोधकं पदं प्रयुक्तं न ज्ञाते इति ॥ परोक्षापरोक्षज्ञानकार्ये उक्ते

तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥

श्रीमद्भारतीतीर्थैः । परोक्षज्ञानतो नश्येदरुत्त्वावृत्तिहेतुता ॥ अपरोक्षज्ञाननाश्या ह्यभानावृत्तिहेतुता ॥ अभानावरणे नष्टे जीवत्वारोपसङ्क्षयात् ॥ कर्तृत्वाद्यखिलः शोकः संसाराख्यो निवर्तते ॥ इति ॥ अयं भावः । आदौ परोक्षज्ञानेनात्मास्तित्वाभावभावनारूपाज्ञाननाशः । ततोऽपरोक्षज्ञानेन चात्मनो जीवत्वभावनामूलकाभानरूपाज्ञाननाशादहमेवात्मेति साक्षात्कारेण जीवधर्माणां शोकमोहादीनां निवृत्तिर्भवतीति ॥ तस्मादपरोक्षसाक्षात्कारपर्यन्तमध्यात्मज्ञानिनां मोहोक्तिर्न श्रुतिस्मृतिविरुद्धा ॥ उक्तं च स्पष्टतया **भगवत्पूज्यपादैः** । श्रुतिशतनिगमान्तशोधकानप्यहह धनाद्यभिदर्शनेन सद्यः ॥ कलुषयति चतुष्पदाद्यभेदादघटितघटना पटीयसी मायेति ॥ ५५ ॥

उक्तविषये राज्ञः सम्भावनादार्ढ्याय महामायायाः सामर्थ्यं वर्णयति तयेति । एतत् परिदृश्यमानं विश्वं सर्वं चरं चाचरं चानयोः समाहारश्चराचरम् । जङ्गमस्थावरात्मकं जगत् तया महामायया विसृज्यते उत्पाद्यते । मत्तः प्रकृतिपुरुषात्मकं जगदिति **देव्यथर्वशीर्षश्रुतेः** ॥ एतत् स्थितिसंहारयोरप्युपलक्षणम् । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति **श्रुतौ** त्रयाणां सन्नियोगेनानुशिष्टत्वात् । सा विश्वं कुरुते कामं सा पालयति सर्वदा ॥ कल्पान्ते संहरत्येषा त्रिरूपा विश्वमोहिनी ॥ इति **देवीभागवताच्च** । ननु एतादृशसामर्थ्यसम्पन्नापि सा महामाया यदि आत्मज्ञानिनां चेतांसि मोहयति तदा कस्तां मुमुक्षुरुपासीतेत्याशङ्क्याह सैषेति । सा ज्ञानिनां मोहिकाप्येषा महामाया उपासनया प्रसन्ना चेत् वरं सर्ववस्तुषु श्रेष्ठं अद्वैतसाक्षात्कारं ददातीति वरदा एवंभूता सती नृणामुपासकजनानां मुक्तये भवति ॥ वक्ष्यते च । त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया ॥ संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतु-

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ ५६ ॥
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ ५७ ॥

रिति ॥ अत्र महामायाशब्देन मायाकार्यशरीरावच्छिन्ना परा शक्तिरुच्यते। न समष्ट्यज्ञानं, उक्तं च **कालोत्तरे**। भगवन् देवदेवेश मिथ्या मायेति विश्रुता ॥ तस्याः कथमुपास्यत्वं भवेन्मुक्तावनन्वयात् ॥ इति पार्वत्या पृष्टेन **सदाशिवेन**। नाहं सुमुखि मायाया उपास्यत्वं ब्रुवे क्वचित् ॥ मायाविशिष्टचैतन्यमुपास्यत्वेन कीर्तये ॥ मायाशक्त्यादिशब्दाश्च विशिष्टस्यैव वाचकाः ॥ तस्मात् मायादिशब्दैस्तु ब्रह्मैवोपास्यमुच्यते ॥ इति ॥ **सूतसंहितायामपि**। चिन्मात्राश्रयमायायाः शक्त्याधारे द्विजोत्तमाः ॥ अनुप्रविष्टा या संविन्निर्विकल्पा स्वयम्प्रभा ॥ सदानन्दा सदाकारा संसारोच्छेदकारिणी ॥ सा शिवा परमा देवी शिवाभिन्ना शिवङ्करी ॥ तां वै संसारनाशाय साक्षिणीमात्मरूपिणीम् ॥ आराधयेत्परां शक्तिं महामायाभिधां शिवाम् ॥ इति महामायापदव्युत्पत्तिः पूर्वं द्वितीयश्लोके प्रदर्शिता ॥ ५६ ॥

ननु नान्यः पन्था विद्यतेऽयनाय । विद्यया विन्दतेऽमृतम् । विद्ययामृतमश्नुते । ज्ञानादेव तु कैवल्यम् । इत्यादिश्रुतिस्मृतिभिर्मुक्तिहेतुत्वं ब्रह्मविद्याया उक्तम् । भवता तु महामायाया उच्यते इति विरुद्धमिति राज्ञोऽभिप्रायमाशङ्क्य महामायैव ब्रह्मविद्यास्तीत्याह सा विद्येत्यर्धश्लोकमन्त्रेण । सा महामायैव मुक्तेर्हेतुभूता । सनातनी नित्या । परमा सर्वोत्तमा । विद्या ब्रह्मविद्यास्ति । वक्ष्यते च । या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भगवती परमा हि देवी ॥ इति ॥ ५७ ॥

संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥ ५८ ॥

राजोवाच ॥ ५९ ॥

भगवन् का हि सा देवी महामायेति या भवान् ॥
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ॥६०॥
यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥६१॥

नन्वेवंसति मुमुक्षुभिरेवोपास्येत न स्वर्गादिकामैः कर्मिभिरित्याशङ्कायां कर्मविद्यापि सैवेत्याहार्धमन्त्रेण संसारेति । सर्वेषामीश्वरा ये ब्रह्मादयस्तेषामपीश्वरी नियन्त्री सा महामायैव संसारो जन्ममरणप्रवाहस्तद्रूपो यो बन्धस्तस्य हेतुः कारणं कर्मविद्याचास्ति । कर्मविद्यायाः कर्मफलभोगाय जन्ममरणयोरवश्यम्भावात्संसारबन्धहेतुत्वं युक्तमेवेति शिवम् ॥ ज्ञानमस्तीति चारभ्य मन्त्रद्वादशकस्य तु ॥ अन्योन्यसङ्गतिः प्रोक्ता युक्ता चेत् प्रतिगृह्यताम् ॥ मोहापहेऽपि मुह्यन्ति वचनेऽस्मिन् सुमेधसः ॥ सुमेधसोऽपिचेत्तत्र का कथामेधसो मम ॥ ५८ ॥

राजेति ॥ ५९ ॥

एवं महामायाया विचित्रसामर्थ्यं श्रुत्वा राजा तस्या उपासनार्थं तत्स्वरूपावतारप्रभावान् पृच्छति भगवन्निति । हे भगवन् मुने । भवान् यां महामायेति ब्रवीति सा देवी का हि । कीदृशी । इति स्वरूपप्रश्नः । हे द्विज ब्रह्मन् अस्याः कर्म च किम् । इति चरितप्रश्नः । (अथ पाठान्तरादि) चतुर्थपादे कर्मचास्याश्च किं द्विजेति पाठश्चकारस्य पौनरुक्त्यान्न साधुः ॥ ६० ॥

पृष्टमेवार्थं स्पष्टप्रतिपत्यर्थं क्रमभेदेन पुनः पृच्छति यत्प्रभावेत्याद्यर्धमन्त्रद्वयेन । सा देवी महामाया । यः यादृशः प्रभावो यस्याः सा यत्प्रभावा ।

तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥६२॥

ऋषिरुवाच ॥ ६३ ॥

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥६४॥

तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥६५॥

यत् यादृशं स्वरूपं यस्याः सा यत्स्वरूपा । यः यादृश उद्भवोऽवतारो यस्याः सा यदुद्भवा । अस्तीति शेषः । अस्यार्धमन्त्रस्योत्तरार्धमन्त्रेण सह महावाक्यता । अवान्तरवाक्यत्वान्मन्त्रत्वम् (अथ पाठान्तरादि) यत्प्रभावेत्यत्र यत्स्वभावेति कचित् पाठः ॥ ६१ ॥

तदिति अर्धश्लोकमन्त्रोऽयम् । ब्रह्म विन्दतीति ब्रह्मविदः आत्मज्ञानिनस्तेषां वर श्रेष्ठ हे सुमेधो मुने तत्पूर्वोक्तं प्रभावस्वरूपादिकं सर्वं त्वत्तः त्वत्सकाशात् । आख्यातोपयोगे इत्यपादानत्वात् पञ्चमी । पञ्चम्यास्तसिल् । श्रोतुमिच्छामि । ब्रह्मविदां सर्वस्य विज्ञातत्वात् इति भावः ॥६२॥

ऋषिरिति ॥ ६३ ॥

अथ ऋषिः राज्ञः प्रश्नत्रयस्योत्तरमाह नित्यैवेत्यर्धमन्त्रेण । सा महामाया नित्यैव उत्पत्तिविनाशशून्यैव । अतस्तस्या उद्भवो वक्तुं न शक्यते । जगन्मूर्तिः सर्वजगत्स्वरूपा । अतो विशिष्टरूपेण वर्णयितुमशक्या । इदं सर्वं चराचरं यया ततं विस्तृतिं नीतं सृष्टमिति यावत् । एतदपेक्षयान्यः कः प्रभावो वर्णनीय इति भावः । तनु विस्तारे ॥ ६४ ॥

तथापीति । अयमप्यर्धमन्त्रः । तथापि उत्पत्तिशून्यत्वे सत्यपि तत्समुत्पत्तिस्तस्या महामायाया समुत्पत्तिरौपाधिकयुत्पत्तिः । एतदुपलक्षणं स्वरूपप्रभावयोरपीति ज्ञेयम् । मम मत्तः अपादानस्य शेषत्वविवक्षया षष्ठी मम

देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥६६॥

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥
आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥६७॥

मुखादिति वा । बहुधा दशभुजाष्टादशभुजाष्टभुजा चामुण्डा ब्राह्म्यादिशक्तिशिवदूतीनन्दजादिमूर्तिभेदैरनेकधेत्यर्थः । श्रूयताम् ॥ ६५ ॥

नित्यत्वोत्पत्त्योर्विरोधं परिहर्तुं उत्पत्तिपदार्थमाह देवानामिति । नित्याप्युत्पत्तिशून्यापि सा महामाया । देवानां कार्यस्यासुरादिवधद्वार तद्रक्षणरूपस्य सिध्यर्थं यदा आविर्भवति प्रकटीभवति तदा सा लोके उत्पन्नेत्यभिधीयते उच्यते। वस्तुतो न तस्या उत्पत्तिरिति भावः । स्वेच्छया रूपधारणमाविर्भावः पूर्वकर्मानुरूपजन्मप्राप्तिरुत्पत्तिरित्याविर्भावोत्पत्त्योर्भेदः॥ अर्धद्वयस्यावान्तरवाक्यभेदात्सेत्यस्य द्विरुक्तिः । आदित आरभ्यैतदन्तस्य भागस्य समुच्चितचरित्रत्रयपूर्वशेषेऽपि प्रथमचरित्राव्यवहितत्वात्प्रथमचरित्रे गणना। एवं द्वादशत्रयोदशाध्याययोश्चरित्रत्रयोत्तरशेषत्वेऽपि उत्तमचरित्राव्यवहितत्वादुत्तमचरित्रे गणनेति ज्ञेयम् ॥ ६६ ॥

अथ दशभुजमहाकाल्यवतारं कथयितुमुपक्रमते । योगनिद्रामित्यादिना यदा भगवान् षड्गुणैश्वर्यसम्पन्नः प्रभुः विपन्नजनरक्षणसमर्थो विष्णुर्जगद्व्यापकः परमात्मा कल्पान्ते कल्पसमाप्तौ प्रलयकाले इत्यर्थः । जगति एकार्णवीकृते केवलार्णवरूपतां प्रापिते सतीत्यर्थः । एकःअर्णवःयस्मिंस्तदेकार्णवम्। एकार्णवत्वेन सम्पादितं एकार्णवीकृतम् तस्मिन्निति विग्रहः। अभूततद्भावे च्विः। पुष्करावर्तकादिजलदैरिति शेषः। शेषं अनन्तनागं आस्तीय प्रसार्य तल्पीकृत्येत्यर्थः । योगनिद्रां तद्रूपं ज्ञानाज्ञानसमुच्चयस्वापसुखं ।

तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥६८॥
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥६९॥
तुष्टाव योगनिद्रां तामेकाग्रहृदयः स्थितः ॥

अभजदसेवत ॥ अवान्तरवाक्यात्मकस्यास्य श्लोकस्योत्तरश्लोकेन सह महावाक्यता । अवान्तरवाक्यत्वान्मन्त्रत्वम् ॥ ६७ ॥

तदेति । तदा विष्णोर्योगनिद्रासेवनसमये विष्णोः कर्णमलादुद्भूतौ मधुकैटभावितिविख्यातौ घोरौ क्रूरौ द्वावसुरौ ब्रह्माणं हन्तुं हिंसितुं उद्यतौ उद्युक्तौ आस्तामितिशेषः ॥ ६८ ॥

स इति श्लोकत्रयात्मकमिदं महावाक्यम् । स ताभ्यां जिघांसितो विष्णोर्नाभिकमले स्थितः प्रजापतिः प्रजासर्जनाधिकृतो ब्रह्मा तावुग्रौ क्रूरावसुरौ दृष्ट्वा । जनान् दुर्जनान् अर्दयति हिनस्तीति जनार्दनस्तं । मधुकैटभवधसमर्थं विष्णुमित्यर्थः । अर्द् हिंसायां चुरादिः । प्रसुप्तं निद्रितं च दृष्ट्वा । योगनिद्रां तुष्टावेत्यग्रिमेणान्वयः ॥ ६९ ॥

तुष्टावेति । एकाग्रमव्यग्रं एकार्थनिष्ठमिति यावत् । हृदयं मनो यस्य स एकाग्रहृदयः । स्थितो वर्तमानः सन् । हरेर्विष्णोर्विबोधनं प्रबोधः स एवार्थः कार्यम् । तस्मै । तादर्थ्ये चतुर्थी । हरेर्नेत्रे नेत्रद्वयम् । ते एव कृतः आलयो गृहं यया तां हरिनेत्रकृतालयां हरिनेत्राश्रयेण स्थितामित्यर्थः । निद्रायाः सर्वाङ्गव्यापित्वेऽपि नेत्रयोर्विशेषतोऽभिव्यक्तेर्नेत्रकृतालयामित्युक्तम् । अथवा हरिनेत्रयोः कृतः आ ईषल्लयो मीलनं यया ताम् । योग-

विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥७०॥

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥७१॥

ब्रह्मोवाच ॥

निद्रात्वात् कृतार्धनेत्रनिमीलनामित्यर्थः । तां महामायात्मिकां योगनिद्रां तद्रूपां तमोगुणां महाकालीं। योगनिद्रा हरेरुक्ता महाकाली तमोगुणेति रहस्यात् । तुष्टाव स्तुतवान् । (अथ पाठान्तरादि) विबोधनार्थायेत्यत्र प्रबोधनार्थायेति स्थित इत्यत्र स्थिर इति च क्वचित्पठ्यते ॥ एकाग्रहृदयस्थित इति समस्तपदपाठे एकाग्रहृदयेन स्थित इति विग्रहः ॥ ७० ॥

योगनिद्रां विशिनष्टि विश्वेश्वरीमित्यादिना । कीदृशीं योगनिद्रां विश्वेश्वरीं जगन्नियन्त्रीम् । जगद्धात्रीं जगज्जननीम् । धात्री भुव्युपमातरि । आमलक्यां जनन्यां चेति **हैमः** ॥ जगतः स्रष्ट्रीमित्यर्थः । एवं जगतःस्थितिसंहारकारणीम् । स्थितिः पालनम् । संहारो विनाशः । तत्करणशीलाम् । ताच्छील्ये णिनिः । भगवतीं महामहिमशालिनीम् । अतुलां निरुपमाम् । विष्णोर्निद्रां विष्णोरपि मोहिनीम् ॥ अथ ब्रह्माणं विशिनष्टि । कीदृशो ब्रह्मा । तेजसः प्रभुः । अत्र तेजःशब्दस्तेजस्विपरः । तेजसां हि न वयः समीक्ष्यते इत्यादिप्रयोगेषु तथा दर्शनात् । एकवचनं जात्यभिप्रायेण । तेन तेजस्विनां प्रभुरित्यर्थः ॥ (अथ पाठान्तराणि) तेजस इत्यत्र तेजसामिति पाठः क्वचित् ॥ ७१ ॥

ब्रह्मेति । अत्र ब्रह्मोवाचेत्यनपेक्षितमप्यस्ति (अथ पाठान्तराणि) केचिद्विश्वेश्वरीमितिश्लोकात् प्राक् ब्रह्मोवाचेति पठित्वा, विश्वेश्वरीश्लोकस्योत्तरार्धस्थाने स्तौमि निद्रां भगवतीं विष्णोरतुलतेजस इति पठन्ति तल्लक्ष्मी-

-त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥

तन्त्रानुसारीति ज्ञेयम् । प्रकृतकात्यायनीतन्त्रानुसारिभिस्तु विश्वेश्वरीश्लोकान्तरमेव ब्रह्मोवाचेति पठनीयम् । उक्तं च **कात्यायनीतन्त्रे** प्रथमाध्यायमन्त्रविभागे । नित्यैव सा जगच्चादौ प्रभुरन्तेऽष्टमन्त्रकाः ॥ ब्रह्मोवाच ततश्चैव त्वं स्वाहा त्वं स्वधादिमाः ॥ महासुरान्तिमा मन्त्रा मताः पञ्चदश प्रिये ॥ इति ॥ अस्यार्थः । नित्यैव सा जगन्मूर्तिरित्यारभ्य तेजसःप्रभुरित्यन्तमष्टौमन्त्राः । ततो ब्रह्मोवाचेत्येको मन्त्रः । अनन्तरं त्वं स्वाहा त्वं स्वधेत्यादि हन्तुमेतौ महासुरावित्यन्तं पञ्चमन्त्रा इति ॥ अर्थाद्विश्वेश्वरीश्लोकस्योत्तरार्धं निद्रांभगवतीं विष्णोरित्येतदेव पठनीयम् ॥ ७२ ॥

अथ ब्रह्मा देवीं नानारूपैः स्तुवन् प्रथमं यज्ञविद्यारूपत्वेन स्तौति त्वं स्वाहेति । हे देवि त्वं स्वाहा असि स्वं दातुर्देयनिष्ठस्वकीयसम्बन्धं आजहाति दानेन त्याजयति इति स्वाहा । **यास्कस्तु** स्वाहेति कस्मात् सुष्ठु आहेति इति स्वाहापदस्य निरुक्तिमाह । यदेव सम्प्रदानमत्र देवतायै किञ्चिदाज्यस्येत्यनेन मन्त्रेणाह तुभ्यमिदमिति । तदेव सुष्ठु आह शोभनमाहेति देवानामुक्तिः स्वाहेति **ब्राह्मणम्** । स्वा वागाहेति विज्ञायते । यत् स्वा वागभ्यवदत् जुहुधीति तत्स्वाहाकारस्य जन्मेति च **ब्राह्मणान्तरम्** । त्वं स्वधासि । स्वान् दातुः स्वकीयान् पितॄन् धत्ते पुष्णातीति स्वधा । डु धान् धारणपोषणयोः । स्वाहास्वधापदे स्वाहा देवहविर्दाने श्रौषट् वौषट् वषट् स्वधेत्यव्ययवर्गे**ऽमरोक्तेः**रव्यये । स्वाहान्तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा ॥ इति । तथा नमः स्वाहायै स्वधायै इत्यादिविभक्त्यन्तप्रयोगदर्शनात् प्रथमान्ते वा । त्वं हि त्वमेव । हि हेताववधारणे **इत्यमरः** वषडितिकरणमुच्चारो वषट्कारः । भावे घञ् । अथ वा वषटिति क्रियत उच्चार्यतेऽस्मिन्निति वषट्कारः हविस्त्यागः । आहुतिरित्यर्थः । अधिकरणे घञ् ।

सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥७३॥
अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः ॥

अग्नौ हुतं । त्रिषु वषट्कृतमित्यमरः ॥ एतत् ओ श्रावय । अस्तु श्रौषट् । यज । ये यजामहे । वौषट् । इत्यादीनामप्युपलक्षणम् । चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यामिति **स्मृतेः** । एतेन सर्वयाज्ञिकमन्त्ररूपासीत्युक्तम् । त्वं स्वरात्मिका स्वर्गात्मिका यज्ञफलरूपेत्यर्थः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति **श्रुतेः** । स्वरव्ययं स्वर्गनाकेत्यमरः ॥ अथवा स्वरात्मिका अकारादिषोडशस्वररूपा षड्जादिसप्तस्वररूपा उदात्तादित्रिस्वररूपा वा । त्वं सुधा पीयूषं देवान्नमित्यर्थः । तद्रूपा । अथ प्रणवरूपत्वेन स्तौति । त्वं नित्ये ब्रह्मरूपे अक्षरे प्रणवे इत्यर्थः । त्रिधामात्रात्मिका, अकारोकारमकारात्मकमात्रात्रयात्मना स्थितासि । त्रिधापदं त्रिसंख्यापरम् । तस्य मात्रापदेन सुप्सुपेति समासः ॥ ७३ ॥

अर्धमात्रेति । या तत्र प्रणवे स्थिता नित्या संहितादिविकाररहिता विशेषतः विशेषेण अनुच्चार्या कण्ठादिस्थानविशेषैरुच्चरितुमशक्या । केवलनादात्मकत्वादिति भावः । अर्धमात्रा उपरि स्थिता बिन्दुसहितअर्धचन्द्राकाररूपा सापि त्वमेवेति शेषः । तेन सकलप्रणवस्वरूपासीत्यर्थः । प्रणवस्वरूपासीत्यर्थः । प्रणवस्वरूपमुक्तं **मार्कण्डेयपुराणे** भगवता दत्तात्रेयेन । अकारश्च तथोकारो मकारश्चाक्षरत्रयम् ॥ तिस्रो मात्राः सात्विकी च राजसी तामसीति च ॥ निर्गुणा योगिगम्या च अर्धमात्रोर्ध्वसंस्थिता ॥ वाच्यास्तिस्रोऽर्धमात्रा तु वचसो सा न गोचरा ॥ इति ॥ एवं प्रणवस्वरूपेण स्तुत्वाथ सन्ध्यादिस्वरूपेण स्तौति । त्वमेवेति सन्ध्याप्रातर्मध्याह्नसायंसन्धिषूपास्या देवता त्वमेवासि ॥ **भारद्वाजस्मृतौ** सन्ध्यापदार्थो यथा । ब्रह्माद्याकारभेदेन या भिन्ना कर्मसाक्षिणी ॥ भास्वतीश्वरशक्तिः सा सन्ध्येत्यभिहिता बुधैः ॥

त्वमेव सन्ध्या सावित्री त्वं वेदजननी परा ॥७४॥

इति ॥ **कालिकापुराणे तु** । ब्रह्मणो ध्यायतो यस्मात् सम्यग्जाता वराङ्गना ॥ अतः सन्ध्येति लोकेऽस्मिन् नाम तस्या भविष्यति ॥ इति ॥ एतेन सन्ध्यानाम्नी स्त्रीरूपा काचिद्विशिष्टा देवतेति ज्ञायते । त्वं परा सर्वोत्तमा वेदजननी वेदानां माता सावित्री सवितृदैवतका गायत्री ऋगसि ॥ आयाहि वरदे देवि त्र्यक्षरे ब्रह्मसम्मिते ॥ गायत्रि छन्दसां मातरिदं ब्रह्म जुषस्व मे ॥ इति मन्त्रवर्णाद्गायत्र्या वेदजननीत्वम् । इदं व्याहृतीनामप्युपलक्षकत्वम् । तासामपि वेदादित्वात् । तदाह **मनुः** । ॐकारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ॥ त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥ इति ॥ ब्रह्मणो वेदस्य मुखमाम्भः ॥ अथवा त्वं सावित्री सवितुः प्रकाशयित्री जगतः प्रसवित्री वासि ॥ तदुक्तं **भारद्वाजस्मृतौ** । सवितृप्रकाशकरणात्सावित्रीत्यभिधा भवेत् ॥ जगतः प्रसवित्रीति सावित्री तेन वा स्मृतेति ॥ तथा त्वं वेदजननी वेदावतारस्थानभूतासि । छन्दांसि जज्ञिरे तस्मादिति **श्रुतेः** । वेदेत्युपलक्षणं सर्वविद्यानाम् । अरे अस्य महतो भूतस्य निश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानान्यस्यैवैतानि सर्वाणि निश्वसितानीति **श्रुतेः** । **ब्रह्माण्डपुराणे** भिन्नभिन्नावयवेभ्यो भिन्नभिन्नविद्योत्पत्तिरुक्ता । निश्वासमारुतैर्वेदान् ऋचं साम यजुस्तथा ॥ आथर्वणान् महामन्त्रानभिमानेन चासृजत् ॥ काव्यनाट्याद्यलङ्कारानसृजन्मधुरोक्तिभिः ॥ सरस्वती च जिह्वायाः ससर्ज कमलप्रसूः ॥ सरस्वतीं वाणीं । चुल्केन चकोराक्षी वेदाङ्गानि ससर्ज ह ॥ मीमांसान्यायशास्त्रं च पुराणं धर्मसंहिताम् ॥ कण्ठोर्ध्वरेखातन्त्रेण ससर्ज सकलाम्बिका ॥ आयुर्वेदं धनुर्वेदं कण्ठमध्यस्थरेखया ॥ चतुःषष्टिं कलानां च कण्ठकूपभुवासृजत् ॥ तन्त्राणि निखिलाङ्गेभ्यो दोर्मूलान्मदनागमम् ॥ इति ॥ (अथ पाठान्तराणि) क्वचिद्द्वितीयार्धस्थाने त्वमेव सा त्वं सावित्री त्वं

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥७५॥

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥७६॥

देवजननी परा ॥ इति पठ्यते। तत्पक्षे पूर्वश्लोके या प्रणवस्यार्धमात्रा उक्ता सा त्वमेव । त्वं सावित्री तन्नाम्नी देवता असि । त्वं परा सर्वदेववन्द्या देवजननी अदितिरसि । देवपदस्थाने देवीति सम्बोधनान्तपाठे हे देवि त्वं परा उत्कृष्टा जननी सर्वेषां मातासि ॥ ७४ ॥

अथ जगदाधारादिरूपत्वेन स्तौति । हे देवि । एतत् परिदृश्यमानं विश्वं सर्वदा त्वया धार्यते । अधिष्ठांनत्वेनेति भावः । एतत् जगत् त्वया सृज्यते। एतज्जगत्त्वया पाल्यते । अन्ते कल्पान्ते च त्वमत्सि भक्षयसि च । तस्य ब्रह्मक्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनकमिति श्रुतेः । ब्रह्मक्षत्रशब्दौ सकलजगदुपलक्षकौ । तेन सकलं जगत्संहरसीत्यर्थः । (अथ पाठान्तरादि) त्वमत्स्यन्ते च सर्वदा इत्यत्र त्वमस्यान्ते इति क्वचित्पाठः । तत्पक्षे त्वमस्य जगतान्ते संहारे च कारणमसीति योजना ॥ ७५ ॥

पूर्वश्लोके एकस्या एव सृष्ट्यादिकर्तृत्वमुक्तमथात्र सृज्यादिकर्मरूपत्वं सृष्ट्यादिक्रियारूपत्वं चाह विसृष्टाविति । तत्रादौ जगन्मये इति सम्बोधनेन सृज्यादिकर्मरूपत्वं दर्शयति । हे जगन्मये सृज्यपाल्यसंहार्यजगद्रूपे । टाप् छान्दसः । त्वं अस्य जगतः विसृष्टौ सृष्टिकाले सृष्टिरूपासि सर्जनात्मकक्रियारूपासि । पालने पालनकाले स्थितिरूपा पालनक्रियारूपासि । तथा अन्ते संहारकाले संहृतिरूपा संहारक्रियारूपासि । एतेनैकस्या एव कर्तृकर्मक्रियात्मकता दर्शिता। (अथ पाठान्तरादि) जगन्मयीतिङीबन्तसम्बुद्ध्यन्तत्वेन क्वचित्पाठः ॥ ७६ ॥

महाविद्या महामाया महामेधा महास्मृतिः ॥
महामोहा च भवती महादेवी महासुरी ॥७७॥
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥

अथ परस्परविरोधिरूपत्वेन स्तौति । महाविद्येत्यादिना । हे देवि भवती महाविद्या ब्रह्मविद्यारूपा सती महामाया तद्विरोधिनी मूलाविद्या चासि । तथा महामेधा ग्रहणधारणक्षमा धीः । महास्मृतिः संस्कारजन्यज्ञानस्य कालान्तरेऽनुभवः । एतदुभयरूपा सती महामोहा तद्विरोधिसर्वाज्ञानरूपा चासि । महामोहपदस्य कर्मधारयत्वेऽपि स्त्रीत्वं छान्दसम् । महान् मोहो ययेति बहुव्रीहिर्वा महादेवी इन्द्रादिदेवतारूपा । महासुरी तद्विरोधिहिरण्याक्षादिदैत्यरूपा चासि । एवं च त्वयि विरोधशङ्कापि नास्तीति भावः । (अथ पाठान्तरादि) महामोहा च भवतीत्यत्र महामोहा भगवतीति महासुरीत्यत्र महेश्वरीति च क्वचित्पठ्यते ॥ ७७ ॥

अथ मूलप्रकृतिरूपत्वेन स्तौति । प्रकृतिरिति । किञ्च त्वं गुणत्रयं सत्वरजस्तमांसि विभावयति प्रकटयतीति गुणत्रयविभाविनी । ताच्छील्ये णिनिः । सर्वस्य विश्वस्य प्रकृतिर्मूलप्रकृतिरसि । अथास्या देव्या योगनिद्रारूपत्वान्निद्रायाश्च रात्र्यधिकरणत्वाद्रात्रिरूपत्वेन स्तौति । कालरात्रिरित्यादिना । कालरात्र्यादिपदत्रयेण दैनन्दिनप्रलयब्रह्मप्रलयमहाप्रलयदेवता उच्यन्ते । दारुणेति मोहरात्रेर्विशेषणम् । तस्याः सर्वाधिकभीषणत्वात् । आसां तमोमयत्वाद्भयजनकत्वाच्च रात्रिपदेनाभिधानम् । राति ददाति भयमिति रात्रिः । रा दाने । एतासां लक्षणानि **वराहपुराणे** । रौद्री तमोमयी देवी तामसी शक्तिरुत्तमा ॥ संहारकारिणी नाम्ना कालरात्रीति तां विदुः ॥ महारात्रिर्महाक्रूरा ब्रह्मणो लयकारिणी ॥ यस्यास्तनुस्तमोद्वारा निशा दिवसनाशिनी ॥ दंष्ट्राकराला कालाग्निरुद्रकल्पातिदारुणा ॥ सम्मोहिनी मोहरात्रिर्महाप्रलय-

कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥७८॥
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥७९॥

साक्षिणी ॥ इति ॥ अथ वा कालरात्र्यादिपदानां तिथिविशेषवाचकत्वात्तैस्तत्तत्तिथिदेवता ग्राह्याः । ते तिथिविशेषाश्च **शक्तिसङ्गमतन्त्रे** । दीपोत्सवचतुर्दश्याः कालरात्रिस्तु पर्व सा ॥ महारात्रिर्महेशानि यद्यमावास्यया युता ॥ जन्माष्टमी महेशानि मोहरात्रिरिति स्मृता ॥ वैशाखशुक्लगाक्षय्यतृतीया दारुणोच्यते ॥ घोररात्रिर्मार्गशिरःकृष्णपक्षाष्टमी मता ॥ इत्यादय उक्ताः ॥ (अथ पाठान्तरादि) विभाविनीत्यत्र विभागिनीति क्वचित्पाठः तत्पक्षे गुणत्रयविभागः गुणत्रयसाम्यावस्था । तद्वती ॥ ७८ ॥

अथ गुणात्मना स्तौति त्वं श्रीरिति त्वं । श्रीः सम्पत् शोभा वा । त्वमीश्वरी ऐश्वर्यं प्रभुत्वमिति यावत् । गुणगुणिनोरभेद उपचारात् । अथ वा ईश्वरी त्वमिति भावे त्वप्रत्ययान्तं । अर्थः प्राग्वत् । त्वतलोर्गुणवचनस्येत्यत्र गुणपदेन शुक्लादिवर्णग्रहणात् नात्र पुंवद्भावः । त्वं ह्रीः अकार्यवैमुख्यम् । त्वं बोधः ज्ञानं लक्षणं स्वरूपं यस्याः सा बोधलक्षणा बुद्धिः निश्चयात्मिका अन्तःकरणवृत्तिः । त्वं लज्जा स्वदुष्कर्मणः परेषां ज्ञाने सति जायमानो मनस्तापः । त्वं पुष्टिः उपचयः । तथा त्वं तुष्टिस्तृप्तिः । त्वं शान्तिर्मनसः समाधानम् । त्वं क्षान्तिः क्षमा सत्यपि प्रतिकारसामर्थ्ये परकृतापकारसहनम् । तद्रूपासीति सर्वत्र योजना । एतद्यावद्गुणानामुपलक्षणम् । तेन सर्वगुणात्मिकासीत्यर्थः । अथवा पूर्वार्धं देवताविशेषपरम् । तद्यथा । त्वं श्रीः विष्णुभार्या लक्ष्मीरसि । त्वं ईश्वरी शिवभार्या पार्वती असि । त्वं ह्रीर्द्वितीया विष्णुभार्यासि । ह्रीश्च ते लक्ष्मीश्च पत्न्याविति श्रुतेः । त्वं बोधलक्षणा ज्ञानस्वरूपा बुद्धिर्बुध्यधिदेवता ब्रह्मपत्नी सरस्वत्यसीति । (अथ पाठान्तरादि) ह्रीरि-

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शङ्खिनी चापिनी बाणभृशुण्डीपरिघायुधा ॥८०॥

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥

त्यत्र ह्रीमिति क्वचित्पाठः । तदा ह्रीर्बीजाधिदेवता परा शक्तिरसीत्यर्थः । अथवा प्राणरूपासि ह्रीङ्कारो वै प्राण इति श्रुतेः ॥ ७९ ॥

अथ प्रकृतमहाकालीरूपत्वेन स्तौति । खड्गिनीति श्लोकेन । त्वं खाड्गिनीत्वादिलक्षणा महाकाल्यसि । तत्र खाड्गिनी खड्गधारिणी । शूलिनी शूलधारिणी । मत्वर्थीयेन्नन्तान्ङीप् । एवं गदिनी चक्रिणी शङ्खिनी चापिनीत्यत्रापि ज्ञेयम् घोरा भीषणा । निश्चोतद्रुधिरनृशीर्षधारिणीत्यर्थः । बाणाश्च भृशुण्डी च परिघश्चायुधानि यस्याः सा बाणभृशुण्डीपरिघायुधा । भृशुण्डीपरिघयोर्लक्षणे प्रागुक्ते । खड्गबाणगदाशूलशङ्खचक्रभृशुण्डिभृत् ॥ परिघं कार्मुकं शीर्षं निश्चोतद्रुधिरं दधौ ॥ एषा सा वैष्णवी माया महाकाली दुरत्यया ॥ इति वैकृतरहस्ये ॥ दशायुधत्वात् दशभुजेयम् । शेषं लक्षणं रहस्यात् ज्ञेयम् ॥ इयमेवैतच्चरित्रदेवता महाकाली ॥ (पाठान्तरादि) बाणपदस्थाने बाणेत्याकारान्तं क्वचित् पठ्यते । तदा मत्वर्थीयाजन्तात् टाप् ज्ञेयः । भृशुण्डीशब्दे सर्वत्र ऋकारस्थाने उकारोऽपि पठ्यते ॥ ८० ॥

अथ सर्वाधिकसुन्दरत्वेन सर्वाधिकश्रेष्ठत्वेन च स्तौति सौम्येत्यादिना । त्वमेव सौम्या सुन्दरी सौम्यं तु सुन्दरे सोमदेवते इत्यमरः । सौम्यतरा सुन्दरात् सुन्दरा । अशेषसौम्येभ्यस्तु सर्वसुन्दरेभ्यश्चेत्यर्थः । अतिसुन्दरी । सुन्दरतमेत्यर्थः । असीति शेषः । तथा । त्वमेव परा श्रेष्ठा । पराणां । परमा । श्रेष्ठेभ्यः श्रेष्ठा । श्रेष्ठतरेत्यर्थः । श्रेष्ठवाचिनःपरशब्दस्यासर्वनामत्वादामो न सुट् ।

परापराणां परमा त्वमेव परमेश्वरी ॥ ८१ ॥

यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥८२॥

यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जगत् ॥

परमेश्वरी परमाणां ईश्वरी । श्रेष्ठतमेत्यर्थः ॥ (अथ पाठान्तरादि) परमेश्वरी इति सम्बुध्यन्तपाठे हे परमेश्वरि त्वमेव परा ब्रह्मादयः अपराः इन्द्रादयस्तेषां परमा श्रेष्ठा उपास्यासि । अथ वा परा ब्रह्मविद्या अपराः कर्मविद्याः। तासां परमा श्रेष्ठत्वेन प्रतिपाद्यासि इति व्याख्येयम् ॥ ८१ ॥

इतऊर्ध्वं स्तवने अशक्तिं दर्शयति यच्चेति त्रिभिः । यच्च किञ्चित्-ज्ञाताज्ञातं सर्वमित्यर्थः । क्वचित् कुत्रापि ज्ञाताज्ञातस्थले इत्यर्थः । सत् नित्यं कारणरूपम् परमाण्वादि । असत् अनित्यं कार्यरूपं स्थूलं पृथिव्यादि। अथ वा सच्चेतनम् । असज्जडम् । यद्वा सत् वर्तमानम् । असदतीतानागतम् । वस्तु अस्ति । तस्य सर्वस्य या शक्तिः सामर्थ्यरूपो धर्मः । उक्तं च अग्न्यादौ तत्तदौचित्यतत्तदर्थक्रियाकरी ॥ शक्तिरप्रतिबद्धात्मा धर्मः सामर्थ्यसंज्ञितः ॥ इति ॥ सा त्वं तद्रूपा त्वं । पदार्थशक्तयो या यास्तां तां गौरीं विदुर्बुधाः ॥ इति लिङ्गपुराणात् ॥ मया अज्ञेनेत्यर्थः । किं कथं स्तूयसे । वस्तुशक्तीनामनन्तत्वादिति भावः । (अथ पाठान्तराणि) मयेत्यत्र तदेति पाठे, सा त्वमसि । तदा ततः किं स्तूयसे इति वाक्यभेदेनान्वयः ॥ ८२ ॥

ययेति । यया जगन्मोहिन्या त्वया । जगतः स्रष्टा जगत्स्रष्टा जगतः पाता पालको जगत्पाता । स्रष्टृपातृशब्दावत्र तृन्नन्तौ अतः षष्ठीसमासः । तथा यः जगत् अत्ति भक्षयति संहरतीत्यर्थः । स परमेश्वरो विष्णुरपि

सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥८३॥

विष्णुः शरीरग्रहणमहमीशान एव च ॥
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥८४॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥

निद्रावशं मोहाधीनतां ॥ नीतः प्रापितः । अतः ईदृशसामर्थ्यवती त्वां स्तोतुं इह जगति कः अहमन्यो वा। ईश्वरः समर्थः स्यात् । अत्र विष्णोर्जगत्स्रष्टृत्वपातृत्वात्तृत्वोक्तिर्ब्रह्मादित्रितयसमष्ट्यभिप्रायेण । तदुक्तं **वायुपुराणे** प्रधानेच्छावशाद्विष्णोः शरीरमभवत्त्रिधा ॥ तत्रोर्ध्वकायः सञ्जातश्चतुर्वक्त्रश्चतुर्भुजः ॥ पद्मकेसरगौराङ्गः सृष्टिकर्ता महेश्वरि ॥ तन्मध्यभागो नीलाङ्ग एकवक्त्रश्चतुर्भुजः ॥ शङ्खचक्रगदापद्मपाणिर्विश्वस्य पालकः ॥ अभवत्तदधोभागः पञ्चवक्त्रश्चतुर्भुजः ॥ स्फटिकाक्षनिभःशुक्लः संहर्ता चन्द्रशेखरः ॥ इति ॥ (अथ पाठान्तराणि) पातेत्यत्र पातीति पाठः क्वचित् ॥ ८३ ॥

विष्णुरिति । ते त्वया महामाययेत्यर्थः । ते इति स्यात्त्वयेत्यर्थे मयेत्यर्थे च मे इति **त्रिकाण्डीशेपात्**। ते इत्यव्ययं त्वयेत्यर्थे । विष्णुर्नारायणः । अहं ब्रह्मा । ईशानः शिवश्चैव एते वयं केवलचिद्रूपा अपि जगतः सृष्टिस्थितिसंहारकार्यार्थं शरीरग्रहणं कारिताः शरीराणि ग्राहिताः देहधारिणः कृता इत्यर्थः ॥ अतः ईदृशविचित्रशक्तिमतीं त्वां स्तोतुं कः शक्तिमान् भवेत् ॥ ८४ ॥

अथ स्तुत्युपसंहारपूर्वकं स्वेष्टं निवेदयति । सा त्वमित्थमिति । हे देवि । सा स्तोतुमशक्यापि इत्थं त्वं स्वाहा त्वं स्वधा इत्यादिप्रकारेण संस्तुता त्वं स्वैः स्वकीयैः उदारैर्महद्भिः प्रभावैः सामर्थ्यैः एतौ पुरस्थितौ मां हन्तुमुद्यतौ । दुःखेन आधर्षं आक्रमणं ययोस्तौ दुराधर्षौ अजेयावित्यर्थः।

मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥८५॥
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥८६॥
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥८७॥

ऋषिरुवाच ॥ ८८ ॥

एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥८९॥

मधुकैटभौ तन्नामानावसुरौ मोहय भाविनि युद्धे कर्तव्याकर्तव्यविचारशून्यतां प्रापयेत्यर्थः । येन विष्णवे स्ववधरूपं वरं दत्वा तद्धस्तेन मरिष्यत इति भावः ॥ ८५ ॥

प्रबोधमिति । अर्धश्लोकमन्त्रोऽयम् । किञ्च जगतां ईश्वरः स्वामी अच्युतः स्वकर्तव्यात्कदापि न च्युतः असुरहन्तेत्यर्थः विष्णुः । लघु शीघ्रं प्रबोधं जागृतिं नीयतां प्रापयितव्यः ॥ ८६ ॥

बोधश्चेति । अयमप्यर्धश्लोकमन्त्रः । किञ्च अस्य विष्णोः एतौ महासुरौ मधुकैटभौ प्रतिहन्तुं मारयितुं बोधः बुद्धिः प्रेरणेत्यर्थः । क्रियताम् ॥ (अथ पाठान्तरादि) बोध इत्यत्र भाव इति पाठे भावः इच्छेत्यर्थः ॥ ८७ ॥

ऋषिरिति ॥ ८८ ॥

अथैतच्चरित्रदेवताया महाकाल्याः प्रादुर्भावं प्राह । एवं स्तुतेति श्लोकद्वयेन । एवमुक्तप्रकारेण वेधसा ब्रह्मणा मधुकैटभौ निहन्तुं । विष्णोः प्रबोधनमेवार्थः प्रयोजनं तस्मै देवदत्तस्य गुरुकुलमित्यादिवत्समासः । तादर्थ्ये चतुर्थी । मधुकैटभवधार्थं विष्णुं प्रबोधयितुमित्यर्थः । तत्र तस्मिन्नेकार्णवीकृते जगति । तदा विष्णुयोगनिद्रासमये तामसी तमोगुणात्मकनिद्रा-

नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥९०॥
उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥
एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ॥ ९१ ॥
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥

रूपा महाकाली देवी स्तुता । आसीदिति शेषः । भिन्नमन्त्रत्वार्थं वाक्यभेदोऽङ्गीकृतः ॥ ८९ ॥

नेत्रेति । ततः सा देवी । अव्यक्तमप्रसिद्धं जन्म यस्य सोऽव्यक्तजन्मा अजः पुराणपुरुषो महाविष्णुः तस्य नेत्रादिहृदयान्तेभ्योऽवयवेभ्यस्तथोरसो वक्षसश्च सकाशान्निर्गत्य बहिर्भूय ब्रह्मणो दर्शने दृष्टिपथे पुरत इत्यर्थः । तस्थौ स्थितवती । दश वक्त्रा दशभुजेत्यादिरहस्योक्तस्वरूपेणाविर्भूय ब्रह्मणे दर्शनं ददावित्यर्थः। हृदयं मनः । उरो वक्षः इति हृदयवक्षसोर्भेदः । नेत्रास्येति सर्वाङ्गोपलक्षणम् । एकवद्भावाभावश्छान्दसः । सर्वे विधयश्छन्दसि विकल्पन्ते । छन्दोवत्पुराणानीतिच सिद्धान्तात् । न दधिपयआदीनि इति निषेधान्नैकवद्भाव इत्युक्तिरुक्तगणस्यानाकृतिगणत्वाच्चिन्त्या । अव्यक्तजन्मन इति ब्रह्मणो विशेषणत्वे अव्यक्तान्नामरूपशून्याद्विष्णोर्जन्म यस्य तस्येति व्याख्येयम् ॥ ९० ॥

उत्तस्थाविति । तया योगनिद्रया मुक्तो जगन्नाथो जनार्दनः शत्रुजनहन्ता विष्णुः । एकश्चासावर्णवश्चैकार्णवः । तस्मिन् केवलसमुद्रात्मकतां प्राप्ते जगतीत्यर्थः । अहिशयनात् शेषशय्यायाः सकाशात् उत्तस्थौ च । ततः स जनार्दनस्तौ ददृशे च । आत्मनेपदं छान्दसम् ॥ ९१ ॥

तौ ददृशे इत्युक्तं तत्र तौ कौ कीदृशौ चेत्येतद्वाक्यशेषेणाह । मध्विति । दुष्टः आत्मा स्वभावो ययोस्तौ दुरात्मानौ । आत्मा यत्नो धृति-

क्रोधरक्तेक्षणा वत्तुं ब्रह्माणं जनितोद्यमौ ॥९२॥

समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ॥९३॥

बुद्धिः स्वभावो ब्रह्म वर्ष्म चेत्यमरः ॥ अतिशयितौ वीर्यं बलं, पराक्रमो युद्धकौशलं च ययोस्तावतिवीर्यपराक्रमौ । क्रोधेन रक्ते ईक्षणे नयने ययोस्तौ क्रोधरक्तेक्षणौ ॥ ब्रह्माणं अत्तुं खादितुं जनितः कृतः उद्यमो उद्योगो याभ्यां तौ । मधुकैटभौ तदाख्यावसुरौ ददृशे इति पूर्वेणान्वयः । अत्र प्रथमपादे एकाक्षराधिक्यं छान्दसम् । न वा एकेनाक्षरेण छन्दासि वियन्ति न वा द्वाभ्यामिति ब्राह्मणम् । एकेन अक्षरेण न्यूनेनाधिकेन वेति शेषः । न वियन्ति न विक्रियन्ते इत्यर्थः । एवमग्रे महिषेऽसुराणामधिपे इत्यत्रापि ज्ञेयम् । (अथ पाठान्तरादि) अत्तुमित्यत्र हन्तुमिति क्वचित् पाठः ॥९२॥

समुत्थायेति । ततः विभुः मधुकैटभवधसमर्थो भगवान् हरिः समुत्थाय सज्जीभूयेत्यर्थः । पूर्वश्लोके उत्थानस्योक्तत्वात् । युद्धोद्यमः समुत्थानमिति हलायुधः । बाहव एव प्रहरणान्यायुधानि यस्य स बाहुप्रहरणः । मधुकैटभयोर्निरायुधत्वात्स्वयमपि निरायुधः सन्नित्यर्थः ताभ्यां मधुकैटभाभ्यां सह । पञ्च पञ्च सङ्ख्याकानि । पञ्चेति भिन्नं पदम् । वर्षसहस्राणि । पञ्चसहस्रवर्षाणीत्यर्थः । अत्यन्तसंयोगे द्वितीया । युयुधे बाहुयुद्धं कृतवान् । (अथ पाठान्तरादि) इत उत्तरं सार्धौ द्वौ श्लोकावधिकौ क्वचित्पठ्येते । न च तौ युद्धवैमुख्यं शमंचाप्युपजग्मतुः ॥ युध्यमानावतिबलौ दृष्ट्वा तावसुरोत्तमौ ॥ निजविद्यां समासाद्य समुद्भूतमहोत्सवः ॥ हरिरूचे वरो मत्तो म्रियतां योऽभिवाञ्छितः ॥ निशम्यैतद्विभोर्वाक्यमवलोक्य परस्परम्मिति ॥ ९३ ॥

तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ।।९४।।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ।।९५।।

भगवानुवाच ।। ९६ ।।

ताविति अयमर्धश्लोकमन्त्रः । अतिबलेन उन्मत्तौ अतिबलोन्मत्तौ तौ मधुकैटभावपि । अपिस्त्वर्थे । महामाययाविमोहितौ महामायाविमोहितौ सन्तौ । पूर्वं ब्रह्मणा मोहयैतौ दुराधर्षावसुवसुरौ मधुकैटभाविति प्रार्थितत्वान्महामायया विमोहितौ कर्तव्याकर्तव्यज्ञानशून्यतां नीतावित्यर्थः ।। ९४ ।।

उक्तवन्ताविति । अयमप्यर्धश्लोकमन्त्रेः । ततस्तौ महामायाविमोहितत्वात् केशवं विष्णुं प्रति । अस्मत्तः आवाभ्यां सकाशात् । द्वित्वेऽप्यस्मत्त इति प्रयोगो गर्वात् । वरः इष्टोऽर्थः । व्रियतां याच्यतामित्युक्तवन्तौ । केशव इत्यत्र प्रशस्तौ केशावस्येति प्राशस्त्ये केशाद्वोन्यतरस्यामिति मत्वर्थीयो वप्रत्ययः केशयोः प्राशस्त्यं च बलभद्रश्रीकृष्णरूपत्वेन । पुरा किल भगवता विष्णुना स्वस्य द्वौ शुक्लकृष्णौ केशौ उत्पाट्य परित्यक्तौ ताभ्यां बलभद्रश्रीकृष्णावुत्पन्नाविति कथा हरिवंश । श्रीमद्भागवतेऽपि द्वितीयस्कन्धे बलभद्रश्रीकृष्णावतारप्रसङ्गे सितकृष्णकेश इति विशेषणेनैतदेवोक्तम् । अथवा को ब्रह्मा ईशः शिवः तौ वाति जगतः सर्गलयौ कर्तुं सूचयतीति केशवः । वा गतिगन्धनयोः गन्धनं उत्साहनं सूचनं वा । उत्साहनेऽपि हिंसायां सूचने चापि गन्धनम् इत्यमरः ।। ९५ ।।

भगवानिति । भगवत्पदार्थः प्रागुक्तः । केचिद्भक्त्यतिशयाद्भगवच्छब्दात्पूर्वं श्रीशब्दं योजयन्ति तन्न युक्तम् । कात्यायनीतन्त्रे ततो भगवदुक्तिः स्यादिति केवलभगवच्छब्दोपादानात् मन्त्रादौ प्रणवं विनान्याधिकाक्षरयोजने च मन्त्रत्वहानात् ।। ९६ ।।

भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥९७॥
किमन्येन वरेणात्र एतावद्धि वृतं मया ॥९८॥

ऋषिरुवाच ॥ ९९ ॥

वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ॥
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ॥१००॥

भवेतामिति । अयमर्धश्लोकमन्त्रः । वरमाह । भवन्तौ मे तुष्टौ प्रसन्नौ चेत्तर्हि उभौ द्वावपि अद्य मम वध्यौ मया हन्तुमर्हौ भवेताम् । मद्धस्ततो म्रियेयातामित्यर्थः । कृत्यानां कर्तरि वेतिसूत्रेण ममेति षष्ठी । भवेतामिति प्रथमपुरुषप्रयोगात् भवन्तावित्यस्याध्याहारः ॥ ९७ ॥
किमति । अत्र अस्मिन् समये एतदपेक्षयाधिकेन अन्येन वरेण किं प्रयोजनम् । अतः मया एतावद्धि एतावदेव वृतम् । (अथ पाठान्तरादि) मयेत्यत्र ममेति पाठे वृतमिति भावे क्तान्तम् ॥ ९८ ॥

ऋषिरिति ॥ ९९ ॥

वञ्चिताभ्यामिति । इति वञ्चिताभ्यामेवंविधवरयाचनेन भगवता प्रतारिताभ्यां ताभ्यां मधुकैटभाभ्यां सर्वं जगदापोमयं विलोक्य प्रतिश्रुतवरदानसमयादात्मानं मोचयितुं कमले इव ईक्षणे नयने यस्य स कमलेक्षणो भगवान् विष्णुः वक्ष्यमाणप्रकारेण गदित उक्तः । आपोमयमित्यत्र असुन्प्रत्ययान्तो नपुंसकलिङ्ग आपस्शब्दः । स्त्रीलिङ्गनित्यबहुवचनान्तादपशब्दान्मयटि तु अम्मयमिति स्यात् । (अथ पाठान्तरादि) इत उत्तरं मधुकैटभावूचतुः । प्रीतौ स्वस्तवयुद्धेन श्लाघ्यस्त्वन्मृत्युरावयोरित्येतावदधिकं क्वचित् पुस्तकेषु दृश्यते त्वदिति पञ्चम्येकवचनान्तं पृथक् पदम् ॥१००॥

आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥१०१॥

ऋषिरुवाच ॥ १०२ ॥

तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ॥
कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ॥१०३॥

ताभ्यां भगवान् किंगदितस्तदाह आवामिति । यत्र यस्मिन् प्रदेशे उर्वी पृथ्वी सलिलेन जलेन परिप्लुता मज्जिता नास्ति तत्रावां नौ जहि मारय इति गदितः । सर्वपृथिव्या जले मग्नत्वेन यत्र कुत्रापि जलापरिप्लुतभूमिप्रदेशाभावात् स्ववधे भगवतोऽवकाशो माभूदित्यभिप्रायेणैवमुक्तम् ॥ १०१ ॥

ऋषिरिति ॥ १०२ ॥

तथेति । शङ्खचक्रगदाभृता बाहुयुद्धकाले त्यक्तान्यायुधानि सम्प्रति तद्वधार्थं धारयता । पद्मस्याग्रहणं तु तस्य युद्धेऽनुपयोगात् एकहस्तस्य मधुकैटभशिरोधारणार्थं अवशेष्यत्वाच्च । शङ्खस्य ग्रहणं युद्धारम्भे युद्धान्ते च धमनार्थम् । भगवता विष्णुना तथेत्युक्त्वा एवमस्त्विवति तदुक्तिमङ्गीकृत्येत्यर्थः । स्वयं जलोपर्युपविश्य तयोः मधुकैटभयोः शिरसी जघने कृत्वा स्वोत्सङ्गे निधाय जघनस्य पृथिव्यात्मकत्वेन जलापरिप्लुतत्वेन च आवां जहि न यत्रोर्वी सलिलेन परिप्लुतेति तदुक्तसमयपरिपालनस्य सम्पत्स्यमानत्वादिति भावः । अत्र जघनशब्दः सामीप्यसम्बन्धादुत्सङ्गपरः । चक्रेण सुदर्शनेन छिन्ने कण्ठदेशात् पृथक् कृते (अथ पाठान्तरादि) इत उत्तरं हत्वा तु भगवान् विष्णुस्तावुभौ मधुकैटभौ ॥ व्यनाशयद्भयं घोरं ब्रह्मणोऽव्यक्तजन्मनः ॥ तयोस्तु मेदसा राजन्महीमेतामकल्पयत् ॥ मेदिनीति तदारभ्य संज्ञामाप वसुन्धरा ॥ ततो वीतभयो ब्रह्मा ससर्ज विविधाः प्रजाः ॥ यथापूर्वानुषङ्गेण केशवेनाभिरक्षितः ॥ इति श्लोकत्रयमधिकं क्वचित्पठ्यते ॥ १०३ ॥

**एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ॥
प्रभावमस्या देव्यास्तु भूयःशृणु वदामि ते ॥१०४॥**

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः ॥ १ ॥ ॐ ॥

महाकाल्यवतारचरितोपसंहारपूर्वकं महालक्ष्म्यवतारचरितादिकथनं प्रतिजानीते एवमिति । ब्रह्मणा संस्तुता एषा महामाया एवं पूर्वोक्तप्रकारेण स्वयं समुत्पन्ना अवतीर्णा । अस्या देव्याः पूर्वप्रकृताया, महामायाया इत्यर्थः । प्रभावं सामर्थ्यं । अथवा भव एव भावः प्रकर्षेण भावः प्रभावो जन्म अवतार इत्यर्थः । तं शृणु । ते तुभ्यं वदामि (अथ पाठान्तरादि) इत उत्तरं समाहितमना भूत्वा सुरथ क्षत्रियर्षभ ॥ शृणुष्व भक्त्या तेन त्वं संसाराब्धौ न मज्जसि ॥ इत्येकोऽधिकः श्लोकः क्वचित्पठ्यते ॥१०४॥

इतीति । इतीत्यव्ययं समाप्त्यर्थकम् । तच्चाध्यायपदस्य विशेषणम् । **मार्कण्डेयमहापुराणे** इति समग्रग्रन्थस्य नाम । केचिन्महच्छब्दरहितं पुराणपदं पठान्ति तच्चिन्त्यम् । मार्कण्डेयपुराणस्य महापुराणेषु परिगणितत्वात् मूलग्रन्थे च महापुराणे इत्येव पाठाच्च । **सावर्णिकमन्वन्तरे** इत्येतत्तद्गतावान्तरप्रविभागस्य नाम । सावर्णिकस्य मनोरन्तरं सावर्णिकमन्वन्तरं तस्मिन् सावर्णिकमन्वन्तरवर्णनात्मकप्रविभागे इत्यर्थः । एतेन सावर्णिके मन्वन्तरे इति व्यस्तपाठो न साधुः । **देवीमहात्म्ये** इत्येतत्प्रधानकरणस्य नाम । एतत्पर्यन्तश्चतुर्विंशतिवर्णात्मको भागः प्रथमादित्रयोदशान्ताध्यायसाधारणः । एतदुत्तरोऽध्यायभेदेन भिन्नभिन्नः । तत्र प्रथमाध्याये **मधुकैटभवधो नाम** प्रथमाध्याय इतिचदर्तुशाक्षरो विशिष्टभागः । **मधुकैटभवध** इत्यध्यायस्य संज्ञा । मधुकैटभयोर्वधो यस्मिन् इति विग्रहः । नामेति प्रसिद्धावव्ययम् । मधुकैटभवध इति प्रासिद्ध इत्यर्थः । प्रथम इति सङ्ख्या देवीमहात्म्याध्यायानुरोधेन । तच्च सङ्ख्याबोधकं अध्यायस्य विशेषणम् । तथा च मार्कण्डेय-

महापुराणान्तर्गतसावर्णिकमन्वन्तरकथान्तर्गतदेवीमहात्म्यान्तर्गतो मधुकैटभवधत्वेन प्रसिद्धः प्रथमोऽध्यायः समाप्त इति वाक्यार्थः । एवमग्रिमाध्यायेष्वपि तत्तद्विशेषभागाविषये स्वयमूह्यम् । (अथ पाठान्तरादि) केचिदत्र मधुकैटभयोर्वध इति व्यस्तं पठान्ति तन्न युक्तम् । वाक्यस्य संज्ञात्वायोगात् । एवं पञ्चमे देव्या दूतसंवाद इत्यत्र तथा त्रयोदशे सुरथवैश्ययोर्वरप्रदानमित्यत्र च ज्ञेयम् । तत्र क्रमेण मधुकैटभवधः देवीदूतसंवादः सुरथवैश्यवरप्रदानामिति समस्तमेव पठनीयम् । अन्ये इतिशब्दो हरेल्लक्ष्मीं वधः कुलविनाशकृत् ॥ अध्यायो हरते प्राणान् मार्कण्डेयोऽब्रवीदिदम् ॥ इत्यदृष्टमूलकेवलकर्णपरम्पराश्रुतवचनस्य प्रामाण्यसम्भावनया अध्यायसमाप्तिवाक्येषु इतिपदवधपदाध्यायपदानि न पठन्ति तन्न युक्तम् । इतिपदत्यागेऽध्यायस्यारम्भो वा समाप्तिर्वेति संशयापत्तेः । वधपदत्यागे मधुकैटभेत्यादेः समासैकदेशस्यापदत्वेन प्रयोगानर्हत्वात् ॥ अध्यायपदत्यागे च प्रथमो द्वितीय इत्याद्यध्यायसङ्ख्यादर्शकविशेषणानां विशेष्याभावेनान्वयायोगात् । किञ्च तन्त्रान्तरमतेनाध्यायसमाप्तिवाक्यानां मन्त्रत्वपक्षे मन्त्रान्तर्गतांशत्यागे मन्त्रभङ्गप्रसङ्गाच्च । तस्माद्यथास्थितवाक्यपाठ एव युक्तः । एवञ्चाष्टत्रिंशदक्षरात्मकमेतत्प्रथमाध्यायवाक्यम् ॥ अथोक्तवचनस्य प्रामाण्ये आग्रह एव चेत्तर्हि प्रत्यध्यायं मार्कण्डेयमहापुराणे इत्यादिदेवीमहात्म्ये इत्यन्तं पठित्वान्ते प्रथमो द्वितीय एतावन्मात्रमेव पठनीयम् । न तु मधुकैटभेत्यादि शक्रादिकृतस्तुतिरित्यादिश्च विशेषः पठनीयः । इत्यलम् ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे प्रथमाध्यायव्याख्या ॥ समाप्तं प्रथमचरितम् ॥

अथ मध्यमचरितम्

ॐ ऋषिरुवाच ॥ १ ॥

ऋषिरिति । अथ द्वितीयाध्यायमन्त्रविभागकारिका । द्वितीये प्रथमो गद्यमन्त्रस्त्वृषिरुवाच ह ॥ ततो देवासुराद्याश्चाष्टषष्टिः श्लोकमन्त्रकाः ॥ सर्वे मन्त्रास्तथैकोनसप्ततिः परिकीर्तिताः ॥ इति ॥ अथ मन्त्रव्याख्या । ऋषिरुवाचेति ॥ १ ॥ (अथ पाठान्तरादि) क्वचित् इत उत्तरं बहवः श्लोका अधिकः पठयन्ते । ते यथा । पुरा देवासुरे युध्दे सैन्द्रैर्देवैः समाहितैः ॥ दितिर्निहतपुत्रा वै प्रोवाच तनुजां प्रति ॥ गच्छ पुत्रि तपस्तीव्रं कुरु पुत्रो भवेद्यथा ॥ सेन्द्रा देवाश्च नङ्क्ष्यन्ति येन यातेन संयुगे ॥ एवमुक्ता सुता मात्रा तां प्रणम्य यशस्विनी ॥ जगाम तपसे शीघ्रां गतिमास्थाय काननम् ॥ सुपार्श्वस्याश्रमाभ्याशे भार्गवस्य तपस्विनी ॥ अथ माहिषमास्थाय वपुः पञ्चतपःस्थिता ॥ क्रूरेण कर्मणा तस्याः क्षुब्धमासीज्जगत्रयम् ॥ सङ्क्षोभितो महर्षिश्च सुपार्श्वस्तपसानया ॥ अब्रवीत् क्रोधताम्राक्षस्तपस्यन्तीं महत्तपः ॥ ईदृग्विधस्ते वपुषा महिषो नामतः सुतः ॥ भविष्यति महावीर्यो यदि दन्तेविचेष्टितम् ॥ तत्राजगाम भगवान् ब्रह्मा लोकपितामहः ॥ अब्रवीत्तां विशुध्दात्मा तपसा परितोषितः ॥ मुखं माहिषमेवास्तु वपुषान्येन वैः नरः ॥ ईदृशस्ते सुतः सुभ्रु भविष्यति न संशयः ॥ यश्चालयिष्यति दिवो देवराजं सहानुगम् ॥ ऋषिरुवाच ॥ तथाभवत्स महिषो यथोक्तं परमेष्ठिना ॥ अवर्धत महातेजाः शुक्लपक्ष इवोडुराट ॥ विप्रचित्तिसुतश्चास्य विद्युन्माली पिताभवत् ॥ वरदानं ततः श्रुत्वा महिषस्य महाद्युतेः ॥ समाजग्मुस्ततः सर्वे महिषं दैत्यदानवाः ॥ ऊचुश्चापरिवार्यैनं प्रश्रयावनतं नृप ॥ अस्माकमेतत्त्रिदिवाधिपत्यं हृतं सुरैर्विष्णुबलाश्रयेण ॥ तदानयस्वात्मबलेन वीर प्रकाशयस्वाद्य तव प्रभावम् ॥ ऋषिरुवाच ॥ एवमुक्तस्तु तैर्दैत्यैर्जगाम त्रिदिवं प्रति ॥ योध्दुकामो महावीर्यो महिषस्स्वर्गवासिभिः

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥
महिषेःसुराणामधिपे देवानां च पुरन्दरे ॥२॥
तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ॥

॥इति॥ अनया पूर्वपीठिकया विप्रचित्तेः पुत्राद्विद्युन्मालिनो दितेः पुत्र्यां महिषो जात इत्युक्तं भवति ॥ दनोः पुत्रो रम्भासुरः कामातुरो महिष्या मिथुनीभूय तस्यां महिषासुरं जनयामासेति कथा **देवीभागवते** ॥ रम्भासुरतपसा प्रसन्नस्य श्रीसदाशिवस्य प्रसादाज्जातः शिवांशोऽयं महिषस्तपस्तप्त्वा देवीसायुज्यं मम भवत्विति शिवं प्रार्थितवानिति **कालिकापुराणे** ॥ विप्राचित्तेर्दैत्यस्य पुत्री माहिष्मती सिन्धुद्वीपमृषिं तपस्यन्तं महिषीवेषेणाभीषयत् ॥ ततस्तेन महिषी भवेति शप्ता सती महिषीवेषधारणात् पूर्वं स्वसम्भोगेच्छयाघृतं तस्याः सुन्दरं रूपं दृष्ट्वा कामातुरस्य ऋषेः स्कन्नं शुक्रं पीत्वा गर्भवती जाता महिषरूपं सुतमसूतेति कथा **वराहपुराणे** ॥ कल्पभेदादविरोधः ॥१॥

अथादिशक्तेर्महामायाया रजःप्रधानत्रिगुणात्मकं महालक्ष्म्याख्यं द्वितीयमवतारं कथयितुं कथां प्रस्तौति देवासुरमित्यादिना ॥ पुरा प्राक्काले । कोऽयं प्राक्काल इत्यपेक्षायामाह महिष इति । महिषे असुराणामधिपे सति पुरन्दरे तदाख्ये इन्द्रेच देवानामधिपे सति। अर्थाद्वैवस्वतमन्वन्तरे इत्यर्थः । तत्रैव पुरन्दरनाम्न इन्द्रस्य सत्वात् । देवाश्चासुराश्चैषां समाहारो देवासुरम् ॥ देवासुरस्येदं देवासुरम् । तस्येदमित्यण् । संज्ञापूर्वकविधेरनित्यत्वादादिवृद्ध्यभावः । युध्दम् पूर्णमन्यूनम् । अब्दानां वर्षाणां शतमब्दशतम् ॥ अत्यन्तसंयोगे द्वितीया । अभूत् । अत्र तृतीयपादे एकमक्षरमधिकमस्ति । तद्विषये पूर्वाध्याये उक्तम् । (अथ पाठान्तरादि) दैवासुरमित्येव पाठः क्वचित् ॥ २ ॥

जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ॥३॥
ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ॥
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ४ ॥
यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ॥
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥५॥
सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ॥

तत्रेति । तत्र युध्दे । महावीर्यैरसुरैः देवसैन्यं पराजितमासीत् । महिषासुरश्च सकलान् देवान् जित्वा इन्द्रःस्वर्गाधिपतिरभूत् ॥ ३ ॥

तत इति । ततः महिषासुरेण पराजिता देवा इन्द्रादयः पद्मं विष्णुनाभिकमलं योनिर्जन्मस्थानं यस्य पद्मयोनिस्तं । प्रजापतिं ब्रह्माणं । दक्षादिव्यावृत्यर्थं पद्मयोनिमिति विशेषणम् । पुरस्कृत्य अग्रे कृत्वा ब्रह्मलोकं गत्वा तमानीयेत्यर्थात् सिध्दम् । यत्र कात्यायनाश्रमे इत्यर्थः । ईशगरुडध्वजौ शिवविष्णू आस्तामिति शेषः । अल्पाच्तरत्वादीशशब्दस्य पूर्वनिपातः । तत्र गताः । तदा केनचित् कारणेन शिवविष्णू कात्यायनाश्रमे आस्तामिति वामनपुराणे ।। ४ ॥

यथेति । उत्पत्तिसत्तावृद्धिपरिणामापक्षयविनाशरूपासु षट्सु दशास्वाद्यास्तिस्र एव दशा अवस्था येषां ते त्रिदशाः । अथवा त्रयश्च त्रिरावृत्ता दश च त्रिदशाः । त्रयस्त्रिंशद्वै देवा इति श्रुतेः एकस्य त्रिशब्दस्य लोपः पृषोदरादित्वात् । बहुव्रीहौ संख्येये इति डच् । तयोरीशगरुडध्वजयोः । शेषे षष्ठी । तयोः पुरत इति वा । देवानामभिभवस्य पराभवस्य विस्तरोबाहुल्येन वर्णनं यस्मिंस्तत् देवाभिभवविस्तरम् ॥ महिषासुरस्य चेष्टितं विक्रीडितं । यथा येन प्रकारेण वृत्तं जातं तद्वत् तथा कथयामासुः ॥ ५ ॥

महिषासुरचेष्टितप्रकारमाहुः सूर्येत्यादिना । स महिषासुरः । सूर्येन्द्राग्नि-

अन्येषां चाधिकारान् स स्वयमेवाधितिष्ठति ॥६॥
स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥
विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥७॥
एतद्वः कथितं सर्वममरारिविचेष्टितम् ॥
शरणं वः प्रपन्नास्स्मो वधस्तस्य विचिन्त्यताम् ॥८॥
इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥
चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ॥९॥

वायुचन्द्राणां यमस्य वरुणस्य च अन्येषां कुबेरादीनां च अधिकारान् कर्माणि स्वयमेव अधितिष्ठति करोतीत्यर्थः । अधिशीङ्स्थासां कर्मेत्यधिकारपदस्य कर्मत्वम् । सूर्येन्द्रादीनामधिकाराः पञ्चमाध्याये वक्ष्यन्ते ॥ ६ ॥

न केवलं देवानामधिकारा एव हृताः अपि तु निवासस्थानान्यपि हृतानीत्याहुः। स्वर्गादिति तेन दुरात्मना महिषेण स्वर्गात् निराकृता निरस्ताः सर्वे देवगणाः । मर्त्या यथा मनुष्या इव । यथाशब्द इवार्थे । यथा मर्त्यास्तथेति वा । पादचारेणेत्यर्थः । भुवि पृथिव्यां देवसञ्चारानर्हायामिति भावः । विचरन्ति सञ्चरन्ति । किमितोन्यद्दुःखतरमिति भावः ॥ ७ ॥

महिषचेष्टितकथनोपसंहारपूर्वकमुत्तरकर्तव्यं प्रार्थयन्ते एतदिति । एतत्पूर्वोक्तं सर्वं अमरारेर्देवशत्रोर्महिषस्य विचेष्टितं आचरितं वः युष्मभ्यं कथितम् । व इति वहुवचनं ब्रह्मसहितत्वाभिप्रायेण । वः युष्मान् शरणं रक्षकान् प्रपन्नाः रक्षणार्थमुपसन्ना स्म इत्यर्थः । शरणं गृहरक्षित्रोरित्यमरः । शरणशब्दो नित्यनपुंसक एकवचनान्तः । वाक्यभेदाद्व इत्यस्य न पौनरुक्त्यम् । (अथ पाठान्तरादि) शरणं व इत्यत्र शरणंचेति क्वचित्पठ्यते । इतउत्तरं ऋषिरुवाचेत्यपेक्षितमपि नास्ति ॥ ८ ॥

इत्थमिति । ऋष्युक्तिरियम् । मधुसूदनो मधुदैत्यहन्ता विष्णुः । इत्थं पूर्वोक्तप्रकाराणि देवानां वचांसि निशम्य श्रुत्वा कोपं चकार स्वीकृत-

ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ॥
निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥ १० ॥
अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥ ११ ॥
अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् ॥
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ॥ १२ ॥

वान् । शम्भुश्चेत्थं देवानां वचांसि निशम्य कोपं चकार । इति वाक्यभेदेन योजना ॥ ततः उभावपि भ्रुवोः कुट्या वक्रतया कुटिले भीषणे आनने मुखमण्डले ययोस्तौ भ्रुकुटीकुटिलाननौ आस्तामिति शेषः । भ्रुशब्दस्य पृषोदरादित्वात् ह्रस्वः । भ्रुकुटिशब्दश्चतुर्धोक्तो हेमचन्द्रेण । सकोपभ्रूविकारे स्यात् भृभ्रभ्रुभ्रूपरा कुटिरिति । (अथ पाठान्तरादि) भ्रुकुटीकुटिलानन इत्येकवचनान्तोऽपि पाठः क्वचित् ॥ ९ ॥

तत इति । ततः अतिकोपेन पूर्णस्य व्याप्तस्य चक्रिणो विष्णोः वदनान्मुखमण्डलात् मुखबिलाद्वा । ततः अनन्तरं ब्रह्मणः शङ्करस्य च वदनात् महत् बहुलं तेजो निश्चक्राम निर्गतम् । अतिकोपपूर्णस्येति विशेषणं ब्रह्मणि शङ्करे च योज्यम् । द्वितीयं तत इति पदं वदनादित्यस्य विशेषणं वा । भृकुटीकुटिलादिति तदर्थः ॥ १० ॥

अन्येषामिति । अन्येषामुक्तत्रयातिरिक्तानां शक्रादीनां देवानां चैव शरीरतः वदनेभ्य इत्यर्थः । सुमहदतिबहुलं तेजो निर्गतम् निष्क्रान्तम् तच्च पूर्वोक्तविष्ण्वादितेजस्त्रयेण सह ऐक्यं एकीभावं समगच्छत अगच्छत् । आत्मनेपदं छान्दसम् । अकर्मकविषय एव तदनुशासनात् ॥ (अथ पाठान्तरादि) समगच्छतेत्यत्र समपद्यतेति क्वचित् पाठः ॥ ११ ॥

अतीवेति । ते सुराः तत्र कात्यायनाश्रमे । ज्वालाभिर्व्याप्तं दिशां

अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ॥
एकस्थं सदभून्नारी व्याप्तलोकत्रयं त्विषा ॥ १३ ॥
यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् ॥
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ॥१४॥
सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेणचाभवत् ॥
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ॥१५॥

अन्तरमवकाशो येन तं तेजसः कूटं राशिं । मायानिश्चलयन्त्रेषु कैतवानृतराशिषु ॥ आयोधने शैलश्रृङ्गे सीराङ्गे कूटमस्त्रियाम् इत्यमरः ॥ अतीव ज्वलन्तं पर्वतमिव ददृशुः मेनिरे इत्यर्थः ॥ १२ ॥

अतुलमिति । तत्र कात्यायनाश्रमे । न विद्यते तुला साम्यं परिमाणं वा यस्य तदतुलम् । निरुपममपरिमितं वेत्यर्थः । त्विषा ज्वालाभिर्व्याप्तं लोकत्रयं भूर्भुवःस्वर्लोका येनैतादृशं सर्वेषां देवानां शरीरेभ्यो जातं सर्वदेवशरीरजं तत्तेजः एकस्थं एकत्र मिलितं सत् नारी अभूत् । नार्यात्मना परिणतमित्यर्थः । (अथ पाठान्तरादि) सदित्यत्र तदितिपाठे पूर्वोक्तविशेषणविशिष्टं तत्तेजः प्रथममेकस्थमभूत् ततस्तन्नारी अभूदिति भेदेनान्वयः ॥ १३ ॥

अथ तस्या नार्याः कोऽवयवः कस्य देवस्य तेजसा जज्ञे तदाह यदिति । यत् शम्भोरिदं शाम्भवं तेजोऽभूदासीत् । तेन तस्या नार्या मुखं तन्मुखमजायत । यमस्येदं याम्यं तेन याम्येन यमतेजसेत्यर्थः । यमाच्चेति ण्यः । तस्याः केशा अभवन् । विष्णुतेजसा बाहवः अभवन् । अत्र बाहुपदे नाङ्गुलिमूलान्तभागो गृह्यते । अग्रे वसूनां च कराङ्गुल्य इति वक्ष्यमाणत्वात् ॥ १४ ॥

सौम्येनेति । सोमस्य चन्द्रस्येदं सौम्यं। छान्दसष्ट्यण् । तेन स्तन-

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा ॥
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका ॥१६॥

तस्यास्तु दन्ताःसम्भूताः प्राजापत्येन तेजसा ॥
नयनत्रितयं जज्ञे तथा पावकतेजसा ॥१७॥

भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च ॥

योर्युग्मं द्वयमभवत्। ऐन्द्रेण च इन्द्रतेजसा तु मध्यं मध्यभागः चकारादुदरं चाभवत्। उदरं वासवीयेनेति **वामनपुराणात्** । मध्यमं चावलग्नं च मध्योऽस्त्रीत्य**मरः**। वारुणेन च वरुणतेजसा तु जङ्घे चोरू चैषां समाहारो जन्घोरु अभवत्। प्राण्यङ्गत्वादेकवद्भावो नपुंसकत्वं च। जङ्घे जानुनोरधोभागौ ऊरू चौर्ध्वभागौ ॥ भुवस्तेजसा नितम्बः कटिपश्चाद्भागः जघनाख्यः कटिपुरोभागश्चाभवत् ॥ भूतेजसा यज्जघनं प्रजज्ञे इति **वामनपुराणात्**। (अथ पाठान्तरादि) मध्यं चैन्द्रेणेत्यत्र मध्यमैन्द्रेणेति क्वचित् पाठः। जङ्घोरु इत्यत्र दीर्घान्तपाठे जङ्घ इति पृथक्पदम्। जातित्वादेकवचनम्। जङ्घाभवत् ऊरू अभवतामिति योजना ॥ १५ ॥

ब्रह्मण इति। ब्रह्मणस्तेजसा पादावभवताम्। अर्कतेजसा सूर्यतेजसा तदङ्गुल्यः पादाङ्गुल्योऽभवन्। वसूनां तत्सञ्ज्ञकानां गणदेवतानां तेजसा कराङ्गुल्योऽभवन्। कौबेरेण च कुबेरस्य तेजसा तु नासिका अभवत् ॥१६॥

तस्या इति। प्रजापतीनां दक्षादीनामिदं प्राजापत्यम्। पत्युत्तरपदत्वाण्यः। तेन तेजसा तु तस्या दन्ताः सम्भूताः। तथा पावकस्याग्नेस्तेजसा नयनत्रितयं जज्ञे जातम् ॥ १७ ॥

भ्रुवाविति। सन्ध्ययोः प्रातः सायं समुपास्ययोर्देवतयोस्तेजः कर्तृ भ्रुवौ जज्ञे भ्रूयुगात्मना परिणतम्। अनिलस्य वायोस्तेजस्तु श्रवणौ जज्ञे।

अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ॥१८॥
ततः समस्तदेवानां तेजोराशीसमुद्भवाम् ॥
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥ १९ ॥
ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च ॥

कर्णद्वयात्मना परिणतं । विधेयप्राधान्यात् जज्ञे इत्येकवचनं ॥ श्रवणः श्रवणं श्रुतिरिति हेममालाकोशात् श्रवणशब्दस्य पुंस्त्वं ॥ एवमुक्तानां शिवादिदेवानां अन्येषामनुक्तानामरुणकार्तिकेयादिदेवानां च तेजसां । उक्तं च **देवीभागवते** । अधरश्चातिरक्तोऽस्याः सञ्जातोऽरुणतेजसा ॥ उत्तरोष्ठस्तथा रम्यः कार्तिकेयस्य तेजसेत्यादि ॥ सम्भवः मेलकः सङ्घात इति यावत् । सम्भवो जनने हेतौ मेलके चारुजन्मनीति**हैमः** मेलकेऽपि च सम्भवः इति **त्रिकाण्डीशेषश्च** । शिवा जज्ञे । तदाख्यमङ्गलमयदेवतात्मना परिणतोऽभूत् । वस्तुतः शिवाया महालक्ष्म्या एव ये शक्त्यंशा देवेष्वासंस्ते एव तेजोरूपेण देवशरीरेभ्यो विनिष्क्रम्यैकत्र सम्भूय पुनस्तदात्मना परिणताः । तदुक्तं **लक्ष्मीपाञ्चरात्रे** शक्रं प्रति महालक्ष्म्या । मदीयाः शक्तिलेशा ये तत्तद्देवशरीरगाः ॥ सम्भूयते ममाभूवन् रूपं परमशोभनम् ॥ आयुधानि च देवानां यानि यानि सुरेश्वर ॥ मच्छक्तयस्तदाकारा आयुधानि ममाभवन् ॥ इति ॥ एतेनाग्रे दास्यमानान्यायुधान्यपि देवीशक्तय एवेति ज्ञेयम् ॥ १८ ॥

तत इति । ततः शिवाया उत्पत्त्यनन्तरम् । महिषेण अर्दिताः जिहिंसिताः पीडिता इत्यर्थः महिषार्दिताः । अमरा देवाः शक्रादयः । समस्तदेवानां तेजसां राशेः समुद्भवो यस्यास्तां शिवां विलोक्य मुदं हर्षं प्रापुः । एषा महिषं हत्वास्मान् दुःखान् मोचयेदित्याशंसयेति भावः ॥ १९ ॥

अथ देव्यै देवानामायुधाभरणादिदानमाह तत इति । ततो देवा-

शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकभृत् ॥२०॥
चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः ॥
शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ॥२१॥
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥

स्तस्यै शिवायै स्वानि स्वानि आयुधानि ददुः। चकाराद्भूषणान्यपि। तत्र येषां यानि लक्षणभूतान्यायुधादीन्यासंस्तेभ्यस्ते तादृशान्यायुधान्युत्पाद्य ददुः। यथा शिवादयः शूलादीनि। यानि येषां न लक्षणभूतान्यासंस्तानि ते साक्षादेव ददुः। यथा क्षीरोदादयो हारादीनि। तत्र पिनाकं तन्नामकं धनुः बिभर्तीति पिनाकभृत् शिवः। शूलात् स्वत्रिशूलं विनिष्कृष्य उत्पाद्येत्यर्थः। तस्यै ददौ। (अथ पाठान्तरादि) पिनाकधृक् इति क्वचित् पाठः। अत्र प्रथमार्धं केचिन्न पठन्ति। तन्न युक्तम्। शेषश्च सर्व नागेश इत्यादीनां श्लोकमन्त्राणां वाक्यभङ्गापत्तेः। केचित् प्रथमार्धानन्तरं ऊचुर्जयजयेत्युच्चैर्जयन्तीं ते जयैषिणः॥ इत्यर्धमधिकं च पठन्ति ॥ २० ॥

चक्रमिति। कृष्णश्च विष्णुस्तु। स्वचक्रतः अन्यच्चक्रं समुत्पाद्य विनिष्कृष्य। तस्यै दत्तवान्॥ चकाराद्गदामपीति **भास्कररायाः**। तन्न। **देवीभागवते** तस्या विश्वकर्मदत्तत्वोक्तेः। वरुणः स्वशङ्खादन्यं शङ्खमुत्पाद्य तस्यै दत्तवान्। हुताशनोऽग्निः स्वशक्तेरन्यां शक्तिमुत्पाद्य तस्यै ददौ। एवमग्रेऽपि स्वलक्षणायुधादिस्थलेऽनुक्तेप्युत्पाटने स्वयमूह्यम्। शक्तिलक्षणं कवचव्याख्यायामुक्तम्। (अथ पाठान्तरादि) कृष्णइत्यत्र विष्णुरिति समुत्पाद्येत्यत्र समुत्पाद्येति च क्वचित्पठ्यते एवमग्रेऽपि ज्ञेयम् ॥ २१ ॥

मारुतइति। मारुतो वायुः स्वचापादन्यं चापं बाणपूर्णाभ्यामिषुधिभ्यां बाणपूर्णे इषुधी चोत्पाद्य दत्तवान्। इषुधी तूणीरौ इषुधिशब्दोऽत्र स्त्रीलिङ्गः। बाणपूर्णे इति विशेषणस्य स्त्रीलिङ्गत्वात्। **वामनपुराणे**-

वज्रमिन्द्रस्समुत्पाद्य कुलिशादमराधिपः ॥२२॥
ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् ॥
कालदण्डाद्यमो दण्डं पाशञ्चाम्बुपतिर्ददौ ॥२३॥
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥
समस्तरोमकूपेषु निजरश्मीन् दिवाकरः ॥२४॥

इषुधी बाणांश्च सूर्यो ददावित्युक्तम्। अत्र बाणस्य पृथग्दानाभावेऽपि इषुध्योर्बाणपूर्णत्वोक्त्या रहस्येऽष्टादशायुधेषु अक्षमाला च कमलं बाणोऽसिः कुलिशं गदेति बाण उक्तः। अमराणां अधिप इन्द्रः कुलिशात् स्ववज्रात् अन्यं वज्रमुत्पाद्य तस्यै दत्तवान्। अयं वज्रः पूर्वमिन्द्राय देव्यैव दत्तः तदुक्तं **ब्रह्माण्डपुराणे**। इन्द्रस्य जले तपश्चरणानन्तरं तज्जलादुत्थिता देवी वज्रं दत्वा बलद्विषे ॥ पुनरन्तर्दधे सोऽपि कृतार्थः स्वर्गमेयिवान् इति ॥२२॥

इन्द्रस्यान्यदपि दानमाह। ददाविति। सहस्रमक्षीणि यस्य स सहस्राक्ष इन्द्रः। बहुव्रीहौ सक्थ्यक्ष्णोरिति समासान्तः षच्। ऐरावतात्तन्नामकात् स्वगजात् घण्टां अवतार्येति शेषः। तस्यै ददौ। घण्टायाः सहस्राक्षस्य स्वलक्षणत्वाभावात् साक्षाद्दानम्। यमः कालदण्डनामकादायुधादन्यं कालदण्डमुत्पाद्य ददौ। वरुणस्यान्यदपि दानमाह। अम्बुपतिर्वरुणः स्वपाशादन्यं पाशमुत्पाद्य ददौ। पूर्वं वरुणेन शङ्खो दत्तः ॥ २३ ॥

प्रजापतिरिति। प्रजापतिर्दक्षाद्यन्यतमः स च अक्षमालाया अन्याक्षमालामुत्पाद्य तस्यै ददौ। अक्षमाला मणिमाला पुष्पादिमालाव्यावृत्त्यर्थमक्षग्रहणम्। ब्रह्मा कमण्डलोरन्यं कमण्डलुमुत्पाद्य ददौ। **वामनपुराणे** अक्षमालाकमण्डल्वोर्ब्रह्मण एव दातृत्वमुक्तम् तत्पक्षेऽत्र प्रजापतिरिति ब्रह्मणो विशेषणम्। दिवाकरः सूर्यः। तस्याः समस्तरोमकूपेषु सार्धत्रिकोटिसङ्ख्येष्वित्यर्थः। तिस्रः कोट्योऽर्धकोटी च यानि लोमानि मानवे ॥ इति **स्मरणात्**।

कालश्च दत्तवान् खड्गं तस्यै चर्म च निर्मलम् ॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे ॥२५॥
चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥
अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु ॥२६॥

निजरश्मीन् स्वकिरणान् तावत्सङ्ख्याकानित्यर्थः । ददौ निवेशयामास । शोभार्थमिति भावः । सूर्यस्य सहस्ररश्मिसंज्ञत्वेऽपि सहस्रशब्दस्यानन्तवाचित्वात् न कश्चिद्विरोधः । गर्तोदपानयोः कूप इति शाश्वतात् कूपशब्दो गर्तवाची ॥ २४ ॥

काल इति । कालो मृत्युः शरीरप्राणवियोगकारी देवताविशेषः । कालो मृत्यौ महाकाले समये यमकृष्णयोरिति मेदिनी । खड्गादन्यं खड्गचर्मणोऽन्यन्निर्मलं चर्म चोत्पाद्य तस्यै दत्तवान् ॥ निर्मलमिति विशेषणं खड्गेऽपि योज्यम् । तस्यापि कलङ्करहितत्वात् क्षीरमेवोदकं यस्मिन् स क्षीरोदः क्षीरसागरः । उदकस्योदः संज्ञायामित्युदकस्योदादेशः । अमलं स्वच्छं हारं मुक्तावलीं । तथा न विद्यते जरा ययोस्ते अजरे । सुवर्णतन्तुनिर्मितत्वान्नित्यनवे इत्यर्थः । अम्बरे वस्त्रे । एकं परिधानीयमन्यत् प्रावारभूतमिति द्वे दत्तवान् । क्षीरोदादिपदैस्तत्तदभिमानिन्यो देवता ग्राह्याः । (अथ पाठान्तरादि) तस्यै इत्यत्र तस्या इति पाठः क्वचित् ॥ २५ ॥

चूडामणिमिति । चूडामण्याद्यङ्गुलीयकरत्नान्तानां वस्तूनां क्षीरोद एव दाता । तथेति तद्वदिति पदयोः पुनः पुनः प्रयोगेण तस्यैवानुवृत्तेर्बोधितत्वात् । तथा अजराम्बरवत् । क्षीरोद एव दिव्यं द्युतिमन्तं । चूडामणिं शिरोरत्नम् कुण्डले कर्णभूषणे । कटकानि वलयानि । तथा शुभ्रं हीरकघटितत्वात् श्वेतवर्णम् । अर्धचन्द्रं तदाकारं शिरोभूषणविशेषणम् । अथवा साक्षादेवार्धचन्द्रम् । तस्य क्षीरोदार्णवसम्भूतत्वाद्देव्याश्चन्द्रार्धधारित्वाच्च । सर्वबाहुषु

नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम् ॥
अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ॥२७॥
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥
अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् ॥२८॥

सहस्रसंख्याकेषु। दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थितामिति वक्ष्यमाणत्वात् । केयूरान् बाहुभूषणानि । केयूरशब्दस्य केयूरमङ्गदं तुल्ये इत्यमरमतेन नपुंसकत्वेऽप्यर्धर्चादिगणे पाठात् पुंस्त्वं च । अत्रोत्तरश्लोके च क्षीरोदो दत्तवांश्चेति पदयोरध्याहारेण वाक्यपूर्तिर्विधेया ॥ २६ ॥

नूपुराविति । विमलौ रत्नघटित्वान्निर्मलौ । नूपुरौ मञ्जीराख्यौ पादालङ्कारौ । तद्वत्तथा । न विद्यते उत्तममन्यदुत्कृष्टं वस्तु यस्मात्तदनुत्तमम् सर्वोत्तममित्यर्थः । ग्रीवायां भवं ग्रैवेयकं कण्ठभूषणम् । कुलकुक्षिग्रीवेति ढकञ् । समस्तासु सर्वासु पादयोर्दश । भुजसहस्रस्य पञ्चसहस्राणीति दशाधिकपञ्चसहस्रसङ्ख्याकास्वित्यर्थः ॥ अङ्गलीषु अङ्गुलीषु भवान्यङ्गुलीयकानि ऊर्मिकाः । श्रेष्ठान्यङ्गुलीयकानि अङ्गुलीयकरत्नानि । रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः ॥ २७ ॥

विश्वकर्मेति । विश्वकर्मा देवशिल्पी । तस्यै अतिनिर्मलं शाणोल्लिखितत्वाद्भास्वरमित्यर्थः । परशुं कुठारं चकाराद्गदामपि ददौ ॥ गदां कौमोदकीं त्वष्टा घण्टाशतनिनादिनीम् ॥ अदात्तस्यै प्रसन्नात्मा सर्वशत्रुविनाशिनीमिति देवीभागवतोक्तेः । रहस्ये अक्षमाला च कमलं बाणोऽसिः कुलिशं गदेति देव्याष्टादशायुधेषु गदाया उक्तत्वाच्च । अनेकरूपाणि नानाकृतीनि अस्त्राण्यायुधानि तथा अभेद्यं शस्त्रैरच्छेद्यं दंशनं वर्म च ददौ । तनुत्रं वर्म दंशनमित्यमरः ॥ २८ ॥

अम्लानपङ्कजां मालां शिरस्युरसि चापराम् ॥
अददाज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ॥२९॥
हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥
ददावशून्यं सुरया पानपात्रं धनाधिपः ॥३०॥
शेषश्च सर्वनागेशो महामणिविभूषितम् ॥

अम्लानेति। जलधिः लवणोदः । तस्यै अम्लानानि सदा विकस्वराणीत्यर्थः । पङ्कजानि कमलानि यस्यास्तामेकां मालां शिरसि । तादृशीमेवापरां मालामुरसि च हस्ते अतिशोभनं पङ्कजं लीलाकमलं चाददादर्पितवान् । डुदाञ् दाने इत्यस्मल्लङ् । (अथ पाठान्तरादि) अददादिति ह्रस्वोपधपाठः क्वचित् । तत्पक्षे दद् दाने इत्यस्य रूपम् । परस्मैपदं तु छान्दसम् ॥ २९ ॥

हिमवानिति । हिमवान् हिमाचलः । वाहयति देशान्तरं प्रापयतीति वाहनम् गमनसाधनमित्यर्थः । णिजन्ताद्वहेः कर्तरि ल्युट् । वाहनशब्दो नपुंसकलिङ्गः स च सिंहशब्दस्य विशेषणम् । हिनस्तीति सिंहस्तम् । हिसि हिंसायाम् । पृषोदरादित्वाद्वर्णविपर्ययः । उक्तं च सिद्धान्तकौमुद्याम् । भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ॥ गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् । इति ॥ अन्यत्रापि हिसिधातोः सिंहशब्दो वश् कान्तौ शिवःस्मृतः ॥ पश्यकः कश्यपश्चैव वर्णव्यत्ययतस्त्विमे, इत्युक्तम् ॥ तथा विविधानि रत्नानि वज्रपद्मरागमरकतेन्द्रनीलादिमणींश्चाददात् । धनाधिपः कुबेरः सुरया मदिरया अशून्यं अरिक्तं पूर्णमित्यर्थः । पानपात्रं सुरापानसाधनभाजनम् ददौ । यक्षाणां रजस्तमःप्रकृतित्वादस्या देव्याश्च रजःप्रधानात्रिगुणात्मकत्वात्सुरादानपाने न विरुद्धे ॥ ३० ॥

शेषइति । यः इमामस्मदाधारभूतां पृथिवीं धत्ते स्वमूर्धसहस्रे धारयति । स सर्वेषां नागानां सर्पाणामीशः शेषोऽनन्तस्तु तस्यै महामणिभिः

नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ॥३१॥
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥
सम्मानिता ननादोच्चैस्साट्टहासं मुहुर्मुहुः ॥३२॥
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥
अमायतातिमहता प्रतिशब्दो महानभूत् ॥३३॥
चुक्षुभुः सकला लोकास्समुद्राश्च चकम्पिरे ॥

फणारत्नैर्विभूषितं सुशोभितं नागहारं नागसहस्रघटितां शिरःस्रजमित्यर्थः। ददौ। उक्तं च यामले। मूर्ध्नि सर्पसहस्राणां स्रजं धत्ते तु सुन्दरी ॥ इति ॥ शिरःस्रजि हारशब्दप्रयोगस्य गौणत्वात् महामणिभिर्महार्घरत्नैर्विभूषितं सम्मिश्रं नागाकारं हारं मुक्ताहारं ददाविति वा ॥ ३१ ॥

अन्यैरिति। तथा अन्यैः पूर्वोक्तातिरिक्तैरपि सुरैः कर्तृभिः भूषणैरायुधैः करणैः तद्दानेनेत्यर्थः सम्मानिता सत्कृता देवी साट्टहासं अट्टति हिनस्ति शत्रूनित्यट्टः। अट्ट अतिक्रमहिंसनयोः पचाद्यच् सचासौ हासश्चाट्टहासः। अथ वा अट्टेन हठेन हासोऽट्टहासः अट्टो हठाट्टालिकयोरिति हैमः। तेन सहेति साट्टहासम् नादक्रियाविशेषणमेतत्। मुहुर्मुहुः पुनः पुनः उच्चैर्ननाद सिंहनादं चकारेत्यर्थः ॥ ३२ ॥

तस्या इति। तस्या देव्याः घोरेणात्युग्रेण नादेन कृत्स्नं सर्वं नभः व्योम आपूरितम् अभिव्याप्तमासीत्। नभसि अमायता अवकाशमलभमानेन अतएव तेन अतिमहता नादेन महान् प्रतिशब्दः प्रतिध्वनिरभूत्। अमायता इत्येतत् माङ् माने इति दैवादिकस्य शत्रन्तस्य रूपम्। शतृ च च्छान्दसः ॥ ३३ ॥

चुक्षुभुरिति। तेन प्रतिशब्देन सकला लोकाश्चतुर्दशभुवनानि चुक्षुभुः। क्षुभ् सञ्चलने। सञ्चलनं प्रकृतिविपर्यास इति तत्त्वबोधिनी।

चचाल वसुधा चेलुः सकलाश्च महीधराः ॥३४॥
जयेति च मुदा देवास्तामूचुः सिंहवाहिनीम् ॥
तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥३५॥
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥३६॥

यद्वा सकला लोकाः सर्वे जनाः चुक्षुभुरस्वास्थ्यं प्रापुः । लोकस्तु भुवने जने **इत्यमरः** । समुद्राश्च चकम्पिरे कम्पनजनितैर्महोर्मिभिर्वेलामुल्लङ्घयामासुरित्यर्थः । वसुधा चचाल चकम्पे । चल् कम्पने । सकला महीधराः पर्वताः चेलुः स्वस्थानात् भ्रंशं प्रापुः ॥ ३४ ॥

जयेतिचेति । देवाः मुदा हर्षेण सिंहएव वाहो वाहनं तद्वतीम् मत्वर्थीय इनिः । सिंहेनात्मानं वाहयतीति वा सिंहवाहिनी ताम् । ताच्छील्ये णिनिः । नान्तत्वाङ्ङीप् । तां देवीं जयेति सर्वोत्कर्षेण वर्तस्वेति शत्रूनभिभवेति वोचुः । जि जये अकर्मकः । जि अभिभवे सकर्मकः । मुनयश्च भक्त्या नम्रा आत्मानो मनांसि मूर्तयो देहाश्च येषामेवंविधाः सन्तः एनां देवीं तुष्टुवुः । मनसां नम्रत्वं तदेकप्रवणता । मूर्तीनां त्ववनतत्वम् । अथवा भक्त्या नम्रा आत्ममूर्तयः स्वदेहा येषामिति व्याख्येयम् (अथ पाठान्तरादि) जयेति च मुदा देवा इत्यत्र जयेति देवाश्च मुदा इति सिंहवाहिनीमित्यत्र सिंहवाहनामिति केचित् पठन्ति ॥ ३५ ॥

दृष्ट्वेति । ते अमरारयः देवशत्रवो महिषस्य सेनापतयः । समस्तं त्रैलोक्यम् । त्रिलोकीशब्दात् स्वार्थे ष्यञ् । संक्षुब्धं विपर्यस्तप्रकृतिकं दृष्ट्वा सन्नद्धानि व्यूहीभूतानि अखिलानि सैन्यानि येषां अथवा सन्नद्धा धृतकवचाः अखिलाः सैन्या सैनिका येषां ते सन्नद्धाखिलसैन्याः । सन्नद्धो वर्मिते व्यूढे इति मेदिनी । वरूथिनी बलं सैन्यमिति । सेनायां समवेता ये सैन्यास्ते

आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥३७॥
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥
पदाक्रन्त्यानतभुवं किरीटोल्लिखिताम्बराम् ॥३८॥
क्षोभिताशेषपातालां धनुर्ज्यानिस्वनेन ताम् ॥

सैनिकाश्च ते इति चामरः । तथा उद्यतानि आयुधानि यैस्ते उदायुधाः । तादृशाश्च सन्तः । समुत्तस्थुः युद्धायोद्यता बभूवुः । युद्धोद्यमः समुत्थानमिति हलायुधः । अत्रोत्तिष्ठतेरनूर्ध्वकर्मत्वेऽपि परस्मैपदं छान्दसम् ॥ ३६ ॥

आ इति महिषासुरः क्रोधाद्धेतोः । आः किमेतत् इत्याभाष्य कुतोयं महान् शब्द इत्युच्चैरुक्त्वेत्यर्थः । आ इति क्रोधाविष्कारे सविसर्गमव्ययम् । आस्तु स्यात् कोपपीडयोरित्यमरः । अशेषैः सर्वैरसुरैर्वृतः परिवारितः सन् तं शब्दं पूर्वोक्तं देव्यट्टहासप्रतिध्वनिं अभ्यधावत । अनुलक्ष्याधावत् । धावतिः स्वरितेत् ॥ ३७ ॥

स इति । स महिषासुरः । ततः शब्दस्थाने गमनानन्तरम् । त्विषा प्रभया व्याप्तं लोकत्रयं भूर्भुवःस्वराख्यं भुवनत्रयं यया ताम् । पादयोराक्रान्त्या बलान्निक्षेपणेन आनता अवनता भूर्यस्यास्ताम् । पादाक्रान्त्येति नतभुवमिति च भिन्ने पदे वा । किरीटेन मुकुटेन उल्लिखितमुद्धृष्टमम्बरमाकाशं तद्गतमेघमण्डलमिति यावत् यया ताम् । देवीं द्योतमानां नारीं ददर्श ॥ दिवु द्युतौ ॥ ३८ ॥

पुनस्तां विशिनष्टि । क्षोभितेति । धनुषः ज्यायाः मौर्व्याः निस्वनेन शब्देन क्षोभितानि सञ्चालितानि अशेषानि सप्त पातालानि यया ताम् । भुजानां बाहूनां सहस्रेण सहस्रभुजैरित्यर्थः । समन्तात् । परितः सर्वप्रदेशं

दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् ॥३९॥
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥
शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ॥४०॥
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥
युयुधे चामरश्चान्यश्चतुरङ्गबलान्वितः ॥४१॥

व्याप्य संस्थितां तां देवीं ददर्शेत्यस्यानुकर्षेण वाक्यपूर्तिः । (अथ पाठान्तरादि) इत उत्तरं अष्टाशीतिसहस्रेण सखीभिः परिवारितामित्यर्धमधिकं क्वचित् पठ्यते ॥ ३९ ॥

तत इति । ततो देवीदर्शनानन्तरम् । सुरान् । देवान् द्विषन्तीति सुरद्विषो दैत्यास्तेषाम् । तया देव्या सह । बहुधा नानाप्रकारैर्मुक्तैरुत्सृष्टैः शस्त्रास्त्रैः शस्त्रैरमन्त्रप्रयोज्यैः खड्गादिभिः अस्त्रैर्मन्त्रप्रयोज्यैराग्नेयादिभिः । अथवा अक्षेप्यं खड्गादिशस्त्रम् । क्षेप्यं बाणाद्यस्त्रम् । तदुक्तं **सौभाग्यभास्करे** । धार्यं प्रहरणं शस्त्रं क्षेप्यं त्वस्त्रमितीरितमिति । शसु हिंसायाम् । असु क्षेपणे । तैः आदीपितानि समन्तात् प्रकाशितानि दिशामन्तराण्यवकाशा यस्मिंस्तादृशं युद्धं प्रववृते प्रवृत्तम् ॥ ४० ॥

अथ युद्धे योद्धॄणां नामान्याह महिषेत्यादिना । चिक्षुरइत्याख्या नाम यस्य स चिक्षुराख्यः । सेनां नयति स्वेच्छया वर्तयतीति सेनापतिः । महिषासुरस्य सेनानीः महासुरः । चत्वारि अङ्गानि रथहस्त्यश्वपदातिरूपा अवयवा यस्य तच्चतुरङ्गम् । तच्च तद्बलं सैन्यं च चतुरङ्गबलम् । तेनान्वितो युक्तः सन् युयुधे देव्या सहेति शेषः । तथा अन्यश्चामरनामा सेनानीश्चतुरङ्गबलान्वितो युयुधे ॥ इति वाक्यभेदेनान्वयः ॥ (अथ पाठान्तरादि) अन्य इत्यत्र अन्यैरिति च पाठः । तत्पक्षे अन्यैः सेनापतिभिः । सहितो युयुधे इति योजना ॥ ४१ ॥

रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥
अयुध्यतायुतानां च सहस्रेण महाहनुः ॥४२॥
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥४३॥
गजवाजिसहस्रौघैरनेकैरुग्रदर्शनः ॥

रथांनामिति । उन्नतत्वादुदग्रइत्याख्या नाम यस्य स उदग्राख्यः महासुरः महिषासुरसेनानीः । रथानां षड्भिरयुतैः षष्टिसहस्ररथैरित्यर्थः । सहितः अयुध्यत । रथानामित्युपलक्षणमन्येषामपि सेनाङ्गानाम् । तत्र तत्सङ्ख्यातारतम्यमुक्तं युद्धशास्त्रे । गजा रथसमाः प्रोक्ता अश्वास्तत्त्रिगुणा मताः ॥ पदातयः पञ्चगुणाः सर्वत्रायं विधिः स्मृत इति ॥ महाहनुः अन्वर्थतन्नामान्यो महिषासुरसेनानीश्च । अयुतानां सहस्रेण । रथानामिति शेषः । एवमग्रेऽपि सेनाङ्गनामविशेषोक्त्यभावे रथा एव ग्राह्याः । अयुतं दशसहस्राणि तेषां सहस्रं कोटिः । तेन कोटिसङ्ख्याकैरथैस्तदनुगुणैरन्यैश्च सेनाङ्गैः सहितः सन् अयुध्यतेत्यर्थः ॥ ४२ ॥

पञ्चाशद्भिरिति असिवत् खड्गवत् तीक्ष्णाग्राणि लोमानि यस्य सोऽसिलोमा । महासुरः महिषासुरसेनानीः । पञ्चाशद्भिर्नियुतैः । नियुतशब्दो दशलक्षवाची । तेन पञ्चाशन्नियुतानि पञ्चकोट्यः । तावद्भिः रथैः सहित इत्यर्थः । अयुध्यत । पञ्चाशद्भिरिति बहुवचनमार्षम् । विंशत्याद्याः सदैकत्वे इति नियमात् । बाष्कलस्तन्नामा सेनानीः । अयुतानां रथायुतानां षड्भिः शतैः षष्टिलक्षरथैरित्यर्थः । सहितो रणे युद्धे युयुधे ॥ ४३ ॥

गजेति । उग्रदर्शननामा सेनापतिः । रथानां कोट्या तथा अनेकैः गजवाजिसहस्राणामोघैः समूहैः । कोटिगजैः कोटित्रयमितैरश्वैस्ततदुपलक्षितैः पञ्चकोटिपदातिभिश्चेत्यर्थः । वृतः परिवृतः सन् तस्मिन् युद्धे अयुध्यत ॥

वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥४४॥

बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः ।
युयुधे संयुगे तत्र रथानां परिवारितः ॥४५॥

इयं गजादीनां सङ्ख्या रथानां कोटिसङ्ख्याया उक्तत्वात् पूर्वोक्त नियमानुसारेणोक्ता । (अथ पाठान्तरादि) उग्रदर्शन इति शान्तनवीसम्मतः पाठः । स एव साधुः । उत्तराध्याये अधिकत्वेन दर्शितेषु श्लोकेषु ' उग्रदर्शनमत्युग्रैः खड्गपातैरपातयत् इत्यर्धदर्शनात् । अन्यपुस्तकेषु परिवारित- इति पाठेऽस्ति । तत्पक्षे परिवारित इत्येतद्दैत्यनामत्त्वेन ग्रहीतव्यम् ॥ ४४ ॥

बिडालाख्य इति । अथ बिडालसदृशपिङ्गलनयनत्वात् बिडाल इति आख्या यस्य स बिडालाख्यो बिडालनामा महिषासुरसेनानीः तत्र संयुगे तस्मिन् युद्धे । रथानां अयुतानां पञ्चाशद्भिरयुतैः पञ्चाब्जसङ्ख्याकै रथैरित्यर्थः । तदनुरोधेन गजादिभिश्च परिवारितः सन् अयुध्यत पञ्चाशद्भिरिति बहुवचनं प्राग्वत् । (अथ पाठान्तरादि) बिडालाक्ष इत्यपि पाठः । सोऽपि साधुः । **वामनपुराणे**, दुर्धरो दुर्मुखश्चैव बिडालनयनस्तथेति दर्शनात् । शान्तनव्यां बिडालाख्योयुतानां चेत्यत्र बिडालाख्यो महादैत्य इति पाठः। तत्पक्षे रथानां पञ्चलक्षसङ्ख्या भवति। पञ्चाशद्भिरित्यत्र दीर्घान्तपाठोऽपपाठः। रथपदस्य पौनरुक्त्यात् । इत ऊर्ध्वं सार्धश्लोकद्वयमधिकम् । युतःकालो रथानां च रणे पञ्चाशतायुतैः ॥ युयुधे चासुरैस्तत्र तावद्भिः परिवारितः ॥ उग्रास्यश्चोग्रवीर्यश्च त्रिनेत्रश्च महाबलः ॥ करालश्च तथा ताम्रोऽन्धकश्चैव महासुरः ॥ दुर्धरो दुर्मुखश्चैव युयुधे च तथोद्धतः ॥ इति वामनपुराणे चण्डमुण्डरक्तबीजादयोऽपि महिषस्यैवानुचराः महिषवधानन्तरं रणात्पलायिताः कालान्तरे शुम्भमाश्रिता इत्युक्तम् ॥ ४५ ॥

अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥
युयुधुः संयुगे देव्या सह तत्र महासुराः ॥४६॥
कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥४७॥

अन्ये चेति । तत्र महिषासुरसैन्ये वर्तमाना अन्ये उत्तराध्याये वक्ष्यमाणाः करालोद्धतताम्रान्धकोग्रास्योग्रवीर्यत्रिनेत्रदुर्धरदुर्मुखादयो महासुराश्च । अयुतेनायुतेनेत्ययुतशः । अयुतायुतसङ्ख्याकैरित्यर्थः सङ्ख्यैकवचनाच्च वीप्सायामिति शस् । रथनागहयै रथगजाश्वैः । एकवद्भावाभावश्छान्दसः । रथसहिता नागास्तत्सहिता हया इति शाकपार्थिवादिवदुत्तरपदलोपी समासो वा । अयुतसङ्ख्याकै रथैस्तावद्भिर्गजैस्तावद्भिरश्वैश्चेत्यर्थः । वृताः परिवृताः सन्तस्तत्र संयुगे देव्या सह युयुधुः । अनुदात्तत्वलक्षणस्यात्मनेपदस्यानित्यत्वात्परस्मैपदम् ॥ ४६ ॥

कोटिकोटीति । तत्र युद्धे महिषासुरः । रथानां दन्तिनां गजानां । तथा हयानां अश्वानाम् । चकारात् पत्तीनाम् कोटिकोटिसहस्रैः परार्धैः वृतः परिवृतः अभूत् आसीत् । कोट्या गुणिता कोटिः कोटिकोटिः । जलधिसञ्ज्ञिता सा सङ्ख्या । सहस्रगुणिता कोटिकोटिसहस्रं । परार्धसङ्ख्या । कोटिकोटिसहस्रं तु परार्धमिति कीर्तितमिति वायुपुराणम् । बहुवचनं रथादिचतुष्टयापेक्षया । तेन प्रत्येकं परार्धेनेत्यर्थः । प्रसङ्गात्सङ्ख्याविभागस्थानानां सञ्ज्ञा उच्यन्ते । एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः ॥ अर्बुदमब्जं खर्वं निखर्वमहापद्मशङ्कवस्तद्वत् ॥ जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तरा सञ्ज्ञाः ॥ सङ्ख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैः ॥ इति ॥ प्रयुतस्य नियुतमिति महापद्मस्य पद्ममिति च क्वचित् पर्यायशब्दौ दृश्येते । (अथ पाठान्तरादि)

तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥४८॥
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥
देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ॥४९॥
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥

इतउत्तरमेकःश्लोकोऽधिकः क्वचित्पठ्यते । अथ युद्धं समभवद्देव्या सह सुरद्विषाम् ॥ लोकक्षयकरं घोरं यथा स्याद्भूतसम्प्लवः ॥ इति ॥ ४७ ॥

तोमरैरिति । पूर्वोक्ता महासुराः संयुगे देव्या सह तोमरादिभिरायुधैर्युयुधुः । परस्मैपदं छान्दसम् । भिन्दिपालो रज्जुवरत्रादिनिर्मितं शिलाखण्डप्रक्षेपसाधनम् ॥ गोफणइति लोके प्रसिद्धमायुधम् । भिन्दि परिमितदेशपर्यन्तं पालयति प्रयोक्तारमिति भिन्दिपालः । भिन्दिर्द्वादशतालः स्यादिति **भरतः** । भिन्दिपालो हस्तप्रक्षेप्यो लगुड इति **शन्तनुः** । हस्तिवेधकशर इति **चतुर्भुजमिश्रः** तोमरादयः कवचव्याख्यायां व्याख्याताः । परशुपट्टिशैरित्यत्र परशुसहितैः पट्टिशैरिति विग्रहः ॥ (अथ पाठान्तरादि) भिन्दिशब्दष्टवर्गतृतीयगर्भः क्वचित् पठ्यते । पालपदस्थाने मालपदपाठोऽपि क्वचित् । देव्या इति षष्ठ्यन्तपाठे देव्याः सम्बन्धिनि संयुगे इवि व्याख्येयम् ॥ ४८ ॥

केचिदिति । ते महासुराः केचित् शक्तीश्चिक्षिपुःक्षेपः प्रेरणम् । देव्यामिति शेषः । केचित् पाशांश्चिक्षिपुः । तथा अपरे अन्ये तां देवीं खड्गप्रहरैर्हन्तुं प्रचक्रमुः । प्रचक्रमिरे आरेभिरे ॥ परस्मैपदं छान्दसम् । दूरस्थे प्रक्षेपः समीपस्थे प्रहार इति भेदः ॥ ४९ ॥

सापीति ततः सा देवी चण्डिकापि । निजानि स्वीयानि शस्त्रास्त्राणि

लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥५०॥
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥५१॥
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥
चचारासुरसैन्येषु वनेष्विव हुताशनः ॥५२॥
निश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥

वर्षति तच्छीला निजशस्त्रास्त्रवर्षिणी सती तानि दैत्यप्रयुक्तानि शस्त्राण्यस्त्राणि च लीलयैव चिच्छेद द्विधा चकार । छिदिर्द्वैधीकरणे । शस्त्रास्त्रयोर्भेदः प्रागुक्तः ॥ ५० ॥

अनायस्तेति । अनायस्तं आयासजन्यविकाररहितं । अम्लानमित्यर्थः । आननं यस्याः सा अनायस्तानना देवी विजिगीषावती । दिवु क्रीडाविजिगीषादिषु । ईश्वरी दैत्यवधे समर्था चण्डिका । सुरैर्ऋषिभिश्च । अथ वा सुरर्षिभिर्नारदादिदेवर्षिभिः स्तूयमाना सती । असुराणां देहेषु शस्त्राण्यस्त्राणि मुमोच । च (अथ पाठान्तरादि) सुरर्षिभिरित्यत्र महर्षिभिरिति क्वचित् पाठः ॥ ५१ ॥

सोपीति । स हिमवता दत्तः देव्याः वाहनकेसरी वाहनभूतः सिंहः क्रुद्धः अत एव धुताः कम्पिताः सटा ग्रीवाकेशा येन स धुतसटः सन् । सटा जटाकेसरयोरिति विश्वः । वनेषु हुताशनो दावानल इव असुरसैन्येषु चचार । एतेन सिंहस्य सर्वासुरनिःपातशक्तिर्व्यज्यते । (अथ पाठान्तरादि) केसरिशब्दस्तालव्यमध्योऽपि क्वचित् पठ्यते ॥ ५२ ॥

निश्वासानिति । युध्यमाना युद्धं कुर्वती अम्बिका जगन्माता । रणे यान् शतं शतं सहस्रं सहस्रं शतसहस्रशः निश्वासात् मुमुचे उत्सृष्टवती त

त एव सद्यःसम्भूता गणाश्शतसहस्रशः ॥५३॥
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥
नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः ॥५४॥

अवादयन्त पटहान् गणाः शङ्खास्तथापरे ॥
मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ॥५५॥

ततो देवी त्रिशूलेन गदया शक्तिरिष्टिभिः ॥

एव शतसहस्रशः गणाः प्रमथाः देवीसैनिका इत्यर्थः । सम्भूता जाताः । देवीनिश्वासा एव देवीगणात्मना परिणता इत्यर्थः । तेन यावन्तो निश्वासास्तावन्तो गणा इति ज्ञेयम् । अत एव शतसहस्रश इति विशेषणस्य निश्वासपदेन गणपदेन च सह विभक्तिपरिणामेनान्वयः कृतः सङ्ख्यैकवचनाच्च वीप्सायामिति शस्प्रत्ययः ॥ ५३ ॥

युयुधरिति । देव्याःशक्त्या विचित्रसामर्थ्येनोपबृंहिता आप्यायितास्ते गणाः । परशुभिः भिन्दिपालसहितैरसिभिस्तत्सहितैः पट्टिशैश्चासुरगणान् दैत्यसमूहान्नाशयन्तो युयुधुः ॥ परस्मैपदं प्राग्वत् ॥ ५४ ॥

अवादयन्तेति । तस्मिन् युद्धमहोत्सवे केचिद्गणाः पटहांस्तत्सञ्ज्ञकान् वाद्यविशेषान् । पडघम इति लोके प्रसिद्धान् अवादयन्त वादितवतः । तथा अपरे गणाः शङ्खानवादयन्त । तथैवान्ये गणाः मृदङ्गानवादयन्त । देवीसामर्थ्येन आयुधवाद्यादिकं तेषां सहजसिद्धमेवासीदिति भावः । (अथ पाठान्तरादि) इत उत्तरं ऋषिभिस्स्तूयमानास्तु जयं प्रार्थ्य दिवौकसामित्यर्धमधिकं क्वचित् पठ्यते ॥ ५५ ॥

तत इति । ततः देवी त्रिशूलेन गदया शक्तिसहितै रिष्टिभिः खड्गादिभिरन्यैश्चायुधैः शतं शतं शतशः । शतेन शतेन परिच्छिद्येत्यर्थः ।

खड्गादिभिश्च शतशो निजघान महासुरान् ॥५६॥
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ॥
असुरान् भुवि पाशेन बध्वा चान्यानकर्षयत् ॥५७॥
केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥
विपोथिता निपातेन गदया भुवि शेरते ॥५८॥

महासुरान् निजघान निहतवती । रिष्टिशब्दो द्विविधः । रेफपूर्वकतृतीयस्वरादिः सप्तमस्वरादिश्च ॥ रिष्टिर्ऋष्टिश्च सम्मत इति द्विरूपकोशात् ॥ अत्राद्य एव ग्राह्यः सप्तमस्वरादिग्रहणे समासे प्रकृतिभावोऽभ्युपगन्तव्यः । स्यात् खड्गशक्त्यृष्टिपाणय इत्यत्र तु सप्तमस्वरादिरेव ॥ अन्यथाक्षराधिक्यप्रसङ्गात् । उभयतो धारो रिष्टिः । एकतो धारः खड्ग इति रिष्टिखड्गयोर्भेदः । यद्यपि देवैः पूर्वं दत्तेष्वायुधेषु रिष्टिर्न दृश्यते तथापि देवतानामिच्छोपस्थायिसर्वार्थित्वात् देव्याः सहस्रभुजत्वेन विश्वकर्मदत्तनानाविधानेकशस्त्रेषु रिष्टिदानस्यापि सम्भवाद्वा न काचिदनुपपत्तिः । एवमग्रेऽपि वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः बाष्कलं भिन्दिपालेनेत्यादिषु (अथ पाठान्तरादि) शक्तिरिष्टिभिरित्यत्र शक्तिवृष्टिभिः शरवृष्टिभिरिति वा पाठः क्वचित् ॥ तत्र शक्तीनां वृष्टेरसम्भवात्स न साधुः । ॥ ५६ ॥

पातयामासेति । अन्यांश्चैवासुरान् घण्टास्वनेन विमोहितान् मूर्छितान् कृत्वा भुवि पातयामास । अन्यानसुरान् पाशेन बध्वा अकर्षयच्च । स्वार्थे णिच् ॥ (अथ पाठान्तरादि) अकर्षयदित्यत्र अकर्षतेति पाठः क्वचित् तत्पक्षे तङ् छान्दसः ॥ ५७ ॥

केचिदिति । केचिदसुराः तीक्ष्णैः निशितैः खड्गानां पातैः प्रहारैः द्विधाकृताः मध्ये छिन्नाः उर्ध्वाधोभागरूपखण्डद्वयतां प्रापिता इत्यर्थः । खड्गानां तीक्ष्णत्वं प्रहारे उपचर्यते । तथा अपरे असुराः गदया कर्त्र्या निपा-

वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥
केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ॥५९॥
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ॥
सेनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः ॥६०॥

तेन स्वपतनेन स्वप्रहारेणेत्यर्थः । करणे तृतीया । विपोथिता हताः भुवि शेरते स्वपन्ति दीर्घनिद्रयेति भावः । मृता इति यावत् । अथ वा देव्या कर्त्र्या गदया करणेन विपोथिताः सन्तः भुवि निपातेन निपत्येत्यर्थः । शेरते इति योजना । पुथ् हिंसायां दिवादिः । लघूपदगुणश्छान्दसः । अथ वा पुथ् भाषायां चुरादिः । धातूनामनेकार्थत्वाद्धिंसार्थत्वम् ॥ ५८ ॥

वेमुरिति । केचिदसुराः मुसलेन भृशमत्यर्थं हतास्ताडिता उरसीति भावः । रुधिरं रक्तं वेमुः ववमुः । भृशं रुधिरं वेमुरिति वा । वेमुरित्यत्र एत्वाभ्यासलोपौ छान्दसौ । भागवृत्तौ तु वेमतुरित्याद्यप्युदाहृतमिति सिद्धान्तकौमुदीकाराः । केचिदसुराः शूलेन वक्षस्युरसि भिन्ना विदारिता भूमौ निपतिताः मृता इत्यर्थः ॥ ५९ ॥

निरन्तरा इति । केचित् त्रिदशान् देवानर्दयन्तीति त्रिदशार्दनाः देवपीडकाः दैत्यसेनापतयः । शरौघेण बाणसमूहेन निरन्तरा निरवकाशशरीरभागाः व्याप्तसर्वाङ्गा इत्यर्थः । कृताः सन्तः । सेनां मृतामित्यर्थः । अनुकर्तुं मरणेनानुवर्तितुं शीलं येषां ते सेनानुकारिणः । रणाजिरे समराङ्गणे । प्राणान् मुमुचुः । यथा सेना मृता तथा सेनापतयोऽपि मृता इत्यर्थः । (अथ पाठान्तरादि) निरन्तरशरौघेण कृत्ता इति क्वचित् पाठः । अविच्छिन्नबाणसमूहेन छिन्नशरीरा इति तदर्थः । सेनानुकारिण इत्यत्र शल्यानुकारिण इति पाठे शरौघेण निरन्तरशरीरत्वात् शल्लीसमूहव्याप्तशल्यमृगानुकारिण इति

केषाञ्चिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥
शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥६१॥
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥
एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः ॥६२॥

तदर्थः । शैलानुकारिण इति पाठे स्थौल्येन पर्वतानुकारिण इति । श्येनानुकारिण इति पाठे तत् द्वितीयान्तं प्राणानित्यस्य विशेषणम् । श्येनपक्षिवत् शीघ्रं गन्तुमुत्सुकान् प्राणान् मुमुचुरित्यर्थः । त्रिदशार्दना इत्यत्र त्रिदशादिन इति पाठे देवभक्षका इति तदर्थः । अद् भक्षणे ॥ ६० ॥

केषाञ्चिदिति । केषाञ्चिदसुराणां बाहवः छिन्नाः । तथा अपरेऽसुराः छिन्ना ग्रीवाः येषां ते छिन्नग्रीवाः कृताः। तेन ग्रीवाच्छेदेऽपि कण्ठभागस्याच्छिन्नत्वात्पुरोभागे लम्बमानशिरस आसन्नित्यर्थः । शिरोनालस्य पश्चाद्भागो ग्रीवा पुरोभागः कण्ठइति ग्रीवाकण्ठयोर्भेदः । अन्येषामसुराणां छिन्नानि शिरांसि भुवि पेतुः। अन्ये असुराः मध्ये मध्यभागे विदारिताः छिन्ना ऊर्ध्वाधोभागात्मकखण्डद्वयरूपतां प्रापिता इत्यर्थः ॥ ६१ ॥

विच्छिन्नेति । अपरे महासुरास्तु । विच्छिन्नाः जङ्घाः जान्वधोभागा येषां ते विच्छिन्नजङ्घाः सन्तः उर्व्यां भूमौ पेतुः। मृता इत्यर्थः । केचिन्महासुराः देव्या द्विधाकृताः वामाङ्गदक्षिणाङ्गविभागेन द्विखण्डतां प्रापिताः खड्गादिना ब्रह्मरन्ध्रात्पायुपर्यन्तं अथ वा हस्तद्वयेन पादद्वये धृत्वा पायुतो, ब्रह्मरन्ध्रपर्यन्तं पाटिताः सन्त इत्यर्थः । एकं एकैकं बाह्वक्षिचरणं येषां ते एकबाह्वक्षिचरणाः एकैकबाह्वक्षिचरणविशिष्टखण्डद्वयरूपा इत्यर्थः । उर्व्यां पेतुः । सङ्ख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवदिति महाभाष्यम् । अथ वा केचिन्महासुराः यथा एकैकबाह्वक्षिचरणा भवेयुस्तथा देव्या द्विधाकृताः । इति योजना ॥ ६२ ॥

छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥६३॥
कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥
तिष्ठ तिष्ठत्यभाषन्त देवीमन्ये महासुराः ॥६४॥

अथ कबन्धानामुत्थानं तेषां क्रियाश्च वर्णयति । छिन्नेऽपीति । अन्ये महासुराः । तत्र युद्धे । शिरसि छिन्ने सति भूमौ पतिताः अपि निःशिरस्कदेहेन पुनरुत्थिताः । अपरे तदन्ये महासुराः ॥ शिरसि छिन्ने पुनरुत्थिताः सन्तः तूर्याणां रणवाद्यानां लयं तालसाम्यं आश्रिता अनुसृताः वाद्यतालानुसारेण पादन्यासं कुर्वन्त इत्यर्थः । ननृतुश्च । दशकोटिवीरेषु मृतेष्वेकः कबन्धो जीवन् उत्तिष्ठति । तदुक्तम्। युद्धे योद्धृप्रवीराणामर्बुदे कृत्त मूर्धनि ॥ तदावेशात्कबन्धस्तूत्तिष्ठत्येकः क्रियान्वितः ॥ इति ॥ अर्बुदं दशकोट्यः ॥ (अथ पाठान्तरादि) अत्र पूर्वार्धानन्तरं कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः इत्यर्धम् , उत्तरार्धानन्तरं च, एतावति महाराज कबन्धार्बुदकोटयः । क्षणे क्षणे समुत्पन्ना देव्या युयुधिरे पुनः ॥ इत्येकः श्लोकश्चाधिकः क्वचित् पठ्यते ॥ ६३ ॥

कबन्धा इति । शिरश्छेदात् प्राक् खड्गशक्त्यृष्टिपाणयः अन्ये महासुराः । छिन्नानि शिरांसि येषां ते छिन्नशिरसोऽपि । पुनः कानि शिरांसि बध्नन्ति धारयन्तीति कबन्धाः । धृतनूतनशिरस्कास्सन्त इत्यर्थः । कं शिरोम्बुनोरित्यमरः । देवीं तिष्ठ तिष्ठेत्यभाषन्त । उक्तवन्तः । एवं श्लोकद्वयेन कबन्धानां त्रिविधा क्रिया वर्णिता । केषाञ्चिदुत्थानमात्रम् । केषाञ्चिन्नर्तनम् । केषाञ्चिन्नवमूर्धोत्पत्या भाषणं चेति । (अथ पाठान्तरादि) भाषन्त इति शत्रन्तपाठे ननृतुरिति शेषः । शतृप्रत्ययश्छान्दसः । अत्र तिष्ठ तिष्ठेति चोक्त्वान्ये देव्या युयुधिरे मृधे ॥ रुधिरैर्विप्लुताङ्गाश्च सङ्ग्रामे लोमहर्षणे ॥ इत्येकोऽधिकः

पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ॥
अगम्या साभवत्तत्र यत्राभूत्स महारणः ॥६५॥

शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः ॥
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥६६॥

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ॥
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥६७॥

श्लोकः क्वचित्पठ्यते । तृतीयपादस्थाने शस्त्रास्त्रैर्विक्षताङ्गाश्चेति वा ॥ क्वचित्पुस्तके छिन्नेऽपि चान्ये इत्यर्धानन्तरं कबन्धा युयुधुरित्यर्धं पठित्वात्रत्यं तिष्ठतिष्ठेत्यर्धं परिवर्जितं तत्पक्षे श्लोकद्वयस्य सुगमत्वात्सरल एवार्थः॥६४॥

पातितैरिति । यत्र स्थाने स महारणः महायुद्धमभूत् । तत्र सा वसुन्धरा भूमिः । पातितैः देव्या हत्वेति शेषः । रथनागाश्वैः । रथसहिता नागा गजास्तत्सहिता अश्वाश्च तैः तथा हत्वा पातितैर्दैत्यैश्च हेतुभिः । अगम्या इतस्ततश्चरितुमशक्या अभवत् ॥ ६५ ॥

शोणितेति । तत्र रणभूमौ । असुरसैन्यस्य मध्ये वारणासुरवाजिनाम् । वारणा गजास्तत्सहिता असुरास्तत्सहिता वाजिनोऽश्वाश्च तेषाम् । सद्यस्तत्क्षणे एव शोणितस्य रुधिरस्यौघः प्रवाहो यासु ता महानद्यः प्रसुस्रुवुः । प्रवहन्ति स्म । (अथ पाठान्तरादि) प्रसुस्रुवुरित्यत्र विसुस्रुवुरिति क्वचित्पाठः ॥ ६६ ॥

क्षणेनेति । अम्बिका जगज्जननी देवी । तत् असुराणां महासैन्यं तथा क्षणेनाल्पकालेन क्षयं विनाशं निन्ये नीतवती । यथा वह्निरग्निस्तृणदारुमहाचयं तृणानां काष्ठानां च महान्तं राशि क्षयं नयतीति शेषः । (अथ पाठान्तरादि) महाचयमित्यत्र महोच्चयमिति क्वचित्पाठः ॥ ६७ ॥

स च सिंहो महानादमुत्सृजन् धुतकेसरः ॥
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥६८॥
देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ॥
यथैनां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि ॥६९॥

स चेति। स देव्या वाहनभूतः सिंहश्च धुताः कम्पिताः केसरा ग्रीवाकेशा येन स धुतकेसरः। महानादमुत्सृजन् उच्चैर्गर्जन्नित्यर्थः। गर्जनसमये सटाविधूननं सिंहस्वभावः। अमरारीणां युध्यमानानां दैत्यानां शरीरेभ्यः असून् तेषां प्राणान् विचिन्वतीव व्यचनोदिव अपाहरदिवेत्यर्थः। छान्दसत्वाद्व्यत्ययेन लट् श्नुः शप् चेति विकारणद्वयं च। सिंहनादश्रवणेन दैत्या मृतकल्पा अभवन्नित्यर्थः ॥ ६८ ॥

देव्या इति। तैर्निश्वासोद्भूतैर्देव्या गणैश्च तत्र रणाङ्गणे असुरैः सह तथा युद्धं कृतं यथा पुष्पाणां वृष्टिं मुञ्चतीति पुष्पवृष्टिमुचो देवाः दिवि स्वर्गे अन्तरिक्षे वा। द्यौः स्वर्गे नभसि ख्यातेति शाश्वतः। एनां प्रकृतां गणस्वामिनीं देवीं तुष्टुवुः। स्तुतवन्तः ॥ स्वामिप्रतापमूलकत्वाद्भृत्यपराक्रमस्येति भावः। (अथ पाठान्तरादि) यथैषामिति पाठे एषामिति कर्मणि शेषे षष्ठी। एनान् गणानित्यर्थः। यथैषां तुतुषुर्देवा इति पाठे यथैषां गणानां युद्धेन देवास्तुतुषुस्तुष्टा अभूवन् इति योजना ॥ ६९ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमाहात्म्ये
महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥ १ ॥

इतीति। इतीत्यादि देवीमाहात्म्ये इत्यन्तं चतुर्विंशत्यक्षरात्मको भागः पूर्वं व्याख्यात एव। अथ महिषासुरसैन्यस्य वधो यस्मिन् स महिषासुरसैन्यवधः। तत्सञ्ज्ञया प्रसिद्धो द्वितीयोऽध्यायः समाप्त इति शेषभागस्य व्याख्या। एवं चत्वारिंशदक्षरात्मकमेतद्द्वितीयाध्यायसमाप्तिवाक्यम्।

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
द्वितीयाध्यायव्याख्या ॥ २ ॥

॥ अथ तृतीयोऽध्यायः ॥

ऋषिरुवाच ॥ १ ॥

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ॥
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥२॥

स देवीं क्षुरवर्षेण ववर्ष समरेऽसुरः ॥
यथा मेरुगिरेः श्रृङ्गं तोयवर्षेण तोयदः ॥३॥

ऋषिरिति । अथ तृतीयाध्यायमन्त्रविभागकारिकाः । तृतीये प्रथमो गद्यमन्त्रश्चर्षिरुवाच ह ॥ निहन्यमानाद्याः श्लोकमन्त्रास्त्रिंशच्च पञ्च च ॥ देव्युवाचेति च ततो गद्यमन्त्रः समीरितः ॥ गर्ज गर्जेति च श्लोकमन्त्र एकस्तदुत्तरः ॥ अथो ऋषिरुवाचेति गद्यरूपो मनुर्मतः ॥ एवमुक्त्वादिकाः पञ्च श्लोकमन्त्रास्ततः स्मृताः ॥ सर्वे मन्त्राश्चतुश्चत्वारिंशत्सर्गे तृतीयके ॥ तत्रैकचत्वारिंशत्तु श्लोकमन्त्रा उदीरिताः ॥ गद्यमन्त्रास्त्रयः श्लोकाः श्लोकमन्त्रसमा मताः ॥ इति ॥ अथ मन्त्रव्याख्या ऋषिरुवाचेति ॥ १ ॥

निहन्यमानमिति । अथ सैन्यवधानन्तरम् । महासुरश्चिक्षुरस्तन्नामा पूर्वाध्यायोक्तो महिषस्य सेनानीः । तत्पूर्वाध्याये उक्तं सैन्यं निहन्यमानं निहतमित्यर्थः । वर्तमानसामीप्ये भूते लट् तस्य शानजादेशः । अवलोक्य कोपाद्धेतोः । योद्धुं युद्धं कर्तुं अम्बिकां प्रति ययौ । रथेनेति शेषः । अग्रे रथाश्वानां सूतस्य च वधोक्तेः ॥ २ ॥

स इति सोऽसुरश्चिक्षुरः । यथा तोयदो मेघः तोयवर्षेण जलवृष्ट्या । वृष्टिर्वर्षमित्यमरः ॥ मेरुगिरेः कनकाचलस्य श्रृङ्गं शिखरं वर्षति । तथा समरे युद्धे शरवर्षेण देवीं ववर्ष । तपस्तपतीतिवत्प्रयोगः ॥ ३ ॥

तस्य च्छित्त्वा ततो देवी लीलयैव शरोत्करान् ॥
जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम् ॥४॥

चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ॥
विव्याध चैनं गात्रेषु छिन्नधन्वानमाशुगैः ॥५॥

स छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥
अभ्यधावत्ततो देवीं खड्गचर्मधरोऽसुरः ॥६॥

तस्येति । ततः देवी तस्य चिक्षुरस्य शरोत्करान् बाणनिवहान् स्वबाणैर्लीलयैव अनायासेनैव छित्वा तुरगान् रथाश्वान् वाजिनां अश्वानां यन्तारं नियामकं सूतं च जघान निहतवती ॥ तस्य च्छित्त्वेत्यत्र संहितायां तुको नित्यत्वात् छकारात्पूर्वं चकारोऽवश्यं योजनीयः । एवं सर्वत्र ह्रस्वाच्छे परे ज्ञेयम् ॥ ४ ॥

चिच्छेदेति । सद्यः सूतहननान्तरं क्षणे एव चिक्षुरस्य धनुश्च । धन्वक्लीबे धनुषान्तोऽस्त्रियां नोदन्त इष्यते । इति द्विरूपकोशः। (अस्यार्थः। नकारान्तो धन्वशब्दः क्लीबे। षकारांतो धनुश्शब्दः आस्त्रियाम् पुन्नपुंसकयोरित्यर्थः । उकारान्तो धनुशब्दः ना पुमानिति) ॥ अतिसमुच्छ्रितं अत्युन्नतं ध्वजं रथध्वजं चकाराद्रथं च चिच्छेद बभञ्ज। उत्तरश्लोके विरथइत्युक्तेः। छिन्नं धन्व धनुर्वा यस्य स छिन्नधन्वा । तं छिन्नधन्वानं । धनुःपदेन समासे धनुषश्चेत्यनङ् । एनं चिक्षुरं आशुगैर्बाणैः। आशुगौ वायुविशिखावित्यमरः। गात्रेषु अङ्गेषु । गात्रमङ्गशरीरयोरिति हैमः । विव्याध च । (अथ पाठान्तरादि) एनमित्यत्र एवेति पाठः क्वचित् ॥ ५ ॥

सइति । ततःछिन्नधन्वा विरथो भग्नरथो हताश्वो हतसारथिश्च सोऽसुरश्चिक्षुरः । खड्गचर्मधरः सन् । देवीमभ्यधावत् । अभेः कर्मप्रवचनीयत्वात्त-

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ॥
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥७॥

तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ॥
ततो जग्राह शूलं स कोपादरुणलोचनः ॥८॥

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥९॥

योगे देवीमिति द्वितीया । (अथ पाठान्तरादि) अभ्यधावत तां देवीमिति पाठे आत्मनेपदं छान्दसम् ॥ ६ ॥

सिंहमिति । तीक्ष्णा निशिता धारा यस्य तेन तीक्ष्णधारेण खड्गेन सिंहं मूर्धनि शिरसि आहत्य प्रहृत्य पुनः अतिवेगवान् सन् तेनैव खड्गेन देवीमपि सव्ये वामे भुजे आजघान प्रजहार । अत्राघातक्रियायां सिंहस्य देव्याश्चेष्टतमत्वेन कर्मत्वात्ताभ्यां द्वितीया, मूर्ध्नो भुजस्य चाघातक्रियाया आधारत्वात्ताभ्यां सप्तमी । अस्वाङ्गकर्मकत्वात् आङो यमहन इत्यात्मनेपदं न ॥ ७ ॥

तस्या इति। हे नृपनन्दन राजपुत्र सुरथ । स खड्गः तस्या देव्याः भुजं प्राप्य तत्र निपत्येत्यर्थः । पफाल भुजस्य काठिन्यात्तदाघातेन स्वयमेव भग्नो बभूवेत्यर्थः।ञिफला विशरणे विशरणं भङ्गः । ततःखड्गभङ्गानन्तरं स चिक्षुरः कोपात् हेतोः अरुणे रक्तवर्णे लोचने यस्य सोऽरुणलोचनः सन् शूलं जग्राह। देव्यां क्षेप्तुमिति भावः ॥८॥

चिक्षेपेति। ततः महासुरश्चिक्षुरः । अम्बरात् अन्तारिक्षेऽवस्थायेत्यर्थः । ल्यब्लोपे पञ्चमी । रविबिम्बमिव सूर्यमण्डलमिव तेजोभिर्जाज्वल्यमानं भृशं

दृष्ट्वा तदापतच्छूलं देवीशूलममुञ्चत ॥
तच्छूलं शतधा तेन नीतं स च महासुरः ॥१०॥

हते तस्मिन् महावीर्ये महिषस्य चमूपतौ ॥
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥११॥

सोपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ॥
हुङ्काराभिहतां भूमौ पातयामास निष्प्रभाम् ॥१२॥

ज्वलत् । भृशार्थे यङ् । तत् शूलं तु भद्रकाल्यां चाण्डिकायां । भद्रकालीपदमर्गलायां व्याख्यातम् । चिक्षेप क्षिप्तवान् । तेजोभीरविबिम्बामित्यत्र भिसः सकारस्य रेफे रोरीति तस्य लोपे ढ्रलोपइति पूर्वेकारस्य दीर्घः । (अथ पाठान्तरादि) तेजोभिरिति ह्रस्वान्तपाठोपि क्वचित् । तत्पक्षे अविबिम्बामितिच्छेदः । अर्थः समानः । अवयः शैलमेषार्का इत्यमरः ॥ ९ ॥

दृष्ट्वेति । देवी तच्चिक्षुरक्षिप्तं शूलमापतत्स्वसमीपमागच्छत् दृष्ट्वा तत्प्रतीकारार्थं स्वशूलममुञ्चताक्षिपत् । तेन देवीशूलेन तच्चिक्षुरक्षिप्तं शूलं शतधा नीतं शतखण्डप्रकारतां प्रापितम् । चूर्णीकृतमित्यर्थः । तथा स महासुरश्चिक्षुरश्च शतधा नीतः । सर्वावयवेषु खण्डशः कृत इत्यर्थः । (अथ पाठान्तरादि) तेन तच्छतधा शूलमिति क्वचित् पाठः । क्वचित् द्वितीयार्धस्थाने तेन शूलेन निर्भिन्नो निपपात महीतले ॥ इत्यर्धं पठ्यते॥ १० ॥

हते इति । महावीर्ये तस्मिन् महिषस्य चमूपतौ चिक्षुरे हते सति त्रिदशार्दनः देवहिंसकः चामरनामा सेनापतिः गजारूढः सन् युद्धायाग्रे आजगाम ॥ ११ ॥

सोपीति । स चामरोऽपि देव्याः देव्यामित्यर्थः । अधिकरणस्य शेषत्वविवक्षया षष्ठी । देव्या उपरीति वा । शक्तिं तन्नामकमायुधविशेषं

भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥१३॥
ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः ॥
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥१४॥
युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥१५॥

मुमोच निक्षेप । अम्बिका देवी च तां शक्तिं द्रुतं सपदि । हुङ्कारेण तुच्छत्वादर्शकहुङ्कारोच्चारमात्रेण अभिहतां प्रतिहतवेगां अतएव निष्प्रभां निस्तेजसं भूमौ पातयामास । (अथ पाठान्तरादि) देव्या इत्यत्र देवीति क्वचित् पठ्यते तदम्बिकाया विशेषणं ज्ञेयम् ॥ १२ ॥

भग्नामिति । चामरः स्वशक्तिं भग्नां पराभूतां भूमौ निपतितां दृष्ट्वा क्रोधसमन्वितः क्रुद्धः सन् शूलं चिक्षेप। देव्यामिति शेषः । सा देवी तत् शूलमपि बाणैरच्छिनदखण्डयत् । (अथ पाठान्तरादि) अत्र शूलं च विफलं दृष्ट्वा धनुरादाय दानवः ॥ देवीं सवाहनां बाणैः सोऽविध्यत् कृतलाघवः ॥ इत्येकोऽधिकः श्लोकः पठ्यते ॥ १३ ॥

तत इति । ततः सिंहः समुत्पत्य उत्प्लुत्य । गजस्य चामरवाहनीभूतस्य कुम्भयोः शिरःपिण्डयोरन्तरे मध्ये स्थितः सन् तेन त्रिदशानामरिणा चामरेण सह । बाहुयुद्धेन उच्चैरतितरां युयुधे । उच्चैरिति त्रिदशारिविशेषणं वा उन्नतेनेति तदर्थः ॥ १४ ॥

युध्यमानाविति । ततः युध्यमानौ नियुद्धं कुर्वन्तौ तौ सिंहचामरौ तु । तस्माच्चामरवाहनान्नागाद्गजात् महीं गतौ प्राप्तौ अधोनिपतितौ सन्तावित्यर्थः । अतिसंरब्धौ भृशं संक्रुद्धावतिदारुणैरतिपरुषैः प्रहारैः मुष्टि-

ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ॥
करप्रहारेण शिरश्चामरस्य पृथक् कृतम् ॥१६॥

उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ॥
दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥१७॥

देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ॥
बाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ॥१८॥

तलचपेटादिताडनैः युयुधाते नियुद्धं कृतवन्तौ। अत्र प्रगृह्यत्वेऽपि सन्धिरार्षः ॥ १५ ॥

तत इति । ततः मृगारिणा सिंहेन वेगात् खमुत्पत्य अन्तरिक्षे उत्प्लुत्य । निपत्य च चामरोपर्यवप्लुत्य च करप्रहारेण सनखकरपञ्जराघातेन चामरस्य शिरः पृथक्कृतम् कायाद्विश्लेषितम् । छिन्नमित्यर्थः। (अथ पाठान्तरादि) खमुत्पत्येत्यत्र समुत्पत्येति क्वचित् पाठः ॥ १६ ॥

उदग्र इति । उदग्रस्तन्नामा सेनापतिश्च देव्या रणे शिलाभिः वृक्षैः आदिना लोष्ठैश्च हतः । करालस्तन्नामा सेनानीश्च देव्या सिंहेन वा । दन्तैः सन्दश्य मुष्टिभिस्तलैश्चाहत्य निपातितो हतः । अथ वा देव्यैव दन्तानां हस्तिदन्तानां मुष्टयः हस्तिदन्तघटितखड्गादित्सरवस्तेषां तलान्यधोभागास्तैराहत्य निपातितः । अधःस्वरूपयोरस्त्री तलमित्यमरः ॥ १७ ॥

देवीति । दवी क्रुद्धा सती उद्धतं तन्नामानं महिषसेनापतिं गदायाः पातैः प्रहारैरित्यर्थः । चूर्णयामास निष्पिपेष । बाष्कलं तन्नामानं सेनापतिं भिन्दिपालेन तन्नाम्ना पाषाणखण्डक्षेपसाधनेनायुधविशेषेण । जघान अस्योत्तरश्लोकादपकर्षः । ताम्रं तन्नामानं सेनापतिं तथान्धकनामानं सेनापतिं च बाणैर्जघान ॥ १८ ॥

उग्रास्यमुग्रवीर्यश्च तथैव च महाहनुम् ॥
त्रिनेत्रं च त्रिशूलेन जघान परमेश्वरी ॥१९॥

बिडालस्यासिना कायात्पातयामास वै शिरः ॥
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥२०॥

उग्रास्यमिति । परमेश्वरी परमसमर्था देवी । उग्रास्यं उग्रवीर्यं तथैव महाहनुं च त्रिनेत्रं चैतांश्चतुरः सेनापतीन् । त्रिशूलेन जघान । (अथ पाठान्तरादि) त्रिनेत्रमित्यत्र त्रिनेत्रेति देवीविशेषणत्वेन क्वचित् पाठो दृश्यते स पूर्वाध्याये परिशिष्टश्लोकेषु उग्रास्यश्चोग्रवीर्यश्च त्रिनेत्रश्च महाबलः ॥ इति त्रयाणां साहचर्यस्य दर्शनात् । देवीभागवते उग्रास्योग्रवीर्ययोर्वधानन्तरं त्रिनेत्रं तु त्रिशूलेन जघान जगदम्बिकेति त्रिनेत्रवधस्य चोक्तत्वात् । त्रिनेत्रेति देव्या विशेषणेऽत्र कस्याप्यर्थस्य परिपोषाभावाच्च न साधुः॥१९॥

बिडालस्येति । बिडालाख्यस्य सेनापतेः । शिरः असिना खड्गेन कायाच्छरीरादधः पातयामास । छित्वेति शेषः । वै पादपूर्तौ । पूर्वाध्याये बिडालाक्ष इतिपाठेऽत्र बिडालशब्दो नामैकदेशत्वेन व्याख्येयः । अत्र पूर्वाध्यायोक्तयोरसिलोमोग्रदर्शनयोरपि खड्गेन वधो ज्ञेयः । वक्ष्यमाणाधिकश्लोके तथादर्शनात् । दुर्धरं दुर्मुखं चोभौ सेनापती शरैर्यमक्षयं यमस्य निवासस्थानं यमलोकमित्यर्थः । क्षि निवासे । क्षयौ निवासापचितीइत्यमरः । निन्ये प्रापयामास । (अथ पाठान्तरादि) अत्र पूर्वार्धोत्तरं असिनैवासिलोमानमच्छिनत्सा रणोत्सवे ॥ उग्रदर्शनमत्युग्रैः खड्गपातैरपातयत् ॥ इत्येकः श्लोकः द्वितीयार्धोत्तरं कालं च कालदण्डेन कालरात्रिरपातयत् ॥ गणैः सिंहेन देव्या च जयक्ष्वेडा कृतोच्चकैः इत्येकः श्लोकश्चाधिकः क्वचित् पठ्यते ॥ २० ॥

एवं सङ्क्षीयमाणे तु स्वसैन्ये महिषासुरः ॥
माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥२१॥

कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ॥
लाङ्गुलताडितांश्चान्याञ्छृङ्गाभ्याञ्च विदारितान् ॥ २२॥

वेगेन कांश्चिदपरान् नादेन भ्रमणेन च ॥
निश्वासपवनेनान्यान् पातयामास भूतले ॥२३॥

एवमिति । महिषासुरः एवमुक्तप्रकारेण स्वसैन्ये सङ्क्षीयमाणे देव्या निहन्यमाने सति । क्षि हिंसायां स्वादिः । तस्य कर्मणि रूपम् । मतान्तरे दिवादेराकृतिगणत्वात् क्षि धातोः कर्तरि रूपं वा । क्षयं प्राप्नुवति सतीति तदर्थः । महिषस्येदं माहिषं तेन । प्राकृतेनेत्यर्थः । स्वरूपेण तान् देवी निश्वासोद्भवान् गणान् त्रासयामास उद्विग्नांश्चकार । त्रसी उद्वेगे ॥२१॥

उद्वेजनप्रकारमाह कांश्चिदिति । कांश्चिदित्यादि पातयामास इत्यन्तश्लोकद्वयस्य महावाक्यरूपत्वात् पातयामास भूतले इति वाक्यैकदेशोऽपकृष्य प्रतिवाक्यं योजनीयः । कांश्चिद्गणान् तुण्डप्रहारेण मुखाघातेन । भूतले पातयामास मारयामासेत्यर्थः । एवमग्रेऽपि प्रतिवाक्यं ज्ञेयम् । तथा अपरान् गणान् खुरक्षेपैः लत्ताप्रहारैः भूतले पातयामास । खुरशब्दः कवर्गद्वितीयादिः । अन्यान् गणान् लाङ्गुलेन पुच्छेन ताडितान् कृत्वा भूतले पातयमास । इतरान् शृङ्गाभ्यां विदारितांश्च कृत्वा भूतले पातयामास ॥२२॥

वेगेनेति । कांश्चिद्गणान् वेगेन सवेगगत्या भूतले पातयामास । अपरान्नादेनोच्चैर्गर्जनेन भूतले पातयामास । इतरान् भ्रमणेनेतस्ततः परिभ्रमणेन भूतले पातयामास । अन्यान् निश्वासपवनेन नासापुटविनिर्गच्छच्छ्वासवायुना भूतले पातयामास ॥ २३ ॥

निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ॥
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥२४॥

सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ॥
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥२५॥

वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥
लाङ्गुलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥२६॥

निपात्येति । सः असुरो महिषासुरः । एवं प्रमथानीकं देवीगणसैन्यं निपात्य भूमौ पातयित्वा महादेव्याः वाहनं सिंहं हन्तुमभ्यधावत । अभिमुखं प्राद्रवत् । धावु गतिशुद्ध्योः, स्वरितेत् । ततोऽम्बिका कोपं चक्रे चुकोप ॥ २४ ॥

सोऽपीति । महावीर्यःस महिषासुरोऽपि । कोपाद्धेतोः । खुरैः शफैः क्षुण्णं चूर्णीकृतं रजोरूपतां प्रापितमितियावत् महीतलं येन स खुरक्षुण्णमहीतलः सन् । क्रोधे खुरैर्महीतलखननं महिषादिजातिस्वभावः । शृङ्गाभ्यां विषाणाभ्यां उच्चान् पर्वतान् । उत्पाट्येति शेषः । देव्यां चिक्षेप ननाद च गर्वेण जगर्ज च ॥ २५ ॥

वेगेति । तस्य महिषासुरस्य वेगेन यद्भ्रमणं इतस्ततो धावनं तेन विक्षुण्णा विक्षता मही व्यशीर्यत ।शिथिलावयवतामभजत् शॄ हिंसायाम् । [illegible]रि लङ् । लाङ्गुलेन पुच्छेनाहतस्ताडितश्चाब्धिः समुद्रः जलप्रसरणेन सर्वतः सर्व भूप्रदेशं सार्वविभक्तिकस्तसिः । प्लावयामास जले निमज्जयामास ॥ २६ ॥

धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ॥
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥२७॥
इति क्रोधसमाध्मातमापतन्तं महासुरम् ॥
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥२८॥
सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ॥
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥२९॥

धुतेति । धुताभ्यां कम्पिताभ्यां शृङ्गाभ्यां विभिन्ना विदीर्णाः घना मेघाश्च खण्डं खण्डं ययुः खण्डतां खण्डतां प्रापुः । भावप्रधानो निर्देशः । वीप्सायां द्वित्वम् । अथवा खण्डं खण्डं यथा स्यात्तथेति क्रियाविशेषणम् । खण्डेन खण्डेनेत्यर्थः । ययुरितस्ततो बभ्रमुः । श्वासानिलैर्निश्वासवायुभिः अस्ता ऊर्ध्वं क्षिप्ताः । असु क्षेपणे । शतं शतं शतशः । शतशब्दोऽनन्तवाची अचलाः पर्वताः । नभसः आकाशान्निपेतुः। अधः पतन्ति स्म । (अथ पाठान्तरादि) खण्डखण्डमिति पाठः क्वचित् । तत्पक्षे खण्डप्रकारतां प्रापुरिति व्याख्येयम् । प्रकारे गुणवचनस्येति द्वित्वं कर्मधारयवद्भावात् पूर्वस्य सुपो लुक् च । श्वासानिलास्ताः शतश इत्यत्र श्वासानिलाहताः शीर्णा इति क्वचित् पाठः ॥ २७ ॥

इतीति । इति एवंरूपाश्चेष्टाः कुर्वाणं क्रोधेन समाध्मातं प्रदीप्तं आपतन्तमभ्यागच्छन्तं महासुरं महिषं दृष्ट्वा तदा सा चण्डिका तद्वधाय महिषासुरवधार्थं तादर्थ्ये चतुर्थी । कोपमकारोत् स्वीकृतवती ॥ २८ ॥

सेति । सा देवी महामृधे महायुद्धे तस्य तस्मिन् महिषे । आधारस्य शेषत्वविवक्षया षष्ठी । पाशं तन्नामकं बन्धनसाधनमस्त्रविशेषं क्षिप्त्वा तं महासुरं महिषं बबन्ध । पाशेन बद्धः स महिषोऽपि पाशबन्धादात्मानं मोचयितुं महिषस्येदं माहिषं रूपम् तत्याज त्यक्तवान् । (अथ पाठान्तरादि)

ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ॥
छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥३०॥
तत एवाशु पुरुषं देवी चिच्छेद सायकैः ॥
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥३१॥
करेण च महासिंहं तं चकर्ष जगर्ज च ॥
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥३२॥

एतदन्तरम् ततो व्याघ्रोऽभवत् पश्चात् खड्गः पोत्री ततःपरमित्यर्धं क्वचित् पठ्यते ॥ २९ ॥

ततइति । ततः माहिषरूपत्यागानन्तरम् सद्यः तत्क्षणे एव मायया सिंहः अभवत् । अम्बिका तस्य सिंहीभूतस्य महिषस्य शिरो यावच्छिनत्ति वर्तमानसामीप्ये वा यावन्निपातयोगे वा लट् । तावत् खड्ग पाणौ यस्य स खड्गपाणिः । अत्र खड्गपदेन चर्माप्युपलक्ष्यते । उत्तरश्लोके तं खड्गचर्मणा सार्धमिति वक्ष्यमाणत्वात् । पुरुषो नरःअदृश्यत । देव्येतिशेषः । कर्मकर्तरि वा लङ् । दृष्टिगोचरोऽभवदितितदर्थः ॥ ३० ॥

ततइति । ततः देवी पुनरपि गणान् पीडयितुं किञ्चिद्दूरं गच्छन्तं पुरुषं आशु एव शीघ्रमेव खड्गचर्मणा सार्धं खड्गचर्मभ्यां सह । सेनाङ्गत्वादेकवद्भावः । आदौ खड्गं ततश्चर्म ततः पुरुषमिति क्रमेणेति भावः । सायकैर्बाणैःचिच्छेद । ततस्स महागजोऽभूत् ॥ ३१ ॥

करेणेति । ततः स गजरूपो महिषः समीपमागत्य करेण शुण्डादण्डेन तं देवीवाहनं सिंहं चकर्ष क्रष्टुमारब्धवान्। जगर्ज च, मदेन बृंहितं कृतवाञ्श्च । देवी स्वसिंहं कर्षतस्तु तस्य गजरूपस्य महिषस्य करं शुण्डादण्डं खड्गेन निरकृन्तताच्छिनत् । कृतीच्छेदने । तङार्षः ॥ ३२ ॥

ततो महासुरो भूयो माहिषं वपुरास्थितः ॥
तथैव क्षोभयामास त्रैलोक्यं स चराचरम् ॥३३॥

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥३४॥

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ॥
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥३५॥

तत इति । ततः शुण्डाछेदानन्तरम् स महासुरो महिषः भूयः पुनः माहिषं वपुः आस्थितः स्वीकृतवान् सन् तथैव पूर्ववदेव चराचरं जङ्गमस्थावरात्मकं त्रैलोक्यं भूर्भुवःस्वरात्मकं लोकत्रयं क्षोभयामास । व्याकुलीचकार ॥ (अथ पाठान्तरादि) एतदुत्तरं महिषः प्राक् ततोव्याघ्रःखड्गःपोत्री हरिःपुमान् ॥ गजोऽथ महिषो भूयो मायावी सोऽभवन्मृधे ॥ इत्येकोऽधिकः श्लोकः कचित् पठ्यते ॥ ३३ ॥

तत इति । ततः महिषकृतत्रैलोक्यक्षोभणेन क्रुद्धा जगन्माता चण्डिका उत्तमम् । अतिमदजननं सौरभादिगुणयुक्तं च । पीयते इति पानम् मद्यमित्यर्थः । कर्मणि ल्युट् । पुनः पुनः पपौ । वीरपानमिदम् । वीरपानं तु यत् पानं वृत्ते भाविनि वा रणे **इत्यमरः** ॥ वृत्ते रणे श्रमविनोदनार्थम्, भाविनि रणे च उत्साहवर्धनार्थं यत् वीरैः पीयते तद्वीरपानम् । ततश्च मदेनारुणेरक्तवर्णे लोचने यस्याः सा अरुणलोचना सती जहास चैव ॥ हासो मद्यमदेन महिषबलविषयकानादरेण वा । (अथ पाठान्तरादि) एतदनन्तरम् घण्टायुतायुतोन्मानं मधुमांसोपदंशकम् ॥ एकैकवारतश्चण्डी पपौ तत्र रणोत्सवे ॥ इत्येकोऽधिकः श्लोकः क्वचित्पठ्यते ॥ ३४ ॥

ननर्देति । बलं शरीरसामर्थ्यम् । वीर्यम् पराक्रमः । तथा मदेन गर्वेणोद्धतो दृप्तः सोऽसुरो महिषोऽपि च ननर्द जगर्ज । नर्द शब्दे । विषा-

सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ॥
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥३६॥

देव्युवाच ॥ ३७ ॥

गर्ज गर्ज क्षणं मूढ मधु यावत् पिबाम्यहम् ॥
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशुदेवताः ॥३८॥

णाभ्यां शृङ्गाभ्यां भूधरान् पर्वतान् उत्पाट्येति शेषः । चण्डिकां प्रति चण्डिकायामित्यर्थः । चिक्षेप च ॥ ३५ ॥

सा चेति । सा चण्डिका च । तेन महिषेण प्रहितान् क्षिप्तान् तान् भूधरान् शराणां बाणानामुत्करैः समूहैश्चूर्णयन्ती सती । मदेन मधुपानजन्येन उद्भूत उत्पन्नो मुखरागो मुखरक्तिमा यस्याः सा मदोद्भूतमुखरागा तं महिषम् आकुलानि मदेनास्फुटान्यक्षराणि यस्मिन् वचनकर्मणि एवं यथा तथा उवाच ॥ (अथ पाठान्तरादि) उद्भूतेत्यत्र उद्धूतेति क्वचित् पाठः ॥ उद्धूत उद्रिक्तः ॥ ३६ ॥

देवीति । अत्र देव्युवाचे त्यनपेक्षितमप्यस्ति ॥ ३७ ॥

गर्ज गर्जेति । हे मूढ अविवेकिन् । अविवेकश्च सर्वेषां महाबलशालिनां वधे प्रत्यक्षेऽपि जयाशया युद्धोत्साहात् ॥ क्षणं अत्यल्पकालम् । गर्ज गर्ज । द्विरुक्तिस्तस्य पुनःपुनर्गर्जनात् । क्षणपदार्थं विवृणोति । यावत् यावता कालेन अहं मधु मद्यं पिबामि आरब्धं मधुपानं समापयिष्यामि तावत्कालपर्यन्तमित्यर्थः । मधु मद्ये पुष्परसे क्षौद्रेऽपीत्यमरः । अस्या रजोगुणप्रधानत्वान्मधुपानं न विरुद्धम् । मया आशु शीघ्रमेव त्वयि हते सति । अत्रैव त्वद्गर्जनस्थाने एव । देवताः यास्त्वयोपद्रुतास्ताः गर्जिष्यन्ति उच्चैः आनन्दवचनैर्मामभिनन्दिष्यन्तीत्यर्थः ॥ ३८ ॥

ऋषिरुवाच ॥ ३९ ॥

एवमुक्त्वा समुत्पत्य सारूढा तं महासुरं ॥
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥४०॥

ततः सोऽपि पदाक्रान्तस्तया निजमुखात्तदा ॥
अर्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृतः ॥४१॥

ऋषिरिति ॥ ३९ ॥

एवमिति । सा देवी एवमुक्त्वा मधु पीत्वा चेति शेषः । समुत्पत्य महिषस्यात्युन्नतत्वादुत्प्लुत्य तं महासुरं महिषं आरूढा सती तस्योदराभ्यन्तरे कमपि प्राणिनं चलन्तं ज्ञात्वा तस्य बहिर्निर्गमनाय एनं महिषं । अन्वादेशे एनादेशः । पादेन पादाभ्यामित्यर्थः । जात्यभिप्रायेणैकवचनं । आक्रम्य उदरे दृढं निपीडय कण्ठे शूलेनाताडयत् प्राहरत् ॥४०॥

तत इति । ततस्तया देव्या पदाक्रान्तः उदरे पद्भ्यां दृढं निपीडितोऽपि स महिषः । निजमुखान्माहिषजातीयात् अर्धनिष्क्रान्तः पुरुषार्धशरीरेण निर्गतः आसीदेव । तदा देव्या वीर्येण स्वसामर्थ्येन संवृतः निरुद्धावशिष्टनिर्गमः कृतः ॥ अत्र निजमुखादर्धनिष्क्रान्तइत्युक्तं अन्यत्र कण्ठनालान्निर्गत इत्युक्तं । तथा हि **मात्स्ये** । कण्ठच्छेदोद्गतं तस्य दानवं शूलपाणिनं ॥ इति ॥ **भविष्ये** च । निःसृतार्धतनुं कण्ठनालाच्चर्मासिधारिणं ॥ इत्युक्तं ॥ कल्पभेदेनाविरोधः ॥ (अथ पाठान्तरादि) तदेत्यत्र तत इति पाठे । ततः देव्या वीर्येण संवृत इत्यन्वयः । आसीदित्यत्र अतीति क्वचित्पाठः । तस्य संवृत इत्यनेनान्वयः ॥ ४१ ॥

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ॥
तया महासिना देव्या शिरश्छित्वा निपातितः ॥४२॥

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥४३॥

तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥४४॥

अर्धेति । अर्धो निष्क्रान्तः अथवार्धेन निष्क्रान्तोऽर्धनिष्क्रान्त एव युध्यमानो युद्धं कुर्वन् असौ महिषमुखान्निर्गतः पुरुषः तया देव्या महासिना महता खड्गेन शिरश्छित्वा निपातितः मारितइत्यर्थः । (अथ पाठान्तरादि) इत उत्तरम् एवं स महिषो दैत्यः सभृत्यः ससुहृद्गणः ॥ त्रैलोक्यसुखदायिन्या तया देव्या निपातितः॥ त्रैलोक्यस्थैस्तदा भूतैर्महिषे विनिपातिते॥ जयेत्युक्तं तदा सर्वैः सदेवासुरमानुषैः ॥ इतिश्लोकद्वयमधिकं क्वचित् पठ्यते ॥ ४२ ॥

तत इति । ततो महिषनिपातनानन्तरम् । तत् हतावशिष्टं सर्वं दैत्यसैन्यम् हाहा इति कृतं येन तत् हाहाकृतम्। दुःखेन कृतहाहाशब्दमित्यर्थः । आहिताग्न्यादित्वान्निष्ठायाः परनिपातः । हा विषादशुगर्तिष्वित्यमरः । वीप्सायां द्वित्वम् । ननाश अदृश्यतां प्राप पलायामासेत्यर्थः । णश् अदर्शने । सकलाः सर्वे देवतागणाः देवसमूहाः । अथवा देवता इन्द्राद्याः । गणा देवीप्रमथाश्च । परम् महान्तं प्रहर्षमानन्दं जग्मुःप्रापुः ॥ ४३ ॥

तुष्टुवुरिति । सुरा इन्द्रादयो देवाः । दिवि भवर्दिव्यैः स्वर्गस्थैर्महर्षिभिः मरीचिप्रभृतिभिः सह तां महिषघ्नीं देवीम् तुष्टुवुः । उत्तरा-

ध्यायगतैः श्लोकैः स्तुवन्तः । उक्तं च लक्ष्मीतन्त्रे । महिषान्तकरीसूक्तं दृष्टं देवैर्महर्षिभिः ॥ सूक्तस्यास्य वेदवदकृतकत्वात् अत्र दृष्टपदेन प्रयोगः। गन्धर्वाणां देवगायकानां पतयो विश्वावसुप्रभृतयः जगुर्गायनं चक्रुः। अप्सरसां देवनर्तकीनामुर्वश्यादीनां गणाः समूहा ननृतुर्नृत्यं चक्रुश्च ॥ (अथ पाठान्तरादि) सुरादेवीमित्यत्र सुरगणा इति क्वचित् पाठः । प्रथमार्धानन्तरम् । मुमुचुः पुष्पवर्षाणि दिवि देवा विमानगाः इत्यर्धमधिकं च क्वचित् पठ्यते ॥ ४४ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोऽध्यायः ॥

इतीति । महिषासुरस्य वधो यस्मिन् स महिषासुरवधः । अष्टत्रिंशदक्षरात्मकमेतत्तृतीयाध्यायसमाप्तिवाक्यम् ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
तृतीयाध्यायव्याख्या ॥

अथ चतुर्थोऽध्यायः ॥

ॐ ऋषिरुवाच ॥ १ ॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन् दुरात्मनि सुरारिबले च देव्या ॥
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा—
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥

ऋषिरिति । अथादौ चतुर्थाध्यायमन्त्रविभागकारिकाः ॥ तुर्ये त्वाद्यो हि गद्यात्मा मनुर्ऋषिरुवाच ह ॥ श्लोकमन्त्राश्च शक्राद्याः षड्विंशतिरुदाहृताः ॥ ततश्चर्षिरुवाचेति गद्यरूपो मनुर्मतः ॥ एवं स्तुतेति भक्त्येति श्लोकमन्त्रावुभौ मतौ ॥ देव्युवाचेति च तत एको गद्यमनुः स्मृतः ॥ ततस्त्वर्धात्मको मन्त्रो व्रियतां त्रिदशा इति ॥ देवा उचुश्चेति ततो मन्त्रो गद्यात्मको मतः ॥ भगवत्येति यदि चापीति श्लोकमनू मतौ ॥ यश्च मर्त्यैः स्तवैरेभिरित्यर्धश्लोकमन्त्रकः ॥ तस्य वित्तर्द्धिविभवैरित्यर्धश्लोकमन्त्रकः ॥ ततश्चर्षिरुवाचेति गद्यात्मा मन्त्र ईरितः ॥ इति प्रसादितेत्याद्याश्चत्वारः श्लोकमन्त्रकाः ॥ एवं द्विचत्वारिंशत्स्युः सर्वे मन्त्राश्चतुर्थके ॥ पञ्चत्रिंशच्छ्लोकमन्त्रा द्वावर्धश्लोकमन्त्रकौ ॥ गद्यमन्त्रास्तु पञ्च स्युः श्लोकाः षट्त्रिंशदेव हि ॥ इति ॥ अथ मन्त्रव्याख्या ऋषिरुवाचेति ॥ (पाठान्तरादि)

इत उत्तरम् ततः सुरगणाः सर्वे देव्या इन्द्रपुरोगमाः ॥ स्तुतिमारेभिरे कर्तुं निहते महिषासुरे ॥ इत्येकोऽधिकः श्लोकः क्वचित् पठ्यते ॥ १ ॥

शक्रादय इति॥ शक्र इन्द्रः आदिः प्रमुखो येषु ते शक्रादयः सुरगणा देवगणाः अतिवीर्ये महापराक्रमे दुरात्मनि दुष्टस्वभावे तस्मिन् महिषासुरे ।

देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ॥
तामम्बिकामखिलदेवमहर्षिपूज्याम्
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥३॥

तथा उक्तविशेषणद्वयविशिष्टे सुरारीणां दैत्यानां बले सैन्ये च देव्या निहते सति । तां देवीम् । शिरसां धराः शिरोधरा ग्रीवाः । अंसाः स्कन्धाः । तेषां समाहारः शिरोधरांसम् । प्रणत्या प्रणामक्रियया हेतुभूतया नम्रं शिरोधरांसं येषां ते प्रणतिनम्रशिरोधरांसाः । तथा प्रहर्षेण महिषवधजन्यानन्देन यः पुलकोद्गमो रोमाञ्चोत्थानम् तेन चारवो रमणीया देहा येषां ते प्रहर्षपुलकोद्गमचारुदेहाश्च सन्तः वाग्भिर्गुणवर्णनपरसूनृतवचनैस्तुष्टुवुः ॥ इत आरभ्य विंशतिश्लोकानाम् वसन्ततिलकं वृत्तम् । उक्ता वसन्ततिलका तभजा जगौ ग इति तल्लक्षणात् । (अथ पाठान्तरादि) एतदनन्तरम् देवा ऊचुरिति क्वचित् पठ्यते तदनार्षम् ॥ २ ॥

अथादौ प्रकृतरूपेण स्तुवन्ति देव्येति । निःशेषाणां सर्वेषां देवगणानां याः शक्तयः सारभूतानि तेजांसि । तेषां समूह एव मूर्तिः शरीरं यस्यास्तया निःशेषदेवगणशक्तिसमूहमूर्त्या । उक्तं च **लक्ष्मीतन्त्रे** शक्रं प्रति महालक्ष्म्या । मदीयाः शक्तिलेशा ये तत्तद्देवशरीरगाः ॥ सम्भूय ते ममाभूवन् रूपं परमशोभनम् ॥ इति ॥ यया देव्या इदं जगत् आत्मशक्त्या स्वसामर्थ्येन आततं व्याप्तम् । ततं इति वा छेदः । अर्थः समानः अथ वा आत्मशक्त्या परमात्मशक्त्या इति देव्या विशेषणत्वेन व्याख्येयम् । देवात्मशक्तिं स्वगुणैर्निगूढामिति श्रुतेः । ताम् अखिलैः समस्तैर्देवैरिन्द्रादिभिर्महर्षिभिर्मरीच्यादिभिश्च पूज्यामम्बिकां जगन्मातरम् भक्त्यानुरागेण नताः प्रणताः स्म । स्मेत्यस्तेर्लटो लुप्तसकारं छान्दसमुत्तमपुरु बहुवचनम् ।

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ॥
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चासुरभयस्य मतिं करोतु ॥४॥
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताःस्म परिपालय देवि विश्वम् ॥५॥

पादपूरणेऽव्ययं वा । सा देवी नोऽस्माकं शुभानि मङ्गलानि विदधातु करोतु ॥ ३ ॥

त्वदीयं प्रभावादिकं विष्ण्वादिदेवतानामप्यगम्यमित्याहुः । **यस्या** इति । यस्याः अतुलं निरुपममपरिमितं वा । तुला सादृश्यमानयोरिति **मेदिनी**। नास्ति तुला यस्येति विग्रहः । प्रभावस्य बलस्य च विशेषणमेतत् । प्रभावं प्रभुशक्ति प्रतापमिति यावत् । बलं शरीरसामर्थ्यं च वक्तुं वर्णयितुं भगवान् सर्वशक्तिसम्पन्नः । अनन्तो देशकालाद्यपरिच्छिन्नो विष्णुः । ब्रह्मा परमेष्ठी । हरो महेश्वरश्च एते न ह्यलम् । न शक्ताः । अभावे नह्यनो नापीति अलं भूषणपर्याप्तिशक्तिवारणवाचक इति च **अमरः** । सा चण्डिका अखिलानां जगतां चतुर्दशभुवनानां परिपालनाय । असुरेभ्यो यद्भयं तस्य नाशाय च । उभयत्रापि तादर्थ्ये चतुर्थी । मतिं बुद्धिं करोतु । प्रत्यक्षत्वेऽपि देव्याः परोक्षवत् यत्तद्भ्यां निर्देशः प्रथमपुरुषप्रयोगश्चातिपूज्यत्वभावनादर्शनार्थम् ।

अथ पाठान्तरादि असुरभयस्येत्यत्राशुभभयस्येति पाठः क्वचित् ॥४॥

लोके लक्ष्म्यलक्ष्म्यादिरूपेण त्वमेव वर्तसे इत्याहुः **येति** । हे देवि या सुकृतिनां पुण्यवतां भवनेषु गृहेषु श्रीर्लक्ष्मीरस्ति । या पापात्मनां

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ॥
किं चाहवेषु चरितानि तवाद्भुतानि ॥
सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥

पापिनां भवनेष्वलक्ष्मीर्दारिद्र्यमस्ति । या कृतधियां ज्ञानिनां हृदयेषु बुद्धिर्ज्ञानमस्ति । या सतां साधूनां हृदयेषु श्रद्धा देवतादिविषयको विश्वासोऽस्ति । या च कुलजनः कुलीनजनः प्रभवो जन्महेतुर्यस्य अथवा कुलजनात् प्रभवो यस्य स कुलजनप्रभवः कुलीनजनापत्यमित्यर्थः । तस्य हृदये लज्जा अकार्यवैमुख्यमस्ति । अत्र कुलजनप्रभवस्येति पदस्यैकवचनत्वात् । हृदयेष्विति पदस्यैवचनान्तत्वेन विपरिणामः कार्यः । सा स्वयं त्वमेवासीति शेषः । तां त्वां नतास्स्मः । विश्वं परिपालय । (अथ पाठान्तरादि) प्रभवस्येत्यत्र प्रसवस्येति क्वचित् पाठः ॥ ५ ॥

तव रूपवीर्यचरितानि वाचामगोचराणीत्याहुः । किमिति । एतदस्मत्पुरोवर्ति त्विषा व्याप्तलोकत्रयं पादाक्रान्त्यानतभूमि किरीटोल्लिखिताम्बरं दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थितं अतएवाचिन्त्यं मनसाप्यविचिन्तनीयम् तव रूपं किं वर्णयाम कथं वर्णयितुं शक्नुयाम । विधौ लोट् । तथा भूरि बहुलं यथा स्यात्तथा । असुराणां देवो राजा असुरदेवो महिषासुरः । गणाः त्वन्निश्वासोद्भवाः प्रमथाः । असुरदेवश्च गणाश्च असुरदेवगणाः । ते आदयाः प्रमुखा येषु तेष्वसुरदेवगणादिकेषु सर्वेषु प्रतिमहासुरं कृतेषु आहवेषु सङ्ग्रामेषु जातानि तत्र अद्‌भुतानि विस्मयकराणि अङ्गस्पर्शजनितचिक्षुरखड्गभङ्गहुङ्कारकृतचामरशक्तिभङ्गादीनि चरितानि कर्माणि च किं वर्णयाम ॥ (अथ पाठान्तरादि) आहवेषु चरितानीत्यत्र आहवेसुचिरितानीति अद्‌भुतानीत्यत्र अति यानीति च क्वचित्पठ्यते ॥ ६ ॥

हेतुः समस्तजगतां त्रिगुणापि देवै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ॥
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥७॥

अथ मूलप्रकृतिरूपत्वेन स्तुवन्ति । तत्र मूलप्रकृतिलक्षणं **मार्कण्डेयपुराणे** । अनाद्यन्तं जगद्योनि त्रिगुणप्रभवात्मकम् ॥ मानातीतमविज्ञेयं यच्च सर्वत्र वर्तते ॥ प्रधानकारणं ह्येतदव्यक्ताख्यं महर्षयः ॥ आहुश्च मूलप्रकृतिमिति ॥ तदेतदनुसन्धायाहुः ॥ **हेतुरिति** । हे देवि त्वं समस्तजगतां चतुर्दशभुवनानां हेतुः कारणमसि । एतेन जगद्योनित्वमुक्तम् । त्वं त्रिगुणापि अपिश्चार्थे । गुणत्रयसाम्यावस्था चासीत्यर्थः । एतेन त्रिगुणप्रभवात्मकत्वमुक्तम् । हरिहरौ आदी मुख्यौ येषां तैर्देवैरपि सर्वज्ञैरपीति भावः । न ज्ञायसे च । एतेनाविज्ञेयत्वमुक्तम् । त्वमपारा । पारशब्द आदेरप्युपलक्षकः । एतेनानाद्यन्तत्वमुक्तम् । त्वं सर्व आश्रय आधारो यस्याः सा सर्वाश्रया । सर्वगतेत्यर्थः । एतेन सर्वत्र वर्तते इत्येतदुक्तम् । इदं अखिलं जगत् तव अंशभूतम् । भूतशब्दः स्वरूपवाची । एतेन मानातीतत्वमुक्तम् । त्वं अव्याकृतासि । व्याकृतं व्याकरणम् व्यक्तीकरणमिति यावत् । भावे क्तः । तन्नास्ति यस्याः सा अव्याकृता । एतेनाव्यक्तत्वमुक्तम् । अतस्त्वं परमा परात्परा आद्या प्रकृतिर्हि मूलप्रकृतिरेवासि । हि हेताववधारणे । महदादीनां विकृतीनामपि स्वस्वकार्यं प्रति प्रकृतित्वमस्ति तद्व्यावृत्यर्थमाद्येति विशेषणम् । उक्तं च **साङ्ख्यकारिकासु** । मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्तेति । अस्यार्थः मूलप्रकृतिः अविकृतिः विकृतित्वरहिता । केवलप्रकृतिरेवेत्यर्थः । इतरा महदाद्याः सप्त प्रकृतिविकृतयः । स्वकार्यनिरूपितं प्रकृतित्वम् । स्वकारणनिरूपितं विकृतित्वं चासामस्तीत्यर्थः ।

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रूच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८ ॥
या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ॥

अन्यत्रापि । प्रकृतेः कारणायोगान्मूलप्रकृतिरेव सा ॥ महत्तत्वादयः सप्त कार्यकारणतो द्विधा ॥ इति ॥ महान् अहङ्कारः पञ्चतन्मात्राणीति सप्त महादाद्याः ॥

अथ पाठान्तरादि देवैरित्यत्र दोषैरिति पाठे शरीरत्वप्रयुक्तभ्रमप्रमादादिदोषैरित्यर्थः । उक्तं च ब्रह्मणैव पूर्वम् । विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्त यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेदिति ॥ ७ ॥

अथ देवयज्ञपितृयज्ञादिषु देवगणपितृगणतृप्तिकरी स्वाहा स्वधा च त्वमेवासीत्याहुः । **यस्या इति** । हे देवि । सकलेषु मखेषु एकविंशतियज्ञसंस्थासु यस्याः समुदीरणेनोच्चारणेन समस्तसुरता सर्वदेवसमूहः । गजसहायाभ्यांचेति वार्तिके चकारादन्यत्रापि सामूहिकस्तल् भवति । तृप्तिं प्रयाति सा स्वाहा त्वमेवासि । उक्तं च **मार्कण्डेयपुराणे** । सोमसंस्था हविःसंस्थाः पाकसंस्थाश्च सप्त याः ॥ तास्त्वदुच्चारणाद्देवि पूर्यन्ते ब्रह्मवादिभिः ॥ इति ॥ वै इति निश्चये पादपूर्तौ वा । तथा श्राद्धादौ त्वमेव पितृगणस्य च तृप्तिहेतुरसि । अत एव जनैः स्वधेति चोच्चार्यसे । उच्यसे । स्वाहाशब्दः प्रथमाध्याये व्याख्यातः । स्वान् पितॄन् धत्ते पुष्णातीति स्वधा इति स्वधापदव्युत्पत्तिः । डुधाञ् धारणपोषणयोः ॥ ८ ॥

अथ ब्रह्मविद्यारूपत्वेन स्तुवन्ति । **येति** । या अविचिन्त्यानि मनसापि चिन्तयितुमशक्यानि अतिदुष्कराणीत्यर्थः । महाव्रतानि शमादि-

मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥ ९ ॥
शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ॥

षट्कसम्पत्तिः नित्यानित्यवस्तुविवेकः; इहामुत्रफलभोगविरागश्चेति तीव्रनियमा यस्यां सा । मुक्तिहेतुर्मोक्षस्य कारणम् । भगवती पूज्यतमा । परमा सर्वोत्तमा । विद्या ब्रह्मविद्यास्ति सा त्वमसि । अतः सुनियतानि वशीकृतानि इन्द्रियाणि यैस्ते सुनियतेन्द्रियाः । शमादिषट्कसम्पन्ना इत्यर्थः । तत्त्वं परमात्मा एव सारो नित्यस्तदन्यत्सर्वमनित्यं येषां ते तत्त्वसाराः । नित्यानित्यवस्तुविवेकवन्त इत्यर्थः । अथ तत्त्वं परमात्मनि वाभेदे स्वरूपे चेति हैमः । सुनियतेन्द्रियाश्च तत्त्वसाराश्च सुनियतेन्द्रियतत्त्वसारास्तैः । अस्ताः त्यक्ताः समस्ता । दोषा यैस्तैः । वैराग्यादिगुणसम्पन्नैरित्यर्थः । मोक्षमर्थयन्ते इति मोक्षार्थिनस्तैर्मुमुक्षुभिरित्यर्थः । ईदृशैः साधनचतुष्टयसम्पन्नैर्मुनिभिरभ्यस्यसे परिशील्यसे सदा सेव्यसे इत्यर्थः । (अथ पाठान्तरादि) अविचिन्त्यमहानुभावैरभ्यस्यते इति पाठे या अविचिन्त्यमहानुभावैः अवर्णनीयप्रभावैः सुनियतेन्द्रियतत्त्वसारादिविशेषणविशिष्टैश्च मुनिभिः मुक्तिहेतुः भगवती परमा विद्या अभ्यस्यते सा त्वमसीति सरल एवान्वयः देवीति प्रथमान्तपाठे तद्विद्याया विशेषणम् ॥ ९ ॥

अथ त्रयीविद्यारूपत्वेनान्वीक्षिक्यादिचतुर्विद्यारूपत्वेन च स्तुवन्ति **शब्दात्मिकेत्यादिना** । हे देवि शब्दः आत्मा स्वरूपं यस्याः सा शब्दात्मिका शब्दमयीत्यर्थः । सुविमला अतिपवित्रा । उत्तरेण ऋकारेण सह संहितायां गुणादेशेन पूर्वाकारस्य ह्रस्वत्वं रेफान्तत्वं च । ऋग्भिः सहितानि

देवि त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री ॥ १० ॥
मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ॥

यजूंषि ऋग्यजूंषि । द्वन्द्वे ऋग्यजुषमिति स्यात् । वृत्तबद्धा मन्त्रा ऋचः । निगदात्मका मन्त्रा यजूंषीति भेदः तेषामृग्यजुषाम् । तथा उच्चैर्गानमुद्गीथः । गश्चोदी'त थक्प्रत्यये घुमास्थेतीत्वम् । तेन रम्यो यः पदपाठः पदोच्चारस्तद्वतां साम्नाम् । तत्सञ्ज्ञकानां गानविशिष्टमन्त्राणां च निधानमधिकरणभूता । भगवती परमपूज्या धर्माश्रया वा । भगं श्रीयोनिवीर्येच्छा ज्ञानवैराग्यकीर्तिपु ॥ महात्मैश्वर्ययत्नेपु धर्मे मोक्षे च ना रवाविति मेदिनी ॥ एतादृशी त्रयी वेदत्रयविद्या त्वमसि । त्रयीत्युपलक्षणम् तेन वेदचतुष्टयरूपा त्वमसीत्यर्थः । तथा सर्वजगतां भवभावनाय कल्याणोत्पादनार्थम् । कल्याणेऽपि भवः प्रोक्त इति शाश्वतः । परमार्तिहन्त्री दारिद्र्यादिमहादुखविनाशिका । धनप्राप्तिहेतुत्वादिति भावः । ईदृशी वार्ता कृपिगोरक्षणवाणिज्यादिरूपा विद्या च त्वमेवासि । कृष्यादाविष्यते वार्ता वर्तनोदन्तयोरपीति शाश्वतः । वार्तापदेनान्वीक्षिकीदण्डनीत्योरपि ग्रहणम् । तयोरपि लोककल्याणकरत्वात् परमार्तिहन्तृत्वाच्च । उक्तं च । आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ॥ विद्याह्येताश्चतस्रस्तु लोकसंस्थितिहेतवः ॥ इति ॥ आन्वीक्षिकीतर्कविद्या । दण्डनीतिरर्थशास्त्रविद्या । श्लोकद्वयेन सर्वविद्यारूपा त्वमेवासीत्युक्तम् (अथ पाठान्तरादि) देवीतिप्रथमान्तः पाठः क्वचित् । तदा तत् त्रय्या विशेषणम् ॥ १० ॥

अथ ब्रह्मादिपत्नीरूपत्वेन आदिशक्तिरूपत्वेन च स्तुवन्ति ॥ मेधेति । हे देवि । त्वम् । विदितः ज्ञातः अखिलशास्त्राणां निगमागमानां सार-

श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥
ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ॥
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२ ॥

स्तत्त्वं यया सा मेधा धारणावती बुद्धिः । तदधिष्ठानभूता ब्रह्मपत्नी सरस्वती देवतेति यावत् असि । तथा कैटभारेर्विष्णोर्हृदये एव एकस्मिन् कृतः अधिवासो निवासो यया सा सदा विष्णुहृदयस्थायिनीत्यर्थः । एतादृशी श्रीः लक्ष्मीरपि त्वमेवासि । तथा शशिमौलौ चन्द्रचूडे शिवे कृता प्रतिष्ठा अर्धाङ्गेनावस्थितिर्यया सा गौरी पार्वत्यपि त्वमेवासि । किञ्च न विद्यते सङ्गः प्रतिघातो यस्याः सा असङ्गा अप्रतिहतशक्तिरित्यर्थः । सङ्गः सक्तौ प्रतीघाते इति **विश्वः**। दुर्गो दुस्तरो यो भवसागरः संसारसमुद्रस्तत्र नौरिव दुर्गभवसागरनौः भवसागरतारिका । मोक्षप्रदेत्यर्थः । दुर्गा दुर्ज्ञेयत्वात्तन्नाम्नी आदिशक्तिस्त्वमेवासि । तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् ॥ नमामि भवभीतोऽहं संसारार्णवतारिणीमिति **देव्यथर्वशीर्षश्रुतेः** । दुर्गमां दुर्ज्ञेयाम् ॥ ११ ॥

अथ समरदृष्टमद्भुतद्वयं श्लोकद्वयेन वर्णयन्ति । तत्र प्रथमम् । ईपदिति । हे देवि । यद्यपि समरे तव वक्त्रं ईपत्सहासं सेपद्धासं सस्मितमित्यर्थः । पदव्युत्क्रमश्छान्दसः । परिपूर्णपोडशकलम् । यच्चन्द्रबिम्बम् तदनुकरोति तच्छीलं परिपूर्णचन्द्रबिम्बानुकारि । आल्हादकत्वात्प्रसन्नत्वाद्वृत्तत्वाच्चेति भावः । तथाप्यमलं निष्कलङ्कम् **व्यतिरेकोऽलङ्कारः**। कनकस्येव उत्तमा कान्तिर्यस्य तत् कनकोत्तमकान्ति । कुपितत्वादारक्तवर्णमित्यर्थः ।

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ॥
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१३॥
देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयति कोपवती कुलानि ॥

स्वभावतस्तु श्वेतवर्णम् । श्वेतानना नीलभुजेति रहस्यात् । शम्भुतेजोजातत्वाच्च । अत एव कान्तं मनोरमम् । अस्ति । तथापि तद्विलोक्य आत्ता स्वीकृता रुट् रोषो येन् तेनात्तरुषा महिषासुरेण । सहसा प्रहारयोग्यत्वायोग्यते अविचार्येत्यर्थः । यत् प्रहृतं । प्रहारः कृतः भावे क्तः । त्वयीति शेषः । तदत्यद्भुतमत्याश्चर्यम् । रम्यवस्तुदर्शने रोषस्यासम्भवात्प्रहारकरणस्य तु सुतरामिति भावः ॥ १२ ॥

पूर्वापेक्षया द्वितीयमद्भुततरमाहुः । दृष्ट्वेति हे देवि कुपितं अतएव उद्यन् उदयं प्राप्नुवन् यः शशाङ्कश्चन्द्रस्ततसदृशी छविः कान्तिर्यस्य तत् उद्यच्छशाङ्कसदृशच्छवि । आरक्तवर्णमित्यर्थः । तथा भ्रुवोः कुट्या वक्रतया करालं भीषणम् । तव वक्तृमिति शेषः । दृष्ट्वा तु महिषः सद्यो दर्शनक्षणे एव यत् प्राणान्न मुमोच नोत्ससर्ज तदतीव पूर्वाद्भुतापेक्षयाधिकमित्यर्थः । चित्रं आश्चर्यम् । कुत इत्याहुः । हि यतः । कुपितस्यान्तकस्य कृतान्तस्य दर्शनेन दर्शने सतीत्यर्थः कैर्जीव्यते प्राणधारणं क्रियते न कैरपीत्यर्थः एतेन देव्या वक्त्रस्य कुपितान्तकवक्त्रतुल्यत्वं दर्शितम् । अर्थान्तरन्यासोऽलङ्कारः ॥ १३ ॥

अथ प्रसादमर्थयन्ते । देवीति । हे देवि प्रसीद तुष्टा भव । तेन किं फलम् तदाहुः ॥ भवती परमा तुष्टा चेत् भवाय श्रेयसे कल्पते इति शेषः ।

विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥
ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति बन्धुवर्गः ॥
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥ १५ ॥

परमं तुष्टवरयोस्त्रिष्वभ्युपगमेऽव्ययम् इति भवो जन्मनि संसारे शम्भौ श्रेयसि च स्मृतः इति च विश्वप्रकाशः । प्रसङ्गात्कोपस्यापि फलमाहुः । भवती कोपवती चेत् सद्यः कोपक्षणे एव कुलानि कोपविषयीभूतानामिति भावः । विनाशयति । किमत्र प्रमाणमिति चेत्प्रत्यक्षमेवेत्याहुः । एतत्कोपफलमधुनैव विज्ञातं प्रत्यक्षीकृतम् । यत् यतः । कुपितया त्वया एतत् सुविपुलं अतिबहुलं महिषासुरस्य बलं सैन्यं अस्तं नीतं नाशं प्रापितम् । अस्तमिति द्वितीयन्तं मान्तमव्ययं वा नाशार्थकम् ।

अथ पाठान्तरादि प्रसादपरमेति क्वचित् पाठः । तत्पक्षे प्रसादेन परा उत्तमा मा शोभा यस्याः । इति व्याख्येयम् । विनाशयसीति मध्यमपुरुषान्तपाठे त्वमित्यध्याहार्यम् । यदस्तमित्यत्र समस्तमिति पाठे नीतमित्यत्र विनाशमित्यस्याध्याहारः ॥ १४ ॥

परमा भवती भवायेत्युक्तं तदेव प्रपञ्चयन्ति ते सम्मता इति श्लोकद्वयेन । अभ्युदयं ऐहिकामुष्मिकसुखोपचयं ददातीत्यभ्युदयदा भवती येषां सदा प्रसन्नास्ति ते जनपदेषु सर्वदेशेषु सम्मता मान्या भवन्ति । तेषां धनानि भवन्ति उपचीयन्ते । तेषां यशांसि भवन्ति । तेषां बन्धुवर्गः आप्तवर्गः न च सीदति नैव दुःखमाप्नोति । किञ्च निभृताः विनीता आत्मजाः पुत्राः भृत्याः सेवकाः दारा भार्याश्च येषां एवंभूतास्ते एव धन्याः कृतार्थाश्च सन्ति । निभृतविनीतप्रश्रिताः समा इत्यमरः ।

धर्म्याणि देवि सकलानि सदैवकर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकद्वयेऽपि फलदा ननु देवि तेन ॥ १६ ॥

अथ पाठान्तरादि बन्धुवर्गइत्यत्र धर्मवर्ग इतिं पाठे धर्मप्रधानो वर्गः धर्मवर्गः धर्मार्थकाममोक्षा इत्यर्थः । न च सीदति नैव हीयते इत्यर्थः ॥१५॥

त्वत्प्रसादफलं इहामुत्र च भवतीत्याहुः ।**धर्म्याणीति** । हे देवि कश्चित् सुकृती भाग्यवान् पुरुषः । सुकृतं तु शुभे पुण्ये भाग्ये सुविहितेऽपिचेति **मेदिनी** । मत्वर्थीय इनिः । भवतीप्रसादात् भवत्याः कृपयेत्यर्थः । अत्यादृतः आदरयुक्तः सन् नतूपेक्षयेति भावः । प्रतिदिनं दिने दिने । सदैव नक्तन्दिवम् । सकलानि सर्वाणि । धर्म्याणि धर्मादनपेतानि । स्ववर्णाश्रमोचितानीत्यर्थः । धर्मपथ्यर्थेति यत् । कर्माणि करोति । ततस्तदुत्पन्नात् पुण्यातिशयात् दिव्यसुखभोगार्थं स्वर्गं प्रयाति च । तेन हेतुना । हे देवि । त्वं लोकद्वयेऽपि इह स्वर्गलोके चेत्यर्थः । फलदा असि । ननु निश्चये । नात्र संशय इत्यर्थः । अथ वा पूर्वश्लोके ऐहलौकिकं प्रसादफलम् अस्मिंस्तु पारलौकिकमिति श्लोकद्वयेन लोकद्वयफलकथनम् । भवतीशब्दस्य सर्वनामत्वेऽपि छान्दसत्वात्सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावो न। अथ वा भवतीति पृथक् पदम् तत्पक्षे सुकृती धर्म्याणि कर्माणि करोति ततः स्वर्गं प्रयाति च । तेन हेतुना भवती त्वं प्रसादात् प्रसादं कृत्वेत्यर्थः । ल्यब्लोपे पञ्चमी । लोकद्वयेऽपि फलदा ननु । इह धर्माचरणे बुद्धिस्ततः स्वर्गप्राप्तिश्चेत्युभयमपि त्वत्प्रसादस्यैव फलमिति भावः । एकोऽहं भवतीसुतक्षयकर इति वेणीसंहारप्रयोगस्तु प्रमादादेवेति ज्ञेयम् ।

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥१७॥
एभिर्हतैर्जगदुपैतु सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ॥

अथ पाठान्तरादि केचिल्लोकद्वये इत्यत्र लोकत्रये इति पठित्वा श्लोकं यथाकथञ्चन योजयन्ति ॥ १६ ॥

अथ भगवदुक्तानामार्तधनार्थिजिज्ञासुज्ञानिनां चतुर्णां भक्तानां मध्ये आद्यत्रयस्य भक्तिमाह **दुर्गे इति** । अत्र दुर्गपदेन दारिद्र्यसङ्कटम् रोगादिदुःखं च गृह्यते । अग्रे दारिद्र्यदुःखेत्युभयोक्तेः । दुर्गं स्यात् सङ्कटे दुःखे दुर्गमे सैनिकालये इति **विश्वः** । हे देवि त्वं दुर्गे दारिद्र्यसङ्कटे रोगादिदुःखे च स्मृता सती अशेषजन्तोः स्मर्तुरिति भावः । भीतिं दारिद्र्यभयं रोगादिभयं च हरसि नाशयसि । हे दारिद्र्यदुःखभयहारिणि । दारिद्र्यं निर्धनत्वम् । दुःखं रोगाद्यार्तिः । तयोः सकाशाद्यद्भयं तद्धरणशीले हे देवि । हरतेस्ताच्छील्ये णिनिः । त्वं स्वस्थैः दारिद्र्यरोगादिरहितैः मुमुक्षुभिरित्यर्थः । स्मृता सती अतीव शुभां मोक्षदामित्यर्थः । मतिं ब्रह्मात्मैक्यज्ञानं ददासि । मन् ज्ञाने स्त्रियां क्तिन् । तस्मात्सर्वेषु भक्तेषु उपकारोऽनुग्रहस्तत्करणाय त्वदन्या त्वद्भिन्ना देवता कास्ति न कापीति भावः । अत्र चतुर्थभक्तस्य ज्ञानिनः सकलैषणाशून्यत्वेन फलार्थित्वाभावाच्च कथनम् ॥ १७ ॥

न केवलं भक्तेष्वेव तवोपकारकरणेच्छास्ति अपि तु उदासीनेषु शत्रुषु च सास्तीत्याहुः । **एभिरिति** । हे देवि । त्वं । एभिः प्रकृतैर्दैत्यैः हतैः । एतेषां वधेनेत्यर्थः । भावप्रधानो निर्देशः । जगत् सुखं उपैतु इति

सङ्ग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥१८॥
दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत् प्रहिणोति शस्त्रम् ॥

उदासीने जगत्युपकारेच्छा। तथा एते दैत्याः नरकाय नरकं गन्तुम्। क्रियार्थोपपदस्येति चतुर्थी। चिराय बहुकालम्। अव्ययमेतत्। पापं ब्रह्महत्यादिपापानि कुर्वन्तु नाम। नामेत्यभ्युपगमे। तथापि ते सङ्ग्रामे मृत्युः सङ्ग्राममृत्युः। तमधिगम्य प्राप्य दिवं स्वर्गं प्रयान्तु। स्वर्गं गच्छति पापोऽपि रणे योऽभिमुखो हतः॥ इति स्मृतेरिति भावः। इति मत्वा नूनं इति विचार्यैवेत्यर्थः। अहितान् शत्रून् दैत्यान् विनिहंसि निहतवत्यसि। वर्तमानसामीप्ये भूते लट्। इति शत्रुषूपकारेच्छोक्ता।

अथ पाठान्तरादि उपैतु सुखमित्यत्रोपैति सुखमिति पाठे सुखमुपैष्यतीति तदर्थः। कुर्वन्ति नामेति पाठे नामेति प्राकाश्ये। प्रसिद्धमेवैतदित्यर्थः। अन्यत्समानम् ॥ १८ ॥

ननु मया दैत्याः केवलं जगत्सुखार्थमेव हता न तु तेषूपकारबुध्येति चेन्नेत्याहुः। दृष्ट्वैवेति। यदि दैत्येषु भवत्या उपकारबुद्धिर्नास्ति केवलजगत्सुखार्थमेव तेषां वधः कृतः इति चेत् भवती दृष्ट्वैव दृष्टिक्षेपमात्रेणैव सर्वासुरान् सकलदैत्यान् भस्म भस्मसात् न करोति किं न कुर्यात् किम्। लिङर्थे लट्। यत् यदर्थे अरिषु शत्रुषु दैत्येष्वित्यर्थः। शस्त्रं प्रहिणोति प्रेरयति। तस्मात्। रिपवोऽपि हि। अपि शब्देनोपकारानर्हता दर्शिता। शस्त्रैः रणे शस्त्रकृतवधेनेत्यर्थः। पूता नष्टपापाः सन्तः लोकान् सुकृतिलभ्यान् स्वर्गादीन् प्रयान्तु। उक्तं च। द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ॥ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः॥ इति॥ सूर्य-

लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥१९॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ॥
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥ २० ॥

मण्डलभेदस्तदुपरितनलोकगमनार्थम् । इत्थं तेष्वरिष्वपि ते तव अतिसाध्वी अतिशोभना उपकाररूपेत्यर्थः । मतिर्भवति बुद्धिरस्ति ।

अथ पाठान्तरादि दृष्ट्यैवेत्यत्र दृष्ट्वैवेति, अपितेतीत्यत्र अहितेष्विति, साध्वीतिप्रथमान्तस्थाने सम्बुद्ध्यन्तं च क्वचित् पठ्यते । प्रहिणोपीति मध्यमपुरुषान्तपाठे त्वमित्यध्याहार्यम् ॥ १९ ॥

अथ शत्रुष्वन्यमप्युपकारं दर्शयन्ति । खड्गेति । यत् रणे उग्रैर्द्रष्टृणां दुःसहैः तव खड्गस्य प्रभानिकराणां तेजःसमूहानां विस्फुरणैः समन्तात् प्रसरणैः । तथा शूलाग्रस्य त्रिशूलप्रान्तभागस्य । कान्तिनिवहेन दीप्तिसङ्घातेन । असुराणां दृशो दृष्टयः । विलयं नागता विनाशं न प्राप्ताः । भास्वरतेजोदर्शनेन दृष्ट्युपघातसम्भवेऽपीति भावः । तत् दृग्विलयनम् । तव एतत् अंशुमतः सुधामयूखस्येन्दुखण्डस्य चन्द्रार्धस्य योगः संयोगोऽस्त्यस्य अंशुमदिन्दुखण्डयोगि आननं मुखमण्डलं विलोकयताम् । युक्तमिति शेषः। अमृतकिरणचन्द्रार्धसंयोगिमुखमण्डलविलोकनस्य फलमित्यर्थः । अथवा रणे रणे तव भास्वरतेजांसि विलोकयतामसुराणां दृशः उग्रैः खड्गप्रभानिकरविस्फुरणैस्तथा शूलाग्रकान्तिनिवहेन विलयं नागतास्ततस्तत्र तैर्दृश्यमानमेतत्तवांशुमदिन्दुखण्डयोगि आननं हेतुरिति शेष । यद्वा खड्गप्रभाविस्फुरणादिभिरसुराणां दृशो यद्विलयं नागताः तत् ततः तद्विषये इत्यर्थः । एतत्तवांशुमदि-

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ॥
वीर्यं च हन्तृ हृतदेवपराक्रमाणां।
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२१॥
केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ॥

न्दुखण्डयोगि आननम् कारणं विलोकयताम् । जानातु भवती । लोडन्तः प्रयोगः । चौरैः पश्यन्ति राजान इत्यादौ दृशेरिवात्र विलोकयतेर्ज्ञानार्थे प्रयोगः ॥ २० ॥

त्वया शीलरूपवीर्यैर्दैत्येषु दयैव दर्शितेत्याहुः **दुर्वृत्ते**ति। हे देवि तव शीलं स्वभावः दुर्वृत्तवृत्तशमनं दुर्वृत्तानां दुराचाराणां पापिनामित्यर्थः। वृत्तस्य दुराचारस्य पापस्येत्यर्थः। शमनं सद्बुद्धिदानेन निवर्तकम्। तथा एतत् अस्मत्पुरोवर्ति अन्यैः लौकिकरूपैः अतुल्यं सहस्रभुजाद्युपेतत्वाल्लोकविलक्षणम् रूपं अविचिन्त्यं अद्भुतप्रभावं अन्तकाले दर्शनदानेन सद्गतिप्रदम्। वीर्यं च हृतः प्रतिहतः देवानां पराक्रमो यैस्तेषां दैत्यानां हन्तृ संमुखहननेन स्वर्गापादकम्। इत्थं त्वया शीलरूपवीर्यैर्वैरिषु दैत्येष्वपि दयैव प्रकटितास्ति। अथवा तव शीलरूपवीर्यकारुण्यानि अविचिन्त्यानीत्याहुः। हे देवि तव शीलं दुर्वत्तवृत्तशमनम् पापिनां सद्बुद्धिदानेन पापान्निवर्तकम्। अतः अविचिन्त्यं वर्णयितुमशक्यम्। तथा अन्यैः रूपान्तरैरतुल्यमसदृशम् रूपं स ददर्श ततो देवीमित्यादिना प्रतिपादितमिति भावः। अविचिन्त्यं वीर्यं च हृतदेवपराक्रमाणां देवविजयिनां दैत्यानामपि हन्तृ। अतः अविचिन्त्यम्। इत्थं दयापि वैरिष्वेव प्रकटिता। अतः साप्यविचिन्त्या। शत्रुषु नैष्ठुर्यस्यैव लोके दृष्टत्वादिति भावः ॥ २१ ॥

उक्तमेवार्थं किञ्चिद्भङ्ग्यन्तरेणाहुः | **केने**ति। हे वरदे अस्मदभीष्ट-

चित्ते कृपासमरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२ ॥
त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ॥
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥ २३ ॥

दायिनि देवि । अस्य हृतदेवपराक्रमाणां दैत्यानां हन्तुस्ते पराक्रमस्य केन कस्य पराक्रमेण सहोपमा सादृश्यं भवतु । भवेत् । न केनापीत्यर्थः । तवेव हुंकारादिभिस्तीक्ष्णशस्त्राणां भङ्गस्य अन्येषां पराक्रमेष्वदर्शनात् इति भावः । विधौ लोट् । उपमापदप्रयोगेऽपि केनेति तृतीया सहार्थस्य गम्यमानत्वात् । शत्रूणां अभक्तानां भयकारि भक्तानामस्माकमतिहारि मनोहरं ईदृशं रूपं च कुत्र लभ्येत । न कुत्रापीत्यर्थः । भयकारित्वातिहारित्वयोरेकत्रासम्भवादिति भावः । एवं चित्ते कृपा समरे निष्ठुरता निर्दयता च भुवनत्रयेऽपि त्वय्येव दृष्टा । यथाक्रमं दैत्येभ्यः स्वर्गदानात्तेषां वधाच्चेति भावः । तस्मात्तव शिवे किं किं न लोकोत्तरं ॥ २२ ॥

त्वया एकेन दैत्यवधेन कार्यत्रयं कृतमित्याहुः । **त्रैलोक्यमिति**। त्वयास्माकं रिपूणां दैत्यानां नाशनेन वधेन एतदखिलं त्रैलोक्यं भूर्भवःस्वरात्मकं भुवनत्रयं त्रातं रक्षितम् । त्रैङ्पालने । ते रिपुगणा अपि समरमूर्धनि रणाग्रभागे हत्वा दिवं स्वर्गं नीताः प्रापिताः ॥ उद्रिक्तो मदो येषान्ते उन्मदाः उन्मत्ताः । ते च ते सुरारयो दैत्याश्च उन्मदसुरारयः । तेभ्यो भवतीति उन्मदसुरारिभवम् । असाकं देवानां भयमप्यपास्तं निरस्तम् । एवं एकया दैत्यवधाक्रियया त्रैलोक्यस्य रक्षणम् दैत्यानां स्वर्गप्रापणम् अस्माकं भयहरणं चेति कार्यत्रयं कृतमित्यर्थः । अतस्ते तुभ्यं नमः ॥ प्रत्युपकारासामर्थ्यात्केवलं नमस्कारेण सम्भावयाम इतिभावः ॥२३ ॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥
घण्टास्वनेन नः पाहि चापज्यानिस्वनेन च ॥ २४ ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २५ ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥२६॥

इत उत्तरं सर्वदा सर्वत्र सर्वसाधनैः स्वरक्षणमर्थयन्ते शूलेनेत्यादिना। हे देवि अम्बिके। रक्षणस्य जननीकार्यत्वादम्बिके इति सम्बोधनम्। नः अस्मान् शूलेन स्वत्रिशूलेन पाहि रक्ष। पा रक्षणे अदादिः। खङ्गेन च पाहि। नः घण्टास्वनेन चापज्याया धनुर्मौर्व्या निस्वनेन च पाहि। घण्टास्वनचापज्यानिस्वनाभ्यां रक्षणं भयकारिणां शक्तिनाशनदूरोत्सारणादिना वक्ष्यते च, पूरयामास ककुभो निजघण्टास्वनेन च ॥ समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥ इति ॥ शाकुन्तले च का कथा बाणसन्धाने ज्याशब्देनैव दूरतः ॥ हुंकारेणेव धनुषः स हि विघ्नानपोहति ॥ इत्यादि ॥२४॥

प्राच्यामिति। हे ईश्वरि रक्षणसमर्थे। चण्डिके। आत्मशूलस्य स्वत्रिशूलस्य भ्रामणेन असमत्परितो वलयाकारपरिवर्तनेन प्राच्यां प्रतीच्यां च दिशि नो रक्ष। तथा दक्षिणे दक्षिणदिग्भागे उत्तरस्यां दिशि च रक्ष। चकाराद्विदिक्षु च रक्षेति शेषः। भ्रामणेनेत्यत्र संज्ञापूर्वकविधेरनित्यत्वान्मित्वेऽपि न ह्रस्वः। शूलस्य—उत्तरस्यामित्यत्र संहिताया अविवक्षितत्वान्न गुणसन्धिः ॥ २५ ॥

सौम्यानीति। हे देवि यानि ते सौम्यानि शान्ताकृतीनि सत्वगुणात्मकानि यानि चात्यर्थघोराणि अतिक्रूराकृतीनि रजस्तमोगुणात्मकानि

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥ २७ ॥

ऋषिरुवाच ॥ २८ ॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ॥
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥ २९ ॥

च रूपाणि मूर्तयः अवतारा इतियावत् त्रैलोक्ये विचरन्ति विद्यन्ते इत्यर्थः। यद्वा । विश्वात्मिकायास्तव यानि सौम्यानि चन्द्रसलिलादीनि यानि चात्यर्थघोराणि सूर्याग्न्यादीनि रूपाणि स्वरूपाणि त्रैलोक्ये विद्यन्ते तैरस्मांस्तथा भुवं। उपलक्षणमेतत् भूर्भुवःस्वर्लोकानित्यर्थः रक्ष ।

अथ पाठान्तरादि अत्यर्थेत्यत्रात्यन्तेति पाठोऽपि क्वचिदस्ति ॥२६॥

खड्गेति। हे अम्बिके। यानि ते करा पल्लवा इव करपल्लवाः। उपमितसमासः। तेषां सङ्गः संयोगोऽस्त्येषामिति करपल्लवसङ्गीनि। मत्वर्थीयइनिः । करधृतानीत्यर्थः । खड्गशूलगदादीनि अस्त्राणि सन्ति आदिना अक्षमालादीन्यन्यानि पञ्च दश च। तैरस्मान् सर्वतः सर्वत्र सर्वेभ्यः सकाशाद्वा रक्ष । सार्वविभक्तिकस्तसिः पञ्चम्यास्तसिल् वा ॥ २७ ॥
ऋषिरिति ॥ २८ ॥

कथाशेषमाह एवमित्यादिना। सुरैः एवं पूर्वोक्तप्रकारेण स्तुता तथा दिवि स्वर्गे भवैर्दिव्यैः। तत्रापि नन्दने इन्द्रोद्याने उद्भवो येषां तैर्नन्दनोद्भवैः कुसुमैः तथा गन्धानां चन्दनकस्तूरीकाश्मीरागुर्वादिगन्धद्रव्याणामनुलेपनैरर्चिता पूजिता जगतां धात्री जननी। धात्री जनन्यामलकीवसुमत्युपमातृष्विति मेदिनी ॥ उत्तरश्लोकेन पूर्णान्वयः ॥२९॥

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता ॥
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥३०॥

देव्युवाच ॥ ३१ ॥

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम्॥३२॥

भक्त्येति । समस्तैः सर्वैस्त्रिदशैर्देवैः भक्त्यानुरागेण दिव्यैः सुरभिगन्धिभिर्धूपैः प्रज्वलितधूपधूमैः सुधूपिता आहिताङ्गसौरभ्यसंस्कारा अतएव प्रसादेन प्रसन्नतया सुमुखी उज्वलवदना सती । प्रणतान् नम्रान् समस्तान् सुरान् । वक्ष्यमाणं वचः प्राह । उक्तवती । प्राहेति विभक्तिप्रतिरूपकमव्ययम् ।

अथ पाठान्तगदि' धूपैः सु ',इत्यत्र 'धूपैस्तु' इति पाठः क्वचित् ॥३०॥

देवीति । अत्रानपेक्षितमपि देव्युवाचेति वाक्यमस्ति ॥ ३१ ॥

व्रियतामिति । अर्धश्लोकमन्त्रोऽयम् । हे सर्वे त्रिदशाः यद्युष्माभिरस्मत्तो मत्तः सकाशादभिवाञ्छितं तत् व्रियतां याच्यताम् मत्त इति वक्तव्ये स्वस्य पूज्यत्वाभिमानेन वा अस्मदो द्वयोश्चेति सूत्राद्वा बहुवचनान्तत्वेन प्रयोगः । पञ्चाम्यास्तासिल् ।

अथ पाठान्तरादि यदस्मत्त इत्यत्र यत्तन्मत्त इति क्वाचित् पाठः इत उत्तरं केचिदधिकाः श्लोकाः पठ्यन्ते । ते यथा । ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपूजिता ॥ कर्तव्यमपरं यच्च दुष्करं तन्निवेद्यताम् ॥ तुष्टास्मि स्तोत्रमुख्येन तथैवाराधनेन च ॥ युष्माकं सोपहारेण भक्त्या प्रणतिपूर्वया ॥ महिषोऽयं महावीर्यो निहतश्च मया रणे ॥ जगतामुपकाराय किमन्यदवशिष्यते ॥ करोमि भवतां कार्यं संप्रीत्या दुष्करं महत् ॥ वरं च संप्रयच्छामि

देवा ऊचुः ॥ ३३ ॥

भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ॥
यदयं निहतः शत्रुरस्माकं महिषासुरः ॥३४॥
यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥३५॥
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥३६॥

जगतामुपकारकम् ॥ इति श्रुत्वा प्रहृष्टास्ते कृताञ्जलिपुटा जगुः॥ इति श्रुत्वेत्यन्त्यार्धस्थाने इत्याकर्ण्य वचो देव्याः प्रत्यूचुस्ते दिवौकसः ॥ इति वा पठ्यते ॥ ३२ ॥

देवा इति ॥ ३३ ॥

भगवत्येति । यत् यतः भगवत्या पूज्यतमया त्वया अयमस्माकं शत्रुर्महिषासुरो निहतः । ततोऽस्माकं सर्वं कार्यं कृतम् । इतःपरं किञ्चिन्नावशिष्यते । पूज्ये तत्रभवानत्रभवांश्च भगवानपीति हैमः ॥ ३४ ॥

यदीति अपि च । हे महेश्वरि इष्टदानसमर्थे देवि । यदि त्वया अस्माकं वरो देय एव तर्हि त्वं संस्मृता संस्मृता यदा यदास्माभिः स्मरिष्यसे तदा तदेत्यर्थः । अस्माकं परमापदः महाविपत्तीः हिंसेथाः विनाशयेः । हिंसि हिंसायामिति चौरादिकस्य विभाषिताणिचो णिजभावे रूपम् । तङ्छान्दसः ।

अथ पाठान्तरादि हिंसीथा इति क्वचित्पाठः । तत्पक्षे रौधादिकस्य हिनस्तेर्लिङि रूपम् । आत्मनेपदं पूर्ववत् ॥ ३५ ॥

अथ **यश्चेति** सार्धश्लोकरूपमन्त्रद्वयेन वरान्तरमर्थयन्ते । तत्र प्रथमोऽर्धमन्त्रः उत्तरःश्लोकमन्त्रः । प्रथमश्लोकमन्त्र उत्तरोऽर्धमन्त्र इति

तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम् ॥
वृद्धयेऽस्मत्प्रसन्ना त्वं भवथाः सर्वदाम्बिके ॥३७॥

ऋषिरुवाच ॥ ३८ ॥

भास्कररायाः। तद्विषये यद्वक्तव्यं तन्मन्त्रविभागप्रकरणे उक्तम्। अथ मन्त्रार्थः। हे अमलानने प्रसन्नमुखि यश्च मर्त्यो नरः एभिरस्मदुक्तैः स्तवैः देव्या यया ततमिदमित्यादिभिः स्तुतिवचनैः। त्वां स्तोष्यति स्तविष्यति। तस्येत्युत्तरश्लोकमन्त्रेण पूर्णो भवत्यन्वयः ॥ ३६ ॥

तस्येति। हे अम्बिके जननि। अस्माकं प्रसन्ना अस्मत्प्रसन्ना त्वं तस्य त्वां स्तोतुर्मर्त्यस्य सर्वदा सदा। अथवा सर्वं ददातीति सर्वदेति-त्वमित्यस्य विशेषणम्। वित्तर्द्धिविभवैः धनदारादिसम्पदां वृद्धये भवेथाः। आदौ वित्तर्द्धिविभवान् दत्वा ततस्तैः धनदारादिसम्पदां वृद्धिं कुर्वित्यर्थः। तत्र विद् ज्ञाने इत्यस्माद्भावे क्तप्रत्यये वित्तं ज्ञानं तेन धनस्य गोधनस्य वृद्धिः। विदुषामेव याज्ञवल्क्यादीनां जनकादिभ्यो गोधनप्राप्तेरुपनिषत्सुदर्शनात्। धनं गोधनवित्तयोरिति शाश्वतः। ऋद्धया सर्वसमृध्या दारादीनां वृद्धिः। सर्वसमृद्धस्यैव दारादेः सौलभ्यात्। विभवेन सामर्थ्येन सम्पदो वृद्धिः। समर्थस्यैव सम्पल्लाभदर्शनात्। "अस्ति मे विभवः प्रणिधानेन सर्वं ज्ञातुमित्यादौ सामर्थ्ये विभवशब्दप्रयोगो दृश्यते। वृद्धये इति भवतेः क्लृप्यर्थत्वात् तद्योगे चतुर्थी। आत्मनेपदं छान्दसम्।

अथ पाठान्तरादि इत उत्तरं ऐश्वर्यं विपुलं देहि मानसाह्लादकारकम् ॥ अलमेतर्हि देवेशि त्रैलोक्यहितकाम्यया ॥ पूर्वमेव वरं प्रादास्त्वमस्मद्वचनात्किल ॥ वधायासुरवर्गस्य हिताय च दिवौकसामिति श्लोकद्वयमधिकं क्वचित्पठ्यते ॥ ३७ ॥

ऋषिरिति ॥ ३८ ॥

इति प्रसादिता देवैर्जगतोऽर्थे तथाऽत्मनः ॥
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥ ३९ ॥

इत्येतत् कथितं भूप सम्भूता सा यथा पुरा ॥
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४० ॥

पुनश्च गौरी देहात्सा समुभ्दूता यथाभवत् ॥
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥ ४१ ॥

इतीति । हे नृप राजन् इति पूर्वोक्तप्रकारेण । देवैः जगतस्तथा आत्मनश्चार्थे रक्षणकार्यविषये प्रसादिता प्रसन्नतां नीता भद्रकाली कल्याणकारिणी देवी । अर्गलाव्याख्याने भद्रकालीपदव्युत्पत्तिर्दर्शिता । तथेत्युक्त्वा-ॐमितिदेवोक्तिमङ्गीकृत्य अन्तर्हिता बभूव अदृश्यतां जगाम ॥ ३९ ॥

मध्यमचरितमुपसंहरति । **इतीति** । हे भूप राजन् । इति एवंप्रकारेण जगत्त्रयस्य हितमिच्छत्येवंशीला जगत्त्रयहितैषिणी सा देवी । पुरा कालान्तरे देवानां शरीरेभ्यो यथा सम्भूता उत्पन्ना तथा अध्यायत्रयात्मकमेतन्मध्यमचरितं तुभ्यं कथितम् ॥ ४० ॥

अथोत्तमचरितं प्रस्तौति । **पुनश्चेति** । अत्र पक्षद्वयम् । तत्र कालान्तरे एव गौरीदेहात् समुद्भूता कौशिकी नाम्नी देवी पार्वत्या सह स्नानार्थं गता सती हिमालये स्थित्वा देवकृतस्तवानन्तरं दैत्यानवधीदित्येकः पक्षः । देवकृतस्तवानन्तरमेव सा गौरी देहात्समुद्भूय दैत्यानवधीदित्यपरः तत्र प्रथमपक्षेऽस्य श्लोकस्य व्याख्या यथा । पुनश्च कौशिकीनाम्ना गौरीदेहात्समुद्भूता सा देवी प्रथमचरित्रोक्ता महामाया कालान्तरे देवस्तवानन्तरं यथा येन प्रकारेण दुष्टदैत्यानां धूम्रलोचनचण्डमुण्डादीनां तथा शुम्भनिशुम्भयोर्वधायाभवत् तेषां वधमकरोत् तथा तं प्रकारं शृण्विति शेषः । अथ देवस्तवानन्तरमेव गौर्याः शरीरात्समुद्भूतेतिपक्षे व्याख्या यथा । सा देवी पूर्वचरित्रोक्ता महा-

रक्षणाय च लोकानां देवानामुपकारिणी ॥
तच्छृणुष्व मयाख्यातं यथावत् कथयामि ते ॥४२॥

माया दुष्टदैत्यानां तथा शुम्भनिशुम्भयोर्वधाय पुनश्च गौरीदेहाद्यथा समुद्भूताभवत् तथा शृण्विति ॥ ४१ ॥

रक्षणायेति । देवानामुपकारिणी सा देवी । लोकानां रक्षणाय च यथा अभवत् । येन प्रकारेण लोकानां रक्षणं कृतवतीत्यर्थः । रक्षणायेति क्लृप्यर्थयोगे चतुर्थी । तथा तत् रक्षणकरणं मया आख्यातं आख्यास्यमानमित्यर्थः। श्रवणक्रियाकालापेक्षया आख्यानक्रियाया भूतकालाभिप्रायेण भूते क्तः। शृणुष्व शृणु । तङ् छान्दसः ते तुभ्यं यथावत् आख्यानक्रियाया यथावत् । यथाजातमित्यर्थः। कथयामि । वर्तमानसामीप्ये भविष्यति लट् । श्लोकद्वयस्यैकवाक्यत्वेऽपि मन्त्रभेदाद्वाक्यभेदेन व्याख्यानं कृतम् अथ सम्पूर्णमध्यमचारित्रमन्त्रविभागकारिकाः। मध्यमे चरितेऽध्यायत्रयात्मनि तु मन्त्रकाः ॥ पञ्चपञ्चाशदधिकं शतं वेदाब्धिभूमिताः ॥ (१४४) ॥ श्लोकमन्त्रा उभावर्धमन्त्रौ गद्यात्मका नव ॥ द्विचत्वारिंशदधिकं शतं श्लोकाः प्रकीर्तिताः ॥ ४२ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमहात्म्ये
शक्रादिकृतस्तुतिर्नाम चतुर्थोऽध्यायः ॥ ४॥

इति मध्यमचरितम् ॥

इतीति । शक्रादिभिरिन्द्रादिदेवैः कृता स्तुतिर्यस्मिन् स शक्रादिकृतस्तुतिः । अध्यायनामैतत् । अष्टत्रिंशदक्षरात्मकमेतच्चतुर्थाध्यायसमाप्तिवाक्यम् ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
चतुर्थाध्यायव्याख्या ॥ ४ ॥

इति मध्यमचरितव्याख्या

॥ अथ पञ्चमाध्यायः ॥

अथोत्तमचरितम् ॥

ऋषिरुवाच ॥ १ ॥

ऋषिरिति । अथादौ पञ्चमाध्यायविभागकारिकाः ॥ पञ्चमेऽथोऋषिरुवाचेतिगद्यात्मको मनुः ॥ पुरा शुम्भनिशुम्भाद्याः श्लोकमन्त्राश्च षण्मताः ॥ देवा ऊचुरिति ह्येष एको गद्यात्मको मनुः ॥ नमो देव्यै महेत्याद्याः पञ्च स्युः श्लोकमन्त्रकाः ॥ ततश्च विष्णुमायादिभ्रान्त्यन्तपदगर्भया ॥ श्लोकानामेकविंशत्या त्रिषष्टिर्मनवो मताः ॥ विंशत्यक्षरआद्यः स्यात् द्वितीयश्चतुरक्षरः ॥ तृतीयोऽष्टाक्षरश्चेति प्राचीनानां मते स्थिता ॥ नवीनानां मते त्वत्र चतुर्विंशतिवर्णकाः ॥ गायत्री छन्दसोपेताः प्रतिश्लोकं त्रयस्त्रयः ॥ या देवीत्यर्धमुच्चार्य नमस्तस्मै नमो नमः ॥ इति त्रिचरणात्मानास्त्रिषष्टिर्मनवो मताः ॥ विष्णुमाया चेतना च बुद्धिर्निद्रा क्षुधा तथा ॥ छाया शक्तिश्च तृष्णा च क्षान्तिर्जातिस्ततः परम् ॥ लज्जा शान्तिस्तथा श्रद्धा कान्तिर्लक्ष्मीरतः परम् । वृत्तिः स्मृतिर्दया तुष्टिर्माता भ्रान्तिरिति स्मृताः ॥ एकविंशतिपद्यानामृषिभिर्लिङ्गदेवताः ॥ इन्द्रियाणामितिश्लोकमन्त्र एकस्तदुत्तरः ॥ चितिरूपेणेतिपद्यं प्राग्वन्मन्त्रत्रयात्मकम् ॥ स्तुता सुरैस्तथा या साम्प्रतं द्वौ श्लोकमन्त्रकौ ॥ ततस्त्वृषिरुवाचेति मन्त्रो गद्यात्मको मतः ॥ एवं स्तवादयः श्लोकमन्त्राः सप्तदश स्मृताः ॥ अथो ऋषिरुवाचेति गद्यात्मैको मनुर्मतः ॥ निशम्येत्यादयःश्लोकमन्त्रास्त्रय उदीरिताः ॥ अथ दूत उवाचेति मन्त्रो गद्यात्मको मतः ॥ देवि दैत्येश्वरेत्याद्याः श्लोकमन्त्रा नव स्मृताः ॥ अथो ऋषिरुवाचेति गद्यात्मैको मनुस्स्मृतः ॥ इत्युक्त्वा सेति च प्रोक्त एक-

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥२॥

श्लोकात्मको मनुः ॥ देव्युवाचेति मन्त्रश्च गद्यात्मैकः समीरितः ॥ सत्यमुक्तादयः श्लोकमन्त्राश्चत्वार ईरिताः ॥ ततो दूत उवाचेति मतो गद्यात्मको मनुः॥ अथावलिप्तासीत्याद्याश्चत्वारः श्लोकमन्त्रकाः ॥ देव्युवाचेति च ततो गद्यात्मा मनुरेककः ॥ एवमेतद्बली स त्वं गच्छेति श्लोकमन्त्रकौ ॥ एकोनत्रिंशदधिकं शतं मन्त्रास्तु पञ्चमे श्लोकमन्त्रास्तत्र चतुःपञ्चाशत् संख्यया मिताः ॥ नमस्तस्यै वचोक्ताःपट्षष्टिर्गद्यात्मका नव॥ श्लोकास्तु सर्वेऽत्राध्याये षट्सप्ततिमिता मताः ॥ इति ॥ अथ मन्त्रव्याख्या ऋषिरुवाचेति ॥

अथ पाठान्तरादि इत उत्तरं केचिदधिकाः श्लोका दृश्यन्ते ते यथा ॥ कश्यपस्य दनुर्नाम भार्यासीद्द्विजसत्तम ॥ तस्याः पुत्रत्रयं जज्ञे सहस्राक्षबलाधिकम् ॥ ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः ॥ तृतीयो नमुचिर्नाम महाबलपराक्रमः ॥ तत्र शुम्भनिशुम्भौ तु पराजेतुं दिवौकसः ॥ अप्राप्तयौवनावेव चेरतुस्तप उत्तमम् ॥ वर्षाणामयुतं दिव्यं देवविस्मापनं महत् ॥ निराहारौ यतात्मानौ पुष्करे लोकपावने ॥ ततः प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥ मनोऽभिलषितान् कामांस्तयोः प्रादादनुत्तमान् ॥ अवध्यत्वं सुरैः सिद्धैर्गन्धर्वैः किन्नरैर्नरैः ॥ एवं धातुर्वरं लब्ध्वा तावुभौ पुनरूचतुः ॥ आवयोस्तु वधः कैश्चित् पुम्भिर्न भवतु प्रभो ॥ अयोनिजा तु या कन्या स्त्र्यङ्गकोशसमुद्भवा ॥ अजातपुंस्पर्शरुचिराविलङ्घ्यपराक्रमा ॥ तयास्तु नौ वधः संख्ये तस्यां कामाभिभूतयोः ॥ इति चाभ्यर्दितो ब्रह्मा ताभ्यां प्राह तथास्त्विति ॥ एवं लब्ध्वा वरं स्रष्टुः पीडयामासतुः सुरान् ॥ इति ।एतदग्रे ततः शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेरित्यादि ॥ १ ॥

अथ शुद्धसत्त्वगुणात्मकं भगवत्याः महामायायाः कौशिक्याख्यं

तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ॥
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३ ॥

महासरस्वत्यवतारं कथयितुं कथां प्रस्तौति । **पुरेति** । पुरा पूर्वकाले शुम्भति हिनस्तीति शुम्भः । शुम्भ हिंसायाम् । भ्वादिः। एवं निशुम्भः। ताभ्यां शुम्भनिशुम्भाभ्यां तदाख्याभ्यामसुराभ्यां मदबलाश्रयात् । मद औद्धत्यम् । बलं शरीरसामर्थ्यम् । तयोराश्रयाद्धेतोः शचीपतेरिन्द्रस्येन्द्राद्वा । त्रैलोक्यं लोकत्रयाधिपत्यमित्यर्थः । इन्द्रो यातोऽवसितस्य राजेति **श्रुतेः** । यातश्चरस्यावसितस्य स्थिरस्येत्यर्थः । यज्ञभागा यज्ञेषु यष्टृभिर्दत्ता हव्यभागाश्च हृता आत्मसात्कृताः ॥

अथ पाठान्तरादि पूर्वोक्ताधिकश्लोकवति पुस्तके पुरेत्यत्र तत इति पाठः । शुम्भशब्दो दन्त्यादिरिति **भास्करराया:** । तच्चिन्त्यम् । मार्कण्डेयपुराणवामनपुराणदेवीभागवतादिषु पुराणेषु सर्वतन्त्रेषु सर्वसप्तशतीपुस्तकेषु च तालव्यादित्वेनैव पाठदर्शनात् । यत्तु **दक्षिणामूर्तिसंहितायां** ज्वालामालिनीनित्याप्रकरणे जाग्रती तपिनी वेदगर्भा दहनरूपिणी ॥ सेन्दुखण्डा सुम्भहन्त्री नभश्चारिण्यवन्तरम् ॥ इत्यादिनोक्तासु आवरणदेवतासु षष्ठदेवतानाम्नि शुम्भशब्दस्य दन्त्यादित्वं दृश्यते तत्तेषां नाम्नां जातवेदसे इत्यृग्गतैकैकाक्षरारब्धत्वादृचःषष्ठाक्षरस्य च दन्त्यत्वात्, शसयोःखषयोश्चैव यजयो बवयोस्तथा ॥ रलयोर्डलयोश्चैव न भेदः शषयोस्तथा ॥ इति वचनाद्दन्त्यतालव्ययोरभेदाभिप्रायेणेति ज्ञेयम् । अन्य एववा कश्चित्सुम्भनामा दैत्यःस्याद्यद्वधेन देव्याः सुम्भहन्त्रीति नाम जातम् ॥ अत्र पूर्वोत्तरार्धयोर्मन्त्रे अभूद्युद्धं महाघोरं महिषस्य यथा पुरा ॥ निर्जित्य सकलान् देवान् पदं प्राप्य दिवौकसाम् ॥ इत्येकोऽधिकः श्लोकः क्वचित् पठ्यते ॥ २ ॥

ताविति । तौ शुम्भानिशुम्भौ स्वयमेव सूर्यतां सूर्यस्य भावं तस्य

तावेव पवनर्धिं च चक्रतुर्वह्निकर्म च ॥
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥४॥
हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ॥
महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ॥५॥

प्रतापात्मकं कर्मेत्यर्थः । तद्वत् ऐन्दवमधिकारमिन्दोश्चन्द्रस्यौषधिवनस्पत्याद्याप्यायनादि कर्म । तथा कौबेरमधिकारं कुबेरस्य निधिपालनादि कर्म । अथ याम्यमधिकारं यमस्य जीवानां पापपुण्यानुसारेण निग्रहानुग्रहादि कर्म यमाच्चेति ण्यः । वरुणस्याधिकारं जलरक्षणादि कर्म च चक्राते अनुष्ठितवन्तौ ॥ ३ ॥

तावेवेति । तौ शुम्भनिशुम्भावेव पवनर्द्धिं वायोर्जगज्जीवनाद्यात्मकमैश्वर्यं च । वह्निकर्म अग्नेदाहादिकर्म च चक्रतुः । ब्रह्मणो वरदानात्सर्वं सम्भाव्यमिति नात्र कश्चित् शङ्कावकाशः । मनुना सूर्यादीनां कर्माण्युक्तानि तानि विस्तृतत्वान्नात्रोच्यन्ते । ततः पराजिता अतएव भ्रष्टानि गतानि राज्यानि स्वस्वलोकाधिपत्यानि येषां ते एवंभूता देवास्ताभ्यां विनिर्धूताःस्वस्वलोकान्निरस्ता आसन् ।

अथ पाठान्तरादि अत्र पूर्वार्धोत्तरं तेषु तेष्वधिकारेषु लोकेषु च महीपते ॥ स्वानेव प्रथितान् दैत्यान् तत्र तत्र न्ययोजयत् ॥ ततो देवाः सहेन्द्रेण बिभ्राणा मानुषी तनुम् ॥ विचेरुश्च बले राजन् कृशा धमनिसन्तताः ॥ एवं तु वसतां तेषां गतमासीच्चतुर्युगम् ॥ इत्यधिकाः श्लोकाः क्वचित् पठ्यन्ते । अनन्तरं ततो देवा विनिर्धूता इति ॥ ४ ॥

हृतेति । ताभ्यां महासुराभ्यां शुम्भनिशुम्भाभ्यां हृता आत्मसात्कृता अधिकारा येषां ते हृताधिकारास्ततः निराकृताः स्वर्गान्निरस्ताश्च सर्वे त्रिदशा देवाः अपराजितां दैत्यजयिनीमित्यर्थः ॥ तां वक्ष्यमाणवरदात्रीं देवीं संस्मरन्ति स्मृतवन्तः । लट् छान्दसः ॥ ५ ॥

तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥
भवतां नाशयिष्यामि तत्क्षणात् परमापदः ॥ ६ ॥
इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ॥

स्मरणप्रकारमाहुः । **तयेति** । तया महिषासुरहन्त्र्या देव्या । अस्माकं अस्मभ्यं वरो दत्तः प्रतिश्रुतः । वरस्वरूपमाहुः यथेति । भवद्भिरहमापत्सु सङ्कटेषु स्मृता सती । तत्क्षणात् तं क्षणमपरित्यज्य । स्मरणक्षणएवेत्यर्थः । ल्यब्लोपे पञ्चमी । भवतां देवानां अखिलाः सर्वाः । परमापदः महाविपत्तीः । नाशयिष्यामीति ॥ तस्मादेवंविधवरदायिनी सैवाधुना स्मर्तव्येति भावः । यद्यपि पूर्वाध्याये यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥ संस्मृता संस्मृता त्वन्नो हिंसेथाः परमापदः ॥ इत्येवंरूपो देवैरेव वरो याचितस्तथापि तदा देव्या तथेति प्रतिश्रुतत्वात् स्वकृतवरयाचनावाक्यं देवीदत्तवरवाक्यरूपत्वेन विपरिणमितम् ॥ ६ ॥

इतीति । इति एवंरूपां मतिं बुद्धिं विचारं कृत्वा हिमवन्तं तन्नामानं नगेश्वरं पर्वतराजं तत्रापि शिवावसथसमीपं जग्मुः शिवपार्वत्योस्तदा तत्रावस्थानात् ॥ तदुक्तं **नवशत्याम्** । तदा निवासमकरोत्पार्वत्या सहितः शिवः ॥ प्रमथादिगणैर्युक्तो हिमवच्छिखरे शुभे ॥ यथा कैलासभवने स्वकीये विमलार्चिषि ॥ इति ॥ ततः तत्र हिमवति विष्णुमायां महादेवीं प्रतुष्टुवुः । स्तुतवन्तः ॥ विष्णुमायालक्षणमुक्तं **कालिकापुराणे** । अव्यक्तं व्यक्तरूपेण रजःसत्वतमोगुणैः ॥ विभज्य यार्थं कुरुते विष्णुमायेति सोच्यते ॥ इति ॥ इयं शिवशक्तिर्विष्णुशक्तिर्वा । तत्र शिवशक्तित्वे व्युत्पत्तिर्यथा । वेवेष्टि व्याप्नोति चराचरमिति विष्णुः अष्टमूर्तिः परमेश्वरः । तस्य माया प्रियाशक्तिः उक्तं च **कूर्मपुराणे महेश्वरेण** ॥ इयं सा परमा शक्तिर्मन्मयी ब्रह्मरूपिणी ॥ माया मम प्रियानन्ता ययेदं मोहितं जगदिति । विष्णुशक्तित्वे

जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥७॥

देवा ऊचुः ॥ ८ ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ९ ॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥

तु नाम्नैव स्पष्टम् । अतएवोक्तं भगवता श्रीकृष्णेन । दैवी ह्येषा गुणमयी मम माया दुरत्ययेति ॥ तथाप्यत्र वक्ष्यमाणकथानुरोधाच्छिवशक्तिरेव ग्राह्या । वस्तुतस्तु शिवविष्ण्वोरिव तच्छक्त्योरप्यभेद एव ॥ ७ ॥

देवा इति । ऊचुस्तुष्टुवुः । अयमत्रानपेक्षितोऽपि मन्त्रस्तन्त्रेऽस्त्येव ॥ ८ ॥

नम इति । देव्यथर्वशीर्षस्थोऽयं मन्त्रः । देव्यै इन्द्रादिदेवशक्तये महादेव्यै महादेवानां ब्रह्मविष्णुशिवानां शक्तये च नमः । शिवायै मङ्गलस्वरूपायै सततं सर्वदा नमः । भद्रायै सुखकारिण्यै प्रकृत्यै मूलप्रकृतये नमः तां पूर्वोक्तविशेषणविशिष्टां देवीं नियता नियमवन्तः सदेत्यर्थः । प्रणतानम्राः स्मः भवामः । वयमिति शेषः । विसर्गलोपश्छान्दसः । स्मेत्यव्ययं वा ॥

अथ पाठान्तरादि अन्त्यपादे नियत्यै प्रणतात्मनामिति पाठः क्वचित् ॥ ९ ॥

रौद्रायै इति । रौद्रायै अत्युग्ररूपायै नमः । नित्यायै उत्पत्तिविनाशशून्यायै । गौर्यै श्वेतपीतारुणान्यतमवर्णायै । गौरोऽरुणे सिते पीते इत्यमरः । गौरादित्वान् ङीप् । धात्र्यै पोषिकायै पृथ्वीरूपायै वा नमो नमः । द्विरुक्तिरादरार्था । एवमग्रेपि सर्वत्र ज्ञेयम् । ज्योत्स्नायै चन्द्रिकारूपायै । इन्दुरुपिण्यै

ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥ १० ॥
कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ११ ॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥

चन्द्ररूपायै च । अतएव सुखायै आह्लादकारिण्यै सततं नमः ॥

अथ पाठान्तरादि चेन्दुरुपिण्यै इत्यत्र चन्द्ररूपायै इति क्वचित् पाठः ॥ १० ॥

कल्याण्यै इति । कल्याण्यै जगत्कल्याणकारिण्यै । प्रणताः वयमिति शेषः । क्रियया यमभिप्रैतीति सम्प्रदानत्वाच्चतुर्थी वृद्ध्यै उपचयरूपायै सिद्ध्यै कर्मफलरूपायै अणिमाद्यष्टसिद्धिरूपायै वा । कूर्म्यै कूर्मरूपस्य विष्णोः शक्त्यै । अथवा कौ पृथिव्यां ऊर्मिः प्राकाश्यं यस्यास्तस्यै । नानारूपैः पृथिव्यामवतीर्णायै इत्यर्थः । गोत्रा कुः पृथिवीत्य**मरः** । ऊर्मिः पीडा जनोत्कण्ठा भङ्गप्राकाश्यवीचिष्विति **हैमः** । नमो नमःइति पूर्ववत् । नैर्ऋत्यै नैर्ऋतशक्त्यै । अथवा स्यादलक्ष्मीस्तु निर्ऋतिः सैव नैर्ऋती तस्यै अलक्ष्मीरूपायैत्यर्थः । भूभृतां राज्ञां लक्ष्म्यै सम्पद्रूपायै । पर्वतानां शोभायै वा । शर्वाण्यै शर्वस्य शिवस्य पत्न्यै ते । नमो नमः पुंयोगे ङीष् आनुगागमश्च । शर्वपदार्थो लिङ्गपुराणे । चराचराणां भूतानां धाता विश्वम्भरात्मकः ॥ शर्व इत्युच्यते देवः सर्वशास्त्रार्थकोविदैः ॥ इति ॥

अथ पाठान्तरादि प्रणता वृद्ध्यै इत्यत्र प्रणतार्तिघ्न्यै इति क्वचित् पाठः । प्रणतां ऋद्ध्यै इति पाठस्तु प्रामादिकः ॥ कूर्म्यै इत्यत्र कुर्म इति च क्वचित् पाठः तदा नमो नमः कुर्म इत्यन्वय ॥ ११ ॥

दुर्गायै इति । दुःखेन गच्छति मनसा प्रविशति जनोऽस्यामिति दुर्गा । सुदुरोरधिकरणे इति गमेर्डट् । गत्यर्थानां ज्ञानार्थत्वात् दुर्ज्ञेयेति

ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १२ ॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ १३ ॥

तदर्थः, तस्यै ॥ दुर्गः दुर्ज्ञेयः पारः प्रान्तो यस्याः सा दुर्गपारा । अनन्तेत्यर्थः, तस्यै । अन्येभ्योऽपि दृश्यते इति गमेर्डः । पारः प्रान्ते परतटे इति हैमः । अथवा दुर्गे सङ्कटे पारयति पालयतीति दुर्गपारा । तस्यै । पॄपालनपूरणयोः । सारायै सर्वश्रेष्ठायै । श्रेष्ठवाची सारशब्दो विशेष्यनिघ्नः । सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिष्वित्यमरः ॥ सर्वं जगतः सृष्टिस्थितिलयादिकं करोति तच्छीला सर्वकारिणी तस्यै सर्वकारिण्यै । ताच्छील्ये णिनिः । ख्यात्यै प्रथास्वरूपायै । मीमांसाप्रसिद्धख्यातिपञ्चकस्वरूपायै वा । तथैव कृष्णायै कृष्णवर्णायै । धूम्रायै धूम्रवर्णायै सततं नमः । अत्र द्वितीयपादो वक्त्रवृत्तस्य । तेन विषमवक्त्रं छन्दः । अनुष्टुभः समपादद्वये सप्तमाक्षरस्य गुरुत्वे अर्धवक्त्रसंज्ञा एकस्मिन् समपादे तथात्वे विषमवक्त्रमिति ॥

अथ पाठान्तरादि सर्वकारिण्यै इत्यत्र सर्वकारिणि इति सम्बुद्ध्यन्तं क्वचित् पठ्यते ॥ १२ ॥

अतीति । अतिशयेन सौम्या सुन्दरी शान्ता वा अतिसौम्या । अतिशयेन रौद्रा उग्रा अतिरौद्रा अतिसौम्या चासौ अतिरौद्रा च अतिसौम्यातिरौद्रा यथाक्रमं भक्तानां शत्रूणां चेति भावः । तस्यै । नताः प्रह्वीभूताः । वयमिति शेषः । णम् प्रह्वत्वे । तस्यै पूर्वोक्तायै अतिसौम्यातिरौद्रायै इत्यर्थः । नमो नमः । जगतां प्रतिष्ठा स्थितिहेतुः जगत्प्रतिष्ठा । धर्मरूपेत्यर्थः । धर्मो विश्वस्य जगतः प्रतिष्ठेति श्रुतेः । तस्यै नमः । देव्यै द्युतिमत्यै । कृत्यै क्रियारूपायै नमो नमः

अथ पाठान्तरादि कृत्यै इत्यत्र भूत्यै इति क्वचित् पाठः ॥ १३ ॥

या देवी सर्वभूतेषु विष्णुमायेतिशब्दिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४।१५।१६॥

या देवीति । इत आरभ्य भ्रान्तिरूपेण संस्थितेत्यन्तानामेकविंशतिश्लोकानां चितिरूपेणेत्येकस्य चेति द्वाविंशतेरवतारभेदात्प्रतिश्लोकं क्रमेण महाकालीमहालक्ष्मीमहासरस्वतीदेवताकास्त्रयस्त्रयो मन्त्रा भवन्ति । तत्प्रकारो यथा । आदौ पूर्वार्धस्य पाठः । ततो नमस्तस्यै नमो नमः । इत्यष्टाक्षर्याः । इत्येको मन्त्रः । पुनरेवमेव द्वयम् । एवं प्रतिश्लोकं त्रयस्त्रयो गायत्रीच्छन्दस्काश्चतुर्विंशत्यक्षरा मन्त्राः । एतन्नवीनानां मतम् । प्रथमो विंशत्यक्षरः द्वितीयश्चतुरक्षरः तृतीयोऽष्टाक्षर इति प्रतिश्लोकं त्रयस्त्रय इति प्राचीनानां मतम् । अथ मन्त्रव्याख्या । या देवी चिच्छक्तिः सर्वभूतेषु सर्वप्राणिषु । युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिष्वित्यमरः । विष्णुमायेति शब्दिता विष्णुमायाशब्देनोक्ता । विष्णुमायारूपेण संस्थितेत्यर्थः ॥ विष्णुमायापदं पूर्वं व्याख्यातम् । तस्यै महाकाल्यै नमो नमो नमः । नमस्कारत्रयमस्त्वित्यर्थः । इति प्रथममन्त्रार्थः । अथ द्वितीयस्य । पूर्वार्धार्थः प्राग्वत् । अष्टाक्षर्याः तस्यै महालक्ष्म्यै नमस्कारत्रयमास्त्विति ॥ अथ तृतीयस्य । पूर्वार्धार्थः प्राग्वत् । अष्टाक्षर्याः तस्यै महासरस्वत्यै नमस्कारत्रयमस्त्विति ॥ एवमग्रेऽपि ज्ञेयम् ॥ अत्र मन्त्रत्रयेऽपि परिपूर्णानि वाक्यानि भवन्ति । अथ मतान्तरे तु महाकालीदेवताके विंशत्यक्षरे प्रथममन्त्रे पूर्वार्धस्य मुखतः पठ्यमानत्वात् पूर्ववदेव न काप्यनुपपत्तिः । महालक्ष्मीमहासरस्वतीदेवताकयोरवान्तरवाक्यरूपयोर्द्वितीयतृतीयमन्त्रयोरपूर्णवाक्यत्वात्पूर्वार्धार्थं मनसानुकृष्य वाक्यार्थपूर्तिर्विधेया । दृश्येते ह्यवान्तरवाक्यस्थले वाक्यार्थपरिपूर्तये पूर्वापरमन्त्रतस्तदर्थानुकर्षापकर्षौ । यथा प्रथमाध्याये यैर्निरस्तो भवांल्लुब्धैः तेषु किं भवतः इत्यवान्तरवाक्यरूपयोरर्धमन्त्रयोः प्रथममन्त्रे उत्तरमन्त्रतस्तदर्थस्यापकर्षः । द्वितीये पूर्वमन्त्रतस्तदर्थस्यानुकर्षः ॥ एवमन्यत्रापि । उक्तं चैतद्विस्तरेण **मन्त्रविभागप्रकरणे** ॥१४।१५।१६॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥१७।१८।१९॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०।२१।२२॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तयै नमो नमः ॥२३।२४।२५॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६।२७।२८॥
या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२९।३०।३१॥

येति । चेतना इत्यभिधीयते उच्यते । चैतन्यरूपेण वर्तते इत्यर्थः । अन्यत्प्राग्वत् ॥ १७।१८।१९ ॥

येति ॥ बुद्धिः निश्चयात्मिका अन्तःकरणवृत्तिः । तद्रूपेण संस्थिता ॥ २०।२१।२२ ॥

येति । निद्यते जनोऽनया हेतुभूतयेति निद्रा। णिदि कुत्सायां निन्दोर्नलोपश्चेति रक्प्रत्ययो नलोपश्च । अदन्ताट्टाप् । द्रा कुत्सायामित्यस्य वा निपूर्वस्य आतश्चेत्यङि निद्रेति रूपम् ॥ २३।२४।२५ ॥

क्षुधा बुभुक्षा । क्षुध् बुभुक्षायामित्यस्मात्सम्पदादित्वात्क्विपि ततो भागुरिमतेन टापि क्षुधेतिरूपम् ॥ २६।२७।२८ ॥

छाया कान्तिः प्रतिबिम्बमनातपो वा । छो छेदने । दिवादिः । माच्छासासिभ्यो य इति यः । टाप्। छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः इत्यमरः ॥ २९।३०।३१ ॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३२।३३।३४॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥३५।३६।३७॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३८।३९।४०॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ४१।४२।४३॥

शक्तिः सामर्थ्यं उत्साहादित्रयं अस्मात्पदादयमर्थो बोध्य इतीश्वरसङ्केतो वा । उक्तं च **लिङ्गपुराणे** । यस्य यस्य पदार्थस्य या या शक्तिरुदाहृता ॥ सा सा विश्वेश्वरी देवी इति ॥ **देवीपुराणेऽपि** पदार्थशक्तयो या यास्तास्ता गौरीं विदुर्बुधाः ॥ इति ॥ शक्लृ शक्तौ भावे स्त्रियां क्तिन् ॥ ३२।३३।३४ ॥

तृष्णा स्पृहा पिपासा वा । तृष्णे स्पृहापिपासे द्वे । **इत्यमरः** ॥ ञि तृष् पिपासायाम् । इत्यस्मात् तृषिशुषिरसिभ्य इति नः ॥३५।३६।३७॥

क्षान्तिः क्षमा । सति प्रतीकारसामर्थ्येऽपकारसहनम् । क्षमू सहने दिवादिः स्त्रियां क्तिन् । अनुनासिकस्येत्युपधादीर्घः । अपितः क्षाम्यतेः क्षान्तिः क्षमूपः क्षमतेः क्षमा ॥ ३८।३९।४० ॥

जातिः सामान्यं गोत्वादि । जन्म वा ॥ जातिः सामान्यजन्मनो**रित्यमरः** ॥ जनी प्रादुर्भावे । स्त्रियां क्तिन् । ज्ञाजनोर्जेति जादेशः ॥ ४१।४२।४३ ॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४४।४५।४६॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४७।४८।४९॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५०।५१।५२॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५३।५४।५५॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥

लज्जा व्रीडा अकार्यकरणे मनःसङ्कोचः । ओ लस्जी व्रीडायाम् । गुरो श्च हल इत्यप्प्रत्ययः । सकारस्य श्चुत्वेन शः । तस्य जस्त्वेन जः । टाप् ॥ ४४।४५।४६ ॥

शान्तिः विषयेभ्यो मनस उपरमः समाधानं वा । शमु उपशमे । भावे स्त्रियां क्तिन् । उपधादीर्घः ॥ ४७।४८।४९ ॥

श्रद्धा देवतागुरुवचनशास्त्रादिषु विश्वासः । विश्वासार्थकश्रदव्ययपूर्वकाद्धधातेरातश्चोपसर्गे इति कप्रत्यये श्रद्धा स्त्रियां टाप् । श्रदन्तरोरुपसर्गवद्वृत्तिरिति वार्तिकात् श्रदव्ययस्योपसर्गत्वम् ॥ ५०।५१।५२ ॥

कान्तिः शोभा इच्छा वा कान्तिः शोभेच्छयोः स्मृतेति शाश्वतः ॥ कमु कान्तावित्यस्मात् स्त्रियां क्तिन् । उपधादीर्घः ॥ ५३।५४।५५ ॥

लक्ष्मीः शोभा सम्पद्वा । शोभासम्पत्तिपद्मासु लक्ष्मीरिति शाश्वतः लक्षयति अङ्कते सुन्दरं वस्त्विवति लक्ष्मीः शोभा । लक्षयति पश्यति

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५६।५७।५८॥
या देवी सर्वभूतेपु वृत्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५९।६०।६१॥
या देवी सर्वभूतेपु स्मृतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६२।६३।६४॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६५।६६।६७॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६८।६९।७०॥

नीतिज्ञमिति लक्ष्मीः सम्पत् । लक्ष दर्शनाङ्कनयोः । लक्षेर्मुट्चेत्यौणादिक-ईप्रत्ययः ॥ ५६।५७।१८ ॥

वृत्तिर्जीविका मनोऽव्यापारो वा । वृतु वर्तने । स्त्रियां क्तिन् ।

अथ पाठान्तरादि इत उत्तरं धृतिः कीर्तिश्चेति द्वयं क्वचित् पठ्यते ॥ ५९।६०।६१ ॥

स्मृतिरनुभूतस्यार्थस्य कालान्तरे ज्ञानम् । स्मृ चिन्तायाम् । स्त्रियां क्तिन् । **वायपुराणे** । वर्तमानान्यतीतानि तथैवानागतान्यपि ॥ स्मरते सर्वकार्याणि तेनासौ स्मृतिरुच्यते ॥ इत्युक्तम् ॥ ६२।६३।६४ ॥

दया परदुःखपरिहारेच्छा । दय् रक्षणे । पिद्भिदादिभ्योऽङ् । अदन्तत्वात्स्त्रियां टाप् ॥६५।६६।६७॥

तुष्टिः प्रीतिः प्राप्ताधिकानभिलाषो वा । तुष् प्रीतौ । स्त्रियां क्तिन् ॥
अथ पाठान्तरादि इत उत्तरं क्वचित्पुष्टिर्नीतिश्च पठ्यते ॥ ६८।६९।७० ॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७१।७२।७३॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७४।७५।७६॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥

माता मातृकाक्षररूपा । तदुक्तं **स्कान्दे** मन्त्राणां जननीरूपा मातृका परमेश्वरी ॥ इति ॥ सर्वभूतानां जननी वा । यतो वा इमानि भूतानि जायन्त इति **श्रुतेः** ॥ ७१।७२।७३ ॥

भ्रान्तिर्मिथ्याज्ञानम् । अतस्मिंस्तद्बुद्धिरित्यर्थः । भ्रमु अनवस्थाने । दिवादिः । स्त्रियां क्तिन् । उपधादीर्घः ।

अथ पाठान्तरादि इत उत्तरं प्रज्ञा मेधा श्रुतिः स्फूर्तिरिति चतुष्टयमधिकं क्वचित् पठ्यते ॥ ७४।७५।७६ ॥

इन्द्रियाणामिति । एकमन्त्रात्मकोऽयं श्लोको न तु मन्त्रत्रयात्मकः । या श्रोत्रादिज्ञानेन्द्रियपञ्चकस्य तथा वागादिकर्मेन्द्रियपञ्चकस्योभयात्मकस्य मनसश्चेत्येकादशेन्द्रियाणां तथा आकाशादिपञ्चमहाभूतानां च अधिष्ठात्री तत्तद्देवतारूपेण नियन्त्र्यस्ति । तथा या सततं अखिलेषु भूतेषु प्राणिषु अन्तर्यामितयास्तीति शेषः । युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिष्वित्य**मरः** । तस्यै व्याप्त्यै व्यापिकायै देव्यै नमो नमः ॥ गुणिन्या गुणत्वेन निर्देशोऽभेदोपचारात् । अथ प्रसङ्गादिन्द्रियाणां महाभूतानां चाधिष्ठात्र्यो देवता उच्यन्ते । दिशः श्रोत्रस्य वातस्तु त्वचः सूर्यस्तु चक्षुषः ॥ वरुणो रसनस्य स्यादश्विनौ घ्राणदेवते ॥ मनसः चन्द्रमा वाचोऽग्निरुपस्थस्य वासवः ॥ पायोरुपेन्द्रः करयोर्मित्रो ब्रह्मा च पादयोः ॥ इतीन्द्रियाणाम् ॥

भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ ७७ ॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७८।७९।८०॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ॥

अथ महाभूतानाम् । ब्रह्मा भूमेरपां विष्णुस्तेजसो रुद्र एव च ॥ मरुतो देवतेशानो नभसश्च सदाशिवः ॥ इति ॥ तत्र रुद्रो ब्रह्मादित्रयान्तर्गतस्तमोगुणः संहाराधिकारी ईशानः एतेषां नियन्ता त्रिगुणः परमेश्वरः । सदाशिवः शुद्धचिद्रूपो निर्गुण इति ॥ ७७ ॥

चितिरूपेणेति अयं श्लोकोऽपि मन्त्रत्रयात्मकः या महाकाली चितिरूपेण ज्ञप्तिरूपेण एतत् परिदृश्यमानं कृत्स्नं जगत् व्याप्य स्थितास्ति । तस्यै नमो नमो नमः । एवं महालक्ष्मीमहासरस्वत्योरपि योज्यम् ॥ चितिरित्येतत् चिती संज्ञाने इत्यस्मादौणादिके इक्प्रत्यये रूपम् ॥ न चिञ् चयने इत्यस्य क्तिन्नन्तम् ॥

अथ पाठान्तरादि चिति पदस्थाने चित्तीति तकारद्वयात्मकपाठः क्वचित् । तत्पक्षे चिती संज्ञायामित्यस्मात् स्त्रियां क्तिन् । अर्थः प्राग्वत् ॥ ७८।७९।८० ॥

स्तुतेति या पूर्वं महिषासुरवधानन्तरकाले सुरैरस्माभिः । तथा सुरेन्द्रेण च । अभीष्टस्य महिषासुरवधरूपस्य संश्रयाल्लाभाद्धेतोः स्तुता । दिनेषु दिने दिने इत्यर्थः । सेविता च । सा शुभहेतुः कल्याणनिदानं ईश्वरी परमसमर्था भगवती नः अस्माकं शुभानि कल्याणानि भद्राणि सुखानि च करोतु । आपदो दुःखानि चाभिहन्तु विनाशयतु । **वंशस्थवृत्तम्** । जतौ तु वंशस्थमुदीरितं जराविति तल्लक्षणात् ॥

करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥८१॥
या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ॥
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ८२ ॥

अथ पाठान्तरादि अभीष्टसंश्रयादित्यत्राभीष्टसंश्रयेति, दिनेषु सेवितेत्यत्र दिनेशसेवितेति, भद्राण्यभिहन्त्वित्यत्र दुःखानि विहन्त्विति च क्वचित् पठ्यते ॥ ८१ ॥

येति । या साम्प्रतमधुना च उद्धता मत्ता ये दैत्याः शुम्भनिशुम्भादयः तैस्तापितैः पीडितैरस्माभिः सुरैः तथा ईष्टेऽसावीट् तेनेशा सुरेन्द्रेण च ईशेत्याबन्तं प्रथमान्तं येत्यस्य विशेषणं वा । नमस्यते नमनाद्युपचारैः पूज्यते । नमःशब्दात् पूजार्थे नमोवरिवस्येति क्यचि तस्मात् कर्मणि यकि रूपम् । या भक्त्या विनम्राः अवनता मूर्तयो देहा येषां तैर्भक्तिविनम्रमूर्तिभिरस्माभिरीशा च स्मृता सती तत्क्षणमेव स्मरणक्षणे एव । सःस्मरणाधिधिकरणभूत एव क्षणः कालविशेषो यस्मिन् विपद्धननकर्मणि इति विग्रहः क्रियाविशेषणमेतत् । नः अस्माकं सर्वापदः सर्वदुःखानि हन्ति विनाशयति च । उक्तं च वाराहे ब्रह्मादिदेवैः । शरणं त्वां प्रपद्यन्ते ये देवि परमेश्वरीम् ॥ न तेषामापदः काश्चिज्जायन्ते नापि सङ्कटमिति ॥ **कौर्मे** देवीवाक्यमपि । ये तु सर्वान् परित्यज्य मामेकां शरणं गताः ॥ तेषां नित्याभियुक्तानामापदां पर्वतानपि ॥ नाशयामितरां सर्वान् प्रसन्ना नचिरादिह ॥ इति ॥ अत्रापि करोतु सा न इति पूर्वश्लोकोत्तरार्धमर्थानुकर्षेण योज्यम् ॥ इन्द्र**वंशावृत्तम्** । द्वौ तौ जरौ चेद्धवतीन्द्रवंशेति तल्लक्षणात्

ऋषिरुवाच ॥ ८३ ॥

एवं स्तवादियुक्तानां देवानां तत्र पार्वती ॥
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥८४॥
साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिस् स्तूयतेऽत्र का ॥

अथ पाठान्तरादि ईशा च सुरैरित्यत्र ईशानमुखैरिति क्वचित् पठ्यते ॥ ८२ ॥

ऋषिरिति ॥ ८३ ॥

एवमिति । हे नृपनन्दन राजपुत्र सुरथ । तत्र हिमवति शिवावस्थसमीपे । एवमुक्तप्रकारेण देवानां स्तवादियुक्तानां स्तवादिषु व्यापृतानां सतां । आदिना नमस्कारप्रार्थनयोः सङ्ग्रहः । अनादरे भावलक्षणा षष्ठी । स्तवादियुक्तान् देवाननादृत्येत्यर्थः । पार्वती शिवपत्नी जाह्नव्या गङ्गायास्तोये स्नातुमभ्याययौ स्नानार्थं गन्तुं प्रावर्ततेत्यर्थः स्तवादीति **कात्यायनीतन्त्रसम्मतः** पाठः आदावेवं स्तवादि स्यादन्ते कस्मान्न गृह्यते इति तत्रोक्तेः ।

अथ पाठान्तरादि, स्तवादियुक्तानामित्यत्र स्तवाभियुक्तानामिति क्वचित् पाठः ॥ ८४ ॥

सेति । स्नानार्थं गच्छन्ती शोभने भ्रुवौ यस्याः सा सुभ्रूः सा पार्वती तान् स्तोतॄन् सुरानब्रवीत् । किमब्रवीत्तदाह । अत्र स्थाने भवद्भिः सुरैः का स्तूयते । इति ॥ स्तुतौ नमो देव्यै महादेव्यै इत्यादिना स्तव्यस्य स्त्रीलिङ्गत्वेन निर्देशात् का स्तूयते इति स्त्रीलिङ्गत्वेन प्रश्नः । तदा अस्याः पार्वत्या शरीरमेव कोशः पेशी शरीरकोशस्तस्मात् शरीरकोशतः । पञ्चम्यास्तसिल् । समुद्भूता कालान्तरे समुत्पन्ना शिवानाम्नी शक्तिः परिचारिकाधुना पार्वत्याः पार्वत्या सह स्नानार्थं गच्छन्ती सा पार्वतीमब्रवीत् । देवैर्देयमुत्तरं सैव ददावित्यर्थः । केचित् अत्रभवद्भिः

शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥८५॥

स्तूयतेऽत्र का इति पार्वतीप्रश्नानन्तरमेव तच्छरीराच्छिवा नाम शक्तिः समुद्भूय पार्वतीं प्रति तत्प्रश्नस्य वक्ष्यमाणमुत्तरं ददाविति व्याचक्षते तद्बहुग्रन्थविरोधादुपेक्ष्यम् । तथाहि **नवशत्याम्** । शैलराजसुता पूर्वं ब्रह्मणः सृष्टिकौशलम् । प्रिया च या महेशस्य सर्वलोकहितैषिणी ॥ कालीत्युक्ता जगद्धात्री नर्मतः शम्भुना सती ॥ लेभे गौरं वपुर्दिव्यं तप्त्वा च परमं तपः ॥ कृष्णवर्णाच्छरीरात्तु शिवा नाम्ना च कौशिकी ॥ अतीव सुन्दरी रामा कृष्णवर्णा विनिर्गता ॥ सोवास चाम्बिकाभ्याशे सेवमाना सुतेव ताम् ॥ इति ॥ **शिवपुराणे** च । कदाचित् पार्वतीं परिचरन्तीं कृष्णवर्णां कन्यामालोक्य श्रीशिवेन केयं कन्यकेति पृष्टा पार्वत्युवाच ॥ किं देवेन न सा दृष्टा या सृष्टा कौशिकी मया ॥ ईदृशी कन्यका लोके न भूता न भविष्यति ॥ शुम्भस्य च निशुम्भस्य मारणं च तया रणे ॥ देवानां रक्षणं चैव सर्वं सम्पत्स्यतेऽनया ॥ इति ॥ **वायुपुराणे** । पुरा शुम्भनिशुम्भाभ्यां जगत्यस्मिन्नुपद्रुते ॥ तयोर्लयाय श्रीकण्ठं ब्रह्मा प्रार्थितवान् स्वयम् ॥ विनिन्द्यातिरहस्यम्बां क्रोधयित्वा यथा तथा ॥ तद्वर्ष्मकोशजां शक्तिमकामां कन्यकात्मिकाम् ॥ निशुम्भशुम्भयोर्हन्त्रीं देवेभ्यो दातुमर्हसि ॥ एवमभ्यर्थितो धात्रा भगवान् नीललोहितः कालीत्याह रहस्यम्बां तेन क्रुद्धा तदाम्बिका ॥ गौतमस्याश्रमं गत्वा तपस्तप्त्वा सुदुश्चरम् ॥ प्रसादाद्ब्रह्मणो लेभे दिव्यं रूप मनुत्तमम् ॥ तत्कोशं सहसोत्सृज्य गौरी सा समजायत ॥ तत्कोशात्पार्वतीत्यक्तात् कौशिकी नाम नामतः ॥ काली कालाम्बुदप्रख्या कन्यका समजायत ॥ इति ॥ तस्मात् पूर्वं कालान्तरे एव पार्वतीशरीरकोशादुत्पन्नेयं सम्प्रति पार्वत्या सह जाह्नव्यां स्नातुमागतासती पार्वत्या देवान् प्रति भवद्भिः स्तूयतेऽत्र केति कृतस्य प्रश्नस्य वक्ष्यमाणमुत्तरं दत्तवतीति व्याख्यानमेवोचितमित्यलं प्रपञ्चेन ॥ ८५ ॥

स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ॥
देवैः समस्तैः समरे निशुम्भेन पराजितैः ॥ ८६ ॥

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ॥
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥८७॥

सा पार्वती शरीरकोशोद्भूता शक्तिः किमब्रवीत्तदाह स्तोत्रमिति । समरे निशुम्भेन पराजितैः अतएव शुम्भदैत्येन निराकृतैः स्वर्गान्निरस्तैः समस्तैः देवैः शुम्भनिशुम्भयोर्वधार्थमेतन्मम स्तोत्रं स्तुतिः क्रियते ॥ तयोर्वधस्य मद्धस्तेन भावित्वादिति भावः ।

अथ पाठान्तरादि समस्तैरित्यत्र समेतैरित्यपि पाठः ॥ मिलितैरिति तदर्थः । इत उत्तरं त्रयःश्लोका अधिकाः । शुम्भादीनसुरान् हत्वा प्रीतिं दास्यामि वज्रिणे ॥ इत्याकर्ण्य गिरं गौरी तामाह सुभगां ततः ॥ **गौर्युवाच** ॥ दक्षिणं हिमवच्छृङ्गं गत्वा त्वं भारतान्तिके ॥ देवकार्यं विधायाशु पश्चादेहि ममान्तिकम् ॥ आज्ञाप्य कौशिकीमेवं अमराणां हिताय वै ॥ नियुज्य तत्र तां देवीं गौरी स्नातुं जगाम ह ॥ अथ स्नात्वा ययौ देवी शुक्लवासाः स्वमालयमिति ॥ ८६ ॥

कौशिक्या बहुकालजातत्वेप्यवतारकार्यस्येत उत्तरमेव भावित्वादत्र तन्नाम्नो निरुक्तिरुच्यते । शरीरेति । यत् यतः इयं अम्बिका देवी तस्याः पार्वत्याः शरीरमेव कोशःपेशी शरीरकोशः । तस्मान्निःसृता निर्गता । ततस्तस्माद्धेतोः समस्तेपु लोकेपु चतुर्दशभुवनेपु कौशिकीति गीयते उच्यते । गै शब्दे । कौशिकीत्यत्र कोशशब्दाद्भवार्थे जातार्थे वा ठक ठञ् वा । कोशे भवा जाता वा कौशिकीति विग्रहः । एतच्छ्लोकारम्भे ऋषिरुवाचेत्यपेक्षितमपि नास्ति ॥ ८७ ॥

तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ॥
कालिकेति समाख्याता हिमाचलकृताश्रया ॥८८॥
ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ॥

कौशिकीवचनानन्तरं पार्वत्यां स्नातुं गतायां कौशिकी किमकरोत्तदाह । **तस्यामिति** । तस्यां प्रकृतिभूतायां पार्वत्यां विनिर्गतायां तु स्नानार्थं जाह्नवीं गतायां सत्याम् । सा कृष्णा शरीरकोशोत्पन्नत्वात् कृष्णवर्णा । पार्वती पार्वतीशरीरोत्पन्ना कौशिकी । कार्यकारणयोरभेदात् कौशिक्यां पार्वतीशब्दप्रयोगः । कृष्णवर्णत्वात् कालिकेति समाख्याता सती शुम्भनिशुम्भवधार्थं हिमाचले कृतः आश्रयोऽवस्थानं यया सा हिमाचलकृताश्रया अभूत् । इत उत्तरं केचिदधिकाः श्लोकाः । ततोऽम्बिका सुरानूचे हनिष्याम्यसुरान् द्रुतम् । मुञ्चध्वं भीतिवैक्लव्यमित्युक्त्वा त्रिदशांस्ततः ॥ जग्मुश्चित्तेन संहृष्टाः प्रतीक्षन्तोऽसुरार्दनम् । अथाम्बिका सर्वमनोहराङ्गी हन्तुं समस्तांश्च सुरारिसङ्घान् ॥ प्रस्थं जगामाथ महीधरस्य विभ्राजमाना वपुषातिशुक्ला । सा रूपयौवनोपेतोत्तमसौन्दर्यशालिनी ॥ तस्मिन् गिरिवरे राजन् दोलामारूह्य काञ्चनीम् । गायन्ती च हसन्ती च कम्पयन्ती शिरो भृशम् ॥ उवास सुचिरं कालं देवानां हितकाम्यया ॥ इति ॥ ८८ ॥

तत इति ततो हिमालयाश्रयानन्तरं दैत्यमोहनार्थं परं अन्यत् पूर्वोक्तकृष्णवर्णविरुद्धम् । श्वेतवर्णमित्यर्थः । घनान्तविलसच्छीतांशुतुल्यप्रभामिति तद्ध्याने वर्णनात् । सुमनोहरमतिरमणीयं रूपं बिभ्राणां अम्बिकां कौशिकीम् । चण्डो ददर्श । मुण्डश्च ददर्श । यौ शुम्भनिशुम्भयोः भृत्यावास्ताम् । क्रियापदस्यैकवचनान्तत्वाद्भेदेनान्वयः ।

अथ पाठान्तरादि । इत उत्तरं द्वौ श्लोकावधिकौ । यदृच्छया पर्यटन्तौ मेदिनीं कामरूपिणौ । दृष्ट्वा तौ तत्र चार्वङ्गीं विस्मयाविष्टचेतनौ ॥

ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥ ८९ ॥

ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा ॥
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥९०॥

नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ॥
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥९१॥

स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ॥

जग्मतुः स्वपुरं राजन् शुम्भदर्शनलालसौ । हिमाचलाग्रे दृष्टं हि वक्तुं तस्मै महाद्भुतम् ॥ इति ॥ ८९ ॥

ताभ्यामिति । ताभ्यां चण्डमुण्डाभ्यां सा अम्बिका शुम्भायाख्याताच । कथमाख्याता तदाह । हे महाराज अतीव सुमनोहरा अत्यन्तात्यन्तरमणीया हिमाचलं तेजसा भासयन्ती कापि अस्मदविदितनामकुलजातिः स्त्री आस्ते ॥

अथ पाठान्तरादि । सातीवेत्यत्र अतीवेति क्वचित् पठ्यते । तत्पक्षे सन्ध्यभावश्छान्दसः ॥ ९० ॥

नैवेति । हे असुरेश्वर दैत्यराज । तादृक् तद्रूपसदृशं उत्तमं रूपं केनापि कुत्रापि नैव दृष्टम् । असौ स्त्री कापि देवी देवस्त्री अथ वा राजमहिषी अस्ति । तस्मात् ज्ञायतां गृह्यतां च ॥ ९१ ॥

स्त्रीरत्नमिति । स्त्रीरत्नं सर्वस्त्रीषु श्रेष्ठा । रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः । अतिचारूणि सुन्दरतमानि अङ्गान्यवयवा यस्याः सा अतिचार्वङ्गी सा स्त्री तु त्विषा स्वप्रभया दिशः द्योतयन्ती प्रकाशयन्ती तिष्ठति वर्तते ॥ हे दैत्येन्द्र ॥ तां भवान् द्रष्टुमर्हति । एकदा सा भवतावश्यं द्रष्टव्यैव ततो ग्रहणाग्रहणयोर्भवदिच्छा प्रमाणमिति भावः ॥

सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥ ९२ ॥
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥ ९३ ॥
ऐरावतः समानीतो गजरत्नं पुरन्दरात् ॥

अथ पाठान्तरादि इतऊर्ध्वं केचिदधिकाः श्लोकाः । नैव देवी न गन्धर्वी नासुरी नच पन्नगी । दृष्टपूर्वा क्वचिन्नैव श्रुतपूर्वा नच प्रभो ॥ त्रैलोक्ये याः सुचार्वङ्ग्यो हावभावसमन्विताः । आदाय तिलशस्तास्तु निर्मिता च तिलोत्तमा ॥ तिलोत्तमा सहस्राणां तिलांशैरेव निर्मिता । भ्राजते पर्वतस्याग्रे दोलामारूह्य काञ्चनीम् ॥ ऊनषोडशवर्षा सा सम्पूर्णनवयौवना । चतुर्दशानां लोकानां देवतेव विराजते ॥ नैव तस्याः पिता तत्र न भ्राता न च बान्धवः । नचान्ये रक्षितारश्च सैका तिष्ठति निर्जने ॥ सा रूपसम्पदोपेता यौवनोत्तमशालिनी । तवैव योग्या राजेन्द्र तां भवान् द्रष्टुमर्हति ॥ इति ॥ ९२ ॥

यानीति । हे प्रभो स्वामिन् पूर्वं यानि गजाश्वादीनि ऐरावतोच्चैःश्रवआदीनि रत्नानि तत्तज्जातिश्रेष्ठवस्तूनि तथा मणयः हीरकमाणिक्य मरकतनीलप्रभृतयः त्रैलोक्ये आसन् । तानि तु समस्तानि साम्प्रतं ते गृहे भान्ति शोभन्ते । कानिचिद्भवताच्छिद्य बलाद्गृहीतानि कानिचित्तत्तत्स्वामिभिर्भयादुपहारीकृतानि चेति भावः ।

अथ पाठान्तरादि भान्तीत्यत्र तानीति क्वचित्पाठः । तत्पक्षे सन्तीति शेषः ॥ ९३ ॥

तेषु च कानिचिन्नामभिर्निदिशतः । **ऐरावतइत्यादिना** । पुरन्दरादिन्द्रात् आच्छिद्येति शेषः । पुरन्दरं निर्जित्येति ल्यप्लोपे पञ्चमी वा । गजरत्नं गजश्रेष्ठ ऐरावतस्तन्नामा इन्द्रगजः । समानीत आहृतः भवतेति विशेषः । अयं

पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥
विमानं हंसयुक्तमेतत्तिष्ठति तेऽङ्गणे ॥
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥ ९५ ॥
निधिरेष महापद्मः समानीतो धनेश्वरात् ॥
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥ ९६ ॥
छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ॥
तथायं स्यन्दनवरो यः पुरासीत् प्रजापतेः ॥ ९७ ॥

पुरोवर्ती पारिजाततरुः पारिजातनामा कल्पवृक्षश्च समानीतः । तथैव उच्चैरुन्नते श्रवसी कर्णौ यस्य स उच्चैःश्रवाः तन्नामा हयः इन्द्राश्वः समानीतः ॥९४॥

विमानमिति । यत् वेधसो ब्रह्मणः रत्नभूतं रत्नरूपम् रत्नसमं वा । भूतं रूपोपमानयोरिति हैमः । अद्भुतमितरविमानविलक्षणम् । हंससंयुक्तं हंसवाह्यं विमानमासीत् तदेतत् भवता इहानीतं सत् ते तवाङ्गणे तिष्ठति ॥ अङ्गणशब्दे मूर्धन्यः पृपोदरादित्वात् ।

अथ पाठान्तरादि अङ्गणे इत्यत्र गृहे इति क्वचित् पाठः ॥ ९५ ॥

निधिरिति । एप पुरोवर्ती महापद्मः तत्सङ्ख्यातधनसञ्चयवत्वात्तन्नामा निधिः कुबेरकोशः कुबेरात् कुबेरं निर्जित्य समानीतः । अब्धिः समुद्राधिष्ठात्री देवता । किञ्जल्किनीं प्रकटकेसरामित्यर्थः । अवयवभूतपङ्कजगतकिञ्जल्कित्वधर्मोऽवयविन्यां मालायामुपचर्यते ॥ अम्लानानि सदा विकस्वराणि पङ्कजानि यस्यास्ताम् । सर्वदा अपर्युषितकमलामित्यर्थः ॥ मालां तुभ्यं ददौ च । त्वद्भयादिति भावः ॥ ९६ ॥

छत्रमिति । काञ्चनं सुवर्णद्रवबिन्दून् स्रवति तच्छीलं काञ्चनस्रावि वरुणस्येदं वारुणं छत्रं ते गेहे तिष्ठति । तथा यः स्यन्दनवरो रथोत्तमः पुरा प्रजापतेर्दक्षस्यासीत् सोऽयं सम्प्रति ते गेहे तिष्ठति ॥ ९७ ॥

मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ॥
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥९८॥

निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ॥
वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥९९॥

एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ॥

मृत्योरिति । हे ईश स्वामिन् । त्वया मृत्योर्मारणक्रियाधिकारिणो देवताविशेषस्य उत्क्रान्ति मरणं ददातीत्युत्क्रान्तिदा । तन्नाम्नी शक्तिरायुधविशेषः । आहृता आच्छिद्य गृहीता । तथा सलिलराजस्य जलाधिदेवताया वरुणस्य पाश आयुधविशेषः तव भ्रातुर्निशुम्भस्य परिग्रहे परिग्रहीतवस्तुसञ्चये वर्ततइति शेषः ॥ ९८ ॥

निशुम्भस्येति । तथा अब्धिजाताः समुद्रोत्पन्नाः समस्ताः रत्नजातयो मणिमुक्ताप्रवालादयोऽपि निशुम्भस्य परिग्रहे सन्तीति शेषः । वस्तुतस्त्वस्यार्धस्य पूर्वश्लोकोत्तरार्धेन सहैकवाक्यतास्ति । तथापि श्लोकद्वयस्य भिन्नमन्त्रत्वाद्वाक्यभेदेन व्याख्या कृता ॥ वह्निश्चापि अग्निरपि तुभ्यं । शौचं नैर्मल्यं ययोस्ते अग्निशौचे । सुवर्णतन्तुनिर्मिते इत्यर्थः । सुवर्णनिर्मितवस्तुन एवाग्निशोध्यत्वात् । वाससी परिधानप्रावाराख्ये द्वे वस्त्रे ददौ ।

अथ पाठान्तरादि केचिद्वह्निरपीत्यत्र द्वितीयाक्षरस्य लघुत्वाच्छन्दोभङ्गमसहमाना वह्निश्चापिति पठन्ति तदा चकारद्वयस्योपपत्तिश्चिन्त्या ॥ ९९ ॥

अथोपसंहरतः । **एवमिति** । हे दैत्यैन्द्र दैत्यस्वामिन् शुम्भ । एवं समस्तानि त्रैलोक्यस्थानीत्यर्थः । रत्नानि उत्तमोत्तमवस्तूनि ते त्वया । ते इति स्यात्त्वयेत्यर्थे मयेत्यर्थे च मे इति ॥ इत्यव्ययवर्गे **त्रिकाण्डीशेषः** ।

स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥१००॥

ऋषिरुवाच ॥ १०१ ॥

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ॥
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥१०२॥

इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥

आहृतानि गृहीतानि । एवं सति रत्नं रत्नभूता एषा अस्मदुक्ता कल्याणी शुभलक्षणा स्त्री कस्माद्धेतोर्न गृह्यते । स्त्रीरत्नमिति समस्तं वा पदम् ।

अथ पाठान्तरादि अत्र त्रैलोक्यराज्यादधिका स्वयमेवाभ्युपागतेत्यर्धमधिकं क्वचित् पठ्यते ॥ १०० ॥

ऋषिरिति ॥ १०१ ॥

निशम्येति । स शुम्भस्तदा चण्डमुण्डयोरिति एवंप्रकारकं पूर्वोक्तं वचो निशम्य श्रुत्वा सुग्रीवं शोभनकन्धरत्वात्तन्नामानं महासुरं देव्याः समीपे दूतं प्रेषयामास उवाच च ॥

अथ पाठान्तरादि महासुर इति प्रथमान्तपाठः क्वचित् । तच्छुम्भस्य विशेषणम् इत उत्तरं मन्मथाविष्टहृदयस्तस्या आहरणोत्सुकः । दीर्घग्रीवं सुदुर्धर्षं दौत्यकर्मणि कोविदम् ॥ शुम्भ उवाच ॥ इत्यधिकं क्वचित्पठ्यते ॥ १०२ ॥

इतिचेतिचेति । शुम्भः दूतस्य कर्णे सन्देशमुक्त्वा आह त्वया मद्वचनान्मदाज्ञया यत्र सा स्त्री वर्तते तत्र गत्वा । सा इति च यथा यथा मया तव कर्णे उक्तं तथा तथेत्यर्थः । वक्तव्या । इतिचेतिचेति निपातसमुदाय

यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु ॥१०३॥

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥१०४॥

दूत उवाच ॥ १०५ ॥

उपसंहारार्थः । सभायां परस्त्रियै कथनीयस्य कामसन्देशस्य वक्तुमयुक्तत्वाद्दूतस्य कर्णे तन्मुखेन अग्रे देव्यै वक्ष्यमाणं मम त्रैलोक्यमखिलमित्यादिरूपं सन्देशमुक्त्वा ततः प्रकाशं इतिचेति वचनेनोपसंहृतम् । अथवा सभायां चण्डमुण्डाभ्यां देव्या ग्रहणविषये यद्यदुक्तं तत्सर्वं दूतेन श्रुतमेव किमर्थं पुनर्वक्तव्यमिति विचिन्त्य चण्डमुण्डयोर्वचनस्यैव इतिचेतिचेति वचनेनोपसंहारः कृतः । एतावदुक्तचण्डमुण्डवचनानुरोधेनेत्यर्थः । वक्तव्या । एवं यदि नैष्यति तदा यथा येनोपायेन सम्प्रीत्या आनन्देनाभ्येत्यभ्येष्यति तथा त्वया लघु शीघ्रं कार्यं कर्तव्यं नायिकानुकूल्यस्य दूतवचश्चातुर्याधीनत्वादिति भावः । लघ्वित्युक्तिरस्यौत्सुक्यात् ।

अथ पाठान्तरादि इत उत्तरम् ऋषिरुवाच ॥ निशम्य दूतो राजोक्तं सुग्रीवो नयकोविदः । तथेति चोक्त्वा प्रययौ स्वल्पसैन्यसमन्वितः इत्यधिकं क्वचित् पठ्यते ॥ १०३ ॥

स इति । स दूतः । सा देवी यत्र आस्ते तत्र अतिशोभने शैलोद्देशे हिमालयप्रदेशे गत्वा ततः तां देवीं मधुरया गिरा श्लक्ष्णं मृदुलं यथा तथा प्राह उक्तवान् । माधुर्यमर्थे । श्लक्ष्णत्वं शब्दे ।

अथ पाठान्तरादि सा देवीमित्यत्र तां च देवीमिति दृष्ट्वा-देवीमिति वा क्वचित् पाठः ॥ १०४ ॥

दूत इति । दूतः सुग्रीवः । अनपेक्षितोप्ययं मन्त्रोऽस्त्येव ॥१०५॥

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ॥
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥१०६॥
अव्याहताज्ञस्सर्वासु यस्सदा देवयोनिषु ॥
निर्जिताखिलदैत्यारिस्स यदाह शृणुष्व तत् ॥१०७॥
मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ॥ १०८॥

देवीति । हे देवि द्युतिमति । अथवा दैत्याधिपतेः शुम्भस्य भाविपत्नीत्वाभिप्रायेण देवीति सम्बोधनम् । देवो राजा तस्य स्त्री देवी । पुंयोगे ङीष् । दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः सम्राडस्ति । तेन प्रेषितः दूतः अहं इह त्वत्सकाशं तव समीपमागतोऽस्मि ।

अथ पाठान्तरादि त्रैलोक्यपरमेश्वर इति समस्तत्वेनापि पाठः क्वचित् ॥ १०६ ॥

शुम्भे देव्या आदरोत्पादनार्थं पुनरपि तं विशिनष्टि। **अव्याहतेति**। निर्जिताः पराजिताः अखिला दैत्यारयो देवा येन स निर्जिताखिलदैत्यारिः । अत एव यः सदा सर्वासु देवयोनिषु देवजातिषु । अव्याहता अप्रतिहता आज्ञा यस्य सोऽव्याहताज्ञः अस्ति। स शुम्भो यदाह तत् शृणुष्व शृणु ॥ १०७ ॥

शुम्भोक्तं सन्देशमाह। **ममेति** । अखिलं त्रैलोक्यं ममास्ति मत्स्वामिकमास्ति । देवाः मम वशानुगाः वशाश्चानुचराश्च सन्तीत्यर्थः । कर्मधारयसमासः ॥ आयत्ततायामायत्ते प्रभुत्वे च वशं विदुरिति **शाश्वतः** । किञ्चाहं सर्वान् तत्तद्देवतोपभोग्यान् यज्ञभागान् यज्ञेषु यजमानैर्दत्तान् हविर्भागान् पृथक् पृथक् तत्तद्भागाधिकारिदेवतास्थानाधिपत्येन अथ वा पृथक् पृथक् प्रतियज्ञं । उपाश्नामि उपभुञ्जे ॥ १०८ ॥

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥
तथैव गजरत्नं च हृतं देवेन्द्रवाहनम् ॥१०९॥

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ॥
उच्चैःश्रवससञ्ज्ञं तु प्रणिपत्य समर्पितम् ॥११०॥

यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ॥
रत्नभूतानि भूतानि मय्येव शोभने ॥१११॥

त्रैलोक्ये इति । त्रयाणां लोकानां समाहारस्त्रिलोकी । त्रिलोक्येव-त्रैलोक्यम् तस्मिंन् । यानि वररत्नानि तत्तज्जातिष्वतिश्रेष्ठवस्तूनि तान्यशेषतः अशेषाणि सार्वविभक्तिस्तसिः । मम वश्यानि वशङ्गतानि वर्तन्ते । तथैव देवेन्द्रस्य वाहनम् गजरत्नम् गजेषु श्रेष्ठ ऐरावतनामा गजः हृत आच्छिद्य गृहीतः । मयेति शेषः ॥ १०९ ॥

क्षीरोदेति । क्षीरसागरस्य मथनतः उद्भूतं क्षीरोदमथनोद्भूतम् । उदकस्योदः सञ्ज्ञायामित्युदकस्योदादेशः । उच्चैरुन्नते श्रवसी कर्णौ यस्य स उच्चैःश्रवसः । अजिति योगविभागात्समासान्तोऽच् प्रत्ययः । उच्चैःश्रवस इति सञ्ज्ञा यस्य तदुच्चैःश्रवससञ्ज्ञं अश्वरत्नं तु अमरैर्देवैः प्रणिपत्य नमस्कृत्य मत्प्रसादार्थमिति भावः । मम मह्यं समर्पितमुपदीकृतम् ॥११०॥

उपसंहरति **यानीति** । किं बहुना हे शोभने सुन्दरि यानि च अन्यानि पारिजातहंसयुक्तविमानपद्मनिधिकाञ्चनस्राविच्छत्रोत्क्रान्तिदशक्त्यादीनि रत्नभूतानि रत्नत्वेनाभिमतानि भूतानि वस्तूनि देवेषु गन्धर्वेषूरगेषु चकारादन्यत्र च पूर्वमासन्, तानि साम्प्रतं मय्येव मदायत्तान्येव सन्ति ॥ १११ ॥

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ॥
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥११२॥

मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ॥
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥११३॥

किमर्थमिदं मह्यं कथ्यते इति चेत् शृणु । **स्त्रीरत्नेति** । हे देवि । देवीति सम्बोधनं प्रलोभनार्थं वा भाविस्वमहिषीत्वाभिप्रायेण वा । वयं त्वां लोके स्त्रीरत्नभूतां स्त्रीजातौ रत्नरूपाम् । भूतं रूपोपमानयोरिति **विश्वप्रकाशः** । मन्यामहे । वयमिति बहुवचनं श्रेष्ठत्वाभिप्रायेण ॥ ततः किं कर्तव्यं तदाह । **सेति** । सा स्त्रीरत्नभूता त्वं अस्मानुपागच्छोपतिष्ठ भजस्वेत्यर्थः । कुत इत्याह । यत इति । यतो वयं रत्नभुजः । सार्वभौमत्वात्त्रैलोक्यस्थितसर्वरत्नानामुपभोक्तारः स्मः । त्वं रत्नभूता वयं च रत्नभुजः । तेन तवास्माकं च स्वस्वामिभावसम्बन्धो नित्यसिद्ध इति भावः ॥ ११२ ॥

युवामुभौ भ्रातरौ तद्युवयोर्मध्ये मया क उपागम्य इति देव्यभिप्रायमाशङ्क्याह **मामिति** । ज्येष्ठत्वावन्मां वा भज । ममाधिकवयस्त्वशङ्कायां ममानुजं कनीयांसं भ्रातरं युवानं निशुम्भं वा भज । कुलकन्यकानां न केवलं यून्येव बहुमानः किन्तु विक्रमवत्येव तस्मिन् इवत्यभिप्रायेण निशुम्भं विशिनष्टि उरुविक्रममिति । उरुः महान् विक्रमः पराक्रमो यस्य तम् । कुतोऽयं हठात्कार इति चेद्रत्नभूतासि वै यत इति पूर्वमुक्तमेव । सुन्दरस्त्रीणां चञ्चलापाङ्गत्वस्य स्वभावसिद्धत्वादनवलोकिताया अपि देव्याश्चञ्चलापाङ्गीति सम्बोधनम् ।

अथ पाठान्तरादि चञ्चलापाङ्गीत्यत्र चपलापाङ्गीति पाठः उभयत्रापि प्रथमान्तः पाठोऽपि क्वचित् ॥ ११३ ॥

परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥
एतद् बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥११४॥

ऋषिरुवाच ॥ ११५ ॥

इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ॥
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥११६॥

देव्युवाच ॥ ११७ ॥

उभयोः परिग्रहसाधारण्येऽपि स्वपरिग्रहे विशेषमाह **परमेति** । मम परिग्रहो मत्परिग्रहः । तस्मात् । त्वत्कर्तृकमत्स्वीकारादित्यर्थः । परं सर्वोत्तमं । अतुलं निरुपमं निरवधिकं वा । ऐश्वर्यं त्रैलोक्यस्वामिनीत्वम् । प्राप्स्यसे प्राप्स्यसि, ज्येष्ठत्वेन मम त्रैलोक्यराज्याधिकारित्वादिति भावः । तङ् छान्दसः । एतत्सर्वं बुद्ध्या समालोच्य विचार्य । त्रैलोक्यैश्वर्येच्छा चेन्मत्परिग्रहतां मद्भार्यात्वं व्रज प्राप्नुहि । अन्यथा निशुम्भभार्यात्वम् । एतेन स्वभार्यात्वस्वीकारो मुख्यपक्षःसूचितः । पत्नी परिजनादानमूलशापाः परिग्रहा इत्यमरः ॥ ११४ ॥

ऋषिरिति ॥ ११५ ॥

इत्युक्तेति । यया इदं जगद्धार्यते या जगदाधारभूतेत्यर्थः सा दुर्गा दुर्ज्ञेयलीला भगवती अपरिच्छिन्नैश्वर्या भद्रा जगत्कल्याणकारिणी देवी तदा दूतेन एवमुक्ता सती । गम्भीरं अनुत्तानं गूढमित्यर्थः अन्तः मुखान्तर्भागे स्मितं ईषद्धसितं यस्याः सा गम्भीरान्तःस्मिता । अपरिच्छिन्नैश्वर्यां मां अयं परिच्छिन्नैश्वर्येण प्रलोभयितुमिच्छतीत्यहो मूढतेति स्मितम् ॥ जगौ उवाच । गै शब्दे ॥ ११६ ॥

देवीति । अनपेक्षितोऽप्ययं गद्यमन्त्रोऽत्रास्त्येव ॥ ११७ ॥

सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम् ॥
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥११८॥
किन्त्वत्र यत्प्रतिज्ञातं मिथ्या तत् क्रियते कथम् ॥
श्रूयतामल्पबुद्धित्वात् प्रतिज्ञा या कृता पुरा ॥ ११९॥
यो मां जयति सङ्ग्रामे यो मे दर्पं व्यपोहति ॥
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥

अथ देवी स्वयं शुम्भगृहं न गत्वा स एव स्वसमीपमानीय हन्तव्य इति मनसि कृत्वा तं विश्वासयितुं प्रतिज्ञाव्याजमुत्पाद्य मृदुवचनैः उवाच **सत्यमिति** । यत् त्वया शुम्भस्त्रैलोक्ये परमेश्वर इत्याद्युक्तं तत्सत्यम् । अत्र त्वया किञ्चित् मिथ्या नोदितं नोक्तम् । वाक्यभेदात्त्वयेत्यस्य द्विरुक्तिः । शुम्भस्त्रैलोक्यस्याधिपतिरस्ति । निशुम्भश्चापि तादृश एव त्रैलोक्यस्याधिपतिरेव । अभ्युपगतमेव मयैतदिति भावः ॥ ११८ ॥

तर्हि व्रज मया सहेति चेत् किञ्चित् प्रतिबन्धकमस्तीत्याह **किन्त्विति ।** किन्तु अत्र विवाहविषये मया किञ्चित् प्रतिज्ञातमस्ति तत् मिथ्या कथं क्रियते । मया पुरा बाल्ये अल्पबुद्धित्वादपरिणतबुद्धित्वात् या प्रतिज्ञा कृता सा श्रूयताम् ॥

अथ पाठान्तरादि पुरेत्यत्र मयेति च पाठः ॥ ११९ ॥

प्रतिज्ञामाह । **य इति** । यः पुरुषोऽस्मिन् लोके मां सङ्ग्रामे युद्धे जयति जेष्यति। तदसम्भवे यो युद्धे स्वकौशलदर्शनेन मे दर्पं युद्धकौशलगर्वं व्यपोहति परिहरिष्यति । तस्याप्यसम्भवे यो मे प्रतिबलः युद्धे परिपन्थित्वेन सम्मुखोऽवस्थास्यति । मदधिकबलत्वाभावेऽपि यो मत्तुल्यबलोऽपि वा स्यादिति भावः । स मे भर्ता भविष्यति । अन्यथा भार्यापेक्षया भर्तुर्हीनगुणत्वे तयोर्विवाहस्य दुःखास्पदत्वादिति भावः ॥ १२० ॥

तदा गच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ॥
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥१२१॥

उपसंहरति । **तदिति** तत् तस्मात् मत्प्रतिज्ञापूरणार्थमित्यर्थः । महासुरः शुम्भो वा निशुम्भो वा अत्रागच्छतु ततः मां जित्वा पराजित्य लघु शीघ्रं मे पाणिं गृह्णातु । मां परिणयत्वित्यर्थः । तदत्रागमने चिरेण किम् विलम्बः कुतः । शुभस्य शीघ्रमिति न्यायादिति भावः । इति प्रकटोऽर्थः ॥ १२१ ॥

अथ लोकरञ्जनाय देव्यभिप्रेतो नाम अन्योऽप्युक्तश्लोकचतुष्टयस्य गूढोऽर्थः सङ्गतिबोधनार्थमेकत्रैव क्रमेण प्रदर्श्यते ॥ हे दूत । यदेतावत्पर्यन्तं त्वया । शुम्भनिशुम्भयोरन्यायाचरणं उक्तम् तत्सर्वं सत्यमेव । अत्रास्मिन् विषये त्वया किञ्चिदपि मिथ्या नोदितम् नोक्तम् । कुतः । यतः शुम्भस्त्रैलोक्याधिपतिः । त्रैलोक्यस्य आधीनां मनोव्यथानां पतिः रक्षकः जनक इति यावत् । अस्ति । आधिजनके आधिपतिप्रयोगः प्रजाजनके प्रजापतिपदवत् । पुंस्याधिर्मानसी व्यथेत्य**मरः** । निशुम्भश्चापि तादृशः आधिजनक एव । तस्मादेताभ्यामविनीताभ्यां सह नाहं विवाहं कर्तुमिच्छामीति भावः ॥ ११८ ॥ तर्ह्यस्मत्प्रदेशं परित्यज्यान्यत्र गच्छ ततो न वयं तव पृष्ठमनुधाविष्याम इति चेन्मम प्रतिज्ञाभङ्गःस्यादित्याह । **किन्त्विति** । किन्तु अत्र शुम्भविषये । मया यत् प्रतिज्ञातं तन्मिथ्या कथं क्रियते । कासौ प्रतिज्ञा कदा च कृता तदाह । पुरा पूर्वं । यदा शुम्भनिशुम्भपीडिता देवाः शिवभवनसमीपमेत्य शुम्भनिशुम्भवधार्थं मां तुष्टुवुस्तदेत्यर्थः या प्रतिज्ञा कृता सा त्वया अल्पबुद्धित्वात् तव अप्राज्ञत्वेन स्वयं तर्कयितुमशक्यत्वादित्यर्थः । मया स्वमुखेन कथ्यमाना श्रूयताम् । त्वं यदि प्राज्ञोऽभविष्यस्तदा अनुक्तमप्यूहति पण्डितो जन इति न्यायादीदृशे घोरप्रचारे कान्तारे दैत्यवसतिसमीपे यथेयमेकाकिनी स्त्री निर्भया तिष्ठति

तथानयात्र दैत्यवधार्थमेवागतया भवितव्यमिति स्वयमेवातर्कयिष्यः। इतिभावः ॥११९॥ **अथ प्रतिज्ञामाह य इति।** यःलोके न विद्यते मा मृतिर्येषां ते अमा अमरास्तान् सङ्ग्रामे युद्धे जयति। यःमे धातरि अदर्पं विनयं व्यपोहति त्यजति। यः मे इन्द्रे प्रतिबलः शत्रुत्वेन वर्तते। स मे मत्पोष्यवर्गस्येत्यर्थः। भर्ता स्वपिशितेन पोषको भविष्यति। डुभृञ् धारणपोषणयोः। तमहं हनिष्यामीत्यर्थः। वक्ष्यते चाग्रे शिवमुखेन देव्या दैत्यान् प्रति। त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः। यूयं प्रयात पातालं यदि जीवितुमिच्छथ॥ बलावलेपादथ चेद्भवन्तो युद्धकांक्षिणः। तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः॥ इति॥ सम्प्रति च शुम्भनिशुम्भाभ्यां सर्वे देवाः पराजिताः। ब्रह्मणो विमानाहरणेन तस्मिन्नविनयः कृतः। इन्द्रस्यैरावताद्याहरणेन तस्य शत्रुत्वं च सम्पादितम्। ततोऽनयोः मत्प्रतिज्ञानुरोधेन वधसमयः प्राप्त इति भावः॥ १२०॥

तत् तस्मात् मत्प्रतिज्ञापूरणार्थमित्यर्थः। महासुरः महान्तो दुर्लभाश्च ते असवः प्राणाश्च महासवः। महासून् राति ददाति त्यजतीति महासुरः। मुमूर्षुरित्यर्थः। शुम्भो वा निशुम्भो वा मां कौशिकीं जित्वा जेतुमिच्छन्नित्यर्थः। जयतेः क्वनिप्। पित्वात्तुक्। अथ वा मां स्वराज्यलक्ष्मीं जित्वा परित्यज्येत्यर्थः। जीवतोः पुनस्तत्र प्रतिगमनासम्भवादिति भावः। आशा जितेत्यादिवत् त्यागार्थे जयतेः प्रयोगः। मः शिवे धातरीन्द्रे चेति मा स्त्री लक्ष्म्यां मृतावपीति **चैकाक्षरनिघण्टुः**। आगच्छतु। मद्धस्तान्मरणार्थमिति भावः। अत्र अस्मिन् विषये चिरेण किं विलम्बो मास्त्वित्यर्थः। लघु शीघ्रं मे पाणिं गृह्णातु हस्तचपेटां स्वीकरोतु। वक्ष्यते च **दशमाध्याये**। तं च सा देवी तलेनोरस्यताडयत्॥ तलप्रहाराभिहतो निपपात महीतले॥ इति॥ अत्र वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये इति **विश्वकोशात्** व शब्दयोः समुच्चयार्थत्वे वाक्यभेदेनान्वयः। यथा। " महासुरः शुम्भो मां

दूत उवाच ॥ १२२ ॥

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ॥
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥१२३॥

अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥
तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका ॥१२४॥

जित्वा अत्रागच्छतु । अत्र चिरेण किम् । लघु मे पाणिं गृह्णातु "। एवं निशुम्भे च योज्यम् । इति गूढोऽर्थः । केचिच्चण्डमुण्डशुम्भदूतवचांस्यपि प्रकटार्थपरत्वेन गूढार्थपरत्वेन चेति द्विधा व्याचक्षते । सोऽतिप्रसङ्गएव । देव्या इव चण्डमुण्डादीनां वचस्येकं मनस्यन्यदिति द्वैधीभावाभावात् ॥ १२१ ॥

दूत इति ॥ १२२ ॥

अवलिप्तेति । हे देवि त्वं अवलिप्तासि दृप्तासि । तेनैवं ब्रवीषीति-भावः । पुनरेवं ममाग्रतः मा ब्रूहि । नाहं सहिष्ये इति भावः । मेति निषेधेऽव्ययम् । न माङ् । तस्मिन् सति लुङः प्रसङ्गात् । त्रैलोक्ये शुम्भनिशुम्भयोरग्रे युद्धे पुमान् पुरुषोऽपि कस्तिष्ठेत् स्थातुं शक्नुयात् न कोऽपीत्यर्थः ॥ १२२ ॥

अन्येषामिति । तिष्ठतां शुम्भनिशुम्भौ अन्येषां तदनुचराणां दैत्यानां धूम्रलोचनचण्डमुण्डरक्तबीजादीनामपि सम्मुखे कः पुमांस्तिष्ठेदितिवाक्यभेदेनान्वयः । येषां शुम्भादीनी दैत्यानां सम्मुखे युधि सर्वे देवा न वै तिष्ठन्ति तेषां त्वां ग्रहीतुमागतानाम् सम्मुखे एकिका असहाया । अनुकम्पार्थे कन् । त्वं पुनः स्त्री स्त्री तु कथं स्थास्यासि । पुनस्त्वर्थे ॥ १२४ ॥

इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ॥
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम् ॥१२५॥
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ॥
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥ १२६ ॥

देव्युवाच ॥ १२७ ॥

एवमेतद्बली शुम्भो निशुम्भश्चातिवीर्यवान् ॥

उक्तमेवार्थं देव्या मनसि संस्कारदार्ढ्यार्थं पुनराह इन्द्राद्या इति। इन्द्राद्याः सकला देवाः संयुगे युद्धे येषां सम्मुखे न तस्थुस्तेषां शुम्भादीनां शुम्भनिशुम्भधूम्रलोचनचण्डमुण्डरक्तबीजानां सम्मुखं त्वं स्त्री कथं प्रयास्यसि तस्मात्त्यजैनं दुराग्रहमिति भावः ॥ १२५ ॥

उपसंहरति। सा त्वमिति। सा अविचारकृतप्रतिज्ञा त्वं मयैवोक्ता मम सामोक्तिमङ्गीकृत्यैवेत्यर्थः। मया सह शुम्भनिशुम्भयोः पार्श्वं समीपं गच्छ व्रज। एवं कृते केशानामाकर्षणेन निर्धूतं निरस्तं गौरवं महत्त्वं यस्याः सा केशाकर्षणनिर्धूतगौरवा एतादृशी मा गमिष्यसि। अन्यथा उक्तप्रकारेण गमनप्रसङ्ग आपत्स्यते इति भावः। अथ वा त्वं साम्ना नागच्छसि चेत् केशाकर्षणनिर्धूनगौरवा मागमिष्यसि न गमिष्यसि किमृइति काकुः ॥ १२६ ॥

देवीति ॥ १२७ ॥

एवमेतदिति। एवमेतत्। यद्यहं साम्ना शुम्भनिशुम्भयोः समीपं न गच्छामि तदा मम केशाकर्षणनिर्धूतगौरवाया गमनप्रसङ्ग आपद्येतेति यत् त्वयोक्तं तत् सत्यमेवेत्यर्थः। यतः शुम्भो बली बलवान् निशुम्भश्च अतिवीर्यवान्। अतस्तौ त्वदुक्तप्रकारेण मां नेतुं समर्थावेवेति भावः।

किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥१२८॥
स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ॥

तथापि किं करोमि किं करवाणि । यत् यतः । मे मया पुरा प्रथमं आरम्भे एवेत्यर्थः । प्रतिज्ञा अनालोचिता युक्तायुक्तत्वेन न विचारिता । अतः अविचार्य कृतस्य वस्तुनः शुभमशुभं वा फलं तूष्णीं सह्यमेवेति भावः ॥ इति ॥ प्रकटोऽर्थः ॥ गूढार्थस्तु । एवमेतत् ? । काकुरत्रानुसन्धेया । केशाकर्षणनिर्धूतगौरवा गमिष्यामि किमित्यर्थः मनसापि न चिन्तनीयं त्वयैतदिति भावः । यतः वीर्यस्यात्ययः अतिवीर्यम् । वीर्याभाव इत्यर्थः । अव्ययंविभक्तीत्यादिना समासः । तदस्यास्तीत्यतिवीर्यवान् । निर्वीर्य इत्यर्थः । शुम्भः । तादृश एव निशुम्भश्चेत्युभावपि बली मदुपहारयोग्यौ पशू । वधार्हावित्यर्थः । तौ किंकरोमि कुत्सितौ करिष्यामि । किं कुत्सायां वितर्के च निषेधप्रश्नयोरपीति **मेदिनी** ॥ प्रेतत्वं नेष्यामीत्यर्थः । प्रेतस्यास्पृश्यत्वात् कुत्सितत्वम् । वक्ष्यते च **सप्तमाध्याये** देवीं प्रति काल्या । मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ॥ युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसीति ॥ अस्यार्थः । अत्र युद्धयज्ञारम्भे मया तव चण्डमुण्डौ तदाख्यौ पशू उपहृतौ हत्वा अर्पितौ । अथ युद्धयज्ञे शुम्भं निशुम्भं च महापशू स्वयं हनिष्यसीति ॥ यत् यतः पुरा पूर्वं यदा देवा मामुपेत्य तुष्टुवुस्तदेत्यर्थः । मे मम । अनाला न विद्यते आलमनर्थौ यस्याम् । सुपरिणामेत्यर्थः । आलमनर्थहारितालयोरिति हैमः । उचिता योग्या प्रतिज्ञा शुम्भादीनसुरान् हत्वा प्रीतिं दास्यामि वः सुराः ॥ इत्येवंरूपा पूर्वोक्तपरिशिष्टश्लोकसमूहान्तर्गता । आसीदिति शेषः ।

अथ पाठान्तरादि यदनालोचितेत्यत्र यदि नालोचितेति क्वचित् पाठः ॥ १२८ ॥

उपसंहरति । **स त्वमिति** । स श्रुतमद्वचनस्त्वं गच्छ शुम्भसमीपमिति

तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत् ॥ १२९ ॥

शेषः । यदेतन्मया ते उक्तं तत्सर्वं एकशब्दमप्यपरित्यज्येत्यर्थः । आदृतः सन् नतूपेक्षयेत्यर्थः । असुरेन्द्राय दैत्यस्वामिने शुम्भायेत्यर्थः । नीचवरायेति गूढोऽर्थः । असुरौ नीचदानवावित्यजयः आचक्ष्व आख्याहि । ततः स शुम्भश्च युक्तं तत्करोतु । युद्धार्थमागमनं वा तूष्णीं गृहेऽवस्थानं वेत्यर्थः ॥

अथ पाठान्तरादि आदृत इत्यत्र आदित इति करोतु तदित्यत्र करोतु यदिति च क्वचित् पाठः ॥ १२९ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमाहात्म्ये देवीदूतसंवादो नाम पञ्चमोऽध्यायः ॥ ५ ॥

इतीति । देवीदूतसंवाद इति समस्तं पदम् । अध्यायविशेषणमेतत् । अष्टत्रिंशदक्षरात्मकमेतत्पञ्चमाध्यायसमाप्तिवाक्यम् ।

अथ पाठान्तरादि देवीदूतसंवाद इत्यत्र देव्या दूतसंवाद इति विगृहीतं केचित्पठन्ति तद्विषये प्रथमाध्यायसमाप्तिव्याख्यायामुक्तम् ।

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे पञ्चमाध्यायव्याख्या ॥ ५ ॥

अथ षष्ठाध्यायः

ऋषिरुवाच ॥ १ ॥

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥२॥

तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥

ऋषिरिति । अथ षष्ठाध्यायविभागकारिकाः । षष्ठे चर्षिरुवाचेति गद्यात्मा प्रथमो मनुः ॥ इत्याकर्ण्यादयश्लोकमन्त्राश्चत्वार ईरिताः ॥ ततश्चर्षिरुवाचेति गद्यात्मैको मनुः स्मृतः ॥ तेनाज्ञप्तादयः श्लोकमन्त्राश्च त्रय ईरिताः ॥ ततश्च देव्युवाचेति मन्त्रो गद्यात्मको मतः ॥ दैत्येश्वरेण प्रहित इत्येकः श्लोकमन्त्रकः ॥ ततस्त्वृषिरुवाचेति मन्त्रो गद्यात्मकःस्मृतः ॥ अथेत्युक्तः स इत्याद्या द्वादशश्लोकमन्त्रकाः ॥ एवं मन्त्रास्तत्त्वसङ्ख्याः श्लोकमन्त्रास्तु विंशतिः ॥ चत्वारो गद्यमन्त्राश्च श्लोकाविंशतिरीरिताः ॥इति॥ अथ मन्त्रव्याख्या । ऋषिरुवाचेति ॥ १ ॥

इतीति । स दूतः इति पूर्वाध्यायोक्तं देव्या वचः आकर्ण्य श्रुत्वाऽमर्षेण क्रोधेन पूरितः सम्भृतः व्याप्तः सन्नित्यर्थः । समागम्य शुम्भसमीपमेत्य दैत्यराजाय शुम्भाय । राजाहःसखिभ्य इति टच् । तद्देवीवचः विस्तरात् संक्षेपमकृत्वा समाचष्ट आख्यातवान् । चक्षिङ् व्यक्तायां वाचि ।

अथ पाठान्तरादि समागम्य समाचष्टेति व्यत्यासेन पाठः क्वचित् । समागम्येत्यत्र समागत्येति च ॥ २ ॥

तस्येति । असुरराट् दैत्यराजः शुम्भः । राडिति क्विबन्तम् । तस्य देव्याः सकाशात् प्रत्यागतस्य दूतस्य तत् देव्युक्त्यनुवादकं वाक्यमाकर्ण्य ।

सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥३॥

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥४॥

तत्परित्राणदः कश्चिद्यदि चोत्तिष्ठते परः ॥
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥५॥

ततः क्रोधेन सहितः सक्रोधः कुपितः सन्नित्यर्थः । समीपस्थं दैत्यानां अधिपं दैत्यसेनापतिं धूम्रलोचनं पिङ्गलनेत्रत्वात्तन्नामानं दैत्यं वक्ष्यमाणं वचः प्राह उक्तवान् ॥ ३ ॥

हे धूम्रलोचनेति । हे धूम्रलोचन तन्नामकसेनापते । त्वं स्वसैन्येन परिवारितः परिवृतः सन् दुष्टां गर्वसञ्जातदुर्बुद्धिं तां दूतोक्तां स्त्रियम् । बलात् हठात् केशानां आकर्षणेन विह्वलां व्याकुलां कृत्वेति शेषः आशु शीघ्रम् । आनय ॥

अथ पाठान्तरादि एतच्छ्लोकारम्भे शुम्भ उवाचेति क्वचित् पठ्यते ॥४॥

एकस्याः स्त्रिया निर्जने वनेऽवस्थानस्यासम्भवात्तस्याः सहायोऽप्यन्यः कश्चित् स्याच्चेत् सः प्रतिबध्नीयात्तदा किं कर्तव्यमित्याशङ्क्याह **तत्परित्राणेति** । यदि च तत्परित्राणदः तस्याः स्त्रियाः परित्राणं परितो रक्षणं ददाति करोतीति तादृशः कश्चिदपरः अमरो देवः अपि वा यक्षः गन्धर्व एव वा उत्तिष्ठते त्रातुं सज्जो भवति । उदोऽनूर्ध्वकर्मणीत्यात्मनेपदम् । तर्हि स हन्तव्यः ॥

अथ पाठान्तरादि यदिचेत्यत्र यदिवेति क्वचित् पाठः ॥ ५ ॥

ऋषिरुवाच ॥ ६ ॥

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ७ ॥

स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ॥
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥ ८ ॥

नचेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ॥
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥

ऋषिरिति ॥ ६ ॥

तेनेति । ततः तेन शुम्भेनाज्ञप्तः कृताज्ञः स धूम्रलोचनो दैत्यः शीघ्रं आज्ञासमकालमेव असुराणां सहस्राणां षष्ट्या षष्टिसहस्रसङ्ख्याकैरसुरैरित्यर्थः वृतः परिवृतः सन् द्रुतं त्वरितपदविन्यासेन ययौ ॥ ७ ॥

स इति । स धूम्रलोचनः तुहिनाचले हिमगिरौ संस्थितां तां देवीं दृष्ट्वा ततः शुम्भनिशुम्भयोः मूलं समीपं प्रयाहि त्वरया गच्छ इति उच्चैः जगाद उक्तवान् । निकटेऽपि च मूलं स्यादिति त्रिकाण्डीशेषः ॥ ८ ॥

नचेदिति । भवती अद्य प्रीत्या प्रेम्णा मद्भर्तारं मम स्वामिनं शुम्भं नोपैष्यासि नोपगमिष्यसि चेत् ततस्तर्हि एष तत्सेवकोऽहं त्वां केशानामाकर्षणेन विह्वलां कृत्वा बलान्नयामि नेष्यामि ॥ ९ ॥

देव्युवाच ॥ १० ॥

दैत्येश्वरेण प्रहितो बलवान्-बलसंवृतः ॥
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥ ११ ॥

देवीति ॥ १० ॥

दैत्येति । आदौ त्वं बलवान् सामर्थ्यसम्पन्नः । तत्र पुनः बलसंवृतः सैन्यपरिवृतः । तत्रापि दैत्येश्वरेण दैत्यपतिना शुम्भेन प्रहितः प्रेषितः। ततो मां बलात् प्रसह्य । एवं केशाकर्षणेन विह्वलीकृत्य नयसि नेष्यसि चेत् अहं स्त्री ते तव किं करोमि किं विरुद्धं कर्तुं शक्नुयाम् । प्रतीकाराक्षमत्वादबलया मया यत् त्वं करिष्यसि तत्तूष्णीं सह्यमेवेति भावः । इति प्रकटोऽर्थः ॥ अथ देव्यभिप्रेतो गूढार्थो यथा । एतत्पक्षे प्रथमार्धे दैत्य, ईश्वरेण, प्रहितः, अबलवान्, इति पदच्छेदे विशेषः । ततश्च हे दैत्य धूम्रलोचन । त्वं अबलवान् अशक्तः । बलैः काकैः संवृतः । बलं ना काकसीरिणोरि**त्यमरः** । अतस्त्वमासन्नमृत्युरसीति भावः । क्षीणशक्तित्वं काकगृध्रादिपरिवृतत्वं चासन्नमृत्योर्लक्षणम् । तदुक्तम् । **वैद्यके अरिष्टलक्षणे** अकस्मात् क्षीणशक्तित्वं लक्षणं तद्गतायुषः ॥ इति ॥ भूताः प्रेताः पिशाचाश्च गृध्रगोमायुवायसाः ॥ मुमूर्षुणाभिदृश्यन्ते स्वप्ने जागरितेऽपि च ॥ इति ॥ अतएव ईश्वरेण परमेश्वरेण प्रहितोऽसि मत्समीपमिति शेषः । मारणार्थमिति भावः । तस्मात् बलात् हठात्कारेण । एवं केशाकर्षणविह्वलाम् । मां नयसि नेतुमिच्छसि चेत् । ते तव । अहं अहङ्कारम् । अहमिति मान्तमव्ययमहङ्कारे । किंकरोमि तुच्छं करिष्यामि । त्वद्वधेन तवाहङ्कारं समूलमुच्छेत्स्यामीत्यर्थः । अथाव्ययं किमाक्षेपे तुच्छे प्रश्नवितर्कयोः ॥ **इत्येकाक्षररत्नमाला** ॥ ११ ॥

ऋषिरुवाच ॥ १२ ॥

इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ॥
हुंकारेणैव तं भस्म सा चकाराम्बिका तदा ॥ १३ ॥

अथ क्रुद्धं महासैन्यमसुराणां तदाम्बिकाम् ॥
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १४ ॥

ऋषिरिति ॥ १२ ॥

इत्युक्त इति । देव्या इत्युक्तः स धूम्रलोचनोऽसुरस्तां देवीं ग्रहीतुमभ्यधावत् । तदा सा अम्बिका देवी समीपागतं तं धूम्रलोचनम् । हुंकारेणैव स्वसमीपागमननिवारणार्थं प्रयुक्तेन क्रोधाग्निज्वालागर्भहुङ्कारमात्रेण भस्म चकार भस्मरूपं कृतवती । हुं लज्जायां निवारणे **इति हैमः** ॥

अथ पाठान्तरादि भस्म सेति पदद्वयस्थाने भस्मसादिति, तदेत्यत्र तत इति च क्वचित् पाठः ॥ १३ ॥

अथेति । अथ धूम्रलोचनभस्मीकरणानन्तरं असुराणां धूम्रलोचनानुयायिनां महासैन्यं कर्तृ । असुररूपमहासैन्यमित्यर्थः । राहोः शिर इतिवदभेदे षष्ठी । अथ वान्येषामवशिष्टानां धूम्रलोचनानुयायिनामसुराणां महासैन्यं । क्रुद्धं सत् तदा तस्मिन् काले अम्बिकां देवीं तीक्ष्णैः सायकैः बाणैस्तथा शक्तिसहितैः परश्वधैः परशुभिर्ववर्ष । शक्तिपरश्वधानां बहुत्वाद्ववर्षेति प्रयोगः ।

अथ पाठान्तरादि तदेत्यत्र तथेति पाठः क्वचित् । अम्बिकामित्यत्राम्बिकेति प्रथमान्तपाठे अम्बिका कर्त्री । असुराणां महासैन्यं कर्म तीक्ष्णसायकादिभिर्ववर्षेति योजना ॥ १४ ॥

ततो धुतसटः कोपात् कृत्वा नादं सुभैरवम् ॥
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ १५ ॥
कांश्चित् करप्राहारेण दैत्यानास्येन चापरान् ॥
आक्रम्य चाधरेणान्यान् स जघान महासुरान् ॥१६॥
केषांचित् पाटयामास नखैः कोष्ठानि केसरी ॥

तत इति । ततः असुरमहासैन्यकृतशरादिवर्षानन्तरम् । देव्याः स्ववाहनः स्वकीयवाहनभूतः सिंहः स्वशब्दो देवीतरसम्बन्धव्यावृत्यर्थः । वाहनशब्दस्य पुंस्त्वं छान्दसम् । अर्धर्चादित्वात् पुंस्त्वमिति **नागेशभट्टाः** । धुतसटः कम्पितकेसरः सन् सुभैरवमतिभयङ्करं नादं कृत्वा असुरसेनायां पपात प्रविवेश ॥

अथ पाठान्तरादि स्ववाहन इत्यत्र स्वशब्दस्थाने स, सु, तु, च, इति चतुर्विधः पाठो दृश्यते वाहनशब्दस्य नपुंसकत्वमपि ॥ १५ ॥

कांश्चिदिति । स सिंहः कांश्चिद्दैत्यान् करप्रहारेण सनखकरपञ्जराघातेन जघान हतवान् । अपरान् दैत्यान् आस्येन मुखेन तदन्तर्गतदशनदंष्ट्राभिश्चर्वणविदारणादिना जघान । अन्यान् महासुरान् अधरेण शरीराधोभागेनोरसा आक्रम्य प्रपीड्य । अधरेणाधरोष्ठेनाक्रम्याकृष्येति वा । जघान ॥

अथ पाठान्तरादि आक्रम्येत्यत्र आक्रान्त्येति, स जघानेत्यत्र निजघानेति च क्वचित् पाठः ॥ १६ ॥

केषांचिदिति । केसराः सटाः सन्त्यस्येति केसरी सिंहः केषांचिन्महासुराणां कोष्ठानि तत्संज्ञकान् जठराभ्यन्तरप्रदेशविशेषान् । तेचोक्ता **वैद्यतन्त्रे** स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ॥ हृदुन्दुकः फुफ्फुसश्च कोष्ठ इत्यभिधीयते ॥ इति ॥ कोष्ठशब्दस्य पुंसि कोष्ठोऽन्तर्जठरमिति पुंस्त्वानुशासनात् कोष्ठानीति नपुंसकत्वं छान्दसम् । नखैः पाटयामास विदा-

तथा तलप्रहारेण शिरांसि कृतवान् पृथक् ॥ १७ ॥

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ॥
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥ १८ ॥

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ १९ ॥

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ॥
बलं च क्षपितं कृत्स्नं देवीकेसरिणा ततः ॥ २० ॥

रयामास । तथा केषांचिन्महासुराणां शिरांसि तलप्रहारेण सनखकरचरणतलाघातेन पृथक् कृतवान् कायेभ्यो विश्लेषयामास ॥

अथ पाठान्तरादि कोष्ठानीत्यत्र कोष्ठान् स इति क्वचित् पाठः ॥१७॥

विच्छिन्नेति । तथा तेन सिंहेन अपरे महासुराः । विच्छिन्नानि बाहुशिरांसि स्कन्धदेशा येषां ते विच्छिन्नबाहुशिरसः कृताः । स्कन्धो भुजशिरोंऽसोऽस्त्री **त्यमरः** । किं च स सिंहः धुताः कम्पिताः केसराः येनैवंभूतःसन् अन्येषां महासुराणां कोष्ठात् रुधिराशयरूपाद्रुधिरं रक्तं पपौ च ॥१८॥

क्षणेनेति । अतिकोपिना भृशं क्रुद्धेन महात्मना महाकायेन तेन देव्या वाहनेन केसरिणा सिंहेन तत् सर्वं बलं दैत्यसैन्यं क्षणेन क्षयं नीतम् ॥१९॥

श्रुत्वेति । शुम्भः आदौ तं देव्यानयनार्थं प्रेषितं धूम्रलोचनमसुरं देव्या निहतं श्रुत्वा । ततः देवीकेसरिणा कृत्स्नं सर्वं बलं सैन्यं च क्षपितं नाशितं श्रुत्वा । युद्धात्पलाय्यागतेभ्य इति शेषः । चुकोपेत्युत्तरश्लोकेन पूर्णवाक्यता । अवान्तरवाक्यत्वान्मन्त्रत्वम् । क्षपितमिति क्षै क्षये इति भ्वादेर्णिजन्तस्य रूपम् । भोजमतेनास्य मित्वात् ह्रस्वः ॥

अथ पाठान्तरादि क्षयितमिति क्वचित् पाठः । तत्पक्षे क्षयः सञ्जातोऽस्येति तारकादित्वादितच् । केसरिणेति हेतौ तृतीया च ॥ २० ॥

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ॥
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥ २१ ॥

हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ॥
तत्र गच्छत गत्वा च सा समानीयतां लघु ॥२२॥

केशेष्वाकृष्य बध्वा वा यदि वः संशयो युधि ॥
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥२३॥

चुकोपेति। दैत्याधिपतिः शुम्भः चुकोप चुक्रोध। अत एव प्रस्फुरितौ अधरौ ओष्ठौ यस्य स प्रस्फुरिताधरः सन् । अधरशब्द ओष्ठसामान्यवाची। अधोवर्तिदशनच्छदस्यैव वाचक इति मते तु प्रस्फुरितः अधरो यस्येति विग्रहः । तौ यौ पूर्वं देव्या ग्रहणे शुम्भं प्रोत्साहितवन्तावित्यर्थः। चण्डमुण्डौ तन्नामानौ महासुरौ प्रति वक्ष्यमाणप्रकारेणाज्ञापयामास ॥ २१ ॥

हे चण्डेति। हे चण्ड हे मुण्ड युवां बहुभिर्बलैः सैन्यैः परिवारितौ सन्तौ तत्र देव्यवस्थानप्रदेशे गच्छत। गच्छतम् । वचनव्यत्ययश्छान्दसः। सैनिकाभिप्रायेण बहुवचनं वा। उत्तराध्याये आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः इति वक्ष्यमाणत्वात्। गत्वा च सा भवद्भ्यां पूर्वं कथिता रत्नभूता स्त्री लघु शीघ्रं समानीयताम् ॥

अथ पाठान्तरादि गच्छतं तत्र गत्वा चेति क्वचित्पाठः ॥ २२ ॥

आनयनप्रकारमाह । **केशेष्विति** । केशेष्वाकृष्य समानीयतामिति प्रथमः पक्षः । तथा नायाति चेद्रज्जुभिर्बध्वा समानीयतामिति द्वितीयः। तत्रापि यदि वः युष्माकं । बहुवचनं पूर्ववत् । संशयः परस्त्रीदेहस्पर्शशङ्का स्यात् तदा युधि युद्धे । युधीति युदिति क्विबन्तस्य सप्तमी। एकैकस्याशक्तौ मिलितैः सर्वैरसुरैः कर्तृभिः अशेषायुधैः सर्वशस्त्रैः करणैः । यस्य

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ॥
शीघ्रमागम्यतां बध्वा गृहीत्वा तामथाम्बिकाम् ॥२४॥

यस्योपयोगस्स्यात्तेन तेनेत्यर्थः । विनिहन्यतां मार्यताम् । इति तृतीयः पक्षः । पूर्वपूर्वासम्भवे उत्तरोत्तरो योज्य इति भावः ॥ २३ ॥

तस्यामिति । दुष्टायां बलावलेपदूषितायाम् । वक्ष्यते चाग्रे शुम्भेनैव बलावलेपदुष्टे त्वमिति । तस्यां हतायां मारितायां तद्वाहनभूते सिंहे च विनिपातिते मारिते सति शीघ्रमागम्यताम् । इत्याज्ञाप्य किञ्चित्कोपवेगेऽपसृते विचारितवान् । स्त्रियो हि मानिन्यः । न ता एकपदे वश्या भवेयुः । तासां वधश्चायुर्यशःश्रीहरः । तस्मात्तामत्रानीय स्वयमेवानुनेतुं प्रयतिष्ये । इति विचार्य पुनराह । अथ अथवा सा न हन्तव्या किन्तु द्वितीयपक्षाश्रयणेन तां अम्बते यो मां जयति सङ्ग्रामे इत्यादि बहुभाषते साम्बिका ताम् । वाचालामित्यर्थः । अबि शब्दे भ्वादिः । अथवा हिमालये तिष्ठति रूपवत्यस्ति निर्भयं भाषते च तस्मात्सा शिवभार्या पार्वत्यपि स्यादित्यभिप्रायेणाम्बिकाशब्दप्रयोगः कृतः । जीवन्तीमेव बध्वा गृहीत्वा शीघ्रमागम्यताम् । इति केचित् हतामपि तां तत्सौन्दर्यदशनार्थं बध्वा गृहीत्वा आगम्यतामिति अन्ये हन्तिं ताडनार्थत्वेनाङ्गीकृत्य विनिहन्यतां ताड्यताम् । ततस्तस्यां हतायां ताडितायां तां बध्वा गृहीत्वा आगम्यतामिति व्याचक्षते ॥ २४ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमाहात्म्ये
धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥ ६ ॥

इतीति । धूम्रलोचनस्य वधो यस्मिन् स धूम्रलोचनवधः । सप्तत्रिंशदक्षरात्मकमेतत् षष्ठाध्यायसमाप्तिवाक्यम् ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
षष्ठाध्यायव्याख्या ॥ ६ ॥

अथ सप्तमाध्यायः

ऋषिरुवाच ॥ १ ॥

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ॥
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥ २ ॥
ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ॥

ऋषिरिति । अथ सप्तमाध्यायमन्त्रविभागकारिकाः । अथो ऋषिरुवाचेति सप्तमे गद्यमन्त्रकः ॥ आज्ञप्ताद्याः श्लोकमन्त्रास्त्रयोविंशतिरीरिताः ॥ ततश्चर्षिरुवाचेति गद्यात्मा मनुरेकक: ॥ तावानीतौ च यस्माच्च श्लोकमन्त्रा उभौ मतौ ॥ सर्वे मन्त्रास्तु सर्गेऽस्मिन् सप्तविंशतिरीरिताः ॥ श्लोकमन्त्रास्तु गदितास्तत्र वै पञ्चविंशतिः ॥ गद्यात्मकावुभौ श्लोकाः श्लोकमन्त्रसमा मताः ॥ इति ॥ अथ मन्त्रव्याख्या । ऋषिरुवाचेति ॥ १ ॥

आज्ञप्ताइति । एवं शुम्भेनाज्ञप्ताश्चण्डमुण्डौ पुरोगमौ अग्रेसरौ येषां ते चण्डमुण्डपुरोगमाः ते दैत्याः । चत्वारि हस्त्यश्वरथपदात्याख्यानि अङ्गान्यवयवा यस्य तच्चतुरङ्गम् । तच्च तद्बलं सैन्यं च चतुरङ्गबलं तेनोपेताः सहिताः । अभ्युद्यतानि सज्जीकृतानि आयुधानि यैस्ते एवंभूताश्च सन्तः देव्यानयनार्थं ययुः ॥

अथ पाठान्तरादि अत्र अहं पूर्वमहं पूर्वमित्येवंवादिनो द्रुतम् ॥ ग्रहीतुकामास्तां देवीं शूलपट्टिशधारिणः ॥ इत्येकोऽधिकः श्लोकः क्वचित् पठ्यते ॥ २ ॥

ददृशुरिति । तस्ते दैत्याः । काञ्चने सौवर्णे । औत्सर्गिकोऽण् । वस्तुतस्तु वृद्धाच्छेन भवितव्यम् । महति अत्युन्नते । शैलेन्द्रस्य हिमा-

सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥ ३ ॥

ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्धताः ॥
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥ ४ ॥

ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति ॥

लयस्य शृङ्गे शिखरे । सिंहस्योपरि व्यवस्थिताम् सिंहारूढामित्यर्थः । ईषद्धासाम् । ईषत् अल्पः हासो हास्यं यस्यास्ताम् । सस्मितामित्यर्थः । एकं भस्मसात्कृतं श्रुत्वापि अन्ये तामेवावस्थामनुभवितुमागता इत्याश्चर्यात् स्मितम् । देवीं ददृशुः ॥ ३ ॥

ते इति । उद्धता दृप्तास्ते दैत्याः । तां देवीं दृष्ट्वा । केचित् आकृष्टा ज्याकर्षणेन नमिताश्चापा यैस्ते आकृष्टचापाः सन्तो दूरत एव युधि जित्वा समादातुं ग्रहीतुमुद्यममुद्योगं चक्रुः । अन्ये असिनां धरा असिधराः खड्गधारिणः समीपगाः सन्तस्तां निर्जित्य समादातुमुद्यमं चक्रुरिति यथाक्रमं योजना । आकृष्टचापा असिधरा इति वक्तव्ये अकारलोप आर्षः । अथ वा आकृष्टचापासिधरा इत्येकमेव पदम् । तत्पक्षे आकृष्टचापाश्च असिधराश्च आकृष्टचापासिधराः । केचिदाकृष्टचापाः केचिदसिधराश्च सन्तः । युद्धेन तां समादातुमुद्यमं चक्रुः । तथा अन्ये निःशस्त्रास्तु तत्समीपगाः सन्तो युद्धं विनैव समादातुमुद्यमं चक्रुरिति योज्यम् ।

अथ पाठान्तरादि उद्धता इत्यत्रोद्यता इति क्वचित् पाठः । स न युक्तः । उद्यमं चक्रुरित्यनेन पौनरुक्त्यात् ॥ ४ ॥

तत इति । ततः अम्बिका देवी तान् आत्मानं ग्रहीतुमुद्यतान् अरीन् प्रति । प्रतेः कर्मप्रवचनीयत्वात्तद्योगे द्वितीया । उच्चैरतितराम् कोपं चकार । तदा कोपेन अस्या अम्बिकाया वदनं मषीवर्णं लेखनसाधनद्रव-

कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥ ५ ॥
भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ॥
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥ ६ ॥
विचित्रखङ्गाङ्गधरा नरमालाविभूषणा ॥

द्रव्यसदृशं कृष्णवर्णमभूत् । मलिनाम्बु मषी मसीति **हैमः** । यद्यपि देव्याः श्वेतवर्णत्वात् कोपे वदनेन रक्तवर्णेन भवितव्यम् तथाप्यचिन्त्यशक्तिवस्तुस्थले सर्वसम्भवान्मषीवर्णत्वमविरुद्धम् । दृश्यते चाग्रेऽस्या भालदेशात् काल्याख्यायाः कृष्णवर्णाया एव शक्तेरुत्पत्तिः । अथ वा हैमकोशे मलिनाम्बुशब्देन प्रावृण्नदीजलवदीषद्रक्तं जलं ग्राह्यम् । तद्वद्वर्णो यस्येति व्याख्याने किञ्चिदिष्टसिद्धिः स्यात् कदाचित् । मषीशब्दः पारिजातपुष्पवृन्तवाचीति कश्चित् सति च तस्य विश्वास्यत्वे सर्वं सुस्थमेव ॥

अथ पाठान्तरादि मषीत्यत्र मसीति पाठोऽपि क्वचित् ॥ ५ ॥

भ्रुकुटीति । भ्रुवोः कुट्या वक्रतया कुटिलात् भीषणात् तस्या देव्याः ललाटं फलकमिव ललाटफलकम् । विस्तृतभालप्रदेशात् । करालं भीषणं दन्तुरं वा वदनं यस्याः सा करालवदना । करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत् इति **मेदिनी** । असिश्च पाशश्चानयोः समाहारः असिपाशं तद्वती असिपाशिनी । मत्वर्थीय इनिः । ऋन्नेभ्यो ङीप् । काली कृष्णवर्णत्वात्तन्नामिका शक्तिः द्रुतं सहसा विनिष्क्रान्ता विनिर्गता ॥ ६ ॥

कालीं विशिनष्टि **विचित्रेत्यादिना** । विचित्रमद्भुतं भयंकरमित्यर्थः । यत् खट्वाङ्गं दण्डारोपितनृशीर्षम् । खट्वापाद इत्यन्ये । तस्य धरा धारिका । इदं शूलस्याप्युपलक्षणम् । तस्याग्रतस्तथा काली शूलपातविदारितान् ॥ खट्वाङ्गपोथितांश्चारीन् कुर्वती व्यचरत्तदेति वक्ष्यमाणत्वात् । एतेन चतुर्भुजा

द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥ ७ ॥
अतिविस्तारिवदना जिह्वाललनभीषणा ॥
निमग्ना रक्तनयना नादापूरितदिङ्मुखा ॥ ८ ॥
सा वेगेनाभिपतिता घातयन्ती महासुरान् ॥

खड्गपाशशूलखड्गाङ्गधारिणीयम् । नरमाला नरमुण्डमाला । शिरोमालाविभूषणे इत्येकादशे वक्ष्यमाणत्वात् । विवेश मूर्ध्नस्रजमुद्वहन्तीति **वामनपुराणाच्च** । मध्यमपदलोपी समासः । सैव विभूषणं यस्याः सा नरमालाविभूषणा । द्वीपिनो व्याघ्रस्य चर्म परीधानमधोवासो यस्याः सा । अन्येषामपिदृश्यते इति परीत्यस्य दीर्घः । शुष्कमांसा अस्थिमात्रावशेषशरीरा । अतएव भैरवाणि वस्तून्यतिक्रान्तातिभैरवा । अतिभीषणेत्यर्थः । अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः समासान्तरे अतिभैरवीति स्यात् ॥

अथ पाठान्तरादि क्वचिद्विचित्रेत्यत्र त्रिशूलेति भैरवेत्यत्र भीषणेति च पठ्यते ॥ ७ ॥

अतीति । अति विस्तारि अत्यन्तविस्तृतं वदनं यस्याः सा अतिविस्तारिवदना व्यात्तमुखेत्यर्थः । जिह्वाया ललनं विलासः जिघत्सया इतस्ततश्चालनं तेन भीषणा । लड विलासे भ्वादिः डलयोरेकत्वस्मरणाड्डकारस्य लकारः । लल ईप्सायामिति चौरादिकस्य पाक्षिकणिजभावे वा रूपम् । निमग्ने अन्तःप्रविष्टे आसमन्ताद्रक्ते च नयने यस्याः सा निमग्नारक्तनयना । नादेनारावेणापूरितानि दिङ्मुखानि दिगन्तरालानि यया सा नादापूरितदिङ्मुखा ॥

अथ पाठान्तरादि विस्तारीत्यत्र विस्तारेति वा विस्तीर्णेति वा क्वचित् पाठः ॥ ८ ॥

सेति । तत्र सुरारीणां दैत्यसेनापतीनां सैन्ये वेगेनाभिपतिता प्रविष्टा सा काली महासुरान् दैत्यसेनापतीन् घातयन्ती घ्नती तद्बलं तेषां सैन्यं अभ-

सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥ ९ ॥
पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् ॥
समादायैकहस्तेन मुखेचिक्षेप वारणान् ॥ १० ॥
तथैव योधतुरगै रथं सारथिना सह ॥
निक्षिप्य वक्त्रे दशनैश्चर्वयत्यतिभैरवम् ॥ ११ ॥

क्षयत । घातयन्तीत्यत्र स्वार्थे णिचि लक्षणहेत्वोरिति शतृप्रत्यये उगितश्चेति ङीप् । क्वचिच्चुरादिभिन्नादपि स्वार्थे णिज् भवति । क्वचिण्णिजभावेऽपि णिजर्थप्रतीतिः । उक्तं च **हरिणा** निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजिष्यते ॥ धात्वर्थानुप्रवेशोऽपि बुध्यारोपाण्णिचं विना ॥ इति ॥ ९ ॥

अभक्षयत तद्बलमित्युक्तं तत्प्रकारमाह । **पार्ष्णीति** । पार्ष्णिग्राहा गजानां पश्चाद्भागरक्षकाः । कर्मण्यण् । अङ्कुशग्राहिण आधोरणाः ताच्छील्ये णिनिः । योधा गजपृष्ठस्था वीराः । घण्टे गजपार्श्वभागलम्बिन्यौ । एतैः समन्वितान् वारणान् गजान् । एकहस्तेन समादाय मुखे चिक्षेप । निक्षिप्तवती ॥

अथ पाठान्तरादि अङ्कुशग्राहीत्यत्राङ्कुशग्राहेत्यपि पाठः क्वचित् ॥१०॥

तथैवेति । तथैव तद्वदेव । योधो रथी । तुरगा रथाश्वाः । तैः । सारथिना च सह रथं रथान् जात्यभिप्रायेणैकवचनं । मुखे निक्षिप्य दशनैर्दन्तैः अतिभैरवं यथा तथा अतिभीषणप्रकारेणेत्यर्थः । चर्वयति चचर्व दन्तैर्निष्पिष्य भक्षयामास । चर्व अदने इत्यस्माद्भौवादिकात्स्वार्थे णिच् । लट् छान्दसः ।

अथ पाठान्तरादि योधतुरगैरित्यत्र योधमिति द्वितीयान्तव्यस्तंपदत्वेन पाठे तुरगैः सह योधं योधान् सादिनः । सारथिना सारथिभिः सह रथं रथांश्चेति योजना । चर्वयन्तीति शत्रन्तपाठे आसीद्दिति शेषः ॥ ११ ॥

एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥ १२ ॥

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ॥
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥१३॥

बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ॥

एकमिति। एकं एकान् कांश्चिद्दैत्यान् इत्यर्थः । केशेषु जग्राह गृहीत्वा मारयामास । अथ च अपरं अपरान् ग्रीवायां जग्राह गृहीत्वा मारयामास । अन्यं अन्यांश्च पादेनाक्रम्य सम्मर्द्यैव आकृष्यैव वा । अपोथयत् हतवती । धातूनामनेकार्थत्वाद्भाषार्थस्यापि पोथयतेर्हिंसार्थत्वम् । उक्तं च **हरिणा**। पाठो व्याख्या च धातूनां दृश्यन्ते स्वैरिणः क्वचित् । प्रयोग-एव बलवांस्तान् व्यवस्थापयत्यपि ॥ इति ॥ अथ वा पुथ् हिंसायामिति दैवादिकात् स्वार्थे णिच् । अन्यं अन्यानुरसा उरस आघातेनापोथयत् ॥ अत्र श्लोकद्वये केषांञ्चित्पदार्थानां बहुत्वेऽपि तद्वाचकपदानामेकवचनान्तत्वेन प्रयोग उत्सर्गत एकवचनस्यानुशिष्टत्वात् ॥

अथ पाठान्तरादि अपोथयदित्यत्रापोटयदिति असूयदिति अताडयदिति वा पाठः ॥ १२ ॥

तैरिति । तैश्चण्डमुण्डादिभिरसुरैः मुक्तानि प्रयुक्तानि शस्त्राणि खड्गशक्तिपरश्वधादीनि तथा महास्त्राणि आग्नेयपार्जन्यवायव्यादीनि च। हस्तक्षेप्यं शस्त्रम् मन्त्रप्रेर्यमस्त्रमिति शस्त्रास्त्रयोर्भेदः । मुखेन जग्राह । रुषा दशनैर्दन्तैर्मथितान्यपि । चूर्णीकृतानि च । अपिश्चार्थे । तयेति शेषः। ॥ १३ ॥

बलिनामिति। बलिनां बलवतां दुरात्मनां दुष्टस्वभावानां असुराणां

ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥ १४ ॥
असिना निहताः केचित् केचित् खट्वाङ्गताडिताः ॥
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥१५॥
क्षणेन तद्बलं सर्वमसुराणां निपातितम् ॥
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥१६॥
शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥

तत्सर्वं बलं सैन्यं ममर्द पादादिभिर्निर्ष्पिपेष। मृद् क्षोदे क्र्यादिः । अन्यानसुरानभक्षयच्च । तथा अन्यानताडयच्च ।

अथ पाठान्तरादि दुरात्मनामित्यत्र महात्मनामिति क्वचित् पाठः । महाकायानामिति तदर्थः ॥ १४ ॥

असिनेति । केचिदसुरा असिना निहता आहता विनाशं मरणं जग्मुरवापुः । केचित् खट्वाङ्गेन ताडिता विनाशं जग्मुः । तथा केचित् दन्ताग्रैरभिहताश्चर्विता विनाशं जग्मुः ॥

अथ पाठान्तरादि दन्तेत्यत्र दंष्ट्रेति तथेत्यत्र तदेति वा रणे इति वा क्वचित् पाठः ॥ १५ ॥

क्षणेनेति । चण्डः चण्डासुरः । तदसुराणां सर्वं बलं काल्या क्षणेन निपातितम् हतं दृष्ट्वा तां अतिभीषणां कालीमभिदुद्राव । ग्रहीतुमभिमुखं धावितवान् । द्रु गतौ लिट् ।

अथ पाठान्तरादि बलं सर्वमित्यत्र महासैन्यमिति क्वचित् पाठः ॥१६॥

शरवर्षैरिति । महासुरो मुण्डश्च भीमाक्षीं भीषणनेत्रां निमग्नारक्तनयनामित्यर्थः । तां कालीं महाभीमैरतिभयानकैः शरवर्षैर्बाणवृष्टिभिः । तथाक्षिप्तैर्मुक्तैः सहस्रेण सहस्रेणेति सहस्रशः । चक्रैस्तन्नामकैरायुधविशेषैश्च ।

छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥१७॥
तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ॥
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥१८॥
ततो जहासातिरुषा भीमं भैरवनादिनी ॥

छादयामास । अथ वा शरवर्षैरिति पूर्वार्धस्य पूर्वश्लोकोत्तरार्धेन सहान्वयः । यथा । चण्डो महाकालीमभिदुद्राव शरवर्षैश्छादयामास चेति। ततः मुण्डः स्वक्षिप्तैः सहस्रशश्चक्रैश्छादयामासेति । सङ्ख्यैकवचनाच्च वीप्सायामिति शस् प्रत्ययः ।

अथ पाठान्तरादि मुण्डक्षिप्तैरिति समस्तपाठो न साधुः ॥ १७ ॥

तानीति । तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथा सुरैः ॥ मुखेन जग्राह रुषेत्युक्तत्वात्तन्मुखं काल्या मुखं विशमानानि तानि मुण्डक्षिप्तान्यनेकानि सहस्रश्चक्राणि । घनोदरं सजलमेघमध्यं विशमानानि सुबहुन्यर्कबिम्बानि यथा । सूर्यबिम्बानीव बभुः शुशुभिरे । यथाशब्द इवार्थे । काल्या मुखान्तरभागस्यान्धकारव्याप्तत्वात् कृष्णमेघसादृश्यम् । चक्राणामतितेजस्वित्वाच्चार्कबिम्बसादृश्यम् । अर्कबिम्बानां बहुत्वस्याप्रसिद्धेरभूतोपमेयम् । नतूत्प्रेक्षा यथाशब्दस्योत्प्रेक्षाव्यञ्जकत्वाभावात् । अथ वा घनोदरं विशमानानि सुबहूनि अर्कस्यार्ककिरणानां बिम्बानीव इन्द्रधनूंष्विवेत्यर्थः । बभुः । विंशतेः शानच् छान्दसः ताच्छील्ये चानश् वा ॥ १८ ॥

तत इति । ततः काली अतिरुषा अतिक्रोधेन भैरवं नदत्येवशीला भैरवनादिनी तथा करालं भीषणं दन्तुरं वा यद्वक्त्रं तस्यान्तः अन्तर्भागे दुर्दर्शास्तेजास्वितया दुःखेन दृश्या ये दशना दन्तास्तैरुज्वला दीप्यमाना च भीमं शत्रूणां भयजनकं यथा स्यात्तथा अत्युच्चैरित्यर्थः । जहास हसितवती ॥

काली करालवक्त्रान्तर्दुर्दर्शदशनोज्वला ॥१९॥
उत्थाय च महासिं ह देवी चण्डमधावत ॥
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥२०॥
अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ॥

अथ पाठान्तरादि करालवक्त्रान्तेत्यदन्तत्वेन क्वचित् पाठः । तत्पक्षे अन्तशब्दस्य मध्यवाचित्वात् समान एवार्थः । अथ वा करालौ यौ वक्त्रान्तौ मुखप्रान्तभागौ तत्र दुदर्शौ यौ दशनौ बहिर्निर्गते वक्रदंष्ट्रे ताभ्यामुज्वलेति व्याख्येयम् । करालवक्रान्ता इत्याबन्तभिन्नपदत्वेनापि पाठः क्वचित् । तदा करालो वक्त्रान्तो मुखमध्यभागो यस्याः दुर्दर्शैर्दशनैरुज्वला चेति व्याख्या ॥ १९ ॥

उत्थायेति । देवी काली अत्र देवीपदेन काल्युच्यते । महासिं महान्तं खड्गम् । उत्थायोत्थाप्य । अन्तर्भावितण्यर्थोऽत्र उत्तिष्ठतिः । उद्यम्येत्यर्थः । हेति पादपूरणे । तु हि च स्म ह वै पादपूरणे **इत्यमरः** । चण्डं चण्डासुरमनुलक्ष्य अधावत । तङ् छान्दसः । ततस्तं केशेषु गृहीत्वा धृत्वा तेन असिना अस्य चण्डस्य शिरः अच्छिनत् ॥

अथ पाठान्तरादि महासिंहमिति पाठे हमिति कोपाविष्कारेऽव्ययम् । कोपात् हं हमित्युच्चरन्तीत्यर्थः । उत्खाय च महासिं सेति पाठे सा महासिं उत्खाय कोशादुद्धृत्येति व्याख्या । अत्र छिन्ने शिरसि दैत्येन्द्रश्चक्रे नादं सुभैरवम् ॥ तेन नादेन महता त्रासितं भुवनत्रयम् ॥ इत्येकः श्लोकोऽधिकः क्वचित् पठ्यते ॥ २० ॥

अथेति । अथ चण्डशिरच्छेदानन्तरम् । मुण्डो महासुरः । चण्डं निपातितं दृष्ट्वा तां चण्डघातिनीं कालीं अभ्यधावत् । सा काली तं मुण्डमपि रुपारोपेण खङ्गाभिहतं खङ्गप्रहारेण छिन्नमस्तकं कृत्वा भूमावपातयत् ।

तमप्यपातयद्भूमौ सा खड्गेभिहतं रुषा ॥२१॥

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ॥
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥२२॥

शिरश्चण्डस्य काली च गृहीत्वा मौण्डमेव च ॥
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥ २३ ॥

अथ पाठान्तरादि सा खड्गाभिहतमित्यत्र खट्वाङ्गाभिहतमिति कचित् पाठः ॥ तत्पक्षे खट्वाङ्गेन मस्तकच्छेदासम्भवात्तत्ताडनेन गतप्राणं कृत्वा सशिरस्कमेव अपातयदित्यर्थः ॥ २१ ॥

हतेति । ततश्चण्डमुण्डवधानन्तरम् ॥ हतात् काल्या मारितात् शेषमवशिष्टं हतशेषं सैन्यं कर्तृ चण्डं चण्डासुरं सुमहत् वीर्यं यस्य स सुमहावीर्यस्तं मुण्डं महासुरं च निपातितं हतं दृष्ट्वा भयेनातुरं व्याकुलं भयातुरं सद्दिशो भेजे सर्वतः पलायितमित्यर्थः ॥ २२ ॥

शिर इति । काली च काली तु । चण्डस्य शिरः तथा मुण्डस्येदं मौण्डं शिरश्च गृहीत्वा चाण्डिकां कौशिकीं देवीमभ्येत्य उपगम्य । अट्टति हिनस्तीत्यट्टः पचाद्यच् । भयजननेन शत्रुहिंसक इत्यर्थः । स चासौ हासश्च अट्टहासः । प्रचण्डो महान् योऽट्टहासः तेन मिश्रं सहितं यथा स्यात्तथा प्राह विभक्तिरूपकमव्ययमेतत् । उच्चैर्हसन्त्युवाचेत्यर्थः ॥

अथ पाठान्तरादि मौण्डमित्यत्र मुण्डमिति कचित्पाठः । स च पूर्वश्लोके खट्वाङ्गाभिहतमिति पाठे एवोपयुज्यते तत्पक्षे खट्वाङ्गेन शिरश्छेदस्यासम्भवात् चण्डस्य शिरः मुण्डं च अछिन्नमस्तकं समग्रमेव गृहीत्वेत्यर्थलाभसम्भवात् ॥ २३ ॥

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ॥
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥२४॥

ऋषिरुवाच ॥ २५ ॥

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ॥
उवाच कालीं कल्याणी ललितं चण्डिकावचः ॥२६॥

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ॥

मयेति । अत्र अस्मिन् युद्धयज्ञे मया तव एतौ चण्डमुण्डौ महापशू उपहृतौ हत्वोपहारीकृतौ । शुम्भं निशुम्भं चेत्येतौ महापशू त्वं स्वयमेव हनिष्यसि । ध्वनितं चेदं पञ्चमाध्याये एवमेवेतिश्लोके गूढार्थेन देव्या ॥२४॥

ऋषिरिति ॥ २५ ॥

ताविति । ततः कल्याणी सर्वमङ्गला चण्डिका तौ महासुरौ चण्डमुण्डावानीतौ दृष्ट्वा कालीं प्रति ललितं मधुरं वचः वक्ष्यमाणमुवाच । अत्र चण्डमुण्डयोः शिरोमात्रानयनेऽपि चण्डमुण्डावित्युक्तिः सर्वस्मिन् शरीरे शिरस एव प्राधान्यात् । एवमुत्तरश्लोकेऽपि ज्ञेयम् ॥

अथ पाठान्तरादि इत उत्तरं देव्युवाचेति क्वचित् पठ्यते ॥ २६ ॥

यस्मादिति । हे देवि कालि । यस्माद्धेतोस्त्वं चण्डं च मुण्डं च गृहीत्वा मत्समीपमुपागतासि ततस्तस्माद्धेतोः लोके चामुण्डेति ख्याता प्रसिद्धा भविष्यसि । चण्डमुण्डौ ग्राह्यत्वसम्बन्धेन स्तो यस्या इत्यर्थे सामासिकाच्चण्डमुण्डपदान्मत्वर्थीये अच्प्रत्यये चण्डशब्दस्य पृषोदरादित्वाच्चादेशे स्त्रीत्वेनादन्तत्वाट्टापि चामुण्डेति सिध्यति ॥

चामुण्डेति ततो लोके ख्याता देवि भविष्यसि ॥२७॥

अथ पाठान्तरादि देवीति प्रथमान्तपाठे चामुण्डेति ख्याता देवी भविष्यसीत्यन्वयः ॥ २७ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमाहात्म्ये
चण्डमुण्डवधो नाम सप्तमोऽध्यायः ॥ ७ ॥

इतीति । चण्डमुण्डयोर्वधो यस्मिन् स चण्डमुण्डवधः सप्तत्रिंशदक्षरात्मकं सप्तमाध्यायसमाप्तिवाक्यमेतत् ॥ ७ ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
सप्तमाध्यायव्याख्या ॥

अथाष्टमोऽध्यायः

ऋषिरुवाच ॥ १ ॥

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ॥
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥२॥

ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥

ऋषिरिति । अथाष्टमाध्यायमन्त्रविभागकारिकाः । अथाष्टमे ऋषिरुवाचेति गद्यात्मको मनुः ॥ चण्डे चेत्यादयः पञ्च पञ्चाशत् श्लोकमन्त्रकाः ॥ मुखेन काली जगृहे इत्यर्धश्लोकमन्त्रकः ॥ ततोऽसाविति षट्श्लोकमन्त्रा सर्वे त्रिषष्टिकाः ॥ श्लोकमन्त्रा एकषष्टिरेकोऽर्धश्लोकमन्त्रकः ॥ एको गद्यात्मको मन्त्रः श्लोकाः सार्धैकषष्टिकाः ॥ इति ॥ अथ मन्त्रव्याख्या ॥ ऋषिरुवाचेति ॥ १ ॥

चण्डे चेति । चण्डे दैत्ये निहते च सति मुण्डे दैत्ये विनिपातिते हते च सति । बहुलेषु बहुषु सैन्येषु सैनिकेषु । सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते **इत्यमरः** । सेनाया वा इति ण्यः । क्षयः सञ्जातो येषां ते क्षयिताः तेषु क्षयितेषु मृतेषु सत्स्वित्यर्थः ॥ तारकादित्वादितच् । असुराणामीश्वरोऽसुरेश्वरः शुम्भः । चुकोपेति शेषः । अस्य श्लोकस्योत्तरश्लोकेन सहैकवाक्यत्वेऽपि भिन्नमन्त्रत्वाद्वाक्यभेदोऽङ्गीकृतः ॥

अथ पाठान्तरादि क्षयितेष्वित्यत्र क्षपितेष्विति क्वचित् पाठः ॥ २ ॥

तत इति । ततः कोपेन पराधीनं चेतो यस्य स कोपपराधीनचेताः प्रतापवान् शुम्भः । दैत्यान् प्रति दैत्यसेनापतीन् प्रतीत्यर्थः । कर्मणि शेषे

उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥३॥

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥
कम्बूनां चतुराशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ४ ॥

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ॥
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥५॥

षष्ठी । सर्वसैन्यानां सर्वसेनानाम् । स्वार्थे ष्यञ् उद्योगं उद्योजनं सज्जीकरणमिति यावत् । आदिदेश आज्ञापयामास । आदिशतेर्वचनार्थत्वाद्द्विकर्मकत्वम् । हेति पादपूरणे ।

अथ पाठान्तरादि इत उत्तरम् शुम्भ उवाचेति क्वचित् पठ्यते ॥३॥

किमादिदेश तदाह । **अद्येति ।** अद्य सर्वदोद्यतायुधत्वादुदायुधसंज्ञकाः षडशीतिर्दैत्याः दैत्यसेनापतयः । सर्वबलैः सर्वैः स्वस्वसैन्यैर्वृताः सन्तः । तथा कम्बूनां भाषायां कम्बूसंज्ञकानां दैत्यसङ्घानां चतुराः युद्धनिपुणाः अशीतिः सेनापतयश्चेति शेषः । स्वबलैर्वृताः सन्तो युद्धाय निर्यान्तु । चतुरा अशीतिरिति वक्तव्ये सवर्णदीर्घश्छान्दसः अथ वा चतुरशीतिसङ्ख्याका दैत्या इति व्याख्येयम् । पृषोदरादित्वादशीतिपदादेरकारस्य दीर्घः ॥ ४ ॥

कोटीति । कोटिवीर्याणि अतिवीर्यवत्वात्तदाख्यानि असुराणां पञ्चाशत् कुलानि । सजातीयसङ्घाः । वै पादपूर्तौ । तथा धौम्राणां धूम्रवंश्यत्वात्तत्संज्ञकानामसुराणां शतं कुलानि । सजातीयसङ्घाः ममाज्ञया निर्गच्छन्तु । कुलं जनपदे गोत्रे सजातीयगणेऽपि च ॥ भवने च तनौ क्लीबमिति **मेदिनी** ॥

अथ पाठान्तरादि । धौम्राणामित्यत्र धूम्राणामिति क्वचित् पाठः ॥५॥

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ॥
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥ ६ ॥

इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ॥
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥ ७ ॥

आयातं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ॥

कालका इति । कालकादयो दैत्यसङ्घभेदाः । तत्र कालकाः कालवंश्याः । दौर्हृदाः दुर्हृद्वंश्याः । मौर्या मुरवंश्याः । कालकेयाः । कालकावंश्याः । कालका दैत्यमाता स्यादिति **कोशान्तरम्** । एते असुराः सज्जाः सन्नद्धाः सन्तो ममाज्ञया त्वरिताः सत्वरा युद्धाय निर्यान्तु । निर्यान्तु-आज्ञयेत्यत्र वाक्ये संहिताया अनित्यत्वान्न यण् ॥

अथ पाठान्तरादि मौर्या इत्यत्र मौर्व्या इति कालकेया इत्यत्र कालिकेया इति आज्ञयेत्यत्र चाज्ञयेति त्वरिता इत्यत्र त्वरितमिति च क्वचित् पठ्यते एतदुत्तरं ऋषिरुवाचेत्यपेक्षितमपि नास्ति क्वचित् पठ्यते तदनार्षम् ॥६॥

इतीति । भैरवं घोरं अमोघं इत्यर्थः । शासनमाज्ञा यस्य स भैरवशासनः । असुरपतिः शुम्भः इति सर्वान् दैत्यानाज्ञाप्य स्वयं बहुभिर्महासैन्यानां महासैनिकानां सहस्रैर्वृतः सन्नगरान्निर्जगाम ॥

अथ पाठान्तरादि अत उत्तरम् उत्पाता बहवस्तत्र प्रादुरासन्सहस्रशः॥ उत्पातमेघा ववृपुरस्थिशोणितकर्दमम् ॥ क्रव्यादा व्यनदन् घोरं शिवाश्चापि ववाशिरे ॥ तानुत्पातानानादृत्य प्रययौ स हिमाचलम् ॥ इतिश्लोकद्वयमधिकं क्वचित् पठ्यते ॥ ७ ॥

आयातमिति । चण्डिका कौशिकी देवी अतिभीषणं संख्यातीतत्वाद्भयावहं तत् सैन्यं तस्य शुम्भस्य सैन्यमिति वा आयातमागतं दृष्ट्वा

ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥ ८ ॥
ततः सिंहो महानादमतीव कृतवान् नृप ॥
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ॥ ९ ॥
धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ॥

ज्यास्वनैर्धनुर्गुणध्वनिभिः धरणीगगनयोरन्तरमवकाशं पूरयामास । स्वस्य युद्धौत्सुक्यं धनुर्ज्यानिस्वनेन सूचमासेत्यर्थः ॥

अथ पाठान्तरादि आयान्तमिति शत्रन्तः पुल्लिङ्गपाठः प्रामादिकः ॥८॥

तत् इति । हे नृप राजन् सुरथ । ततः देव्या ज्यास्वनानन्तरम् । सिंहो देवीवाहनभूतः । स्वोत्साहदर्शनार्थं अतीव महानादं गर्जनां कृतवान् । अम्बिका देवी तन्नादं तस्य सिंहस्य नादं निजघण्टायाः स्वनेनोपबृंहयदवर्धयत च । अडभावश्छान्दसो वा आगमशास्त्रस्यानित्यत्वाद्वा ज्ञेयः ।

अथ पाठान्तरादि तन्नादमित्यत्र तान्नादानिति क्वचित् पाठः । तान्नादान् पूर्वोक्तान् धनुर्ज्यासिंहयोर्नादानिति तदर्थः । चोपबृंहयदित्यत्र चाप्यबृंहयदिति क्वचित् पाठः स च युक्तः ॥ ९ ॥

धनुर्ज्येति । विस्तारितं महानादकरणार्थं प्रसारितमाननं यया सा विस्तारितानना काली नादेन स्वारावेण आपूरितानि दिशां मुखान्यन्तरालानि यया एवं भूता सती भीषणैः अत्युच्चत्वात्सर्वभूतभयजनकैः निनादैः स्वकीयारावैः । धनुर्ज्या च सिंहश्च घण्टा च धनुर्ज्यासिंहघण्टास्तासां । जिग्ये जितवती । भजे शम्भोश्चरणयोरितिवत् कर्मणि शेषे षष्ठी । नादानित्यस्याध्याहारो वा धनुर्ज्यानिनादान् तदपेक्षयात्युच्चैः स्वकीयनादैर्लोपयामासेत्यर्थः । आत्मनेपदं छान्दसम् । केचिज्जिग्ये इत्यस्य लौकिकरीत्या साधुत्वार्थं नादापूरितदिङ्मुखा काली धनुर्ज्यासिंहघण्टानां भीषणैर्निनादैर्जिग्ये जिता इति

निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥१०॥

तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥
देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥११॥

एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ॥

व्याचक्षते तन्न युक्तम् । धनुर्ज्यानिनादकथनानन्तरं काल्या निनादकथनात् धनुर्ज्यानिनादापेक्षया कालीनिनादोत्कर्षप्रतिपादने ग्रन्थस्य तात्पर्यात् ।

अथ पाठान्तरादि नादापूरितदिङ्मुखेत्यत्र नादानिति द्वितीयान्तः पाठः क्वचित् । तत्पक्षे स्वकीयैर्भीषणैर्निनादैः पूरितदिङ्मुखा काली धनुर्ज्यासिंहघण्टानां नादान् जिग्ये इति सरल एवान्वयः ॥ १० ॥

तमिति । धनुर्ज्यासिंहघण्टाकालीनां एकीभूतं तं निनादमुपश्रुत्याकर्ण्य सरोषैः जातक्रोधैः दैत्यसैन्यैः । देवी कौशिकी सिंहः तथा काली एते त्रयः । चतसृणां दिशानां समाहारश्चतुर्दिशम् आबन्तोऽत्र दिशाशब्दः । दिक् तु स्त्रियां दिशा दान्ती ककुप् देववधूः पविरिति **शब्दार्णवः** । आबन्तो वेति द्विगोः पाक्षिकं नपुंसकत्वम् । सप्तम्यर्थे द्वितीया । चतसृषु दिशास्वित्यर्थः स्थित्वेति शेषः । परिवारिताः वेष्टिताः । वृञ् आवरणे चुरादिः ।

अथ पाठन्तरादि सरोषैरित्यत्र शरौघैरिति क्वचित् पाठः ॥ ११ ॥

एतस्मिन्निति । हे भूप राजन् सुरथ । एतस्मिन्नन्तरे अस्मिन्नवसरे । ङमो ह्रस्वादिति नकारस्य द्वित्वम् । सुरद्विषां दैत्यानां विनाशाय अमरसिंहानां देवश्रेष्ठानां सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ **इत्यमरः** ॥ अमराः सिंहा इवेति विग्रहः । उपमितं व्याघ्रादिभिरिति

भवायामरसिंहानामतिवीर्यबलान्विताः ॥१२॥
ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ॥
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥१३॥

समासः । भवाय क्षेमाय । भवः क्षेमे च संसारे सत्तायां रुद्रंजन्मनोरिति **मेदिनी** । वीर्यं पराक्रमः । बलं शरीरसामर्थ्यम् । अतिशयिताभ्यां ताभ्यां समन्विताः । उत्तरश्लोकेन पूर्णोऽन्वयः ॥

अथ पाठान्तरादि भवायेत्यत्र जयायेति क्वचित्पाठः ॥ १२ ॥

ब्रह्मेति । ब्रह्मा प्रसिद्धः ईशः शिवः गुहः कार्तिकेयः । विष्णुः प्रसिद्धः । एतेषाम् । तथा इन्द्रस्य च शरीरेभ्यः । शक्तयः स्त्र्याकृतयो देवताः तद्रूपैस्तेषां ब्रह्मादीनां रूपैः वक्ष्यमाणलक्षणैः विनिष्क्रम्य बहिर्निर्गत्य चण्डिकां ययुः देव्याः समीपमाजग्मुः । तदा ब्रह्मादयो देवा युद्धावलोकनार्थं नभसि स्थिता आसन् इति ज्ञेयम् । तान् विषण्णान् सुरान् दृष्ट्वेति वक्ष्यमाणत्वात् । तत्र विष्णोः शरीरात्तिस्रो निर्गताः । एका विष्णोः प्राकृतरूपेण द्वे वाराहनारसिंहात्मकवैकृतरूपाभ्याम् । अन्येषां शरीरेभ्य एकैकेव प्राकृतरूपेण निर्गता ॥ एवमेव **लक्ष्मीतन्त्रे** शक्रं पतिं महालक्ष्म्योक्तम् गौरीदेहात् समुद्भूता कौशिकी संज्ञया ह्यहम् ॥ वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥ मदीयाः शक्तयो याश्च तत्तद्देवशरीरगाः ॥ तास्तास्तद्रूपधारिण्यः साहाय्यं व्यदधुर्मम ॥ ताभिर्निहत्य दैत्येन्द्रान् संहृतास्ता मयात्मनीति ॥ **वामनपुराणे** तु देव्या एवाङ्गेभ्य एताः समुत्पन्ना इत्युक्तम् । तत्र मुखाद्ब्राह्मी । दक्षिणनेत्रान्माहेश्वरी । वामनेत्रात् कौमारी । बाहुभ्यां वैष्णवी । पृष्ठतो वाराही । हृदयान्नारसिंही । पादाभ्यामैन्द्रीति । कल्पभेदादविरोधः ॥

अथ पाठान्तरादि तथेन्द्रस्य चेत्यत्र तथैवेन्द्रस्येति क्वचित् पाठः॥ १३॥

यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ॥
तद्वदेवहि तच्छक्तिरसुरान् योद्धुमाययौ ॥ १४ ॥

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥ १५ ॥

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥

तद्रूपैरित्युक्तं तदेव विवृणोति यस्येति । यस्य ब्रह्मादेर्देवस्य यद्रूपं य आकारः । यथा यादृशं भूषणवाहनम् । समाहारे एकवद्भावः । तद्वदेव हि तादृग्रूप भूषणवाहनैव तच्छक्तिस्तस्य देवस्य शक्तिरसुरान् प्रति योद्धुमाययौ ॥ १४ ॥

अथव्यक्तिविशेषेणासां पृथक्पृथक्नामरूपभूषणवाहनाद्याह **हंसेत्यादिभिः** श्लोकैः । अग्रे आदौ हंसैर्युक्तं विमानं यस्याः सा हंसयुक्तविमाना । हंसयुक्तविमानस्थेत्यर्थः । अक्षसूत्रं मणिमाला । कमण्डलुः । ताभ्यां सहिता साक्षसूत्रकमण्डलुः । करद्वयधृताक्षसूत्रकमण्डलुरित्यर्थः । एतादृशी ब्रह्मणः शक्तिरायाता । सा ब्रह्माणीत्यभिधीयते उच्यते । ब्राह्मीति वक्तव्ये आनुगागमश्छान्दसः ॥

अथ पाठान्तरादि विमानाग्रे इत्यत्र विमानस्थेति साभिधीयते इत्यत्र इत्यभिधीयते इति क्वचित्पाठः ॥ १५ ॥

माहेश्वरीति । महेश्वरस्येयं शक्तिर्माहेश्वरी । वृषं आरूढा वृषारूढा । त्रिशूलवरं त्रिशूलोत्तमम् । अथ वा त्रिशूलं तथा वरं वरदानमुद्रां च धारयति तच्छीला त्रिशूलवरधारिणी । परशुमृगवराभीतिहस्तमिति शिवध्याने उक्तत्वात् । महान्तोऽहयः शेषवासुकितक्षकादयो नागा वलयानि कङ्कणानि

महाहिवलया प्राप्ता चन्द्रलेखाविभूषणा ॥ १६ ॥

कौमारी शक्तिहस्ता च मयूरवरवाहना ॥
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥ १७ ॥

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥

यस्याः सा महाहिवलया । चन्द्रस्य लेखा कला सैव विभूषणं शिरोऽवतंसो यस्याः सा चन्द्रलेखाविभूषणा । ईदृशी प्राप्ता । रणाङ्गणमिति शेषः ॥

अथ पाठान्तरादि लेखेत्यत्र रेखेति क्वचित् पाठः ॥ १६ ॥

कौमारीति । शक्तिस्तन्नामकआयुधविशेषो हस्ते यस्याः सा शक्तिहस्ता । मयूरवरो मयूरश्रेष्ठो वाहनं यस्याः सा मयूरवरवाहना । गुहरूपिणी कार्तिकेयरूपधारिणी कौमारी कुमारशक्तिरूपा अम्बिका दैत्यान् प्रति योद्धुमाययौ ॥ १७ ॥

तथैवेति । तथैव कौमारीवदेव । वैष्णवी विष्णोः शक्तिः गरुडस्य उपरि गरुडोपरि । षष्ठीति समासः । संस्थिता उपविष्टा । शङ्खः पाञ्चजन्यः । चक्रं सुदर्शनम् । गदा कौमोदकी । शृङ्गस्य पशुशृङ्गस्य विकारः शार्ङ्गधनुः । खड्गो नन्दकः । शार्ङ्गपदेन बाणा अप्युपलक्ष्यन्ते । तेन शङ्खचक्रगदाशार्ङ्गबाणखड्गहस्तेति ज्ञेयम् । उक्तं च **वामनपुराणे** । बाहुभिर्गरुडारूढा शङ्खचक्रगदासिनी ॥ खड्गबाणधरायाता वैष्णवी रूपधारिणी ॥ इति ॥ षडायुधत्वात् षड्भुजेयम् । नन्विदं विष्णोः षड्भुजत्वस्याप्रसिद्धेर्यस्य देवस्य यद्रूपमिति पूर्वोक्तवचनेन विरोधइति चेन्न । हेमाद्रौ दानखण्डे प्रतिमास्वरूपकथनप्रसङ्गे वैष्णवी तार्क्ष्यगा श्यामा षड्भुजावनमालिनी ॥ शङ्खचक्रगदाचापबाणखड्गधरा स्मृता ॥ इति । विशेषवचनेन

शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥ १८ ॥

यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः॥
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥ १९ ॥

नारसिंही नृसिंहस्य बिभ्रति सदृशं वपुः ॥

वैष्णव्या भुजसङ्ख्याविषये यस्य देवस्येति सामान्यवचनस्य बाधात् ॥ अभ्युपाययौ प्राप ॥ १८ ॥

यज्ञेति । न विद्यते तुला साम्यं प्रमाणं वा यस्य तदतुलम् । निरुपमं मानातीतं वेत्यर्थः । यज्ञरूपो वराहो यज्ञवराहः तस्येदं यज्ञवाराहम् । उत्तरपदादिवृद्धिश्छान्दसी । रूपं बिभ्रतो हरेर्विष्णोर्या शक्तिः सापि वराहस्येमां वाराहीं तनुं बिभ्रती सती तत्र रणभूमावाययौ । वराहावतारस्य यज्ञरूपत्वमुक्तम् **विष्णुभागवते** ॥ यत्रोद्धतः क्षितितलोद्धरणाय बिभ्रत् क्रौडीं तनुं सकलयज्ञमयीमनन्तः ॥ इति । एतच्च हरिवंशे । वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः ॥ अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ॥ इत्यादिबहुश्लोकैः स्फुटीकृतम् ॥ १९ ॥

नारसिंहीति । नरः सिंह इव नरसिंहः । अथ वा नरश्चासौ सिंहश्च नरसिंहः । अधःकाये नरः शीर्षे सिंह इत्यर्थः । तस्येयं शक्तिर्नारसिंही । नृसिंहस्य सदृशं रूपं बिभ्रती । सटानां शिरःकेशानां क्षेपेण उत्क्षेपणेन क्षिप्ता इतस्ततो निरस्ता नक्षत्रसंहतिस्तारकासमूहो यया ईदृशी तत्र रणाङ्गणे प्राप्ता । सूर्यप्रकाशेन दिवानक्षत्रदर्शनाभावेऽपि तेषां सदासत्वाद्दिवापि तत्क्षेपो न विरुध्यते ॥ नृसिंहस्य सदृशं रूपमित्युक्त्या नारसिंहीपदम् नृसिंहशब्दादुत्पन्नमिति न भ्रमितव्यम् तथात्वे नार्सिंहीति रूपं स्यात् । वराह

प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥ २० ॥
वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ॥
प्राप्ता सहस्रनयना यथाशक्रस्तथैव सा ॥ २१ ॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥
हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥ २२ ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ॥

नरसिंहावतारयोः कल्पान्तरे जातत्वाद्वाराही नारसिंही च विष्णोः प्राकृतशरीरात् सम्प्रत्येव तस्य वैकृतवराहनरसिंहरूपाभ्यां निर्गते इति ज्ञेयम् ॥२०॥

वज्रेति । इन्द्रस्येयमैन्द्री शक्तिः वज्रं कुलिशं हस्ते यस्याः सा वज्रहस्ता । गजराजस्य ऐरावतस्योपरि स्थिता तथैव नारसिंहीवदेव प्राप्ता । यथा शक्रः तथैव सा सहस्रनयनाप्यासीत् ॥ २१ ॥

ततइति । ततो ब्राह्मयादिशक्त्यागमनानन्तरम् युद्धदर्शनार्थमाकाशे स्थिताद्देवसङ्घादधोऽवतीर्णे ईशानो महेश्वरस्ताभिर्देवशक्तिभिर्ब्राह्म्यादिभिः परिवृतस्तन्मध्यस्थित इत्यर्थः । चण्डिकां कौशिकीं प्रत्याह । किमाह तदुच्यते । मम प्रीत्या हेतुना मयि तव प्रीतिरस्ति तस्मादित्यर्थः । हेतौ तृतीया । अथ वा प्रीत्यै आहेतिच्छेदः । ऐकारस्य आयादेशे **शाकल्यमतेन** यकारस्य लोपे पुनः सवर्णदीर्घश्छान्दसः । तादर्थ्ये चतुर्थी । मम प्रीत्यर्थमित्यर्थः । असुराः शीघ्रं हन्यन्तामिति मम प्रिये इति वक्तव्ये रभसावेशाच्चरमाक्षरलोप इति **भास्कररायाः** । अनूढायाः कौशिक्याः प्रिये इति सम्बोधनम् कथं युक्तमिति विचारणीयम् ॥ २२ ॥

ततइति । तत ईशानवचनानन्तरम् । देवीशरीरात् कौशिक्याः शरीरात्तु । अतिभीषणा । शिवानां शतं अनन्ताः क्रोष्ट्र्य इत्यर्थः तद्वन्नि-

चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ॥ २३ ॥
सा चाह धूम्रजटिलमीशानमपराजिता ॥
दूतत्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥२४॥
ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ॥
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २५ ॥

नदति तच्छीला शिवाशतनिनादिनी । ताच्छील्ये णिनिः । अत्युग्रा अतिघोराकारा चण्डिकानाम्नी शक्तिः विनिष्क्रान्ता निर्गता ॥ २३ ॥

सा चेति । कैरपि न पराजिता अपराजिता सा चण्डिकानाम्नी शक्तिः । धूम्रजटिलं पिङ्गलजटावन्तम् । कर्मधारयादपि कचिन्मत्वर्थीये भवति । ईशानं शिवं आह च । हे भगवन् महामहिमसम्पन्न महादेव । शुम्भनिशुम्भयोः पार्श्वं समीपम् । गन्तुमिति शेषः । दूतत्वं गच्छ अस्मद्दूत्यमङ्गीकुरु अस्मद्दूतत्वं स्वीकृत्य शुम्भनिशुम्भयोः पार्श्वं गच्छेत्यर्थः । केचित् दूतेति त्वमिति च पृथक् छित्वा दूतेति पदं सम्बोधनत्वेन व्याचक्षते तच्चिन्त्यम् । दूतत्वेन योजनात् प्राक् दूतेत्यामन्त्रणस्यासमञ्जसत्वात् । सर्वेषां दूतगुणानां भगवति महादेवे सत्वात् स एव दूतकर्मणि नियुक्तः । दूतगुणाश्चोक्ता नीतिरहस्ये । दूतः समर्थो विश्वास्यः स्वीयः शुचिरलोलुपः ॥ चतुरः परमर्मज्ञः प्रगल्भः प्रतिभान्वितः ॥ इति ॥ ईदृशलक्षणोपपन्नत्वादेव पाण्डवैर्दुर्योधनं प्रति श्रीकृष्णो दूतत्वेन प्रहितः । अतो दूतत्वे नास्त्यपकर्षः प्रत्युतोत्कर्ष एवेति ज्ञेयम् ॥ २४ ॥

तत्र गत्वा किं कर्तव्यं तदाह । ब्रूहीति । अतिगर्वितौ अत्यन्तदृप्तौ । तारकादित्वादितच् । दानवौ दनुवंश्यौ एतादृशौ शुम्भं निशुम्भं चोभौ । तथा तत्र सेनानिवेशे ये अन्ये च दानवा युद्धाय युद्धार्थं समुपस्थिताः मिलिताः । तान् प्रति चेति शेषः । ब्रूहि वक्ष्यमाणं वचो वद ॥ २५ ॥

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ॥
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २६ ॥

बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः ॥
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥२७॥

यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ॥

वक्तव्यमाह **त्रैलोक्यमिति** । हे दैत्याः यूयं यदि जीवितुमिच्छथ तर्हि इन्द्रस्त्रैलोक्यं लभताम् । इन्द्रस्य त्रैलोक्याधिपत्यं तस्मै प्रत्यर्पयतेत्यर्थः । देवाः हवींषि भुञ्जते इति हविर्भुजः सन्तु । युष्माभिर्बलाद्गृह्यमाणान् देवानां यज्ञियहविर्भागांस्तेभ्यः प्रतिप्रयच्छतेत्यर्थः । यूयं च पातालं स्वावासस्थानं प्रयात ॥ २६ ॥

पक्षान्तरमाह **बलेति** । अथेति पक्षान्तरे अथ अथवा । भः स्तम्भः जाड्यं । तत् अस्ति येषां ते भवन्तः जडा इत्यर्थः । भः स्तम्भे भ्रमरे पुंसीत्येकाक्षर**रत्नमाला** । अत्र भवच्छब्दप्रयोगः यूयमिति शेषः पूज्यत्वार्थक इति न मन्तव्यम् । दैत्येषु पूज्यत्वभावनाया असम्भवात् आगच्छतेति मध्यमपुरुषप्रयोगाच्च । बलावलेपात् बलगर्वात् युद्धकाङ्क्षिणः युद्धोत्सुकाश्चेत्तर्हि आगच्छत । वः युष्माकं पिशितेन मांसेन मच्छिवाः मदीयत्वेनाभिमताः कात्यादय शक्तयः । अथ वा युद्धाङ्गणे रक्तमांसकर्दमो माभूदिति तद्भक्षणार्थं पालिताः मद्गोमायवो वा । शिवा गौरी शिवा शक्तिः शिवा धात्र्यभया शिवा ॥ इति **शब्दार्णवः** । स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तका इत्यमरश्च । तृप्यन्तु तृप्तिं गच्छन्तु ॥ २७ ॥

यतइति । ऋष्युक्तिरियम् । यतो यस्मात् कारणात् । तया देव्या कौशिकीशरीरोत्पन्नया चण्डिकानाम्न्या शक्त्या स्वयम् स्वेच्छयैवेत्यर्थः ।

शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥२८॥
तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ॥
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥२९॥

ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥

शिवः शम्भुः । दूतस्य कर्म भावो वा दौत्यम् तेन हेतुना । ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । अथ वा दूतवणिग्भ्याञ्चेति यत् प्रत्यये पुनः स्वार्थे प्रज्ञाद्यण् । नियुक्तः प्रेषित आसीत् ततस्तस्मात् कारणात् सा शक्तिः शिवदूतीति ख्यातिं प्रसिद्धिमागता । प्राप्ता । शिवो दूतो यस्याः सा शिवदूती इति विग्रहः । पिप्पल्यादेराकृतिगणत्वान् ङीष् ॥

अथ पाठान्तरादि दौत्येनेत्यत्र दूत्येनेति क्वचित् पाठः स च साधुः । एतच्छ्लोकारम्भे ऋषिरुवाचेत्यपेक्षितमपि नास्ति ॥ २८ ॥

तेऽपीति । ते महासुराः शुम्भादयोऽपि शर्वेण शिवेनाख्यातं उक्तं देव्याः शिवदूत्या वचः श्रुत्वा अमर्षेण क्रोधेन पूरिताः सम्भृताः व्याप्ताः सन्तो यत्र यस्मिन् स्थाने कात्यायनी कौशिकी देवी स्थितासीत्तत्र जग्मुः । अत्र कात्यायनीपदार्थो यथा । कं सूर्यं अत्याययति अतिक्रामयति सम्मुखवधेन शत्रूनिति कात्यायनी । कृत्यल्युटो बहुलम् । द्वावेतौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ॥ परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥ इति ॥ मारुते वेधसि ब्रध्ने पुंसि क इत्यमरः ॥ (ब्रध्नः सूर्यः) ॥ अन्यदपि कात्यायनीपदव्याख्यानं कवचव्याख्यायामेकादशाध्यायव्याख्यायां च द्रष्टव्यम् ॥

अथ पाठान्तरादि यत्रेत्यस्य स्थाने यत इति पाठे सप्तम्यर्थे सार्वविभक्तिकस्तसिः ॥ २९ ॥

तत इति । ततः तत्र गमनानन्तरम् । उद्धत उद्रिक्तः अमर्षः क्रोधो येषां ते उद्धतामर्षा अमरारयो दैत्याः प्रथममेव देव्याः शस्त्रप्रहारात्

ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥३०॥

सा च तान् प्रहितान् बाणान् शूलशक्तिपरश्वधान् ॥
चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ॥३१॥

तस्याग्रतस्तथा काली शूलपातविदारितान् ॥
खट्वाङ्गपोथितांश्चारीन् कुर्वती व्यचरत्तदा ॥ ३२॥

कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ॥

प्रागेव अथ वा उभयोः परस्परभाषणात् प्रागेव अग्रे अभिमुखम् । तां देवीं कौशिकीम् । शरा बाणाः । शक्तयस्तन्नाम्नैव प्रसिद्धाः शस्त्रविशेषाः । तल्लक्षणं प्रागुक्तम् । ऋष्टय उभयतो धाराः खड्गाः । तेषां वृष्टिभिरासारैर्ववर्षुर्ववृषुः । गुणश्छान्दसः । ऋष्टिपदं शूलपरश्वधयोश्चोपलक्षकम् । उत्तरश्लोके तयोरपिच्छेदोक्तेः ॥ ३० ॥

सा चेति । सा देवी कौशिकी च तान् पूर्वश्लोकोक्तान् प्रहितान् दैत्यैः क्षिप्तान् बाणान् तथा शूलशक्तिपरश्वधान् ऋष्टींश्च । आध्मातेन कृतज्याशब्देन स्वधनुषा मुक्तैर्महेषुभिर्महद्भिर्बाणैर्लीलया अनायासेन चिच्छेद शकलीचकार ॥ ३१ ॥

तस्या इति । तथा तदा तस्याः देव्याः अग्रतः पुरोभागे सन्धिरार्षः । काली अरीन् शत्रून् शूलपातेन त्रिशूलप्रहारेण विदारितान् । खट्वाङ्गेन तन्नामकेनायुधेन च पोथितान् प्रहतांश्च कुर्वती व्यचरत् सञ्चरितवती ॥

अथ पाठान्तरादि पोथितानित्यत्र ताडितानिति क्वचित् पाठः । कुर्वन्तीति नुम्सहितः पाठः आर्षः ॥३२॥

कमण्डल्विति । ब्रह्माणी ब्रह्मशक्तिश्च येन येन प्रदेशेन धावति अधावत् । तत्र तत्र शत्रून् कमण्डलुस्थजलस्याक्षेपेण प्रक्षेपेण हतं पराभूतं

ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥३३॥

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥
दैत्याञ् जघान कौमारी तथा शक्त्यातिकोपना ॥३४॥

ऐन्द्री कुलिशपातेन शतशो दैत्यदानवाः ॥
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवार्षिणः ॥३५॥

तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥

धीर्यं पराक्रमो येषां तान् । तथा कमण्डलुजलाक्षेपेणैव हतं ओजो बलं येषां तांश्चाकरोत् हतौजस इत्यत्रापि कमण्डलुजलाक्षेपेति समासैकदेशानुवृत्तिः ॥

अथ पाठान्तरादि जलाक्षेपादिति व्यस्तपाठोऽपि क्वचित् ॥ ३३ ॥

माहेश्वरीति । माहेश्वरी महेश्वरशक्तिः त्रिशूलेन तथा वैष्णवी विष्णुशक्तिः चक्रेण तथा अतिकोपना अतिरोषवती कौमारी कुमारस्य कार्तिकेयस्य शक्तिः शक्त्या तन्नामकेन स्वायुधेन दैत्यान् जघान हतवती ॥ ३४ ॥

ऐन्द्रीति । ऐन्द्र्या इन्द्रशक्तेः कुलिशपातेन वज्रप्रहारेण विदारिताः शतशः शतं शतं दैत्या दितिवंश्याः । दानवा दनुवंश्याश्च योधाः रुधिरौघं प्रवर्पन्तीति रुधिरौघप्रवर्षिणः स्वशरीरप्रवहद्रक्तौघाः सन्तः पृथ्व्यां पेतुः मृता इत्यर्थः ॥ ३५ ॥

तुण्डेति । वराहस्येव मूर्तिः कायो यस्यास्तया वराहमूर्त्या वराहशक्त्येत्यर्थः । तुण्डस्य पोत्रसंज्ञकमुखाग्रभागस्य प्रहारेणाघातेन विध्वस्ता विशीर्णावयवाः कृताः । दंष्ट्राग्रेण क्षतानि विदीर्णानि वक्षांसि उरस्स्थलानि येषां एवंभूताः । तथा चक्रेण विदारिताश्च शतशो दैत्यदानवाः । न्यपतन्निप-

वराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥३६॥
नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ॥
नारसिंही चचाराजौ नादापूर्णदिगन्तरा ॥ ३७ ॥
चण्डाट्टहासैरसुराः शिवदूत्याभिदूषिताः ॥
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥ ३८ ॥
इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ॥

तिताः मृताः । वराहमूर्त्या इति षष्ठ्यन्तं वा । तस्य च तुण्डप्रहारादिभिः संबन्धः ।

अथ पाठान्तरादि वाराहमूर्त्यादिदीर्घादिपाठःक्वचित् तत्पक्षे वराहस्येयं वाराही । सा चासौ मूर्तिश्चेतिकर्मधारये पूर्वपदस्य पुंवद्भावः ॥३६॥

नखैरिति । नारसिंही नरसिंहशक्तिः नादैरापूर्णानि दिशामन्तराण्यवकाशा यया नादापूर्णदिगन्तरा नखैर्विदारितान् अन्यान् कांश्चिन्महासुरान् भक्षयन्ती आजौ युद्धे चचार इतस्ततो बभ्राम ॥

अथ पाठान्तरादि नादापूर्णदिगम्बरा नादापूरितदिङ्मुखेति वा क्वचित् पाठः ॥ ३७ ॥

चण्डेति । शिवदूत्या कौशिकीशरीरोत्पन्नशक्त्या चण्डा अत्युग्रा ये अट्टहासाः । अट्टहासपदं पूर्वं व्याख्यातम् । तैरभिदूषिता मूर्छां प्रापिता असुराः पृथिव्यां पेतुः । अथ सा शिवदूती तदा पतितांस्तानसुरान् जीवत एव चखाद भक्षितवती ॥

अथ पाठान्तरादि शिवदूत्यभिदूषिता इति समस्तपदपाठोऽपि क्वचित् ॥ ३८ ॥

इतीति । मातृगणं मातृसंज्ञककाल्यादिशिवदूत्यन्तनवशक्तिसमूहम् । इति विविधैः अभ्युपायैर्महासुरान् मर्दयन्तं मृद्नन्तं हिंसन्तमित्यर्थः ।

दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥

पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान् ॥
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ४० ॥

रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ॥

दृष्ट्वा । देवारेः शुम्भस्य सैनिकाः नेशुरदृश्या बभूवुः पलायिता इत्यर्थः । णश् अदर्शने । क्रुद्धं मातृगणं इति एवंप्रकारेण महासुरान् मर्दयन्तं दृष्ट्वा देवारिसैनिका विविधैरभ्युपायैर्नेशुरिति वान्वयः । अत्र काल्यादिशिवदूत्यन्तानां नवानां मातृसंज्ञा । अन्यत्र. कालीरहितानामष्टानामुक्तास्ति । क्वचिच्छिवदूतीरहितानामष्टानाम् । इतरत्र कालीशिवदूतीरहितानां सप्तानाम् । अपरत्र ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथेन्द्राणी चामुण्डाः सप्त मातरः ॥ इत्युक्तम् ॥ ३९ ॥

पलायनेति । मातृगणेनार्दितान् पीडितान् अत एव पलायनमेव परं प्राणरक्षणसाधनं येषां तान् पलायमानानित्यर्थः दैत्यान् दृष्ट्वा क्रुद्धः रक्तं बीजं स्वसदृशान्यमहासुरोत्पत्तिहेतुर्यस्य स रक्तबीजस्तन्नामा महासुरो योद्धुमभ्याययौ सम्मुखमाजगाम ॥

अथ पाठान्तरादि अत्र भागिनेयो महावीर्यस्तयोः शुम्भनिशुम्भयोः ॥ क्रोधवत्याः सुतो ज्येष्ठो महाबलपराक्रमः ॥ इत्येकोऽधिकः श्लोकः क्वचित् पठ्यते ॥ ४० ॥

रक्तबीजनाम्नः प्रवृत्तिनिमित्तमाह **रक्तबिन्दुरिति** । यदा अस्य रक्तबीजस्य शरीरतो देहात् रक्तबिन्दुः भूमौ पतति तदा मेदिन्याः रक्तबिन्दुपतनाधिकरणभूतायाः रूकाशादित्यर्थः । तत्प्रमाणो रक्तबीजसदृशशरीरबलवयोरूपादिप्रमाणः । अन्यः असुरः समुत्पतति उत्पद्यते ॥

समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः ॥ ४१ ॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ॥
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥ ४२ ॥
कुलिशेनाहतस्यास्य बहु सुस्राव शोणितम् ॥
समुत्तस्थुस्तदा योधास्तद्रूपास्तत्पराक्रमाः ॥ ४३ ॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ॥
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ ४४ ॥

अथ पाठान्तरादि मेदिन्या इत्यत्र मेदिन्यामिति सप्तम्यन्तम् तदासुर इत्यत्र महासुर इति च क्वचित् पठ्यते ॥ ४१ ॥

युयुधे इति । गदा पाणौ हस्ते यस्य स गदापाणिः स महासुरो रक्तबीजः इन्द्रशक्त्या सह युयुधे । ततश्च ऐन्द्री इन्द्रशक्तिः स्ववज्रेण रक्तबीजं अताडयत् प्राहरत् ॥ ४२ ॥

कुलिशेनेति । कुलिशेन ऐन्द्रीवज्रेण ताडितस्यास्य रक्तबीजस्य बहु शोणितं रक्तं सुस्राव उवाह । ततस्तस्माच्छोणितात् । तद्रूपाः रक्तबीजसदृशरूपाः । तत्पराक्रमा रक्तबीजसदृशपराक्रमाः योधाः योद्धारो दैत्याः समुत्तस्थुः समुत्पन्नाः ॥

अथ पाठान्तरादि अस्येत्यत्र आशु इति क्वचित्पाठः ॥ ४३ ॥

यावन्त इति । तस्य रक्तबीजस्य शरीरात् यावन्तः यत्सङ्ख्याकाः रक्तबिन्दवः पतिताः तावन्तस्तत्सङ्ख्याकाः तस्य रक्तबीजस्येव वीर्यं प्रभावः बलं सामर्थ्यम् विक्रमः पराक्रमश्च येषां ते तद्वीर्यबलविक्रमाः । वीर्यं बले प्रभावे **चेत्यमरः** । पुरुषा दैत्या जाता उत्पन्नाः ॥

अथ पाठान्तरादि अत्र तस्मादपि पुनश्चान्ये तस्मादपि परे पुनः ॥ इत्यर्धमधिकं क्वचित् पठ्यते ॥ ४४ ॥

ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ॥
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥४५॥

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ४६ ॥

वैष्णवी समरे चैनं चक्रेणाभिजघान ह ॥

ते चापीति । ते रक्तात्सम्भवो जन्म येषां ते रक्तसम्भवाः रक्तबीजरक्तोत्पन्ना इत्यर्थः । पुरुषा दैत्यपुरुषाश्चापि तत्र रणभूमौ मातृभिः समं सह अत्युग्रशस्त्रपातातिभीषणं अत्युग्रशस्त्राणां पातैः प्रहारैर्भीषणम् यथा भवति तथेति युद्धक्रियाविशेषणम् । युयुधुर्युयुधिरे । परस्मैपदं छान्दसम् ॥

अथ पाठान्तरादि अत्युग्रमिति क्वचित्पाठः । तदा अत्युग्रमिति शस्त्रपातेत्यादि च पृथक् क्रियाविशेषणद्वयम् ॥ ४५ ॥

पुनश्चेति । यदा ऐन्द्र्या पुनश्च वज्रपातेन वज्रप्रहारेण अस्य रक्तबीजस्य शिरः क्षतमाहतं तदा तस्माच्छिरसो रक्तं ववाह सुस्राव सम्प्रसारणाभावश्छान्दसः । ततस्तस्माद्रक्तात् सहस्रं सहस्रं सहस्रशः । सङ्ख्यैकवचनादिति शस् । सहस्रशब्दोऽनन्तवाची पुरुषा जाता उत्पन्नाः ॥

अथ पाठान्तरादि ववाहेत्यत्र उवाहेत्येव क्वचित् पठ्यते ॥ ४६ ॥

वैष्णवीति । वैष्णवी विष्णुशक्तिश्च ऐन्द्रीतं ऐन्द्रीं इतं अभियातं ऐन्द्र्या सहयुद्धमानमित्यर्थः । एनं असुरेश्वरं रक्तबीजं चक्रेणाभिजघान । हेति पादपूर्तौ । गदया ताडयामास च । ताडयामासेत्यस्योत्तरस्वरेण सह सन्ध्यभावः संहिताया अविवक्षितत्वात् । अत्र प्रागैन्द्र्या गदाधारणस्यानुक्ते वैष्णव्याश्च तदुक्तेः अग्रे ऐन्द्र्या गदाप्रहारकार्यस्यानुक्तेश्च ऐन्द्रीतमित्येतत्समस्तपदत्वेन व्याख्याय गदाताडनस्यापि वैष्णव्या एव कर्तृत्वमापादितम्।

गदया ताडयामास ऐन्द्री-तमसुरेश्वरम् ॥ ४७ ॥
वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः ।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४८ ॥
शक्त्या जघान कौमारी वाराही च तथासिना ॥
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥४९॥
स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् ॥
मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ५० ॥

वैष्णव्या गदाप्रहारकार्यस्यानुक्तत्वेऽपि चक्रपदेन गदाया उपलक्ष्यमाणत्वान्नताद्दश्यनुपपत्तिरिति ज्ञेयम् ॥ ४७ ॥

वैष्णवीति । वैष्णव्याश्चक्रेण गदाया अप्युपलक्षणमेतत् । भिन्नस्य विदारितस्य रक्तबीजस्य रुधिरस्रावाद्रक्तप्रवाहात्सम्भवो येषां तैः तत्प्रमाणैः रक्तबीजतुल्यशरीरबलरूपादिप्रमाणैः । सहस्रेण सहस्रेणेति सहस्रशः अनेकसहस्रसंख्याकैरित्यर्थः महासुरैर्जगद्व्याप्तमासीत् ॥ ४८ ॥

शक्त्येति । कौमारी रक्तबीजं महासुरं शक्त्या जघान । तथा वाराही असिना जघान । माहेश्वरी त्रिशूलेन जघान ॥

अथ पाठान्तरादि ब्रह्माणी ब्रह्मदण्डेन नारसिंही नखायुधैः ॥ पाटयामास हृदये न चचाल तथापि सः ॥ इत्येकः श्लोकोऽधिकोऽत्र कचित् पठ्यते ॥४९॥

सचेति । स च अस्यति क्षिपति युद्धे नानास्त्राणीत्यसुरः । असेरुरन् । महानसुरो महासुरः शस्त्रास्त्रयुद्धकुशल इत्यर्थः । दैत्यो रक्तबीजोऽपि । अथ वा दैत्यो दितिवंश्यो महासुरो रक्तबीजोपीत्यन्वयः । कोपेन समाविष्ट आपूरितः कोपसमाविष्टः सन् सर्वा एव मातॄः पूर्वोक्ता नवशक्तीः । पृथक् एकैकां गदया आहनत् आहतवान् । वृत्रं हनति वृत्रहेतिवत् छान्दसः शपो लुगभावः आहन् इति लौकिकप्रयोगः ॥ ५० ॥

तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ॥
पपात यो वै रक्तौघस्तेनासञ् शतशोऽसुराः ॥५१॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ॥
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ ५२ ॥
तान विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राहसत्त्वरा ॥

कौमार्यादीनां शक्त्याद्याघातस्य परिणाममाह **तस्या इति** । कौमारीवाराहीमाहेश्वरीभिः शक्तिशूलादिभिः आदिशब्देन खड्गस्य ग्रहणम् । बहुधा पुनः पुनराहतस्य तस्य रक्तबीजस्य यो रक्तौघो भुवि पपात तेन तस्मादित्यर्थः । शतशः अनन्ता असुरा आसन्नुदपद्यन्त ॥ ५१ ॥

तैरिति । असुरस्य रक्तबीजस्य असृजो रक्तात् सम्भूतैरुत्पन्नैस्तैरसुरैर्दैत्यैः सकलं जगत् व्याप्तमासीत् । सकलं जगदित्यतिशयोक्तिः रणभूमिरिति तदर्थः । ततो देवाः उत्तमं अतिशयितं भयमाजग्मुः प्रापुः ॥

अथ पाठान्तरादि अत्र ततो बभाषिरेऽन्योन्यं दिवि देवा विमानगाः ॥ नचेदृशः सम्बभूव भविता वा महासुरः ॥ न साम्प्रतं जगति वा रक्तबीजसमः क्वचित् ॥ इति सार्धः श्लोकोऽधिकः क्वचित् पठ्यते ॥ ५२ ॥

तानिति । अत्र समानार्थयोः प्राह उवाचेति क्रियापदयोः पौनरुक्त्यपरिहाराय पूर्वार्धे प्राहसत् त्वरा इति पदच्छेदोऽङ्गीक्रियते । त्वरेत्येतत् त्वरते इति त्वरा इत्यर्थे ञित्वरा सम्भ्रमे इत्यस्मात्पचाद्यचि वा त्वराशब्दान्मत्वर्थीये अर्शआद्यचि वा देव्या विशेषणम् । त्वरावतीत्यर्थः । अथवा तस्मादेव धातोर्भावे क्विपि तृतीयान्तम् । त्वरयेति तदर्थः । अथ श्लोकार्थः । चण्डिका देवी तान् युद्धं द्रष्टुमागतान् रक्तबीजपराक्रमदर्शनेन विषण्णान् स्वपक्षजये संशयितानित्यर्थः । सुरान् दृष्ट्वा प्राहसत् रक्तबीजस्यासन्नमरणत्वेन देवानामस्थानविषादात् प्रहसितवती । ततश्च त्वरा त्वरावती त्वरया

उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥ ५३ ॥
मच्छस्त्रपातसम्भूतान् रक्तबीजान्महासुरान् ॥

वा कालीमुवाच । हे चामुण्डे कालि वदनं स्वमुखं विस्तीर्णं कुरु प्रसारयेति। अन्ये चण्डिका तानसुरान् विषण्णान् दृष्ट्वा यूयं मा विषीदत शीघ्रमेनं हनिष्यामीति देवान् प्रत्याह ततश्च सित्वरां चामुण्डे वदनं विस्तीर्णं कुर्विति कालीमुवाचेति व्याचक्षते । अपरे प्राहसत्वरेत्येतदेकपदत्वेन गृहीत्वा प्रकर्षेणाहन्यतेऽस्मिन्निति प्राहो युद्धम् । अन्येभ्योऽपि दृश्यते इत्यधिकरणे डः। प्राहे युद्धे सत्वरा प्राह सत्वरेति व्याख्याय प्रययौ प्राहकाम्ययेति **देवीपुराणवाक्यम्** रथेन काञ्चनाङ्गेन प्रययौ प्राह लालसः इति **स्कान्दवाक्यं** च स्वकीयार्थोपष्टम्भकत्वेनोदाहरन्ति । इतरे उत्तरार्धे उ इति वाचकालीमिति च छित्वा । उ इति सम्बोधने । उ चामुण्डे हे कालि वदनं विस्तीर्णं कुर्विति कालीं प्रति वाचकानां शब्दानां आली पङ्क्तिः वाचकाली। तां। वाक्यमित्यर्थः । प्राहेति योजयन्ति । चतुष्टयेऽत्र यत्साधिष्ठं तद्ग्राह्यम् ॥

अथ पाठान्तरादि प्राह सत्वरेत्यत्र प्राहसत्तदेति क्वचित् पाठः स च साधुः । सत्वरेत्यत्र सत्वरमिति विस्तीर्णमित्यत्र विस्तृतमिति च क्वचित् पठ्यते । विस्तरमितिपाठस्तु न साधुः । मत्वर्थीयाच्प्रत्ययेन कथञ्चिद्वदनविशेषणत्वसम्भवेऽप्यत्र प्रथनस्याशब्दविषयकत्वेनाप्प्रत्ययं बाधित्वा घञा विस्तारमिति रूपं स्यात् ॥ ५३ ॥

वदनं विस्तीर्णं कृत्वा किं कर्तव्यं तदाह **मच्छस्त्रेति** । त्वं अनेन विस्तीर्णीकृतेन वेगिना त्वरावता वक्त्रेण महासुराद्रक्तबीजात् मच्छस्त्राणां पातैः प्रहारैः सम्भूतानुत्पन्नान् रक्तबिन्दून् प्रतीच्छ गृहाण पिबेत्यर्थः ॥

अथ पाठान्तरादि क्वचिद्द्वितीयतृतीयपादयोः रक्तबिन्दून् महासुरान् रक्तबिन्दोः प्रतीच्छ त्वमिति पाठः । तत्पक्षे मच्छस्त्रपातसम्भूतान् रक्त-

रक्तबिन्दून् प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥५४॥
भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ॥
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥५५॥
भक्ष्यमाणास्त्वया चोग्रा नचोत्पत्स्यन्ति चापरे ॥
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥५६॥
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ॥५७॥
ततोऽसावाजघानाशु गदया तत्र चण्डिकाम् ॥

बिन्दून् रक्तबिन्दोः रक्तबिन्दुभ्यः सम्भूतान् महासुरांश्च प्रतीच्छेति योजना ॥ रक्तबिन्दोरित्येकवचनं जात्यभिप्रायेण ॥ वेगिनेत्यत्र वेगितेति क्वचित् पाठः तारकादित्वादितच् ॥ ५४ ॥

भक्षयन्तीति । तदुत्पन्नान् त्वन्मुखपतितरक्तबिन्दूत्पन्नान्महासुरान् भक्षयन्ती रणे चर । मुखेन रक्तबिन्दुग्रहणार्थं रक्तबीजस्य परितः सञ्चरेत्यर्थः । एवं मुखेन रक्तग्रहणे कृते क्षीणरक्तः नीरक्त एष रक्तबीजःक्षयं गमिष्यति ॥ ५५ ॥

भक्ष्यमाणा इति । त्वन्मुखपतितरक्तबिन्दूत्पन्ना उग्रा दैत्यास्त्वया भक्ष्यमाणा मरिष्यन्ति अपरे नव्याश्च नचोत्पत्स्यन्ति नैवोत्पत्स्यन्ते । परस्मैपदं छान्दसम् । देवी कौशिकी तां कालीमित्युक्त्वा ततस्तं रक्तबीजं शूलेनाभिजघान ॥

अथ पाठान्तरादि नचेत्यत्र नैवेति क्वचित्पाठः ॥ पूर्वार्धोत्तरं रक्तबीजो महादैत्य एवं निर्मूलमेष्यतीत्यर्धमाधिकं ततः ऋषिरुवाचेति च क्वचित् पठ्यते ॥५६॥

मुखेनेति । अयमर्धश्लोकमन्त्रः । काली देवी शूलाभिघातजनितं रक्तबीजस्य शोणितं रक्तं मुखेन अन्तरिक्षे एव जगृहे ॥ ५७ ॥

तत इति । ततः देव्याः शूलाभिघातानन्तरम् असौ रक्तबीजः तत्र रणे आशु शीघ्रं गदया चण्डिकां कौशिकीमाजघान अस्वाङ्गकर्मकत्वान्न तङ् ।

नचास्या वेदनां चक्रे गदापातोऽल्पिकामपि ॥ ५८ ॥
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ॥ ५९ ॥
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥ ६० ॥

स गदापातो गदाप्रहारः अस्याश्चण्डिकायाः अल्पिकामपि अत्यल्पामपि। प्रकृतिप्रत्यययोरुभयोरप्यल्पार्थकत्वात्समुदायस्यात्यल्पार्थकत्वम्। वेदनां व्यथां न चक्रे ॥

अथ पाठान्तरादि आशु इत्यत्र बहुषु पुस्तकेष्वथेति पाठः। तत्पक्षे ततइत्येतत् तनुविस्तारे इत्यस्य भूते क्तान्तं रूपम्। देव्याः शिरसि गदाप्रहारार्थं प्रपदयोः स्थित्वोन्नतः सन्निति तदर्थः। इत उत्तरम् तमप्यपातयद्देवी गदया दुष्टचेतसम् ॥ चामुण्डां स गदापातैर्मुखे कट्या समाहनत् ॥ लालनं तस्य तत् दृष्ट्वा चण्डिका चण्डविक्रमा ॥ पारिघाग्रेण घोरेण वक्षस्येनमताडयदिति श्लोकद्वयमधिकं क्वचित् पठ्यते ॥ ५८ ॥

मुखेन काली जगृहे इति पूर्वोक्तार्धमन्त्रार्थं प्रपञ्चयति **तस्येति**। देव्या शूलेनाहतस्य तस्य रक्तबीजस्य देहात्तु यतस्ततः सर्वावयवेभ्य इत्यर्थः। बहुशोणितं सुस्राव उवाह। तत् चामुण्डा वक्त्रेण सम्प्रतीच्छति जग्राह। लट् छान्दसः। यतस्तत इत्यस्य सम्प्रतीच्छतीत्यनेन वा सम्बन्धः ॥

अथ पाठान्तरादि यतस्तत इत्यत्र इतस्तत इति क्वचित् पाठः। अर्थः प्राग्वत् ॥ ५९ ॥

मुखे इति। अस्याः काल्या मुखे रक्तपातात् रक्तबीजरक्तपतनात् ये महासुराः समुद्गताः समुत्पन्नाः। तान् चामुण्डा चखाद बभक्ष। पुनः शस्त्रप्रहारोत्पन्नं तस्य रक्तबीजस्य शोणितं पपौ च ॥ ६० ॥

देवी शूलेन वज्रेण बाणैरसिभिऋष्टिभिः ॥
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥ ६१ ॥
स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः ॥
नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ६२ ॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥

देवीति । देवी कौशिकी । चामुण्डया काल्या पीतं शोणितं यस्यैताद्दशं तं रक्तबीजं शूलेन वज्रेण बाणैः असिभिरेकतोधारैः खड्गैः ऋष्टिभिरुभयतोधारैः खड्गैश्च जघान । असिऋष्ट्योर्बहुवचनमेकस्य भङ्गेऽन्यस्योपयोगेन तस्यापि भङ्गे तदन्यस्येति बहुत्वात् असिभिरित्यत्र रेफलोपश्छान्दसः । ननु रहस्येऽस्या देवताया ध्याने वज्रासिऋष्ट्यो नोक्तास्तत् कथमिह तेषा मुक्तिः इति न शङ्क्यम् देवतानामिच्छोपस्थायिसर्वार्थत्वात् ॥ ६१ ॥

स इति । हे महीपाल पृथ्वीपते सुरथ । स काल्या पीतशोणितत्वान्नीरक्तो रक्तबीजो महासुरश्च देव्या पूर्वोक्तशूलादिशस्त्रसङ्घेन समाहतः सन् महीपृष्ठे पपात मृत इत्यर्थः । नीरक्त इत्यत्र निसोरुत्वे रोरीतिलोपे पूर्वस्वरस्य दीर्घः ॥

अथ पाठान्तरादि शस्त्रसङ्घसमाहत इत्यत्र शस्त्रसंहतितो हत इति क्वचित् पाठः । इत उत्तरं तथान्ये बहवो दैत्या मातृभिश्च निपातिताः ॥ इत्यर्धमधिकं क्वचित् पठ्यते ॥ ६२ ॥

तत इति । हे नृप राजन् । ततः रक्तबीजवधानन्तरम् ते, त्रिदशा ब्रह्मादयो देवाः अतुलमपरिमितं हर्षमवापुः ये पूर्वमुत्तमं भयमाजग्मुः । तेषां तेभ्यः सकाशाज्जातो मातृगणः ब्राह्म्यादिशक्तिसमूहः । असृङ्मदोद्धतः असृजः रुधिरस्य पानेन दर्शनेन च यो मदः मत्तत्वं तेन उद्धतः अविनीतः सन्ननर्त नृत्यं चक्रे । तत्र कालीनारसिंहीशिवदूतीनामसृजः पानम् । तत्रापि

तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ ६३ ॥

काल्याः साक्षात् । मुखेन काली जगृहे रक्तबीजस्य शोणितमित्युक्तत्वात् । नारसिंहीशिवदूत्योर्दैत्यभक्षणद्वारा । नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान् । नारसिंही चचाराजाविति चण्डाट्टहासैरसुराः शिवदूत्याभिदूषिताः ॥ पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदेति तयोर्दैत्यभक्षणस्योक्तत्वात् । इतरासां असृग्दर्शनेन मदः ॥

अथ पाठान्तरादि जात इत्यत्र हृष्ट इति वा मत्त इति वा क्वचित् पाठः । इत उत्तरम् गन्धर्वाप्सरसः सिद्धा ननृतुः पुष्पवर्षिणः ॥ इत्यर्धमधिकं क्वचित् पठ्यते ॥ ६३ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे
देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः ॥ ८ ॥

इतीति । रक्तबीजस्य वधो यस्मिन् स रक्तबीजवधः । षट्त्रिंशदक्षरात्मकमेतदष्टमाध्यायसमाप्तिवाक्यम् ॥ ८ ॥

॥ इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे

॥ अष्टमाध्यायव्याख्या ॥८॥

॥ समाप्तोऽष्टमोऽध्यायः ॥

॥ अथ नवमाध्यायः ॥

॥ राजोवाच ॥ १ ॥

विचित्रमिदमाख्यातं भगवन् भवता मम ॥
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ २ ॥
भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥
चकार शुम्भो यत् कर्म निशुम्भश्चातिकोपनः ॥ ३ ॥

राजेति। अथ नवमाध्यायमन्त्रविभागकारिकाः। नवमे प्रथमो राजोवाच गद्यात्मको मनुः ॥ विचित्रमिति भूयश्चेच्छामीतिश्लोकमन्त्रकौ ॥ अथो ऋषिरुवाचेति गद्यात्मा मन्त्र इष्यते ॥ सप्तत्रिंशत्श्लोकमन्त्राश्चकारेत्यादयो मताः ॥ एवं सर्वे चैकचत्वारिंशन्मन्त्राः स्मृता बुधैः ॥ श्लोकमन्त्रास्तत्र चैकोनचत्वारिंशदीरिताः ॥ गद्याख्यौ द्वावथ श्लोकाः श्लोकमन्त्रसमा मताः ॥ इति ॥ **अथ मन्त्रव्याख्या**। **राजोवाचेति**। मध्यमचरितान्ते पुनश्च गौरीदेहात्सेत्यादि यथावत् कथयामि ते इत्यन्तेन श्लोकद्वयेनोत्तमचरितकथनस्य प्रतिज्ञातत्वादनुक्रमेण सर्वं कथयिष्यतीति जानन्नपि ऋषेरौत्सुक्यवर्धनायाभिनन्दनपूर्वकं कथाशेषं विस्मितः पृच्छति राजा ॥ १ ॥

विचित्रमिति। हे भगवन् पूज्य सुमेधो मुने। भवता मम इदं रक्तबीजस्य वधेनाश्रितं रक्तबीजवधाश्रयमित्यर्थः विचित्रमद्भुतं देव्याः कौशिक्याश्चरितस्य माहात्म्यं महत्त्वं आख्यातं कथितम् ॥ २ ॥

भूयश्चेति। रक्तबीजे निपातिते हते सति अतिक्रोधनः अत्यमर्षणः शुम्भः भूयः पुनश्च यत् कर्म चकार। तथातिकोपनो निशुम्भश्च यत् कर्म चकार। करोतेरेकवचनाविशिष्टत्वाद्भेदेनान्वयः। तच्च तच्चाहं श्रोतुमिच्छामि ॥ उभयमपि कथयेति भावः ॥ ३ ॥

ऋषिरुवाच ॥ ४ ॥

चकार कोपमतुलं रक्तबीजे निपातिते ॥
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ५ ॥
हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ॥
अभ्यधावन्निशुम्भोऽथ मुख्यया सुरसेनया ॥ ६ ॥
तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥

ऋषिरिति ॥ ४ ॥

चकारेति । आहवे युद्धे । रक्तबीजे निपातिते हते सति । अन्येषु दैत्येषु हतेषु सत्सु च । शुम्भासुरः अतुलमपरिमितं कोपं चकार । निशुम्भश्चातुलं कोपं चकारेति पूर्ववद्वाक्यभेदेनान्वयः ॥ ५ ॥

हन्यमानमिति । अथ निशुम्भः । महासैन्यं रक्तबीजेन सहागतमिति भावः । हन्यमानं हतम् । वर्तमानसामीप्ये भूते वर्तमानवत् प्रयोगः । अथ वा रक्तबीजवधानन्तरं तत्सैन्यं हन्यमानं विलोक्य अमर्षं कोपमुद्वहन् धारयन् मुख्यया प्रधानभूतया असुरसेनया असुरात्मकसेनया सहाभ्यधावत् देव्यभिमुखं धावितवान् ॥ ६ ॥

तस्येति । तथा निशुम्भस्याग्रभागपृष्ठभागपार्श्वभागरक्षका महासुराः क्रुद्धा अत एव सन्दष्टानि दन्तैः निपीडितानि ओष्ठपुटानि यैस्ते सन्दष्टौष्ठपुटाः । सन्तः देवीं हन्तुं निशुम्भं रक्षितुं च तस्य निशुम्भस्य अग्रतस्तथा पृष्ठे पार्श्वयोश्च उपाययुः सामीप्येन जग्मुः ॥ ओष्ठपुटेत्यत्र पुटशब्दः पुट संश्लेषणे इति धातोर्निष्पन्नः परस्परसंश्लिष्यदाधारपिधानरूपपात्रद्वयसमुच्चयवाचकः । संश्लिष्टौष्ठद्वये ओष्ठपुटमिति तादृशे पक्ष्मद्वये पक्ष्मपुटमिति करण्डके सम्पुटमिति च प्रयोगदर्शनात् क्वचिदाधाररूपे एकपात्रेऽपि दृश्यते ।

सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥ ७ ॥

आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ॥
निहन्तुं चण्डिकां कोपात् कृत्वा युद्धं तु मातृभिः ॥८॥

ततो युद्धमतीवासीद्देव्या शुम्भनिशुम्भयोः ॥
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥ ९ ॥

चिच्छेदास्ताञ् शरांस्ताभ्यां चण्डिका स्वशरोत्करैः ॥

दुग्ध्वा पयः पत्रपुटे मदीयमिति रघुवंशे । अथ वा पुटशब्दः प्रशंसावचनः तदुक्तं **गणरत्नमहोदधौ** । कपोलात्फलकं गण्डाद्भित्तिः पाशश्च कर्णतः ॥ श्रोणेर्बिम्बं पुटं चोष्ठान्मुखादेर्मण्डलादयः ॥ प्रशंसावचनाः शब्दा ज्ञेयाः शिष्टप्रयोगतः ॥ इति । तदा प्रशस्तावोष्ठावोष्ठपुटे इति विग्रहः । प्रशंसावचनैश्चेति समासः ॥ ७ ॥

आजगामेति । निशुम्भागमनानन्तरं महावीर्यः शुम्भोऽपि स्वबलैः स्वसैन्यैः वृतः सन् मार्गे स्थिताभिर्मातृभिः सह युद्धं कृत्वा ता निर्जित्येति शेषः । कोपात् चण्डिकां कौशिकीं निहन्तुं तस्याः समीपमाजगाम ॥ ८ ॥

तत इति । ततः मेघयोरिव अतीवोग्रं शरवर्षं वर्षतोर्मुञ्चतोः शुम्भनिशुम्भयोः देव्या सहातीव युद्धमासीदभवत् । मेघपक्षे शरवर्षं जलवृष्टिं शुम्भनिशुम्भपक्षे बाणवृष्टिम् । शरस्तु तेजने बाणे दध्यग्रे ना शरं जले ॥ इति **विश्वमेदिन्यौ** । मेघयोरिति द्विवचनं देशद्वयोपाधिविशिष्टत्वकल्पनया ॥

अथ पाठान्तरादि देव्याः इति षष्ठ्यन्तपाठे देव्याः शुम्भनिशुम्भयोश्च सम्बधि युद्धमिति व्याख्येयम् ॥९॥

चिच्छेदेति । चण्डिका ताभ्यां शुम्भनिशुम्भाभ्यां अस्तान् क्षिप्तान् असु क्षेपणे दैवादिकः । शरान् बाणान् । स्वशरोत्करैः स्वबाणसमूहैः

ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥ १० ॥

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ॥
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥ ११ ॥

ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ॥
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥ १२ ॥

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ॥
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥ १३ ॥

चिच्छेद । असुरेश्वरौ दैत्यस्वामिनौ शुम्भनिशुम्भौ प्रति अङ्गेषु प्रत्यवयवं शस्त्रौघैस्ताडयामास च ॥ १० ॥

निशुम्भ इति । निशुम्भः निशितं तीक्ष्णधारं खड्गं रत्नघटिताष्टचन्द्राङ्कितत्वात्सुप्रभं भास्वरं चर्म चादाय गृहीत्वा खड्गेन देव्या उत्तमं वाहनं सिंहं मूर्ध्नि अताडयत् प्राहरत् । सिंहस्य ताडनकर्मीभूतत्वात्तच्छब्दात् द्वितीया । मूर्ध्नस्ताडनक्रियाधिकरणत्वात्तच्छब्दात्सप्तमी । एवं पूर्वश्लोके असुरेश्वरावङ्गेष्वित्यत्र च ज्ञेयम् ॥ ११ ॥

ताडिते इति । देवी निशुम्भेन खड्गेन वाहने सिंहे ताडिते सति निशुम्भस्योत्तममसिं अष्टौ रत्नघटितानि चन्द्राकारचिह्नानि यस्मिंस्तदष्टचन्द्रकं चर्म च क्षुरप्रेण क्षुरसदृशतीक्ष्णधारेण बाणविशेषेणाशु शीघ्रम् । चिच्छेद ॥ १२ ॥

छिन्ने इति । देव्या चर्मणि छिन्ने खड्गे च छिन्ने सति । सः असुरः निशुम्भः देव्यां शक्तिं चिक्षेप । देवी अभिमुखागतामात्मनः सम्मुखं प्राप्तां तां अस्य निशुम्भस्य शक्तिमपि द्विधा चक्रे चिच्छेद । यमकालङ्कारः॥१३॥

कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ॥
आयातं मुष्टिघातेन देवी तच्चाप्यचूर्णयत् ॥१४॥

आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति ॥
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥ १५ ॥

ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ॥
आहत्य देवी बाणौघैरपातयत भूतले ॥ १६ ॥

कोपेति । अथ शक्तिच्छेदानन्तरं कोपेन आध्मातः प्रदीप्तः दानवः दनुवंश्यः निशुम्भः शूलं जग्राह गृहीत्वा देव्यां चिक्षेप । देवी आयातं समीपं प्राप्तं तच्छूलं चापि मुष्टिघातेन मुष्टिप्रहारेण अचूर्णयत् । चूर्णेति प्रातिपदिकात्सत्यापपाशेति णिच् ॥

अथ पाठान्तरादि आयातमित्यत्र आयान्तमिति शत्रन्तपाठे तदित्यत्र तमिति पठनीयम् । शूलशब्दस्य अस्त्री शूलं रुगायुधमिति पुन्नपुंसकलिङ्गत्वस्यानुशिष्टत्वात् । मुष्टिघातेनेत्यत्र मुष्टिपातेनेति क्वचित्पाठः । अर्थः समान एव ॥ १४ ॥

आविध्येति । अथ शूलचूर्णीकरणानन्तरं स निशुम्भोऽपि गदां आविध्य क्षेपणार्थमुद्यम्य चण्डिकां प्रति चण्डिकायामित्यर्थः । कर्मप्रवचनीयत्वात्प्रतियोगे द्वितीया । चिक्षेप । सा निशुम्भक्षिप्ता गदापि देव्या त्रिशूलेन भिन्ना सती भस्मत्वमतिसूक्ष्मचूर्णतामागता प्राप्ता । भस्मशब्दोऽत्रात्यन्तसूक्ष्मचूर्णपरः ।

अथ पाठान्तरादि आविध्येत्यत्र आदायेति क्वचित् पाठः ॥ १५ ॥

तत इति । ततो गदाया भस्मीभवनानन्तरं परशुः कुठारो हस्ते यस्य तं परशुहस्तं आयान्तं दैत्यपुङ्गवं दैत्यश्रेष्ठं निशुम्भं देवी बाणौघैराहत्य मूर्छितं कृत्वा चेति शेषः । भूतले अपातयत् ॥ १६ ॥

तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ॥
भ्रातर्यतीवसङ्क्रुद्धःप्रययौ हन्तुमम्बिकाम् ॥ १७ ॥

स रथस्थस्तदात्युच्चैर्गृहीतपरमायुधैः
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥ १८ ॥

तमायान्तं समालोक्य देवी शङ्खमवादयत् ॥
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ॥ १९ ॥

तस्मिन्निति । भीमः विक्रमः पराक्रमो यस्य तस्मिन् भ्रातरि निशुम्भे मूर्च्छया भूमौ निपतिते सति। शुम्भः अतीव सङ्क्रुद्धः सन् अम्बिकां देवीं हन्तुं प्रययौ अग्रे जगाम ॥ १७ ॥

स इति । तदा रथे तिष्ठतीति रथस्थः स शुम्भः अत्युच्चैरत्युन्नतैः । अत्युच्चैरिति तृतीयान्तं भुजविशेषणम् । गृहीतानि परमाणि उत्तमान्यायुधानि यैस्तैर्गृहीतपरमायुधैः अतुलैर्महाप्रमाणैः अष्टाभिः देवीस्पर्धया माययाङ्गीकृतैरिति भावः । भुजैः वटादिवृक्षः शाखाभिरिवेत्युपमाध्वनिः । अशेषं नभः व्याप्यावस्थितो बभौ शुशुभे

अथ पाठान्तरादि तन्द्रेत्यत्र तथेति क्वचित् पाठः ॥ १८ ॥

तमिति । देवी तं शुम्भमायान्तमागच्छन्तं समालोक्य आत्मनो युद्धौत्सुक्यदर्शनाय शत्रूणां भयोत्पादनाय च शङ्खमवादयत् तथा अतीवात्यन्तं दुःसहं शत्रूणां श्रोत्रव्यथाजनकं धनुषः ज्याशब्दं चापि चकार । सापेक्षत्वेऽपि गमकत्वात्समासः । ज्यापदेनैव धनुर्गुणत्वे सिद्धे पुनर्धनुःशब्दप्रयोगात् ज्याशब्दस्य गुणसामान्यमात्रपरता । तदुक्तं, विशिष्टानां पुनस्तदर्थकविशेषणे सामान्यमात्रपरतेति । ॥ १९ ॥

पूरयामास ककुभो निजघण्टास्वनेन च ॥
समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥ २० ॥

ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥
पूरयामास गगनं गां तथैव दिशो दश ॥ २१ ॥

ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ॥

पूरयामासेति । समस्तदैत्यसैन्यानां तेजोवधं बलक्षयं विदधाति तच्छीलेन तेजोबलविधायिना । यच्छ्रवणेन दैत्यसैन्यानां भीत्या शक्तिक्षयोऽभवदित्यर्थ : । पूर्ववत्समासः । तेजस्त्विड्रेतसोर्बले इति हैमः । निजघण्टास्वनेन ककुभः दिशः पूरयामास च ॥ २० ॥

तत इति । ततो देव्याः शङ्खादिस्वनानन्तरं सिंहः स्वकीयमहानादैः गगनमाकाशं गां पृथ्वीं तथैव दश दिशश्च पूरयामास । कीदृशैर्महानादैः त्याजितेभमहामदैः । त्याजितः त्यागं कारितः इभैः प्रयोज्यकर्तृभिः कर्मभूतो महामदो यैः प्रयोजककर्तृभिस्ते त्याजितेभमहामदा महानादास्तैः । अत्र त्यजेर्ण्यन्तत्वात् इभानां प्रयोज्यकर्तृत्वं महानादानां प्रयोजककर्तृत्वम् महामदस्य कर्मत्वम् इति बोध्यम् । तथा च इभकर्तृकमहामदकर्मकत्यागप्रयोजकीभूताः सिंहस्य महानादा इति समासार्थः ।

अथ पाठान्तरादि तथोपदिश इति पाठो न साधुः उपदिशां दशसङ्ख्याया अभावात् ॥ २१ ॥

ततः कालीति । ततः सिंहस्य महानादानन्तरं काली चामुण्डा गगनं उत्पत्य अन्तरिक्षे उत्प्लुत्य पुनर्निपत्य च कराभ्यां पाणितलद्वयेन क्ष्मां भूमिमताडयत् । क्ष्मावनिर्मेदिनी मही**त्यमरः** ॥ तन्निनादेन भूमिताडनजनितशब्देन ते प्राक्स्वनाः देवीशङ्खधनुर्ज्याघण्टास्वनसिंहस्वनाः तिरोहिताः

कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥ २२ ॥
अट्टाट्टहासमशिवं शिवदूती चकार ह ॥
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥२३॥
दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ॥
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥२४॥

अन्तर्हिता अभवन् । पूर्वस्वनचतुष्टयापेक्षया कालीकृतभूमिताडनशब्दो महानासीदित्यर्थः ॥ २२ ॥

अट्टाट्टेति । शिवदूती । अशिवं अमङ्गलं शत्रूणां भयजनकमित्यर्थः । अट्टति हिनस्ति शत्रूनित्यट्टः । अट्ट अतिक्रमहिंसनयोः पचाद्यच् । भृशार्थे द्वित्वे अट्टाट्टः । अथ वा अट्टेत्यव्ययमुच्चैरर्थे । उच्चैरर्थेऽट्ट कीर्तितमिति **त्रिकाण्डीशेषः** । पूर्ववद्द्वित्वे अट्टाट्टेति । ततो हासपदेन कर्मधारये अट्टाट्टहासः । तं चकार । हेति पादपूर्तौ । तैः देवीशङ्खस्वनादिशिवदूत्यट्टाट्टहासान्तशब्दैः असुरास्त्रेसुरुद्वेगं प्रापुः त्रसी उद्वेगे । उद्वेगः सभयचिन्ता । शुम्भः परमतिमहान्तं कोपं ययौ ॥

अथ पाठान्तरादि अट्टट्टेति ह्रस्वमध्यपाठे शकन्ध्वादित्वात्पररूपम् ॥ २३ ॥

दुरात्मन्निति। यदा अम्बिका कौशिकी देवी । शुम्भं हे दुरात्मन् दुर्बुद्धे । आत्मा यत्नो धृतिर्बुद्धिरित्य**मरः**। तिष्ठ तिष्ठ मा पलायिष्ठा इत्यर्थः । सम्भ्रमाद्विरुक्तिः । इति व्याजहार उवाच । व्याहरतिर्वचनार्थः । तदा आकाशसंस्थितैः युद्धावलोकनार्थं विमानस्थितैरित्यर्थः । देवैः जय उत्कर्षं प्राप्नुहि । जि जये, जय उत्कर्षप्राप्तिः । धात्वर्थसङ्गृहीतकर्मत्वेनाकर्मकः । जि अभिभवे सकर्मकः । जय शत्रूनभिभव । इति अभिहितम् । अभिनन्दनार्थमुत्साहवर्धनार्थं वेति भावः ॥ २४ ॥

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ॥
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥ २५ ॥
सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ॥

शुम्भेनेति। शुम्भेनागत्य अग्रतो गत्वा ज्वालाभिरतिभीषणा ज्वालातिभीषणा या शक्तिर्देव्यां मुक्ता। वह्निकूटस्याग्निराशेरिव आभा दीप्तिर्यस्या एतादृशी आयान्ती समीपमागच्छन्ती सा शक्तिः देव्या महत्य उल्का ज्वाला यस्यास्तया महोल्कया। तन्नाम्न्या वा निजशक्त्या निरस्ता प्रतिहता ॥ २५ ॥

सिंहेति। हे अवनीपते पृथ्वीपते राजन् सुरथ तदा गर्वात् कृतेन शुम्भस्य सिंहनादेन व्याप्तं लोकत्रयस्यान्तरमन्तरालं घोरोऽतिभयजनकः निर्घातानां शोणितवर्षिस्फूर्जथूल्कायुतात्यशुभावहौत्पातिकमेघसंघातान्योन्याघातानां निस्वनः शब्दो जितवान्। एतेन महाभयावहा उत्पाताश्च मुहुर्मुहुरभवन् इत्युक्तं। उक्तं च पूर्वमपि शुम्भस्य रणाङ्गणागमनसमये उत्पातजननं **परिशिष्टश्लोकेषु**। तद्यथा। उत्पाता बहवस्तत्र प्रादुरासन् सहस्रशः। उत्पातमेघा ववृपुरस्थिशोणितकर्दमम् ॥ क्रव्यादा व्यनदन् घोरं शिवाश्चापि ववाशिरे ॥ तानुत्पातानानादृत्य प्रययौ स हिमाचलं ॥ इति ॥ वक्ष्यते च शुम्भवधानन्तरमपि। उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥ इति ॥ एतेन शुम्भमरणपर्यन्तमुत्पातानामविच्छेदो दर्शितः। अत्र निर्घातनिस्वनेशुम्भसिंहनादव्याप्तलोकत्रयान्तरजयनस्य बाधितत्वाद्व्यापकत्वेन तद्विशेषणीभूते शुम्भसिंहनादे तस्यान्वयः। **उक्तं** च। सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाध इति ॥ तेन निर्घातनिस्वनो। लोकान्तरव्यापकं शुम्भसिंहनादशब्दं जितवानिति वाक्यार्थः। निर्घातनिस्वने शुम्भसिंहनादध्वनिलुप्तोऽभूदिति भावः। अथ वा शुम्भस्य सिंहनादेन लोक-

निर्घातनिस्वनो घोरो जितवानवनीपते ॥२६॥

शुम्भमुक्ताञ् शरान् देवी शुम्भस्तत्प्रहिताञ् शरान्॥
चिच्छेद स्वशरैरुग्रः शतशोऽथ सहस्रशः ॥ २७ ॥

ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ॥
स तदाभिहतो भूमौ मूर्छितो निपपात ह ॥ २८ ॥

ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः ॥

त्रयान्तरं व्याप्तं । तं सिंहनादं निर्घातनिस्वनो जितवानितिवाक्यभेदेन व्याख्येयं। केचिन्निर्घातनिस्वनपदेन देवीशुम्भशक्त्योः परस्पराघातशब्दमाहुः ॥ २६ ॥

शुम्भेति । अत्र चिच्छेद स्वशरैरुग्रैरित्येतद्देव्या शुम्भेन चान्वेति तथा शतशः सहस्रशः इत्येते द्वितीयान्तशरशब्देन तृतीयान्तशरशब्देन च सहान्वितः । तथाचैव योजना । देवी शुम्भमुक्तान् शुम्भेन विसृष्टान् शतं शतं शतशः सहस्रं सहस्रं सहस्रशः शरान् । उग्रैः शतेन शतशः सहस्रेण सहस्रेण सहस्रशः स्वशरैः चिच्छेद । एवं शुम्भोऽपि तत्प्रहितान् तया देव्या मुक्तान् शतं शतं शतशः सहस्रं सहस्रं सहस्रशः शरान् उग्रैः शतेन शतेन शतशः सहस्रेण सहस्रेण सहस्रशः स्वशरैश्चिच्छेदेति । सङ्ख्यैकवचनाच्च वीप्सायामिति द्वितीयाकारकात् तृतीयाकारकाच्च तद्धितः शस्प्रत्ययः ॥ २७ ॥

तत इति । ततः सा चण्डिका क्रुद्धा सती तं शुम्भं शूलेनाभिजघान प्रजहार । तदा शूलेनाभिहतः स शुम्भो मूर्छितः सन् भूमौ निपपात निपतितः । हेति पादपूरणे ॥ २८ ॥

ततो। निशुम्भ इति । ततः शुम्भस्य मूर्च्छाप्राप्त्यनन्तरम् प्राङ् मूर्छितो

आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ २९ ॥
पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ॥
चक्रायुतेन दितिजश्छादयामास चण्डिकाम् ॥ ३० ॥

निशुम्भः चेतनां संज्ञां सम्प्राप्य। आत्तं गृहीतं कार्मुकं धनुर्येन एवंविधःसन् देवीं कौशिकीं कालीं चामुण्डां तथा केसरिणं सिंहम् । शरैर्बाणैराजघान आहतवान् ॥ २९ ॥

पुनश्चेति । पुनरित्यानन्तर्ये । पुनश्च ततश्चेत्यर्थः । दनुजानां दानवानामीश्वरः स्वामी दनुजेश्वरो दितिजो दैत्यो निशुम्भः । दैत्यानां दानवानां च शुम्भनिशुम्भयोरेवाधिपत्याद्दनुजेश्वर इत्युक्तम् । वस्तुतस्तु दितिसुतानां दनुसुतानां मातृतो भेदेऽपि उभयेषामपि दितिदनुभ्यां सापत्नमातृत्वादविशेषेण पालनपोषणादिभिर्वर्धितत्वादुभयेषां देवविद्वेषणरूपसमानकार्यत्वात्सदैकत्रावस्थानाच्चाविशेषेणोभयेषां दैत्यशद्बेन दानवशब्देन वा सर्वत्र प्रयोगः क्रियते । **अमरसिंहेना**प्युक्तम् । असुरा दैत्यदैतेयदनुजेन्द्रारिदानवा इति ॥ मायया बाहूनामयुतं दशसाहस्रीं कृत्वा चक्राणां तत्संज्ञकानामायुधानामयुतेन प्रतिहस्तमेकैकमिति युगपद्दशसहस्रहस्तगृहीतैर्दशसहस्रचक्रैरित्यर्थः। चण्डिकां कौशिकीं छादयामास आच्छादितवान् ॥

अथ पाठान्तरादि चक्रायुधेनेति क्वचित् पाठः । स न साधुः। एकेन चक्रेणाच्छादनासम्भवात् बाहूनामयुतीकरणस्य व्यर्थत्वात् वक्ष्यमाणेन चिच्छेद तानि चक्राणि इति बहुवचनेन विरोधाच्चेति ज्ञेयम् ॥ ३० ॥

तत इति । ततः चक्रायुतेनाच्छादनानन्तरम् दुर्गस्य दुर्गासुरस्य आर्तिं तत्कृतलोकपीडां नाशयतीति दुर्गार्तिनाशिनी । भगवती दुर्गा कौशिकी क्रुद्धा सती । स्वशरैः तानि शुम्भक्षिप्तानि चक्राणि तान् चक्रक्षेपात् प्राङ्मुक्तान् सायकान् बाणांश्च चिच्छेद ॥

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥३१॥
ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ॥
अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥ ३२ ॥
तस्यापतत एवाशु गदां चिच्छेद चण्डिका ॥
खड्गेन शितधारेण स च शूलं समाददे ॥ ३३ ॥
शूलहस्तं समायान्तं निशुम्भममरार्दनम् ॥
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥ ३४ ॥
भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ॥

अथ पाठान्तरादि दुर्गार्तिहारिणीति क्वचित् पाठः ॥ ३१ ॥

ततो निशुम्भ इति । ततः देवीकृतचक्रसायकच्छेदानन्तरम् । निशुम्भः गदामादाय चण्डिकां हन्तुं दैत्यसेनया समावृतो दैत्यसेनासमावृतो वेगेनाभ्यधावत् । चण्डिकाभिमुखमधावत् । तङ् छान्दसः ॥

अथ पाठान्तरादि दैत्यसेनेत्यत्र दैत्यसैन्येति क्वचित् पाठः ॥ ३२ ॥

तस्येति । चण्डिका । आपतत एव आगच्छत एव तस्य निशुम्भस्य मार्ग एवेति भावः । गदां हस्तस्थितामेव । शिता तीक्ष्णा धारा यस्य तेन शितधारेण खड्गेन । क्षिप्तेनेति भावः । आशु द्रुतं चिच्छेद । ततः स निशुम्भश्च शूलं समाददे आदायाययावित्यर्थः ॥ ३३ ॥

शूलेति । चण्डिका शूलं हस्ते यस्य तं शूलहस्तं समायान्तं समागच्छन्तं अमरार्दनं देवहिंसकम् । अर्द हिंसायां चुरादिः । निशुम्भम् । वेगाविद्धेन वेगात् क्षिप्तेन स्वशूलेन हृदि विव्याध विदारयामास ॥ ३४ ॥

भिन्नस्येति । देव्याः शूलेन भिन्नस्य विदीर्णहृदयस्य तस्य निशु-

महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३५ ॥
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्तदा ॥
शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥ ३६ ॥
ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३७ ॥
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥

म्भस्य हृदयात् महाबलः सामर्थ्यवान् महावीर्यः प्रभाववान् अपरः अन्यः पुरुषो दैत्यो देवीं तिष्ठेति वदन् निस्सृतो निष्क्रान्तः ॥ ३५ ॥

तस्येति । तदा देवी निष्क्रामतो निष्क्रान्तस्येत्यर्थः । पूर्वश्लोके निःसृत इत्युक्तेः । वर्तमानसामीप्ये भूते लट् तस्य च शता । तस्य पुरुषस्य शिरः । स्वनवत् सशब्दम् उच्चैरित्यर्थः । प्रहस्य, अनादरेणोपहस्य खड्गेन चिच्छेद । ततोऽसौ पुरुषो भुव्यपतत् पतित्वा मृत इत्यर्थः ॥

अथ पाठान्तरादि तदेत्यत्र तत इति क्वचित् पाठः ॥ ३६ ॥

तत इति । ततो निशुम्भमरणानन्तरम् । सिंहः कांश्चिदसुरान् उग्राभिर्दंष्ट्राभिः क्षुण्णाश्चूर्णीकृताः शिरोधरा ग्रीवा येषां एतादृशान् कृत्वा चखाद खादितवान् । काली अन्यांस्तानसुरानित्यर्थः । तथा कृत्वा चखाद । शिवदूत्यपि अपरानसुरांस्तथा कृत्वा चखाद । इति योजना ॥

अथ पाठान्तरादि उग्रेत्यत्र उग्रानिति क्वचित्पाठः । तत्पक्षे तदसुरविशेषणम् । उग्रमिति पाठे खादनक्रियाविशेषणम् ॥ ३७ ॥

कौमारीति । केचिन्महासुराः । कौमार्याः शक्त्या तदाख्येनायुधेन निर्भिन्ना विदारिता नेशुः मृताः । अन्ये महासुराः ब्रह्माण्या मन्त्रैः पूतेन पवित्रीकृतेन तोयेन कमण्डलुजलेन क्षिप्तेन निराकृता निरस्ताः विद्राविता

ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥ ३८॥

माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ॥
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥३९॥

खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ॥
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥४०॥

केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ॥

इति यावत् प्रसिद्धं हि पुराणादिषु मन्त्रपूतजलभस्माक्षतगौरसर्षपादिप्रक्षेपेण भयाद्दैत्यरक्षःपिशाचादीनां पलायनम् ॥ ३८ ॥

माहेश्वरीति । तथा अपरे महासुराः माहेश्वर्यास्त्रिशूलेन भिन्ना विदारिता भुवि पेतुः मृता इत्यर्थः । केचिन्महासुराः वाराह्यास्तुण्डस्य पोत्रस्य घातेन प्रहारेण चूर्णीकृता भुवि पेतुः ॥ ३९ ॥

खण्डं खण्डमिति । केचिद्दानवा दनुवंश्या महासुराः वैष्णव्याश्चक्रेण खण्डं खण्डं कृताः खण्डत्वप्रकारं प्रापिताः शकलीकृता इति यावत् । प्रकारे गुणवचनस्येति खण्डशब्दस्य द्वित्वम् । वैष्णव्येति तृतीयान्तं वा । तथा अपरे दानवाः ऐन्द्र्याः हस्ताग्रेण कर्त्रा विमुक्तेन वज्रेण खण्डं खण्डं कृताः ॥

अथ पाठान्तरादि इत उत्तरम् नखैर्विदारिताश्चान्ये नारसिंह्या महासुराः ॥ इत्यर्धमधिकं क्वचित् पठ्यते ॥ ४० ॥

केचिदिति । केचिदसुराः विनेशुः भयान्मृताः । केचित् महाहवान्महायुद्धान्नष्टाः पलायिताः । अपरे असुराः ये युद्धात्पलायनं न वीरधर्मं

भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ ४१ ॥

इति योद्धुमवस्थितास्ते जीवन्त एव कालीशिवदूतीमृगाधिपैर्भक्षिताः । मृगाधिपः सिंहः ॥ ४१ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमाहात्म्ये
निशुम्भवधो नाम नवमोऽध्यायः ॥ ९ ॥

इतीति । निशुम्भस्य वधो यस्मिन् स निशुम्भवधः । षट्त्रिंशक्षरात्मकमेतन्नवमाध्यायसमाप्तिवाक्यम् ॥ ९ ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थ-
प्रकाशे नवमाध्यायव्याख्या ॥ ९ ॥

समाप्तो नवमोऽध्यायः

॥ अथ दशमोऽध्यायः ॥

ऋषिरुवाच ॥ १ ॥

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम् ॥
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥ २ ॥
बलावलेपदुष्टे त्वं मा दुर्गे गर्वमावह ॥

ऋषिरिति । अथ दशमाध्यायमन्त्रविभागकारिकाः ॥ दशमेऽथो ऋषिरुवाचेत्येको गद्यमन्त्रकः ॥ निशुम्भमित्यथ बलावलेपादिति श्लोकमन्त्रकौ॥ देव्युवाचेति च ततो गद्यात्मैको मनुर्मतः ॥ श्लोकावेकैवेति ततः समस्ता इत्युभौ मनू ॥ देव्युवाचेति च पुनर्गद्यात्मा मनुरिष्यते ॥ अहं विभूत्येत्येकश्च श्लोकमन्त्र उदाहृतः ॥ ततश्चर्षिरुवाचेति गद्यरूपो मनुर्मतः॥ ततः प्रववृते युद्धमित्यष्टौ श्लोकमन्त्रकाः ॥ अश्वांश्च पातयामासेत्यर्धश्लोकात्मको मनुः ॥ हताश्व इत्याद्याः श्लोकमन्त्रा उक्ताश्चतुर्दश ॥ द्वत्रिंशन्मनवः सर्वे श्लोकाख्याः सप्तविंशतिः॥ एकोऽर्धश्लोकमन्त्रः स्याच्चत्वारो गद्यमन्त्रकाः॥ श्लोकास्तु सर्वे सर्गेऽस्मिन् सार्धाः स्युः सप्तविंशतिः ॥ इति ॥ अथ मन्त्रव्याख्या । **ऋषिरिति** ॥ १ ॥

निशुम्भमिति । शुम्भः प्राणैः सम्मितं तुल्यं भ्रातरं निहतं बलं सैन्यं निहन्यमानं चैव दृष्ट्वा क्रुद्धः सन् वक्ष्यमाणं वचोऽब्रवीत् ॥

अथ पाठान्तरादि एतदुत्तरं शुम्भ उवाचेति क्वचित् पठ्यते ॥ २ ॥

बलेति । बलस्य शरीरसामर्थ्यस्य योऽवलेपो लेपनं अल्पसम्बन्ध इत्यर्थः तेन दुष्टे दूषिते संसृष्टे इत्यर्थः । गर्वलेपनयोरुक्तमवलेपपदं बुधैः ॥ इति **शाश्वतः** । हे दुर्गे । पूर्वं शिवस्य दूतत्वेन प्रहितत्वात्तप-

अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥ ३ ॥

देव्युवाच ॥ ४ ॥

एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥

त्नीत्वसम्भावनया दुर्गे इति सम्बोधनम् । दुष्टैर्गीयते इति दुर्गा तस्याः सम्बोधनं वा । गै शब्दे । आतश्चोपसर्गे इत्यङ् । त्वं । एते सर्वे दैत्याः स्वयं हता इति मत्वा गर्वं मा आवह न कुरु । मा इति निषेधेऽव्ययम् न माङ् तेन न लुङ् । कुत इत्याह **अन्यासामिति** । या अतिमानिनी त्वं अन्यासां स्वसखीनां काल्यादीनां बलं सामर्थ्यमाश्रित्य युध्यसे । तस्मात्परबलेनात्मनो बलवत्तां मत्वा गर्वकरणं न वीरधर्म इति भावः ॥ इदं शुम्भवचनं देवीस्तुतिपरत्वेनापि केचिद्योजयन्ति सोऽतिप्रसङ्ग एव । द्विषतः शुम्भस्य देव्यामादरबुद्धेरसम्भवात् ॥

अथ पाठान्तरादि बलावलेपाद्दुष्टे त्वमिति क्वचित् पाठः । तत्पक्षे दुष्टे इत्यस्य दुःस्वभावे इत्यर्थः ॥ ३ ॥

देवीति ॥ ४ ॥

अन्यासां बलमाश्रित्य युद्ध्यसे इति यच्छुम्भेनोक्तम् तदुत्तरमाह । **एकैवाहमिति** । शुम्भेन दुष्टे इति सम्बोधितत्वात्स्वयमपि तं तथैव सम्बोधयति हे दुष्टेति । हे दुष्ट परोपद्रवकारिन् शुम्भ । अत्र जगत्यहमेकैवास्मि । मम अपरा मत्तोऽन्या द्वितीया कास्ति इति काकुः कापि नास्तीत्यर्थः । एकमेवाद्वितीयम् ब्रह्मेति श्रुतेरिति भावः । तर्हि दृश्यन्तेऽत्र त्वद्भिन्ना विविधाकाराः काल्यादय इतिचेदेता मद्विभूतयः आवर्ततरङ्गबुद्बुदादयो जलस्येव मदंशभूता एव । अतएता मय्येव विशन्त्यस्सन्ति । मय्येव विलयमेष्यन्तीत्यर्थः । एतत्पश्य प्रत्यक्षीकुर्विति । वाक्यार्थः कर्म । अथ वा ।

पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥५॥
ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ॥
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥ ६ ॥

देव्युवाच ॥ ७ ॥

अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता ॥

विशन्त्यो मद्विभूतय इति द्वितीयार्थे प्रथमा । तथाचैता मद्विभूतीर्मय्येव विशन्तीः पश्येति योजना । ब्राह्म्यादिशक्तीनां तत्तद्देवशरीरसम्भूतत्वेऽपि सर्वासां देवीशक्तित्वान्मद्विभूतय इत्युक्तम् । उक्तं च **लक्ष्मीतन्त्रे** शक्रं प्रति देव्यैव । मदीयाः शक्तयो याश्च तत्तद्देवशरीरगाः ॥ तास्तास्तद्रूपधारिण्यः साहाय्यं व्यदधुर्मम ॥ ताभिर्निहत्य दैत्येन्द्रान् संहृतास्ता मयात्मनीति ॥ **वामनपुराण**मतेन त्वासां देवीशरीरोत्पन्नत्वेन तद्विभूतित्वं तच्छरीरे लयश्च युक्त एव ॥

अथ पाठान्तरादि का ममापरेत्यत्र कास्ति मत्परेति क्वचित् पाठः ॥५॥

तत इति । ऋष्युक्तिरियम् । ततो देवीवचनानन्तरम् । ब्रह्माणी-ब्राह्मी प्रमुखा यासां ता ब्रह्माणीप्रमुखाः । ब्राह्म्यादयस्ताः समस्ता देव्यो मातरः तस्या देव्याः कौशिक्यास्तनौ शरीरे उपादानकारणे लयं जग्मुः विलयं प्रापुः । तदा अम्बिका कौशिकी एकैवावशिष्टा आसीत् ।

अथ पाठान्तरादि एतच्छ्लोकारम्भे ऋषिरुवाचेत्यपेक्षितमपि नास्ति । क्वचित् पठ्यते तदनार्षम् ॥ ६ ॥

देवीति ॥ ७ ॥

अहमिति । यत् अहं इह विभूत्या स्वप्रभावेन बहुभिः रूपैरास्थिता

तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ८ ॥

ऋषिरुवाच ॥ ९ ॥

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ॥
पश्यता सर्वदेवानामसुराणां च दारुणम् ॥ १० ॥
शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥
तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् ॥ ११ ॥
दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ॥

स्थितवत्यस्मि । तद्बहुरूपत्वेनास्थानं मया संहृतं उपसंहृतम् सम्प्रत्याजौ युद्धे एकैव तिष्ठामि । स्थिरो भव मा पलायिष्ठा इत्यर्थः ॥ ८ ॥

ऋषिरिति ॥ ९ ॥

तत इति । ततः देवीवचनानन्तरम् सर्वदेवानामसुराणां च पश्यतां सतां अनादराभावेऽपि भावलक्षणा षष्ठी । देव्याः शुम्भस्य चेत्युभयोः दारुणं भीषणं युद्धं प्रववृते प्रवृत्तम् । अथ वा पश्यतां सर्वदेवानामसुराणां च दारुणं स्वस्वपक्षपराजयशङ्कयोद्वेगजनकमित्यर्थः देव्याः शुम्भस्य चेत्युभयोर्युद्धं प्रववृते इत्यन्वयः ॥ १० ॥

अथ युद्धं वर्णयति शरवर्षैरिति । शरवर्षैर्बाणवृष्टिभिः । वृष्टिर्वर्षमित्यमरः । शितैस्तीक्ष्णैः शस्त्रैः परशुखड्गादिभिः । तथा दारुणैर्भयजनकैरस्त्रैराग्नेयवारुणादिभिश्चैव सर्वलोकभयङ्करं तयोर्देवीशुम्भयोः भूयः बहुतरं युद्धमभूत् ॥

अथ पाठान्तरादि भूय इत्यत्र भूपेति क्वचित् पाठः । तत् राज्ञः सम्बोधनम् ॥ ११ ॥

अथ युद्धे शुम्भदेव्योः शक्तितारतम्यमाह **दिव्यानीतिश्लोकद्वयेन** ।

बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥ १२ ॥
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः ॥१३॥
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥

अथ युद्धोपक्रमानन्तरं अम्बिका देवी यानि दिव्यानि शतं शतं शतशः अस्त्राणि मुमुचे शुम्भे चिक्षेप । तानि दैत्येन्द्रः शुम्भः तत्प्रतीघातकर्तृभिः । तेषां देव्यस्त्राणां प्रतीघातः प्रतीकारः । उपसर्गस्य घञीति प्रतेर्दीर्घः । तस्य कर्तृभिः विधायकैः अस्त्रैः आग्नेये पार्जन्यं पार्जन्ये वायव्यं वायव्ये पार्वतं तस्मिन् वज्रास्त्रमित्येवंरूपैः बभञ्ज भङ्गं निनाय ॥ १२ ॥

मुक्तानीति । तेन शुम्भेन मुक्तानि दिव्यान्यस्त्राणि च । चस्त्वर्थे । स च शुम्भकृतदेव्यस्त्रप्रतीकाराद्देवीकृतशुम्भास्त्रप्रतीकारस्य भेदं दर्शयति । परमेश्वरी कौशिकी उग्रं हुङ्कारस्योच्चारणं उग्रहुङ्कारोच्चारणं तदादिभिः । आदिना मुष्टिघाताभिः । उक्तं च पूर्वं निशुम्भयुद्धे । आयातं (शूलं) मुष्टिपातेन देवी तच्चाप्यचूर्णयदिति । लीलया अनायासेनैव बभञ्ज । एतेन शुम्भापेक्षया देव्या अतीव शक्त्याधिक्यं दर्शितम् ॥

अथ पाठान्तरादि इत उत्तरं दिव्यवर्षसहस्रं तु गतमासीद्विशाम्पते ॥ देव्याः शुम्भस्योभयोस्तु युध्यतोश्च भयङ्करम् ॥ विमानस्थास्तदा देवा ऋषयश्च बभाषिरे ॥ नचाप्येवंविधं युद्धं प्रागासीद्भविता न च । इति श्लोकद्वयमधिकं कचित् पठ्यते ॥ १३ ॥

तत इति । ततः सोऽसुरः शुम्भः शराणां शतैः अनन्तैः शरैरित्यर्थः । देवीमाच्छादयत । सा देव्यपि कुपिता सती इषुभिः शरैः तत् शुम्भस्य धनुः चकाराच्छुम्भमुक्तानि शरशतान्यपि चिच्छेद । तत्कुपितेत्येकं पदं वा । तस्मै शुम्भाय कुपितेति वा तेन शरशताच्छादनेन कुपितेति वा तदर्थः ।

सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥१४॥
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ॥
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥१५॥
ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ॥
अभ्यधावत तां देवीं दैत्यानामधिपेश्वरः ॥१६॥
तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ॥

अथ पाठान्तरादि चिच्छेद चेषुभिरित्यत्र चिच्छेद सायकैरिति क्वचित् पाठः ॥ १४ ॥

छिन्ने इति । दैत्येन्द्रः शुम्भः तथा तेन प्रकारेण सकोपशरप्रहारेणेत्यर्थः । धनुषि छिन्ने सति । अथ शक्तिं आददे जग्राह । देवी तां शक्तिमपि अस्य करे शुम्भस्य स्थितामेव प्रक्षेपात् प्रागित्यर्थः । चक्रेण चिच्छेद ॥

अथ पाठान्तरादि करे स्थितामित्यत्र करस्थितामिति करोत्थितामिति वा क्वचित् पाठः ॥ १५ ॥

तत इति । ततः शक्तिच्छेदानन्तरं दैत्यानां अधिपा दैत्यसामन्तास्ते पामीश्वरः स्वामी दैत्यचक्रवर्तीत्यर्थः । शुम्भः । देवदत्तस्य गुरुकुलमितिवत्सापेक्षत्वेऽपि गमकत्वात्समासः । खड्गं तथा भानुमत् रत्नखचितत्वाद्रश्मियुक्तम् भानू रश्मि दिवाकरावित्य**मरः** । शतचन्द्रं चर्म च । चन्द्रहासस्तु खड्गे स्याच्छतचन्द्रं च चर्मणि ॥ **इति केशवः** ॥ शतचन्द्रचिह्नाङ्कितस्यैव चर्मणः शतचन्द्रसंज्ञेत्यन्ये । उपादाय गृहीत्वा तां देवीमभ्यधावत रथेनेति शेषः । अग्रे अश्वांश्च पातयामास रथं सारथिना सहेति वक्ष्यमाणत्वात् आत्मनेपदं छान्दसम् ।

अथ पाठान्तरादि अभ्यधावत्तदा देवीम् इत्यत्र अभ्यधावत तां हन्तुमिति वा क्वचित्पाठः ॥ १६ ॥

तस्येति । चण्डिका तस्य शुम्भस्य आपतत आगच्छत एव मार्गे

धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥१७॥
अश्वांश्च पातयामास रथं सारथिना सह ॥१८॥
हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ॥
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥१९॥

एवेत्यर्थः । खड्गं तथा अर्ककरैः सूर्यकिरणैः अमलं भास्वरं तत्रार्ककिरणानां प्रतिफलनादिति भावः । अर्ककरवदमलमिति वा । रत्नखचितत्वादिति भावः । चर्म खेटकं च । धनुषा मुक्तैर्धनुर्मुक्तैः शितैस्तीक्ष्णैर्बाणैः आशु त्वरया चिच्छेद । अर्ककरामलमिति विशेषणं खड्गेऽपि वा योज्यम् ॥१७॥

अश्वांश्चेति । अर्धश्लोकमन्त्रोऽयम् ॥ **भास्कररायास्तु** तत्रापि सा निराधारेत्यर्धमर्धमन्त्रत्वेनेच्छन्ति तद्विषये उपोद्घाते मन्त्रविभागप्रकरणे विचारितम् । देवी शुम्भस्याश्वान् रथाश्वान् । सारथिना सह रथं च पातयामास । तत्र अश्वानां सारथेश्च पातनं वधः । रथस्य तु भङ्ग इति विवेकः । इदमर्धं केचिन्न पठन्ति तदयुक्तम् । उत्तरश्लोके हताश्वविसारथिपदयोरनुक्तार्थानुवादकत्वापत्तेः । छिन्नधन्वेत्यत्र तु पूर्वं सापि तत् कुपिता देवी धनुश्चिच्छेद चेषुभिरिति धनुश्छेदस्योक्तत्वान्नेयमापत् ॥ १८ ॥

हताश्व इति । हताः अश्वाः रथाश्वाः यस्य स हताश्वः । छिन्नं धनुर्यस्य स छिन्नधन्वा । सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिरिति पूर्वमुक्तत्वात् । धनुषश्चेत्यनङ् । विगतो मृतः सारथिर्यस्य स विसारथिः । विसारथिरिति विरथत्वस्याप्युपलक्षणम् । अश्वांश्च पातयामास रथं सारथिना सहेति पूर्वमुक्तत्वात् । स दैत्यः शुम्भः तदा । अम्बिकाया देव्याः निधने वधे उद्यतः अम्बिकानिधनोद्यतः सन् घोरं भयावहं मुद्गरं तन्नामानमायुधविशेषं जग्राह गृहीत्वाभ्यापतत् ॥ १९ ॥

चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥२०॥
स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ॥
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥ २१ ॥
तलप्रहाराभिहतो निपपात महीतले ॥
स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ २२ ॥
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥
तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥ २३ ॥

चिच्छेदेति । आपततोऽभिमुखमागच्छतस्तस्य शुम्भस्य मुद्गरं हस्तस्थमेव निशितैस्तीक्ष्णैः शरैश्चिच्छेद । तथापि मुद्गरच्छेदेऽपि । स शुम्भः । मुष्टिं बद्धमुष्टिं हस्तमित्यर्थः । उद्यम्य वेगावान् सन् तां देवीमभ्यधावत् । हन्तुमिति भावः ॥ २० ॥

स इति । स दैत्यपुङ्गवः दैत्यश्रेष्ठः शुम्भः । स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ॥ सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ **इत्यमरः**॥ देव्याः हृदये उरसि मुष्टिं पातयामास मुष्ट्या प्रजहारेत्यर्थः । सा देव्यपि तं शुम्भं तलेन करतलेन उरसि अताडयच्च ॥ २१ ॥

तलेति । देव्याः तलप्रहारेण अभिहतस्ताडितः स दैत्यराजः शुम्भः । राजाहःसखिभ्य इति टच् । महीतले निपपात पतितः । पुनः सहसा पतनसमकाल एव तथैव यथा पतितस्तथैव उत्थितः ॥ २२ ॥

उत्पत्य चेति । शुम्भः उत्थानानन्तरं देवीं प्रगृह्य गृहीत्वा उत्पत्य-चोत्प्लुत्य च गगनं आस्थित आश्रितोऽभूत् । तत्रापि गगनेऽपि सा चण्डिका निराधारा अन्तरालस्थितैव सती तेन शुम्भेन सह युयुधे ॥ २३ ॥

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ॥
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥ २४ ॥
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ॥
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥ २५ ॥
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगतः ॥

नियुद्धमिति । तदा प्रथमं आदौ खे आकाशे दैत्यः शुम्भः चण्डिका च परस्परं अन्योन्यं सिद्धा उपदेवविशेषाः । मुनयो नारदाद्याः देवर्षयः । तेषां विस्मयकारकं आश्चर्यजनकं नियुद्धं बाहुयुद्धं चक्रतुः । नियुद्धं बाहुयुद्धं स्यादित्यमरः । अत्र नियुद्धस्य सिद्धदेवर्षीणामेव विस्मयकारकत्वोक्त्या तेषां युद्धदर्शनेऽतिप्रीतिर्ध्वनिता । अथ वा सिद्धा योगिनः । मुनयस्तपस्विनस्तेषामपि विस्मयकारकम् । तेषां लौकिकलीलादर्शननिस्पृहाणामपि नियुद्धेन विस्मयोत्पत्युक्तिर्नियुद्धस्यातीव रमणीयत्वं प्रतिपादयति ।

अथ पाठान्तरादि प्रथममित्यत्र परममिति प्रधनमिति वा क्वचित् पाठः ॥ २४ ॥

तत इति । अम्बिका तेन शुम्भेन सह सुचिरं बहुकालं युद्धं कृत्वा तं उत्पात्य चरणयोर्धृत्वा उत्क्षिप्य भ्रामयामास । भ्रमेर्मित्वेऽपि ह्रस्वाभावच्छान्दसः । ततोः धरणीतले चिक्षेप ।

अथ पाठान्तरादि उत्पात्येत्यत्र उत्पाट्येति उत्पाद्येति उत्थाप्येति वा क्वचित् पाठः । भ्रामयामासेत्यत्र भ्रमयामासेति च ॥ २५ ॥

स इति । देव्या अधः क्षिप्तो दुष्टात्मा दुष्टबुद्धिर्दुष्टस्वभावो वा स शुम्भः । धरणीं प्राप्य धरण्यां पतितः सन् पुनरुत्थाय मुष्टिं मुष्टीकृतं हस्तमुद्यम्य चण्डिकाया निधनेच्छया मरणेच्छया । अनेन मुष्टिप्रहारेण चण्डिका म्रियतामितीच्छयेत्यर्थः । वेगतः वेगेनाभ्यधावत । देवीसमीपमिति शेषः ।

अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥ २६ ॥
तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ॥
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥ २७ ॥
स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ॥
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥२८॥
ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ॥
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥ २९ ॥
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥

अथ पाठान्तरादि वेगत इत्यत्र वेगित इति वेगवानिति वा क्वचित् पाठः ॥ २६ ॥

तमिति । ततः देवी स्वसमीपमन्तरिक्षे आयान्तमागच्छन्तं सर्वदैत्यजनानामीश्वरं स्वामिनं तं शुम्भं शूलेन वक्षसि उरसि भित्त्वा विदार्य जगत्यां भूमौ पातयामास ॥ २७ ॥

स इति । देव्याः शूलाग्रेण विक्षतो विद्धः स शुम्भः गतासुर्गतप्राणः सन् साब्धिद्वीपां अब्धिभिः समुद्रैस्तदन्तर्गतद्वीपैश्च सहितां सपर्वतां सकलां पृथ्वीं स्वदेहभारेण चालयन् कम्पयन् कम्पने चलिरिति मित्वेऽपि ह्रस्वाभावश्छान्दसः । ऊर्व्यां पपात ॥ २८ ॥

तत इति । दुरात्मनि तस्मिन् शुम्भे देव्या हते सति ततः अखिलं सर्वं जगत् प्रसन्नं प्रमुदितं सत् अतीव स्वास्थ्यं शान्तिमाप अत्र जगत्पदेन तत्रत्या जना ग्राह्याः । प्रागुत्पातरजोधूमाद्यावृतं नभश्च निर्मलमभवत् ॥२९॥

उत्पातेति । तत्र तस्मिन् शुम्भे । देव्या पातिते हते सति । ये प्राक् युद्धकाले सोल्काः सज्वालाः उत्पातमेघा अशुभसूचका रक्तादिवृष्टिमन्तो

सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥ ३० ॥
ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ॥ ३१ ॥
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ ३२ ॥

मेघा आसंस्ते शमं शान्तिं ययुः । सरितः याः पूर्वं विमार्गगास्ता मार्गेण वहन्ति तच्छीला मार्गवाहिन्य आसन् ।

अथ पाठान्तरादि तथासंस्तत्र पातिते इत्यस्य स्थाने तथा शुम्भे निपातिते इति पाठः क्वचित् ॥ ३० ॥

तत इति । तस्मिन् शुम्भे निहते सति । ततः सर्वे देवगणाः हर्षेण निर्भरं पूर्णं मानसं येषां ते हर्षनिर्भरमानसा बभूवुः । गन्धर्वा देवगायकाः ललितं मधुरं जगुः । गीतवन्तः, गै शब्दे लिट् ॥३१॥

अवादयन्निति । तथैवान्ये गायकातिरिक्ता गन्धर्वाः । अथ वा अन्ये गन्धर्वातिरिक्ताः किन्नरा इत्यर्थः । गन्धर्वकिन्नराणां सदा साहचर्येण कथनात् गन्धर्वाणां चात्र कण्ठरवेणोक्तत्वादन्यशब्देन किन्नराणां ग्रहणम् । अवादयन् वाद्यानीति शेषः । अप्सरसां देवनर्तकीनां गणाः सङ्घाः ननृतुश्च ॥ तथा पुण्याः सुखावहाः शीतमन्दसुगन्धय इत्यर्थः । वाता वायवो ववुरूहुः । दिवाकरः सूर्यः सुप्रभः सुप्रकाशोऽभूत् । एतेन शुम्भवधात् प्राक् वायवः असुखावहाः सूर्यश्च मन्दप्रकाश आसीदिति सूचितम् ।

अथ पाठान्तरादि इत उत्तरं जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः ॥ दिग्गजनिस्वना इति वा ॥ मुमुचुः पुष्पवर्षाणि दिवि देवा विमानगाः ॥ धर्मकर्माण्यवर्तन्त देवा जाता हविर्भुजः ॥ इति सार्धश्लोकोऽधिकः क्वचित् पठ्यते ॥ ३२ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे
देवीमाहात्म्ये शुम्भवधो नाम दशमोऽध्यायः ॥ १० ॥

इतीति । शुम्भस्य वधो यस्मिन् स शुम्भवधः । अध्यायनामैतत् । पञ्चत्रिंशदक्षरात्मकमिदं दशमाध्यायसमाप्तिवाक्यम् ॥ १० ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
दशमाध्यायव्याख्या ॥ १० ॥

समाप्तो दशमोऽध्यायः ॥

॥ अथैकादशोऽध्यायः ॥

ऋषिरुवाच ॥ १ ॥

देव्या हते तत्र महासुरेन्द्रे
सेन्द्राः सुरा वह्निपुरोगमास्ताम् ॥

ऋषिरिति । अथैकादशाध्यायमन्त्रविभागकारिकाः ॥ एकादशे ऋषिरुवाचेत्येको गद्यमन्त्रकः ॥ देव्या हताद्याश्च चतुस्त्रिंशत्स्युः श्लोकमन्त्रकाः ॥ देव्युवाचेति च ततो गद्यमन्त्र उदाहृतः ॥ वरदाहमिति त्वेकः श्लोकमन्त्रस्ततो मतः ॥ देवा ऊचुस्तथा चैको गद्यमन्त्र उदाहृतः ॥ सर्वाबाधाप्रशमनमित्येकः श्लोकमन्त्रकः । देव्युवाचेति च ततो गद्यात्मैको मनुर्मतः ॥ वैवस्वते प्रभृतयोऽष्टौ च स्युः श्लोकमन्त्रकाः ॥ शाकम्भरीतिविख्यातिमित्यर्धश्लोकमन्त्रकः । तत्रैव च वधिष्यामीत्याद्याः षट् श्लोकमन्त्रकाः ॥ सर्वे मन्त्राश्च सर्गेऽस्मिन् पञ्चपञ्चाशदीरिताः ॥ पञ्चाशत् श्लोकमन्त्राःस्युरेकोऽर्धश्लोकमन्त्रकः ॥ चत्वारो गद्यमन्त्राः स्युः श्लोकाः सार्ध शतार्धकम् ॥ इति ॥ अथ मन्त्रव्याख्या ऋषिरिति ॥ १ ॥

अथ शुम्भवधानन्तरं परिपूर्णमनोरथानां देवानां देवीस्तुत्युपक्रममाह **देव्येति** । तत्र तस्मिन् महासुराणामिन्द्रे स्वामिनि महासुरेन्द्रे शुम्भे देव्या हते सति । तत्रेत्यस्य तत्र स्थाने इति वार्थः । वह्निरग्निः पुरोगमोऽग्रेसरो येषां ते वह्निपुरोगमाः । अग्निरग्रे देवतानामिति श्रुतेः । इन्द्रेण सहिताः सेन्द्राः सुराः । इष्टस्य शुम्भादिदैत्यवधरूपकार्यस्य लाभात्सिद्धेर्हेतोः विकसन्ति तानि विकासीनि विकस्वराणि । तादृशानां वक्त्राणां मुखानामंशुभिः प्रभाभिः विकाशिताः प्रकाशिता आशा दिशो यैस्ते विकासिवक्त्रां-

कात्यायनीं तुष्टुवुरिष्टलाभा-
द्विकासिवक्त्रांशुविकाशिताशाः ॥ २ ॥
देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवी चराचरस्य॥३॥

शुविकाशिताशाः सन्तः । काशृ दीप्तौ । तां शुम्भहन्त्रीं कात्यायनीं श्रीचण्डिकां तुष्टुवुः स्तुतवन्तः । कात्यायनीपदं प्राक्कवचव्याख्यायां व्याख्यातम् । अस्य श्लोकपञ्चकस्य रोगानशेषानितिश्लोकपञ्चकस्य च इन्द्रवज्रोपेन्द्रवज्रोपजात्यन्यतमं छन्दः । तल्लक्षणानि यथा । स्यादिन्द्रवज्रा यदि तौ जगौ गः । उपेन्द्रवज्रा जतजा जगौगः । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ इति ॥

अथ पाठान्तरादि लाभादित्यत्र लम्भादिति क्वचित् पाठः । अर्थः समानः । 'वक्रांशु' इत्यस्य स्थाने वक्त्राब्जेति वक्त्रास्त्विति वा पाठः । विकासि विकाशितपदगतदन्त्यतालव्योष्मवर्णयोः क्वचित् व्यत्यासेन क्वचिदुभयोरपि दन्त्यत्वेन क्वचिदुभयोरपि तालव्यत्वेन पाठो दृश्यते ॥ २ ॥

आदौ दैत्यैः सह युद्धेनास्वस्थचित्तां देवीं स्तुतिश्रवणोन्मुखीं कर्तुं तत् प्रसादमर्थयन्ते । देवीति । प्रपन्नानां दुःखपरिहारार्थमुपसन्नानां जनानां आर्तेर्दुःखस्य हरा प्रपन्नार्तिहरा । तस्याः सम्बुद्धिः हे प्रपन्नार्तिहरे देवि प्रसीद प्रसन्ना भव । हे अखिलस्य जगतो मातः प्रसीद । हे मातः अखिलस्य जगतः प्रसीद । हे मातः अखिलस्य जगतः प्रसीद इति वान्वयः । हे विश्वेश्वरि प्रसीद । विश्वं पाहि पालय । हे देवि । यतस्त्वं चरं चाचरं चानयोः समाहारश्चराचरं जङ्गमस्थावरात्मकं जगत् तस्येश्वरी स्वामिन्यसि तस्मात्तवैव तत्पालनाधिकार इति भावः ॥

अथ पाठान्तरादि एतच्छ्लोकारम्भे देवा ऊचुरिति क्वचित्पठ्यते ॥३॥

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ॥
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥४
त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया
सम्मोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥५

आधारेति । अलङ्घ्यं दुर्धर्षं वीर्यं प्रभावो यस्यास्तस्याः सम्बुद्धिः हे अलङ्घ्यवीर्ये । यतस्त्वं महीस्वरूपेण स्थितासि ततस्त्वमेकैव जगतः स्थावरजङ्गमात्मकस्य विश्वस्य आधारभूतासि । मह्याः सर्वाधारत्वादिति भावः । अपां स्वरूपस्थितया जलरूपेणावस्थितयेत्यर्थः सापेक्षत्वेऽपि गमकत्वात्समासः । त्वयैव हेतुभूतया एतत् कृत्स्नं जगत् आप्यायते वृद्धिं प्राप्नोति । जलस्य सर्वाप्यायनहेतुत्वादिति भावः । प्यायी वृद्धौ । एतदितरभूतत्रयस्वरूपत्वस्याप्युपलक्षणम् । तेन तेजोरूपेणावस्थितया त्वयैव प्रकाशते वायुरूपेणावस्थितया त्वयैव जीवति इत्यादि योजनीयम् ॥

अथ पाठान्तरादि आप्याय्यते इति णिजन्तं कर्मणि यगन्तःपाठः क्वचित् । तत्पक्षे त्वयेति कर्तरि तृतीया ॥ ४ ॥

त्वमिति । त्वं अनन्तमपरिमितं वीर्यं प्रभावो यस्याः सानन्तवीर्या । विष्णोर्व्यापकस्य परमात्मनः इयं वैष्णवी शक्तिरंशभूतासि । विश्वस्य सर्वस्य चराचरस्य बीजं सर्गस्थितिप्रलयहेतुः । परमा सर्वोत्तमा । माया मूलप्रकृतिरसि । हे देवी एतत् समस्तं जगत् त्वया सम्मोहितं मोहं नीतम् त्वं वै त्वमेव प्रसन्ना सती भुवि इहैव नतु ब्रह्मलोकक्रमेण । मुक्तिहेतुः मुक्तेः कारणम् मुक्तिप्रदेत्यर्थः असि । तन्नात्र विस्मयः कार्यः । योगनिद्रा जगत्पतेः ॥ महामाया हरेश्चैषा तया सम्मोह्यते जगत् ॥ तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ इतिश्लोकद्वयसमानार्थोऽयं श्लोकः ॥ ५ ॥

विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ता सकला जगत्सु ॥
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥६॥

विद्या इति । हे देवि जगत्सु चतुर्दशभुवनेषु । कलाभिः गीतवाद्यादिचतुष्षष्टिकलाभिः सकलाः । एवंभूताः समस्ताः सर्वा विद्या वेदादिविद्याः तवैव भेदा अंशाः । तथा श्रध्दाप्रीत्यादिभिः षोडशकामकलाभिः संहिताः समस्ताः पद्मिन्यादिलक्षणलक्षिताः स्त्रियश्च तवैव भेदाः सन्ति। उक्तं च **लिङ्गपुराणे** । शङ्कराः पुरुषाः सर्वे स्त्रियः सर्वा महेश्वरीति तत्रैव स्त्रीलिङ्गमखिलं गौरी पुल्लिङ्गं तु महेश्वर इति च । **ब्रह्मवैवर्ते** । यत्किञ्चित् त्रिषु लोकेषु स्त्रीरूपं देवि दृश्यते ॥ तत्सर्वं त्वत्स्वरूपं स्यादिति शास्त्रस्य निश्चयः ॥ इति अतएव **वृहत्पाराशरस्मृतावुक्तम्** । स्त्रियोरुष्टाःस्त्रियस्तुष्टा रुष्टास्तुष्टास्तु देवताः ॥ वर्धयन्ति कुलं तुष्टा नाशयन्त्यपमानिताः ॥ इति ॥ **मनुश्चाह** । यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ॥ इति ॥ **मन्त्रमहोदधितन्त्रेऽपि**। देव्या उपासकैः पुम्भिः स्त्रियो निन्द्या न जातुचित् ॥ देवीवन्माननीयाश्च देव्यंशास्ता यतः स्मृताः ॥इति॥ किमनेन परिगणनेन यावद्वस्तुस्वरूपिण्येव त्वमसीत्याहुः । **त्वयेति** । एतत्सर्वं जगत् अम्बया अस्मज्जनन्या त्वयैकयैव पूरितं व्याप्तम् त्वद्भिन्नं जगति किमपि नास्तीत्यर्थः । नेह नानाऽस्ति किञ्चनेति श्रुतेः ॥ तस्यास्ते तव । स्तव्यपरा । स्तव्यं स्तोतव्यं वस्त्वेव परं मुख्यं यस्याः सा स्तव्यपरा । एतादृशी या परा श्रेष्ठा चासौ उक्तिश्च परोक्तिः उत्तमं वचः। तद्रूपा स्तुतिः का कीदृशी । कथं घटेतेत्यर्थः ॥ अथ वा स्तुतिस्तव्यपरापरोक्तिरित्येकं पदम् । तत्पक्षे तव द्रव्यगुणक्रियादिसर्ववस्त्वात्मकत्वाच्चे त्वद्विषये स्तुतिः स्तव्यम् परं उत्तमम् अपरं अनुत्तममित्यादिभेदघटिता

उक्तिः का इति व्याख्यानम् ॥ **अथ बालबोधार्थं विद्याः कलाश्चोच्यन्ते** ॥ विद्याश्चतस्रश्चतुर्दशाष्टादश च भवन्ति । तत्र चतस्रो यथा । आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ॥ विद्या ह्येताश्चतस्रस्तु लोकसंस्थितिहेतवः ॥ इति ॥ आन्वीक्षिकी तर्कविद्या । त्रयी ऋग्यजुःसामाख्या वेदविद्या । वार्ता कृषिगोरक्षणवाणिज्यादिर्जीविकोपयुक्ता विद्या । दण्डनीतिः शुक्रादिप्रणीता अर्थशास्त्रविद्या ॥ **अथ चतुर्दश विद्याः** ॥ अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ॥ पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥ इति ॥ अङ्गानि षट् । वेदाश्चत्वारः । मीमांसान्यायपुराणधर्मशास्त्राणि चत्वारीति चतुर्दश ॥ तत्र संहिताब्राह्मणात्मका वेदाः । ते च ऋग्यजुःसामाथर्वाख्याश्चत्वारः ॥ तेषां स्वरूपाणि **चतुर्थाध्याये** शब्दात्मिकासुविमलर्ग्यजुषां निधानमिति श्लोके उक्तानि । **अथाङ्गानि** । छन्दः कल्पो ज्यौतिषं च निरुक्तं शिक्षया सह ॥ तथा व्याकरणं चेति षडङ्गानि श्रुतेर्जगुः ॥ छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ॥ ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ॥इति॥ तत्र छन्दः वैदिकलौकिकच्छन्दोलक्षणप्रतिपादकः **पिङ्गलाचार्य**प्रणीतो ग्रन्थविशेषः । कल्प **आश्वलायनबौधायनापस्तम्बहिरण्यकेशिकात्यायना**द्याचार्यप्रणीतानि धर्मसूत्राणि । तानि गृह्यश्रौतभेदात् द्विविधानि । तत्र स्मार्तकर्मप्रतिपादकानि गृह्याणि श्रौतकर्मप्रतिपादकानि श्रौतानि । ज्यौतिषं कालविज्ञानविषयको **लगधाचार्य**प्रणीतो ग्रन्थविशेषः निरुक्तं मन्त्रार्थनिर्वचनपरो **यास्काचार्य**प्रणीतो ग्रन्थविशेषः । निघण्टुसंज्ञकस्य वैदिकशब्दकोषस्यास्मिन्नेव सङ्ग्रहः । शिक्षा वेदपठनप्रकारविषयक**पाणिन्या**चार्यप्रणीतो ग्रन्थविशेषः । प्रातिशाख्यानामत्रैवान्तर्भावः । व्याकरणं वैदिकलौकिकशब्दव्युत्पत्तिसाधनं **पाणिनि**मुनिप्रणीतोऽष्टाध्यायीसंज्ञको ग्रन्थविशेषः । **इति षडङ्गानि** ॥ मीमांसा वैदिकवाक्यार्थविचारविषयकं शास्त्रम् ॥ सा द्विधा कर्ममीमांसा ब्रह्ममीमांसा

चेति। आद्या **जैमिनि**प्रणीता द्वितीया **बादरायण**प्रणीता। साङ्ख्ययोगशास्त्रयोर्द्वितीयायामन्तर्भावः। न्यायविस्तरस्तर्कशास्त्रम् तदपि न्यायवैशेषिकभेदाद्विविधम्। आद्यं **गौतम**प्रणीतम् द्वितीयं **कणाद**मुनिप्रणीतम्। पुराणं पुरातनवृत्तज्ञापका **व्यासादिमहर्षि**प्रणीता ग्रन्थविशेषाः पुराणानि द्विविधानि महापुराणान्युपपुराणाविति। महापुराणानि महर्षि**व्यास**प्रणीतान्यष्टादश। तन्नामानि यथा। ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा॥ नारदीयमथाग्नेयं मार्कण्डेयं भविष्यकम्॥ ब्रह्मवैवर्तकं लैङ्गं वाराहं वामनं तथा॥ स्कान्दं कौर्मं च मात्स्यं च ब्रह्माण्डं गारुडं तथा॥ इति॥ तत्र भागवतं द्विविधम्। देवीभागवतं विष्णुभागवतं चेति। प्रथमं महापुराणं द्वितीयमुपपुराणमित्येके प्रथममुपपुराणं द्वितीयं महापुराणमित्यन्ये। भारतरामायणयोर्महापुराणेष्वन्तर्भावः। उपपुराणानि कालिकापुराणनारसिंहपुराणदेवीपुराणादीनि बहून्यनेकमहर्षिप्रणीतानि। धर्मशास्त्रं **मन्वादि**स्मृतयः। ता अपि स्मृत्युपस्मृतिभेदात् द्विविधाः। तत्र स्मृतयोऽष्टादश। तत्प्रणेतॄणां नामानि यथा। मनुर्बृहस्पतिर्दक्षो गौतमोऽथ यमोऽङ्गिराः॥ योगीश्वरः प्रचेताश्च शातातपपराशरौ॥ (योगीश्वरो याज्ञवल्क्यः) संवर्तोशनसौ शङ्खलिखितावत्रिरेव च॥ विष्णवापस्तम्बहारीता इत्येते स्मृतिकारिणः॥ इति॥ उपस्मृतयोऽष्टत्रिंशत् तत्कर्तारो यथा। वसिष्ठो नारदश्चैव सुमन्तुश्चाश्वलायनः॥ वसुः कार्ष्णाजिनिः सत्यव्रतो गार्ग्यश्च देवलः॥ जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः॥ आत्रेयश्छागलेयश्च मरीचिर्वत्स एव च॥ पारस्करर्ष्यशृङ्गौ च वैजवापश्च शौनकः॥ जाबालिर्नचिकेताश्च स्कन्दो लौगाक्षिकाश्यपौ॥ व्यासः सनत्कुमारश्च जातुकर्ण्यः कपिञ्जलः॥ व्याघ्रो बौधायनश्चैव विश्वामित्रश्च गोभिलः॥ पैठीनसिस्तथा सत्याषाढः कात्यायनस्तथा॥ मुनयस्त्रिंशदष्टौ च उपस्मृतिविधायिनः॥ इति॥ चतुःषष्टितन्त्राणामुपस्मृतिष्वन्तर्भावः॥ एवं चतुर्दशविद्याः॥ एता एवायुर्वेदधनुर्वेदगान्धर्ववेदशस्त्रास्त्रवेदसहिता अष्टादश विद्या

भवन्ति ॥ **इति विद्याः** ॥ **अथ चतुःषष्टि कलाः** । एतासु ग्रन्थभेदेन क्वचित् क्वचित् भेदो दृश्यते । तत्र शैवतन्त्रोक्ताः प्रदर्श्यन्ते । गीतं वाद्यं नृत्यं नाट्ये आलेख्यं च विशेषकाः ॥ पुष्पतण्डुलवल्यादि कुसुमास्तरणं तथा ॥ दन्तवस्त्राङ्गरागश्च मणिकुट्टिमकर्म च ॥ शय्याविधिर्वारिवाद्यं चित्रयोगाः स्रजां क्रियाः ॥ शेखरापीडयोगाश्च नेपथ्यरचना तथा ॥ कर्णयोः पत्रभङ्गाश्च सुगन्धरचना तथा ॥ भूषायोगाश्चैन्द्रजालं कौचुमारप्रयोगकाः ॥ चित्रशाकापूपभक्ष्यविकारा हस्तलाघवम् ॥ पानकासवरागादि सूचीवायक्रिया तथा ॥ वीणाडमरुवाद्यानि सूत्रक्रीडा प्रहेलिका ॥ प्रतिमाला तथा दुर्वचनं पुस्तकवाचनम् ॥ नाटकाख्यायिकादृष्टिः समस्यापूरणं तथा ॥ पट्टिकावेत्रवानानां विकल्पास्तिक्षकर्म च ॥ तक्षणं वास्तुविद्या च रत्नरूपपरीक्षणम् ॥ धातुवादो रत्नरागज्ञानमाकरवेदनम् ॥ वृक्षायुर्वेदयोगाश्च सारिकाशुकलापनम् ॥ मेषकुक्कुटलावानां युद्धं केशप्रसाधनम् ॥ उत्साहनं चाक्षराणां मुष्टिकाकथनं तथा ॥ म्लेच्छतर्कविकल्पश्च देशभाषादिवेदनम् ॥ प्रसूनशकटज्ञानं निमित्तज्ञानमेव च ॥ संवाच्यं मातृकायन्त्रं तथा धारणमातृका ॥ काव्यक्रिया मानसी च छन्दोधीर्नामकोषधीः ॥ नानाक्रियाविकल्पाश्च योगाश्छलितकस्य च ॥ वस्त्रसङ्गोपनं द्यूतं बालक्रीडनकं तथा ॥ आकर्षणक्रीडनं च वैनायिक्याश्च वेदनम् ॥ वैतालिक्याश्च विद्याया वैजयिक्यास्तथैव च ॥ **इति चतुःषष्टिः कलाः** ॥ अथ स्त्रीणां **षोडश कामकला** यथा॥ श्रद्धा प्रीती रतिश्चैव धृतिः कीर्तिर्मनोभवा । विमला मोदिनी घोरा मदनोत्पादिका मदा ॥ मोहिनी दीपनी चव ज्ञेया वशंकरी तथा ॥ रञ्जनी चैव मदना कलास्त्र्यङ्गेषु षोडश ॥ पादे गुल्फे तथोरौ च भगे नाभौ कुचे हृदि ॥ कक्षे कण्ठे तथोष्ठे च गण्डे नेत्रे श्रुतौ तथा ॥ भाले शीर्षे च तिष्ठान्ति तत्र पञ्चदशादिमाः ॥ प्रथमाद्यासु तिथिषु क्रमा दशसु पञ्चसु ॥ शुक्लपक्षे तु वामाङ्गे कृष्णपक्षे तु दक्षिणे ॥ तथाधरोष्ठे शुक्ले स्यात् कृष्णे स्यादुत्तरोष्ठके ॥

सर्वभूता यदा देवि भुक्तिमुक्तिप्रदायिनी ॥
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥७॥
सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥

भगे नाभौ हृदि गले भाले शिरसि चोभयोः (पक्षयोरिति शेषः) ॥ अन्त्या तु सर्वतिथिषु सर्वाङ्गेषु च सर्वदा ॥ **इति षोडश कामकलाः** ॥

अथ पाठान्तरादि सकला जगत्स्वित्यत्रसकलं जगच्चेति क्वचित् पाठः ॥ ६ ॥

सर्वभूतेति । हे देवि यदा त्वं 'आधारभूतेति श्लोकेन' सर्वभूता सर्वभूतात्मिकेति स्तुतासि । 'त्वं वैष्णवीति श्लोकेन भुक्तिमुक्तिप्रदायिनीति स्तुतासि' । तत्राद्यचरणत्रयेण मायारूपत्वप्रतिपादनाद्भुक्तिप्रदायित्वेन चतुर्थचरणे मुक्तिप्रदायित्वेनेति विवेकः । तदा एतदपेक्षया अन्यस्तव स्तुतये का वा परमोक्तयः उत्तमा वाचो भवन्तु । श्लोकद्वयोक्तस्तुतेरेव सर्वस्तुतिसारभूतत्वादिति भावः ॥ अथ वा । हे देवि त्वं यदा यतः सर्वं भूतमुत्पन्नं यस्याः सकाशात् सा सर्वभूतेति । अग्न्याहितादेराकृतिगणत्वान्निष्ठायाः पाक्षिकः परनिपातः । इदं स्थितिलययोरप्युपलक्षणम् । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति **श्रुतेः** । तेन सृष्टिस्थितिप्रलयकारिणीत्यर्थः । इति । तथा भुक्तिमुक्तिप्रदायिनी इति च स्तुतासि । निगमागमाभ्यामिति शेषः । तदा ईदृश्यास्तव मन्दबुद्धीनामस्माकं का वा परमोक्तयः स्तुतये भवन्तु । अतस्त्वां नमस्कारैरेव सम्भावयामः इति भावः ।

अथ पाठान्तरादि देवीतिसम्बुध्यन्तपदस्थाने प्रथमान्तं भुक्तिपदस्थाने स्वर्गपदं च क्वचित् पठ्यते ॥ ७ ॥

अथ स्तवनादि सर्वव्यवहारस्य बुद्धिमूलकत्वात् प्रथमं बुद्धिरूपत्वेन स्तुवन्तो नमस्कुर्वन्ति । **सर्वस्येति** । सर्वस्य जनस्य हृदि बुद्धिरूपेण

स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥८॥
कलाकाष्ठादिरूपेण परिणामप्रदायिनि ॥

संस्थिते अत एव पुरुषं सत्कर्मणि ब्रह्मविद्यायां च प्रवर्त्य तत्फलतया यथाक्रमं स्वर्गश्च अपवर्गो मोक्षश्च तौ ददातीति स्वर्गापवर्गदा । तस्याः-सम्बुद्धिः हे स्वर्गापवर्गदे । हे देवि द्युतिमति नराद्धिरण्यगर्भाज्जातान्याकाशादीनि तत्त्वानि नाराणि । तान्ययनानि निवासस्थानानि यस्य स नारायणः । भगवान् विष्णुः । पूर्वपदात्संज्ञायामग इति णत्वम् । नारायणशब्दार्थो **महाभारते** । नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः ॥ तान्येव चायनान्यस्य तेन नारायणः स्मृतः ॥ इति ॥ अथ वा नरा एव नारा जीवास्तेषामयनं लयस्थानं नारायणः । यत् प्रयन्त्यभिसंविशन्तीति श्रुतेः । उक्तं च **ब्रह्मवैवर्ते** । नराणामयनं यस्मात्तेन नारायणः स्मृत इति ॥ उक्तलिङ्गत्यजन्त्यपीतिवचनात्तत्पुरुषेऽप्ययनशब्दस्य पुंस्त्वम् । तस्येयं शक्तिर्नारायणी । वैष्णवीत्यर्थः । वैष्णवी देवताह्यत्र महागरुडवाहिनीति **कात्यायनीतन्त्रे**ऽस्याध्यायस्य वैष्णवीदैवताकत्वोक्तेः । क्वचिदपवादस्थलेप्यौत्सर्गिकः प्रत्ययो भवतीति न्यायात् वृद्धाच्छं त्यक्त्वा औत्सर्गिकोऽण् । अणन्तान्ङीप् तत्सम्बुद्धिर्हे नारायणि ते नमोऽस्तु ॥ इत आरभ्य पोडशश्लोका नारायणीपदलिङ्गकाः सन्ति तेनास्याध्यायस्य नारायणीस्तुतिरिति संज्ञा । **शान्तनव्यां** प्रतिश्लोकं नारायणीपदस्यातिक्लेशेन पृथक्पृथगर्थव्याख्यानं कृतम् । तत्सति कुतूहले तत्रैव द्रष्टव्यम् ॥ ८ ॥

कलेति । अष्टादशनिमेपास्तु काष्ठा त्रिंशत्तु ताः कलेति **कोशा**त्काष्ठायाः कलातो न्यूनत्वात् काष्ठाकलादिरूपेण वक्तव्ये कलाशब्दस्य पूर्वनिपातो लघ्वक्षरादित्वात् । आदिपदेन क्षणादियुगान्ताः सर्वे कालावयवा गृह्यन्ते । तद्रूपेण विश्वस्य सर्वस्य कार्यजातस्य परिणामं उपचयापचयादि-

विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ ९ ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥१०॥
सृष्टिस्थितिविनाशानां हेतुभूते सनातनि ॥

रूपम् विकारं प्रददात्येवंशीला परिणामप्रदायिनी तस्याः सम्बुद्धिः । तथा तस्योपरतौ विनाशेऽपि शक्ते समर्थे । अन्तर्भावितण्यर्थोऽत्रोपरमिः । हे नारायाणि ते नमोऽस्तु ॥

अथ पाठान्तरादि शक्ते इत्यत्र सक्ते इति क्वचित् पाठः ॥ ९ ॥

सर्वेति । सर्वेषां मङ्गलानां माङ्गलिकवस्तूनां माङ्गल्यं मङ्गलत्वं यया हेतुभूतया । यस्याः सकाशाद्वा सा सर्वमङ्गलमाङ्गल्या मङ्गलानां च मङ्गलमिति स्मृतेः तस्याः सम्बुद्धिर्हे सर्वमङ्गलमाङ्गल्ये । मङ्गलपदार्था उक्ता **भावप्रकाशे** । लोके तु मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ॥ हिरण्यं सर्पिरादित्यः स्त्रियो राजा तथाष्टमः ॥ इति ॥ **ज्योतिःशास्त्रे** । मङ्गलानीह दध्याज्यदुग्धसिद्धार्थरोचनाः ॥ तुलसीदेवतादर्शाः पुष्पं बिल्वं सुवासिनी ॥ इति ॥ **अत्रिस्मृतौ** ॥ प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् । एतद्धि मङ्गलं प्रोक्तमृषिभिर्ब्रह्मवादिभिः ॥ इति ॥ **पाद्मे** । मङ्गलं भगवान् विष्णुर्मङ्गलं भगवान् शिवः ॥ इति ॥ एतेषां सर्वमङ्गलवस्तूनां त्वन्मूलकमेव मङ्गलत्वमित्यर्थः । शिवे सुखस्वरूपे । सर्वेषामर्थानां कार्याणां साधिके विधात्रि । शरणे रक्षणे साधुः शरण्या । तस्याः सम्बुद्धिर्हे शरण्ये । शरणं गृहरक्षित्रोः शरणं रक्षणे वधे ॥ इति **शाश्वतः** ॥ त्रीण्यम्बकानि नयनानि यस्याः सा त्र्यम्बका तस्याः सम्बुद्धिः हे त्र्यम्बके । गौरि पीतवर्णे । गौरोऽरुणे सिते पीते **इत्यमरः** ॥ हे नारायणि ते नमोऽस्तु ॥ १० ॥

सृष्टीति । हे सृष्टिस्थितिविनाशानां हेतुभूते जगत्सृष्टिस्थितिलयका-

गुणाश्रयेऽगुणमये नारायणि नमोऽस्तु ते ॥ ११ ॥
शरणागतदीनार्तपरित्राणपरायणे ॥

रिणि । उक्तं च पूर्वम् । त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥ इति ॥ अतएव गुणाश्रये । गुणाः रजस्सत्त्वतमांसि आश्रयो यस्याः तस्याः सम्बुद्धिः । उक्तविशेषणेन दर्शितकार्यकारणयोर्भेदं परिहर्तुं गुणमये इति विशेषणं । गुणरूपाणि त्वमेवेति भावः । अथ वा अगुणमये इतिच्छेदः । सृष्ट्याद्यर्थं गुणाश्रयत्वेऽपि वस्तुतः अगुणमये निर्गुणे । मयटष्टित्वेऽपि टाप् छान्दसः । सदा सर्वदा विद्यमाना सनातनी नित्येत्यर्थः । तस्याः सम्बुद्धिः हे सनातनि । हे नारायणि ते नमोऽस्तु ॥

अथ पाठान्तरादि हेतुभूते इत्यत्र शक्तिभूते इति पाठे जगत्त्रयसृष्टिस्थितिप्रलयकर्तुः परमेश्वरस्य याः सृष्टिस्थितिविनाशानां सम्बधिन्यः इच्छाज्ञानक्रियाशक्तयस्तद्रूपे । अथ वा जगत्सृष्ट्यादिकारिणी या शक्तिस्तद्रूपे । तदुक्तं **देवीभागवते** । शक्तिः करोति ब्रह्माण्डं सैव पालयतेऽखिलम् ॥ इच्छया संहरत्येषा जगदेतच्चराचरम् ॥ इति ॥ भूतशब्दो रूपपर्यायः । सृष्टिस्थितिविनाशानामिति जन्यजनकभावसम्बधे षष्ठी । गुणमये इत्यत्र गुणमयि इति क्वचित् पठ्यते ॥ ११ ॥

शरणेति । शरणागता रक्षणार्थमुपसन्ना ये दीना दरिद्रा आर्ता रोगादिपीडिताश्च जनास्तेषां परित्राणं दारिद्र्यरोगादिपरिहारस्तदेव परायणमभीष्टं परं अयनं मुख्यमार्गो वा यस्याः सा । शरणागतदीनार्तानां परित्राणे परायणा तत्परा इति वा । शरणागतदीनार्तपरित्राणपरायणा । तस्याःसम्बुद्धिः ॥ परायणमभीष्टे स्यात्तत्परे वाच्यलिङ्गवदिति **हैमः** ॥ अत एव सर्वस्य सर्वलोकस्य

सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥१२॥
हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥१३॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ॥

आर्ति पीडां हरतीत्यार्तिहरा तस्याः सम्बुद्धिः । हरतेरनुद्यमनेऽजित्यच् प्रत्ययः । हे देवि नारायणि ते नमोऽस्तु ॥

अथ पाठान्तरादि सर्वस्येत्यत्र विश्वस्येति क्वचित् पाठः ॥ १२ ॥

इत आरभ्य ब्राह्म्यादिनवमातृरूपेण स्तुवन्तो नमस्कुर्वन्ति । **हंसेति** । हंसैर्युक्ते विमाने तिष्ठतीति हंसयुक्तविमानस्था तस्याः सम्बुद्धिः हे हंसयुक्तविमानस्थे । कोशे पात्रे कमण्डलावित्यर्थः स्थितं कौशम् तत्र भव इत्यण् कोशः खड्गपिधाने स्यात्कलिकापात्रयोरपि ॥ धनागारे निघण्टौ च पेश्यां कीटगृहेऽपि च ॥ इति **विश्वः** ॥ अथ वा कौशं कुशमिश्रम् । तच्च तदम्भश्च कौशाम्भः । तस्य क्षरिका सेक्त्री कौशाम्भःक्षरिका । तस्याः सम्बुद्धिः हे कौशाम्भःक्षरिके । क्षर सञ्चलने अन्तर्भावितण्यर्थोऽत्र क्षरतिः ॥ उक्तं च पूर्वम् । कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ॥ ब्रह्माणी चाकारोच्छत्रून् येन येन स्म धावतीति ॥ अत एव ब्रह्माण्या ब्राह्म्याः रूपं धारयतीति ब्रह्माणीरूपधारिणी । तस्याः सम्बुद्धिः । आनुगागमश्छन्दसः । हे नारायणि ते नमोऽस्तु ॥

अथ पाठान्तरादि कौशाम्भःक्षरिके इत्यत्र कमण्डलुधरे इति क्वचित् पाठः ॥ १३ ॥

त्रिशूलेति । हे त्रिशूलचन्द्राहिधरे । तत्र त्रिशूलस्य धारणं हस्ते । चन्द्रोऽर्धचन्द्रस्तस्य मौलौ । अहीनां शेषादिसर्पाणां सर्वाङ्गेष्विति ज्ञेयम् । महावृषभेणात्मानं वाहयतीति महावृषभवाहिनी । महावृषभ एव वाहो

माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥१४॥
मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ॥
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥१५॥
शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥१६॥

वाहनं तद्वती वा । कर्मधारयादिनिः । महावृषभेण वाहिनी वाहनवतीति वा । तस्याः सम्बुद्धिः हे महावृषभवाहिनि । अत एव माहेश्वर्या महेश्वरशक्तेः स्वरूपेणोपलक्षिते नारायणि ते नमोऽस्तु ॥

अथ पाठान्तरादि वाहिनि इत्यत्र वाहने इत्यपि क्वचित् पाठः ॥१४॥

मयूरेति । मयूरश्च कुक्कुटश्च मयूरकुक्कुटौ ताभ्यां वृते परिवृते । मयूरः कुक्कुटश्च स्कन्दस्य तृतीयावरणान्तर्गते देवते । अथ वा स्कन्देन हतः पद्मासुर आत्मनो मयूररूपेण तस्य वाहनत्वं कुक्कुटरूपेण ध्वजत्वं च तं प्रति वव्रे । इति **स्कन्दपुराणा**न्तर्गतकथानुरोधेन तस्य मयूरकुक्कुटवृतत्वम् । तच्छक्तेः कौमार्यास्तत्सादृश्यात्तथात्वम् । महाशक्तिधरे शक्त्याख्यमहायुधधारिणि । अत एव कौमार्या रूपेण संस्थानमवस्थानं यस्याः सा कौमारीरूपसंस्थाना तस्याः सम्बुद्धिः हे कौमारीरूपसंस्थाने अनघे पवित्रे हे नारायणि ते नमोऽस्तु ॥ १५ ॥

शङ्खेति । शङ्खश्च चक्रं च गदा च तदुपलक्षितो खड्गश्च शार्ङ्ग शृङ्गघटितं धनुश्च तदुपलक्षितो बाणश्चैतेषां समाहारः शङ्खचक्रगदाशार्ङ्गम् सेनाङ्गत्वात्समाहारद्वन्द्वः । गृहीतं शङ्खचक्रादिपट्संख्याकपरमायुधवृन्दं यया तस्याः सम्बुद्धिः हे शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे । बहुपदो बहुव्रीहिः । गृहीतपदस्य मध्ये निवेशश्छान्दसः । अस्याः षड्भुजत्वषडायुधत्वनिर्णयोऽष्टमाध्याये व्याख्यायां द्रष्टव्यः । एतादृशे हे वैष्णवीरूपे नारायणि प्रसीद प्रसन्ना भव । ते नमोऽस्तु ॥ १६ ॥

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ॥
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥१७॥
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ॥
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥१८॥
किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥

गृहीतेति । गृहीतं उग्रं अतिभीषणं महाचक्रं सुदर्शनं यया तस्याः सम्बुद्धिर्हे गृहीतोग्रमहाचक्रे । दंष्ट्रया उद्धृता समुद्रतलादुन्नीता वसुन्धरा पृथ्वी यया तस्याः सम्बुद्धिर्हे दंष्ट्रोद्धृतवसुन्धरे । शक्तिशक्तिमतोरभेदाद्वराहस्य दंष्ट्रोद्धृतवसुन्धरत्वं वाराह्यामुपचर्यते । वराहस्येव रूपं वराहरूपम् । तदस्या अस्तीति वराहरूपिणी । तस्याः सम्बुद्धिर्हे वराहरूपिणि । शिवे मङ्गलस्वरूपे हे नारायणि ते नमोऽस्तु ॥ १७ ॥

नृसिंहेति । दैत्यान् रक्तबीजादीन् हन्तुं कृतोद्यमे कृतोद्योगे त्रैलोक्यस्य त्राणेन रक्षणेन सहिते नित्ययुक्ते त्रैलोक्यरक्षणजागरूके इत्यर्थः । उग्रेण नृसिंहरूपेणोपलक्षिते हे नारायणि ते नमोऽस्तु । अथवोग्रेण नृसिंहरूपेण दैत्यान् हन्तुं कृतोद्यमे इत्यन्वयः ॥

अथ पाठान्तरादि सहिते इत्यत्र महिते इति पाठे त्रैलोक्यत्राणेन हेतुना महिते पूजिते इत्यर्थः । मह पूजायाम् ॥ १८ ॥

किरीटिनीति । किरीटोऽस्त्यस्या इति किरीटिनी मुकुटधारिणी तस्याः सम्बुद्धिः किरीटिनि । महत् अमोघं वज्रं तदाख्यमायुधं यस्यास्तस्याः सम्बुद्धिः महावज्रे । सहस्रनयनैरुज्ज्वले दीप्तिमति । नयनैरुज्ज्वलत्वं नयनानां तेजोमयत्वात् । वृत्रस्य तन्नाम्नः असुरस्य प्राणान् हरति इति वृत्रप्राणहरा

वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥१९॥

शिवदूतिस्वरूपेण हतदैत्यमहाबले ॥
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥२०॥

दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥ २१ ॥

तस्याः सम्बुद्धिः । इन्द्रकृतं वृत्रप्राणहरणं तच्छक्तावुपचर्यते । हे ऐन्द्रि इन्द्रशक्तिरूपे नारायणि ते नमोऽस्तु । चकारः पादपूर्तौ ॥ १९ ॥

शिवदूतीति । हतं दैत्यानां महत् बलं सैन्यं यया तस्याः सम्बुद्धिः हतदैत्यमहाबले घोररूपे भीषणस्वरूपे महान् शिवाशतस्येवात्युच्चः आरावो निनादो यस्यास्तस्याः सम्बुद्धिर्महारावे । उक्तं च पूर्वम् चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादनीति । शिवदूतीस्वरूपेणोपलक्षिते हे नारायणि ते नमोऽस्तु । अथ वा शिवदूतीस्वरूपेणेत्यादि यथापदक्रममेवान्वयः ॥ २० ॥

दंष्ट्रेति । दंष्ट्राभिःस्थूलाभिर्बहिर्निर्गताभिर्वा करालं दन्तुरं भीषणं वा वदनं यस्यास्तस्याः सम्बुद्धिर्दंष्ट्राकरालवदने । करालो दन्तुरो तुङ्गे भीषणे चाभिधेयवदिति **मेदिनी** । शिरसां नरमुण्डानां माला विभूषणं यस्यास्तस्याः सम्बुद्धिः शिरोमालाविभूषणे । मुण्डं तदुपलक्षितं चण्डं च मथ्नाति मर्दयतीति मुण्डमथने । तस्याः सम्बुद्धिःमुण्डमथने अत एव चामुण्डाशब्दवाच्ये हे नारायणि ते नमोऽस्तु । चामुण्डापदव्युत्पत्तिः सप्तमाध्याये दर्शिता ॥

अथ पाठान्तरादि इत उत्तरं कालरात्रिस्वरूपेण त्रैलोक्यमथनोद्यते ॥ महाकालि महामारि नारायणि नमोऽस्तु ते ॥ महालक्ष्मि शिवे शान्ते सर्वसिद्धेऽपराजिते ॥ मोहरात्रि महावीर्ये नारायणि नमोऽस्तु ते ॥ इति श्लोकद्वयमधिकं क्वचित् पठ्यते ॥ २१ ॥

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टे स्वधे ध्रुवे ॥
महारात्रि महामाये नारायणि नमोऽस्तु ते ॥२२॥
मेधे सरस्वति वरे भूति बाभ्रवि तामसि ॥

अथ द्रव्यगुणक्रियादिसर्वरूपेण स्तुवन्तो नमस्कुर्वन्ति। लक्ष्मीति । लक्ष्म्यादिमहामायान्तस्वरूपे हे नारायणि ते नमोऽस्तु । तत्र लक्ष्मीः सम्पत् शोभा वा । लज्जा अकार्यकरणाद्भीतिः । महती विद्या महाविद्या ब्रह्मविद्या । श्रद्धा देवगुरुजनशास्त्रवचनादिषु विश्वासः । पुष्टिः शरीरोपचयः । स्वधा पितृतृप्तिहेतुर्दानवाची शब्दः । ध्रुवा स्थिरपदार्थरूपा । महारात्री प्रलयरात्रिस्वरूपा कृदिकारादक्तिन इति ङीष् । महामाया सर्वजगन्मोहहेतुरैश्वरी शक्तिः ॥

अथ पाठान्तरादि पुष्टिस्वधेतिसमस्तपाठे कर्मधारयः । महामाये इत्यत्र महावीर्ये इति क्वचित् पाठः ॥ २२ ॥

अथ ब्रह्मविष्णुरुद्रपत्न्यादिरूपत्वेन स्तुवन्तो नमस्कुर्वन्ति मेधे इति श्लोकेन । मेधा धारणावती बुद्धिः तद्रूपे हे सरस्वति ब्रह्मपत्नि । वरे श्रेष्ठे सर्वेष्टत्वात् भूते लक्ष्मीरूपे हे विष्णुपत्नि । तामसि तमोगुणात्मिके रुद्रस्य तमोगुणत्वात् बाभ्रवि बभ्रुः रुद्रः । बभ्रुः पिङ्गाग्निशूलिष्विति हैमः । तस्य पत्नि हे रुद्राणि । तथा नियतिर्भाग्यं तद्रूपे । अत एव ईशे सर्वकर्मसमर्थे । हे नारायणि त्वं प्रसीद । ते नमोऽस्तु । इत उत्तरं सप्तश्लोका नारायणीपदलिङ्गका अधिकाः । ते यथा । सर्वतः पाणिपादान्ते सर्वतोऽक्षिशिरोमुखे ॥ सर्वतः श्रवणघ्राणे नारायणि नमोऽस्तु ते ॥ सर्वेन्द्रियगुणाभासे सर्वेन्द्रियविवर्जिते ॥ सर्वेन्द्रियार्थतत्त्वज्ञे नारायणि नमोऽस्तु ते ॥ सर्वदेवाधिदेवस्य शर्वस्यामिततेजसः ॥ सर्वप्राणहरे शक्ते नारायणि नमोऽस्तु ते ॥ सर्वभूतशरीराणां विनाशोत्पत्तिकारणे ॥ सर्वावस्थागते देवि नारायणि नमोऽस्तु ते ॥ सर्वेषामेव भूतानां भुक्तिमुक्तिप्रदायिनि ॥ सर्वदुःखहरे देवि

नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥२३॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥२४॥

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥
पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते ॥२५॥

नारायणि नमोऽस्तु ते ॥ शक्त्या कल्पितसर्वाङ्गे सर्वाविद्याविनाशिनि ॥ सर्वविद्याधिपे देवि नारायणि नमोऽस्तु ते ॥ सर्वरोगप्रशमनि सर्वोपद्रवनाशिनि ॥ सर्वकामप्रदे देवि नारायणि नमोऽस्तु ते ॥ इति ॥ २३

सर्वेति । सर्वं स्थावरजङ्गमात्मकं विश्वं स्वरूपं यस्याः तस्याः सम्बुद्धिः हे सर्वस्वरूपे । सर्वेषां ईशे नियामिके सर्वेशे । सर्वशक्तिभिः करणाकरणान्यथाकरणसामर्थ्यैः समन्विते कर्तुमकर्तुमन्यथाकर्तुं समर्थे इत्यर्थः । अत एव हे दुर्गे दुर्विज्ञेये देवि नः अस्मान् भयेभ्यः दैत्यादिभीतिभ्यस्त्राहि त्रायस्व । त्रैङ्पालने । परस्मैपदं छान्दसम् । हे देवि ते नमोऽस्तु । वाक्यभेदाद्देवीत्यस्य पुनरुक्तिः ।

अथ पाठान्तरादि दुर्गे देवीत्यत्र नारायणीति सम्बुद्ध्यन्तः पाठः क्वचित् ॥ २४ ॥

एतदिति । पुरा कात्यायनाश्रमे तपश्चरन्ती तेन कन्यात्वेन परिरक्षिता भगवती कात्यायनीसंज्ञामवापेति **स्कन्दपुराणे** । हे कात्यायनि । एतदस्मत्पुरोवर्ति । लोचनत्रयेण भूषितं शोभितं सौम्यं सुन्दरं सौम्यं तु सुन्दरे सोमदैवते **इत्यमरः** ॥ ते वदनं सर्वभूतेभ्यो जलाग्निवाय्वादिभ्यो महाभूतेभ्यः सर्वप्राणिभ्यो वा नः अस्मान् पातु । ते नमोऽस्तु ॥

अथ पाठान्तरादि भूतेभ्य इत्यत्र भीतिभ्य इति क्वचित् पाठः ॥२५॥

ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥२६॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ॥२७॥
असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ॥

ज्वालेति । भद्राणि मङ्गलानि कलयति करोतीति भद्रकाली तस्याः सम्बुद्धिर्हे भद्रकालि । ज्वालाभिः प्रसरणशीलैस्तेजोभिः करालं भीषणम् । अतएवात्युग्रम् । अशेषासुरसूदनं सर्वदैत्यविनाशकम् । ते त्रिशूलं नः अस्मान् भीतेरसुरादिभयात् पातु । ते नमोऽस्तु ॥

अथ पाठान्तरादि सूदनमित्यत्र भीषणमिति क्वचित्पाठः ॥ २६ ।

हिनस्तीति हे देवि । या स्वनेन ध्वनिना जगत् आपूर्य व्याप्य दैत्यतेजांसि दैत्यादीनां तेजांसि बलानि हिनस्ति नाशयति । तेजस्त्विड्रेतसोर्बले ॥ इति **हैमः** ॥ सा तव घण्टा नः अस्मान् । अनः माता सुतानिव पापेभ्यः नृशंसेभ्यः प्राणिभ्यः सकाशात् पातु । नृशंसो घातुकः क्रूरः पाप **इत्यमरः** ॥ अनः क्लीबं जले शोके मातृस्यन्दनयोरपीति महेश्वरभट्टकृतनामलिङ्गानुशासनव्याख्यायाम् क्षत्रवर्गे क्लीबेऽनः शकट इति श्लोके **रभसः** । उपमानोपमेययोर्भिन्नलिङ्गत्वेऽपि न दोषः । **यथाह दण्डी** । न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ॥ उपमादूषणायालं यत्रोद्वेगो न धीमतामिति ॥ २७ ॥

असुरेति । हे चण्डिके । असुराणामसृग्रक्तम् । वसा मेदः । तदुभयात्मको यः पङ्कः कर्दमस्तेन चर्चितो लिप्तः । करैः किरणैः उज्ज्वलः देदीप्यमानः । रत्नखचितत्वादुत्तेजितत्वाद्वेति भावः । अथ वा त्वत्करेणोज्ज्वलः शोभमानः ते खड्गः नः शुभाय कल्याणाय भवतु । क्लृप्यर्थयोगा-

शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥२८॥
रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ॥
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ २९ ॥

एतत् कृतं यत् कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणाम् ॥

च्चतुर्थी । अस्मत्कल्याणं करोत्वित्यर्थः । वयं देवाः त्वां नताः प्रणताः स्मः॥

अथ पाठान्तरादि पङ्कपदस्थाने मांसपदम् करोज्ज्वल इत्यत्र करेज्वलन्निति च क्वचित् पठ्यते ॥ २८ ॥

पूर्वश्लोकद्वये प्रसीदेत्युक्तं तत्र किं फलं प्रसादेनेत्याकाङ्क्षायामाहुः । **रोगानिति** । हे देवि त्वं तुष्टा प्रसन्ना सती अशेषान् सर्वान् रोगान् ज्वरादीन् अपहंसि विनाशयसि । अशेषानित्युक्तेर्मोक्षपरिपन्थिनो रागादिरोगा अपि ग्राह्याः तत्स्वरूपमुक्तं **वाग्भटेन** । रागादिरोगान् सततानुषक्तानशेषकायप्रसृताननेकान् ॥ औत्सुक्यमोहारतिदानिति । वैपरीत्येऽपि फलमाहुः **रुष्टा त्विति** । त्वं रुष्टा सती तु सकलान् अभीष्टान् ईप्सितान् काम्यन्ते इष्यन्ते इति कामा अर्था विषया इति यावत् तान् अपहंसीति शेषः । त्वां आश्रितानां कृतत्वदाश्रयाणामित्यर्थः नराणां विपत् दुःखं न भवति । प्रत्युत त्वां आश्रिता आश्रयतां प्रयान्ति हि । स्वयमन्येषामाश्रया भवन्तीत्यर्थः ।

अथ पाठान्तरादि रुष्टा त्वित्यत्र पुष्णासीति ददासीति वा क्वचित् पाठः ॥ २९ ॥

स्वस्मिन् प्रसादस्य दैत्येषु च रोषस्य सम्प्रत्येवानुभूतं फलमाहुः । **एतदिति** । हे अम्बिके देवि । त्वया अद्य साम्प्रतम् । आत्मनो मूर्तिं एका

रूपैरनेकैर्बहुधात्ममूर्तिं
कृत्वाम्बिके तत् प्रकरोति कान्या ॥ ३० ॥

विद्यासु शास्त्रेषु विवेकदीपे-
ष्वाद्येषु वाक्येषु च का त्वदन्या ॥

मपि सतीमिति भावः । अनेकैः कालीब्रह्मय्यादिसप्तमातृशिवदूत्यात्मकैरित्यर्थः । रूपैः बहुधा बहुप्रकारां कृत्वा धर्मद्विषां श्रुतिस्मृतिसदाचारविरोधिनां महासुराणां यदेतत् कदनं विनाशनं कृतं अस्मत्सुखार्थमिति भावः । तत् अन्या त्वदितरा का प्रकरोति कुर्यादित्यर्थः ॥

अथ पाठान्तरादि मूर्तिमित्यत्र मूर्तीरिति बहुवचनान्तः पाठः क्वचित् ॥ ३० ॥

जगतः संसारकारणं महामाया त्वमेवासीत्याहुः **विद्यास्विति** । हे देवि । विद्यासु अध्यात्मविद्याप्रतिपादकग्रन्थेषु । शास्त्रेषु वेदान्तदर्शनेषु । आद्येषु वाक्येषूपनिषत्सु । एतेषु । विवेकदीपेषु सत्सु । आत्मानात्मविचारप्रकाशनेन विश्वं संसारादुद्धर्तुं बद्धपरिकरेषु सत्स्वित्यर्थः । अनादरे भावलक्षणा सप्तमी । एतान्यनादृत्येत्यर्थः । एतद्विश्वं प्रति । अति महान् अन्धकारः अज्ञानं यस्मिंस्तादृशे ममत्वमेव गर्तः खातः तस्मिन् । तद्रूपे संसारे इत्यर्थः । त्वदन्या का अतीव अतिशयेन विभ्रामयति । पुनःपुनरावर्तयितुं शक्तोतीत्यर्थः । न त्वदन्या कापि अतस्त्वं महामायासीति भावः । भ्रमेर्मित्वेऽपि ह्रस्वाभावश्छान्दसः ॥ अथवा त्वमेव ब्रह्मरूपा मायारूपा चासीत्याहुः । तथाहि । विद्यासु विवेकदीपेषु ज्ञानप्रदेषु शास्त्रेषु दर्शनेषु आद्येषु वाक्येषु च त्वदन्या कास्ति विषयत्वेनेतिभावः । न कापि । त्वमेव ब्रह्मरूपेण प्रतिपाद्यसे इत्यर्थः । तथा त्वदन्या का एतद्विश्वं अतिमहान्धकारे ममत्वगर्ते अतीव विभ्रामयसि

ममत्वगर्तेऽतिमहान्धकारे
विभ्रामयत्येतदतीव विश्वम् ॥ ३१ ॥
रक्षांसि यत्रोग्रविषाश्च नागा
यत्रारयो दस्युबलानि यत्र ॥
दावानलो यत्र तथाब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम् ॥ ३२ ॥

विश्वेश्वरी त्वं परिपासि विश्वम् ॥
विश्वात्मिका धारयसीति विश्वम्

न त्वदन्या कापि तेन मायारूपापि त्वमेवासीतिभावः । (अथ पाठान्तरादि विभ्रामयसीति मध्यमपुरुषान्तपाठे अर्थद्वयं पृथक् पृथगन्वयः ॥ ३१ ॥

त्वं सदा जगद्रक्षणे दत्तावधानासीत्याहुः **रक्षांसीत्यादिना** । यत्र स्थाने रक्षांसि राक्षसाः तदुपलक्षिता दैत्यदानवभूतप्रेतपिशाचादयश्च पीडाकराः सन्ति । यत्र उग्रविषाः सद्यःप्राणहरविषा नागाः तदुपलक्षिताः प्राणहराः सिंहव्याघ्रादयश्च सन्ति । यत्रारयः शत्रवः सन्ति । यत्र दस्युबलानि चौरसैन्यानि सन्ति । दस्युः प्रत्यर्थिचौरयोरिति **विश्वः** ॥ यत्र दावानलः वनाग्निश्चास्ति । तत्र तत्र तथा अब्धिमध्ये नौकाभङ्गोन्मार्गगमनवात्यादिसङ्कटे च स्थिता उपस्थिता सती त्वं विश्वं परिपासि रक्षसि ॥ ३२ ॥

विश्वेश्वरीति । त्वं विश्वं परिपासि रक्षसि अतो विश्वेश्वरी विश्वस्वामिनी असि । स्वामिन एव पालकत्वयोगात् । त्वं विश्वं धारयसि आधेयीकरोषि इति हेतोः विश्वात्मिका असि विश्वाधारभूतासि । विश्वं आत्मनि शरीरे यस्या इति विग्रहः । यत् प्रयन्त्यभिसंविशन्तीति **श्रुतेः** । ये विश्वाश्रया विश्वस्याश्रयभूता ब्रह्मादयस्तेऽपि त्वयि भक्तिनम्रा भक्त्या अवनता भवन्ति । अतो भवती विश्वेशैः वन्द्या विश्वेशवन्द्या अस्ति ।

विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ ३३॥
देवि प्रसीद परिपालय नोऽरिभीते-
र्नित्यं यथासुरवधादधुनैव सद्यः ॥
पापानि सर्वजगतां प्रशमं नयाशु
उत्पातपाकजनितांश्च महोपसर्गान् ॥ ३४ ॥
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥३५॥

अथ पाठान्तरादि विश्वेश्वरीति प्रथमान्तपदस्थाने सम्बुध्यन्तं केचित् पठन्ति ॥ ३३ ॥

अथोपसंहरन्ति **देवि प्रसीदेति** श्लोकद्वयेन। हे देवि। प्रसीद प्रसन्ना भव। प्रसन्नया किं कर्तव्यं तदाहुः। नः अस्मान् अरिभीतेः शत्रुभयात् नित्यं पालय। स्मृता सतीति शेषः। यथा अधुनैव सम्प्रत्येव। अस्माभिः स्मृता सती सद्यः स्मरणक्षणे एव असुरवधात् असुरवधं विधाय। ल्यब्लोपे पञ्चमी। अरिभीतेः पालितवत्यसि तथेत्यर्थः। एवं सर्वजगतां जगत्त्रयवर्तिसर्वजनानामित्यर्थः। पापानि तथा उत्पातानां पातकानां पाकेन परिणामेन जनितान् महोपसर्गान् महामार्यादीन् रोगांश्च आशु शीघ्रं प्रशमं विनाशं नय। उत्पातशद्ब उच्छद्ब उन्नतस्थितिपरः। तेनोन्नतस्थितेः पतन्त्यधो गच्छन्ति जना अनेनेति व्युत्पत्या पापपरः अधर्मपरो वा। आशु उत्पातेत्यत्र संहिताया अविवक्षितत्वान्न सन्धिः। **वसन्ततिलकं वृत्तम्** तल्लक्षणं प्रागुक्तम् ॥ ३४ ॥

प्रणतानामिति। हे विश्वार्तिहारिणि जगत्पीडापरिहारिणि त्रैलोक्यवासिनां ईड्ये स्तुत्ये। कृत्यानां कर्तरि वेति षष्ठी। हे देवि। त्वं प्रणतानां लोकानां प्रसीद वरदा च भव। अर्धद्वयस्य भेदेन पृथगन्वयो वा ॥ ३५ ॥

देव्युवाच ॥ ३६ ॥

वरदाहं सुरगणा वरं यं मनसेच्छथ ॥
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥३७॥

देवा ऊचुः ॥ ३८ ॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥३९॥

देवीति ॥ ३६ ॥

वरदा भवेति देवोक्तिमङ्गीकृत्य प्रतिजानीते **वरदाहमिति**। हे सुरगणाः । अहं वरदा वरदानोत्सुकास्मि । तस्माज्जगतामुपकारकम् हितावहं यं वरं मनसा इच्छथ तं वृणुध्वं याचध्वम् । प्रयच्छामि प्रदास्यामि। दाण् दाने । वर्तमानसामीप्ये भविष्यति लट् ॥ ३७ ॥

देवा इति । ऊचुः वरं ययाचिरे इत्यर्थः ॥ ३८ ॥

सर्वेति । हे अखिलेश्वरि त्रैलोक्यस्वामिनि । त्वया यथा साम्प्रतं त्रैलोक्यस्य सर्वाश्च ता आबाधाश्च सर्वाबाधाः । तासां प्रशमनं शान्तिर्यस्मिन् येन वा तत् सर्वाबाधाप्रशमनं । आबाधा वेदना दुःखमिति **हलायुधः** ॥ एतादृशं अस्मद्वैरिणां दैत्यानां विनाशनं कृतम् । एवमेव इत उत्तरमपि सदा कार्यं कर्तव्यम् ॥

अथ पाठान्तरादि सर्वबाधेति क्वचित् पाठः । तत्पक्षे पीडा बाधा व्यथा दुःख**मित्यमरः** ॥ ३९ ॥

देव्युवाच ॥ ४० ॥

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ॥
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ४१ ॥
नन्दगोपकुले जाता यशोदागर्भसम्भवा ॥

देवीति ॥ ४० ॥

अथ भविष्यत्काले पुनःपुनरुत्पत्स्यमानानां दैत्यानां देवप्रार्थितवरानुरोधात् येन येन रूपेण वधः करिष्यते तदाह **वैवस्वते** इत्यादिभिः पञ्चदशश्लोकैः । वैवस्वतेऽन्तरे वैवस्वतमन्वन्तरे प्राप्ते सति तत्र अष्टाविंशतिमे युगे युगचतुष्टयस्याष्टाविंशतितमे पर्याये इत्यर्थः । तत्रापि द्वापरकलियुगयोः सन्धौ। तत्रैव नन्दावतारस्य जातत्वात् । अष्टाविंशतितमे इत्यत्र स एतमेव पुरुषं ब्रह्मततममपश्यदित्यत्रेव तमपस्तकारलोपः पृषोदरादित्वात् । अन्यौ सम्प्रति हताभ्यां भिन्नौ शुम्भो निशुम्भश्च महासुरौ उत्पत्स्येते । तथाच पुराणान्तरे । अन्ववाये तु दैत्यस्य हिरण्यकशिपोः पुरा ॥ सुन्दस्य पुत्रावसुरौ सोदरौ भ्रातरावुभौ ॥ मधुकैटभसङ्काशौ बभूवतुररिन्दमौ ॥ नाम्ना शुम्भनिशुम्भाख्यौ देवोपद्रवकारिणावित्यादि ॥ **पाञ्चरात्रे लक्ष्मीतन्त्रे तु** । वैवस्वतेऽन्तरे तौ च पुनः शुम्भनिशुम्भकौ ॥ उत्पत्स्येते वरोन्मत्तौ देवोपद्रवकारिणाविति सम्प्रति हतयोरेव वैवस्वतमन्वन्तरे पुनरुत्पत्तिरुक्ता । सापि यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ॥ तं तमेवेति कौन्तेय सदा तद्भावभावितः इति भगवदुक्तेर्युक्तैवेत्यलम् ॥

अथ पाठान्तरादि वैवस्वतेऽन्तरे प्राप्तेऽष्टाविंशतितमे युगे इति पाठो युक्तः ॥ ४१ ॥

नन्देति । ततः नन्दगोपस्य नन्दाख्यगोपालकस्य यं प्रति भगवान्

ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ ४२ ॥

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥
अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान् ॥ ४३ ॥

भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ॥
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥४४॥

श्रीकृष्णः पितृभावेनामन्यत । तस्य कुले गृहे । कुलं वंशे गणे गेहे इति **हैमः** ॥ यशोदायाः नन्दपत्न्याः गर्भे कुक्षौ सम्भवो जन्म यस्याः सा यशोदागर्भसम्भवा । कुक्षिभ्रूणार्भका गर्भा **इत्यमरः** । जाता अहम् । विन्ध्याचले निवसतीति विन्ध्याचलनिवासिनी सती तौ शुम्भनिशुम्भौ नाशयिष्यामि । इयं नन्दपुत्रीत्वान्नन्दाख्या । नन्दा भगवती नाम या भविष्यति नन्दजेति **रहस्योक्तेः** । विन्ध्याचले स्थितत्वाद्विन्ध्यवासिनी नाम्नापि प्रसिद्धास्ति ।

अथ पाठान्तरादि कुले इत्यत्र गृहे इति क्वचित् पाठः ॥ ४२ ॥

पूर्वश्लोके नन्दावतारेण शुम्भनिशुम्भयोर्वधः प्रतिज्ञातः । अथ रक्तदन्त्यवतारेण वैप्रचित्तदानववधं प्रतिजानीते **पुनरपीति** । पुनरपि वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतितमे युगे एव अतिरौद्रेण रूपेण पृथिवीतले अवतीर्य वैप्रचित्तान् विप्रचित्तिसुतान् दानवांश्च हनिष्यामि भक्षयित्वा विनाशयिष्यामि । भक्षयन्त्याश्च तानुग्रानिति वक्ष्यमाणत्वात् ॥

अथ पाठान्तरादि अत्र चण्डहासस्फुरद्दन्तदंष्ट्रवक्त्रेण भक्षितानित्यर्धमधिकं क्वचित् पठ्यते ॥ ४३ ॥

भक्षयन्त्या इति । उग्रांस्तान् वैप्रचित्तान् महासुरान् भक्षयन्त्याश्च मम दन्ताः रक्ताः रक्तवर्णा अत एव दाडिमीकुसुमान्युपमा उपमानानि येषान्ते दाडिमीकुसुमोपमा भविष्यन्ति । उपमोपमानं स्यादित्यमरः ॥ ४४ ॥

ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥ ४५ ॥

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ॥

तत इति । ततः दन्तानां रक्तत्वादित्यर्थः । स्वर्गे दैवताः मर्त्यलोके भुवि मानवाश्च स्तुवन्तः मां सततं रक्तदन्तिकां व्याहरिष्यन्ति वक्ष्यन्ति । रक्तदन्तिकेति नाम्ना मत्स्तुतिं करिष्यन्तीत्यर्थः । स्तुवन्त इत्यस्य देवतानां मानवानां च समुच्चितानां विशेषणत्वात् स्तुवन्त्यश्च स्तुवन्तश्च स्तुवन्त इति विग्रहः । पुमान् स्त्रिया इति पुल्लिङ्गशेषः । तथा रक्तदन्तिकेत्यत्र-रक्ता दन्ता यस्या इति बहुव्रीहौ नासिकोदरौष्ठजङ्घादन्तेति वैकल्पिके ङीषि रक्तदन्तीशब्दात् स्वार्थिके कप्रत्यये अदन्तत्वाट्टापि केण इति ङीष् ईकारस्य ह्रस्वः ॥ ४५ ॥

अथ शताक्षी शाकम्भरी दुर्गेति नामत्रयविशिष्टेनैकेनैवावतारेण त्रैलोकस्य सर्वाबाधाप्रशमनं दुर्गमासुरवधं च प्रतिजानीते **भूयश्चे**त्यादिसार्धश्लोकचतुष्टयेन । भूयश्च पुनश्च वैवस्वतमन्वन्तरे चत्वारिंशत्तमे महायुगे इत्यर्थः । तस्मिन्नेवान्तरे शक्रचत्वारिंशत्तमे युगे ॥ इति लक्ष्मातन्त्रे शताक्ष्यवतारकालस्योक्तत्वात् । तदा हिरण्याक्षवंश्येन रुरुपुत्रेण दुर्गमासुरेण बहुकालं तपस्तप्त्वा ब्रह्मणो वरात् सर्ववेदेष्वात्मसात् कृतेषु सर्वत्र वेदपठनपाठनप्रचाराभावेन यज्ञादिक्रियालोपात् शतं वर्षाणि प्रमाणमस्याः शतवार्षिकी तस्यां शतवार्षिक्याम् । तदस्य परिमाणमिति ठक् । वर्षस्याभविष्यतीत्युत्तरपदवृद्धिः । समन्तात् वृष्टिः आवृष्टिः । तदभावोऽनावृष्टिस्तस्यामनावृष्ट्यां सत्याम् । अनम्भसि सर्वत्र जलाभावे सति च । लोकक्षयं द्रष्टुमक्षमैः कारुणिकैर्मुनिभिः संस्मृता अहं भूमौ अयोनिजा स्वयम्भूः ।

मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा ॥४६॥

ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ॥
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥ ४७ ॥

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४८ ॥

सम्भविष्यामि प्रादुर्भविष्यामि । अनन्तनयनेति शेषः । अनन्ताक्षिमयं रूपं दर्शयामास पार्वतीति **देवीभागवतात्** ।

अथ पाठान्तरादि संस्मृतेत्यत्र संस्तुतेति क्वचित् पाठः ॥ ४६ ॥

तत इति । ततः अनन्तरम् । यत् यतः अतिकृशान् दुर्बलान् मुनीन् आप्यायनार्थं नेत्राणां शतेन अमृतमयैरनन्तनयनैरित्यर्थः । निरीक्षिष्यामि अवलोकयिष्यामि । परस्मैपदं छान्दसम् । ततस्तस्माद्धेतोः । मनुजाः मानवाः । मां शताक्षीमिति कीर्तयिष्यन्ति भणिष्यन्ति । इतिशब्देन कर्मण्यभिहितेऽपि शताक्षीमिति द्वितीया छान्दसी ॥ ४७ ॥

ततोऽहमिति । हे सुराः ततः अहं आत्मदेहो मद्देहः तस्मात्समुद्भव उत्पत्तिर्येषां तैः तत्र तत्र चरित्वा दिव्यशक्त्या स्वदेहोत्पादितैरित्यर्थः । प्राणधारकैः क्षुन्म्रियमाणलोकप्राणरक्षकैः शाकैः दशविधैःआवृष्टेः वृष्ट्युद्भवपर्यन्तं अखिलं लोकं भूलोकस्थं सर्वं जनम् । भरिष्यामि प्राणधारिणं करिष्यामि । शाकस्य दश प्रकारा उक्ताः **सूपशास्त्रे** । मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् ॥ त्वक् पुष्पं कवचं चैव शाकं दशविधं स्मृतम् ॥ इति ॥ तत्र करीरं वंशाङ्कुरादि । अधिरूढं विरूढधान्यादि । कवचं स्वेदजं छत्राकादि । **उक्तं** च । उक्तं संस्वेदजं शाकं छत्राकादि शिलीन्ध्रकम् ॥ क्षितिगोमयकाष्ठेषु वृक्षादिषु च यद्भवेदिति ॥ इतरत् स्पष्टम् ॥ ४८ ॥

शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ॥४९॥
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥
दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ॥५०॥

शाकम्भरीति । अर्धश्लोकमन्त्रोऽयम् । यदाहं शाकैर्लोकभरणं करिष्यामि तदा भुवि शाकम्भरीति विख्यातिं शाकम्भरीनाम्ना प्रसिद्धिं यास्यामि । शाकैर्बिभर्ति पुष्णातीति शाकम्भरी । रथेन तरति इति रथन्तरं सामेतिवत् तृतीयान्ते उपपदे संज्ञायां भृतॄवृजीति खच् । खित्यनव्ययस्येति मुम् । छान्दसो ङीष् । दिव्यं वर्षसहस्रं हि शाकेन किल सुव्रता ॥ आहारं सा कृतवती मासि मासि नराधिप ॥ ऋषयोऽभ्यागतास्तत्र देव्या भक्त्या तपोधनाः ॥ आतिथ्यं च कृतं तेषां शाकेन किल भारत ॥ ततः शाकम्भरीत्येव नाम तस्याः प्रतिष्ठितम् ॥ इति **महाभारते** वनपर्वणि व्यशीतितमेऽध्याये शाकम्भरीपदप्रवृत्तिनिमित्तमुक्तम् ॥ ४९ ॥

तत्रैवेति । तत्रैव तस्मिन्नवतारे एव दुर्गमाख्यं दुर्गमनामानं पूर्वोक्तं महासुरं तदपहृतवेदप्रत्याहरणार्थं वधिष्यामि हनिष्यामि । हनो वधादेशश्छान्दसः । तत् तस्मात् दुर्गमासुरवधाद्धेतोः । मे दुर्गादेवीति विख्यातं प्रसिद्धं नाम भविष्यति । दुर्गमो वधविषयत्वेनास्ति यस्या इति दुर्गा । अर्शआद्यच् । पृषोदरादित्वान्मकारलोपः । अयं दुर्गमासुरो दुर्गशब्देनाप्युच्यते । दुर्गो नाम महादैत्य इति **काशीखण्डात्** तत्पक्षे नास्ति मकारलोपप्रसङ्गः । दुर्गा चासौ देवी च दुर्गादेवी । देवीपदं स्तुत्यर्थम् । एवं भीमादेवीत्यादावपि । तेन केवलदुर्गाभीमादिपदप्रयोगोऽपि न दुष्यति । निमित्तभेदादेकस्या एव देव्याः शताक्षी शाकम्भरी दुर्गेति नामत्रयम् । अत एव शाकम्भरी शताक्षी स्यात्सैव दुर्गा प्रकीर्तितेति **रहस्ये** वक्ष्यते ॥५०॥

पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥ ५१ ॥
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ॥
भीमादेवीति विख्यातं तन्मे नाम भविष्यति ॥ ५२ ॥
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥

अथ भीमादेव्यवतारेण रक्षसां भक्षणद्वारा विनाशं प्रतिजानीते । **पुनश्चेति** । पुनश्च वैवस्वतमन्वन्तरे पञ्चाशत्तमे महायुगे इत्यर्थः । चतुर्युगेऽत्र पञ्चाशत्तमे मुनिभिरर्चिता ॥ सम्भूय भीमरूपेण भक्षयिष्यामि राक्षसान् ॥ इति **लक्ष्मीतन्त्रोक्तेः** । यदा मुनीनां त्राणकारणात् रक्षणहेतोरित्यर्थः । बिभ्यति शत्रवो यस्मादिति भीमं भयानकं रूपं कृत्वा स्वीकृत्य रक्षांसि मुनिपीडाकरान् राक्षसान् भक्षयिष्यामि । तदेत्युत्तरश्लोकेन महावाक्यता ॥ ५१ ॥

तदेति । तदा आ ईषत् नम्रा अवनता मूर्तयो देहा येषां ते आनम्रमूर्तयः सर्वे मुनयः मां भीमरूपत्वेन स्तोष्यन्ति । तत् तस्मात् मे भीमादेवीति विख्यातं प्रसिद्धं नाम भविष्यति । अत्रापि देवीपदं स्तुत्यर्थम् । अत एव **रहस्ये** भीमापि नीलवर्णाभेति केवलं भीमापदं प्रयोक्ष्यते ॥५२॥

भ्रामरीरूपेणारुणासुरवधं प्रतिजानीते । **यदेति** । यदा वैवस्वतमन्वन्तरे षष्टितमे महायुगे इत्यर्थः । युगे षाष्टितमे कश्चिदरुणो नाम दानवः ॥ इति **लक्ष्मीतन्त्रात्** । अरुणाख्यः अरुणनामा महासुरः । त्रैलोक्ये महाबाधां करिष्यति । तदा अहं सङ्ख्यातुमशक्या असङ्ख्येया अनन्ता इत्यर्थः षट्पदा भ्रमरा भृङ्गा यस्मिंस्तदसङ्ख्येयषट्पदम् । भ्रमराणामिदं भ्रामरं असङ्ख्यभ्रमरसङ्घातात्मकमित्यर्थः । भ्रमरस्येदं भ्रामरमिति विग्रहेणैकभ्रमरात्मकत्व-

तदाहं भ्रामरं रूपं कृत्वासङ्ख्येयषट्पदम् ॥ ५३ ॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ॥५४॥

इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥
तदा तदावतीर्याहं करिष्याम्यरिसङ्क्षयम् ॥ ५५ ॥

शङ्कानिराकरणाय असङ्ख्येयषट्पदमिति विशेषणम्। ईदृशं रूपं कृत्वा स्वीकृत्य। महासुरं वधिष्यामि इत्युत्तरेणान्वयः ॥

अथ पाठान्तरादि अरुणाख्य इत्यत्र अरुणाक्ष इति क्वचित् पाठः ॥ ५३ ॥

त्रैलोक्यस्येति। त्रैलोक्यस्य हितं कल्याणमेव अर्थः प्रयोजनं तस्मै तादर्थ्ये चतुर्थी। महासुरमरुणं सर्वाङ्गे सन्दश्य वधिष्यामि तदा सर्वतः सर्वत्र। सार्वविभक्तिकस्तसिः। लोकाः मां भ्रामरीतिनाम्ना स्तोष्यन्ति। भ्रमरशब्दात् सम्बन्धमात्रविवक्षायां मत्वर्थीयाच्प्रत्यये भ्रमरा। ततः प्रज्ञादित्वात्स्वार्थेऽणि भ्रामरीति रूपम्। इयं चन्दला परमेश्वरीति लोके प्रसिद्धा। नन्दादीनामुपासनार्थं नामान्तराणि स्वरूपाणि च **मूर्तिरहस्ये** वक्ष्यन्ते ॥ ५४ ॥

अवताराणामानन्त्येन सर्वेषां कथनस्याशक्यत्वात् सङ्क्षिपन्त्युपसंहरति **इत्थमिति**। इत्थमुक्तप्रकारेण यदा यदा दानवेभ्योऽसुरेभ्य उत्तिष्ठत्युत्पद्यते इति दानवोत्था। सुपि स्थ इति कः। उदस्थास्तम्भोरिति पूर्वसवर्णः। बाधा पीडा। आबाधेति वा च्छेदः। भविष्यति। तदा तदा अहं नानारूपैरवतीर्य उत्पद्य अरिसङ्क्षयं युष्मच्छत्रुविनाशं करिष्यामि ॥५५॥

इति मार्कण्डेयमहापुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये नारायणीस्तुतिर्नामैकादशोऽध्यायः ॥ ११ ॥

इतीति । अत्राध्याये बहुषु श्लोकेषु नारायणि नमोऽस्तु ते इति प्रयोगान्नारायणीस्तुतिरित्यध्यायस्य संज्ञा नारायण्याः स्तुतिर्यस्मिन् स नारायणीस्तुतिरिति विग्रहः । सप्तत्रिंशदक्षरात्मकमेतदध्यायसमाप्तिवाक्यम् ॥

इति चण्डिकोपास्तिदीपिकायां चण्डिस्तवार्थ-
प्रकाशे एकादशाध्यायव्याख्या ॥ ११ ॥

एकादशाध्यायः समाप्तः

अथ द्वादशाध्यायः ॥

॥ देव्युवाच ॥ १ ॥

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥

देवीति । अथ द्वादशाध्यायमन्त्रविभागकारिकाः ॥ द्वादशे देव्युवाचेति प्रथमो गद्यमन्त्रकः ॥ एभिः स्तवैरिति श्लोकमन्त्रा अष्टादश स्मृताः ॥ सर्वं ममैतन्माहात्म्यमित्यर्धश्लोकमन्त्रकः ॥ पशुपुष्पेत्यादयस्तु श्लोकमन्त्रा दश स्मृताः ॥ अथो ऋषिरुवाचेति गद्यात्मा मन्त्र इष्यते ॥ इत्युक्त्वा सेत्येवमाद्याः श्लोकमन्त्रास्त्रयः स्मृताः ॥ निशुम्भे च महावीर्ये इत्यर्धश्लोकमन्त्रकः ॥ एवं भगवतीत्याद्याः श्लोकमन्त्राश्च षट् स्मृताः ॥ मन्त्रास्तु द्वादशे चैकचत्वारिंशत् समीरिताः ॥ सप्तत्रिंशत् श्लोकमन्त्रा अर्धश्लोकात्मकावुभौ ॥ द्वौ च गद्यात्मकौ मन्त्रौ श्लोकास्त्रिंशत् तथाष्ट च ॥ इति ॥ अथ मन्त्रव्याख्या ॥ **देव्युवाचेति** ॥ पूर्वाध्यायतो देव्या एव वचने प्रकृतेऽपि पुनर्देव्युवाचेत्युक्तिरध्यायपरिसमाप्त्या पूर्वसम्बन्धस्य परिसमाप्तत्वात् । इत उत्तरभागस्य चरित्रत्रयशेषत्वेऽपि तस्योत्तमचरित्राव्यवहितत्वादुत्तमचरित्रे गणना ॥ एवमादितः सा नित्याप्यभिधीयते इत्यन्तस्य प्रथमाध्यायभागस्य प्रथमचरित्रेगणनेति ज्ञेयम् ॥ १ ॥

अथास्मिन्नध्याये देवीचरित्रत्रयरूपस्य स्वमाहात्म्यस्य पठनश्रवणस्मरणादेरस्वमुखेनैव फलं वदन्त्यादौ पूर्वाध्यायेऽनुक्तं नारायणीस्तवपाठस्य फलमाह **एभिः स्तवैरिति** । यः पुरुषः समाहितः स्वस्थचित्तः सन् । एभिः सन्निकृष्टैः पूर्वाध्याये युष्माभिः कृतैः स्तवैः देविप्रपन्नार्तिहरे प्रसीदेत्यादिश्लोकात्मकैः स्तुतिवचनैः नित्यं मां स्तोष्यते । तस्य अहं सकलां

तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥ २ ॥
मधुकैटभनाशं च महिषासुरघातनम् ॥
कीर्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः ॥ ३ ॥
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥ ४ ॥

बाधां नास्ति संशयो यस्मिन् कर्मणीत्यसंशयम् निःसन्देहं यथा स्यात्तथा नाशयिष्यामि ॥

अथ पाठान्तरादि । नाशयिष्यामीत्यत्र शमयिष्यामीति क्वचित्पाठः ॥ २ ॥

अथ चरित्रत्रयात्मकस्य समस्तदेवीमाहात्म्यस्य पठनादेः फलमाह । तत्रादावन्येभ्यः कीर्तनस्याह **मध्विति** ॥ ये पुरुषाः मधुकैटभनाशं एतेन प्रथमचरित्रमुक्तम् । महिषासुरस्य घातनं हननम् । स्वार्थे णिच् । एतेन मध्यमचरित्रमुक्तम् । तद्वत् शुम्भनिशुम्भयोर्वधं । एतेनोत्तमचरितमुक्तं । एतानि समुच्चितानि त्रीणि चरितानीत्यर्थः । नत्वेकैकम् । रहस्ये प्रथमोत्तमयोरेकैकस्य पाठनिषेधात् । कीर्तयिष्यन्ति । तदर्थं अन्येभ्यः कथयिष्यन्ति । स्वयमेव पठिष्यन्तीति वा । नामसंकीर्तनं विष्णोरित्यादौ तथैवार्थप्रतीतिः । इत आरभ्य श्लोकमन्त्रचतुष्टयात्मकमेकं महावाक्यम् ॥ ३ ॥

अथ श्रवणस्य फलमाह । **अष्टम्यामिति** । ये पुरुषाः एकचेतसः विषयान्तरानासक्तमनसः । अष्टम्यां च चतुर्दश्यां च नवम्यां च । विशेषानुक्तेः पक्षद्वयेऽपि । च पादपूरणे पक्षान्तरे हेतौ विनिश्चये इति त्रिकाण्डीशेषात् । मम उत्तमं माहात्म्यं चरित्रत्रयात्मकं भक्त्या श्रोष्यन्ति चैव एतत् पठनस्याप्युपलक्षणं अग्रे तस्मान् ममैतन्माहात्म्यं पठितव्यं समाहितैः । श्रोतव्यं च सदा भक्त्यात्युपसंहारे उभयोः कथनात् । एवमग्रेऽपि यत्र श्रवणमुक्तं तत्र पठनमपि ज्ञेयम् ॥ ४ ॥

न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्था न चापदः ॥
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥
शत्रुतो न भयं तेषां दस्युतो वा न राजतः ॥
न शस्त्रानलतोयौघात्कदाचित् सम्भविष्यति ॥६॥
तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥

न तेषामिति । तेषां मम माहात्म्यं पठतां शृण्वतां च । किञ्चिदल्पमपि दुष्कृतं पापं न भविष्यति न स्थास्यति । दुष्कृतादुत्तिष्ठन्त्युत्पद्यन्ते इति दुष्कृतोत्थाः । आपदो दुःखानि च न भविष्यन्ति नोत्पद्यन्ते । दारिद्र्यं न भविष्यति । इष्टैर्भार्यापुत्रादिभिःवियोजनं वियोगश्च न भविष्यति । भवतेर्यथार्हं स्वबुद्ध्यार्थयोजना कार्या ॥ ५ ॥

शत्रुत इति । तेषां शत्रुतः शत्रुभ्यः । दस्युतो वा चोरेभ्यश्च । वाशब्दः समुच्चये । वा स्याद्विकल्पोपमयोरेवार्थे वा समुच्चये इति विश्वः ॥ कदाचिदपि भयं न सम्भविष्यति नोत्पत्स्यते । राजतः राज्ञः सकाशान्न सम्भविष्यति । शस्त्राणि चानलश्च तोयौघो जलप्रवाहश्चैषां समाहारः शस्त्रानलतोयौघम् । तस्माच्च न सम्भविष्यति ॥

अथ पाठान्तरादि शत्रुतो दस्युत इत्यत्र शत्रुभ्यो दस्युभ्य इति पाठः क्वचित् । तेषामित्यत्र तस्येति पाठस्तु प्रामादिकः ॥ पूर्वं कीर्तयिष्यन्ति श्रोष्यन्तीति बहुवचनप्रयोगात् ॥ ६ ॥

अथोपसंहरति **तस्मादिति** । तस्मात् पूर्वोक्तफलश्रवणाद्धेतोः । समाहितैः स्वस्थचित्तैःपुरुषैः । परं अतिशयेन स्वस्त्ययनं कल्याणास्पदम् । महत् पूज्यतमं एतत् पूर्वोक्तं मम माहात्म्यं देवीमाहात्म्यसंज्ञको ग्रन्थविशेषः। भक्त्या सदा पठितव्यं श्रोतव्यं च एतेन एकादशाध्यायान्तभागस्य

श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥ ७ ॥
उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ८ ॥

मुख्या देवीमाहात्म्यसंज्ञा तदुत्तराध्यायस्य तु सा गौणीति सिद्धम्।

अथ पाठान्तरादि महदित्यत्र हि तदिति पाठः क्वचित्। तत्पक्षे "तत् परं स्वस्त्ययनं हि" इति भिन्नं वाक्यम् ॥ ७ ॥

फलान्तराण्यप्याह **उपसर्गानिति**। मम माहात्म्यं कर्तृ। पठितं श्रुतं वेति शेषः। महामारी नाम जनमारपशुमारादिसंज्ञका युगपत्सजातीयबहुप्राणिसंहारकारिणः सान्निपातिका दुश्चिकित्स्या ज्वरातिसारादयः साङ्क्रामिका रोगविशेषाः। तत्समुद्भवान् उपसर्गान् उपप्लवान् अकालमृत्यूनित्यर्थः। अथ वा महामारी संहारकारिणी तामसी देवता तत्कोपसमुद्भवान् अशेषानुपसर्गान् पूर्वोक्तान् जनमारपशुमारादिरोगान्। उपसर्गः पुमान् रोगे बाधोपप्लवयोरपीति **विश्वः** ॥ तथा त्रिविधं दिव्यान्तरिक्षभौमरूपं आध्यात्मिकाधिभौतिकाधिदैविकरूपं वा उत्पातं दुर्निमित्तं शमयेत् तज्जन्यं दुष्टफलं परिहरेदित्यर्थः। तत्र दिव्यान्तरिक्षभौमा उत्पाता **वसिष्ठसंहितायामुक्ताः**। उत्पद्यते क्षितौ यस्तु स्थावरे वाथ जङ्गमे ॥ नानाविधो विकारः स उत्पातो भौम उच्यते ॥ निर्घातपरिवेषोल्का पुरन्दरधनुर्ध्वजाः ॥ एवमाद्या महोत्पाता आन्तरिक्षाः स्मृता बुधैः ॥ ग्रहर्क्षजाः केतवश्चेत्याद्या दिव्या मता इमे ॥ भौमाः स्युरल्पफलदा आन्तरिक्षास्तु मध्यमाः। सम्पूर्णफलदा दिव्या वर्षादर्धात्तदर्धतः ॥ इति '। अथाध्यात्मिका अशुभसूचकनेत्रबाहुस्फुरणादयः ॥ आधिभौतिका घूकारटनश्वरोदनादयः। आधिदैविका देवताप्रतिमाश्रुमोचनादयः ॥ ८ ॥

यत्रैतत् पठ्यते सम्यङ् नित्यमायतने मम ॥
सदा न तद्विमोक्ष्यामि सानिध्यं तत्र मे स्थितम् ॥९॥
बलिप्रदाने पूजायामग्निकार्यमहोत्सवे ॥
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥ १० ॥
जानता जानता वापि बलिपूजां तथा कृताम् ॥

यत्रेति । यत्र आयतने यस्मिन् गृहे । मम एतन्माहात्म्यं नित्यं प्रतिदिनम् । सम्यक् यथाविधि । पठ्यते तत् आयतनं अहं न विमोक्ष्यामि । न त्यक्ष्यामि तत्र सदा मे सान्निध्यं सन्निधानं निवास इत्यर्थः । स्थितं अवश्यंभावीत्यर्थः । यत्र ममायतने एतत्पठ्यते इत्यन्वयो न सम्यक् । तथात्वे देव्यालये देवीमाहात्म्यपाठाभावे देवीसान्निध्याभावप्रसङ्गात् ॥ ९ ॥

बलीति । जनमारपशुमारादिरोगशान्त्यर्थं यन्मह्यं बलिप्रदानं क्रियते तस्मिन् । पूजायां मम नित्यनैमित्तिककाम्यसपर्यायाम् । अग्निकार्यमहोत्सवे सर्वोपद्रवशान्त्यर्थं मदुद्देशेन क्रियमाणे यागोत्सवे । उक्तं च । जपार्चाबलिहोमाद्यैः सर्वे नश्यन्त्युपद्रवाः ॥ इति ॥ एतत् मम चरितं देवीमाहात्म्यमित्यर्थः । उच्चार्यं पठनीयम् । श्राव्यं अवश्यं श्रोतव्यमेव च । ओरावश्यके इति ण्यत् ॥

अथ पाठान्तरादि अग्निकार्ये महोत्सवे इत्यसमस्तपाठः क्वचित् । तत्पक्षे महोत्सवे इत्येतद्बलिदानादित्रये प्रत्येकं विशेष्यत्वेन योजनीयम् । बलिदानरूपे महोत्सवे पूजारूपे महोत्सवे अग्निकार्यरूपे महोत्सवे चेत्यर्थः ॥ १० ॥

पूर्वोक्तं बलिदानादित्रयं चरितपठनश्रवणसहितं कृतं चेत् तत्किञ्चित् विधिविकलमपि स्वस्य प्रियमेवेत्याह **जानतेति** । पूर्वोक्तबलिदानादिविधिं

प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथाकृतम् ॥ ११ ॥

शरत्काले महापूजा क्रियते या च वार्षिकी ॥
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥१२॥

जानता अथ वा अजानता पुरुषेण ॥ तथाकृताम् । समस्तमेतत्पदम् । मच्चरितपठनश्रवणसहितत्वेन कृतामित्यर्थः । बलिसहिता पूजा बलिपूजा तां बलिपूजाम् । बलिदानं पूजां चेत्यर्थः । तथाकृतामित्यस्य लिङ्गविपरिणामेन बलावप्यन्वयः । तथा च मच्चरितपठनश्रवणसहितत्वेन कृतं बलिं मच्चरितपठनश्रवणसहितत्वेन कृतां पूजां चेत्यर्थः । एवं तथाकृतं मच्चरितपठनश्रवणसहितत्वेन कृतं वह्निहोमं पूर्वोक्तमग्निकार्यमहोत्सवं च अहं प्रीत्या प्रतीच्छिष्यामि स्वीकरिष्यामि । शित्प्रत्ययाभावेऽपीषेश्छादेशश्छान्दसः । प्रतिपूर्वको हीच्छतिः स्वीकारार्थः । अष्टमाध्याये रक्तबिन्दून्प्रतीच्छ त्वम् चामुण्डा सम्प्रतीच्छति इत्यत्र तथार्थप्रतीतेः ॥

अथ पाठान्तरादि प्रतीक्षिष्याम्यहमिति क्वचित् पाठः ॥ तदा परस्मैपदं छान्दसम् । प्रतीषिष्यामीति पाठः साधुः ॥ ११ ॥

नवरात्रपूजायां विशेषतो देवीमाहात्म्यस्य श्रवणादिकमाह शरदिति । शरत्काले शरदन्तर्गताश्विनशुक्लप्रतिपदादिनवम्यन्तनवरात्रकाले इत्यर्थः । वार्षिकी प्रतिवर्षविहिता या महापूजा क्रियते तस्याम् । अथ वा शरत्काले आश्विननवरात्रे या महापूजा क्रियते । तस्याम् । तथा वार्षिकी वर्षारम्भे चैत्रशुक्लप्रतिपदादिनवम्यन्तनवरात्रे विहिता या महापूजा क्रियते तस्यां इति वाक्यभेदेनान्वयः । प्रतिसंवत्सरं कुर्याच्छारदं वार्षिकं तथेति रहस्यतन्त्रे । तथा चैत्रे चाश्वयुजे मासि त्वया कार्यो महोत्सवः ॥ नवरात्रे महाराज मम प्रीतिविधायकः ॥ इति देवीभागवते च नवरात्रद्वयविधानात् ।

सर्वाबाधाविनिर्मुक्तो धनधान्यसमन्वितः ॥
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १३ ॥
श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ॥
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १४ ॥
रिपवः सङ्क्षयं यान्ति कल्याणं चोपपद्यते ॥
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥१५॥

भक्तिसमन्वितः भक्तियुक्तः सन् मम एतन्माहात्म्यं श्रुत्वा । एतत्पठनस्याप्युपलक्षणम् । एवमग्रेऽपि ज्ञेयम् । उत्तरश्लोकेन पूर्णान्वयः ॥ १२ ॥

सर्वेति । मनुष्यः पूर्वोक्तनवरात्रपूजाङ्गत्वेन देवीमाहात्म्यश्रवणपठणकर्ता पुरुषः । मत्प्रसादेन सर्वाभ्य आबाधाभ्यो विनिर्मुक्तो धनधान्यसमन्वितश्च भविष्यति । न संशयः ॥

अथ पाठान्तरादि सर्वाबाधेत्यत्र सर्वबाधेति समन्वित इत्यत्र सुतान्वित इति च क्वचित् पाठः ॥ १३ ॥

श्रुत्वेति । ममैतन्माहात्म्यं मन्माहात्म्यप्रतिपादिका युष्मत्कृताः स्तुतीरित्यर्थः । तथा शुभाः मङ्गलकरीः उत्पत्तयः उत्पत्तीश्च । द्वितीयार्थे प्रथमा छान्दसी । युद्धेषु कृतं पराक्रमं च श्रुत्वा पठित्वा चेति शेषः । पुमान् पुरुषो निर्भयो जायते ॥ १४ ॥

रिपव इति । मम माहात्म्यं चरित्रत्रयरूपं ग्रन्थं शृण्वतां पठतां च पुंसां रिपवः सङ्क्षयं विनाशं यान्ति कल्याणं चोपपद्यते जायते । कुलं वंशश्च नन्दते समृध्यति । तङ् छान्दसः ॥

अथ पाठान्तरादि उपपद्यते इत्यत्र उपजायते इति क्वचित् पाठः ॥१५॥

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥

शान्तीति । सर्वत्र सर्वस्मिन् । शान्तिकर्मणि उपसर्गादिशान्तिकार्यार्थे तथा दुःस्वप्नदर्शने । प्रत्यस्तमितबाह्येन्द्रियवृत्तेर्मनोमात्रेणैव यत्र पुंसः सुखदुःखादिभोगः स स्वप्नः । स च दुष्टफलदो दुःस्वप्नः तस्य दर्शनं स्वापकालेऽनुभवः । तस्मिन् सतीत्यर्थः । तथा उग्रासु अत्युत्कटासु उग्रावुत्कटशूलिनाविति शाश्वतः । ग्रहपीडासु ग्रहाणां रव्यादीनां बाधासु च मम माहात्म्यं चरित्रत्रयरूपं ग्रन्थं शृणुयात्पठेच्च । **अथ प्रसङ्गाद्दुष्टफलदा स्वप्ना उच्यन्ते** दुष्टं किंशुकवल्मीकपारिभद्रादिरोहणम् ॥ विवाहकरणं स्वप्ने रक्तस्रग्वस्त्रधारणम् ॥ तैलपिण्याककार्पासलोहप्राप्तिर्विपत्तये ॥ स्रोतसाहरणं नेष्टं पक्कमांसस्य भोजनम् ॥ आदित्यस्याथ चन्द्रस्य निष्प्रभस्यावलोकनम् ॥ नक्षत्रादेश्च पातश्च स्वप्ने मरणशोककृत् ॥ पुष्पिताशोकपालाशकरवीरावलोकनम् ॥ कर्णनासापादकरच्छेदस्तरणिरोहणम् ॥ खरोष्ट्रमहिषैर्यानं तद्युक्तेन रथेन वा । कर्दमे मग्नता नग्नगमनं क्ष्वेडभक्षणम् ॥ रक्तवस्त्राबलाश्लेषः कृष्णपूरुषदर्शनम् ॥ तैलाभ्यङ्गो रक्तजपास्रग्धृतिः, केशदन्तयोः ॥ पतनं च मृताश्लेषः स्वप्ना दुष्टफला इमे ॥ इति ॥ अथ रव्यादिग्रहाणां स्वजन्मराश्यादिद्वादशस्थानस्थितानां शुभाशुभफलानि व्यवहारसारे । मार्गं हानिं प्रियं व्याधिं दैन्यं स्वास्थ्यं गतिं गदम् ॥ पापं सुखं धनं व्याधिं करोत्वर्कः स्वजन्मभात् ॥ वस्त्रं हानिं धनं रोगं पीडां वित्तं प्रियं वसु ॥ भयं धनं सुखं रोगं करोतीन्दुः स्वजन्मभात् ॥ भयं हानिर्धनं वैरं दुखं लाभो भयं क्षयः ॥ पापं लाभः सुखं हानिर्जनेर्भौमफलं क्रमात् ॥ बन्धं लाभं भयं वित्तं शोकं लक्ष्मीं क्षयं धनम् ॥ रोगं भोगं सुखं हानिं करोति ज्ञः स्वजन्मभात् ॥ भयं वित्तं रुजं हानिं लाभं शोकं सुखं रुजम् ॥ मानं दैन्यं धनं पीडां कुरुते जन्मभाद्गुरुः ॥ जयं वित्तं धनं सौख्यं पुत्रान् वैरं शुभं सुखम् ॥ धर्मं दुःखं धनं लाभं

ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १६ ॥
उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ॥
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥

जनेः शुक्रो ददाति वै ॥ भयं शोको धनं दुःखं हानिर्मित्रं क्षयो मृतिः ॥ पापं श्रमो धनं हानिर्जनेर्मन्दफलं क्रमात् ॥ राहोः शनेरिव प्रोक्तं केतोस्तु कुजवत्स्मृतम् ॥ इति ॥ १६ ॥

पूर्वोक्तोपसर्गदुस्वप्नग्रहपीडासु देवीमाहात्म्यस्य श्रवणे पठने च कृते किं फलं भवति तदाह । **उपसर्गा** इति । उपसर्गाः शमं शान्ति यान्ति । तथा दारुणाः भयावहा ग्रहपीडाश्च शमं यान्ति । नृभिर्दृष्टं दुस्वप्नं दुष्टफलदः स्वप्नः । सुस्वप्नमुपजायते शुभफलदायकः स्वप्नो भवति । स्वप्नशब्दस्य क्लीबत्वं छान्दसम् ॥ अथ **प्रसङ्गाच्छुभफलदाः स्वप्ना उच्यन्ते** । नदीसमुद्रतरणमाकाशगमनं तथा ॥ ग्रहनक्षत्रमार्तण्डचन्द्रमण्डलदर्शनम् ॥ हर्म्यस्यारोहणं चैव प्रासादशिरसोऽपि वा ॥ स्वप्ने च मदिरापानं वसामांसस्य भक्षणम् ॥ कृमिविष्ठानुलेपश्च रुधिरेणाभिषेचनम् ॥ भोजनं दधिभक्तस्य श्वेतवस्त्रानुलेपने ॥ रत्नान्याभरणादीनि स्वप्ने दृष्ट्वा सुखी भवेत् ॥ देवताविप्रपृथ्वीशान् प्रशस्ताभरणाङ्गनाः ॥ वृषेभपर्वतक्षीरिफलिवृक्षाधिरोहणम् ॥ दर्पणामिषमाल्यासि शुक्लमाल्याम्बरावृतान् ॥ दृष्ट्वा स्वप्नेऽर्थलाभःस्याद्व्याधिमोक्षश्च जायते ॥ आसने शयने याने शरीरे वाहने गृहे ॥ ज्वलमाने विबुध्येत तस्य श्रीः सर्वतोमुखी ॥ नागपत्रं लभेत्स्वप्ने कर्पूरागमनं तथा ॥ चन्दनं पाण्डुरं पुष्पं तस्य श्रीः सर्वतोमुखी ॥ सर्वाणि शुक्लान्यतिशोभनानि कार्पासभस्मौदनतक्रवर्जम् ॥ सर्वाणि कृष्णान्यतिनिन्दितानि गोहस्तिदेवद्विजवाजिवर्जम् ॥ इत्यादि ॥ १७ ॥

बालग्रहाभिभूतानां बालानां शान्तिकारकम् ॥

पुनश्च फलान्तरदातृत्वेन माहात्म्यं विशिनष्टि बालग्रहेत्यादिना । इत आरभ्य सर्वे ममैतन्माहात्म्यमित्यर्धमन्त्रान्तमेकं महावाक्यम् । मन्त्रत्रयत्वप्रयोजकान्यवान्तरवाक्यानि तु भिन्नभिन्नानि त्रीणि । कीदृशं मम माहात्म्यं बालग्रहैरभिभूतानां पीडितानां बालानां शान्तिकारकं तत्पीडापरिहारेण सुखजनकम् । तत्र बालग्रहास्तदुपसर्गलक्षणानि चोक्तानि भावप्रकाशे । स्कन्दः स्कन्दापस्मारश्च शकुनी रेवती तथा ॥ पूतना चान्धशीताद्ये उभे च मुखमण्डिका ॥ नैगमेयश्चेति नव प्रोक्ता बालग्रहा अमी ॥ स्कन्दस्तन्नामा बालग्रहोऽयम् । न कार्तिकेयः । अन्धशीताद्ये उभे पूतने अन्धपूतनाशीतपूतनाख्ये द्वे । एते शरवणस्थस्य रक्षार्थं षण्मुखस्य च ॥ सृष्टाः शिवेन पार्वत्याग्निना स्त्रीरूपधारिणः ॥ ततो मघवता स्कन्दे सुरसेनापतौ कृते ॥ उपतस्थुर्ग्रहा एते दीप्तशक्तिधरं गुहम् ॥ ऊचुः प्राञ्जलयश्चैनं वृत्तिर्नोदीयतामिति ॥ तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत् ॥ सग्रहांस्तानुवाचेदं भगवान् भगनेत्रहृत् ॥ कुलेषु येषु नेज्यन्ते देवाः पितर एव च ॥ ब्राह्मणाः साधवो वापि गुरवस्तिथयस्तथा ॥ निवृत्तशौचाचारेषु तथा कुत्सितवृत्तिषु ॥ निवृत्तभिक्षाबलिषु तेषु स्थित्वा तदर्भकान् ॥ पीडयध्वं ततो वृत्तिर्विपुला वो भविष्यति ॥ पूजा नैवेद्यबलिभिरित्युक्तास्ते तु शूलिना ॥ तत आरभ्य वृत्त्यर्थं पीडयन्ति शिशून् सदा ॥ क्षणादुद्विजते बालः क्षणादप्यतिरोदिति ॥ नखैर्दन्तैर्दारयति धात्रीमात्मानमेव च ॥ ऊर्ध्वं निरीक्षते दन्तान् खादेत्कूजति जृम्भते ॥ भ्रुवौ क्षिपति दष्टोष्ठः फेनं वमति चासकृत् ॥ क्षामश्च निशि जागर्ति शूनाङ्गो भिन्नविट्स्वरः ॥ मत्स्यशोणितगन्धश्च नचाश्नाति यथा पुरा ॥ दुर्बलो मलिनाङ्गश्च नष्टसंज्ञोऽपि जायते ॥ सामान्यं ग्रहजुष्टस्य लक्षणं समुदाहृतम् ॥ इति ॥ पुनः कीदृशं माहात्म्यम् । नृणां

सङ्घातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ १८ ॥

दुर्वृत्तानामशेषाणां बलहानिकरं परम् ॥
रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥ १९ ॥

सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ॥

पशुपुष्पार्घधूपैश्च गन्धदीपैस्तथोत्तमैः ॥

सङ्घातभेदे एककार्यप्रवृत्तानां बहूनां पुरुषाणां सङ्घातस्य केनचित् कारणेन विरोधे उत्पन्ने सति उत्तमं मैत्रीकरणम् ॥ तद्गतव्यक्तीनां श्रेष्ठतमं पुनः परस्परसख्यजननसाधनम् ॥ १८ ॥

पुनः कीदृशं माहात्म्यं अशेषाणां सर्वेषां दुर्वृत्तानां दुराचारवतां परं अत्यर्थं बलस्य सामर्थ्यस्य हानिकरं नाशकारकम् । रक्षांसि राक्षसाः । भूता रुद्रानुचराः । पिशाचा मांसाशिनस्तुच्छा भूतविशेषाः । तेषां पठनादेव नाशनम् । पठनश्रवणमात्रेणैव विनाशकम् ॥ १९ ॥

सर्वमिति । अर्धश्लोकमन्त्रोऽयम् । एतत्पूर्वोक्तं सर्वं अवतारपराक्रमस्तुत्यात्मकं मम माहात्म्यं पठनेन श्रवणेन च मम सन्निधिकारकम् मत्सामीप्यमुक्तिजनकम् । अथ वा सर्वदा मत्सहवासकरम् । यो मम माहात्म्यं नित्यं पठेच्छृणुयाद्वा तस्य सन्निधावहं सर्वदा वसामीत्यर्थः ।

अथ पाठान्तरादि सन्निधिपदस्थाने सान्निध्येति क्वचित्पाठः ॥ २० ॥

मत्प्रीत्यर्थमनुष्ठीयमानपूजाद्यन्यकर्मापेक्षया मन्माहात्म्यपठनश्रवणाभ्यामेव ममाधिका प्रीतिर्भवतीत्याह पशुपुष्पार्घेत्यादिश्लोकद्वयेन । उत्तमैः उत्कृष्टैः पशुपुष्पार्घधूपैः । पशव उपहारीक्रियमाणाः छागमेषमाहिषादयः । पुष्पाणि मत्प्रियाणि केतकीबकुलकरवीरादीनि । अर्घा अष्टाङ्गद्वादशाङ्गादय

विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ॥ २१ ॥
अन्यैश्च विविधैर्भोगप्रदानैर्वत्सरेण या ॥
प्रीतिर्मे क्रियते सास्मिन् सकृदुच्चरिते श्रुते ॥ २२॥
श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥

उपचारविशेषाः । धूपा अगरुगुग्गुल्वादयः । तैः । तथोत्तमैर्गन्धदीपैः । गन्धाश्चन्दनकस्तूरिकाकाश्मीरजादयो लेपसाधनद्रव्यविशेषाः । दीपाः दीप्तसघृतवर्तिकर्पूरादिरूपाः तैः । एतदुपलक्षितसर्वोपचारैरित्यर्थः । तथा मत्प्रीत्यर्थं क्रियमाणैर्विप्राणां भोजनैः शतसहस्रादिविप्रेभ्योऽन्नदानैः । होमैः मदुद्देशेन क्रियमाणैरयुतलक्षादिहवनैः । तथा अहनि च निशायां चाहर्निशं अविच्छेदेनेत्यर्थः । क्रियमाणैः प्रोक्षणीयैः प्रोक्षणैःपञ्चामृतजलेक्षुरसाद्यभिषेचनैः स्वार्थेऽनीयर् छान्दसः ॥

अथ पाठान्तरादि । प्रेक्षणीयैरिति पाठे दर्शनीयैर्मत्पुरतो नृत्यादिभिरित्यर्थः ॥ २१ ॥

अन्यैरिति । अन्यैरुक्तातिरिक्तैः विविधैः भोगानां भोग्यवस्तूनां प्रदानैश्च वत्सरेण वत्सरपर्यन्तं प्रत्यहं क्रियमाणैरित्यर्थः । या मे प्रीतिः क्रियते सा अस्मिन्मन्माहात्म्ये सकृदुच्चरिते पठिते श्रुते वा सति भवतीति शेषः।

अथ पाठान्तरादि भोगप्रदानैरित्यत्र भोगैः प्रदानैरिति उच्चरिते इत्यत्र सुचरिते इति च केचित्पाठः ॥ २२ ॥

एतावत्पर्यन्तं सर्वस्य देवीमाहात्म्यस्य पठनश्रवणयोः फलमुक्तम् अथ उत्पत्यादीनां तदंशानां पठनश्रवणयोः पृथक्पृथक्फलं वदन्नादावुत्पत्तीनामाह । श्रुतमिति । मम जन्मनां महाकाल्याद्यवताराणां कीर्तनं वर्णनं श्रुतं

रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ॥ २३ ॥
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥
तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते ॥ २४ ॥
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥

पठितं वा पापानि हरति। तथा आरोग्यं प्रयच्छति। तथा भूतेभ्यो हिंस्रप्राणिभ्यो रक्षां रक्षणं करोति। अथ वा श्रुतमिति भावे क्तः। तथा च मम जन्मनां श्रुतं श्रवणं पापानि हरति आरोग्यं प्रयच्छति भूतेभ्यो रक्षां करोति। एवं मम जन्मनां कीर्तनं पठनं पापानि हरतीत्यादि इति भेदेनान्वयः अर्धद्वयस्य पृथगन्वयो वा। जन्मनामित्यस्योभयत्र सम्बन्धः ॥ २३ ॥

अथ पराक्रमश्रवणपठनयोः फलमाह **युद्धेष्विति**। यत् मे मया युद्धेषु दुष्टदैत्यानां निबर्हणं हिंसनं चरितं आचरितम्। अथ वा युद्धेषु दुष्टदैत्यनिबर्हणरूपं यन्मे चरितं चरित्रम् तस्मिन् श्रुते पठिते च सति शृण्वतां पठतां च पुंसां वैरिकृतं भयं न जायते ॥ २४ ॥

अथ देवीमाहात्म्यगतस्तुत्यंशश्रवणपठनयोः फलमाह **युष्माभिरिति** याश्च युष्माभिर्देवैः कृताः नमो देव्यै महादेव्यै इत्याद्याः पञ्चमाध्यायस्थाः देवि प्रपन्नार्तिहरे प्रसीदेत्याद्या एकादशाध्यायस्थाश्च स्तुतयः। याश्च ब्रह्मर्षिभिः कृताः देव्या यया ततमिदमित्याद्याश्चतुर्थाध्यायस्थाः स्तुतयः। महिपान्तकरीसूक्तं दृष्टं देवैर्महर्षिभिरिति **लक्ष्मीतन्त्रोक्ते**स्तासां महर्षिकृतत्वम्। अत्र देवानामपि स्तो तृत्वेऽपि पूर्वोक्तस्तुतिभ्यो भेददर्शनाय केवलब्रह्मर्षीणामेव ग्रहणम्। लक्ष्मीतन्त्रे दृष्टमित्युक्तिः सूक्तस्याकृतकत्वदर्शनार्था। याश्च ब्रह्मणा कृताः त्वं स्वाहा त्वं स्वधेत्याद्याः प्रथमाध्यायस्थाः

ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् ॥२५॥
अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥
दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ॥२६॥
सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥
राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा ॥२७॥

अत्र सर्वत्र स्तुतय इति बहुवचनं सर्वस्तुतिषु प्रतिश्लोकं पृथक् पृथक् स्तुतिरूपत्वाभिप्रायेण । तास्तु स्तुतयः श्रुताः पठिताश्च शुभां मतिं सद्बुद्धिं आत्मज्ञानं वा प्रयच्छन्ति । मन् ज्ञाने स्त्रियाम्, क्तिन् । ज्ञानस्य शुभत्वं च मोक्षहेतुत्वात् ॥

अथ पाठान्तरादि । तास्त्वित्यत्र यास्ता इति याश्चेति वा ताश्चेति वा शुभां मतिमित्यत्र परां गतिमिति च क्वचित् पठ्यते ॥ २५ ॥

अथ पठनश्रवणयोरसम्भवे माहात्म्यस्य मनसा चिन्तनमपि सर्वपीडापरिहारकमित्याह अरण्ये प्रान्तरे इत्यादि श्लोकचतुष्टयेन । अरण्ये दावाग्निना वनानलेन परिवारितः परिवेष्टितो वापि प्रान्तरे दूरनिर्जनेऽध्वनि दस्युभिश्चौरैर्वृतो वापि शून्ये निर्जनस्थाने शत्रुभिर्गृहीतो वापि । इत आरभ्य श्लोकचतुष्टयात्मकमेकं वा वाक्यम् । तथापि अवान्तरवाक्यभेदात् प्रतिश्लोकं भिन्नं मन्त्रत्वम् ॥ २६ ॥

सिंहेति । वने सिंहेन वा व्याघ्रेण वानुयातः हिंसितुं कृतानुधावनः । वनहस्तिभिर्वनगजैरनुयातो वा । क्वचिदेकदेशस्याप्यनुवृत्तिर्भवति । क्रुद्धेन राज्ञा अद्यैव मद्राष्ट्राद्बहिर्गच्छेत्यादिरूपनिर्दयप्रकारेणाज्ञप्तो वा । वध्यो वधस्थानं नीयमानो वा । बन्धगतः कारागृहनिरुद्धोऽपि वा । यत्र वा शब्दो नास्ति तत्राध्याहार्यः ॥ २७ ॥

आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥
पतत्सु चापि शस्त्रेषु सङ्ग्रामे भृशदारुणे ॥ २८ ॥

सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥
स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात् ॥ २९ ॥

मम प्रभावात् सिंहाद्या दस्यवो वैरिणस्तथा ॥

आघूर्णित इति । महार्णवे पोते नावि स्थितः सन् वातेनाघूर्णितो नौकान्दोलनेन प्रचलायितः अथवा समुद्रवायुना यत्र कुत्रापि नीतः । शस्त्रेषु पतत्स्वपि च भृशदारुणे अतिभीषणे सङ्ग्रामे स्थितो वा ॥

अथ पाठान्तरादि । इत उत्तरं महासर्पेण दष्टो वा विद्धो वा वृश्चिकेन चेत्यर्धमधिकं क्वचित् पठ्यते ॥ २८ ॥

सर्वेति । घोरासु उग्रासु । सर्वाश्च ता आबाधाश्च सर्वाबाधाः दुश्चिकित्स्यज्वरादिरुजः तासु । वेदनाभिः तोदभेदशूलदाहादिदुखैः अभ्यर्दितः पीडितो वा नरः । मम एतच्चरितं माहात्म्यं स्मरन् पठनश्रवणयोरनवकाशान्मनसा चिन्तयन्नपि सङ्कटात् एतावत्पर्यन्तमुक्ताद्दावानलादिसङ्कटात् मुच्येत मुक्तो भवेत् ॥ २९ ॥

ननु माहात्म्यश्रवणपठनपुण्यप्रभावात् अरण्ये प्रान्तरे इत्यादिसार्धश्लोकत्रयोक्तसङ्कटेषु अरण्ये दावाग्निपरिवारितस्याकस्माद्वृष्ट्युदयेन तत्सङ्कटान्मुक्तिः । राज्ञो दयोदयेन राष्ट्रान्निर्वासितस्य वध्यस्य बन्धगतस्य च तत्सङ्कटान्मुक्तिः । महार्णवे पोते स्थितस्य वातेनाघूर्णितस्य वायुप्रशमनेन तत्सङ्कटान्मुक्तिः । शस्त्रेषु पतत्सु भृशदारुणे सङ्ग्रामे स्थितस्य सन्ध्यादिभिः युद्धोपशमेन स्वजयेन वा तत्सङ्कटान्मुक्तिः । एवं घोरासु सर्वाबाधासु औषधादिना रोगोपशमे वेदनादिसङ्कटान्मुक्तिरित्येतत् सर्वं सम्भवति परन्तु

दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ ३० ॥

ऋषिरुवाच ॥ ३१ ॥

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥
पश्यतामेवं देवानां तत्रैवान्तरधीयत ॥ ३२ ॥

तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा ॥

सिंहादिपशूनां विवेकाभावेन दस्यूनां धनलोभेन शत्रूणां बहुकालानुवृत्तविद्वेषेण च दयोदयासम्भवात् तत्सङ्कटात्कथं मुक्तिरित्याशङ्कायां तद्विषये विशेषात् पुनराह । ममेति । मम प्रभावात् ममाचिन्त्यसामर्थ्यात् । सिंहाद्याः पूर्वोक्ताः सिंहव्याघ्रवनहस्तिनः । दस्यवश्चौराः । तथा वैरिणः शत्रवश्च । मम चरितं स्मरतः मन्माहात्म्यं मनसा चिन्तयतः पुरुषात् भयेन दूरादेव दूरमेव पलायन्ते । स्मरत इति दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामिति पञ्चमी षष्ठी वा । दूरादिति तु दूरान्तिकार्थेभ्यो द्वितीया चेति वैकल्पिकी पञ्चमी॥ ३० ॥

ऋषिरिति ॥ ३१ ॥

इतीति । चण्डस्तीव्रो विक्रमः पराक्रमो यस्याः सा चण्डविक्रमा । चण्डस्तीव्रेऽतिकोपने इति हैमः । भगवती सर्वैश्वर्यसम्पन्ना । सा चण्डिका । इति पूर्वोक्तप्रकारेण देवानुक्त्वा देवानां पश्यतामेव देवेषु पश्यत्स्वेव । तत्रैव अवस्थानस्थले एव नान्यत्र गत्वेत्यर्थः । अन्तरधीयत अन्तर्हिताभूत् अन्तर्धानं चादर्शन । कर्मकर्तरि लङ् ।

अथ पाठान्तरादि पश्यतामेवेत्यत्र पश्यतां सर्वेतिपाठः क्वचित् ॥३२॥

कथाशेषमाह तेऽपीति । ते पूर्वं हृताधिकारा हृतयज्ञभागाश्च सर्वे देवा अपि विनिहताः अरयो येषान्ते विनिहतारयः । अत एव निरातङ्का

यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ॥ ३३ ॥

दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ॥
जगद्विध्वंसके तस्मिन् महोग्रेऽतुलविक्रमे ॥ ३४ ॥

निशुम्भे च महावीर्ये शेषाः पातालमाययुः ॥ ३५ ॥

एवं भगवती देवी सा नित्यापि पुनः पुनः ॥
सम्भूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥

निर्भयाः सन्तः । आतङ्को रुजि शङ्कायां सन्तापे च भयेऽपि चेति **हैमः** । यथा पुरा पूर्ववत् । यज्ञभागान् भुञ्जते इति यज्ञभागभुजः यज्ञे तु स्वं स्वं हविर्भागं भुञ्जानाः सन्तः स्वाधिकारान् स्वस्वाधिकारकर्माणि चक्रुः ॥ ३३ ॥

शुम्भवधानन्तरं देवानां स्थितिमुक्त्वाथ दैत्यानामाह **दैत्याश्चेति** सार्धश्लोकेन । देवरिपौ जगद्विध्वंसके त्रैलोक्यपीडाकरे अतुलविक्रमे महोग्रे तस्मिन् शुम्भे देव्या युधि निहते सति शेषाः दैत्याश्च पातालमाययुरित्युत्तरमन्त्रस्थवाक्यस्यापकर्षेणान्वयपूर्तिः ॥ ३४ ॥

निशुम्भे चेति । अर्धश्लोकमन्त्रोऽयम् । महावीर्ये निशुम्भे च पूर्वश्लोकाद्देव्या निहते सति इत्यस्यानुवृत्तिः । शेषाः हतावशिष्ठा दैत्याः पातालमाययुः जग्मुः । सर्वदैत्यानां पातालस्य मूलनिवासस्थानत्वादिति भावः॥३५॥

प्रथमाध्याये नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥ तथापितत्समुत्पत्तिर्बहुधा श्रूयतां ममेत्यादिनोपक्रान्तमवतारचरितकथनमुपसंहरति एवमिति । हे भूप राजन् सुरथ । सा भगवती देवी नित्यापि उत्पत्तिविनाशशून्यापि एवं पूर्वोक्तप्रकारेण पुनः पुनः सम्भूय दशभुजाष्टादशभुजाष्टभुजादिरूपैरवतीर्य जगतः परिपालनं कुरुते ॥ ३६ ॥

तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३७ ॥

व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ॥
महाकाली महादेवी महामारीस्वरूपया ॥ ३८ ॥

तयेति । तया देव्या एतद्विश्वं मोह्यते । सा देव्येव विश्वं प्रसूयते जनयति षूञ् प्राणिप्रसवे दिवादिः । सा तुष्टा ऋद्धिमैश्वर्यं प्रयच्छति ददाति । याचिता च प्रार्थिता सती विज्ञानं ब्रह्मात्मैक्यसाक्षात्कारमपि प्रयच्छति ब्रह्मात्मैक्यसाक्षात्कारस्यात्यन्तदुर्लभत्वेन याचनाभावे तद्दानस्याप्रसङ्गात् याचिता सतीत्युक्तम् । अयाचितेति वा च्छेदः । निष्कामाराधितेति तदर्थः । तुष्टा ऋद्धिमित्यत्र संहिताया अविवक्षितत्वान्न सन्धिः ॥

अथ पाठान्तरादि ऋद्धिमित्यत्र वृद्धिमिति क्वचित् पठ्यते ॥ ३७ ॥

व्याप्तमिति । हे मनुजेश्वर नराधिप सुरथ । महाकाली महादेवी महामारीस्वरूपया । महान् सर्वाधिकः कालो जीवितकालो यस्य स महाकालः परार्धद्वयजीवी ब्रह्मा तस्य शक्तिः जगत्सृष्टिकर्त्रीत्यर्थः । तथा महान् सर्वदेवश्रेष्ठः देवः महादेवो विष्णुः । तच्छक्तिर्महादेवी जगत्स्थितिकर्त्रीत्यर्थः । मारयति संहरतीति मारः । महान् सर्वाधिको मारो महामारः । जगत्संहारको रुद्रः । तस्य शक्तिर्महामारी जगत्संहारकर्त्रीत्यर्थः । सर्वत्र पिप्पल्यादेराकृतिगणत्वान् ङीष् । एतत्त्रितयस्वरूपया तया देव्या एतत् सकलं ब्रह्माण्डं व्याप्तम् ॥

अथ पाठान्तरादि तृतीयपादे महादेव्या महाकाल्येति । महाकाल्या महाकाले इति वा क्वचित् पाठः ॥ ३८ ॥

सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥
स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९ ॥
भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥
सैवाभावे तथा लक्ष्मीर्विनाशायोपजायते ॥ ४० ॥
स्तुता सम्पूजिता पुष्पैर्गन्धधूपादिभिस्तथा ॥
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् ॥४१॥

उक्तार्थमेव स्फुटयति सैवेति । न जायते इत्यजा जन्मशून्येत्यर्थः एतादृशी सैव देव्येव सृष्टिकाले सृष्टिः सृष्टिकर्त्री भवति सृष्टिकर्त्र्यां सृष्टिपदप्रयोगः कार्यकारणयोरभेदात् । सनातनी सदा विद्यमाना सनातनी । मरणशून्येत्यर्थः । सनेति सातत्यार्थेऽव्ययं । तस्माद्भवार्थे ट्युलि टित्वान् ङीष् । सैव भूतानां प्राणिनां स्थितिं अवस्थानं पालनमित्यर्थः । करोति । सैव काले संहारकाले महामारी संहारकर्त्री भवति ॥ ३९ ॥

भवेति । सैव देव्येव । भवकाले । कल्याणकाले कल्याणेऽपि भवः प्रोक्त इति शाश्वतः । नृणां गृहे वृद्धिप्रदा सर्वसमृद्धिकरी लक्ष्मीरुपजायते । सम्पद्रूपेण तिष्ठतीत्यर्थः सैव देव्येव अभावे अकल्याणकाले कल्याणाभावकाले इत्यर्थः । विनाशाय समृद्धिविनाशार्थम् । अलक्ष्मीरुपजायते दारिद्र्यरूपा भवतीत्यर्थः ॥४०॥

विनाशकालेऽपि स्तुत्यादिभिः प्रसादिता सती अभ्युदयदा भवतीत्याह स्तुतेति । स्तुता तथा । पुष्पैर्गन्धधूपादिभिः । आदिपदेन दीपनैवेद्यादिभिरुपचारैश्च सम्पूजिता सती । वित्तं धनम् । पुत्रान् । धर्मे मतिं बुद्धिम् । शुभां गतिं मोक्षं च ददाति ॥

अथ पाठान्तरादि गन्धधूपादिभिरित्यत्र धूपगन्धादिभिरिति गतिमित्यत्र तथेति क्वचित् पाठः ॥ ४१ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे
देवीमहात्म्ये देवीवाक्यं नाम द्वादशोऽध्यायः ॥ १२ ॥

इतीति । देव्याः वाक्यं देवीवाक्यम् । नामेति प्रसिद्धौ । देवीवाक्यमितिप्रसिद्ध इत्यर्थः । पञ्चत्रिंशदक्षरात्मकमिदं द्वादशाध्यायवाक्यम् ।

इति चण्डिकोपास्तिदीपिकायां चण्डिस्तवार्थ-
प्रकाशे द्वादशाध्यायव्याख्या ॥ ११ ॥

द्वादशाध्यायः समाप्तः

अथ त्रयोदशोऽध्यायः ॥

ऋषिरुवाच ॥ १ ॥

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ॥ २ ॥

ऋषिरिति । अथादौ त्रयोदशाध्यायमन्त्रविभागकारिकाः ॥ त्रयोदशे ऋषिरुवाचेत्येको गद्यमन्त्रकः ॥ एतत्ते कथितं भूपेत्यर्धश्लोकात्मको मनुः ॥ एवं प्रभावासेत्याद्याः त्रयः स्युः श्लोकमन्त्रकाः ॥ मार्कण्डेय उवाचेति गद्यात्मा मनुरेककः ॥ इति तस्येत्यादयस्तु श्लोकमन्त्राश्च षट् स्मृताः ॥ देव्युवाचेति च तत एको गद्यात्मको मनुः ॥ यत्प्रार्थ्यते त्वया भूपेत्येकःश्लोकमनुर्मतः ॥ ततो मार्कण्डेय उवाचेति गद्यात्मको मनुः ॥ ततो वव्रे सोऽपि वैश्य इति द्वौ श्लोकमन्त्रकौ ॥ ततश्च देव्युवाचेति गद्यात्मा मनुरीरितः ॥ स्वल्पैरहोभिरित्याद्या मन्त्रा अर्धात्मकाश्च षट् ॥ मार्कण्डेय उवाचेति मन्त्रो गद्यात्मकस्ततः ॥ इति दत्वा तयोरेवं देव्या वरमिति द्वयोः ॥ श्लोकयोः पुनरुच्चारात् श्लोकमन्त्रचतुष्टयम् ॥ एवं स्युरेकोनत्रिंशत्सर्वे मन्त्रास्त्रयोदशे ॥ षोडशश्लोकमन्त्राः स्युस्तत्र द्वौ पुनरुक्तकौ ॥ सप्तार्धश्लोकमन्त्राश्च गद्यमन्त्राश्च षण्मताः ॥ श्लोकास्तु सर्वेऽध्यायेऽस्मिन् सार्धाः सप्तदश स्मृताः ॥ इति ॥ अथ मन्त्रव्याख्या ऋषिरुवाचेति ॥ १ ॥

राज्ञः भगवन् का हि सा देवीत्यादि प्रथमाध्यायगतश्लोकद्वयात्मकप्रश्नानुरोधेनैतावत्पर्यन्तं देव्या उत्पत्तिस्वरूपप्रभावाद्यात्मकं चरित्रत्रयरूपं माहात्म्यमुपवर्ण्याथोपसंहरति ऋषिरेतत्त इत्यादिना । तत्र प्रथमोऽधश्लोकमन्त्रः ॥ हे भूप राजन् सुरथ । एतदुत्तमं सर्वार्थसाधकं देवीमहात्म्यं देव्या उत्पत्तिस्वरूपप्रभावस्तुत्याद्यात्मकं चरितत्रयं ते तुभ्यं कथितम् ॥ २ ॥

एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥
विद्या तथैव क्रियते भगवद्विष्णुमायया ॥३॥
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥

एवमिति । सा देवी । एवंभूतः पूर्वोक्तस्वरूपः प्रभावः सामर्थ्यं यस्याः सा एवं प्रभावास्ति । यया इदं जगद्धार्यते महीरूपत्वादिति भावः । उक्तं हि पूर्वम् । आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासीति । किञ्च भगवद्विष्णुमायया तथैव विद्या, ब्रह्मात्म्यैक्यज्ञानं क्रियते स्वोपासकेभ्यः प्रतिपाद्यते । भगवद्विष्णुमायेति वा भगवतो विष्णोर्मायेति वा व्याख्येयम् । आद्ये भगवतीपदस्य कर्मधारयसमासपूर्वपदत्वात्पुंवद्भावः । विष्णुमायापदं **पञ्चमाध्याये** व्याख्यातम् ॥ ३ ॥

प्रथमाध्याये तत् किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥ इति राज्ञः प्रश्नात् ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ॥ इत्युपक्रम्य ज्ञानिनामपि चेतांसि देवी भगवती ही सा ॥ बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ इत्यन्तेन ग्रन्थेनोक्तमर्थमुपसंहरति । **तयेति** । तया देव्या कर्त्र्या विवेकी त्वं सुरथः । विवेकी एष वैश्यः समाधिः । तथैव अन्ये विवेकिनो जनाश्च । सर्वे यूयं सम्प्रति मोह्यन्ते मोह्यध्वे । प्राक् च मोहिता आस्त । अग्रे च तयैव हेतुभूतया मोहमेष्यन्ति । मोहमेष्यथ । अत्र त्यदादीनि सर्वैर्नित्यमिति च **वार्तिकेन** युष्मच्छब्दशेषे क्रियापदानां बहुवचनान्तत्वान्तस्य यूयमिति प्रथमाबहुवचनान्तत्वेन विपरिणामे तत्सामानाधिकरण्यार्थं क्रियापदानां मध्यमपुरुषान्तत्वे अपेक्षिते व्यत्ययेन छान्दसः प्रथमपुरुषः ॥ अत्र स्पष्टबोधार्थं वाक्यभेदः प्रदर्श्यते । तया देव्या कर्त्र्या सम्प्रति **विवेकी** त्वं सुरथो मोह्यसे । एष वैश्यः समाधिर्मोह्यते तथैव अन्ये विवेकिनश्च मोह्यन्ते ॥ त्वं प्राग्विमोहित आसीः । एष वैश्यो विमोहित

मोह्यते मोहिताश्चैव मोहमेष्यन्ति चापरे ॥ ४ ॥

तामुपेहि महाराज शरणं परमेश्वरीम् ॥
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ ५ ॥

मार्कण्डेय उवाच ॥ ६ ॥

इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥

आसीत् । अन्ये विवेकिनो मोहिता आसन् । एवमग्रेऽपि तयैव हेतुभुतया त्वं मोहमेष्यसि एष वैश्यो मोहमेष्यति । अपरे विवेकिनश्च मोहमेष्यन्ति ॥ इति ॥ ४ ॥

तर्हि मोहनिवृत्तये किं कर्तव्यं तदाह तामिति । हे महाराज सुरथ मोहनिवृत्यर्थं तां परमेश्वरीं चण्डिकां शरणं रक्षित्रीम् । शरणशब्दो नित्यनपुंसकलिङ्गः । शरणं गृहरक्षित्रोरित्यमरः । उपेहि गच्छ । उपेहीत्युपपूर्वस्येणो रूपम् । आद्गुणः । आङ् सहितत्वे तु ओमाङोश्चेति पररूपम् । सैव चण्डिकैव आराधिता उपासिता सती नृणां भुज्यन्ते इति भोगा ऐहिकराज्यादयः । स्वर्गो देवलोकः । अपवर्गो मोक्षः तान् ददातीति भोगस्वर्गापवर्गदा । भवतीति शेषः । तस्मादेषु यत्तत्राभीष्टं तल्लिप्सया तामुपास्वेति भावः ॥

अथ पाठान्तरादि उपैहीति वृद्धिगर्भं क्वचित् पठ्यते स प्रमादः । अस्य श्लोकस्यार्धद्वयमध्ये स्तुतां देवैश्च गन्धर्वैर्ऋषिभिश्च मुमुक्षुभिरित्यर्धमधिकं क्वचित् पठ्यते ॥ ५ ॥

मार्कण्डेय इति । क्रौष्टुकिभागुरिं प्रतीति शेषः । समाप्तोऽत्र राजर्ष्योः संवादः ॥ ६ ॥

इत उत्तरं भगवान् मार्कण्डेयः सुरथवैश्ययोरितिहासशेषमाह ।

प्रणिपत्य महाभागस्तमृषिं संशितव्रतम् ॥ ७ ॥
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ॥
जगाम सद्यस्तपसे स च वैश्यो महामुने ॥ ८ ॥
सन्दर्शनार्थमम्बाया नदीपुलिनमास्थितः ॥

इति **तस्येत्यादिना**। स नराधिपो राजा सुरथः। इति पूर्वोक्तं तस्य सुमेधोमुनेर्वचः श्रुत्वा। भगानां धर्मज्ञानवैराग्याणां समूहो भागम्। भगं ज्ञानविरागश्रीधर्ममाहात्म्यकीर्तिष्विति **शब्दार्णवः**। महत् भागं यस्य स महाभागस्तं धर्मज्ञानवैराग्यातिशयसम्पन्नमित्यर्थः। संशितं तीक्ष्णं–प्रखरमित्यर्थः व्रतं ब्रह्मचर्यं यस्य तं संशितव्रतम्। शो तनूकरणे क्तः। तं ऋषिं सुमेधसं प्रणिपत्य साष्टाङ्गं नमस्कृत्य। उत्तरश्लोकेन पूर्णोऽन्वयः॥

अथ पाठान्तरादि। ऋषिमित्यत्र मुनिमिति। संशितेत्यत्र शंसितेति च क्वचित् पाठः॥ शंसु स्तुतौ ॥ ७ ॥

निर्विण्ण इति। राज्यस्य अपहरणेन शत्रुकृतेन निर्विण्णः निर्वेदंप्राप्तः सन् सद्यस्तस्मिन्नेव क्षणे तपसे तपोऽर्थं जगाम। नदीतीरमिति शेषः। स वैश्यः समाधिश्च भार्यापुत्रादिष्वतिममत्वेन निर्विण्णः सन् सद्यस्तपसे जगाम। इति भेदेनान्वयः। महामुने इति मार्कण्डेयकृतं भागुरेः सम्बोधनम्॥

अथ पाठान्तरादि महामुने इत्यत्र महामतिरिति क्वचित् पाठः। सद्वैश्यविशेषणम् ॥ ८ ॥

राजवैश्यौ नदीतीरं गत्वा किं चक्रतुस्तदाह **सन्दर्शनार्थमिति**। राजा नद्याः पुलिनं तोयत्यक्तप्रदेशं आस्थित आश्रितः सन् अम्बाया जगन्मातुश्चण्डिकायाः सन्दर्शनार्थं प्रत्यक्षदर्शनार्थं परं सर्वस्तोत्रोत्तमं देवीसूक्तं नमो देव्यै महादेव्यै इति त्रिंशच्छ्लोकात्मकं स्तवं जपंस्तपस्तेपे शरीरशोषकरं

स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ ९ ॥
तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥१०॥
निराहारौ यतात्मानौ तन्मनस्कौ समाहितौ ॥

कृच्छ्रचान्द्रायणादिव्रतं चक्रे । तपः कृच्छ्रादि कर्म चेत्यमरः । तपस्तपःकर्मकस्यैवेत्यात्मनेपदम् । तथा स वैश्यश्च नद्याः पुलिनमास्थितः सन् अम्बायाः सन्दर्शनार्थं देवीसूक्तं जपंस्तपस्तेपे इति पूर्ववद्भेदेनान्वयः । अत्र देवीसूक्तं नमो देव्यै महादेव्यै इति पञ्चमाध्यायस्थम् । नमो देव्यादिकं देवीसूक्तं सर्वार्थसिद्धिदम् ॥ यज्जप्त्वा वैश्यसुरथौ परां सिद्धिमवापतुः ॥ इति लक्ष्मीतन्त्रोक्तेः । एतेन देवीमाहात्म्यस्य सम्पुटीकरणेऽस्यैव पठनं कार्यमिति न भ्रमितव्यम् । तत्र रात्रिसूक्तं प्रतिऋचं तथा देव्याश्च सूक्तकम् । इति होमविधायकमरीचिकल्पीयवचने सूक्तानामृक्शब्देनाभिधानाद्वैदिकेतरमन्त्राणामृक्शब्देनाभिधानस्याप्रसिद्धत्वात् । तत्र वैदिकयोरेव रात्रिसूक्तदेवीसूक्तयोर्ग्रहणमिति निर्णीतमेव जपप्रकाशे ॥ ९ ॥

ताविति । तौ राजवैश्यौ । तस्मिन् पूर्वोक्ते पुलिने देव्याः महीमयीं मृत्तिकामयीमित्यर्थः । विकारे मयट् । मूर्तिं प्रतिमां कृत्वा । तस्याः पुष्पाणि च धूपश्चाग्नितर्पणं च तैः । अग्नितर्पणं पूजाङ्गहोमः । पुष्पधूपाग्नितर्पणोपलक्षितैःसर्वोपचारैरित्यर्थः । अर्हणां पूजां चक्रतुः । पूजा नमस्यापचितिः सपर्या चार्हणाः समा इत्यमरः ॥ १० ॥

निराहाराविति । निराहारौ अनशनौ । यतमानौ जितचित्तौ जितेन्द्रियौ वा । आत्मा चित्ते धियां जीवे परमात्मनि चेन्द्रिये इति शब्दार्णवः । तस्यां देव्यामेव मनो ययोस्तौ तन्मनस्कौ । समाहितौ

ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥११॥

एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥ १२ ॥

देव्युवाच ॥ १३ ॥

यत् प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ॥

अव्यग्रौ । तौ सुरथसमाधी । निजगात्रस्य स्वशरीरस्य असृजा रक्तेनोक्षितं सिक्तं बलिमुपहारं चैव ददतुः । तयोरब्राह्मणत्वेन स्वगात्ररुधिरबलिदानस्यानिषेधादिति भावः । तुण्डजो बाहुजो वापि रक्तमांसमयं बलिम् । भक्त्यावेशान्महाशूरो महामायार्थमुत्सृजेत् । इति वचनं ते शिष्टसम्मतं । स्वगात्ररुधिरं दत्वा ब्राह्मणो ब्रह्महा भवेदिति ब्राह्मणविषये महाप्रत्यवायोक्तेः ॥
अथ पाठान्तरादि यतात्मानावित्यत्र यताहाराविति क्वचित् पाठः॥११॥

एवमिति । एवं समाराधयतोः पूजयतोः यतात्मनोर्वशीकृतमनसो- राजवैश्ययोः त्रिभिर्वर्षैः वर्षत्रयानन्तरमित्यर्थः परितुष्टा प्रसन्ना जगद्धात्री जगन्माता चण्डिका अक्ष्णः पुरः प्रत्यक्षम् । प्रतिपरसमनुभ्योऽक्ष्णः इति टच् । प्रादुर्भूयेति शेषः । प्राह उक्तवती । भूते लट् छान्दसः । अव्ययं वैतत् ॥ १२ ॥

देवीति । पूर्वश्लोके प्राहेत्यस्य सत्वादनपेक्षितोऽप्ययमुवाच मन्त्रोऽत्रास्त्येव ॥ कात्यायनीतन्त्रे गृहीतत्वात् ॥ १३ ॥

यदिति । हे भूप राजन् सुरथ । त्वया यत् प्रार्थ्यते इष्यते । तत्सर्वं मत्तः मत्सकाशात् प्राप्यतां लभ्यताम् । हे कुलनन्दन सत्कुलोत्पन्न वैश्य

मत्तस्तत् प्राप्यतां सर्वं परितुष्टा ददाम्यहम् ॥ १४ ॥

मार्कण्डेय उवाच ॥ १५ ॥

ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ १६ ॥

सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥

त्वया च यत् प्रार्थ्यते तत्सर्वमित्यादिप्राग्वत् । परितुष्टा प्रसन्ना अहं ददामि इति वाक्यभेदेनान्वयः ॥

अथ पाठान्तरादि प्राप्यतामित्यत्र प्रार्थ्यतामिति पाठो न साधुः । अहमित्यत्र ते इति वामिति तदिति वा क्वचित् पाठः ॥ १४ ॥

मार्कण्डेय इति ॥ १५ ॥

तत इति । ततो नृपः सुरथः । अन्यजन्मनि भाविजनने । अविभ्रंशि यावदायुरुपभोग्यमित्यर्थः । राज्यं सावर्णिकमन्वन्तराधिपत्यम् । तथा अत्र च अस्मिन् जन्मनि तु । बलात् स्वसामर्थ्येन हतं राज्यप्राप्त्यर्थं शत्रुबलं शत्रुसैन्यं यस्मिन्नेवंभूतं शत्रुहतं निजं राज्यं वव्रे ययाचे इत्यर्थः । अत्र भविष्यतोऽपि शत्रुबलहननस्य राज्यप्राप्त्यपेक्षया पूर्वकालिकत्वाद्धन्तेर्भूते क्तः । हतो वा प्राप्स्यसि स्वर्गमित्यादिवत् ॥ १६ ॥

सोऽपीति । ततः राज्ञो वरार्थनानन्तरम् । ममेत्यहमिति प्राज्ञः—पुत्रदारादिषु ममेति स्वशरीरे अहमिति च योऽभिमानस्तस्य प्राज्ञः तत्परिणामदुःखं जानन्नित्यर्थः । अत एव निर्विण्णं संसाराद्विरक्तं मानसं यस्यैवंविधः स वैश्योऽपि । सङ्गो ममाहमिति सम्बन्धः तस्य विच्युतिर्नाशस्तत्कारकं ज्ञानमद्वैतज्ञानं वव्रे ॥

ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥१७॥

देव्युवाच ॥ १८ ॥

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥१९॥

हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥२०॥

मृतश्च भूयः सम्प्राप्य जन्मदेवाद्विवस्वतः ॥२१॥

अथ पाठान्तरादि । प्राज्ञपदस्याविसर्गान्तत्वेन पाठे ममेत्यहमित्यभिमानाभ्यां हेतुभूताभ्यां प्रकर्षेण ये अज्ञास्संसारासक्तास्तेषां सङ्गविच्युतिकारकमिति योजना ॥ १७ ॥

देवीति ॥ १८ ॥

स्वल्पैरिति । इत आरभ्य क्रमेण षडर्धमन्त्राः । तत्र प्रथममन्त्रस्य व्याख्या यथा हे नृपते राजन् । भवान् स्वल्पैरत्यल्पसङ्ख्याकैरहोभिर्दिनैः स्वमात्मीयं राज्यं यत् शत्रुभिर्हृतं तत् । प्राप्स्यते लप्स्यते ॥

अथ पाठान्तरादि स्वराज्यमिति समस्तपाठोऽपि क्वचित् ॥ १९ ॥

हत्वेति । रिपून् हत्वा प्रत्याहृते इति शेषः तत्र राज्ये तव अस्खलितं अस्खलनं यावज्जीवमविच्युतिरित्यर्थः भविष्यति । स्खल सञ्चलने भावे क्तः ॥ २० ॥

मृतश्चेति । मृतश्च मरणानन्तरमित्यर्थः । भूयः पुनः विवस्वतः देवात् सूर्यात् जन्म सम्प्राप्य स्थित इति शेषः । उत्तरमन्त्रेण पूर्णान्वयः ॥ २१ ॥

सावर्णिको नाम मनुर्भवान् भुवि भविष्यति ॥२२॥
वैश्यवर्य त्वया यश्च वरो मत्तोऽभिवाञ्छितः ॥२३॥
तं प्रयच्छामि संसिध्द्यै तव ज्ञानं भविष्यति ॥२४॥

मार्कण्डेय उवाच ॥ २५ ॥

इति दत्वा तयोर्देवी यथाभिलषितं वरम् ॥

सावर्णिक इति । भवान् भुवि सावर्णिरेव सावर्णिकः । स्वार्थे कन् । सावर्णिपदं प्रथमाध्याये व्याख्यातम् । नामेति प्रसिद्धावव्ययम् । सावर्णिक इति प्रसिद्ध इत्यर्थः । मनुः एकसप्ततिदिव्यमहायुगपरिमितकालाधिकरणकाविच्छिन्नसर्वपृथ्वीसाम्राज्याधीश्वरः भविष्यति ॥

अथ पाठान्तरादि नाम मनुरित्यत्र मनुर्नामेति व्यत्यासेनापि पाठः क्वचित् ॥ २२ ॥

एवं राज्ञे वरं दत्वाथ वैश्याय दत्ते **वैश्यवर्येति** । हे वैश्यवर्य वैश्यश्रेष्ठ । श्रेष्ठत्वं च ज्ञानार्थित्वात् । त्वया मत्तः मत्सकाशात् यश्च वरोऽभिवाञ्छितोऽभीप्सितः तमित्युत्तरमन्त्रेण पूर्णान्वयः ॥

अथ पाठान्तरादि मत्त इत्यत्रास्मत्त इति केचित् पठन्ति तन्न साधु । उत्तरमन्त्रे प्रयच्छामीति क्रियापदस्यैकवचनान्तत्वात् ॥ २३ ॥

तमिति तं वरं प्रयच्छामि । तव संसिद्धये मोक्षार्थं ज्ञानं आत्मज्ञानं भविष्यति ॥ २४ ॥

मार्कण्डेय इति ॥ २५ ॥

इतीति। देवी चाण्डिका इति पूर्वोक्तप्रकारेण । तयो राजवैश्ययोः । शेषे षष्ठी । राज्ञे वैश्याय चेत्यर्थः । यथाभिलषितं तदिच्छानुसारेण । यथार्थेऽ

बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ २६ ॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ २७ ॥
इति दत्वा तयोर्देवी यथाभिलषितं वरम् ॥
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्ठुता ॥२८॥

व्ययीभावः । अभिलषितमनतिक्रम्येति विग्रहः । वरं वरान् राज्ञे वरद्वयं वैश्याय चैकं वरं दत्वा । ताभ्यां राजवैश्याभ्यां भक्त्याभिष्ठुता सम्मुखं स्थित्वा स्तुता सती सद्यः स्तुतिसमाप्तिक्षणे एव अन्तर्हिता अदृश्या बभूव ॥ २६ ॥

प्रथयाऽध्याये सावर्णिः सूर्यतनयइत्यादिश्लोकद्वयेनोपक्रान्तं सावर्णेर्मनुत्वप्राप्तिप्रकारवृत्तान्तमुपसंहरति **एवमिति** । क्षत्रियर्षभः क्षत्रियश्रेष्ठः सुरथः । देव्याश्चण्डिकायाः सकाशात् एवं पूर्वोक्तप्रकारेण वरं लब्ध्वा तदनुसारेण शत्रुहृतं स्वराज्यं पुनः प्राप्य यावज्जीवमुपभुज्य चेति शेषः । ततो देहान्ते अष्टममन्वन्तरे सूर्याज्जन्म समासाद्य प्राप्य सावर्णिः सावर्णिनामा मनुः अष्टममन्वन्तराधिपतिः भविता भविष्यति ॥ देवी माहात्म्यारम्भे सूर्यपुत्रस्य सावर्णेर्मनुत्वप्राप्तिप्रकारकथनमात्रस्य प्रतिज्ञातत्वात्तावन्मात्रस्यैवात्रोपसंहारः कृतः । तदनुषङ्गेणोक्तस्य राजवैश्ययोश्चरितस्याप्रतिज्ञानान्न तदुपसंहारः कृत इति ज्ञेयम् ॥ २७ ॥

इति दत्वेति । एवं देव्येति च । अत्र मार्कण्डेय उवाचेत्यारभ्य सावर्णिः सूर्यतनय इत्यादि सावर्णिर्भविता मनुरित्यन्तं मन्त्रपरिगणने कृते द्व्यूना सप्तशती सम्पद्यते । तत्परिपूर्तये इति दत्वा तयोर्देवीति एवं देव्या

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥

वरं लब्ध्वेति चेत्यन्त्यश्लोकद्वयं सर्वान्ते पुनरुच्चार्यम् ॥ इयमन्त्यश्लोकद्वयस्य पुनरावृत्तिर्होमादौ सपल्लवपाठादौ च कार्या । न सर्वस्तवस्यैकमालामन्त्रत्वेन पाठे। एवं पञ्चमाध्याये विष्णुमायादिश्लोकानां त्रेधाविभागविषयेऽपि ज्ञेयम्। अथात्र केचिदधिकाः श्लोका दृश्यन्ते ते यथा एवं लब्धवरो राजा सुरथः क्षत्रियर्षभः ॥ ऋषेराश्रममागत्य तस्मै सर्वं निवेद्य च ॥ ततस्तदाज्ञया स्वीयं जगाम नगरं प्रति। हत्वा शत्रून् मदोद्रिक्तान् प्राप्य राज्यमतन्द्रितः ॥ बुभुजे पृथिवीं सर्वां ततः सागरमेखलाम् ॥ यावज्जीवं सुखं भुक्त्वाष्टममन्वन्तरे पुनः॥ सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ वैश्यश्च निर्ममो ज्ञानी देव्याराधनतत्परः॥ तीर्थेषु विचरन् गायन् भगवत्या गुणानथ ॥ कालातिवाहनं कुर्वन् मुक्तबन्धश्चचार ह ॥ एतत्ते कथितं विप्र देव्या माहात्म्यमुत्तमम् ॥ नानावतारचरितप्रभावैरुपबृंहितम्॥ य एतच्च पठेन्नित्यं श्रद्धया प्रयतो नरः॥ सर्वान् कामानवाप्नोति शतवर्षं च जीवति॥ यावज्जन्मकृतं पापं ब्रह्महत्यापुरस्सरम्॥ जपात्तु सकृदेतस्य क्षयं याति न संशयः ॥ य एतंत्पुस्तकं नित्यं भक्त्या सम्पूजयेन्नरः ॥ गृहे तस्य धनं धान्यं सम्पद्वृद्धिश्च जायते ॥ नाधयो व्याधयो घोरा न च तस्करवैरिभीः ॥ पुत्रपौत्राभिवृद्धिश्च जायते चण्डिकाज्ञया ॥ **इति** ॥ अथ सम्पूर्णोत्तमचरित्रमन्त्रविभागकारिकाः ॥ नवाध्यायात्मकेऽत्रान्त्यचरिते मन्त्रसंहतिः ॥ एकचत्वारिंशदाढ्यचतुःशतकसम्मिता ॥ अङ्काक्ष्यग्निमिताः (३२९) श्लोकमन्त्राः सपुनरुक्तकाः ॥ विष्णुमायादि पद्योत्था मन्त्राः षट्षष्टिरीरिताः॥ द्वादशार्धश्लोकमन्त्रा गद्याख्या निगमाग्नयः (३४) ॥ पञ्चपञ्चाशदधिकं श्लोकानां च शतत्रयम् ॥ **इति** ॥ अथ सम्पूर्णसप्तशतीमन्त्रविभागकारिकाः॥ चण्डीस्तवे च सर्वस्मिन् मन्त्राः सप्तशतानि च ॥ श्लोकमन्त्राः सपुनरुक्तका अङ्काग्निमार्गणाः (५३९)॥ अर्धश्लो-

सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ २९ ॥

कात्मका मन्त्रा अष्टत्रिंशत्समीरिताः ॥ षट्षष्टिर्विष्णुमायादिपद्यद्वाविंशतिश्रिताः ॥ सप्तपञ्चाशदुदिता उवाचान्तास्तु मन्त्रकाः ॥ ब्रह्मैको भगवानेको द्वौ द्वौ विड्दूतकौ स्मृतौ ॥ मार्कण्डेयाव्हयाः पञ्च देव्याख्या द्वादश स्मृताः ॥ सप्तविंशतिसङ्ख्याका ऋष्याख्या गद्यमन्त्रकाः ॥ श्लोकसङ्ख्या चाष्टसप्तत्युत्तरं शतपञ्चकम् ॥ इति सामान्यतः प्रोक्तो विभागस्तन्त्रसम्मतः ॥ इति ॥ २८ ॥ २९ ॥

इति मार्कण्डेयमहापुराणे सावर्णिकमन्वन्तरे देवीमाहात्म्ये
राजवैश्यवरप्रदानं नाम त्रयोदशोऽध्यायः ॥१३॥ ॐम्

इतीति । राजवैश्यवरप्रदानमित्यध्यायनाम । तत्पुरुषसमासः । द्विचत्वारिंशदक्षरात्मकमेतत्त्रयोदशाध्यायसमाप्तिवाक्यम् ॥

अथ पाठान्तरादि राजवैश्यवरप्रदानो नामेति पाठे बहुव्रीहिः समासः। राजपदस्थाने सुरथपदपाठो बहुषु पुस्तकेषु दृश्यते । व्यस्तपदपाठो न साधुरिति प्रथमाध्याये उक्तम् ॥

इति चण्डिकोपास्तिदीपिकायां चण्डिस्तवार्थ-
प्रकाशे त्रयोदशाध्यायव्याख्या ॥ १३ ॥

अथोत्तरन्यासः ॥ ॐ खड्गिनी शूलिनी० ॥१॥ हृदयाय नमः ॥ ॐ शूलेन पाहि० ॥१॥ प्राच्यां रक्ष, प्रतीच्यां० ॥२॥ सौम्यानि यानि० ॥३॥ खड्गशूलगदा० ॥ ४ ॥ शिरसे स्वाहा ॥ ॐ सर्वस्वरूपे० ॥ ? ॥ एतत्ते वदनं ॥२॥ ज्वालाकराल० ॥३॥ हिनस्ति दैत्य० ॥४॥ असुरासृग् ॥५॥ शिखायै वषट् ॥ पुनः खड्गिनीतिश्लोकं पठित्वा कवचाय हुम् ॥ शूलेन पाहीतिश्लोकचतुष्टयम् पूर्ववत् पठित्वा नेत्रत्रयाय वौषट्॥ सर्वस्वरूपे इत्यादि श्लोकपञ्चकम् पूर्ववत्पठित्वा अस्त्रायफट् ॥ **इत्युत्तरन्यासः ॥ जपनिवेदनादिकंरहस्यत्रयान्ते ॥ इति देवीमाहात्म्यम् समाप्तम् ॥**

अथोत्तराङ्गपञ्चकम् ॥ तत्रादौ सम्पुटीकरणोत्तराङ्गनवार्णमन्त्रस्य पुनर्विधानं सङ्क्षेपतः प्रोच्यते ॥

नवार्णमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । गायत्र्युष्णिगनुष्टुभश्छन्दांसि । महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । नन्दाशाकम्भरीभीमाः शक्तयः । रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि । अग्निवायुसूर्यास्तत्वानि । वेदत्रयपाठफलावाप्तिपूर्वकसर्वेष्टसिध्यर्थे देवीमाहात्म्यसम्पुटीकरणोत्तराङ्गत्वेन जपे विनियोगः ॥ अथ ऋष्यादिन्यासः ॥ ब्रह्मविष्णुमहेश्वरेभ्य ऋषिभ्यो नमः शिरसि । गायत्र्युष्णिगनुष्टुब्भ्यःश्छन्दोभ्यो नमो मुखे । महाकाली०-सरस्वतीभ्यो देवताभ्यो नमो हृदये । नन्दाशाकम्भरीभीमाभ्यः शक्तिभ्यो नमो दक्षिणस्तने । रक्तदन्तिकादुर्गाभ्रामरीभ्यो बीजेभ्यो नमो वामस्तने । अग्निवायुसूर्येभ्यस्तत्त्वेभ्यो नमो हृदये । वेदत्रय० जपे विनियोगाय नमः कराञ्जलौ । इति पूर्वोक्तमुद्राभिस्तत्तत्स्थानेषु न्यसेत् ॥ अथ मन्त्रन्यासाः ॥ ॐ ऐं अङ्गुष्ठा० । ॐ ह्रीं तर्जनी० ॐ क्लीं मध्यमाभ्या० ॐ चामुण्डायै अनामिका० । ॐ विच्चे कनिष्ठिका० । सर्वेण करतलकरपृष्ठाभ्यां नमः । ॐ ऐं हृदयाय नमः ॥ ॐ ह्रीं शिरसे० । ॐ क्लीं शिखायै० । ॐ चामुण्डायै

कवचा० । ॐ विच्चे नेत्रत्रया० । सर्वेण अस्त्रायं फट्॥ ॐ ऐं नमः शिखायाम् । ॐ ह्रीं नमः दक्षिणनेत्रे । ॐ क्लीं नमः वामनेत्रे । । ॐ चां नमः दक्षिण कर्णे । ॐ डां नमः दक्षिणनासायाम् । ॐ यैं नमः वामनासायाम् । ॐ विं नमः मुखे। ॐ च्चें नमः गुदे। **इति न्यासाः॥ अथ ध्यानानि** खड्गचक्रगदेषु०॥ १ ॥ अक्षस्रक्परशू० ॥ २ ॥ घण्टाशूलहलानि ॥ ३ ॥ इति ध्यात्वा । श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः लं पृथिव्यात्मकान् गन्धान् कल्प० । श्रीमहा० हं आकाशात्मकानि पुष्पाणि० श्रीमहाका० यं वाय्वात्मकं धूपं० । श्रीमहा० रं अग्न्यात्मकं दीपं० । श्रीमहा० वं अमृतात्मकं नैवेद्यं० ।। इति सम्पूज्य । ॐ ह्रीं सिद्ध्यै नमः इति जपमालामभ्यर्च्य । ॐ महामाये महामाले० इति मन्त्रेण मालां गृहीत्वा वस्त्रेणाच्छाद्य हृदये धृत्वा नवार्णमन्त्रमष्टोत्तरशतं जपेत् ॥ जपान्ते प्रणवमुक्त्वा । ॐ त्वं माले सर्व देवानां० इति मालां शिरसि निधाय ततो यथास्थानं स्थापयेत्॥ जपान्ते पुनर्हृदयादि षडङ्ग कृत्वा नमेदिति सम्पुटीकरणोत्तराङ्गत्वेन **पुनर्नवार्णमन्त्रजपविधानम्** ॥

अथ **देवीसूक्तम्** ।। अहं रुद्रेभिरित्यष्टर्चस्य देवीसूक्तस्य आम्भृणी वागृषिः । ब्रह्मरूपा महालक्ष्म्यभिन्ना सैव देवता । त्रिष्टुप् छन्दः । द्वितीयाया ऋचो जगती। देवी **माहात्म्यसम्पुटीकरणोत्तराङ्गत्वेन** जपे विनीयोगः ॥

ॐ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ॥
अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा ।।१॥

अथास्या **ऋचः पदानि** ॥ अहम् । रुद्रेभिः । वसुऽभिः । चरामि । अहम् । आदित्यैः । उत । विश्वऽदेवैः । अहम् । मित्रावरुणा । उभा । विभर्मि । अहम् । इन्द्राग्नी इतिं । अहम् । अश्विनो । उभा ॥ इति ॥

अ॒हं सोम॑माह॒नसं॑ बिभर्म्य॒हं त्वष्टा॑रमु॒त पू॒षणं॒ भग॑म्
अ॒हं द॑धामि॒ द्रवि॑णं ह॒विष्म॑ते सुप्रा॒व्ये॒३ यज॑मानाय
सुन्व॒ते ॥ २ ॥

अथ सायणाचार्यभाष्यम् ॥ अहं सूक्तस्य द्रष्ट्री वाक् आम्भृणी । यत् ब्रह्म जगत्कारणं तद्रुपा भवन्ती । रुद्रेभिः रुद्रैः एकादशभिः । इत्थंभावे तृतीया । तदात्मना चरामि । एवं वसुभिरित्यादौ तत्तदात्मना चरामीति योज्यम् । एवमेव मित्रावरुणेत्यत्र । सुपां सुलुगिति द्वितीयाया आकारः । उभा उभौ । अहमेव ब्रह्मीभूता बिभर्मि धारयामि । इन्द्राग्नी अप्यहमेव धारयामि । उभा उभौ अश्विना अश्विनावप्यहमेव धारयामि । मयि हि सर्वं जगत् शुक्तौ रजतमिवाध्यस्तं सदृश्यते । माया च जगदाकारेण विवर्तते । तादृश्या मायया आधारत्वेन असङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योपपत्तिः ॥१॥

अथ पदानि ॥ अ॒हम् । सोम॑म् । आ॒ह॒नस॑म् बि॒भ॒र्मि॒ । अ॒हम् । त्वष्टा॑रम् । उ॒त । पू॒षण॑म् । भग॑म् ॥ अ॒हम् । द॒धा॒मि॒ । द्रवि॑णम् । ह॒विष्म॑ते । सु॒प्र॒ऽअ॒व्ये॑ । यज॑मानाय । सु॒न्व॒ते ॥ इति ॥ **अथ भाष्यम्** ॥ आहनसं आहन्तव्यं अभिषोतव्यं सोमम् । अहमेव बिभर्मि । तथा त्वष्टारं उतापि च पूषणं भगं च अहमेव बिभर्मि । तथा हविष्मते हविर्भिर्युक्ताय । सुप्राव्ये शोभनं हविर्देवानां प्रापयित्रे तर्पयित्रे । अवतेस्तर्पणार्थादवितृस्तृतन्त्रिभ्य ईरितीकारः प्रत्ययः । चतुर्थ्येकवचने यणि उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति सुपः स्वरितत्वम् । सुन्वते सोमाभिषवं कुर्वते । शतुरनुम इति चतुर्थ्या उदात्तत्वम् । ईदृशाय यजमानाय द्रविणं धनं यागफलरूपं अहमेव धारयामि । एतच्च ब्रह्मणः फलदातृत्वं फलमत उपपत्तेरित्यधिकरणे **भगवता भाष्यकारेण** समर्थितम् ॥ २ ॥

अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्॥३॥
मयासो अन्नमत्तियो विपश्यति यः प्राणिति य ईं शृणो-
त्युक्तम् ॥

पदानि ॥ अहम् । राष्ट्री । समऽगमनी । वसूनाम् । चिकितुषी । प्रथमा । यज्ञियानाम् ॥ ताम् । मा । देवाः । वि । अदधुः । पुरुऽत्रा । भूरिऽस्थात्राम् । भूरि । आऽवेशयन्तीम् ॥ **इति** ॥ **अथ भाष्यम्** । अहं राष्ट्री । ईश्वरनामैतत् । सर्वस्य जगत ईश्वरी । तथा वसूनां धनानां सङ्गमनी सङ्गमयित्री उपासकानां प्रापयित्री । चिकितुषी यत् साक्षात् कर्तव्यं परं ब्रह्म तत् ज्ञातवती स्वात्मतया साक्षात् कृतवती । अत एव यज्ञियानां यज्ञार्हाणां प्रथमा मुख्या । यैवंगुणविशिष्टाहम् तां मा माम् भूरिस्थात्रां बहुभावेन प्रपञ्चात्मनावतिष्ठमानाम् । भूरि भूरीणि भूतजातानि आवेशयन्तीम्। जीवभावेनात्मानं प्रवेशयन्तीम् । ईदृशीं माम् । पुरुत्रा बहुषु देशेषु व्यदधुः देवाः विदधति कुर्वन्ति । उक्तप्रकारेण विश्वरूपेणावस्थानात् यद्यत्कुर्वन्ति तत्सर्वं मामेव कुर्वन्तीत्यर्थः ॥ ३ ॥

पदानि ॥ मया । सः । अन्नम् । अत्ति । यः । विऽपश्यति । यः । प्राणिति । यः । ईम् । शृणोति । उक्तम् ॥ अमन्तवः । माम् । ते । उप । क्षियन्ति । श्रुधि । श्रुत । श्रद्धिऽवम् । ते । वदामि ॥ **इति** ॥ **अथ भाष्यम्** ॥ यो अन्नमत्ति स भोक्तृशक्तिरूपया मयैवात्ति । यश्च विपश्यति आलोकयतीत्यर्थः । यश्च प्राणिति च्छ्वासोच्छ्वासादिव्यापारं करोति सोऽपि मयैव । यश्चोक्तं शृणोति । श्रु श्रवणे । श्रुवः शृचेति श्रुधातोः शृभावः ।

अमन्तवो मां त उपक्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥ ४ ॥

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ॥
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्।५।

य ईदृशीमन्तर्यामिरूपेण स्थितां मां न जानन्ति ते अमन्तवः अमन्यमाना अजानन्तः । उपक्षियन्ति उपक्षीणाः संसारेण हीनां भवन्ति । मनेरौणादिकस्तुप्रत्यय। । नञ्समासे व्यत्ययेनान्तोदात्तत्वम् । यद्वा भावे तुप्रत्ययः । ततो बहुव्रीहौ नञ्दुःसुभ्यामित्युत्तरपदान्तोदात्तत्वम् । मां अमन्तवः मद्विषयकज्ञानरहिता इत्यर्थः । हे श्रुत विश्रुत सखे । श्रुधि मया वक्ष्यमाणं शृणु । छान्दसो विकरणस्य लुक् । श्रुशृणुपृकृवृभ्य इति हेर्धिभावः । किं तत् श्रोतव्यम् । श्रद्धिवं श्रद्धिः श्रद्धा तया युक्तं श्रद्धायत्नेन लभ्यमित्यर्थः । श्रदन्तरोरुपसर्गवद्वृत्तिरिष्यत इति श्रच्छब्दस्य उपसर्गवद्वर्तमानत्वादुपसर्गे घोः किरिति किप्रत्ययः । मत्वर्थीयो वः । ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि उपदिशामि ॥ ४ ॥

पदानि ॥ अहम् । एव । स्वयम् । इदम् । वदामि । जुष्टम् । देवेभिः । उत । मानुषेभिः ॥ यम् । कामये तम्ऽतम् । उग्रम् । कृणोमि । तम् । ब्रह्माणम् । तम् । ऋषिम् । तम् । सुऽमेधाम् ॥ इति ॥ अथ **भाष्यम्** ॥ अहं स्वयमेव इदं वस्तु ब्रह्मात्मकं वदामि उपदिशामि । देवेभिर्देवैः इन्द्रादिभिरपि जुष्टं सेवितम् । उतापि च मानुषेभिः मनुष्यैरपि जुष्टम् । इदृग्वस्त्वात्मिकाहम् । कामये यं पुरुषं रक्षितुमहं वाञ्छामि । तं पुरुषं उग्रं कृणोमि सर्वेभ्योऽधिकं करोमि । तमेव ब्रह्माणं स्रष्टारं करोमि । तमेव ऋषिं अतीन्द्रियार्थदर्शिनं करोमि । तमेव सुमेधां शोभनप्रज्ञं च करोमि ॥ ५ ॥

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हंतवा उ ॥
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥६॥
अहं सुवे पितरमस्य मूर्धन्ममयोनिरप्स्वं१तःसमुद्रे ॥

पदानि ॥ अहम् । रुद्राय । धनुः । आ । तनोमि । ब्रह्मऽद्विषे । शरवे । हन्तवै । ऊँ इति । अहम् । जनाय । सऽमदम् । कृणोमि । अहम् । द्यावापृथिवी इति । आ । विवेश ॥ ६ ॥ इति ॥ **अथ भाष्यम्** ॥ पुरा त्रिपुरविजयसमये रुद्राय रुद्रस्य महादेवस्य । षष्ठ्यर्थे चतुर्थी । धनुश्चापं अहं आतनोमि ज्यया ततं करोमि । किमर्थम् ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे शरुं हिंसकं त्रिपुरवासिनमसुरं हन्तवै हन्तुं हिंसितुम् । हन्तेस्तुमर्थे सेसेनिति तवै प्रत्ययः । अन्तश्च तवै युगपदित्याद्यन्तयोर्युगपदुदात्तत्वम् । शॄ हिंसायामित्यस्मात् शॄस्वृस्निहीत्यादिना उप्रत्ययः क्रियाग्रहणं कर्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थी । उशब्दः पूरकः । अहमेव समदं समानं माद्यन्त्यस्मिन्निति समत्सङ्ग्रामः । स्तोस्तृजनार्थं शत्रुभिः सह सङ्ग्रामं अहमेव कृणोमि करोमि तथा द्यावापृथिवी दिवं च पृथिवीं च अन्तर्यामितया अहमेव आविवेश प्रविष्टवती ॥ ६ ॥

अथ पदानि ॥ अहम् । सुवे । पितरम् । अस्य । मूर्धन् । मम । योनिः । अप्ऽसु । अंतरिति । समुद्रे ॥ ततः । वि । तिष्ठे । भुवना । अनु । विश्वा । उत । अमूम् । द्याम् । वर्ष्मणा । उप । स्पृशामि ॥ इति ॥ **अथ भाष्यम्** ॥ द्यौः पितेति श्रुतेः पिता द्यौः । पितरं दिवं अहं सुवे प्रसुवे जनयामि । आत्मन आकाशः सम्भूत इति श्रुतेः । कुत्रेति तदाह । अस्य परमात्मनः मूर्धन् मूर्धनि उपरि कारणभूते । तस्मिन् हि वियदादिकार्यजातं

त॒तो॒ विति॑ष्ठे॒ भुव॒नानु॒ विश्वो॒ तामूं द्यां व॒र्ष्मणोप॑स्पृशामि ॥ ७ ॥

अ॒हमे॒व वात॑ इव॒ प्रवा॑म्या॒रभ॑माणा॒ भुव॑नानि॒ विश्वा॑ ॥

सर्वं वर्तते तन्तुषु पट इव । मम च योनिः कारणं समुद्रे समुद्रवन्त्यस्माद्भूतजातानीति समुद्रः परमात्मा तस्मिन् । अप्सु व्यापनशीलासु धीवृत्तिषु अन्तर्मध्ये यत् ब्रह्मचैतन्यं तन्मम कारणमित्यर्थः । यत ईदृग्भूताहमस्मि ततो हेतोर्विश्वा विश्वानि सर्वाणि भुवना भुवनानि भूतजातानि अनुप्रविश्य वितिष्ठे विविधं व्याप्य तिष्ठामि । समविप्रविभ्यः स्थः इत्यात्मनेपदम् । उतापि च अमूं द्यां विप्रकृष्टदेशे स्थितं स्वर्गलोकम् । उपलक्षणमेतत् । एतदुपलक्षितं विकारजातं वर्ष्मणा करणभूतेन मायात्मकेन मदीयेन देहेन उपस्पृशामि । यद्वा अस्य भूलोकस्य मूर्धन् मूर्धन्युपरि अहं पितरमाकाशं सुवे । समुद्रे जलधौ अप्सु अम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्मचैतन्यं वर्तते । ततोऽहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि । अन्यत्सर्वं समानम् ॥ ७ ॥

पदानि ॥ अ॒हम् । ए॒व । वात॑ः ऽइव । प्र । वा॒मि॒ । आऽरभ॑माणा । भुव॑नानि । विश्वा॑ ॥ प॒रः । दि॒वा । प॒रः । ए॒ना । पृ॒थि॒व्या । ए॒ताव॑ती । म॒हि॒ना । सम् । ब॒भू॒व॒ ॥ इति ॥ अथ ॥ भाष्यम् ॥ विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपेणोत्पादयन्ती अहमेव परेणानधिष्ठिता स्वयमेव प्रवामि प्रवर्ते वात इव । यथा वातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत् । उक्तं सर्वं निगमयति । परो दिवा पर इति सकारान्तं परस्तादित्यर्थे वर्तते । यथा अध इति अधस्तादर्थे । तद्योगे

प॒रो दि॒वा प॒र ए॒ना पृ॑थि॒व्यै ताव॑ती मह॒िना सम्ब॑भूव ॥८॥

ॐ

इति देवीसूक्तम् ॥

च तृतीया सर्वत्र दृश्यते । दिव आकाशस्य परस्तात् । एना पृथिव्या द्वितीयाटौस्वेन इति इदम एनादेश अस्याः पृथिव्याः परः परस्तात् । द्यावापृथिव्योरुपादानमुपलक्षणम् । एतदुपलक्षितात्सर्वस्माद्विकारजातात्परस्ताद्वर्तमाना असङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपाहं महिना महिम्ना एतावती सम्बभूव । एतच्छब्देन उक्तं सर्वं परामृश्यते । एतत्परिमाणमस्याः । यत्तदेतेभ्यः परिणाम इति वतुप् । आ सर्वनाम्न इत्यात्वम् । सर्वजगदात्मना अहं सम्भूतास्मि । महच्छब्दादिमनिचि टेरिति टिलोपः । ततः तृतीयायां उदात्तनिवृत्तिस्वरेण तस्या उदात्तत्वम् । छान्दसो मलोपः ॥ ८ ॥

इति सायणाचार्यविरचितं देवीसूक्तभाष्यं समाप्तम् ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे देवीसूक्तभाष्यम्॥

अथ रहस्यंत्रयम् ॥ तत्रादौ प्राधानिकं रहस्यम् ॥ प्राधानिकरहस्यस्य सुमेधा ऋषिः । अनुष्टुप्छन्दः । श्रीमदादिशक्तिर्महालक्ष्मीर्देवता । देवीमाहात्म्यजपोत्तराङ्गत्वेन जपे विनियोगः ॥

ॐ राजोवाच ॥

राजेति । राजा सुरथः । सुमेधसमृषिमिति शेषः । राजोवाचेत्युक्तिर्मार्कण्डेयस्य क्रौष्टुकिं प्रति ॥ ननु त्रयोदशाध्याये राजा ऋषेः सकाशाच्चण्डिकावतारचरितश्रवणानन्तरं तदुपदेशान्नदीतीरं गत्वा तत्र वर्षत्रयपर्यन्तं पूजाजपादिभिर्देवीमाराध्य प्रसन्नाया देव्याः सकाशादिष्टं वरं लेभे इत्यन्तं कथाशेष उक्तः । न च तन्मध्ये तदुत्तरं वा राजर्ष्योः सङ्गमो दृश्यते तत्कदायमुभयो रहस्यात्मकः संवादः समभूदित्याशङ्कायामुच्यते गुरुपरम्परया श्रुतं तन्त्रान्तरस्थमैतिह्यम् ॥ पुरा कल्पे इदं देवीमाहात्म्यं नवशतश्लोकात्मकत्वान्नवशतीसंज्ञमासीत् । तस्य चातिविस्तृतत्वात्तज्जपहोमाद्यनुष्ठाने लोकानामशक्तिमूलामुपेक्षामवेक्ष्य महात्मना परमेष्ठिना तत्सारसमुद्धरणे विज्ञप्तो भगवान् भूतानुकम्पी महेश्वरः षट्शतीतः किञ्चिन्न्यूनं सारमुद्धृत्य होमाद्यर्थं सप्तशतधा विभज्य च तं मार्कण्डेयपुराणे कात्यायन्यादितन्त्रेषु च निवेशयाञ्चक्रे । तदारभ्य सारभूतं देवीमाहात्म्यं सप्तशतमन्त्रात्मकत्वात्सप्तशतीनाम्ना प्रसिद्धिं लेभे । सम्प्रत्युपलभ्यमानं रहस्यत्रयं प्राङ्नवशत्यवस्थायां त्रयोदशाध्याये तामुपेहि महाराज शरणं परमेश्वरीम् ॥ आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ इति श्लोकानन्तरं देव्याराधनार्थं प्रधानप्रकृतिविकृतिदेवताध्यानपूजादिविधिं बुभुत्सुना राज्ञा भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः ॥ एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥ आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ॥ विधिना ब्रूहि सकलं यथावत् प्रणतस्य मे ॥ इति परिपृष्टेन सुमेधसा तस्मै तत्रैवोत्तरत्वेनोक्तमासीत् । तच्च सारसमुद्धरणसमये विस्तृ-

भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः ॥

तत्वात्परित्यक्तं प्रकृतिविकृतिध्यानपूजाद्युपयुक्तविविधविषयोपेतत्वाच्छिष्टैः इदं रहस्यमिति रहस्यपदोपक्रान्तत्वाद्रहस्यत्रयसंज्ञया सप्तशत्यङ्गत्वेन परिगृहीतमिति ॥ अतएव नवशतीस्थऋष्युक्तश्लोकसङ्ख्यायाः सप्तशतीस्थतदुक्तश्लोकसङ्ख्यायाश्च महदन्तरमस्ति । एवं सप्तशत्यां मध्ये मध्ये ये केचित् केचिदधिकाः श्लोकाः समुपलभ्यन्ते ते सर्वे सारसमुद्धरणसमये नवशतीतः त्यक्ताः कथासौन्दर्यार्थं कैश्चित् परिगृहीता इति ज्ञेयम् ॥ तत्र सप्तशतीस्थसर्वश्लोकानां वक्तृविशेषेण सङ्ख्याविभागस्त्रयोदशाध्यायान्ते व्याख्यायां दर्शितः। अथोभयोरन्तरज्ञानाय नवशतीश्लोकसङ्ख्याविभागो **वामकेश्वरतन्त्रोक्तः** प्रदर्श्यते । शतानि पञ्चषष्ठिं च श्लोकानामब्रवीदृषिः । देवीं प्रतुष्टुवुर्देवा एकश्लोकशतेन च ॥ मार्कण्डेयोऽष्टसप्तत्या द्विसप्तत्या तथाम्बिका ॥ सार्धैः षोडशभिः श्लोकैश्चण्डमुण्डावथोचतुः ॥ शुम्भः षोडशभिर्ब्रह्मा चतुर्दशभिरेव च ॥ दूतस्त्रयोदशश्लोकै राजा द्वादशभिस्तथा ॥ वैश्यः सार्धाष्टभिर्दैत्यास्त्रिभिर्द्वाभ्यामथो दितिः ॥ द्वाभ्यां च जैमिनिर्व्यास एकेनैकेन केशवः ॥ श्लोकेनैकेन मधुकैटभौ नवशती स्मृता ॥ इति ॥ अन्यदपि वामकेश्वरतन्त्रान्तर्गतं नाम क्वचित् श्लोकत्रयं दृश्यते । तद्यथा । नवार्णा नवचण्डी च नवावरणदेवताः ॥ नवश्लोकशतान्येवं द्वितयं नवरात्रयोः ॥ एतद्गोप्यतमं सर्वं न देयं यस्य कस्यचित् ॥ राज्यं देयं शिरो देयं देया नवशती न च ॥ अतस्तत्सारमुद्धृत्य ब्रह्मणेऽर्पितवान् शिवः ॥ स च सप्तशतीनाम्ना विख्यातोऽभूद्धरातले ॥ इति ॥

अथ श्रुतचरित्रत्रयदेवताप्रभावो राजाधुना तासां साक्षात् मूलप्रकृतिश्च प्रकृतीः तथा प्रकृतिविकृतिदेवतानां स्वरूपाणि तासां पूजाविधिं च जिज्ञासुस्तत्कथनाय सुमेधसं प्रार्थयते **भगवन्निति** श्लोकद्वयेन । हे भगवन् सुमेधोमुने । भगवच्छब्दो व्याख्यातपूर्वः । त्वया मे चण्डिकाया अवताराः

एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥ १ ॥
आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ॥
विधिना ब्रूहि सकलं यथावत् प्रणतस्य मे ॥ २ ॥

ऋषिरुवाच ॥

इदं रहस्यं परममनाख्येयं प्रचक्षते

दशभुजाष्टादशभुजाष्टभुजारूपा उदिता उत्पत्तिप्रभावादिभिर्वर्णिताः । हे ब्रह्मन् अधुना एतेषामवताराणां प्रकृतिं साक्षात् प्रकृतीः जात्यभिप्रायेणैकवचनम् तथा प्रधानं मुख्यं मूलप्रकृतिं । नामगुणकर्मभिर्वक्तुमर्हसि ॥ प्राधानिकरहस्यस्य बीजभूतोऽयं प्रश्नः ॥ १ ॥

आराध्यमिति ॥ किं च हे द्विज भवता तामुपैहि महाराज शरणं परमेश्वरीम् ॥ आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ इति देव्याराधनमुक्तम् तत्र मया देव्याः यद्यत्स्वरूपं आराध्यं येन येन च विधिना आराध्यं तत्सकलं प्रणतस्य नम्रस्य मे यथावत् वस्तुस्थित्यनतिक्रमेण ब्रूहि कथय ॥ यत्स्वरूपमित्यत्र येन च विधिनेत्यत्र च वीप्सावगन्तव्या अग्रे बहूनामाराध्यस्वरूपाणामाराधनविधीनां च वक्ष्यमाणत्वात् । अयं वैकृतमौर्तरहस्ययोर्बीजात्मकः प्रश्नः ॥

अथ पाठान्तरादि येन चेत्यत्र येन तदिति क्वचित्पाठः ॥ २ ॥

ऋषिरिति । ऋषिः सुमेधाः ॥

इदमिति । हे नराधिप राजन् सुरथ । यत् त्वया सम्प्रति जिज्ञासितं इदं परमं रहस्यं अत्यन्तगोपनीयम् । अतः अनाख्येयं यस्मै कस्मैचिदाख्यातुमनर्हं प्रचक्षते प्रवदन्ति मन्त्ररहस्यविद इति भावः । तथापि त्वं मम देव्याश्च भक्तोऽसि । इति हेतोः मे मम । कृत्यानां कर्तरि वेति षष्ठी । तव

भक्तोऽसीति न मे किञ्चित्तवावाच्यं नराधिप ॥ ३ ॥
सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥
लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥४॥

अवाच्यं अकथनीयं किञ्चित् किमपि नास्ति । ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्यतेति न्यायादिति भावः ॥ ३ ॥

अथ राज्ञः प्रश्नानुरोधेन प्रथमरहस्ये चरित्रदेवतानां दशभुजाष्टादशभुजाष्टभुजानां मूलप्रकृतिं तत्तत्साक्षात्प्रकृतीश्च कथयिष्यन्नादौ सर्वासां मूलप्रकृतिं अष्टादशभुजाया मध्यमचरित्रदेवतायाः साक्षात् प्रकृतिं चाह **सर्वस्याद्येति**श्लोकत्रयेण । परमेश्वरी सर्वं कर्तुमकर्तुमन्यथाकर्तुं समर्था महालक्ष्मीः सर्वस्य शक्तिसमूहस्य सर्वस्य जगतश्चाद्या । मूलप्रकृतिरित्यर्थः । महालक्ष्मीपदनिरुक्तिर्**लक्ष्मीतन्त्रे** । अन्तरास्थाय सर्वस्य लक्षयत्यखिलां क्रियाम् अपरिच्छिन्नशक्तिश्च महालक्ष्मीरिति स्मृता ॥ इति ॥ सा लक्ष्यालक्ष्यस्वरूपा । लक्ष्यं लक्षयितुं शक्यम् । तद्विरुद्धमलक्ष्यम् । एवं द्विविधं रूपं यस्या एवंविधास्ति । उक्तं च **देवीभागवते** । सगुणा निर्गुणा चेति द्विधा प्रोक्ता मनीषिभिः ॥ सगुणा रागिभिः सेव्या निर्गुणा तु विरागिभिरिति ॥ एतद्विविधं स्वरूपं सर्वस्याद्येतिश्लोकत्रये साङ्कर्येणोक्तम् । तत् स्पष्टबोधार्थं विविच्य पृथक्पृथगुच्यते ॥ तत्रादौ लक्ष्यायाः स्वरूपं यथा । लक्ष्या महालक्ष्मीस्त्रिगुणा । रजःसत्वतमोगुणात्मिका । अथवा नानाकृतिक्रियानामधेयवृत्तिः स्वलीलया ॥ त्रिधा यद्वर्तते लोके तेनासौ त्रिगुणोच्यते ॥ इति **वायुपुराणोक्त**गुणत्रयवती । तथा मातुलिङ्गं बीजापूरफलम् । गदां प्रसिद्धाम् । खेटं चर्म । पानपात्रं सुधापात्रम् । पात्रं पियूषपूरितमिति वक्ष्यमाणत्वात् । एतानि दक्षिणाधःकरमारभ्य वामाधःकरपर्यन्तं प्रादक्षिण्येन चतुर्षु हस्तेषु बिभ्रती उक्तं च **चण्डिकार्चनरहस्ये** । मातुलिङ्गं गदां खेटं पात्रं पीयूषपूरितम् ॥ दक्षिणा-

मातुलिङ्गं गदां खेटं पानपात्रं च बिभ्रती ॥
नागं लिङ्गं च योनिं च बिभ्रती नृपमूर्धनि ॥ ९ ॥

धःक्रमाद्धस्तैर्वामाधोन्तं च बिभ्रती ॥ इति ॥ **रेणुकामाहात्म्ये** तु । दक्षिणेऽधःकरे पात्रं ऊर्ध्वे कौमोदकीं तथा ॥ वामे तु खेटकं धत्ते फलं तु तदधःकरे ॥ **इत्युक्तम्** ॥ मूर्धनि मस्तके सर्वोपारि नागं तदधो लिङ्गं पुंचिह्नम् तदधो योनिं स्त्रीचिह्नं च बिभ्रती । तेन स्त्रीपुंसात्मिकेयम् । अथवानागो ब्रह्मणश्चिह्नम् कारणागमे दशभुजमूर्तेः शिवस्य दशायुधानां साङ्केतिकस्वरूपकथनप्रसङ्गे नागस्तु विधिरूपः स्यादिति नागस्य ब्रह्मरूपत्वोक्तेः । लिङ्गं रुद्रस्य चिह्नं प्रसिद्धम् योनिर्विष्णोश्चिह्नम् विष्णुर्योनिंकल्पयत्विति **श्रुतेः** । एतेन ब्रह्मविष्णुशिवात्मिकेयमित्युक्तम् । एतानि नागादीनि तत्तदाकाराणि भूषणानीति वा ज्ञेयम् । वेण्यां तु नागं लिङ्गं च योनिं चापि बिभर्ति सेति **यामलोक्तेः** । **भुवनेश्वरीसंहितायां** मातुलिङ्गादीनां साङ्केतिकरूपाण्युक्तानि तानि यथा । मातुलिङ्गं कर्मवृन्दं इच्छाशक्त्यात्मिका गदा ॥ ज्ञानशक्त्यात्मकं खेटं तुर्यवृत्तिस्तु पानकम् ॥ लिङ्गं पुरुष इत्युक्तो योनिस्तु प्रकृतिः परा ॥ नागः कालात्मकः ख्यातः सम्बन्धस्तु तयोर्द्वयोरिति ॥ तयोर्द्वयोः पुरुषप्रकृत्योः सम्बन्धरूपो यः कालः स नाग इत्यर्थः ॥ तप्तकाञ्चनवर्णाभा । तप्तकाञ्चनस्य यो वर्णस्तद्वदाभा प्रभा यस्याः सा । आरक्तवर्णेत्यर्थः । प्रातःसूर्यसमप्रभामिति **देव्यथर्वशीर्षश्रुतेः** ॥ तप्तस्य तापनादुत्तमत्वेन परीक्षितस्येत्यर्थः । काञ्चनस्य सुवर्णस्य भूषणानि यस्याः सा तप्तकाञ्चनभूषणा । **उक्तं च** यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनादिभिरिति ॥ अथ अलक्ष्यायाः स्वरूपं यथा । या अलक्ष्यस्वरूपा सा कृत्स्नं सर्वं व्याप्यव्यवस्थिता स भूमिं विश्वतो वृत्वात्यतिष्ठदिति **श्रुतेः** । तथा शून्यतेजसा

तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा ॥
शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥ ६ ॥
शून्यं तदाखिलं लोकं विलोक्य परमेश्वरी ॥

रहितं तमोमयमित्यर्थः । तम आसीत्तमसा गूढमग्रे इति श्रुतेः । आसीदिदं तमोभूतमसम्प्रज्ञातलक्षणम् ॥ अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः ॥ इति स्मृतेश्च । अखिलं सर्वं तत् स्वेन तेजसा पूरयामास व्याप्तवतीत्यर्थः । तत्तेजोऽसृजतेति श्रुतेः । अर्थात्केवलतेजोरूपेत्यर्थः । अयं भावः । परमेश्वरी महालक्ष्मीः आदावलक्ष्यरूपा सर्वव्यापिनी तमोमयं सर्वं तेजसा आपूर्य पश्चाद्यदा बहुस्यां प्रजायेय नामरूपे व्याकरवाणि लोकान्नु सृजै इत्याद्यैक्षत तदा लक्ष्यस्वरूपा त्रिगुणा च सती मातुलिङ्गं गदामित्यादि तप्तकाञ्चनभूषणेत्यन्तसार्धश्लोकोक्तस्थूलरूपधारिण्यभवदिति । इयं सर्वावतारसङ्घस्य मूलप्रकृतिः । अष्टादशभुजायाः साक्षात्प्रकृतिश्च । सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा ॥ त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनीति वक्ष्यमाणत्वात् । द्विविधा हि प्रकृतिः । साक्षात्प्रकृतिः । परम्पराप्रकृतिश्चेति । यत् तस्य साक्षात्कारणं सा तस्य साक्षात्प्रकृतिः । यथा कार्पासस्तन्तूनाम् । यत् परम्परया कारणं सा परम्पराप्रकृतिः । यथा कार्पासो वस्त्रस्य । परम्पराकारणाभावे साक्षात्प्रकृतिरेव मूलप्रकृतिर्भवति । यथाकार्पासस्तन्तूनाम् । एवमन्यत्र स्वयमूह्यम् ॥

अथोक्तश्लोकत्रये पाठान्तरादि मातुलिङ्गमित्यत्र मातुलुङ्गमिति बिभ्रती नृपेत्यत्र बिभर्ति नृपेति वर्णाभेत्यत्र वर्णा सेति च क्वचित् पाठः ॥ ४ । ५ । ६ ॥

अथ महालक्ष्मीः सर्वस्य शक्तिसमूहस्य जगतश्चाद्येत्युक्तं ततस्तत्कृतं सृष्टिक्रमं कथयिष्यन्नादौ तदङ्गत्वेन प्रथमचरित्रदेवताया दशभुजायाः साक्षात्प्रकृतिं महाकालीमाह शून्यमिति । परमेश्वरी महालक्ष्मीः

बभार रूपमपरं तमसा केवलेन हि ॥ ७ ॥

सा भिन्नाञ्जनसङ्काशा दंष्ट्राञ्चितवरानना ॥
विशाललोचना नारी बभूव तनुमध्यमा ॥ ८ ॥

खड्गपात्रशिरःखेटैरलङ्कृतचतुर्भुजा ॥

तदा स्वस्य त्रिगुणात्मकरूपधारणामन्तरकाले अखिलं लोकं केवलाकाशात्मकं । शून्यं स्थावरजङ्गमात्मकवस्तुरहितं विलोक्य सृष्टिं कर्तुं केवलेन गुणान्तरासंसृष्टेन तमसा तमोगुणेन अपरं पूर्वोक्तत्रिगुणात्मकरूपाद्भिन्नं रूपं बभार धृतवती । डुभृञ् धारणे । हिः पादपूरणे ॥

अथ पाठान्तरादि तदेत्यत्र तदिति पाठः प्रामादिकः ॥ ७ ॥

तस्याः स्वरूपमाह सेति । सा तमोगुणात्मिका मूर्तिः भिन्नाञ्जनसङ्काशा वर्णेन सान्द्रकज्जलतुल्या । भिन्नं सान्द्रे पृथक्भूते इति हैमः ॥ दंष्ट्राभिः अञ्चितं पूजितं उज्वलमिति थावत् । वरं सुन्दरमाननं यस्याः सा दंष्ट्राञ्चितवरानना । अञ्चु गतिपूजनयोः । विशाले विस्तृते लोचने यस्याः सा विशाललोचना । तनु कृशं मध्यमं मध्यदेशो यस्याः सा तनुमध्यमा एतादृशी नारी बभूव ॥

अथ पाठान्तरादि अञ्चितेत्यत्राङ्कितेति क्वचित् पाठः ॥ ८ ॥

खड्गेति । खड्गः प्रसिद्धः । पात्रं पानपात्रम् । शिरो नृशीर्षम् । खेटं चर्म । एभिरलङ्कृताश्चत्वारो भुजा यस्याः सा । सर्वत्रायुधानां दक्षाधःकरादिरेव क्रमः । उरसा कण्ठादुरःपर्यन्तमित्यर्थः । कबन्धानां निःशिरस्कनृदेहानां हारं तथा शिरसां नृशीर्षाणां स्रजं च बिभ्राणा धारयमाणा । अथ वा अहिशिरःस्रजमिति च्छेदः । सर्पसहस्रघटितां शिरोमालामित्यर्थः ।

कबन्धहारमुरसा बिभ्राणाहिशिरःस्रजम् ॥ ९ ॥
तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ॥
ददामि तव नामानि यानि कर्माणि तानि ते ॥ १० ॥
महामाया महाकाली महामारी क्षुधा तृषा ॥

बिभ्राणा शिरसीति शेषः । मूर्ध्निसर्पसहस्राणां स्रजं धत्ते हि सुन्दरीति **यामलोक्तेः** ॥

अथ पाठान्तरादि क्वचिदुरसेत्यत्रशिरसेतिपाठः । तदा हारस्योरसा धार्यत्वादुरसेत्यध्याहारः शिरसेत्यस्य शिरःस्रजमित्यनेनान्वयश्च । एतदुत्तरं सा प्रोवाच महालक्ष्मी तामसी प्रमदोत्तमा ॥ नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः । इत्येकोऽधिकः लोकः क्वचित् पठ्यते ॥ ९ ॥

अथास्याः कर्मानुरूपाणि नामानि दातुं प्रतिजानीते । **तामिति** । महालक्ष्मीः पूर्वोक्ता मूलप्रकृतिः । तां तामसीं तमोगुणां प्रमदोत्तमां वनिताश्रेष्ठां प्रोवाच । तव नामानि ददामि । तैश्च यानि ते कर्माणि तान्यपि ददाम्युपदिशामि । नाम्नामन्वर्थत्वात्तदनुरोधेन त्वं कर्माणि कुर्वित्यर्थः ॥

अथ पाठान्तरादि प्रमदोत्तमेति प्रथमान्तः पाठः क्वचित् तत्पक्षे तन्महालक्ष्म्या विशेषणम् ॥ १० ॥

तमोगुणकार्यानुरूपाणि दशनामान्याह **महामायेत्यादिना** । महामाया जगन्मोहकरी शक्तिः । कालयति क्षिपति संहरति चराचरमिति कालः । महानपरिच्छिशक्तिश्चासौ कालश्च महाकालो जगत्संहारको रुद्रस्तस्य भार्या महाकाली । पुंयोगे ङीष् । महामारी सर्वजगत्संहारकारिणी देवता क्षुधा बुभुक्षा पिपासा । अतिप्रवृद्धयोरेतयोः प्राणहरत्वात्तमोगुणकार्यत्वम् । अशनाया हि मृत्युरिति श्रुतेश्च । अशनाया अशितुमिच्छा ।

निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ॥ ११ ॥

इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ॥
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् ॥१२॥

तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप ॥

यो हि अशितुमिच्छति स एव भक्षणार्थं हन्ति जन्तूनिति **भाष्यकाराः** । निद्रा सुषुप्तिः । तृष्णा परधनादिलिप्सा । एकैव वीरा एकवीरा । सर्वाधिकवीर्यवत्त्वेन सदा दैत्यहिंसापरेत्यर्थः । कालस्य मृत्योरपि राति ददाति भयमिति कालरात्रिः । दुरतिक्रमा । अत्ययोऽतिक्रमे दोषे विनाशे दण्डकृच्छ्रयोरिति **हैमः** । ॥ ११ ॥

इमानीति । इमानि पूर्वोक्तानि कर्मभिः प्रतिपाद्यानि कर्मानुरोधेन दीयमानानि । त्यागो विहासितं दानं स्पर्शनं प्रतिपादनमित्य**मरः** । तत्र नामानि सन्ति । एभिर्नामभिस्ते कर्माणि ज्ञात्वा यो नामानि अधीते जपति स सुखमश्नुते लभते । अशू व्याप्तौ सङ्घाते च । धातूनामनेकार्थत्वम् । इयं प्रथमचरित्रदेवतायाः साक्षात्प्रकृतिः । योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ॥ मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥ इति **प्रथमचरित्रदेवताध्याने वक्ष्यमाणत्वात्** ॥ १२ ॥

अथ तृतीयचरित्रदेवतायाः अष्टभुजायाः साक्षात्प्रकृतिं महासरस्वतीमाह **तामिति** । हे नृप । महालक्ष्मीः तां तामसीं महाकालीं इत्युक्त्वा ततः अतिशुद्धेन गुणान्तरासंसृष्टेनेत्यर्थः । सत्त्वाख्येन सत्त्वनामकेन गुणेन । अपरं पूर्वोक्तरूपाभ्यामन्यत् । तृतीयमित्यर्थः इन्दोश्चन्द्रस्येव प्रभा यस्य तदिन्दुप्रभं श्वेतवर्णमित्यर्थः स्वरूपं दधौ धृतवती । लक्षस्वरूपाया महालक्ष्म्या रजःप्रधानत्रिगुणात्मकत्वादरुणवर्णत्वम् । महाकाल्यास्तमोगुणात्मक-

सत्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ ॥ १३ ॥
अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी ॥
सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥ १४ ॥
महाविद्या महावाणी भारती वाक् सरस्वती ॥
आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी ॥ १५ ॥

त्वात् कृष्णवर्णत्वम् । महासरस्वत्याश्च सत्त्वगुणात्मकत्वात् श्वेतवर्णत्वमिति बोध्यम् ॥ १३ ॥

अथास्याः स्वरूपमाह अक्षमालेति । सा सात्विकी । अक्षा मणयस्तेषां माला अक्षमाला । अङ्कुशः प्रसिद्धः । तयोर्धरा धारिका । वीणापुस्तके धारयतीति वीणापुस्तकधारिणी । ताच्छील्ये णिनिः । वरा सर्वोत्तमा नारी बभूव । ततः सा मूलप्रकृतिर्महालक्ष्मीः अस्यै सात्विक्यै च वक्ष्यमाणानि कर्मप्रतिपादकानि दश नामानि ददौ ॥ १४ ॥

वाक् कार्यानुरूपाणि सात्विक्या दशनामान्याह । महाविद्येति । महाविद्या ब्रह्मविद्या । महावाणी शास्त्रीयव्यवहारहेतुः शब्दः । भारती अर्थपोषकः शब्दः । डुभृञ् धारणपोषणयोः । वाक् सामान्यशब्दः । सरस्वती वाचो देवता । आर्या श्रेष्ठजनवाणी । ब्राह्मी वेदवाणी । कामधेनुः सूनृतावाक् । उक्तं च धेनुं धीराः सूनृतां वाचमाहुरिति । कामान् धिनोति इति कामधेनुः । वेदा गर्भे यस्याः सा वेदगर्भा वेदजननी । गायत्रीछन्दस्या सावित्री ऋक् । गायत्री छन्दसां मातरिति श्रुतेः ॥ धीश्वरी बुध्यधिदेवता । अत्रापि इमानि तव नामानीति श्लोकार्थोऽनुसन्धेयः इयमुत्तमचरित्रदेवतायाः साक्षात्प्रकृतिः । गौरी देहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥ साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणीति वक्ष्यमाणत्वात् ॥

अथ पाठान्तरादि वेदगर्भा च धीश्वरीत्यत्र वेदगर्भा सुरेश्वरीति क्वचित् पाठः ॥ १५ ॥

अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् ॥
युवां जनयतं देव्यौ मिथुने स्वानुरूपतः ॥ १६ ॥

इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ॥

सृष्ट्युपक्रममाह अथेति । अथ महालक्ष्मीः जगतः सृष्टिस्थितिप्रलयकार्याणि मनसि कृत्वा महाकालीं महासरस्वतीं चोवाच । हे देव्यौ युवां स्वानुरूपतः स्वस्वानुरूपे द्वितीयायाः सार्वविभक्तिकस्तसिः । अथ वा स्वानुरूप्येणेति भावप्रधानो निर्देशः तृतीयार्थे तसिः । स्वानुरूपतयेत्यर्थः । आनुरूप्यं च तमः सत्वगुणाभ्याम् । तच्च केवलं पुत्रविषयकमेव । तस्यैव प्राधान्यात् । मिथुने भ्रातृस्वसृरूपे युग्मे न तु दम्पतीरूपे । जनयतमुत्पादयतम् ॥

अथ पाठान्तरादि जनयतामिति प्रथमपुरुषान्तपाठः प्रामादिकः । युवामिति युष्मच्छब्दस्य कर्तृत्वात् ॥ १६ ॥

इतीति । महालक्ष्मीः ते महाकाली महासरस्वत्यौ प्रति । इति उक्त्वा स्वयं हिरण्यस्य सुवर्णस्य गर्भोऽन्तर्भागस्तद्वद्रुचिरौ शोभनौ । आरक्तत्वद्योतनार्थं गर्भपदप्रयोगः । आरक्तवर्णावित्यर्थः । कमले आसने ययोस्तौ कमलासनौ कमलासनाविति भाविस्थितेर्निर्देशः । स्त्री च पुमांश्च स्त्रीपुंसौ । अचतुरेति सूत्रेणाजन्तन्निपातनम् । एवंरूपं मिथुनं स्वसृभ्रातृरूपं युग्मं ससर्ज सृष्टवती स्वयमेव तद्रूपं धृतवतीत्यर्थः । जन्यजनकभावोक्तिस्त्वौपचारिकी । एवमग्रे महाकालीमहासरस्वत्योरपि ज्ञेयम् । एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ॥ इति वक्ष्यमाणत्वात् अत्र हिरण्यगर्भरुचिरावित्यादीनि द्विवचनान्तानि पदानि मिथुनमित्यस्य विशेषणानि । लिङ्गवचनभेदेऽपि विशेषणविशेष्यत्वे न बाध इत्युक्तमेव प्राक् । अत्र हिरण्यगर्भरुचिरावित्यादिद्विवचनान्तविशेषणेषु प्रथमं स्त्रीलिङ्गैकवचनान्तत्वेन समासः । पुनस्तस्यैव पदस्य

हिरण्यगर्भरुचिरौ स्त्रीपुंसौ कमलासनौ ॥१७॥
ब्रह्मन् विधे विरिञ्चेति धातरित्याह तं नरम् ॥
श्रीःपद्मे कमले लक्ष्मीत्याहमाता स्त्रियं च ताम् ॥१८॥

पुल्लिङ्गैकवचनान्तत्वेन । तत उभयोः पुल्लिंगैकशेषः । द्विवचनप्रत्ययः । यथा हिरण्यगर्भरुचिरावित्यत्र प्रथमं हिरण्यगर्भ इव रुचिरा हिरण्यगर्भरुचिरेति स्त्रीलिंगं ततः हिरण्यगर्भरुचिर इति पुल्लिंगं । पश्चात हिरण्यगर्भरुचिरा च हिरण्यगर्भरुचिरश्चेति उभयोर्द्वन्द्वे पुमान् स्त्रियेति पुल्लिङ्गशेषे द्विवचनम् । एवं सर्वत्र ज्ञेयम् ॥

अथ पाठान्तरादि हिरण्यगर्भेत्यत्र हिरण्यगर्भाविति क्वचित् पाठः । तत्पक्षे हिरण्यस्य गर्भौ अन्तर्भागाविव पीतवर्णौ हिरण्यगर्भाविति गम्योपमा ॥ १७ ॥

अथ मिथुनस्य नामकरणं कृतवतीत्याह **ब्रह्मन्नित्यादिना** ॥ माता मिथुनजननी महालक्ष्मीः । तं मिथुनान्तर्गतं नरं पुरुषं पुत्रमित्यर्थः । ब्रह्मन्निति, विधे इति, विरिञ्चेति धातरिति चाह उक्तवती । उक्तनामचतुष्टयेन सम्बोधितवतीत्यर्थः । एवं तां मिथुनान्तर्गतां स्त्रियं च कन्यामित्यर्थः । श्रीरिति पद्मे इति, कमले इति, लक्ष्मीति चाह । सम्बोधितवती। तत्र बृंहयति वर्धयति प्रजा इति ब्रह्मा । विधत्ते जगदिति विधिः । विरचयति सृष्टिमिति विरिञ्चः। अदन्तोऽयम् । विरिञ्चिः स्वरयामध्ये इत्यत्र त्विदन्तः। तथा च **शब्दार्णवः**। विरिञ्चश्च विरिञ्च्यश्च विरिञ्चिश्चेति स त्रिधा ॥ इति ॥ दधाति विदधाति सर्गमिति धाता । इति नामचतुष्टयं पुत्रस्य । अथ कन्यायाः । श्रयति हरिमिति श्रीः । पद्मं हस्तेऽस्या इति पद्मा । मत्वर्थीयोऽच् । एवं कमलेत्यत्रापि । सर्वलक्षणसम्पन्नत्वाल्लक्ष्मीः । इति ॥

महाकाली भारती च मिथुने सृजतः स्म ह ॥
एतयोरपि रूपाणि नामानि च वदामि ते ॥ १९ ॥

नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् ॥
जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥ २० ॥

स रुद्रः शङ्करःस्थाणुः कपर्दी च त्रिलोचनः ॥

अथ पाठान्तरादि स्त्रियं च तामित्यत्र च तां स्त्रियमिति क्वचित् पाठः ॥ १८ ॥

अथ महाकालीमहासरस्वत्योर्मिथुनसर्जनमाह महाकालीत्यादिना। महाकाली तथा भारती महासरस्वती च मिथुने पुत्रकन्यारूपे युग्मे सृजतः स्म सृष्टवत्यौ। लट् स्मे इति भूते लट्। हेति पादपूरणे। एतयोरपि मिथुनयोः। मिथुनगतयोः पुरुषयोः स्त्रियोश्चेत्यर्थः रूपाणि नामानि च ते वदामि ॥

अथ पाठान्तरादि सहेत्यत्र सहेति क्वचित् पाठः ॥ १९ ॥

आदौ महाकालीसृष्टमिथुनगतपुंस्त्रियोः स्वरूपे आह। नीलकण्ठमिति। महाकाली पुरुषं नीलः कण्ठो यस्य तं नीलकण्ठम्॥ रक्ता बाहवो यस्य तं रक्तबाहुम्। अत एव शिवस्य नीललोहित इति नाम। श्वेतानि कण्ठबाह्वतिरिक्तान्यङ्गानि यस्य तं श्वेताङ्गम्। चन्द्रः शेखरः शिरोभूषा यस्य तं चन्द्रशेखरम्। एतादृशं जनयामास। स्त्रियं कन्यां सितां श्वेतवर्णां जनयामास। महालक्ष्मीवत् स्वयमेवोक्तमिथुनगतपुंस्त्रीरूपे स्वीचकारेत्यर्थः

अथ तयोर्नामान्याह स इति। तस्मिन् मिथुने यः पुरुषः स रुद्रादित्रिलोचनान्तनामपञ्चकवानासीत्। तत्र रुत् दुःखं तद्रावयतीति रुद्रः। उक्तं च वायुपुराणे। रुदं द्रावयते यस्माद्रुद्रस्माद्रुद्र इति स्मृत इति।

त्रयी विद्याकामधेनुः सा स्त्री भाषा स्वराक्षरा ॥२१॥
सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप ॥
जनयामास नामानि तयोरपि वदामि ते ॥ २२ ॥
विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ॥

शिवरहस्येऽपि । रुदुःखं दुःखहेतुर्वा तत् द्रावयति यः प्रभुः ॥ रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ॥ इति शं कल्याणं सुखं वा । तत् करोतीति शङ्करः । शमिति मान्तमव्ययम् । कृञो हेत्विति ताच्छील्ये करोतेष्टः । तिष्ठतीति स्थाणुः स्थिर इत्यर्थः । कपर्दो जटाजूटोऽस्यास्तीति कपर्दी । त्रीणि लोचनानि कर्मोपासनाज्ञानविषयकाणि यस्य स त्रिलोचनः । कीलकग्रन्थे त्रिवेदीदिव्यचक्षुषे इत्युक्तम् । अथ या स्त्री सा त्रयीत्यादिनामषट्कवती । तत्र त्रयी वेदत्रयी । विद्या अध्यात्मविद्या । कामान् धिनोति पूरयतीति कामधेनुः । भाषा वाक् । स्वरति शब्दायते इति स्वरा वाग्मिनीत्यर्थः । स्वृशब्दोपतापयोः । न क्षरतीत्यक्षरा वर्णरूपा ॥

अथ पाठान्तरादि । सा स्त्री भाषेत्यत्र शास्त्रीभाषेति क्वचित् पाठः । तत्पक्षे शास्त्रीभाषेत्येकं नाम ॥ २१ ॥

अथ सरस्वत्या मिथुनसृष्टिं तद्गतस्त्रीपुंसयो रूपे चाह । सरस्वतीति । हे नृप सरस्वती गौरीं पीतवर्णां स्त्रियं कन्याम् । कृष्णं कृष्णवर्णं पुरुषं पुत्रं च । जनयामास । स्वयमेव तादृशे रूपे धारयामासेत्यर्थः । तयोरपि नामानि ते वदामि ॥ २२ ॥

अथ तयोर्नामान्याह विष्णुरिति । वेवेष्टि व्याप्नोतीति विष्णुः । कर्षति भक्तानां संसारचक्रमिति कृष्णः । कृष्णवर्णत्वाद्वा कृष्णः । हृषीकेशः हृषीकाणामिन्द्रियाणामीशो सर्वेन्द्रियप्रवर्तक इत्यर्थः । वासयति स्थापयति विनाशाद्-

उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा ॥२३॥

क्षिति जगदिति वासुः स चासौ देवश्च वासुदेवः । वासनाद्वासुदेवोऽसि वासितं भुवनत्रयम् इति स्मृतेः । अथवा वसति भूतेषु वसन्ति वा भूतान्यस्मिन्निति वासुः । स चासौ देवश्चेति पूर्ववत् । तथा च **विष्णुपुराणम्** । सर्वत्रादौ समस्तं वा वसत्यत्रैव वा यतः ॥ तेनासौ वासुदेवेति विद्वद्भिः परिकीर्तितः ॥ इति ॥ जननं जनः जन्म तमर्दयति हिनस्तीति जनार्दनः । मोक्षद इत्यर्थः । शत्रुजनहन्ता वा ॥ इति पञ्च पुरुषस्य नामानि ॥ अथ स्त्रियाः । उमा । देव्याः प्रणवरूपा । उक्तं च **लिङ्गपुराणे** शिवेन पार्वतीं प्रति । अकारोकारमकारा मदीये प्रणवे स्थिताः ॥ उकारं च मकारं तथाकारं क्रमेरितम् ॥ त्वदीयं प्रणवं विद्धि त्रिमात्रं प्लुतमुत्तमम् ॥ इति ॥ उमापदस्यान्येऽप्यर्था देवीकवचे उक्ताः गौरवर्णत्वाद्गौरी । पीतो गौरो हरिद्राभ इत्यमरः ॥ सतीति भाविपातिव्रत्यसूचकं नाम । तदुक्तं **देवीभागवते** । सतीत्यनन्यसामान्यपातिव्रत्येन गीयते ॥ इति ॥ **आचार्यभगवत्पूज्यपादैरप्युक्तम्** ॥ कलत्रं वैधात्रं कति कति भजन्ते न कवयः श्रियो देव्याः को वा भवति न पतिः कैरपि धनैः ॥ महादेवं हित्वा तव सति सतीनाम च रमे कुचाभ्यामासङ्गः कुरवकतरोरप्यसुलभः ॥ इति ॥ चण्डते कुप्यति खलेभ्य इति चण्डी । सुन्दरी निरतिशयलावण्योपेतत्वात्तन्नाम्नी **सुन्दरीतन्त्रादौ** प्रसिद्धा । सुभगा महैश्वर्यवती इदमपि देव्यास्तन्त्रान्तरप्रसिद्धं नामैव ॥ शिवा परममङ्गलस्वरूपा । **देवीपुराणे** तु । शिवा मुक्तिः समाख्याता योगिनां मोक्षदायिनी ॥ शिवाय यतते देवी ततो लोके शिवा स्मृता ॥ इति शिवापदनिरुक्तिरुक्ता । **इति सप्तनामानि स्त्रियाः** ॥

अथ पाठान्तरादि शिवेत्यत्र शुभेति क्वचित् पाठः ॥ २३ ॥

एवं युवतयः सत्यः पुरुषत्वं प्रपेदिरे ॥
चक्षुष्मन्तोऽनुपश्यन्ति नेतरेऽतद्विदो जनाः ॥ २४ ॥

ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम् ॥
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥२५॥

उपसंहरन्ति । **एवमिति** । एवमुक्तप्रकारेण । महालक्ष्मी महाकाली महासरस्वत्यः युवतयः स्त्रियः सत्यः पुरुषत्वं प्रपेदिरे क्रमात् ब्रह्मविष्णुरुद्रत्वं प्रापुः । स्वयमेव ब्रह्मादिपुरुषरूपत्वं स्वीचक्रुरित्यर्थः । आसां स्त्रीपुंसोभयात्मकत्वेऽपि स्त्रीत्वस्य प्रकृत्यैव सिद्धत्वादागन्तुकपुरुषत्वमात्रस्य प्राप्तिविशेषादुक्ता । एतदेकैकस्याः स्त्रीपुंसोभयरूपत्वं चक्षुष्मन्तः अद्वैतज्ञानिन एवानुपश्यन्ति जानन्ति । इतरे अतद्विदः भेदवादिनः जनाः नानुपश्यन्ति ॥

अथ पाठान्तरादि । सत्य इत्यत्र सद्य इति क्वचित् पाठः ॥ २४ ॥

अथ जगतः सर्गाद्यर्थं महालक्ष्मीः पुत्रत्रयस्य कन्यात्रयस्य च वैवाहिकसम्बन्धं घटयामासेत्याह **ब्रह्मणे इति** । हे नृप राजन् सुरथ महालक्ष्मीः । ब्रह्मणे स्वपुत्राय त्रयीं महाकाल्याः कन्यां पत्नीं प्रददौ ॥ पत्नीत्वेनार्पयामास । एतेन त्रयी विद्या कामधेनुरित्यत्र त्रयीविद्येत्येकं नामेति केषांचिदुक्तिर्भ्रम एव । रुद्राय महाकाल्याः पुत्राय वरं सद्भर्तारं ददातीति वरदा तां गौरीम् । सद्भर्तृलाभाय विवाहे गौरी आराध्यते कुमारिकाभिरिति लोके प्रसिद्धमेव । सरस्वत्याः कन्यां पत्नीं प्रददौ । वासुदेवाय सरस्वत्याः पुत्राय श्रियं स्वकन्यां पत्नीं प्रददौ ॥ देवतात्रये प्रथमोत्पन्नत्वेन महालक्ष्म्याः प्राधान्यात्तस्या एव सर्वत्र दातृत्वम् ॥

अथ पाठान्तरादि । वरदेति प्रथमान्तः पाठः क्वचित् । तत्पक्षे तन्महालक्ष्म्या विशेषणम् वरदा इष्टदेत्यर्थः ॥ २५ ॥

स्वरया सह सम्भूय विरिञ्चोऽण्डमजीजनत् ॥
बिभेद भगवान् रुद्रस्तद्गौर्या सह वीर्यवान् ॥ २६ ॥

अण्डमध्ये प्रधानादि कार्यजातमभून्नृप ॥
महाभूतात्मकं सर्वं जगत् स्थावरजङ्गमम् ॥ २७ ॥

पुपोष पालयामास तल्लक्ष्म्या सह केशवः ॥
महालक्ष्मीरेवमजा राजन् सर्वेश्वरेश्वरी ॥ २८ ॥

अथ जगत्सर्गमाह **स्वरयेति** । विरिञ्चो ब्रह्मा स्वरया स्वपत्न्या सह सम्भूय सङ्गम्य मिथुनीभूयेत्यर्थः । अण्डं चराचरावरणकोषं ब्रह्माण्डाख्यमजीजनत् जनयति स्म । जनेर्ण्यन्ताल्लुङि रूपम् । वीर्यवान् भगवान् रुद्रः गौर्या स्वपत्न्या सह सम्भूय तदण्डं बिभेद शकलीचकार । वीर्यवानितिविशेषणेनाण्डस्य दार्ढ्यं ध्वन्यते ॥ २६ ॥

अण्डेति । हे नृप अण्डमध्ये शकलीकृताण्डमध्ये प्रधानादि प्रधानं महदहङ्कारः, पञ्चतन्मात्राणि इत्यष्टौ प्रकृतयः दशेन्द्रियाणि, मनः, पञ्च महाभूतानीति षोडश विकृतयः । एवं चतुर्विंशति तत्वानि । एतत् कार्यजातं तथा पञ्चीकृतपञ्चमहाभूतात्मकं सर्वं स्थावरजङ्गमात्मकं जगच्चाभूदुत्पन्नम् ॥ २७ ॥

पुपोषेति । केशवः विष्णुः लक्ष्म्या सह सम्भूय तत्पूर्वश्लोकोक्तं प्रधानादिस्थावरजङ्गमान्तं जगत् पुपोष वर्धयामास । पालयामास ररक्ष च । **अथोपसंहरति महालक्ष्मीरेवमिति** । हे राजन् एवं पूर्वोक्तप्रकारेण अजा जन्मशून्या । उपलक्षणमेतदनन्तत्त्वस्य च । महालक्ष्मीः सर्वेश्वरेश्वरी । सर्वेश्वरीणां महाकाल्यादिसर्वशक्तीनाम् । तथा सर्वेश्वराणां ब्रह्मादिदेवानां चेश्वरी । नियन्त्रीत्यर्थः । अस्ति । अत्र सर्वेश्वरशब्दः पुमान् स्त्रियेत्येकशेषेण सर्वेश्वरीसर्वेश्वरोभयग्राहकः ।

निराकारा च साकारा सैव नानाभिधानभृत् ॥
नामान्तरैर्निरूप्यैषा नाम्ना चान्या न केनचित् ॥२९॥
ॐम्

अथ पाठान्तरादि । एवमजेत्यत्र एवमतेति महाराजेति वा । राजन् सर्वेश्वरेश्वरीत्यत्र सर्वसत्त्वमयीश्वरीति च क्वचित् पठ्यते । प्रथमार्धानन्तरं सञ्जहार जगत्सर्वं महागौर्यां महेश्वर इत्यर्धमधिकं क्वचित् पठ्यते ॥ २८ ॥

निराकारेति । इयं निराकारा साकारा चेति द्विधा । उक्तं च प्राक् । लक्ष्यालक्ष्यस्वरूपा सेति । सैव अनन्तरोक्ता साकारैव । नानाप्रकाराणि अभिधानानि नामानि बिभर्तीति । नानाभिधानभृत् । अस्ति । अत एषैव साकारैव । नानारूपधारित्वान्नामान्तरैर्नानानामभिर्निरूप्या निर्देश्यास्ति । उक्तं च **सूर्यसंहितायाम्** । अस्या रूपाण्यनन्तानि वक्तुं नामान्तराणि च ॥ न शक्यानि मुनिश्रेष्ठ कल्पकोटिशतैरपि ॥ इति ॥ अत एव पूर्वं महाकाली महासरस्वतीप्रादुर्भावप्रसङ्गे अपरं रूपं बभार अपरं रूपं दधाविति च महालक्ष्म्या एव तदुभयरूपधारित्वमुक्तम् । अन्या निराकारा केनचिन्नाम्ना चकाराद्रूपान्तरेणापि न निरूप्यास्ति ॥

अथ पाठान्तरादि नाम्ना नान्या न केनचिदित्यत्र नाम्ना नान्येन केनचिदिति क्वचित् पठ्यते तदा नाम्ना न अन्या इन, केनचिदिति तत्र पदच्छेदः । इनेति राज्ञः सम्बोधनम् । इनः सूर्ये प्रभावित्य**मरः** । हे प्रभो इत्यर्थः अन्यत्समानं ॥ २९ ॥

इति प्राधानिकं रहस्यम् ॥

इतीति । इतीत्यव्ययं समाप्त्यर्थकम् । समाप्तमित्यर्थः । प्रधानं मूलप्रकृतिमधिकृत्य कृतं प्राधानिकम् । रहसि भवं रहस्यं गोपनीयमित्यर्थः ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
प्राधानिकरहस्यव्याख्या ॥

अथ वैकृतरहस्यम् ॥ वैकृतरहस्यस्य सुमेधा ऋषिः । अनुष्टुप् छन्दः । दशभुजाष्टादशभुजाष्टभुजात्मकविकृतित्रयस्वरूपिणी श्रीमहालक्ष्मीर्देवता । देवीमाहात्म्योत्तराङ्गत्वेन जपे वि० ॥

ॐ ऋषिरुवाच ॥

त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता ॥
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥ १ ॥
योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ॥

ऋषिरिति ॥

पूर्वरहस्ये सैव नानाभिधानभृदित्युक्तं तत्र कानिचिन्नामानि दर्शयति । त्रिगुणेति । या देवी मूलप्रकृतिः पूर्वरहस्ये तुभ्यं व्यष्टिरूपैस्त्रिगुणा महालक्ष्मीः तामसी महाकाली सात्त्विकी महासरस्वती इति त्रिधा उदिता उक्ता सा समष्टिरूपेण एकैव सती शर्वादिनामपञ्चकेन उदीर्यते निर्दिश्यते। तत्र शृणाति शत्रूनिति शर्वा । शृणातेरौणादिको वप्रत्ययः । चण्डिकादिपदानि पूर्वं व्याख्यातानि एषां । नामपञ्चकोक्तिरुपलक्षणमनन्तनाम्नाम् । उक्तं च **बृहन्नारदीये** । उमेति केचिदाहुस्तां शक्तिं लक्ष्मीं तथापरे ॥ भारती भगवत्यार्या गिरिजेत्यम्बिकेति च ॥ दुर्गेति भद्रकालीति चण्डी माहेश्वरीति च ॥ कौमारी वैष्णवी श्रीश्च वाराही कमलेति च ॥ ब्राह्मीति विद्याविद्येति शिवा मायेति चापरे ॥ प्रकृतिश्च परेत्यादि वदन्ति परमर्षयः ॥ इति ॥

अथ ऋषिः आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ॥ विधिनेति राज्ञः प्रश्नानुरोधेन सर्वासां प्रकृतिविकृतीनां स्वरूपाणि पूजाविधिं च विवक्षुः प्रकृतिस्वरूपाणां पूर्वरहस्ये उक्तत्वादत्र विकृतीनां स्वरूपाणि वदन्नादौ

मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥ २ ॥
दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ॥
विशालया रोचमाना त्रिंशल्लोचनमालया ॥ ३ ॥
स्फुरद्दशनदंष्ट्राभा भीमरूपापि भूमिप ॥
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम् ॥ ४ ॥

प्रथमचरित्रदेवतायाः स्वरूपमाह **योगनिद्रेत्यादिना** । या मया तुभ्यं हरेर्योगनिद्रा तमोगुणा महाकाली प्रकृतिविकृत्योरभेदात्तन्नाम्नी महाकाल्याविकृतिः । प्रथमचरिते एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥ विष्णोः-प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥ निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥ इत्येवंरूपोक्ता ॥ किं च यां अम्बुजासनो ब्रह्मा मधुकैटभनाशार्थं विष्णुं प्रबोधयितुमिति शेषः । त्वं स्वाहा त्वं स्वधेत्यादिना तुष्टाव स्तुतवान् सेति शेषः ॥ २ ॥

दशवक्त्रेति । दश वक्त्राणि मुखानि यस्याः सा दशवक्त्रा । एवं दशभुजा दशपादा च । अञ्जनस्य कज्जलस्येव प्रभा यस्याः साञ्जनप्रभा कृष्णवर्णेत्यर्थः । विशालया दीर्घया प्रतिवक्त्रं त्रिसङ्ख्यत्वात्त्रिंशतो लोचनानां मालया पङ्क्त्या रोचमाना दीप्यमाना । माला तु पङ्क्तौ पुष्पादिदामनीति **हैमः** ॥ ३ ॥

स्फुरदिति । दशना दन्ताः दंष्ट्राश्च समाहृता दशनदंष्ट्रम् । तस्याभा प्रभा । स्फुरन्ती भास्वरा दशनदंष्ट्राभा यस्याः सा स्फुरद्दशनदंष्ट्राभा । अत एव भीमं भयावहं रूपं यस्याः सा भीमरूपा । एवं प्रकारापि सा हे भूमिप राजन् । रुपमाकारसौन्दर्यम् । सौभाग्यं सुभगत्वं महैश्वर्यम् । कान्तिर्लावण्यं तेजो वा । तासाम् । तथा महाश्रियाममितसम्पदाम् । प्रतिष्ठा अधिष्ठानमस्ति । तद्दात्रीत्यर्थः ॥

अथ पाठान्तरादि । दंष्ट्राभेत्यत्र दंष्ट्रासेति क्वचित् पाठः ॥ ४ ॥

खड्गबाणगदाशूलशङ्खचक्रभृशुण्डिभृत् ॥
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ॥ ५ ॥

एषा सा वैष्णवी माया महाकाली दुरत्यया ॥
आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम् ॥ ६ ॥

सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा ॥
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥ ७ ॥

अथस्या आयुधान्याह खड्गेति । खड्गादीनि षट् प्रसिद्धानि । भृशुण्डिर्ध्यानश्लोकेषु व्याख्याता । एतासां समाहारः खड्गबाणगदाशूलशङ्खचक्रभृशुण्डि । तत् बिभर्तीति खड्गबाणगदाशूलशङ्खचक्रभृशुण्डिभृत् । क्विप् । परिघम् । अयमपि व्याख्यातपूर्वः । कार्मुकं धनुः । निश्च्योतत् गलद्रुधिरं यस्मात्तच्छीर्षं नृशीर्षं च दधौ । दक्षिणाधःकरमारभ्य वामाधःकरपर्यन्तं प्रादक्षिण्येन दशायुधानि धृतवतीत्यर्थः ॥ ५ ॥

अथैतत्पूजायाः फलमाह । एषेति । सा पूर्वोक्ता एषा वैष्णवी विष्णुशरीरान्निर्गता माया जगन्मोहिनी दुरत्यया विनाशरहिता महाकालीतन्नाम्नी प्रथमचरित्रदेवता आराधिता पूजिता सती पूजाकर्तुः पूजकस्य चराचरं जङ्गमस्थावरात्मकं विश्वं वशीकुर्यात् वशं नयेत् । अभूततद्भावे च्विः ॥ ६ ॥

अथ महालक्ष्म्यवतारभूताया मध्यमचरित्रदेवतायाः स्वरूपमाह । सर्वेति । या सर्वेषां देवानां शरीरेभ्यः शरीरोत्पन्नतेजोभ्यः सकाशादाविर्भूता समुत्पन्ना अमितप्रभा त्विषा व्याप्तलोकत्रयेत्यर्थः । महिषमर्दिनी महिषासुरहन्त्री मध्यमचरित्रदेवतास्ति सा साक्षात् त्रिगुणा महालक्ष्मीरस्ति । महालक्ष्म्याः साक्षाद्विकृतिरित्यर्थः ॥ ७ ॥

श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ॥
रक्तमध्या रक्तपादा रक्तजङ्घोरुरुन्मदा ॥ ८ ॥
सुचित्रजघना चित्रमाल्याम्बरविभूषणा ॥

तां विशिनष्टि **श्वेताननेत्यादिना** । श्वेतं शङ्करतेजोजातत्वाच्छुभ्रवर्णं आननं मुखमण्डलं यस्याः सा श्वेतानना। नीलाः विष्णुतेजोजातत्वात् कृष्णवर्णा भुजा यस्याः सा नीलभुजा । सुश्वेतं चन्द्रतेजोजातत्वादतिशुभ्रं स्तनमण्डलं वर्तुलाकृति स्तनद्वयं यस्याः सा सुश्वेतस्तनमण्डला । एवं रक्तमध्या रक्तपादा रक्तजङ्घोरुश्च इन्द्रब्रह्मवरुणानां तप्तस्वर्णवर्णत्वात्तत्तेजोजातानां मध्यस्य पादयोर्जङ्घोरुप्रदेशस्य च रक्तवर्णत्वम् । रक्तजङ्घोरुरित्यत्रादौ जङ्घोरुपदस्य समाहारद्वन्द्वस्ततो रक्तपदेन सह बहुव्रीहिः। उद्रिक्तः मदः मधुपानजन्यश्चित्तविकारो यस्याः सा उन्मदा । उक्तं च **तृतीयाध्याये** । ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥ पपौ पुनः पुनश्चैव जहासारुणलोचनेति । उवाच तं मदाद्धूतमुखरागाकुलाक्षरमिति च ॥

अथ पाठान्तरादि । रक्तजङ्घोरुरित्यत्र नीलजङ्घोरुरिति क्वचित् पाठः ॥ ८ ॥

सुचित्रेति । पुनः कीदृशी । सुचित्रं नानावर्णं जघनं तदुपलक्षितो नितम्बश्च यस्याः सा सुचित्रजघना भूतेजसा यज्जघनं प्रजज्ञे इति **वामनपुराणात्** । नितम्बस्तेजसाभुव इति **देवीमहात्म्याच्च** । जघननितम्बयोः पृथ्वीतेजःसमुद्भूतत्वात् पृथिव्याश्च नानावस्त्वात्मकत्वेन तत्तेजसः सुचित्रत्वाज्जघननितम्बयोः सुचित्रत्वम् । श्रिया शातकुम्भद्युतिस्पर्धिकान्त्या धरण्या च दूर्वादलश्यामलाङ्ग्या ॥ कलत्रद्वयेनामुना भूषिताय त्रिलोकीगृहस्थाय विष्णो नमस्ते ॥ इति धरण्या श्यामलवर्णोक्तिस्तु मूर्तिभेदात् यथा शिवस्य शुक्लवर्णत्वेन प्रसिद्धत्वेऽपि **शिवकवचादौ** नीलरक्तपीतवर्णत्वेनोक्तिः ।

चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ॥ ९ ॥
अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् ॥ १० ॥
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ॥ ११ ॥

चित्राणि माल्यानि मालाः अम्बरे वस्त्रे विभूषणानि च यस्याः सा चित्रमाल्याम्बरविभूषणा । तत्र माल्यानां चित्रत्वं नानावर्णपुष्पसमुच्चयग्रथितत्वात् वस्त्रयोर्नानावर्णरञ्जितत्वात् विभूषणानां नानावर्णरत्नघटितत्वात् इति बोध्यम्। चित्रं चन्दनकाश्मीरजमृगमदाद्यनेकसुगन्धिद्रव्यकल्पितत्वेन कर्बुरवर्णमनुलेपनं यस्याः सा चित्रानुलेपना । कान्तिर्लावण्यम् । रूपमाकारसौष्ठवम् । सौभाग्यं महैश्वर्यम् । तैः शालते शोभते इति कान्तिरूपसौभाग्यशालिनी । शाडृ श्लाघायाम् । सावर्ण्यात् डकारस्य लकार इति काश्यप इति तत्त्वबोधिनीकारः । धातूनामनेकार्थत्वाच्छोभार्थकत्वम् ॥ ९ ॥

अष्टादशभुजेति । सा सहस्रभुजा सती दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थितामित्युक्तेरिति भावः । अष्टादशभुजैव पूज्या सहस्रभुजप्रतिमाया दुर्घटत्वादिति भावः । अष्टादशभुजास्वरूपे दक्षिणाधःकरक्रमात् दक्षिणाधःकरमारभ्य वामाधःकरपर्यन्तं प्रादक्षिण्यक्रमेणेत्यर्थः । आयुधानि वक्ष्यन्ते । एषु अक्षमालाकमलकमण्डल्वादीनां केषाञ्चिदनायुधत्वेऽप्यायुधत्वेनोक्तिरायुधानां बाहुल्यात् ॥ १० ॥

अथास्या आयुधान्याह **अक्षमालेति** । अक्षा मणयस्तेषां माला अक्षमाला । अक्षपदोपादानं पुष्पादिनिवृत्त्यर्थम् । असिः खड्गः । कुलिशं वज्रम् । परशुः कुठारः । पाशकः पाशः । बन्धनोपयुक्तो विशिष्टरचनोपेतरज्जुघटितआयुधविशेषः । अन्यानि प्रसिद्धानि ॥ ११ ॥

शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ॥
अलङ्कृतभुजामेभिरायुधैः कमलासनाम् ॥ १२ ॥
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥
पूजयन् सर्वलोकानां स देवानां प्रभुर्भवेत् ॥१३॥
गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥

शक्तिरिति । शक्तिर्ध्यानश्लोकेषु व्याख्याता । दण्डः कालदण्डः । कालदण्डाद्यमोदण्डमिति पूर्वमुक्तत्वात् । चर्म खेटकम् । चापं धनुः । चापशब्दस्य क्लीबत्वं छान्दसम् । पानपात्रं सुराभाजनम् । कमण्डलुः सजलकलशः । एभिः आयुधैः अलङ्कृता भूषिता भुजा यस्यास्ताम् । तत्र अक्षमालादिपरश्वन्तानि नवायुधानि सर्वाधःकरमारभ्यान्त्योर्ध्वकरपर्यन्तं नवसु दक्षभुजेषु । तद्विपरीत्येन शङ्खादिकमण्डल्वन्तानि नवायुधानि नवसु वामभुजेष्विति ज्ञेयम् । कमलासनां कमलोपविष्टाम् ॥ १२ ॥

एतत्पूजायाः फलमाह **सर्वेति** । हे नृप राजन् । सर्वदेवमयीं सर्वदेवरूपाम् । सर्वतेजःसमुद्भूतत्वादिति भावः । विकारे मयट् । ईशां ईश्वरीम् । इमां महालक्ष्मीं महालक्ष्म्या विकृतिं मध्यमचरित्रदेवतां पूजयन् पुरुषः स देवानां देवैः सहितानां सर्वलोकानां सर्वजनानां सर्वभुवनानां वा प्रभुः स्वामी भवेत् ॥

अथ पाठान्तरादि । पूजयन्नित्यत्र पूजयेदिति क्वचित् पाठः । तत्पक्षे सदेवानामित्यत्र स इति पृथक् पदं य इत्यस्याध्याहारश्च । तथा च यः पूजयेत् स सर्वलोकानां देवानां च प्रभुर्भवेदिति योजना । सर्वदेवानां सलोकानामित्यपि क्वचित् पाठः ॥ १३ ॥

अथ महासरस्वतीविकृतेरुत्तमचरित्रदेवतायाः स्वरूपमाह । **गौरीदेहादिति** । या गौरीदेहात् पार्वतीशरीरकोशात् समुद्भूता कौशिकीनाम्ना

साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी ॥ १४ ॥
दधौ सा ष्टभुजा बाणमुसले शूलचक्रभृत् ॥
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥ १५ ॥
एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥
निशुम्भमथिनी देवी शुम्भासुरनिबर्हिणी ॥ १६ ॥
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥

समुत्पन्ना सत्त्वमेव एको गुण आश्रयो यस्याः सा सत्त्वैकगुणाश्रया । शुम्भासुरस्य निबर्हिणी हन्त्री तुभ्यं मया उत्तमचरिते प्रोक्ता सा साक्षात्सरस्वती । सरस्वत्यवतारभूतेत्यर्थः । अथ वा या गौरीदेहात्समुद्भूता सत्त्वैकगुणाश्रया शुम्भासुरनिबर्हिणी सा साक्षात् सरस्वती प्रोक्ता । पुराणेष्विति शेषः ॥ १४॥

अथास्या आयुधान्याह **दधाविति** । हे वसुधाधिप महीपते अष्टौ भुजा यस्याः साष्टभुजा सा सरस्वती । शूलचक्रे बिभर्तीति शूलचक्रभृत् सती बाणमुसले शङ्खादिचतुष्टयं च दधौ धृतवती ॥

अथ पाठान्तरादि शूलचक्रभृदित्यत्र शूलचक्रके इति क्वचित् पाठः । तदा तयोर्दधावित्यनेनान्वयः ॥ १५ ॥

अस्याः पूजनस्य फलमाह **एषेति** । मथ्नाति मर्दयति हिनस्तीति मथनी कर्तरि ल्युट् निशुम्भस्य मथनी निशुम्भमथनी । शुम्भासुरं निबर्हयतीति शुम्भासुरनिबर्हिणी एषा देवी । भक्त्या सम्पूजिता सती सर्वज्ञत्वं सर्ववस्तुविषयकं ज्ञानं प्रयच्छति ददाति ॥

अथ पाठान्तरादि मथनीत्यत्र मथिनीति क्वचित् पाठः ॥ १६ ॥

इतीति । हे पार्थिव पृथिव्या ईश्वर राजन् । इति मूर्तीनां विकृतीनां चरित्रत्रयदेवतानां स्वरूपाणि तवोक्तानि । अथ जगन्मातुः प्राधानि-

**उपासनं जगन्मातुः पृथगासां निशामय ॥ १७ ॥
महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥
दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ॥ १८ ॥
विरिञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ॥**

कोक्ताया महालक्ष्म्याः तथा आसां सम्प्रत्युक्तस्वरूपाणां चरित्रत्रयदेवतानां च पृथक् भिन्नतया उपासनमाराधनविधानं निशामय शृणु। निशामयेतिक्रियापदविषये प्रथमाध्यायस्य प्रथमश्लोके विचारितम् ॥ १७ ॥

अथादौ प्राधानिकरहस्योक्ताया मूलप्रकृतेश्चतुर्भुजमहालक्ष्म्याः पूजायामङ्गदेवतास्तासां स्थानानि चाह **महालक्ष्मीरित्यादिना** । यदा महालक्ष्मीस्तदाख्या प्राधानिकरहस्योक्ता मूलप्रकृतिः चतुर्भुजमूर्तिः पूज्या स्याचदा दक्षिणोत्तरयोः प्रसिद्धयोरवाच्युदीच्योर्दिशोः प्राधानिकोक्ते चतुर्भुजे महाकालीमहासरस्वती चेत्युभे देवते पूज्ये । एतत् पूर्वाभिमुखपूजकपुरःस्थितपश्चिमाभिमुखमहालक्ष्म्यभिप्रायेणोक्तम् । तेन महालक्ष्म्या वामभागे महाकाली दक्षिणभागे महासरस्वतीति पर्यवसन्नम् । एतेन पूजकस्य दिगन्तरमुखत्वे दिग्विशेषानपेक्षं महाकालीमहासरस्वत्योर्महालक्ष्म्या वामदक्षिणभागयोः पूजनमिति सिद्धम् । उक्तं च **चण्डिकार्चनरहस्ये** । त्रिकोणे तु महालक्ष्मीं मध्यभागस्थितां यजेत् ॥ तस्या वामे महाकालीं दक्षिणे च सरस्वतीम् ॥ इति ॥ पृष्ठतः महालक्ष्म्याः पश्चाद्भागे वक्ष्यमाणं मिथुनत्रयं पूज्यम् ॥ १८ ॥

महालक्ष्म्याः पृष्ठतो मिथुनत्रयस्य पूजोक्ता तस्य स्थानविभागं दर्शयति **विरिञ्चिरित्यादिना** । विरिञ्चिः ब्रह्मा स्ववामभागस्थितया स्वरया तन्नाम्न्या निजपत्न्या सह मध्ये अर्थात् स्वमातुर्महालक्ष्म्याः पृष्ठभागे पूज्यः । रुद्रस्य वामभागस्थितया गौर्या तन्नाम्न्या निजपत्न्या सह पूजकेन दक्षिणे स्वदक्षिणभागेऽर्थात्तन्मातुर्महाकाल्याः पृष्ठभागे पूज्यः । हृषीकेशो विष्णुः

वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम् ॥ १९ ॥
अष्टादशभुजा मध्ये वामे चास्या दशानना ॥

स्ववामभागस्थितया लक्ष्म्या तन्नाम्न्या निजपत्न्या सह पूजकेन वामे स्ववामभागेऽर्थात्तन्मातुर्महासरस्वत्याः पृष्ठभागे पूज्यः । अत्र विशेषानुक्तेर्दक्षिणवामभागौ कर्तुः पूजकस्य ग्राह्यौ । पुरतः महालक्ष्म्याः पुरोभागे वक्ष्यमाणं देवतात्रयं पूज्यम् ॥

अथ पाठान्तरादि । पुरत इत्यत्र इत्येवमिति पाठः क्वचित् । सचोत्तरश्लोकेनात्यन्तासङ्गतत्वान्नादेयः ॥ १९ ॥

पुरतो देवतात्रयं पूज्यमित्युक्तं तत्र ता देवतास्तासां स्थानानि चाह **अष्टादशभुजेत्यादिना** । मध्ये महालक्ष्म्याः पुरोभागे इत्यर्थः । अष्टादशभुजा महालक्ष्म्याविकृतिर्मध्यमचरित्रदेवता पूज्या । अस्या अष्टादशभुजाया वामे अर्थान्महाकाल्याः पुरोभागे दशानना महाकाल्या विकृतिः प्रथमचरित्रदेवता पूज्या । अष्टदशभुजाया दक्षिणे अर्थान्महास्वरस्वत्याः पुरोभागे अष्टभुजा महासरस्वत्या विकृतिरुत्तमचरित्रदेवता पूज्या । अत्रेत्थं व्यवस्था । यत्र देवतास्थापनवचनेषु महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥ दक्षिणोत्तरयोः पूज्ये इति दक्षिणोत्तरपदाभ्यां स्थाननिर्देशः कृतोऽस्ति तत्र प्रासिद्धे दक्षिणोत्तरे दिशौ ग्राह्ये । यत्र च अष्टादशभुजभुजामध्ये वामे चास्या दशानना ॥ दक्षिणे ऽष्टभुजेत्यङ्गदेवतानां वामदक्षिणपदाभ्यां स्थाननिर्देशः मुख्य देवतायाः षष्ठयन्तत्वेन निर्देशश्चास्ति तत्र षष्ठयन्तत्वेन निर्दिष्टाया देवताया वामदक्षिणभागौ ग्राह्यौ । अथ च यत्र विरिञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ॥ वामे लक्ष्म्या हृषीकेश इत्यङ्गदेवतानां दक्षिणवामशब्दाभ्यां स्थाननिर्देशोऽस्ति मुख्यदेवतायाः षष्ठयन्तत्वेन निर्देशश्च नास्ति तत्र कर्तुः पूजकस्य दक्षिणवामभागौ ग्राह्यौ ॥ इति ॥ तथा च मध्ये चतुर्भुजा महालक्ष्मीः । तस्या वामभागे

दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥२०॥
अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥

चर्तुभुजा महाकाली । दक्षिणभागे चतुर्भुजा महासरस्वती। महालक्ष्म्याः पृष्ठे तत्पुत्रस्य विरिञ्चेर्मिथुनम्। पुरोभागे तस्या विकृतिरष्टादशभुजा॥ महाकाल्याः पृष्ठे तत्पुत्रस्य रुद्रस्य मिथुनम्। पुरोभागे तद्विकृतिर्दशानना । महासरस्वत्याः पृष्ठे तत्पुत्रस्य विष्णोर्मिथुनम् । पुरोभागे तद्विकृतिरष्टभुजा इत्येकैककस्यामूर्ध्वाधोधारायां मध्ये मुख्यदेवता तत्पश्चाद्भागे तत्पुत्रमिथुनम् पुरोभागे तद्विकृतिरिति स्वस्ववर्गः स्थितो भवति। केचित् महालक्ष्मीर्यदा पूज्येत्यत्र दक्षिणोत्तरपदाभ्यां महालक्ष्म्या दक्षिणवामभागौ गृहीत्वा महालक्ष्म्यादक्षिणे महाकालीं वामे च महासरस्वतीम् । तथा विरिञ्चिःस्वरया मध्ये इत्यत्र दक्षिणवामभागौ विरिञ्चिमिथुनस्य गृहीत्वा तस्य दक्षिणे रुद्रगौरीमिथुनम् वामे च विष्णुलक्ष्मीमिथुनं पूजयन्ति । तदा महाकाल्याः पृष्ठे सरस्वत्याः पुत्रस्य विष्णोर्मिथुनम् । पुरोभागे च तस्या एव विकृतिरष्टभुजा। महासरस्वत्याः पृष्ठे महाकाल्याः पुत्रस्य रुद्रस्य मिथुनम् पुरोभागे च तस्या एव विकृतिर्दशाननेति सङ्करो भवति । तस्मात्पूर्वोक्तप्रकार एव निर्दोषः । एवं मूलप्रकृतिचतुर्भुजमहालक्ष्मीपूजायां तदङ्गदेवतास्तासां स्थानानि चोक्त्वाऽथेदानीं प्राधानिकोक्तचतुर्भुजमहाकालीमहासरस्वत्योः स्वातन्त्र्येण पूजाया अनावश्यकत्वं दर्शयति लक्ष्मीरिति प्राधानिकोक्तशक्तित्रये लक्ष्मीर्महालक्ष्मीरेव महती मुख्या तस्या एवेतरशक्तिद्वयरूपधारित्वात्तथामहालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वतीति महाकालीमहासरस्वत्योर्महालक्ष्म्यभिन्नतोक्तेश्च । इति हेतोस्तामेव समर्चयेत् । तत्पूजयैवेतरयोः पूजासिद्धेरितिभावः ॥ २० ॥

अथ चरित्रत्रयदेवतारूपाणां विकृतीनां पूजासु तदङ्गदेवताविवक्षुः

दशानना चाष्ट भुजा दक्षिणोत्तरयोस्तदा ॥ २१ ॥

दशानना यदा पूज्या दक्षिणोत्तरयोस्तदा ॥
कालमृत्यू च सम्पूज्यौ सर्वारिष्टप्रशान्तये ॥ २२ ॥

प्रथमं मध्यमचरित्रदेवतायाः पूजायामङ्गदेवते तत्स्थाने चाह **अष्टादशेति** । हे नराधिप राजन् । यदा च एषा वैकृकोक्ता अष्टादशभुजा मध्यमचरित्रदेवता प्राधान्येन पूज्या स्यात्तदा दक्षिणोत्तरयोः प्रसिद्धयोरवाच्युदीच्योर्दिशोः अर्थात् पूर्वदिगभिमुखपूजकसम्मुखावस्थितपश्चिमाभिमुखाष्टादशभुजाया वामदक्षिणपार्श्वयोरित्यर्थः । क्रमाद्दशाननाष्टभुजे पूज्ये । अत्रापि मुख्यदेवताया दिगन्तराभिमुखत्वे पूर्ववत्तस्या दिग्विशेषानपेक्षौ वामदाक्षिणपार्श्वौ ग्राह्यौ । एवमग्रेऽपि ज्ञेयम् ॥ २१ ॥

अथ प्रथमचरित्रदेवताया दशाननायाः पूजायामङ्गदेवते आह **दशाननेति**। यदा प्रथमचरित्रदेवता दशानना प्राधान्येन पूज्या स्यात्तदा प्रसिद्धयोर्दक्षिणोत्तरयोर्दिशोः अर्थाद्दशाननाया वामदक्षिणपार्श्वयोः सर्वारिष्टप्रशान्तये सर्वाशुभपरिहाराय कालो यमः । कृतान्तानेहसोः काल **इत्यमरः** । मृत्युस्तन्नाम्नी देवता च सम्पूज्यौ। केचिद्दशाननेत्यर्धमपठित्वा कालमृत्यू च सम्पूज्यावित्यर्ध पूर्वोक्ताष्टादशभुजापूजाङ्गत्वेनैव योजयन्ति तदयुक्तम् । पूर्वं इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥ उपासनं जगन्मातुः पृथगासां निशामयेति विकृतित्रयपूजाविधिकथनस्य प्रतिज्ञातत्वात् अग्रे च अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः ॥ इत्यवतारत्रयपूजामन्त्राणां कथनात् पूर्वं मध्यमचारित्रदेवतापूजाविधानस्योक्तत्वादग्रे उत्तमचरित्रदेवतापूजाविधेर्वक्ष्यमाणत्वाच्चैकस्याः प्रथमचरित्रदेवतापूजाविधानस्यानुक्तौ कारणाभावात् । तस्माद्दशाननायाः पूजनस्यावश्यकत्वाद्दशाननेत्यर्धं पठनीयमेव ॥ २२ ॥

यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी ॥
नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ ॥ २३ ॥
नमो देव्या इतिस्तोत्रैर्महालक्ष्मीं समर्चयेत् ॥
अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः ॥ २४ ॥

अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥

अथोत्तमचरित्रदेवताया अष्टभुजायाः पूजायामङ्गदेवता आह **यदेति**। यदा शुम्भासुरनिबर्हिणी अष्टभुजा उत्तमचरित्रदेवता प्राधान्येन पूज्या स्यात् तदा अस्या नवशक्तयः पूज्यास्तथा रुद्रविनायकौ च पूज्यौ। तत्र नवशक्तयः ब्राह्मी माहेश्वरी कौमारी वैष्णव्यैन्द्री वाराही नारसिंही चामुण्डा शिवदूत्यः अष्टभुजायाः पुरतः उत्तरसंस्थाः पूज्याः। रुद्रविनायकौ च दक्षिणोत्तरयोरर्थादष्टभुजाया वामदक्षिणपार्श्वयोः पूज्यौ ॥

अथ पाठान्तरादि तदेत्यत्र तथेति क्वचित् पाठः ॥ २३ ॥

अथ पूर्वोक्तदेवतानां पूजामन्त्रानाह **नमो देव्या इति**। तत्र महालक्ष्मीं प्राधानिकोक्तां त्रिगुणां मूलप्रकृतिं नमो देव्यै महादेव्यै इतिस्तोत्रैस्तत्स्तोत्रान्तर्गतमन्त्रैरित्यर्थः समर्चयेत् पूजयेत्। तस्य स्तोत्रस्यादिशक्तिदेवताकत्वादिति भावः। अवतारत्रयस्य अष्टादशभुजादशाननाष्टभुजारूपविकृतित्रयस्यार्चायां ते अवतारा आश्रया विषया येषां ते तदाश्रयाः स्तोत्रमन्त्राः। तत्तच्चरित्रान्तर्गतस्तुतिमन्त्रा इत्यर्थः। उपयोज्या इति शेषः। तथा चाष्टादशभुजापूजायां देव्या यया ततमित्याद्याश्चतुर्थाध्यायस्थाः। दशाननापूजायां त्वं स्वाहा त्वं स्वधेत्याद्याः प्रथमाध्यायस्थाः। अष्टभुजापूजायां देवि प्रपन्नार्तिहरे प्रसीदेत्याद्या एकादशाध्यायस्थाः इति ज्ञेयम् ॥ २४ ॥

अथ आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ॥ विधिना ब्रूहि सकलमिति राज्ञःप्रश्नस्योत्तरमाह। अष्टादशभुजेत्यादिना। हे राजन् त्वया

महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ॥ २५ ॥
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥
महिषान्तकरी येन पूजितासौ जगत्प्रभुः ॥ २६ ॥
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् ॥
अर्घ्यादिभिरलङ्कारैर्गन्धपुष्पैस्तथोत्तमैः ॥ २७ ॥

पूर्वोक्तासु सर्वासु देवीषु एषा अष्टादशभुजा महिषमर्दिनी मध्यमचारित्रदेवतैव पूज्या । यतः सैव महालक्ष्मीरेव दशभुजा महाकाली अष्टभुजा महासरस्वती च प्रोक्ता आदिशक्त्यवतारत्वादिति भावः ॥ २५ ॥

अथैतत्पूजायाः फलमाह ईश्वरीति । पुण्यपापानामीश्वरी पुण्यपापानुसारेण स्वर्गनरकादिफलदा सर्वलोकानां महेश्वरी निग्रहानुग्रहसमर्था । महिषान्तकरी महिषासुरहन्त्री येन पूजिता स्यादसौ पुरुषो जगत्प्रभुः सर्वजगतां स्वामी भवेत् । त्वं तु नष्टं राज्यं प्राप्तुमिच्छस्यतस्त्वयावश्यं पूजनीयेति भावः ॥

अथ पाठान्तरादि असावित्यत्र स इति क्वचित् पाठः ॥ २६ ॥

अथास्याः पूजाविधिमाह पूजयेदिति । जगतां धात्रीं मातरम् । भक्तवत्सलां भक्तेषु दयावतीम् । चण्डिकां अष्टादशभुजां महालक्ष्मीम् । प्रकृतिविकृतिनामभेदादन्योन्यनामान्यन्योन्यासु प्रयुज्यन्ते इत्यष्टादशभुजायां चण्डिकापदप्रयोगो न विरुद्धः । एवमन्यत्रापि ज्ञेयम् । अर्घ्यादिभिः अर्घ्यादिवस्त्रान्तैरुपचारैः । अलङ्कारैर्भूषणैः । तथा उत्तमैरतिसुगन्धिभिर्गन्धपुष्पैः । पूजयेत् । इत आरभ्य भक्तिभावसमन्वितैरित्यन्तं श्लोकत्रयात्मकमेकं वाक्यम् । अवान्तरवाक्यत्रयत्वान्मन्त्रत्रयत्वम् ॥ २७ ॥

धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥
रुधिराक्तेन बलिना मांसेन सुरया नृप ॥ २८ ॥
प्रणामाचमनीयेन चन्दनेन सुगन्धिना ॥

धूपैरिति । धूपैरगुरुगुग्गुल्वादिभिः । दीपैराज्यादिशुद्धस्नेहकार्पासवर्तिकल्पितैः । नानाभक्ष्यसमन्वितैर्नैवेद्यैश्च । भक्ष्यशब्दोऽत्र भक्ष्यभोज्यलेह्यचोष्यपेयात्मकपञ्चविधाभ्यवहार्यस्योपलक्षकः । तत्र भक्ष्यमपूपमोदकादि कठिनम् । भोज्यं मृदु ओदनादि । लेह्यं जिव्हयास्वाद्यशिखरिण्यादि । चोष्यं यस्य रसं गृहीत्वा नीरसभागस्त्यज्यते तदाम्रफलेक्षुकाण्डादि । पेयं क्षीरपानकादि । एतत्सहितैर्नैवेद्यैश्च पूजयेत् । तथा हे नृप त्वादृशः क्षात्रियादिः रुधिराक्तेन रुधिरोक्षितेन मांसेन सुरया च सहितेन बलिनान्नोपहारेण च पूजयेत् । नृपादिविषये-एवायं बलिः । आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ॥ विधिनेति राज्ञः प्रश्नात्तदुद्देशेनैव प्रकृतपूजाविधेः कथितत्वात् । ब्राह्मणेन तु कूष्माण्डेक्षुदण्डनारिकेलदध्यन्नपायसमाषभक्ताद्यन्यतमेनानिषिद्धद्रव्येण बलिर्देयः । ब्राह्मणस्य रुधिरमांससुरादिबलिदाने पातित्योक्तेः । एतद्विषये विस्तरो **नैमित्तिकार्चाप्रकाशे नवरात्रप्रकरणे** द्रष्टव्यः ।

अथ पाठान्तरादि भक्ष्यपदस्थाने भक्तिपदपाठः क्वचित् । तत्पक्षे नानापदेन नवविधा भक्तिर्ग्राह्या । एतदनन्तरं बलिमांसादिपूजेयं विप्रवर्जं मयेरिता ॥ स्वस्वधर्मेण सम्पूज्या नान्यथा सुखदा भवेत् ॥ इत्येकोऽधिकः श्लोकः क्वचित् पठ्यते ॥ २८ ॥

प्रणामेति । प्रणामोऽत्र बलिदानाङ्गम् । मुख्यनमस्कारोपचारस्याग्रे वक्ष्यमाणत्वात् । आचमनीयमाचमनार्थं जलम् तच्चात्र नैवेद्याङ्गम् । उभयोः समाहारे एकवद्भावः । सुगन्धिना चन्दनेन करोद्वर्तनार्थेन । सकर्पूरैस्ताम्बूलैः । ताम्बूलपदेन क्रमुकनागवल्लीदलशुक्त्यादिचूर्णखदिरसारेतिचतुष्टयस्य ग्रहणम् ।

सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः ॥ २९ ॥
वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥
पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥ ३० ॥
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥

कर्पूरेत्युपलक्षणं तदितरेषामेलालवङ्गादिताम्बूलोपयुक्तसर्वसंस्कारकद्रव्याणाम् । ताम्बूलपदं दक्षिणाफलादेरुपलक्षकम् । अतएव बहुवचनान्तत्वेन प्रयोगः । कीदृशैस्ताम्बूलैर्भक्तिभावसमन्वितैः । भक्तिरनुरागः भावः श्रद्धा । ताभ्यां सहितैः । अत्रोक्ता उपचाराः सर्वोपचाराणामुपलक्षकाः । तेन सर्वोपचारैः पूजयेदित्यर्थः ॥ २९ ॥

एतत्पूजाङ्गत्वेन महिषासुरपूजां विधत्ते । **वामभाग** इति देव्या अष्टादशभुजाया वामभागे किञ्चिदग्रतः । छिन्नशीर्षं महिषं महासुरं पूजयेत् । येन महिषासुरेण । ईशया परमेश्वर्या सह सायुज्यमैक्यं प्राप्तम् । चतस्रो हि मुक्तयः । सालोक्यं सामीप्यं सारूप्यं सायुज्यं चेति । तत्र सालोक्यं तल्लोकावाप्तिः । सामीप्यं तत्समीपावस्थितिलाभः । सारूप्यं तद्रूपावाप्तिः । सायुज्यं तदात्मतेति । अथ पूज्यमहिषस्वरूपमुक्तं **मात्स्ये** अग्रतो महिषं चैव त्रिशिरस्कं व्यवस्थितम् ॥ कण्ठच्छेदोद्गतं तस्य दानवं शूलपाणिनम् ॥ हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ॥ वेष्टितं नागपाशेन धृतकेशं च दुर्गया ॥ इति ॥ भविष्ये । तदग्रे च्छिन्नशिरसं महिषं रुधिराप्लुतम् ॥ निःसृतार्धतनुं कण्ठनालाच्चर्मासिधारणम् ॥ देवीकरधृतग्रीवं शूलेनोरसि ताडितम् ॥ दैत्यं करालदंष्ट्रास्यं नागपाशेन वेष्टितम् ॥ इति ॥ ३० ॥

अथ तद्वाहनस्य सिंहस्य पूजां विधत्ते **दक्षिणे** इति । देव्या दक्षिणे दक्षिणपार्श्वे पुरतः किञ्चिदग्रतः । देव्या वाहनं सिंहं पूजयेत् । कीदृशं

वाहनं पूजयेद्देव्या धृतं येन चराचरम् ॥ ३१ ॥
ततः कृताञ्जलिपुटः स्तुवीत चरितैरिमैः ।

सिंहम् । धर्मं धर्मरूपम् । कीदृशं धर्मं समग्रम् । सत्ययागतपोदानाख्यपादचतुष्टयसम्पन्नम्। पुनः कीदृशम् । ईश्वरं धर्मधारिणां ऐहिकपारलौकिकसुखदाने समर्थम् । पुनः कीदृशं येन चराचरं धृतम् । धर्मो विश्वस्य जगतः प्रतिष्ठेति श्रुतेः । धारणाद्धर्म इत्याहुरिति स्मृतेश्च । देवीपुराणे सिंहस्य सर्वदेवतात्मकत्वमुक्तं तद्यथा । ग्रीवायां मधुसूदनोऽस्य शिरसि श्रीनीलकण्ठः स्थितः श्रीदेवी गिरिजा ललाटफलके वक्षस्थले शारदा ॥ षड्वक्त्रो मणिबन्धसन्धिषु तथा नागास्तु पार्श्वस्थिताः कर्णौ यस्य तथाश्विनौ स भगवान् धर्मस्वरूपो हरिः ॥ यन्नेत्रे शशिभास्करौ वसुकुलं दन्तेषु यस्य स्थितं जिव्हायां वरुणस्तु हुंकृतिरियं श्रीचर्चिका चण्डिका ॥ गण्डौ यक्षयमौ तथोष्ठयुगलं सन्ध्याद्वयं पृष्ठके वज्री यस्य विराजते स भगवान् धर्मस्वरूपो हरिः ॥ ग्रीवासन्धिषु सप्तविंशतिमितान्यृक्षाणि साध्या हृदि प्रौढा निर्घृणता तमोऽस्य तु महाक्रौर्यैः समाः पूतनाः ॥ प्राणे यस्य तु मातरः पितृकुलं यस्यास्त्यपानात्मकं रूपे श्रीकमला कचेषु विमलास्ते स्यू रवे रश्मयः ॥ इति ॥ ३१ ॥

तत इति । ततः सिंहपूजनानन्तरं कृतं अञ्जलिपुटं करद्वयाञ्जलिसम्पुटं येन स कृताञ्जलिपुटः सन् इमैरेभिश्चरितैः प्रथममध्यमोत्तमैः स्तुवीत। इमैरिति छान्दसम् । कृताञ्जलिपुटतया चरितैः स्तवनविधानात्पुस्तकं विना केवलमुखेनैव पठनमर्थात्सिद्धम् । प्रकृतस्तवस्य सहस्रान्न्यूनत्वादियमुक्तिः । **उक्तं च** । पुस्तके वाचनं शस्तं सहस्रादधिकं यदि ॥ ततो न्यूनस्य तु भवेद्वाचनं पुस्तकं विना ॥ इति ॥ सहस्रादधिकं ग्रन्थसहस्रादधिकम् । स्तोत्रमिति शेषः । ग्रन्थश्च द्वात्रिंशदक्षरात्मकः । ग्रन्थो द्वात्रिंशदक्षरी इति

एकेन वामध्यमेन नैकेनेतरयोरिह ॥ ३२ ॥
चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात् ॥
स्तोत्रमन्त्रैः स्तुवीतेमां यदि वा जगदम्बिकाम् ॥३३॥

त्रिकाण्डीशेषः । अक्षराणि स्वराः । अतएवोक्तं **शक्तिसङ्गमतन्त्रे** । द्वात्रिंशता स्वरैर्युक्तो ग्रन्थ इत्यभिधीयते ॥ इति ॥ अशक्तौ पक्षान्तरमाह एकेन वेति । चरितत्रयपाठाशक्तौ इह चरितत्रये एकेन मध्यमेन मध्यमचरितेन स्तुवीत । तस्य त्रिगुणात्मकमूलप्रकृतिमहालक्ष्म्यवताराष्टादशभुजोत्पत्तिप्रभावादिप्रतिपादकतया चरितत्रयपाठफलदायकत्वादिति भावः । इतरयोः प्रथमोत्तमयोर्मध्ये एकेन अन्यतरेण न स्तुवीत । तयोरेकैकगुणात्मकमहाकालीमहासरस्वत्यवतारभूतदशाननाष्टभुजोत्पत्तिप्रभावादिप्रतिपादकतया समग्रसप्तशतीपाठफलजनकत्वाभावादिति भावः । एतेन तयोः समुच्चितयोरपि न पाठ इत्युक्तं भवति ॥

अथ पाठान्तरादि कृताञ्जलिपुटइत्यत्र कृताञ्जलिर्भूत्वेति इमैरित्यत्र इमामिति च क्वचित् पाठः ॥ ३२ ॥

मध्यमचरितमात्रपाठाभ्यनुज्ञानेऽपि तदेकदेशं न जपेदित्याह । **चरितार्धमिति** तथा जपे दोषमाह **जपन्निति** । छिद्रं दोषं प्रत्यवायं अवाप्नुयात् । छिद्रं विवरं रन्ध्रवत् ॥ गर्ते दोषेऽपीति **हैमः** । मध्यमचरित्रपाठेप्यशक्तौ तृतीयपक्षमाह । स्तोत्रमन्त्रैरिति । यदि वा अथ वा । इमां जगदम्बिकां जगन्मातरं स्तोत्रमन्त्रैः प्रथमचतुर्थपञ्चमैकादशाध्यायस्थैः समुच्चितैः स्तुवीत । अत्राप्यशक्तौ नमो देव्या इति स्तोत्रैः स्तुवीत जगदम्बिकामिति **चण्डिकार्चनरहस्यात्** केवलपञ्चमाध्यायस्थस्तवश्लोकैः स्तुवीत ॥

अथ पाठान्तरादि जपन्नित्यत्र जपादिति क्वचित्पाठः ॥ ३३ ॥

प्रदक्षिणानमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः ॥
क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः ॥३४॥

प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषा ।
जुहुयात् स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः ॥ ३५ ॥

प्रदक्षिणेति । प्रदक्षिणा च नमस्काराश्च प्रदक्षिणानमस्कारास्तान् । कृत्वा । अत्र प्रदक्षिणैका नमस्काराः पञ्चेति ज्ञेयम् । तदुक्तं **चण्डिकार्चनरहस्ये** । शूलेन पाहि नो देवीत्येतैः श्लोकैः प्रदक्षिणाम् ॥ विदध्यात्सुस्थिरो भूत्वा चतुर्भिर्ध्यानतत्परः ॥ नमो देव्या इतिश्लोकैः पञ्चभिर्ध्यानतत्परः ॥ कुर्यात् पञ्च नमस्कारान् येन माता प्रसीदति ॥ इति ॥ मूर्ध्नि शिरसि कृताञ्जलिः निहितकरद्वयाञ्जलिः सन् अतन्द्रितः अनलसः जगद्धात्रीं जगदम्बां मुहुर्मुहुः पुनः पुनः क्षमापयेत् अपराधक्षमापनश्लोकादिकं पठेन्नित्यर्थः ॥

अथ पाठान्तरादि आबन्तप्रदक्षिणाशब्दस्थले ह्रस्वान्तपाठे नपुंसकलिङ्गः प्रदक्षिणशब्दो ज्ञेयः ॥ ३४ ॥

अथ पूजाङ्गहोममाह **प्रतिश्लोकमिति** । चण्डिकायै चण्डिकामुद्दिश्य प्रतिश्लोकं कात्यायन्यादितन्त्रेषु सप्तशतधा विभक्तस्य देवीमाहात्म्यस्य प्रतिमन्त्रमित्यर्थः । श्लोकशब्दप्रयोगः श्लोकमन्त्रबाहुल्यात् । मन्त्रविभागश्च प्रत्यध्यायं व्याख्यारम्भे दर्शितः । तिलसर्पिपा तिलसाहितं सर्पिर्घृतं तिलसर्पिरिति मध्यमपदलोपीसमासः । तेन सह पायसं जुहुयात् । पायसं तिलान् सर्पिश्च पृथक् पृथक् जुहुयादित्येके । सर्पिस्तिलमिश्रं पायसं जुहुयादित्यन्ये । यथाचारं व्यवस्था । अशक्तौ पक्षान्तरमाह **जुहुयादिति** । वा अथ वा । स्तोत्रमन्त्रैः पूर्वोक्ताध्यायचतुष्टयान्तर्गतमन्त्रैः केवलपञ्चमाध्यायगतस्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः पूर्वोक्तं जुहुयात् ॥

प्रयतः प्राञ्जलिः प्रह्वः प्रणम्यारोप्य चात्मनि ॥
सुचिरं भावयेदीशां चण्डिकां तन्मयो भवेत् ॥ ३६ ॥

एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् ॥
भुक्त्वा भोगान् यथाकामं देवी सायुज्यमाप्नुयात् ॥३७॥

यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् ॥
भस्मीकृत्यास्य पुण्यानि निर्दहेत् परमेश्वरी ॥३८॥

अथ पाठान्तरादि एतदुत्तरं नमो नमः पदैर्देवीं पूजयेत्सुसमाहित इत्यर्थमधिकं क्वचित् पठ्यते ॥ ३५ ॥

प्रयत इति । प्रयतः शुद्धः । प्राञ्जलिः कृताञ्जलिः । प्रह्वो नम्रश्च सन् ईशामीश्वरीं चण्डिकां प्रणम्य नमस्कृत्य आत्मनि स्वहृदये आरोप्यावस्थाप्य च सुचिरं भावयेत् ध्यायेत् । ततस्तन्मयो भवेत् । या देवी सोऽहमेव हीति देव्यात्मनोरैक्यं भावयेत् ॥ ३६ ॥

अथ पूजायाः फलमाह **एवमिति** । यः पुरुषः एवं पूर्वोक्तप्रकारेण । अहन्यहनीति प्रत्यहं प्रतिदिनं भक्त्या परमेश्वरीं पूजयेत् स यथाकामं स्वमनोरथानुसारेण भोगानैहिकामुष्मिकानिष्टार्थान् भुक्त्वा अन्ते देव्याः सायुज्यं ऐकात्म्यं प्राप्नुयात् ॥

अथ पाठान्तरादि यथाकामानित्यपपाठः ॥ ३७ ॥

पूजाया अकरणे प्रत्यवायमाह **यो नेति** । यः पुरुषः भक्तवत्सलां चण्डिकां नित्यं प्रत्यहं न पूजयते अस्य अपूजकस्य पुण्यानि सुखहेतुभूतानि सुकृतानि भस्मीकृत्य दग्ध्वा । अभूततद्भावे च्विः । एनमपूजकमपि निर्दहेत् भस्मीकुर्याद्विनाशयेदित्यर्थः । एवं च पूजनस्य करणे महाफलोक्तेरकरणे च महाप्रत्यवायोक्तेः काम्यत्वं नित्यत्वं च ज्ञेयम् ॥ ३८ ॥

तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ॥
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि ॥ ३९ ॥

निगमयति **तस्मादिति** । हे भूपाल राजन् । तस्मात् करणे-इष्टफलदत्वादकरणे प्रत्यवायजनकत्वाच्चेत्यर्थः । सर्वलोकानां चतुर्दशभुवनानां महेश्वरीं स्वामिनीं चण्डिकां यथोक्तेन शास्त्रविहितेन पूर्वोक्तेन-विधानेन पूजय । तेन सुखमाप्स्यसि लप्स्यसे ॥ ३९ ॥

ॐ इति वैकृतरहस्यम् ॥

इतीति । विकृतीरवतारानधिकृत्योक्तं वैकृतम् । अधिकृत्य कृते ग्रन्थे इत्यण् । रहसि भवं रहस्यम् । असर्ववेद्यमित्यर्थः ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
वैकृतरहस्यव्याख्या ॥

अथ मूर्तिरहस्यम् ।

मूर्तिरहस्यस्य सुमेधा ऋषिः । अनुष्टुप् छन्दः । नन्दादिमूर्तिस्वरूपिण्यादिशक्तिर्महालक्ष्मीर्देवता । देवीमाहात्म्यजपोत्तराङ्गत्वेन जपे विनियोगः ॥

ॐ ऋषिरुवाच ॥

नन्दा भगवती नाम या भविष्यति नन्दजा ॥
सा स्तुता पूजिता ध्याता वशी कुर्याज्जगत्त्रयम् ॥ १ ॥

कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ॥

ऋषिरिति ॥

अथ आराध्यं यन्मया देव्याः स्वरूपमित्यत्र यत्पदस्य यद्यदिति वीप्सार्थत्वादेकादशाध्यायोक्तानां नन्दादिमूर्तीनां स्वरूपाण्यस्मिन् रहस्ये आह **नन्देत्यादिना** । काल्याः ब्राह्म्यादिसप्तमातृणां शिवदूत्याश्च स्वरूपाणां सप्तमाष्टमाध्याययोरुक्तत्वान्न पुनरिह तदुक्तिः । पूजाविधेः सामान्यतः सर्वासां तुल्यत्वान्न तस्य पृथगुक्तिरिति ज्ञेयम् । या भगवती नन्दा नाम नन्देति प्रसिद्धा । नन्दजा नन्दगोपकन्या भविष्यत्युत्पत्स्यते । सा स्तुता पूजिता ध्याता वा सती जगत्त्रयं वशीकुर्यात् अवशं वशं नयेत् । अभूततद्भावे च्विः । नन्दोत्पन्नत्वान्नन्दा । अर्श आद्यच् । भविष्यतीत्युक्तिः नन्दावतारात्पूर्वं राजर्ष्योः संवादस्य जातत्वात् । स्वरूपोक्तिस्तु पूर्वं कल्पान्तरे जातत्वात् । नन्दादीनां प्रादुर्भावकाला एकादशाध्यायव्याख्यायामुक्ताः ॥

अथ पाठान्तरादि ध्यातेत्यत्र भक्त्येति क्वचित् पाठः ॥ १ ॥

अथास्याः स्वरूपमाह **कनकेति** । सा देवी नन्दा कनकस्येवोत्तमा कान्तिर्यस्याः सा पीतवर्णेत्यर्थः । शोभना कान्तिर्यस्य तत्सुकान्ति सुप्रभं

देवी कनकदामाढ्या कनकोत्तमभूषणा ॥ २ ॥
कमलाङ्कुशपाशाब्जैरलङ्कृतचतुर्भुजा ॥
इन्दिरा कमला लक्ष्मीः सा श्री रुक्माम्बुजासना ॥ ३ ॥
या रक्तदन्तिका नाम देवी प्रोक्ता मयानघ ॥
तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् ॥४॥

कनकाम्बरं सुवर्णतन्तुनिमितं वस्त्रं यस्या सा सुकान्तिकनकाम्बरा । कनकदाम्ना सुवर्णमेखलया आढ्या युक्ता कनकदामाढ्या । कनकोत्तमस्य उत्तमसुवर्णस्य भूषणानि यस्याः सा कनकोत्तमभूषणा । अस्ति ॥

अथ पाठान्तरादि दामाढ्येत्यत्र वर्णाढ्येति वर्णाभेति वा । उत्तमभूषणेत्यत्रानन्तभूषणेति च क्वचित् पाठः ॥ २ ॥

अथास्या आयुधानि नामानि चाह । कमलाङ्कुशपाशाब्जैश्चतुर्भिरलङ्कृताश्चत्वारो भुजा यस्याः सा । अब्जोऽत्र शङ्खः । अब्जौ शङ्खशशाङ्कौ चेत्यमरः ॥ रुक्माम्बुजं सुवर्णकमलमासनं यस्याः सा रुक्माम्बुजासना च । सा इन्दिरा कमला लक्ष्मीः श्रीः । एतन्नामचतुष्टयवतीत्यर्थः । तत्र इन्दतीष्टे इतीन्दिरा । इदि परमैश्वर्ये । अन्यानि नामानि पूर्वं व्याख्यातानि इयं लक्ष्म्यवतारभूता ॥ ३ ॥

अथ रक्तदन्त्याः स्वरूपं वक्तुं प्रतिजानीते । येति । हे अनघ निष्पाप राजन् । अंहो दुःखव्यसनेष्वघमित्यमरः । एतेन राज्ञः पवित्रत्वाद्देव्याः स्वरूपश्रवणार्हत्वं सूचितम् । या मया एकादशाध्याये देवीवाक्यानुवादेन रक्तदन्तिका नाम देवी प्रोक्ता तस्याः सर्वभयान्यपहन्तीति सर्वभयापहं स्वरूपं वक्ष्यामि । तत् शृणु । रक्तदन्त्यादिनाम्नां व्युत्पत्तेरेकादशाध्याये उक्तत्वान्न पुनरत्र प्रदर्श्यते ॥ ४ ॥

रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा ॥
रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥ ५ ॥
रक्ततीक्ष्णनखा रक्तदशना रक्तदंष्ट्रिका ॥
पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम् ॥ ६ ॥
वसुधेव विशाला सा सुमेरुयुगलस्तनी ॥

अथास्याः स्वरूपमाह । **रक्तेति** । रक्ताम्बरा अरुणवसना रक्तवर्णा । लोहितप्रभा । रक्तानि माणिक्यघटितत्वाद्रक्तवर्णानि सर्वाङ्गेषु भूषणानि यस्याः सा रक्तसर्वाङ्गभूषणा ॥ रक्तानि शोभार्थमरुणरागरञ्जितत्वाच्छत्रुक्षतजलिप्तत्वाद्वा रक्तवर्णानि आयुधानि यस्याः सा रक्तायुधा । रक्तनेत्रा सदा क्रुद्धत्वात्स्वभावतो वारुणनयना । रक्तकेशा । एवं सर्वत्र रक्तवर्णत्वादातिभीषणा ॥ ५ ॥

रक्ततीक्ष्णेति । पुनः कीदृशी । रक्तानि तीक्ष्णानि च नखानि यस्याः सा रक्ततीक्ष्णनखा । रक्ता दशनाः पुरोदन्ता यस्याः सा रक्तदशना । रक्तदंष्ट्राः पार्श्वदन्ता यस्याः सा रक्तदंष्ट्रा सैव रक्तदंष्ट्रिका । स्वार्थे कन् । एवं सर्वावयवेषु रक्तत्वेऽपि दैत्यचर्वणेन दन्तेष्वतिरक्तत्वाद्रक्तदन्तीति नाम । **उक्तं** च पूर्वं भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ॥ रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥ इति ॥ इयं देवी अनुरक्ता नारी पतिमिव भक्तं जनं भजेत् । सेवेत । भक्तेच्छानुरोधेन सदा वर्तेत इत्यर्थः ।

अथ पाठान्तरादि एतदनन्तरं वत्सं माता यथा पाति वत्सं गौर्धावते यथा ॥ तथा देवी जनं पाति वात्सल्याद्भक्तितत्परम् ॥ इत्येकोऽधिकः श्लोकः क्वचित् पठ्यते ॥ ६ ॥

वसुधेवेति । सा रक्तदन्ती वसुधेव पृथिवीव विशाला महती । सुमेर्वोः कनकाचलयोर्युगलं युग्ममिव महत्वादिति भावः स्तनौ यस्याः सा

दीर्घालम्बावतिस्थूलौ तावतीव मनोहरौ ॥ ७ ॥
कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी ॥
भक्तान् सम्पाययेद्देवी सर्वकामदुधौ स्तनौ ॥ ८ ॥
खड्गं पात्रं च मुसलं लाङ्गलं च बिभर्ति सा ॥
आख्याता रक्तचामुण्डा देवी योगेश्वरीति च ॥ ९ ॥

सुमेरुयुगलस्तनी । स्वाङ्गाच्चेति वैकल्पिको ङीप् । सुमेरुयुगलस्याप्रसिद्धत्वादभूतोपमेयम् । कीदृशौ स्तनौ । तौ दीर्घौ अतः लम्बौ लम्बमानौ अतिस्थूलावपि अतीव मनोहरौ सुन्दरौ स्तः ॥ ७ ॥

उक्तयोः कार्यमाह ॥ **कर्कशाविति** । दीर्घत्वलम्बनत्वविशिष्टत्वेऽपि कर्कशावतिकठिनौ अतिकान्तौ परमसुन्दरौ सर्वान् कामान् भक्तमनोरथान् दुग्धः पूरयत इति सर्वकामदुघौ । दुहः कप् घश्च । अत एव सर्वेषामानन्दस्य सर्वसुखानां वा पयोनिधी सागरौ तौ स्तनौ देवीभक्तान् सम्पाययेत् । स्तनयोः कामदुघत्वात्ताभ्यां भक्तान् पूर्णमनोरथान् कुर्यादित्यर्थः ॥

अथ पाठान्तरादि सम्पाययेदित्यत्र सम्पादयेदिति क्वचित् पाठः ॥८॥

अस्या आयुधानि नामान्तराणि चाह । **खड्गमिति** । सा देवी खड्गं पात्रं पानपात्रं मुसलं लाङ्गलं च बिभर्ति । रक्तचामुण्डेति योगेश्वरीत्याख्याता च । रक्ता रक्तवर्णा चासौ चामुण्डा च रक्तचामुण्डा । एतेनेयं काल्या अवतार इति सूचितम् । योगस्य जीवेश्वरैक्यस्येश्वरी योगेश्वरी । उपासकानामद्वैतज्ञानप्रदेत्यर्थः । तदुक्तं देवीपुराणे । योगो जीवेशयोस्तस्य स्वामिनी ब्रह्मरूपिणीति ॥

अथ पाठान्तरादि पात्रमित्यत्र पाशमिति क्वचित् पाठः ॥ ९ ॥

अनया व्याप्तमखिलं जगत् स्थावरजङ्गमम् ॥
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥ १० ॥

अधीते य इमं नित्यं रक्तदन्त्या वपुस्तवम् ॥
तं सा परिचरेद्देवी पतिप्रियमिवाङ्गना ॥ ११ ॥

शाकम्भरी नीलवर्णा नीलोत्पलविलोचना ॥
गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी ॥ १२ ॥

एतत्पूजायाः फलमाह **अनयेति**। अनया रक्तदन्त्या अखिलं सर्वं स्थावरजङ्गमं जगत् व्याप्तम्। आदिशक्त्यभेदाभिप्रायेणेयमुक्तिः। यः इमां रक्तदन्तीं भक्त्या पूजयेत् स 'यथाक्रतुन्यायेन' स्वयमपि चराचरं व्याप्नोति व्याप्नुयात् स्वयं देवतास्वरूपस्स्यादित्यर्थः ॥ १० ॥

रक्तदन्त्याः स्वरूपवर्णनपद्यपाठस्य फलमाह **अधीते इति**। यः पुरुषः। इमं पूर्वोक्तं रक्तदन्त्याः वपुस्तवं स्वरूपवर्णनात्मकश्लोकसमूहं अधीते पठति। तं सा देवी रक्तदन्ती अङ्गना भार्या प्रियं प्रेमास्पदं पतिं भर्तारमिव परिचरेत् सेवेत। तद्वशंवदा स्यादित्यर्थः न तु पत्नीधर्मेण वर्तेत ॥ ११ ॥

अथ शाकम्भर्याः स्वरूपमाह। **शाकम्भरीति**। अस्य कार्मुकं च स्फुरत्कान्ति बिभर्ति परमेश्वरीति चतुर्थेनान्वयः। शाकम्भरी पदनिरुक्तिरेकादशाध्याये। मूले उक्ता तद्व्युत्पत्तिश्च तद्व्याख्यायां दर्शिता। नीलवर्णा कृष्णवर्णा। नीलोत्पले इव विलोचने यस्याः सा नीलोत्पलविलोचना गम्भीरा निम्ना नाभिर्यस्याः सा गम्भीरनाभिः। तिसृभिर्वलिभिर्विभूषितं शोभितं तनुं कृशमुदरं यस्याः सा त्रिवलीविभूषिततनूदरी। नासिकोदरेति वैभाषिको ङीप् ॥

अथ पाठान्तरादि। विलोचनेत्यत्र विभूषणेति क्वचित् पाठः ॥१२॥

सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी ॥
मुष्टिं शिलीमुखैः पूर्णकमलं कमलालया ॥ १३ ॥
पुष्पपल्लवमूलादिफलाढ्यं शाकसञ्चयम् ॥

सुकर्कशेति । समस्तमर्धमेकमेव पदम् । सुकर्कशावतिकठिनौ । समौ समानान्योन्यप्रमाणौ उत्तुङ्गावुन्नतौ वृत्तौ वर्तुलौ पीनौ पुष्टौ घनौ सान्द्रौ परस्परसंश्लिष्टावित्यर्थः स्तनौ यस्याः सा सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी । स्वाङ्गाच्चेति वैकल्पिको ङीष् । अत्र आदौ सुकर्कशसमपदयोः कर्मधारयं कृत्वा ततः पूर्वपूर्वसमस्तपदस्योत्तरोत्तरेणैकैकपदेन सह कर्मधारयो घनपदं यावत् । ततः समस्तस्य तस्य स्तनपदेन बहुव्रीहिः । गुणशब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोश्च परस्परं कर्मधारये यथेष्टं विशेषणविशेष्यभाव इति तत्त्वबोधिनी । कमलमालयो निवासस्थानं यस्याः सा कमलालया शाकम्भरी मुष्टिं दक्षाधोहस्तस्येत्यर्थः शिलीमुखैर्बाणविशेषैः पूर्णं चतुर्थश्लोकस्थेन बिभर्तीत्यनेनान्वयः । दक्षाधोहस्तमुष्टौ शिलीमुखसमूहं बिभर्तीत्यर्थः । अलिबाणौ शिलीमुखावित्यमरः । गोमणियष्टिमुष्टीति सूत्रेण मुष्टिशब्दः स्त्रीपुंसलिङ्गः । अत्र तु पुल्लिङ्गः पूर्णमिति पुल्लिङ्गविशेषणात् । तथा दक्षोर्ध्वहस्ते कमलं बिभर्ति ॥

अथ पाठान्तरादि पूर्णमित्यत्र पूर्णामिति पाठे मुष्टिशब्दस्त्रीलिङ्गः । शिलीमुखापूर्णमिति शिलीमुखापूर्णामिति वा पाठः क्वचित् तत्पक्षे पूर्णपदात्पूर्वमाकारसंयोगः ॥ १३ ॥

पुष्पेति । पुष्पपल्लवमूलानि आदीनि येषां तानि पुष्पपल्लवमूलादीनि । करीराग्रकाण्डाधिरूढत्वक्कवचानि षट् । एवं नव । तानि च फलं च पुष्पपल्लवमूलादिफलानि । तैराढ्यं सम्पन्नं दशविधमित्यर्थः । एतत्सर्वमेकादशा-

काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युजरापहम् ॥ १४ ॥
कार्मुकं च स्फुरत्कान्ति बिभर्ति परमेश्वरी ॥

ध्यायन्व्याख्यायां प्रपञ्चितम् ॥ काम्या अभिलषणीयाश्च ते अनन्तरसाश्च काम्यानन्तरसास्तैर्युक्तम् । रसानां मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधत्वेऽपि रसानुरससंयोगैस्तारतम्यपरिकल्पनया चानन्त्यम् । उक्तं **चाष्टाङ्गहृदये**। ते रसानुरसतो रसभेदास्तारतम्यपरिकल्पनया च ॥ सम्भवन्ति गणनां समतीता इति ॥ क्षुत् क्षुधा । तृट् तृषा । मृत्युः शरीरप्राण वियोगः । जरा वार्धकम् एता अपहन्तीति क्षुत्तृण्मृत्युजरापहस्तम् । शाकसञ्चयं शाकसमूहं वामोर्ध्वहस्ते बिभर्ति ॥

अथ पाठान्तरादि जरापदस्थाने भयपदपाठः क्वचित् ॥ शाकसञ्चयानिति बहुवचनान्तपाठः प्रामादिकः । तद्विशेषणानां सर्वेषामेकवचनान्तत्वात् ॥ १४ ॥

कार्मुकमिति। परमेश्वरी शाकम्भरी वामाधःकरे। स्फुरन्ती रत्नखचितत्वाद्भास्वरा कान्तिर्यस्य तत् स्फुरत्कान्ति कार्मुकं धनुश्च बिभर्ति । या शाकम्भरी सा शताक्षी । सैव दुर्गा प्रकीर्तिता । तत्तत्कार्यभेदान्नामभेदेऽप्यवतारस्यैकत्वादिति भावः । एकावतारत्वेऽपि भिन्नभिन्नफलार्थिभिस्तत्तत्कार्यप्रयुक्तभिन्नभिन्ननामरूपविशिष्टत्वेनैवोपासना कार्या। उक्तं च **विष्णुधर्मोत्तरे**। निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात् ॥ विभिन्नान्येव साध्यन्ते फलानि द्विजसत्तम ॥ यच्छक्तिमन्नाम यस्य तत्तस्मिन्नेव वस्तुनि ॥ साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तुषु ॥ इति ॥ अत एव वस्तुत एकस्याप्यवतारस्य शाकम्भरी शताक्षी दुर्गेति भिन्नभिन्ननामभिर्भिन्नभिन्नकुलेषूपासना दृश्यते । एतदभिप्रायेणैव नवार्णसप्तशत्योर्ऋष्यादिषु शाकम्भर्याः शक्तित्वेन दुर्गायाश्च बीजत्वेनोक्तिः । एतत्त्रयस्यैकावतारत्वमेकादशाध्याये स्पष्टम् ॥

शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥ १८ ॥
शाकम्भरीं स्तुवन् ध्यायन् जपन् सम्पूजयन्नमन् ॥
अक्षय्यमश्नुते शीघ्रमन्नपानादि सर्वशः ॥ १६ ॥

भीमापि नीलवर्णाभा दंष्ट्रादशनभासुरा ॥

अथ पाठान्तरादि शताक्षी सेत्यत्र शताक्षी स्यादिति क्वचित् पाठः। अत्र पूर्वार्धोत्तरं लोकानां जीवनार्थाय बिभ्रत्येतादृशं वपुः॥ अनावृष्टिहते देशे भुवि भूप भविष्यति ॥ दद्यात्सिद्धिं च सा देवी शरणागतवत्सला ॥ इति सार्धः श्लोकोऽधिकः उत्तरार्धोत्तरं उमा गौरी सती चण्डी कालिका पार्वती च सा इत्यर्धं च क्वचित् पठ्यते ॥ १५ ॥

अथ शाकम्भर्याः स्तुत्यादेः फलमाह । शाकम्भरीमिति । शाकम्भरीं स्तुवन् ध्यायन् तन्नामानि जपन् तां सम्पूजयन् नमन्नमस्कुर्वन् पुरुषः । अक्षय्यमविनाशि अद्यते तदन्नम् पीयते तत्पानम् तदादि सर्वशः सर्वं भोग्यजातम् । द्वितीयार्थे शस् तद्धितः। शीघ्रमविलम्बेन अश्नुते प्राप्नोति । अथ अश्नोतेर्व्याप्त्यर्थकत्वेऽपि धातूनामनेकार्थत्वात्प्राप्त्यर्थत्वम् । इयं सरस्वत्यवतारभूता ॥

अथ पाठान्तरादि अन्नपानादि सर्वश इत्यत्र अन्नपानादिकं फलमिति अन्नपानामृतफलामिति वा क्वचित् पाठः ॥ १६ ॥

अथ भीमायाः स्वरूपमाह भीमापीति । भीमा नाम्नी देवी तु अपिस्त्वर्थे । नीलवर्णा आभा कान्तिर्यस्याः सा नीलवर्णाभा । दंष्ट्राश्च दशनाश्च दंष्ट्रादशनं तेन भासुरा भास्वरा । विशाले लोचने यस्याः सा विशाललोचना । तुङ्गौ उन्नतौ वृत्तौ वर्तुलौ पीनौ पीवरौ घनौ कठिनौ

विशाललोचना तुङ्गवृत्तपीनघनस्तनी ॥ १७ ॥
चन्द्रहासं च डमरुं शिरःपात्रं च बिभ्रती ॥
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥ १८ ॥
तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत् ॥

च स्तनौ यस्या सा तुङ्गवृत्तपीनघनस्तनी । उत्तरश्लोकेनान्वयः । अवान्तरवाक्यत्वान्मन्त्रभेदः ॥

अथ पाठान्तरादि तुङ्गेत्यत्रोत्तुङ्गेति वा नारीति वा क्वचित् पाठः ॥१७॥

अस्या आयुधानि नामान्तरे चाह । **चन्द्रहासमिति** । चन्द्रहासं खड्गम् । डमरुं वाद्यविशेषम् । शिरो नृशीर्षम् । पानं सुराभाजनं च बिभ्रती । स्तुता सती कामदा मनोरथपूरयित्री । सा भीमैव एकवीरा कालरात्रिश्चोक्ता । एका चासौ वीरा चैकवीरा । लोकोत्तरवीर्यवतीत्यर्थः अथ वा पतिपुत्रवती वीरेति **नाममाला**कोशाल्लोकोत्तरसौभाग्यवती वा । उक्तं च **गुरुकलायाम्** । सुरासुरेन्द्रप्रजाच्युतादयोऽपि ये मृतेर्वशंवदा न तत् स्त्रियः सुवासिनीपदस्पृशः ॥ महेश्वरस्य मृत्युघस्मरस्य साक्षिणी तु या सुमङ्गलीरियं वधूरिमां समेत पश्यत ॥ इति ॥ अस्या महाकाल्यवतारत्वान्महेश्वरपत्नीत्वम् कालरात्रिपदं व्याख्यातपूर्वम् ॥

अथ पाठान्तरादि स्तुतेत्यत्र स्मृतेति क्वचित् पाठः ॥ १८ ॥

अथ भ्रामर्याः स्वरूपायुधनामान्याह तेज इति । भ्रामरी देवी तेजसो मण्डलेन सर्वतः प्रसरणशीलेन चक्रवालेन दुर्धर्षा दुःसहदर्शना । चित्रां भ्रमरवदनेकवर्णां कान्तिं बिभर्तीति चित्रकान्तिभृत् । चित्रा अनेकवर्णविशिष्टा

चित्रभ्रमरपाणिः सा महामारीति गीयते ॥ १९ ॥

इत्येता मूर्तयो देव्या आख्याता वसुधाधिप ॥
जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः ॥ २० ॥

इदं रहस्यं परमं न वाच्यं कस्यचित् त्वया ॥

भ्रमराः पाणिषु यस्याः सा चित्रभ्रमरपाणिः अस्ति । सा महामारीति गीयते शब्द्यते । महामारीपदं प्राग्व्याख्यातम् । इयमपि कार्यंशभूतैव ॥

अथ पाठान्तरादि चित्रभ्रमरपाणिः सेत्यत्र चित्रभ्रमरसङ्काशा इति क्वचित् पठ्यते । अत्र पूर्वार्धादनन्तरं चित्रानुलेपना देवी चित्राभरणभूषितेत्यर्धमधिकं क्वचित् पठ्यते ॥ १९ ॥

उपसंहरति इत्येता इति । हे वसुधाधिप राजन् । इति एवं प्रकारेण तव आख्याताः कथिता देव्याः जगन्मातुश्चण्डिकायाः एताः सर्वस्याद्या महालक्ष्मीरित्यादिभ्रामर्यन्ता मूर्तयः कीर्तिता उपवर्णिताश्चेत् लोकैरिति शेषः कामान् धिन्वन्ति दुहन्तीति कामधेनवः । कामपूरिण्यो भवन्तीति शेषः ॥
अथ पाठान्तरादि । आख्याता इत्यत्र व्याख्याता इति पाठः क्वचित् । कीर्तिता इत्यत्र भजतामिति पाठः भजतां कामधेनवः एताः देव्या जगन्मातुश्चण्डिकाया मूर्तयस्तव आख्याताः कथिता इत्यन्वयः ॥ २० ॥

रहस्यत्रयस्याध्ययनं विधत्ते । इदमिति इदमेतावतोक्तं दिव्यमूर्तीनां त्रिगुणात्मकमहालक्ष्म्यादिभ्रामर्यन्तानां व्याख्यानं स्वरूपगुणकर्मनामादिवर्णनं परमं रहस्यमत्यन्तगुह्यम् । तस्मात् त्वया कस्यचित् यस्मै कस्मैचित् नाख्येयं न कथनीयम् स्वयमेव अवहितः सावधानचित्तः सन्नधीष्व पठ ॥

व्याख्यानं दिव्यमूर्तीनामधीष्वावहितः स्वयम् ॥ २१ ॥
देव्या ध्यानं तवाख्यातं गुह्याद्गुह्यतरं मया ॥
गोपायस्व प्रयत्नेन सर्वकामफलप्रदम् ॥ २२ ॥ ॐ

अथ पाठान्तरादि कस्यचित्त्वयेत्यत्र यस्य कस्यचिदिति पाठः क्वचित् ॥ २१ ॥

देव्याइति । सर्वकामफलप्रदं गुह्याद्गुह्यतरं देव्याश्चण्डिकायाः । ध्यायते चिन्त्यते इति ध्यानम् । प्रकृतिविकृतिस्वरूपाणीत्यर्थः । जातित्वादेकवचनम् । मया तव आख्यातं । तत् प्रयत्नेन गोपायस्व स्वहृदये रक्ष । यस्मै कस्मैचिन्न ब्रूहीत्यर्थः ।

अथ पाठान्तरादि गोपायस्वेत्यत्र तस्मात्सर्वेति क्वचित् पाठः । इत उत्तरं सुताय चाप्यभक्ताय न दातव्यं कदाचन ॥ गोपनीयं प्रयत्नेन सत्यं सत्यं न संशयः ॥ सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि ॥ पाठमात्रेण चैतेषां मुच्यते सर्वकिल्बिषैः ॥ इति श्लोकद्वयमधिकं क्वचित् पठ्यते ॥२२॥

इति मूर्तिरहस्यम् ॥

इतीति । मूर्तीनां नन्दाद्यवताराणां रहस्यं स्वरूपादिकथनात्मकम् प्रसिद्धग्रन्थात्मकं गूढं वस्तु इति समासमित्यर्थः । अन्यान्यपि बीजरहस्यनित्यार्चनरहस्यकाम्यार्चनरहस्यादीन्युपलभ्यन्ते तथापि तानि शिष्टैः सप्तशत्यङ्गत्वेनापरिगृहीतत्वान्न व्याख्यायन्ते ॥

इति चण्डिकोपास्तिदीपिकायां चण्डीस्तवार्थप्रकाशे
मूर्तिरहस्यव्याख्या ॥

अथ देवीमाहात्म्यजपस्य तान्त्रिकमुत्तराङ्गम् ॥

जपान्ते ॐ ह्रीं हृदयायनमः । ॐ चं शिरसे स्वाहा । ॐ डिं शिखायै वषट् । ॐ कां कवचाय हुम् । ॐ यैं नेत्रत्रयाय वौषट् । ॐ ह्रीं चण्डिकायै अस्त्रायफट् । इति न्यासं कृत्वा । सर्वाद्यामगुणामलक्ष्यवपुषं व्याप्याखिलं संस्थितां लक्ष्यां च त्रिगुणात्मिकां कनकभां हेमादिभूषान्विताम् ॥ बीजापूरगदे च खेटकसुरापात्रे करैर्बिभ्रतीं योनिं लिङ्गमहिं च मूर्ध्नि दधतीं चण्डीं भजे चिन्मयीम् ॥ इति ध्यात्वा श्रीमदादिशक्तये नमः लं पृथिव्यात्मकान् गन्धान् कल्पयामीत्यादिपूर्वोक्तप्रकारेण मानसोपचारैः सम्पूज्य । नमो देव्यै महादेव्यै० इतिश्लोकमन्त्रेण योनिमुद्रया नमस्कृत्याञ्जलिं बध्वा । अज्ञानाद्विस्मृतेर्भ्रान्तेर्यन्न्यूनमधिकं जपे ॥ व्यत्यस्तं यत्र तत्सर्वं क्षमस्व परमेश्वरि ॥ बिन्दुमात्राविसर्गार्णपदवाक्यादिषु भ्रमात् ॥ लुप्तं व्यत्यस्तमधिकं तद्यथावदुमेऽस्तु मे ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं विधिच्युतम् ॥ यज्जप्तं हि मया देवि परिपूर्णं तदस्तु मे ॥ इति प्रार्थ्य । गुह्यातिगुह्यगोप्त्री त्वं गृहाण मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ इति भावनया जलोत्सर्गेण जपं निवेदयेत् । दीपं गन्धपुष्पादिभिः सम्पूज्य । गच्छ गच्छ परं स्थानं देव दीप नमोऽस्तु ते ॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ महाप्रभ ॥ इति दीपं विसृज्य । पुस्तकं चैलखण्डादौ बध्वा आसनादुत्थाय आसनदेवताभ्यो नम इत्यासनदेवता नमस्कृत्यासनमपसार्य तत्स्थाने शान्तिरस्त्विति जलं सिक्त्वा द्विराचामेदिति देवीमाहात्म्यजपोत्तराङ्गम् ॥ इति साङ्गोपाङ्गं सव्याख्यं देवीमाहात्म्यम्॥

अथ ग्रन्थसमाप्तिश्लोकाः ॥

करवीरपुरासन्नश्रीसिङ्गणपुरौकसा ॥
पूर्वजार्जिततत्रत्याग्रयाहारावनिवृत्तिना ॥ १ ॥

पित्रइत्यन्ववायोत्थनाम्नात्माराशर्मणा ॥
अधीतपाणिनीयेन विप्रेण हरिसूनुना ॥ २ ॥

वसुत्रिनागेन्दुमितशाकेषष्टितमेऽब्दके ॥
वयसः शङ्कराचार्यजगद्गुरुमहासनम् ॥ ३ ॥

करवीरास्थितं सर्ववन्द्यं समधितिष्ठता ॥
विद्यानृसिंहभारत्याह्वयेन यतिना मया ॥ ४ ॥

दन्तीषुनागेन्दुमिते १८५८ शालिवाहशकाब्दके ॥
कृता श्रीचण्डिकोपास्तिदीपिकाज्ञहितैषिणा ॥ ५ ॥

काले वर्षतु मेघः सस्यैः पूर्णास्तु सन्ततं वसुधा ॥
लोका नृपाश्च सर्वे परस्परहिताय सम्प्रवर्तन्ताम् ॥ ६ ॥

मम देयानदत्त्वैव सकलार्थान्महेश्वरि ॥
ऋतप्रज्ञे कथङ्कारं धृतापर्णेति वै प्रथा ॥ ७ ॥

इति चण्डिकोपास्तिदीपिकायां नवमश्चण्डीस्तवार्थप्रकाशः समाप्तः

चण्डिकोपास्तिदीपिका समाप्ता ।

श्रीमहालक्ष्मीः प्रसन्नास्तु ॥

श्री शंकराचार्य पीठ करवीर
आज अखेर पीठाकडे असलेले शंकराचार्य

१) ब्र. भू. श्री. अथणीकर महाराज

२) ब्र. भू. श्री. ब्रम्हनाळकर महाराज

३) ब्र. भू. श्री. पित्रे महाराज

४) ब्र. भू. श्री. मारूळकर महाराज

५) ब्र. भू. श्री. आळतेकर महाराज

६) प. पू. विद्याशंकर भारती महाराज

श्रृति स्मृति पुराणानामालयम् करूणालयम्
नमामि भगवत्पादम् शङ्करम् लोकशंकरम् ॥
शङ्करं शङ्कराचार्यम् केशवम् बादरायणम्
सूत्रभाष्य कृतौ वन्दे भगवन्तौ पुनः पुनः ॥
गुरु र्ब्रम्हा गुरु र्विष्णुः गुरु र्देवो महेश्वरः
गुरु रेव परं ब्रम्ह तस्मै श्री गुरवे नमः ।

कव्हर छपाई : नवरंग ऑफसेट, कोल्हापूर.